॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १४ – द्वितीयाध्यायः

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १४

द्वितीयाध्यायस्य द्वितीयपादे

रचनानुपपत्त्यधिकरणम् तः वैशेषिकाधिकरणम्

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता

सम्पुटम् – १४

प्रथमं मुद्रणम् - ई.सन् २००७

Śrīman-Nyāyasudhā
Parimaḷādyupetā

Volume - 14

First Edition -2007 A.D.

सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा, बुधवासरः

मन्त्रालयम्

Published by :

Śrī Guruśārvabhauma Saṁskṛt Vidyāpīṭham
Śrīman Madvāchārya Mūla Mahāsamsthāna
Śrī Rāghavendra Swāmy Mutt
Mantrālayam - 518 345
India.

* *मुद्रकः* *

धनंजयाचार्य बाळाचार्य वरखेडकरः

सुधा मुद्रणम्
शंकरपुरम्, बेंगळूर - ५६० ००४
दूरवाणी– २६७२ ३१०७, ६५६० २८३६

SUDHA MUDRANA
Shankarpuram, Bangalore - 560 004
Phone : 2672 3107, 6560 2836

समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्यत्वाद्यमन्दबिरुदवृन्दविभूषित-
सर्वतन्त्रस्वतन्त्र-श्रीमद्वैष्णवसिद्धान्तस्थापनाचार्य-
षड्दर्शनाचार्यवर्य-नास्तिकदर्शननिराकरणधुरन्धर-
आस्तिकदर्शनमहाचार्य-
श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक-

श्रीमन्मध्वाचार्यसमलङ्कृतमूलमहासंस्थानाधिष्ठितानां

श्रीमद्द्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

श्रीश्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-

श्रीरामकृष्णवेदव्यासाभिन्न-

श्रीमूलरघुपतिपादकमलयोः

समर्पितोऽयं ग्रन्थः ॥

सुजयीन्द्रकृपापूर्णसुशमीन्द्रयतीश्वरैः ।
श्रीमन्न्यायसुधाग्रन्थ अर्पितोऽयं मुदा हरेः ॥

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमद्धंसनामकपरमात्मसमारब्धपरम्परागत-श्रीमत्परमहंसेत्यादिबिरुदभूषित-

श्रीमदानन्दतीर्थभगवत्पादाचार्य-मूलमहासंस्थानाधीश्वर-

श्रीमद्राघवेन्द्रगुरुसार्वभौम-

वेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वर-

श्रीमत्सुयमीन्द्रतीर्थश्रीपादकरकमलसञ्जात-श्रीमत्सुजयीन्द्रतीर्थश्रीपादवरकुमारक-

श्री श्रीमत्सुशमीन्द्रतीर्थश्रीपादानाम्

तथा तेषामुत्तराधिकारिणां

श्री श्रीमत्सुयतीन्द्रतीर्थश्रीपादानाम्

अनुग्रहवचनम्

अस्मत्प्रियशिष्यान् तथैव अस्मन्मठीयान् नैकान् आस्थानविद्वज्जनान् वयम् अस्मद्गुरुवराणां श्रीमत्सुजयीन्द्रतीर्थश्रीमच्चरणानामाज्ञामनुरुध्य परिमलादि-बहुटिप्पणीभिर्युक्तां श्रीमन्न्यायसुधां संशोध्य प्रकाशयितुमादिष्टवन्तः स्मः।

अस्मदादेशमनुरुध्य ग्रन्थमिमं संशोध्य मुद्रणप्रतिमपि संशोधितवद्भ्यः प्रधानसम्पादकेभ्यः वैकुण्ठवासिभ्यः साणूरु भीमभट्टेभ्यः तथा ग्रन्थमिमं प्रकाशितवद्भ्यः श्रीगुरुसार्वभौमसंस्कृत-विद्यापीठीयेभ्यः एवं ग्रन्थसंशोधने तथा मुद्रणप्रतिसंशोधने च सहायमाचरितवद्भ्यः अस्मद्विद्यापीठाध्यापकेभ्यः, तथाऽन्येभ्यो विद्वद्भ्यः, एवमल्पकाले सुष्ठु मुद्रणं कृतवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः धनंजयाचार्येभ्यः तथा सर्वेभ्यः एतद्ग्रन्थाध्ययन-अध्यापनादिकर्तृभ्यः अस्मदुपास्यः श्री श्रीमद्राघवेन्द्र-तीर्थगुर्वन्तर्गत-श्रीभारतीरमण-मुख्यप्राणान्तर्गत-श्रीसीतापति-श्रीमूलरामचन्द्रदेवः इतोऽप्यतिशयित-आयुरारोग्यैश्वर्यादीनि, ज्ञानभक्तिवैराग्यादीनि च दत्वा अनुगृह्णातु इत्याशास्महे ।

इति नारायणस्मृतिः।

मन्त्रालयक्षेत्रम्,
सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा।

श्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां

श्री श्री सुजयीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

श्री श्री सुशमीन्द्रतीर्थश्रीपादानां

परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।

सम्पादकविद्वन्मण्डली

प्रधानसम्पादकाः

वैकुण्ठवासिनः श्री आचार्य साणूरु भीमभट्टाः

आस्थानविद्वांसः, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

सम्पादकाः

विद्वान् श्री कुर्डि सुशीलेन्द्राचार्याः

विद्वान् श्री कडप राघवेन्द्राचार्याः, *प्रांशुपालाः श्री गु.सं.वि., मन्त्रालयः*

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः

निर्वाहकाः

श्रीपादपुत्राः राजा एस्. राजगोपालाचार्याः

श्री श्री सुशमीन्द्रतीर्थश्रीपादानाम् आप्तकार्यदर्शिनः,
श्रीमन्मध्वाचार्यमूलमहासंस्थानम् - श्रीराघवेन्द्रस्वामिमठः,
मन्त्रालयम्

श्रीमन्न्यायसुधा – परिमळाद्युपेता

टिप्पणीनां क्रमः तथा सङ्क्षिप्तनामानि

क्र.सं.	कर्तृनाम	टिप्पणीनाम	सङ्क्षिप्तनाम
१	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः	बिन्दुः—
२	श्री राघवेन्द्रतीर्थाः	परिमळः	परि०—
३	श्री श्रीपादराजतीर्थाः	वाग्वज्रः	वाग्वज्रः—
४	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका	गु०दी०—
५	श्री यदुपत्याचार्याः	टिप्पणी	यादु०—
६	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः	वं०प०—
७	श्री गलगली नरसिंहाचार्याः	आनन्दः	आनन्दः—
८	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः	कं०रा०—
९	श्री श्रीनिधितीर्थाः	टिप्पणी	श्रीनिधि०—
१०	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका	वा०चं०—
११	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका	शे०चं०—
१२	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला	वा०र०—
१३	श्री सत्यव्रततीर्थाः	सुधाविवृतिः	स०व्र०—
१४	श्री कुण्डलगिरिआचार्याः	रसकूलङ्कषः	कुण्डल०—
१५	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः	स०ना०—
१६	श्री विट्ठलभट्टाः	टिप्पणी	विट्ठ०—
१७	श्री विष्णुतीर्थाः	रसरञ्जनी	रस०—
१८	श्री अडवी कृष्णाचार्याः	लघुरसरञ्जनी	ल०र०—
१९	श्री मन्नारी कृष्णाचार्याः	चषकः	चषकः—
२०	श्री एरी बाळाचार्याः	उपस्पर्शः	ए०बा०—
२१	श्री काशी आचार्याः	काशी टिप्पणी	काशी०—
२२	श्री गूढकर्तृकाचार्याः	गूढकर्तृका	गूढ०—
२३	श्री प्रदीपकाराः	प्रदीपः	प्रदीपः—
२४	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी	पांग्री०—
२५	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि	हुग्गि०—

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातृणामभिप्राय एव। सः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

सम्पादकाः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्टयधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्चैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	**व्याख्यानस्य नाम**
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गलगली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः

९)	श्री श्रीनिधितीर्थाः	टिप्पणी
१०)	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका
११)	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला
१२)	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका
१३)	श्री कुण्डलगिरि आचार्याः	रसकूलङ्कषः
१४)	श्री सत्यव्रततीर्थाः	सुधाविवृतिः
१५)	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः
१६)	श्री विट्ठलभट्टाः	टिप्पणी
१७)	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि
१८)	श्री विष्णुतीर्थाः	रसरञ्जनी
१९)	श्री अडवि कृष्णाचार्याः	लघुरसरञ्जनी
२०)	श्री मन्नारि कृष्णाचार्याः	चषकः
२१)	श्री एरी बाळाचार्याः	उपस्पर्शः
२२)	श्री काशी तिम्मण्णाचार्याः	काशी टिप्पणी
२३)	श्री गूढकर्तृकटिप्पणीकाराः	टिप्पणी
२४)	श्री प्रदीपकाराः	प्रदीपः
२५)	श्री पांघ्री श्रीनिवासाचार्याः	टिप्पणी
२६)	श्री रोट्टि वेङ्कटभट्टाः	सुधाविवृतिः
२७)	श्री ताम्रपर्णी आचार्याः	टिप्पणी
२८)	श्री उमर्जी प्रह्लादकृष्णाचार्याः	उमर्जी
२९)	श्री व्यासतत्त्वज्ञतीर्थाः	कुलिशम्
३०)	श्री महेश्वरसूरिः	टिप्पणी
३१)	श्री पुट्ट तंबि आचार्याः	टिप्पणी
३२)	श्री रत्नगर्भ ओडेयर्	टिप्पणी
३३)	श्री अनन्तभट्टाः	टिप्पणी
३४)	श्री सत्यनाथाचार्याः	टिप्पणी
३५)	श्री जयवेङ्कटाचार्याः	टिप्पणी
३६)	श्री गूढकर्तृकाचार्याः	सुधासारसङ्ग्रहः
३७)	श्री गलगली गोविन्दाचार्याः	पञ्चरत्नस्तबकः

३८)	श्री श्रीमुष्णाचार्याः	पञ्चाधिकरणी
३९)	श्री लिङ्गेरि श्रीनिवासाचार्याः	सिद्धान्तप्रभा
४०)	श्री पाण्डुरङ्गि केशवाचार्याः	सुधावाक्यार्थविनोदः
४१)	श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः)	टिप्पणी
४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विट्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्प-यामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य प्रधानसम्पादकेभ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, तथा

विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांध्री श्रीनिवासाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री पांध्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृति-संशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन् राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूल-रघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

* * *

॥ श्रीमन्मूलरामो विजयते ॥

प्रस्तावना

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्ख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमशकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसंबन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । तस्यास्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं प्रविश्य स्वगुरूणां विद्यारण्यारण्यछेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकीन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त जयतीर्थश्रीमच्चरणाः। तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यान्तः, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके टीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः।

महानुभावाः जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन्।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः। तद्यथा—

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम्॥

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति। एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम्। एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म। यथा—

आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं
मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम्।
शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः
व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम्॥

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्रय अत्र प्रकाशं नीयते। महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनसमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम्। श्रीकृष्णार्पणमस्तु॥

आचार्याः साणूरु भीमभट्टाः
प्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

सम्पुटम् – १४

रचनानुपपत्त्यधिकरणम् तः वैशेषिकाधिकरणम्

विषयानुक्रमणिका

विषयः	परिच्छेदः	पुटसंख्या
रचनानुपपत्त्यधिकरणम् (२-२-१ - १ तः ४ सूत्राणि)	१ तः ८९	६५०१-६७५७
(१) अस्मिन्द्वितीयपादे निवार्यमाणायाः शङ्कायाः प्रदर्शनम्	१	६५०१-६५०५
(२) पादारम्भसमर्थनम्	२-११	६५०५-६५४३
अ) एतत्पादीयानारम्भणीयत्वशङ्कानिरासः	२-११	६५०५-६५४३
१) प्रयोजनाभावमूलकानारम्भणीयत्वशङ्का	२	६५०५-६५०९
२) मतान्तरोक्तैतत्पादप्रयोजनदूषणम्	३-४	६५०९-६५१२
क) कश्चिदित्युक्तमतोक्तैतत्पादप्रयोजनदूषणम्	३	६५०९-६५१०
ख) अपरेत्युक्तमतोक्तैतत्पादप्रयोजनदूषणम्	४	६५११-६५१२
३) स्वमतानुसारेणैतत्पादप्रयोजनाभावशङ्कानिरसनम्	५-११	६५१३-६५४३
क) दर्शनानामभियोगतः प्रवृत्तत्वात् उक्तेऽर्थे पुनर्मन्दस्य शङ्कोद्भवः	५-६	६५१३-६५२३
१) कपिलादिमतानां प्रवाहतोऽनादित्वात् उच्छेदाभावेन मन्दस्य तच्छङ्कासम्भवः	६	६५१५-६५२३
ख) तन्निरसनार्थञ्च उपायः	७-९	६५२३-६५३५

विषयः	परिच्छेदः	पुटसंख्या
१) तन्निरसनार्थं तन्मतानां भ्रान्तिमूलत्वस्य विस्तरेण स्फुटदर्शनम्	७-८	६५२३-६५२६
च) तन्निरसनाशाक्यताशङ्कानिरासः	८	६५२६-६५२९
२) भ्रान्तिमूलत्वे समानेऽपि समयानां उन्मत्तवाक्याद्वैलक्षण्ये कारणम्	९	६५२९-६५३५
ग) तन्निरासवैयर्थ्यशङ्कापरिहारः	१०-११	६५३५-६५४१
१) सज्जनगतकुसमयाहिताज्ञाननाशकत्वात् तन्निरासस्सार्थक्यम्	१०	६५३५-६५४१
२) तथात्वेऽपि ब्रह्मादिभिरादर्तव्यत्वे कारणम्	११	६५४१-६५४३
(३)आद्याधिकरणे निराक्रियमाणस्य निरीश्वरसाङ्ख्य(विन्ध्य)मतस्य स्थितिदर्शनम्	१२-२१	६५४३-६५८०
अ) एतेषाम् 'ईश्वरमनभ्युपगम्य जीवजडात्मकतत्त्वद्वयमात्र'वादित्वम्	१२	६५४३-६५४५
आ) तन्मतोक्तस्य तत्त्वविभागान्तरस्य विरोधाभावदर्शनम्	१३	६५४५-६५५१
इ) चेतनाचेतनयोर्मध्ये भेदाभेदयोर्व्यवस्था	१४	६५५१-६५५४
ई) उक्तार्थस्य विवरणम्	१५-१६	६५५५-६५६७
१) अचेतनस्य स्वातन्त्र्येण कर्तृत्वम्	१५	६५५५-६५६१
२) अचेतनेषु भेदाभावोक्तेः विवरणम्	१६	६५६१-६५६७
उ) साङ्ख्यमतभेदः	१७-२१	६५६७-६५८१
१) चेतनस्य भोक्तृत्वाभोक्तृत्वाभ्यां मतद्वैविध्यम्	१७	६५६७-६५७१
२) चेतनस्य भोक्तृत्वं वदतां मतानुसारेण 'चेतनस्य कर्तृत्वाभावेऽपि भोक्तृत्वो'पपादनप्रकारः	१८	६५७१-६५७३
३) अभोगवादिनां मतानुसारेण भोगस्वरूपम्	१९	६५७३-६५७४
४) भोगवादिनां मोक्षस्वरूपम्	२०	६५७४-६५८०
५) अभोगवादिनामपि मोक्षस्वरूपं तदेव	२१	६५८०-६५८१
(४)उपन्यस्तमतस्य (साधारणदूषणैः) निरासः	२२-८९	६५८२-६७५८
अ) प्रथमसूत्रव्याख्यानम्	२२-६९	६५८२-६७०५

विषयः	परिच्छेदः	पुटसंख्या
१) स्वपक्षसाधनम्	२२-३१	६५८२-६६०७
क) व्याख्यानक्रमव्यत्यासप्रयोजनकथनपूर्वकं उक्तयोर्द्विविधसाङ्ख्यमतयोरयुक्तता	२२-३१	६५८२-६६०७
१) तदयुक्तताया: समर्थनम्	२२-३१	६५८२-६६०७
च) ईशस्यासङ्गहादेव न युक्तौ तावुभावपि	२२	६५८२-६५८४
छ) अयुक्तत्वाभावशङ्का तन्निरसनञ्च	२३-३१	६५८४-६६०७
१) ईश्वरे प्रमाणसद्भावात् तन्मतस्यायुक्तता	२३	६५८४-६५८७
२) बाधाश्रयासिद्धिशङ्का तन्निरसनञ्च	२४	६५८७-६५९०
३) उद्भवपदार्थनिर्वचनायोगः	२५	६५९१-६५९४
४) 'असदकरणात्' इत्यादौ साध्यानुपपत्तिः	२६	६५९४
५) 'असतः कर्मत्वे' आक्षेपसमाधाने	२७	६५९५-६५९९
६) कार्यजनने कार्यकारणयोः सम्बन्धासम्बन्धविवेकः	२८	६५९९-६६०१
७) तन्तुपटयोरभेदानुमाने विवेकः	२९	६६०२-६६०३
८) पटस्य तन्तुधर्मत्वविवेचनम्	३०	६६०४-६६०६
९) कार्यत्वनिर्वचनम्	३१	६६०६-६६०७
१) परपक्षनिरसनम्	३२-६८	६६०८-६७००
क) साङ्ख्योक्तार्थे 'प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे' प्रमाणाभावः	३२-६७	६६०८-६६९८
१) तत्र प्रत्यक्षप्रमाणाभावः	३२	६६०९
२) तत्र आगमप्रमाणाभावः	३४-४५	६६०९-६६२६
च) तत्रापौरुषेयागमप्रमाणाभावः	३४	६६०९-६६१०
छ) तत्र पौरुषेयागमप्रमाणाभावः	३५-४५	६६११-६६२६
१) श्रुतीतिहासपुराणानां अस्मन्मतानुसारित्वम्	३५	६६११-६६१४
२) साङ्ख्याचार्यस्य च आप्तत्वानुपपत्तिः	३५-४५	६६११-६६२६
ट) श्रुतिविरुद्धभाषित्वादिना तस्याप्तत्वानुपपत्तिः	३५	६६११-६६२४
ठ) अनुपपन्नभाषित्वाच्च तस्याप्तत्वानुपपत्तिः	३६-४५	६६१४-६६२६

विषयः	परिच्छेदः	पुटसंख्या
४-अ-२-क-२-छ-२-ठ-		
१) ज्ञानानां प्रामाण्याप्रामाण्ययोः स्वतस्त्वाङ्गीकारः	३६-४५	६६१४-६६२६
त) मायिवदस्यापि स्वोक्ताखिलनिषेधित्वापत्तिः	३७-४५	६६१५-६६२६
१) तत्र विकल्पत्रयस्याप्यनुपपत्तिः	३७-४२	६६१५-६६२०
प) विकल्पत्रयम्	३७	६६१५
फ) आद्यविकल्पानुपपत्तिः	३८-४०	६६१६-६६१९
१) मायिवदिति दृष्टान्तस्य स्पष्टीकरणम्	३८	६६१६-६६१७
२) अनुव्याख्यानगतमायिपदप्रयोगस्य साधुता	३९	६६१७-६६१८
३) तथात्वे (परस्परविरोधे) न च किञ्चित्प्रसिद्ध्यति	४०	६६१८-६६१९
ब) द्वितीयविकल्पानुपपत्तिः	४१	६६१९-६६२०
भ) तृतीयविकल्पानुपपत्तिः	४२	६६२०
२) पुनस्त्रिविधाभ्यधिकाशङ्कापरिहारः	४३-४५	६६२०-६६२६
प) प्रथमाभ्यधिकाशङ्कापरिहारः	४३	६६२०-६६२१
फ) द्वितीयाभ्यधिकाशङ्कापरिहारः	४४	६६२१-६६२४
ब) तृतीयाभ्यधिकाशङ्कापरिहारः	४५	६६२४-६६२६
४-अ-२-क-		
१) तत्रानुमानप्रमाणाभावः	४६-६८	६६२६-६७००
च) विविधानुमानानि	४६	६६२६-६६३४
छ) एतेषामनुमानानां साध्यसम्बन्धश्च	४७	६६३५
ज) एतेषामनुमानानां (मूलोक्त**साधारण**दोषैः) दूषणम् (सत्प्रतिपक्षत्वम्)	४८	६६३५-६६३८
झ) उक्तार्थस्य विवरणम्	४९-६८	६६३८-६७००
१) प्रतिपक्षान्तरम्	४९-६८	६६३८-६७००
ट) अप्रयोजकत्वशङ्का तथा स्वव्याघातेन प्रमाणविरोधेन च तन्निरासः	५०-६७	६६३९-६६९८

विषयः	परिच्छेदः	पुटसंख्या
४-अ-२-क-३-झ-१-ट-		
१) स्वव्याघातोपपादनम्	५१-५३	६६४१-६६५१
त) स्वातन्त्र्यव्याख्या	५१	६६४१-६६४५
थ) इच्छायाः स्वसमानाश्रयचैतन्यकार्यत्वम्	५२	६६४५-६६४६
द) अचेतनत्वस्वातन्त्र्ययोर्विरोधो न साक्षात् अपि तु स्वातन्त्र्यबलेन चैतन्याङ्गीकरणद्वारा	५३	६६४६-६६५१
२) प्रमाणविरोधोपपादनम्	५४-६७	६६५१-६६९८
त) प्रत्यक्ष-अनुभवविरोधः	५४-६७	६६५१-६६९८
१) 'तस्य भेदाग्रहनिमित्तव्यवहारमात्रत्वं न त्वनुभवत्वम्' इतिपक्षस्य दूषणम्	५५-६७	६६५३-६६९८
प) 'गृह्यमाणयोर्भेदाग्रहस्य व्यवहारहेतुत्वं न भेदाग्रहमात्रस्य' इतिपक्षस्य खण्डनम्	५५-६७	६६५३-६६९८
१) तत्र 'कथं स न घटः स्यात्' इत्यनुव्याख्यानस्य अष्टधा व्याख्यानम्	५६-५७	६६५७-६६६५
य)अस्य विशिष्टस्य भेदाग्रहस्य अन्तःकरणधर्मत्वं आत्मधर्मत्वञ्चानुपपन्नम्	५६	६६५७-६६६०
र) भेदाग्रहादन्तःकरणधर्मभूतेच्छायाः आत्मनि व्यवहर्तव्यत्वानुपपत्तिः	५७	६६६०-६६६२
२) 'मनो म' इतिवत् 'अहमिच्छामि' इति व्यवहारस्य अनुभवनिमित्तत्वमेव न तु भेदाग्रहनिमित्तत्वम्	५८-६७	६६६३-६६९८
य)मनसः साक्षिवेद्यत्वम्	५९-६७	६६६५-६६९८
१) मनसश्चक्षुरादिप्रत्यक्षावेद्यत्वम्	६०	६६६६-६६६८
२) मनसोऽनुमानावेद्यत्वम्	६१-६३	६६६८-६६८०
३) मनसि आगमप्रमाणाभावः	६४-६७	६६८१-६६९८
४-अ-२-क-३-झ-१-		
ठ) उक्तानां व्याघातादिदोषाणां 'अचेतनस्य प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वं' साधयत्स्वनुमानेष्वपि निर्देशः	६८	६६९८-६७००

विषयः	परिच्छेदः	पुटसंख्या
४-अ-		
३) प्रथमसूत्रव्याख्यानोपसंहारसहितं 'नानुमानम्'इतिसूत्रांशस्य प्रकारान्तरेण व्याख्यानम्	६९	६७००-६७०५
आ) द्वितीयतृतीय-'पयोम्बुवच्चेत्तत्रापि', 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्'-इत्युत्तरसूत्रद्वयव्याख्यानम्	७०-७१	६७०५-६७१२
१) 'पयोम्बुवच्चेत्तत्राऽपि' इतिसूत्रव्याख्यानम्	७०	६७०५-६७१०
क) कारकान्तराप्रयोज्यत्वलक्षणमपि स्वातन्त्र्यं प्रधानस्य नोपपद्यते	७०	६७१०-६७१२
२) 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्' इतिसूत्रव्याख्यानम्	७१	६७११-६७१२
ख) अस्य सूत्रस्य पयोम्बुवदित्युदाहरणादरणप्रयोजक-सम्भावनाव्यभिचारशङ्कानिरासकत्वम्	७१	६७११-६७१२
इ) साङ्ख्योक्तार्थे तैः प्रमाणत्वेनोदाहृतानुमानानाम् **असाधारण**दोषैर्निराकरणम्	७२-८४	६७१३-६७४६
१) 'आत्मन एवेच्छावत्त्वं न त्वचेतनस्य' इत्युक्तार्थभङ्गशङ्का तन्निरसनञ्च	७२-८४	६७१३-६७४६
क) कामादेः द्वैविध्येऽपि आत्मस्वामित्वमपोदितुं न शक्यम्	७३	६७२०-६७२४
ख) इच्छावत्त्वस्य इच्छास्वामित्वार्थकत्वम्	७४	६७२४-६७२६
ग) कामद्वैविध्योक्त्या प्रसक्तस्य अचेतनकर्तृकत्वस्य निरासः, तत्राक्षेपपरिहारश्च	७५	६७२६-६७२७
घ) इच्छास्वामित्वासम्भवशङ्का तन्निरासश्च	७६	६७२७-६७२८
ङ) 'इतरव्यपदेशात्' इत्यधिकरणविरोधशङ्का तन्निरासश्च	७७	६७२९-६७३३
कक) 'आत्मनः कामस्वामित्वा'नुभवस्य अपवादशङ्का, तत्समाधानं, तत्समर्थनञ्च	७८-८४	६७३३-६७४६
४-इ-१-कक-		
१) 'श्रुतेः अनुभवापवादकत्व'स्य अयुक्तत्वम्	७८-८४	६७३३-६७४६
च) उपजीव्यविरोधे वेदस्य तदन्याभिधायित्वम्	७९	६७३६
छ) उपपत्तिविरोधाच्चायुक्तत्वम्	८०-८४	६७३७-६७४६
१) आपादकम्-(भविष्यन्मुक्तपुरुषान्मोक्षकामस्यान्यत्वे)	८०	६७३७-६७३८
२) आपाद्यप्रदर्शनम्	८१-८४	६७३८-६७४६
ट) मोक्षकामस्य स्वप्रयोजनाभावः	८१	६७३८-६७३९

विषयः	परिच्छेदः	पुटसंख्या
ठ) स्वनाशार्थञ्च प्रयत्नानुपपत्तिः	८२-८४	६७४०-६७४६
१) अभ्यधिकाशङ्कानिरासः	८३	६७४१-६७४३
२) प्रसङ्गस्य स्पष्टीकरणञ्च	८४	६७४३-६७४६
ई) उपन्यस्तमतैकदेशस्य (ये कर्तृत्वं प्रकृतेरेव भोक्तृत्वं तु आत्मन इति मन्यन्ते तेषां मतस्य) निरासः	८५	६७४७-६७४८
उ) साङ्ख्यस्य मायावाद्युपमात्वापत्तिः	८६-८९	६७४८-६७५७
१) मायिसाङ्ख्ययोरुभयोरपि सर्वप्रमाणविरुद्धार्थाङ्गीकारित्वम्	८६	६७४८-६७५१
२) पुरुषबहुत्वमपि उभाभ्यामङ्गीकृतम्	८७	६७५२-६७५४
३) साङ्ख्यपरिकल्पितप्रक्रियान्तरस्यापि प्रमाणविरुद्धत्वम्	८८	६७५४-६७५५
४) साङ्ख्यस्य मायावादिसदृशत्वं सूत्रकृताऽपि सूचितम्	८९	६७५६-६७५७
* * *		
अन्यत्राभावाधिकरणम् (२-२-२-५ सूत्रम्)	९०-९७	६७५९-६७८५
सेश्वरसाङ्ख्य(पातञ्जल)मतनिराकरणम्	९०-९७	६७५९-६७८५
(१)सेश्वरसाङ्ख्य(पातञ्जल)मतनिरूपणम्	९०-९२	६७५९-६७७०
क) ईश्वरस्वरूपम्	९०	६७५९-६७६५
ख) वेदवादविरोध्यंशः	९१-९२	६७६५-६७७०
(२)उपन्यस्तमतनिरासः	९३-९७	६७७०-६७८५
क) सेश्वरसाङ्ख्य(पातञ्जल)मतनिरासः	९३-९६	६७७०-६७८२
१) सूत्राक्षरैस्तन्मतनिरासः	९३-९४	६७७०-६७७५
च) चकारेतराक्षराणां व्याख्यानम्	९३	६७७०-६७७३
छ) चकारव्याख्यानम्	९४	६७७३-६७७५
२) उक्तार्थानुपपत्तिशङ्कानिरासः	९५	६७७५-६७८०
३) उक्तार्थे प्रमाणप्रदर्शनम्	९६	६७८०-६७८२
ख) 'निरीश्वरसाङ्ख्यमतेन सहास्य सेश्वरसाङ्ख्यमतस्य हेयत्वो'पसंहारः	९७	६७८३-६७८५
* * *		

विषयः	परिच्छेदः	पुटसंख्या
अभ्युपगमाधिकरणम् (२-२-३-६ सूत्रम्)	९८-११३	६७८७-६८२७
१) एतत्सूत्रीयस्य परकीयव्याख्यानस्य अयुक्तता	९८	६७८७-६७९२
२) एतत्सूत्रनिरसिष्यमाणचार्वाकमतस्योपन्यासः	९९-१००	६७९२-६७९५
अ) चार्वाकोक्तप्रमाणम्	९९	६७९२-६७९५
आ) चार्वाकोक्तो देहात्मसम्बन्धः पुमर्थश्च	१००	६७९६-६७९९
३) उपन्यस्तस्य चार्वाकमतस्य निरासः	१०१-११३	६७९९-६८२७
अ) अतीन्द्रियवस्त्वभावात् विषयप्रयोजनशून्यतया तच्छास्त्रस्यानारम्भणीयता	१०१-१०२	६७९९-६८०७
आ) देहभिन्नस्यात्मनोऽनुभवसिद्धत्वम्	१०३-१०६	६८०७-६८१५
१) 'मम देह' इति प्रतीतेः भेदप्रतीतिपूर्वकत्वम्	१०३	६८०७-६८०९
२) अस्याः प्रतीतेः व्यवहारमात्रत्वे कल्पकाभावः	१०४-१०५	६८०९-६८१३
क) सत्प्रतिपक्षत्वमभ्युपेत्य बाधकाभावापादनम्	१०४	६८०९-६८१०
ख) सत्प्रतिपक्षत्वाभावस्यापि दर्शनम्	१०५	६८११-६८१३
३) अस्याप्रतीतेः प्रत्यक्षत्वसमर्थनम्	१०६	६८१४-६८१५
इ) अर्थकामातिरिक्तपुरुषार्थतत्साधकवेदानुमानयोः प्रामाण्यसाधनम्	१०७-११२	६८१६-६८२६
१) प्रत्यक्षप्रामाण्यसाधकप्रमाणेनैव वेदादीनामपि प्रामाण्यसिद्धिः	१०७	६८१६-६८१८
२) वेदाद्यागमानुमानयोरप्रामाण्यसाधकप्रमाणाभावः	१०८	६८१८-६८१९
३) 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां निराकरणम्	१०९-११२	६८१९-६८२६
च) 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां साधकप्रमाणाभावः	१०९	६८१९-६८२२
छ) आगमानुमानयोः अर्थसन्निकृष्टकरणजन्यत्वरूप-प्रत्यक्षत्वाभावप्रयुक्तप्रामाण्याभावशङ्कानिरासः	११०	६८२३-६८२४
ज) तल्लक्षणे याथार्थ्ये विशेषिते विशेष्यवैयर्थ्यम्	१११	६८२५
झ) वेदादीनां अर्थानुपलम्भबाधप्रयुक्ताप्रामाण्यशङ्का तन्निरासश्च	११२	६८२५-६८२६
ई) सूत्रार्थोपसंहारः	११३	६८२७

विषयः	परिच्छेदः	पुटसंख्या
पुरुषाश्माधिकरणम् (२-२-४ - ७-८ सूत्रे)	११४-१२०	६८२९-६८३७
१) निरीश्वरसाङ्ख्यैकदेशिनां पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादिनां मतस्यापाकरणम्	११४-१२०	६८२९-६८३७
अ) एतदधिकरणीयानन्तर्यक्रमानुपपत्तिशङ्का तन्निरसनञ्च	११४	६८२९-६८३१
आ) निरसिष्यमाणमतरीतिप्रदर्शनम्	११५	६८३१-६८३२
इ) तन्मतनिरासः	११६-१२०	६८३२-६८३७
१) उक्तदोषसाम्यम् (उक्तदोषापरिहारः)	११६-११८	६८३२-६८३४
क) साध्यवैकल्यरूपदृष्टान्तदोषः	११७	६८३३
ख) अङ्गित्व(प्रधानत्व)ानुभवविरोधः	११८	६८३४
२) सिद्धान्ते प्रकरणविरोधस्य शङ्का तत्परिहारश्च	११९	६८३५-६८३६
३) तच्छङ्कापरिहारस्योपपादनम्	१२०	६८३७
* * *		
अन्यथानुमित्यधिकरणम् (२-२-५ - ९-१० सूत्रे)	१२१-१२८	६८३९-६८५०
१. निरीश्वरसाङ्ख्यैकदेशिनां प्रकृत्युपसर्जनपुरुषकर्तृत्ववादिनां मतस्य अपाकरणम्	१२१-१२३	६८३९-६८४५
अ) अपाकरणीयमतनामसङ्केतदर्शनम्	१२१	६८३९-६८४०
आ) अपाकरणीयमतस्थितिदर्शनम्	१२१	६८३९-६८४०
इ) तन्मतापाकरणम्	१२२-१२३	६८४१-६८४५
१) पुरुषस्यैकाकिनः कुत्रापि स्वातन्त्र्यं नास्तीति पक्षस्य दूषणम्	१२२	६८४१-६८४४
२) पुरुषस्यैकाकिनः क्वचित् स्वातन्त्र्यमस्तीति पक्षस्य दूषणम्	१२३	६८४४-६८४५
२. अनीश्वरमतपञ्चकनिरासस्योपसंहारः	१२४-१२५	६८४६
अ) अनीश्वरमतस्याभद्रत्वम्	१२४	६८४६
आ) द्वितीय-सेश्वर(पातञ्जल)साङ्ख्यमतस्य निरीश्वरमतत्वे कारणकथनम्	१२५	६८४६
३. एतदन्यानां निरीश्वरमतानां विशेषतो निराकरणाभावे कारणकथनम्	१२६	६८४७-६८४९
४. अनीश्वरमतासामञ्जस्यप्रदर्शनस्य फलम्	१२७	६८४९-६८५०
५. उत्तराधिकरणानामनारम्भणीयत्वनिरसनम्	१२८	६८५०
* * *		

विषयः	परिच्छेदः	पुटसंख्या
वैशेषिकाधिकरणम् (२-२-६ - ११ तः १७ सूत्राणि)	१ – ३३८	६८५१-
१) परमाण्वारम्भवाद-वैशेषिकमत-निराकरणम्	१ – ३३८	६८५१-
अ) वैशेषिकमतोपन्यासः	१ – १३	६८५१-६९०४
१) ईश्वरविषया विप्रतिपत्तिः	१ – २	६८५१-६८५७
क) ईश्वराङ्गीकारेऽपि तद्धर्मेषु सृष्टिप्रलयादिविधिषु च विप्रतिपत्तिः	१	६८५१-६८५४
ख) ईश्वरीयज्ञानप्रयत्नेच्छानां नित्यत्वम्	१	६८५१-६८५४
ग) ईश्वरस्याष्टमात्रगुणकत्वम्	१	६८५१-६८५४
घ) सङ्ख्या(दि)गतनित्यानित्यत्वविभागाकथने कारणम्	१	६८५१-६८५४
ङ) ज्ञानादिगतनित्यत्वकथने कारणम्	१	६८५१-६८५४
कक)ईश्वरषाड्गुण्यमतस्य परमत्वाभावः	२	६८५४-६८५७
कख)आत्रेयज्ञानानित्यत्वाकथने कारणम्	२	६८५४-६८५७
कग)नित्यत्वसङ्कीर्तने वैकल्पिकप्रयोजनम्	२	६८५४-६८५७
१) गुणान्तराभावे युक्तित्वम्	२	६८५४-६८५७
२) ज्ञानादीनामखण्डत्वसूचनम्	२	६८५४-६८५७
२) सृष्टिविषया अन्यथामतिः	३ – १३	६८५७-६९०४
क) ईशेच्छादृष्टचोदितानां चतुर्वर्गीयपरमाणूनां द्विशः संयोगात्सृष्टिप्रारम्भः	३	६८५७-६८६४
ख) परमाणूनां द्विशः संयोगतः सर्वावयविसम्भवान्तः उत्पत्तिक्रमः	४	६८६५-६८७०
ग) भावरूपकार्यजनककारणत्रैविध्यम्	५ – ६	६८७०-६८७४
१) समवायिकारणस्वरूपदर्शनम्	५	६८७०-६८७२
२) निमित्तकारणोदाहरणम्	६	६८७२-६८७४
घ) कार्याकार्यविभागः	७ – १०	६८७४-६८९३
१) तदर्थं सप्तपदार्थप्रदर्शनम्	८	६८७६-६८८७
२) सप्तपदार्थेषु नित्यानित्य-कार्याकार्यविवेकः	९ – १०	६८८७-६८९३
ङ) यस्य यदसमवायिकारणं तदुक्तिः, सकारणम्	११ – १३	६८९४-६९०४

विषयः	परिच्छेदः	पुटसंख्या
१) यस्य यदसमवायिकारणं तदुक्तिः	११	६८९४-६८९९
२) उक्तस्य क्वचिदपवादप्रदर्शनम्	१२	६८९१-६९०१
३) एवं कल्पने कारणम्	१३	६९०१-६९०४
आ) उपन्यस्तमतस्योपपत्तिविरुद्धतया अपाकरणम्	१४ – ३३७	६९०४-
१) तत्रैतदधिकरणस्य प्रथमसूत्र(ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ)व्याख्यानम्	१४ – १२०	६९०४-
क) एतत्प्रथमसूत्रस्यावतरणम्	१४	६९०४-६९०५
ख) उक्तसमन्वयरूपार्थस्य वैशेषिकादिमतविरोध-प्रयुक्तान्यथात्वशङ्काद्वयनिरासश्च	१५ – १२०	६९०५-
१) तत्रादौ 'पारिमाण्डल्यादेः कारणत्वाभावरूपप्रथमशङ्का'याः निरासः (परिमाणासमवायिकारणनिरासः)	१५ – ८६	६९०५-
च) तत्राप्यादावेतदुत्तरस्य सूत्रारूढतादर्शनम्	१५ – २५	६९०५-६९३३
१)-आ-१-ख-१-च		
१) एतत्सूत्रगत'वा'शब्देतरशब्दव्याख्यानम्	१५ – २१	६९०५-६९२६
ट) एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दार्थनिरूपणम्	१५ – २१	६९०५-६९२६
१) 'पारिमाण्डल्यादेः कारणत्व'साधनपर्याप्तानां एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दानामर्थकथनं तत्स्पष्टीकरणञ्च	१५ – १९	६९०५-६९२४
त) शब्दार्थकथनम्	१५ – १७	६९०५-६९१२
थ) उक्तार्थाभिप्रायकतया अनुमानप्रयोगप्रदर्शनम्	१८ – १९	६९१३-६९२४
२) उक्तार्थोद्भूतशङ्कानिरासकतया अनुव्याख्यानगत'सदृश'पदार्थकथनम्	२०	६९२४-६९२५
३) उक्तार्थोद्भूतशङ्कानिरासकतया 'महत्त्वं चे'त्यनुव्याख्यानश्लोकार्धार्थकथनम्	२१	६९२५-६९२६
२) एतत्सूत्रगत'वा'शब्दव्याख्यानतया एतदनुव्याख्यानगतान्त्यश्लोकार्धार्थकथनम्	२२ – २५	६९२६-६९३३
ट) अनुव्याख्यानगतपदार्थदर्शनम्	२२	६९२६-६९२८
ठ) उक्तार्थस्य अभिप्रायः	२३	६९२८-६९३०
ड) उक्तार्थोद्भूतशङ्काद्वयनिरासः	२४ – २५	६९३०-६९३३

विषयः	परिच्छेदः	पुटसंख्या
१) प्रथमशङ्का तन्निरासश्च	२४	६९२४-६९३१
२) द्वितीयशङ्का तन्निरासश्च	२५	६९३२-६९३३
१)-आ-१-ख-१-		
छ) ततः परिमाणोत्कर्षापकर्षाभावकल्पितशङ्कानिरसनम्	२६ – ३३	६९३४-६९६१
१) तच्छङ्काप्रदर्शनपूर्वकं तत्र प्रतितर्कपराहतिप्रदर्शनम्	२६ – २८	६९३४-६९४३
ट) तत्प्रतितर्के विकल्पितानां चतुर्णामपि पक्षाणां दुष्टत्वप्रतिज्ञा	२६	६९३४-६९३५
ठ) तत्प्रतिज्ञातार्थस्य विवरणम्	२७ – २८	६९३७-६९४३
१) तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात् प्रथमतृतीयपक्षयोरनिष्टप्रदर्शनम्	२७	६९३७-६९४१
२) तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात् द्वितीयचतुर्थपक्षयोरनिष्टप्रदर्शनम्	२८	६९४१-६९४३
२) उक्तस्य प्रतितर्कस्य स्वपक्षे बाधकाभावः	२९ – ३२	६९४३-६९५८
ट) तत्प्रतितर्के विकल्पितपक्षचतुष्टयात् प्रथमद्वितीयपक्षयोरङ्गीकरणम्	२९ – ३०	६९४३-६९४६
१) तत्रस्थद्वितीयविकल्पितपक्षाङ्गीकारः	२९	६९४३-६९४५
२) तत्रस्थप्रथमविकल्पितपक्षाङ्गीकारः	३०	६९४५-६९४६
ठ) स्वपक्षे तदङ्गीकारेऽपि बाधकाभावप्रदर्शनम्	३१ – ३२	६९४६-६९५८
१) तत्पक्षद्वयोक्तदोषापत्तिं व्याघातं चाधिकं बाधकमितिशङ्काप्रदर्शनपूर्वकं तत्पक्षद्वयोक्तदोषोक्तव्याहतिपरिहरणम्	३१	६९४६-६९५०
२) द्वितीयबाधकतयोक्ताणुत्वमहत्त्वव्याघातपरिहरणम्	३२	६९५१-६९५८
३) तत्प्रतितर्कस्य स्वपक्षे बाधकाभावे कथ्यमाने तर्कपराहत्युद्धारे बाधकशङ्का तन्निरासश्च (उक्तार्थेन सौत्रानुमानसिद्धिरिति समन्वयप्रदर्शनम्)	३३	६९५८-६९६१

(उर्वरितभागः अग्रिमसम्पुटे)

* * *

॥ श्री वेदव्यास भगवान् ॥

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥

॥ श्रीमदानन्दतीर्थभगवत्पादाचार्याः ॥

व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थिति-
व्यावृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे
भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥

।। श्रीपद्मनाभतीर्थाः ।।

रमानिवासोचितवासभूमिस्सन्न्यायरत्नावलिजन्मभूमिः ।
वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद्विभूत्यै ।।

।। श्रीनरहरितीर्थाः ।।

ससीतामूलरामार्चा कोशे गजपतेः स्थिता ।
येनानीता नमस्तस्मै श्रीमन्नृहरिभिक्षवे ।।

॥ श्रीमज्जयतीर्थाः ॥

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः ।
स स्यात् तत्त्वप्रकाशाय जयतीर्थरविर्मम ॥

॥ श्रीरघुनन्दनतीर्थाः ॥

परैरपहृता मूलरामार्चा गुर्वनुग्रहात् ।
येनानीता नमस्तस्मै रघुनन्दनभिक्षवे ॥

॥ श्रीविजयीन्द्रतीर्थाः ॥

धर्मः सत्ये च धीमानहिरिव वचसा भूसुराणां सभायां
जेता भीमैव वादे पवन इव गतौ सम्पदि श्रीरिवाढ्यः।
धाता ज्ञाता च सर्वानहिपतिशयनं पूजयंस्तोषयंश्च
लोकैः सर्वैश्च पूज्यो भुवि मनुजवरैर्मानितोऽभून्मुनीन्द्रः ॥

॥ श्रीराघवेन्द्रतीर्थाः ॥

चित्ते चेन्मृदुता शिरीषसदृशे हय्यङ्गवीनं शिला
गाम्भीर्यं यदि यस्य सोऽन्धुरुदधिः शास्त्रेषु चेत्पाण्डिती ।
आचार्यो विबुधेशितुः कलयते विद्यार्थितामादरात्
औदार्यं यदि कल्पपादपमुखाः सम्भावयन्तेऽर्थिताम् ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

द्वितीयाध्यायस्य द्वितीयः पादः

॥ रचनानुपपत्त्यधिकरणम् ॥

॥ २-२-१ ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

॥ अथ अस्मिन्द्वितीयपादे निवार्यमाणायाः शङ्कायाः प्रदर्शनम् ॥

१ **सु०— सकलजगज्जन्मादिकारणे सकलगुणपरिपूर्णे समस्तावद्यगन्धविधुरे परे ब्रह्मणि विष्णौ समस्तश्रुतिसमन्वयो यः प्रथमाध्यायेऽभिहितः, तस्य साङ्ख्यादिसमय-विरोधेनान्यथात्वशङ्कायां तन्निराकरणार्थमयं(ङ्कां निवारयितुं द्वितीयपाद आरभ्यते ।**

परि०— मूलमवतारयितुं शङ्कोत्थापनाय वा अत्राध्यायेऽन्तर्भावद्योतनाय वा, परमतानां दुष्टत्वोक्तिरत्र पादे व्यर्था इत्यतो वा पादप्रतिपाद्यमाह **जगज्जन्मादीति** । एतच्च लक्षणसूत्रोक्तं विशेषणम् । जगज्जन्मादिकारणत्वेनोपपादितं यौगिकब्रह्मपदोक्तं विशेषणमाह **सकलेति** । एतच्च वैशेषिकादिमतविरोधाय वा समस्तश्रुतिसमन्वयघटनाय वा उक्तम् । स्वातन्त्र्यसार्वज्ञ्यपूर्णानन्दादि-गुणपूर्णत्वोक्त्या अर्थाल्लब्धपारतन्त्र्याल्पज्ञानादिदोषराहित्यरूपं विशेषणमाह **समस्तेति** । एतद्विशेषणद्वयोपपादकत्वेन जगत्कारण(त्व)विशेषणं प्रागुक्तम् । शैवादिमतविरोधाय ब्रह्मणीत्येतद्विष्णाविति व्याख्यातम् । उक्तविशेषणत्रयस्य विष्णावसम्भवनिरासाय सौत्रब्रह्मपदप्रयोगो **ब्रह्मणीति** । **समन्वयः** शक्तितात्पर्यावधारणम् । **तन्निराकरणार्थमिति** । अन्यथात्वशङ्कानिराकरणार्थमिति वा तन्मूलभूतसमन्वयविरोधनिराकरणार्थं वेत्यर्थः ।

यादु०— पादप्रतिपाद्याज्ञाने पादारम्भसमर्थनं मूले क्रियमाणमनुपपन्नम्, अत एतत्पादप्रतिपाद्यं दर्शयति **जगज्जन्मादिकारण इत्यादिना** । वैशेषिकादिसमयविरोधस्य जगज्जन्मादिकारणत्वांशेऽभावादाह **सकल-गुणेति** । **अवद्यगन्धविधुर इति** । 'निरनिष्टो निरवद्य' इत्यादिश्रुतिसमन्वयस्यापि पूर्वमभिहितत्वादिति भावः । एतच्च पाशुपताधिकरणे श्रुत्यादिभिरप्राकृतविग्रहाद्यङ्गीकारेणान्यथात्वशङ्कां निरस्योपपादयिष्यत इति ज्ञातव्यम् । यद्वक्ष्यति 'न चैतदखिलं विष्णौ श्रुतिप्रामाण्यगौरवादि'त्यादि । मायाशबलव्यावृत्तये **पर इति** । पाशुपताद्यभिमतशिवादिरूपपरब्रह्मव्यावृत्तये **विष्णाविति** ।

वं०प०— तदिति । साङ्ख्यादिसमयविरोधेत्यर्थः ।

कं०रा०— तन्निराकरणार्थमिति । तेषां साङ्ख्यादिसमयानां निराकरणार्थमित्यर्थः ।

श्रीनिधि०— साङ्ख्यादि दुर्मतध्वान्तं सतां मानसपङ्कजम् ।
ध्वस्तं प्रबोधितं येन तं व्यासतरणिं भजे ॥

पञ्चाननमुखं पञ्चदासपूजितसत्तनुम् ।
विघ्नारण्यकृशानुं तं भजे विघ्नापनुत्तये ॥

समस्तावद्यगन्धविधुर इति । इदं च 'तदधीनत्वादर्थवत्' इत्यस्य तात्पर्यलभ्यं साङ्ख्यादि मतानि तन्मतार्थप्रतिपादकवाक्यानि ।

शे०वा०— श्रीमन्न्यायसुधाम्भोधिविक्रीडनविशारदान् ।
श्रीमद्विद्याधीशमुनीन् वन्दे विद्यागुरून् मम ॥ १ ॥

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ २ ॥

ननु 'स्मृतियुक्ती'त्यादिभाष्यमनर्थकम् । न चैतद्व्यर्थताशङ्कापरिहारेण पादारम्भसमर्थनार्थमिति वाच्यम्, प्रागनिरस्तसाङ्ख्यादिसमयनिरासकस्यास्य पादस्य पूर्वेण गतार्थताशङ्काया एवानुदयात् । कथञ्चिदुदयेऽपि वा परोक्तरीत्यैव पादारम्भसमर्थनसम्भवेन तत्परित्यागेन प्रकारान्तरेण तदारम्भसमर्थनानर्थक्याच्च; इत्यतः तद्रीतेरसामञ्जस्याद्युक्तं तत्परित्यागेन प्रकारान्तरेण पादारम्भसमर्थनमित्यभिप्रेत्य गतार्थताशङ्कां प्रदर्श्य, तन्निरासकतया परोत्प्रेक्षितसमर्थनप्रकारं चोपन्यस्य, तदसामञ्जस्यप्रतिपादनपूर्वकं पादारम्भसमर्थनपरतयोत्तर-भाष्यं योजयितुं गतार्थताशङ्काप्रसञ्जनाय अस्य पादस्य एकवाक्यतादिसिद्धये चैतदध्यायसङ्गतिं सूचयन्नेव एतत्पादार्थं तावदाह **सकलेति** । अत्र सकलेत्यादिना निवारयितुमित्यन्तेन अस्य पादस्य एतदध्यायान्त-

र्भावलक्षणसङ्गतिसूचनम् । परोक्तं प्रकृत्यधिकरणे ब्रह्मणो जगदुपादानत्वम् अविकारित्वादयुक्तम् । सूत्रे जन्मादीत्यादिनिर्देशासङ्गतिप्रसङ्गात् विवर्ताधिष्ठानमप्ययुक्तमेव इत्यभिप्रेत्योक्तं **सकलजगज्जन्मादिकारण** इति । तन्निमित्तकारण इत्यर्थः । द्युभ्वादीत्यादितृतीयपादे परोक्तस्य निर्गुणे समन्वयस्याश्रद्धेयत्वं सूचयितुं **सकलगुणपरिपूर्ण** इत्युक्तम् । सार्वज्ञसर्वैश्वर्याद्यनन्तगुणपरिपूर्ण इत्यर्थः । प्रथमाध्यायस्थाद्यपादद्वये परोक्तस्य मायाशबले ब्रह्मणि समन्वयस्याश्रद्धेयतासूचनायोक्तं **समस्तावद्येति** । अविद्याद्यवद्येत्यर्थः । पूर्वाध्याये परे ब्रह्मणि समन्वयोक्तेः कथमुच्यते विष्णौ समन्वयोऽभिहित इति; इत्यतः 'स विष्णुराह हि । तं ब्रह्मेत्याचक्षते' इत्यव्यवहितपूर्वसूत्रद्वये ब्रह्मशब्दार्थतया विष्णोरेव प्रस्तुतत्वात् विष्णुरेव आद्यसूत्रस्थब्रह्मशब्दार्थ इति नानुपपत्तिरिति भावेनोक्तं **परे ब्रह्मणीति** । विष्णोरपरब्रह्मत्वमिति परमतनिरासायोक्तं **विष्णाविति** । प्रधानस्याशाब्दत्वं चतुर्थपादार्थ इत्येतदश्रद्धेयमिति भावेनाह **समस्तश्रुतीति** । स्वरवर्णपदवाक्यमहावाक्यरूपसमस्तश्रुतीत्यर्थः ।

वा०र०— श्रीनृसिंहं सम्प्रणम्य गुरुराजं च तद्गुरुम् ।
सेवे समयपादीयशेषवाक्यार्थचन्द्रिकाम् ॥

अलौकिकगुरुभक्त्यादिमत्वान्मध्ये गुरुप्रणामरूपमेव मङ्गलमाचरति **श्रीमदिति** । स्वव्याख्यानप्रवृत्तेर्न प्रयोजनान्तरमुद्देश्य किन्तु गुरुसेवात्वबुद्ध्या क्रियमाणायाः गुरुप्रीतिरेवेति सूचयन्नाह **यद्विद्याधीशेति** । यच्छब्दस्य यस्मादित्यर्थः । **गतार्थताशङ्केति** । अस्य पादस्य पूर्वेणेति वक्ष्यमाणमत्राकृष्यते **पादारम्भेति** । एतत्पादारम्भेत्यर्थः । **पूर्वेणेति** । पूर्वपादेनेत्यर्थः । तथा हि । किं साङ्ख्यादिमतानीत्यादिमूलोक्तप्रकारेणोदयसम्भवमाशङ्क्याह **कथञ्चिदिति** । **रीत्यैवेति** । रीतिद्वयेनेत्यर्थः । आनर्थक्यादित्यत इति पाठः । चशब्दपाठे त्वनुदये समुच्चयार्थं स इति ज्ञेयम् । **तद्रीतेः** तद्रीत्योः । **समर्थनप्रकारं** प्रकारद्वयमित्यर्थः । **सिद्धये च** इत्यस्य एतत्पादार्थं तावदित्यनेन सम्बन्धः । एतत्पादार्थकथनेनैव एतदध्यायान्तर्भावसूचनमपि भवतीत्याशयेन **एतदध्याय**त्याद्युक्तम् । **सकलजगज्जन्मादीति** । सकलपदोपेत एव मूलपाठ इत्यतः सकलेत्यस्यैव प्रतीकतयोपादानम् । **अत्रेति** । निराकरणार्थमित्यन्ते पदार्थकथन इत्यर्थः । निराकरणार्थमित्यत्र तदित्यनेन सकलेत्यादि विरोधान्तग्रहणम् । **सङ्गतिसूचनमिति** । प्रथमाध्यायाभिहितार्थे विरोधपरिहारस्यैव द्वितीयाध्यायार्थतया साङ्ख्यादिसमयविरोधेनोक्तार्थान्यथात्वशङ्कानिरासकस्यास्य पादस्योक्त-द्वितीयाध्यायार्थप्रतिपादकतया सङ्गतिर्लब्धेति सङ्गतिसूचनम् । अत एवात्र प्रथमाध्यायार्थस्य द्वितीयाध्यायार्थान्तर्भविन तच्छेषतया कथनात् प्रथमाध्यायार्थं वदन्निति च नोक्तमिति च ज्ञेयम् । **अविकारित्वादिति** । निर्विकारोऽक्षरः शुद्ध इति श्रुत्या तत्सिद्धेरिति भावः । **सूत्र इति** । 'यतो वा इमानि भूतानि जायन्त' इति श्रुतावपि जायन्त इति निर्देशासङ्गतेरुपलक्षणमेतत् । विवर्ताधिष्ठानत्वमपि जन्मादीत्यादिनिर्देशासङ्गतिप्रसङ्गादयुक्तमिति सम्बन्धः । जन्मादीत्यादि इत्यादिपदेन यत इतीत्यस्य परिग्रहः । न हि शुक्तिकातो रजतं जायत इत्यादि प्रयोगोऽस्तीति

भावः । कारणपदमात्रेण परोक्तनिरासाप्रतीतेराह **तन्निमित्त इति** । **तृतीयपाद इति** । अत्र तृतीयपादे परोक्तस्येत्यादेर्निर्गुणे समन्वयपरतया परकृतद्युभ्वादीति तृतीयपादप्रवृत्तिवर्णनस्येत्यर्थः । उपलक्षणया प्रदर्शनपूर्वकं साकल्यं च विवृणोति **सार्वज्ञ्येति** । **प्रथमाध्यायस्थेति** । मायाशबले ब्रह्मणि समन्वयपरतया परकृत प्रथमाध्यायस्थाद्यपादद्वयप्रवृत्तिवर्णनस्येत्यर्थः । प्रकृतोपयोगितयाऽवद्यविशेषं मुखत उपादीय व्याचष्टे **अविद्येति** । **परे ब्रह्मणि समन्वयोक्तेरिति** । परब्रह्मजिज्ञासाया एव प्रथमसूत्रे मोक्षप्रयोजनकतया कर्तव्यत्वप्रतिपादनेन तस्यैव च जिज्ञास्योपादानाय लक्षणसमर्थनादिद्वारेण समन्वयनिरूपणस्य कृतत्वादित्याशयः । इतीत्यत इति पाठः । इत्यत इत्येव पाठे त्विति‌शब्द आवर्तनीयः । **ब्रह्मशब्दार्थ इति** । तत्रैव च समन्वयो निरूपित इत्यस्योपलक्षणं च एतत् । तर्हि परे ब्रह्मणीत्येवास्तु । कृतं विष्णावित्यनेनेत्यत आह **विष्णोरिति** ।

स०व्र०— पादप्रतिपाद्यं दर्शयति **जगज्जन्मादिकारण इति** । जन्माधिकरणे जगज्जन्मादिकारणत्वं (मुखतः) मुख्यतो लक्षणमुक्तम् । अत आदौ तत् गृहीतम् । सकलगुणपूर्णत्व-समस्तावद्य-गन्धविधुरत्वयोः आर्थिकत्वेऽपि; आनन्दमयादिशब्दानां समन्वये प्रतिपादिते सकलगुणपूर्णत्वं मुख्यतः सिद्ध्यतीति अनन्तरं ग्रहणम् । तत्तद्गुणपूर्णत्वे सिद्धे तद्विरोधिदोषराहित्यमर्थात्सिद्ध्यतीति अन्ततो ग्रहणमिति बोध्यम् । **तन्निराकरणार्थमिति** । ननु प्रथमपादे युक्तिविरोधः परिहृतः, अस्मिन्पादे समयविरोधः परिह्रियते, तृतीयपादे श्रुतिविरोधः, चतुर्थपादे न्यायोपेतश्रुतिविरोधः; इति अविरोधस्यैवाध्यायार्थत्वात्, 'नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम्' इति दोषराहित्यस्य द्वितीयाध्यायार्थत्ववर्णनमनुपपन्नमिति चेत्; अत्रैवं सम्प्रदायविदः— प्रथमाध्याये समन्वये प्रतिपादिते तत्र ये विरोधाः प्राप्ताः, तत्परिहारः 'विकारशब्दात्' इत्यादिना तत्र तत्रैव कृतः । इतःपरं समन्वयेन सिद्धं यत्सर्ववैशिष्ट्यं तत्र विरोधपरिहारार्थं द्वितीयाध्यायः प्रवृत्तः । तथा च सर्ववैशिष्ट्यं द्वेधा सर्वगुणपूर्णत्वेन, सकलदोषराहित्येन । सर्वगुणपूर्णत्वलक्षणं समस्तदोषराहित्यलक्षणं सर्ववैशिष्ट्यं निष्कृष्य द्वितीयाध्यायार्थत्वेन विवक्षित्वा तत्र प्राप्तविरोधपरिहारे द्वितीयाध्यायेनाभिहिते सर्वदोषराहित्यलक्षणं सर्ववैशिष्ट्यं सिद्ध्यतीति तस्य तदर्थत्ववर्णनं सङ्गच्छत इति काऽनुपपत्तिरिति ।

विट्ठल०— येन कृष्णेन समया कुत्सिताः सुनिराकृताः ।
कंसाद्या दुर्जना यद्वद्वन्दे तममितौजसम् ॥

पादप्रतिपाद्यप्रदर्शनपूर्वकं पादारम्भसमर्थनार्थकं मूलमवतारयति **जगज्जन्मादिकारण इत्यादिना** । **प्राक्** जन्माधिकरणे आनन्दमयाधिकरणादौ च सकलजगज्जन्मादिकारणत्वं गुणपूर्णत्वं चोक्तम् । समस्ताध्याये 'अतोऽनन्तगुणो विष्णुर्यच्छब्दा योगवृत्तयः' इत्युक्तेः । अदृश्याद्यधिकरणेषु निर्दोषत्वे च दोषाभावो गुण इति प्रसिद्ध इत्युक्तत्वात् । तत्र साधनादेरेव जगत्कारणताभिधायकसाङ्ख्यादिमतविरोधेन अष्टगुणत्वादिप्रतिपादनपरवैशेषिकादिमतविरोधेन प्राकृतविग्रहवत्वपराधीनत्वाद्यवद्याभिधायकपाशुपतादिमतविरोधेन चान्यथात्वशङ्कायां तन्निरासार्थोऽयं पाद इत्यर्थः ।

चषकः— श्रीनिवासार्यहृत्पद्ममन्दिरो हयकन्धरः ।
सुनन्दतात् सेवया मे भक्त्यलङ्कृतयाऽनया ॥ १ ॥

प्रकृतपादस्यैकवाक्यतायाः पूर्वोत्तरपादभेदस्य च सिद्धये प्रकृताध्यायसङ्गतिं ध्वनयन्नेतत्पादप्रतिपाद्यं दर्शयति **सकलेति** । ब्रह्मणो निर्विकारत्वात् सौत्रजन्मादीतिनिर्देशासङ्गतेश्च प्रकृतिनयेऽन्याभिहिता परिणामितारूपा विवर्ताधिष्ठानतारूपा चोपादानता न सङ्गच्छत इति स्फोरणाय निमित्तकारणार्थकाद्यसप्तम्यन्तमुपात्तम् । आद्याध्यायतृतीयपादेऽन्याभिहितो निर्गुणाधिष्ठानकश्रुतिसमन्वयोऽवधीरणीय इति ध्वनयितुं वैशेषिकादिसमयविरोधं निखिलश्रुतिसमन्वयं वा संघटयितुं तादृशं द्वितीयम् । तादृशाध्यायीयाद्यपादद्वये परव्युत्पादितनिर्गुणाधिकरणश्रुतिसमन्वयोऽवधीरणीय इति द्योतयितुं तादृशं तृतीयम् । निरनिष्टो निरवद्य इति श्रुतिसमन्वयस्यापि प्रागभिहितत्वात् । विष्णोरपरब्रह्मताङ्गीकर्तृमतं व्यवच्छेत्तुं तादृशं तुरीयम् । दर्शितविशेषणत्रितयासम्भवशङ्कामपहस्तयितुं तादृक् पञ्चमम् । पाशुपताद्यभिमतशिवादिव्युदासाय तादृक् षष्ठमिति स्थितम् ।

॥ इति अस्मिन्द्वितीयपादे निवार्यमाणायाः शङ्कायाः प्रदर्शनम् ॥

* * *

॥ अथ पादारम्भसमर्थनम् ॥
॥ अथ तत्र एतत्पादीयानारम्भणीयत्वशङ्कानिरासः ॥
॥ अथ तत्रादौ प्रयोजनाभावमूलकानारम्भणीयत्वशङ्का ॥

२ **सु०— नन्वनारम्भणीय एवायं पादः । तथा हि—**

साङ्ख्यादिमतानि किं स्मृतित्वेनोक्तार्थमन्यथयन्तीति शङ्क्यते, किंवा युक्त्युपेततया, अथवा श्रुत्युपेततया, यद्वा प्रत्यक्षोपेततया ॥ नाद्यः, प्रतिस्मृतिपराहतत्वेनाप्रतिनिश्चायकाभावेन च तेषामपस्मृतित्वस्य प्रथमपादे समर्थितत्वात् ॥ अत एव न चतुर्थः ॥ न द्वितीयः, उक्तार्थविरुद्धानां सकलयुक्तीनामाभासत्वस्य तत्रैव व्युत्पादितत्वात् । प्रबलयुक्तिविरोधोऽत्र निरस्यत इति चेन्न । प्राबल्यं हि युक्तीनां श्रुत्यादिप्रमाणमूलत्वेन, तत्संवादित्वेन (वा,) बहुत्वेन वा स्यात् । सर्वथाऽपि नाधिकाशङ्कावकाशः, श्रुत्यादिसंवादिनीनां तन्मूलानां बह्वीनां च युक्तीनां तत्रैव निराकृतत्वात् । काश्चिदेव तत्र निरस्ता न समस्ता इति चेन्न, सूत्राणामुपलक्षणार्थत्वात्, अन्यथा युक्त्याभासानामनन्तत्वेन अपर्यवसानं स्यात्, पादभेदश्चैवं सति न स्यात् ॥ न तृतीयः, समस्तश्रुतीनां ब्रह्मणि समन्वयस्योक्तत्वात् ॥

परि०— मूलोक्ताभ्यधिकाशङ्कोपपत्तये पूर्वेण गतार्थतया पादारम्भमाक्षिपति **नन्वि-त्यादिना** । 'स्मृतियुक्तिश्रुतिगुणे'तिमूलकमानुरोधेन विकल्पयति **किं स्मृतित्वेनेत्यादिना** । 'अवशिष्टस्यान्त' इति न्यायेनाह **यद्वा प्रत्यक्षेति** । अन्यस्मृत्यनवकाशेति सिद्धान्तसूत्रांशार्थोक्तिः **प्रतिस्मृतीति** । इतरेषां चेति सूत्रतात्पर्यार्थः **अपस्मृतीत्यादि** । **अत एवेति** । विष्णु-प्रत्यक्षमूलप्रतिस्मृतिपराहतत्वादेवेत्यर्थः । **उक्तेति** । प्रथमाध्यायोक्तेत्यर्थः । **तत्रैवेति** । आद्यपादे 'न विलक्षणत्व', 'अभिमानिव्यपदेशस्त्वि'त्यधिकरणद्वय इत्यर्थः । श्रुतिगुणेत्येतद्व्यावर्त्य(प्रदर्शन)-पूर्वं विवृणोति **प्रबलेति** । श्रुतिगुणेत्यत्र श्रुतिपदमुपलक्षणं प्रत्यक्षस्येत्याशयेनोक्तं **श्रुत्यादीति** । गुणपदं मूलपरं संवादिपरं चेति भावेन मूलत्वेन तत्संवादित्वेन वेत्युक्तम् । बहुयुक्तय इत्येतद्व्यावर्त्य **बहुत्वेनेति** । **श्रुत्यादिसंवादिनीनामिति** । **तत्रैवेति** । 'इतरव्यपदेशादि'त्यत्र श्रुत्यनुभवसंवादि-युक्तेः 'असदिति चेदि'त्यत्र श्रुतिसंवादियुक्तेः, 'भोक्त्रापत्तेरि'त्यत्र श्रुतिमूलयुक्तेः 'तदनन्यत्वमि'-त्यादौ बहुयुक्तीनां निरासादिति भावः ।

यादु०— मूलमुत्थापयितुमाह **नन्विति** । **अत एवेति** । 'आप्तैः प्रत्यक्षतो दृष्ट्वे'त्यादिना प्रत्यक्षो-पेततया प्रबलत्वेनाशङ्कितानामपि साङ्ख्यादिस्मृतीनां 'हरिपूर्वकाः । किन्नाशेषविदः' इत्यादिना नितरां सर्वज्ञ-विष्णवादिप्रत्यक्षमूलकपञ्चरात्रादिस्मृतिविरुद्धत्वेनाप्रामाण्यस्य प्रथमपादे समर्थितत्वादेवेत्यर्थः । **तत्रैवेति** । प्रथम-पाद एवेत्यर्थः । 'असदिति चेदि'त्यत्र श्रुतिसंवादिनीनां, 'भोक्त्रापत्तेरि'त्यत्र तन्मूलानां, 'तदन्यत्वमि'त्यत्र बह्वीनां युक्तीनां, निराकृतत्वादिति भावः । **समन्वयस्येति** । तथा च न परमतानां श्रुत्युपेततेति भावः ।

वं०प०— **अन्यथेति** । सूत्राणामुपलक्षणत्वाभावे । **स्यात्** शास्त्रस्य । **एवं सति** युक्त्युपेततयोक्त-मर्थमन्यथयन्तीति युक्तिविरोधो यदि निराक्रियत इत्यर्थः ।

कं०रा०— **प्रतिस्मृतिपराहतत्वेनेति** । पाञ्चरात्रादिस्मृतिपराहतत्वेनेत्यर्थः । **अत एवेति** । आप्ति-निश्चायकाभावेन साङ्ख्याद्यागमानामपस्मृतित्वस्य प्रथमपादे समर्थितत्वादेव साङ्ख्यादिमतानि कपिलादि-प्रत्यक्षोपेततयोक्तमर्थमन्वयन्तीति चतुर्थपक्षो न सम्भवतीत्यर्थः । **श्रुत्यादिसंवादिनीनामिति** । 'असदिति चेन्न प्रतिषेधमात्रत्वादि'त्यत्र श्रुत्यादिसंवादिनीनां 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदि'त्यत्र श्रुत्यादिमूलानां 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्र बह्वीनां च युक्तीनां निराकृतत्वात् प्रथमपाद एवोक्तप्रकारेण प्रबलानां युक्तीनां निराकरणं कृतमिति भावः । **पादभेदश्चेति** । अत्रापि पादे युक्तिविरोधनिरासकरणे प्रथमपादस्यैतत्पादस्य च भेदो न स्यादित्यर्थः । **समस्तेति** । समस्तश्रुतीनां ब्रह्मणि समन्वयस्योक्तत्वेन अब्रह्मप्रतिपादकानां साङ्ख्या-द्यागमानां श्रुत्युपेतत्वं नेति भावः ।

श्रीनिधि०— अत एव न चतुर्थ इति । तेषां आप्तिनिश्चायकाभावेनेत्यर्थः । तत्प्रत्यक्षस्य अस्मदतीन्द्रियत्वात् तद्वचनेन तदवसेयम् । तत्र च न विश्वासः सम्भवतीत्यर्थः ।

शे०वा०— एवं पादप्रतिपाद्यमभिधाय इदानीं गतार्थताशङ्कामुत्थापयति **नन्विति** । **स्मृतित्वेनेति** । अलौकिकार्थविषयाप्तवाक्यरूपस्मृतित्वेनेत्यर्थः । **प्रतिस्मृतीति** । पञ्चरात्रादिस्मृतीत्यर्थः । **आप्तिनिश्चायकाभावेन चेति** । **'इतरेषां चानुलब्धेः', 'एतेन योगः प्रत्युक्तः'** इति सूत्रद्वयोक्तरीत्येति शेषः । **प्रथमपाद इति** । स्मृत्यधिकरण इति शेषः । **अत एवेति** । 'आप्तैः प्रत्यक्षतो दृष्टे'त्यादिना प्रत्यक्षोपेततया प्रबलत्वेन शङ्कितानामपि साङ्ख्यादिस्मृतीनां 'हरिपूर्वकाः । किन्नाशेषविदः' इत्यादिना नितरां सर्वज्ञविष्णवादिप्रत्यक्षमूलकपञ्चरात्रादिस्मृतिविरुद्धत्वेनाप्तिनिश्चायकाभावेन चापस्मृतित्वस्य प्रथमपादे समर्थितत्वादेवेत्यर्थः । **तत्रैवेति** । प्रथमपाद एवेत्यर्थः । 'न विलक्षणत्वात्' इत्यादिनेति शेषः । तथा च न परमतानां युक्त्युपेतत्वमिति भावः । **श्रुत्यादिप्रमाणमूलत्वेनेति** । आदिशब्देन प्रत्यक्षपरिग्रहः । क्वचित्प्रमाणमूलत्वेनेति पाठः । तत्र प्रमाणशब्दः श्रुत्यादिपरो द्रष्टव्यः । तत्र युक्तीनां श्रुतिमूलत्वं श्रुतिरूपप्रमाणसिद्धत्वं च प्रत्यक्षप्रमाणमूलत्वं च तदवधृतव्याप्त्यादिमत्त्वमिति द्रष्टव्यम् । **तत्संवादित्वेनेति** । श्रुत्यादिप्रमाणसंवादित्वेनेत्यर्थः । **बहुत्वेनेति** । बहुत्वं चात्र अनेकप्रकारं विवक्षितमिति युक्तोऽनेनानेकसङ्ग्रहः । **श्रुत्यादिसंवादिनीनामिति** । श्रुतिसंवादिनीनां श्रुत्यनुभवसंवादिनीनां चेत्यर्थः । **तन्मूलानामिति** । श्रुत्यादिमूलानामित्यर्थः । **तत्रैवेति** । असदधिकरणे श्रुतिसंवादिनीनाम्, 'इतरव्यपदेशादि'त्यत्र श्रुत्यनुभवसंवादिनीनां, 'भोक्त्रापत्तेरि'त्यत्र श्रुतिमूलानाम्, 'अभिमानी'त्यत्र प्रत्यक्षमूलानां, तदनन्यत्वम् इत्यादौ बह्वीनां च युक्तीनां निरस्तत्वात् प्रबलयुक्तिविरोधपरिहारोऽपि पूर्वपाद एव सिद्ध इत्यर्थः । **पादेति** । युक्तिविरोधपरिहारकत्वे पादद्वयस्यापि युक्तिपादत्वप्रसङ्गादिति भावः । **समन्वयस्येति** । तथा च न परमतानां श्रुत्युपेतत्वमपीति भावः ।

वा०र०— स्मर्यमाणत्वमात्रादेरतिप्रसक्तत्वात् स्मृतिपदार्थमाह **अलौकिकेति** । गामानयेत्यादि व्यावर्तनायालौकिकपदम् । अलौकिकार्थविषयवेदवारणाय **आप्तवाक्यरूपेत्युक्तम्** । विस्तरस्तु मन्दारमञ्जरीस्थस्मृतित्वनिर्वचनानुसारेण ज्ञेय इत्याशयः । **सूत्रद्वयोक्तरीत्येति** । साङ्ख्यादिस्मृतिषु यत्फलसाधनतया यदुपदिष्टं तदनुष्ठानेऽपि तत्फलानुपलम्भादित्यादिरीत्येत्यर्थः । सम्पूर्णपादप्रमेयत्वाभावादाह **स्मृत्यधिकरण इति शेष इति** । **उक्तार्थविरुद्धानामिति** मूलम् । उक्तार्थो विरोधो याभिस्तास्तथोक्ताः । उक्तार्थविरोधिनीनामिति यावत् । **श्रुत्यादिपर इति** । श्रुत्यादीत्युत्तरमूलगतादिपदेनानुभवस्य व्याख्येयत्वान्मूलानामित्यस्य च श्रुत्यादिमूलानामित्यर्थकत्वेनादिपदेन प्रत्यक्षस्यैव ग्राह्यतया तदनुसारेण प्रमाणशब्दस्य श्रुतिप्रत्यक्षपरत्वमेवेति भावः । अत्र श्रुतिप्रत्यक्षमूलत्वरूप एक उपाधिरिति भ्रमनिरासाय पञ्चमाधिकरणोपाधिभूते श्रुतिसिद्धत्वस्य तृतीयोपाधिभूतप्रत्यक्षावधृतव्याप्त्यादिकस्य चाप्रतिपादनेन अधिकरणद्वयोपाधिरनेनोक्त इति दर्शयन् प्रमाणमूलत्वपदात् तल्लाभं च दर्शयति **तत्र युक्तीनामित्यादि** । यद्यपि प्रमाणेति पाठे प्रमाणशब्दस्य प्रत्यक्ष-

मात्रपरत्वाश्रयणेऽपि न दोषः । न च प्रत्यक्षावधृतव्यात्यादिमत्त्वरूपप्रमाणमूलत्वमात्रोक्त्या तृतीयसङ्गहेऽपि न श्रुतिसिद्धत्वरूपपञ्चमोपाधिलाभ इति वाच्यम् । श्रुतिसिद्धयुक्तित्वरूपपञ्चमोपाधेरपि बह्वीनामित्यनेनैव सङ्गहोपपत्तेः । अत एव चन्द्रिकायां बहुश्रुतिसिद्धयुक्त्येत्येवं पञ्चमोपाधिरभिहितः । पञ्चममारभ्य सप्ताप्युपाधयो बहुयुक्तिशब्देन विवक्षिता इत्यप्युक्तम् । तथापि तदनन्यत्वमित्येतत् षष्ठाधिकरणमारभ्यैव बहुत्वसञ्चारस्य मूले स्पष्टत्वाच्चन्द्रिकायाश्च वर्णकान्तरत्वात् श्रुतिसिद्धत्वरूपप्रमाणमूलत्वाभिधायिश्रुतिगुणेत्युक्त एव पञ्चमोपाधिरित्याशयेनात्र प्रमाणपदस्य श्रुत्यादिपदत्वमाश्रित्य तद्विवरणं कृतम् । वक्ष्यमाणसङ्गहे तु पञ्चमोपाधिश्चन्द्रिकारीत्यैव प्रायपाठानुसारेण कृतः । चन्द्रिकोक्तवर्णकान्तरस्यापि सम्मतत्वमित्याशयादिति न दोषः । **श्रुत्यादीत्यादि**पदेनानुभवपरिग्रहः । श्रुत्यादीत्यादिपदेन अप्रत्यक्षमूलकत्वश्रुत्यादिसंवादित्वश्रुतिसिद्धत्वबहुरूपोपाधिप्रतिपादनेन अभिमानीत्यादि चतुरधिकरणोपाधिलाभेन स्मृतियुक्तिमेलनेन षण्णामधिकरणानां सङ्गहसिद्धावपि इतरव्यपदेशादित्यादि पञ्चाधिकरणानां न सङ्गाहकमत्रोक्तमिति तदसङ्गहप्रसङ्ग इत्यतो बह्वीनामित्यस्यैव षष्ठस्यैवेतरपञ्चकस्यापि सङ्गहरूपत्वान्न दोष इत्याशयेन बहुत्वस्य एकप्रकारत्वे तेन तत्सङ्गहायोग इत्यतो बहुत्वस्यानेकप्रकारतां चन्द्रिकां मनसि निधायाह **बहुत्वं चेति** । **अनेकप्रकारमिति** । अत्रायं विवेक इति वक्ष्यमाणप्रकारेणानेकविधमित्यर्थः । **अनेकसङ्गह इति** । इतरव्यपदेशाद्धिताकरणादिदोषेत्याद्यधिकरणपञ्चकसङ्गह इत्यर्थः । मूले **श्रुतिसंवादिनीनामिति** । एतच्च पाणिनीयानुसारिणीमितिवद्व्युत्पाद्यम् । व्युत्पादितं चैव अस्माभिर्देवताधिकरणतत्त्वप्रकाशिकाव्याख्याने ।

स०व्र०— अत एवेति । प्रत्यक्षस्य भ्रमत्वादेवेत्यर्थः । यद्वा 'आप्तैः प्रत्यक्षतो दृष्ट्वा' इत्युक्तरीत्या प्रत्यक्षोपेततया प्रबलत्वेन शङ्कितानामप्यप्रामाण्यस्य प्रथमपादे समर्थितत्वादेवेत्यर्थः । **तत्रैवेति** । श्रुतिसंवादिनीनाम् असदधिकरणे, तन्मूलानां 'भोक्त्रापत्तेः' इत्यत्र, 'तदनन्यत्वम्' इत्यत्र बह्वीनां निराकृतत्वादित्यर्थः ।

विट्ठल०— प्रत्यक्षोपेततयेति । कपिलादिभिः प्रत्यक्षतोऽर्थं दृष्ट्वा रचिततयेत्यर्थः । **अत एवेति** । आप्तैः प्रत्यक्षतो दृष्ट्वेत्यादिना आशङ्क्य हरिपूर्वकाः किं नाशेषविद इत्यादिना । नितरां सर्वज्ञैः विष्णवादिभिः प्रणीत पञ्चरात्रादिविरुद्धतया अप्रामाण्यस्य प्रथमपादे समर्थितत्वादेवेत्यर्थः । **तत्रैवेति** । प्रथमपाद एवेत्यर्थः । **पादभेदश्चेति** । एवं सति सूत्राणामुपलक्षणार्थतया समस्तयुक्तीनामपि प्रथमपादे निरस्तत्वमनङ्गीकृत्य प्रथमपादे काश्चिदेव युक्तयो निरस्तास्तदन्या अत्र निरस्यन्त इत्येवं सति युक्तिनिरासकत्वरूपैकार्थप्रतिपादकत्वेनैकपादत्वमेव स्यान्न तु पादभेदस्यार्थभेदनिबन्धनत्वादिति भावः । **समन्वयस्येति** । तथा च साङ्ख्यादिमतानुसारिश्रुत्यभावेन न तन्मतानां श्रुत्युपेतत्वमिति भावः ।

चषकः— अन्यथयन्ति । अन्यथा कुर्वन्ति । **अत एव** वैष्णवप्रत्यक्षमूलकप्रतिस्मृतिपराहतत्वादेव । **तत्रैव** आद्यपाद एव । **व्युत्पादितत्वात्** । 'न विलक्षणत्वात्', 'अभिमानी'ति नयद्वये निरूपित-

त्वात् । **तत्रैव** । प्रथमपाद एव । **निराकृतत्वात्** । 'असदि'ति नये श्रुतिसंवादिनीनाम्, 'भोक्त्रे'त्यत्र श्रुतिमूलानाम्, 'अभिमानी'त्यत्र प्रत्यक्षमूलानां 'तदनन्यत्वमि'त्यादौ बह्वीनां व्युदस्तत्वात् । **एवं सति** युक्तिविरोधनिरासकत्वे ।

॥ इति प्रयोजनाभावमूलकानारम्भणीयत्वशङ्का ॥

* * *

॥ अथ तत्र मतान्तरोक्तैतत्पादप्रयोजनदूषणम् ॥
॥ अथ तत्रादौ कश्चिदित्युक्तमतोक्तैतत्पादप्रयोजनदूषणम् ॥

३ **सु०— अत्र कश्चिदाह, 'स्वपक्षसाधनपरपक्षप्रतिक्षेपाभ्यामेव निर्णयो भवति । तत्र प्रथमाध्याये स्वपक्षे प्रमाणमुक्तम् । तस्य युक्तिविरोधो द्वितीयस्य आद्यपादेन निरस्तः । एवं स्वपक्षस्थापने जाते परपक्षप्रतिक्षेपार्थमयं पाद आरभ्यत' इति । तदयुक्तम् । परपक्षप्रतिक्षेपो हि तदीयसाधननिरासादन्यो नास्ति । साधनानि च स्मृत्यादीन्येव । निरस्तानि च समस्तानि तानि प्रथमपाद इति किमस्य कृत्यम् । किञ्चैवं सति विरोधपरिहारोऽध्यायार्थो न स्यादिति ।**

परि०— परोक्तं गतार्थतापरिहारमनूद्य निराह **कश्चिदाहेत्यादिना** । **स्मृत्यादीति** । स्मृतितत्सहभूतयुक्तिश्रुतिप्रत्यक्षाणीत्यर्थः ।

वं०प०— एवं सतीति । परपक्षप्रतिक्षेपमात्रस्यैवात्र साक्षात्प्रतिपाद्यत्वेनाद्यपाद इव साक्षाद्युक्तिविरोधनिरासाप्रतिपादनादित्यर्थः । लोके कर्तुरेकस्यैव दर्शनादित्याशयः ।

कं०रा०— तस्येति । स्वपक्षसाधकप्रमाणस्येत्यर्थः । **एवमिति** । प्रथमाध्यायोक्तस्वपक्षसाधकप्रमाणेनैतदध्यायाद्यपादव्युत्पादयुक्तिविरोधनिरासेन च स्वपक्षस्थापने जाते परपक्षनिरासार्थमयं पाद आरभ्यत इत्यर्थः ।

श्रीनिधि०— किञ्चैवं सतीति । परपक्षप्रतिक्षेपः अस्मिन् पादे क्रियत इति पक्षे । **विरोधपरिहार इति** । उक्तेऽर्थे विरोधपरिहार इत्यर्थः । **अध्यायार्थो न स्यादिति** । अयमेव वास्तवः । अन्यस्य वर्णने अध्यायसङ्गतिर्न स्यादिति भावः । **उपसंहितत्वात्** प्रबलत्वात् ।

शे०वा०— स्वपक्षस्थापने जात इति । स्वपक्षसाधकबाधकभावाभावरूपेण द्विविधत्वात् स्वपक्ष-साधनस्य; आद्ये स्वपक्षसाधकप्रमाणोपन्यासेन, द्वितीयस्याद्ये च युक्तिविरोधनिरासाद्बाधकपरिहारेण च स्वपक्ष-स्थापनसिद्धिरिति भावः । **परपक्षप्रतिक्षेपार्थमिति** । परपक्षे बाधकसाधकप्रमाणभावाभावव्युत्पादनार्थमित्यर्थः । **साधननिरासादन्य इति** । उपलक्षणं चैतत् । तत्पक्षबाधकप्रमाणकथनादन्य इत्यपि द्रष्टव्यम् । अस्तु तर्हि तदीयसाधननिरासाद्यर्थमेवैतत्पादारम्भ इत्यतो न तावत् साधननिरासार्थत्वमस्य युज्यत इत्याह **साधनानि चेति** । नापि परपक्षे बाधकप्रमाणभावव्युत्पादनार्थमप्येतत्पादप्रवृत्तिः । आद्यपादेऽपि **'इतरेषां चानुपब्धेः'**, **'एतेन योगः प्रत्युक्तः'**, **'स्वपक्षदोषाच्च'**, **'एतेन शिष्टा अपरिग्रहा अपि व्याख्याता'** इत्यादौ बाधक-प्रमाणव्युत्पादनेन परपक्षाणां दुष्टत्वोक्तेस्तवापि सम्मतत्वेन तस्यापि तत्रैव सिद्धत्वेनास्य तादर्थ्ययोगात् । यदि चाद्ये तेषां दुष्टत्वोक्तिः स्वपक्षस्य तैर्विरोधनिरासार्थैवेति न तेन तत्सिद्धिरिति मन्यसे हन्त तर्हीहापि दुष्टत्वोक्तिः स्वपक्षस्य तैर्विरोधनिरासार्थैवेति नानेनापि तत्सिद्धिः । अन्यथोक्तेऽर्थे विरोधपरिहारार्थत्वाभावेनास्य पादस्य द्वितीयाध्यायान्तर्भावो न स्यादित्याशयेनाह **किञ्चेति** । यद्वा 'निरस्तानि च समस्तानि तानि प्रथमपाद' इत्युपलक्षणम् । बाधकप्रमाणान्यपि 'एतेन योगः प्रत्युक्तः' इत्यादौ प्रथमपाद एवोपन्यस्तानीत्यपि द्रष्टव्यम् । उभयत्रापि दूषणान्तरमाह **किञ्चैवं सतीति** । तदीयसाधननिरासकत्वे तत्पक्षबाधकप्रमाणकथनपरत्वे चास्य पादस्येत्यर्थः । उक्तार्थे विरोधपरिहारार्थत्वाभावादिति भावः ।

वा०र०— भावाभावरूपेणेति । तद्व्युत्पादनरूपेणेत्यर्थः । स्वपक्षसाधनस्य द्विविधत्वादिति पूर्वेणान्वयः । **आद्ये** प्रथमेऽध्याये । **तस्यापीति** । परपक्षे बाधकप्रमाणव्युत्पादनस्यापीत्यर्थः । **न तेनेति** । दुष्टत्वोक्तिमात्रेणेत्यर्थः । सामान्ये नपुंसकमिति वा उक्तशब्देनाप्रकृतवचनं वा तेनेत्यनेन परामृश्यते । एवं नानेनेत्युत्तरत्रापि ज्ञेयम् । **तत्सिद्धिः** परपक्षे बाधकप्रमाणव्युत्पादनसिद्धिरित्यर्थः । नन्वत्र विरोधनिरा-सार्थत्वं नाङ्गीक्रियत इत्यत आह **अन्यथेति** । अत्र पादे स्वपक्षस्य तर्विरोधनिरासार्थत्वाभाव इत्यर्थः । एवं परपक्षे साधकनिरासादन्यस्य तत्र बाधकसद्भावव्युत्पादनस्य परपक्षप्रतिक्षेपस्य सत्त्वात् कथं तदभावोक्ति-रित्याशङ्कानिरासपरतया किञ्चेत्युत्तरमूलं योजयितुं स्वयं तत्प्रकारनिराकरणं कृत्वा तदुपयोगितया किञ्चेति मूलं योजितम् । अथ मूल एवोक्तशङ्कापरिहारायोपलक्षणया बाधकान्युपन्यस्तानीत्याद्याह **यद्वेति** । एवं सती-त्येतद्व्याचष्टे **तदीयेति** । **तन्मूलत्वमात्रेणेति** । श्रुतिमूलत्वमात्रेणेत्यर्थः ।

विठ्ठल०— साधनानि चेति । परपक्षीयसाधनानि च स्मृतियुक्तिश्रुत्युपसर्जनयुक्तिबहुयुक्तिरूपाण्येव तानि च स्मृत्यधिकरणे नविलक्षणत्वाधिकरणे असदाद्यधिकरणेष्वारम्भणाधिकरणादिषु च क्रमेण समस्तानि निरस्तानीत्यर्थः । **किञ्चैवं सतीति** । परपक्षप्रतिक्षेपे पर्यवसायित्वेऽङ्गीकृते उक्तसमन्वयविरोधपरिहारात् तद-ध्यायप्रवेशोऽस्य पादस्य न स्यादिति भावः ।

॥ इति कश्चिदित्युक्तमतोक्तैतत्पादप्रयोजनदूषणम् ॥

* * *

॥ अथ तत्र अपरेत्युक्तमतोक्तैतत्पादप्रयोजनदूषणम् ॥

४ **सु०—** अपर आह, 'उक्तार्थे स्मृतिन्यायविरोधो नास्तीति स्थापितेऽप्यस्ति ब्रह्मणि समन्वयाभावशङ्का । कथम् । यद्यप्यनुमानं ब्रह्मणो जगत्कारणत्वमपबाधितुं नालम्, तथाऽपि कारणान्तरं जगतोऽवगमयितुमलम् । ततश्च वस्तुविकल्पानुपपत्तेरन्यतरपरिग्रहे हेत्वभावात् ब्रह्मैव जगत्कारणमिति न निश्चेतुं शक्यते, प्रत्युत सर्वज्ञप्रणेतृकत्वेनानुमानस्योपबृंहितत्वात् प्रधानाद्येव जगत्कारणं न ब्रह्मेति बुद्धिः स्यात् । अतो न केवलं ब्रह्मणो जगत्कारणत्वमपबाधितुमनुमानं नोत्सहते, किन्तु कारणान्तरमप्यवगमयितुं नालमिति प्रदर्शनार्थं द्वितीयः पाद आरभ्यत' इति । एतदप्ययुक्तम् । तथा हि । किमनेनोक्तं स्यात् । यदि; प्राक् स्वाभिमतार्थे युक्तिविरोधपरिहारेण स्वपक्षस्थापना विहिता, इदानीं परपक्षप्रतिक्षेपो विधीयत इति; तदोक्तमेवोत्तरम् । अथ, 'युक्तिविरोधपरिहार एव पादद्वयार्थः, किन्तु स्वपक्षविरोधियुक्तिनिराकरणं प्रथमे, द्वितीये तु परपक्षसाधकयुक्तिनिराकरणम्' इति; तन्न, न्यायसाम्येन तासामपि शक्यनिराकरणत्वात्, (सार्वज्ञ्यं) सर्वज्ञत्वं च प्रणेतॄणां प्रागेव निरस्तम् ।

परि०— उक्तमेवोत्तरमिति । 'परपक्षप्रतिक्षेपो ही'त्यादिनोक्तमेवेत्यर्थः । प्रत्युतेत्यादिनोक्तं मतं निराह **सार्वज्ञ्यं (सर्वज्ञत्वं) चेति** । **प्रागेवेति** । 'इतरेषां चानुपलब्धेरि'त्यत्र 'न चाग्निनिश्चयस्तत्र शक्यते व्यभिचारत' इत्यादिना पूर्वपाद एवेत्यर्थः ।

यादु०— प्रागेवेति । 'न चाग्निनिश्चयस्तत्र शक्यते व्यभिचारत' इत्यत्रेत्यर्थः । **उपसर्जनति** । अत्र श्रुतीनां संवादकतया मूलतया वोपसर्जनत्वं विवक्षितम् । मूले 'स्मृतियुक्ती'त्यत्र युक्तिशब्देन दृढयुक्तिरेवाभिमान्यधिकरणे निरस्ता ग्राह्या । एवं चोक्तानुवादत्वसिद्धिरिति ज्ञातव्यम् । 'विरोधिप्रतीतयः' इति (तत्) योग्यस्य विशेष्यस्याध्याहारः ।

वं०प०— न्यायः युक्तिः । **वस्तुविकल्पेति** । **वस्तुनः** जगतः ईश्वरतदितरकर्तृकत्वरूपविरुद्धधर्मद्वयापत्तेरित्यर्थः । **उक्तमेवेति** । परपक्षप्रतिक्षेपो हीत्यादिनेति शेषः । **तासामपि** स्वपक्षविरोधियुक्तिनिराकरणन्यायानां प्रमाणबाधादीनां परपक्षसाधकयुक्तिष्वपि साम्येन निराकर्तुं शक्यत्वादित्यर्थः ।

कं०रा०— सार्वज्ञ्यमिति । 'नित्यवृद्धिक्षयापेतं विष्णोः पूर्णं तु वेदनमि'त्यादिवाक्यबलेन विष्णारन्येषां सार्वज्ञ्यस्य निरस्तत्वेन कपिलाद्युत्प्रेक्षितानुमानस्य सर्वज्ञप्रणेतृकत्वमसिद्धमिति भावः ।

श्रीनिधि०— न्यायसाम्येनेति । स्वपक्षविरोधियुक्तिनिराकरणे यः प्रकारः जगत्कारणस्य औपनिषदादिः तस्य साम्येनेत्यर्थः । **शक्यनिराकरणत्वादिति** । प्रथमपाद एवेति शेषः । ननु न्यायसाम्येन शक्यनिराकरणत्वं सार्वज्ञ्यमूलत्वेन प्रबलत्वात् अतस्तन्निराकरणार्थं पादभेद इत्यत आह **सार्वज्ञ्यं चेति** ।

शे०वा०— उक्तमेवेति । 'परपक्षनिरासो हि तदीयसाधननिरासादन्यो नास्तीत्यादिने'ति शेषः । **प्रागेवेति** । 'न चास्तिनिश्चयस्तत्र शक्यत' इत्यादिना पूर्वपाद एवेत्यर्थः ।

स०व्र०— वस्तुविकल्पेति । ब्रह्मणो जगत्कारणत्वप्रतिपादकं ब्रह्मातिरिक्तसर्वजगत्कारणत्वं प्रतिपादयति । अन्यस्य तत्प्रतिपादकं तु तथैवेति एकस्यैव कारणत्वं तदभावश्चेति वस्तुविकल्पानुपपत्तेरित्यर्थः । **सर्वज्ञप्रणेतृकत्वेनेति** । समयानामिति शेषः । तत्रोक्तस्यानुमानस्योपबृंहितत्वादिति योजना । **तदोक्तमेवोत्तरमिति** । परपक्षप्रतिक्षेपो हि तदीयसाधननिरासादन्यो नास्ति । साधनानि च स्मृत्यादीनि । एतानि च प्रथमपाद एव निरस्तानीति किमस्य कृत्यम् । किञ्चैवं विरोधपरिहारोऽध्यायार्थो न स्यादित्युक्तमेवोत्तरमित्यर्थः । **न्यायसाम्येनेति** । परपक्षसाधकयुक्तयोऽपि प्रमाणसंवादित्वेन वा, तन्मूलत्वेन वा, बहुत्वेन वा बलवत्यः स्युः । तन्निराकरणं च स्वपक्षबाधकयुक्तिनिराकरणं येन न्यायेन कृतं तेनैव कर्तुं शक्यत्वादित्यर्थः । **प्रागेवेति** । 'न चास्तिनिश्चयस्तत्र शक्यते व्यभिचारतः' इत्यादिना निरस्तमिति भावः ।

स०ना०— वस्तुविकल्पानुपपत्तेरिति । उभयोः परस्परानधीनत्वेऽयमेव एको घटं कुर्यात् तमेव परः पटं कुर्यादिति द्वैरूप्यप्रसङ्गः । तस्य चानुपपत्तेरित्यर्थः । **यदि प्रागिति** । प्रथमपादे सर्वे युक्तिविरोधाः परिहृताः । समयपादे तु परपक्षप्रतिक्षेपः क्रियत इत्युच्यत इत्यर्थः । **अथ युक्तिविरोधेति** । प्रथमपादे न सर्वे युक्तिविरोधाः परिहृताः । किन्तु केचनैव । अवशिष्टाः द्वितीयपाद इत्यर्थः । तर्हि पादभेदः किं निबन्धन इति पृच्छति **किं त्विति** । उत्तरमाह **स्वपक्ष इति** । एवं च पूर्वोत्तरपक्षयोः अभेदशङ्का परास्ता ।

विठ्ठल०— कारणान्तरमिति । सामान्यसिद्धिपरिशेषन्यायेन साङ्ख्यादिपरिकल्पितानुमानं प्रधानादिकारणान्तरमवगमयितुमलमित्यर्थः । **अनुमानस्येति** । अनुमानात्मकागमस्येत्यर्थः । उपबृंहितत्वादित्यस्य प्रबलितत्वादित्यर्थः । **उक्तमेवोत्तरमिति** । परपक्षप्रतिक्षेपे हीत्यादिनेत्यर्थः । युक्तिविरोधपरिहारस्यैव पादद्वयार्थत्वे अवान्तरभेदो न स्यादिति शङ्कते **किं त्विति** । **प्रागेवेति** । न चास्तिनिश्चयस्तत्र शङ्क्यत इत्यत्रेत्यर्थः ।

चषकः— वस्तुविकल्पानुपपत्तेः वस्तुनि विरुद्धधर्मद्वयसमावेशानुपपत्तेः ।

॥ इति अपरेत्युक्तमतोक्तैतत्पादप्रयोजनदूषणम् ॥
॥ इति मतान्तरोक्तैतत्पादप्रयोजनदूषणम् ॥

* * *

॥ अथ तत्र स्वमतानुसारेणैतत्पादप्रयोजनाभावशङ्कानिरसनम् ॥
॥ अथ तत्रादौ दर्शनानामभियोगतः प्रवृत्तत्वात् उक्तेऽर्थे पुनर्मन्दस्य शङ्कोद्भवः ॥

५ **सु०—** अतो नायं पाद आरम्भणीय इत्यत आह **स्मृतीति** ।

अनु०— स्मृतियुक्तिश्रुतिगुणयुक्तयो बहुयुक्तयः ।
एवं चतुर्विधा नैव विरुद्धयन्तेऽन्वयं प्रति ।
इति प्रथमपादेन निर्णीतेऽप्यभियोगतः ।
दर्शनानां प्रवृत्तत्वान्मन्द आशङ्कते पुनः ॥

श्रुतयो **गुणा** उपसर्जना(नि) यासां तास्तथोक्ताः । **चतुर्विधा** विरोधिप्रतीतयः । **अन्वयं प्रति न विरुध्यन्ते इति** श्रुतिसमन्वयसिद्धमर्थं नान्यथयितुं शक्नुवन्तीत्यर्थः । **अभियोग** आग्रहः । दृश्यते प्रमेयमेभिरिति **दर्शनानि** साङ्ख्यादिशास्त्राणि ।

एतदुक्तं भवति । यद्यपि परमतसाधकानामस्मन्मतबाधकानां च स्मृत्यादीनामाभासत्वव्युत्पादनेन स्वपरपक्षसाधनोपालम्भौ कृतावेवेति परमार्थः, तथाऽप्युक्तेऽर्थे पुनः पुरुषस्य आशङ्का भवत्येव, किमेतदेवमन्यथा वेति । कस्मात् । अभियोगतो (दर्शनानां) मतानां प्रवृत्तत्वात् तदुपलम्भादिति ।

परि०— उपसर्जना(नीति) इति । उपसर्जनत्वं च मूलतया संवादितया चेति ज्ञेयम् । एवं चतुर्विधा इत्यत्रापेक्षितविशेष्यं पूरयति **विरोधिप्रतीतय इति** । किमनेनोक्तशङ्कानिरासः कृत इत्यत आह **एतदुक्तमिति** । 'परमार्थ' इत्यन्तेन 'अप्य'न्तमूलतात्पर्यानुवादः । 'अभियोगत' इत्यादेस्तात्पर्यम् 'उक्तेऽर्थे पुनरि'त्यादि ।

वं०प०— 'स्मृतियुक्ती'त्यत्र युक्तिशब्दो दृढयुक्तिपरो मन्तव्यः । 'चतुर्विधाः' इत्यस्य विशेष्यस्यानुक्तेराह **विरोधीति** । प्रवृत्तानां स्वरूपसतां दर्शनानां कथमेतच्छङ्काजनकत्वमत आह **तदिति** । **तेषां** दर्शनानाम् ।

कं०रा०— दृश्यत इति । तथा च दृशेः करणे ल्युटि दर्शनशब्दो निष्पन्न इति भावः ।

श्रीनिधि०— दृश्यते प्रमेयमेभिरिति । प्रमेयत्वेनाभिमत इत्यर्थः । दर्शनानां प्रवृत्तिः स्वरूपसती न शङ्काहेतुरित्यत आह **तदुपलम्भादिति** ।

शे०वा०— उपसर्जनभूता इति । अत्रोपसर्जनत्वं न तन्मूलत्वमात्रेण । तथा सत्येतदधिकरणासङ्गहप्रसङ्गात् । नापि संवादकत्वेनैव । तथा सति भोक्त्रापत्तेरित्याद्यधिकरणासङ्गहप्रसङ्गात् । किन्त्वेतयोरन्यतररूपेणैवेति नानुपपत्तिरिति द्रष्टव्यम् । स्मृतियुक्तीति मूले युक्तिशब्दस्य दृढादृढयुक्तिपरतायाः, श्रुतिगुणत्वस्य च तन्मूलत्वतत्संवादित्वरूपतायाः बहुत्वस्य चानेकप्रकारताया, अभिमतत्वाद्युक्तं विरोधिप्रतीतीनां चतुर्विधत्वमिति द्रष्टव्यम् । अत्रायं विवेकः । आद्येऽधिकरणे स्मृत्या, द्वितीये युक्त्या, तृतीये दृढयुक्त्या, चतुर्थे श्रुतिसंवादियुक्त्या, पञ्चमे बहुश्रुतिसिद्धयुक्त्या, षष्ठे बह्वीभिर्युक्तिभिः, सप्तमे बहुप्रमाणसंवादियुक्त्या, अष्टमे व्याघातपर्यवसायित्वेन बहुतमयुक्त्या, नवमे प्रयोजनोद्देशेऽनुद्देशे च दोष इति बहुमुखदृढयुक्त्या, दशमे कर्मादिसापेक्षत्वेऽनपेक्षत्वे च दोष इति बहुमुखदृढयुक्त्या, एकादशे निर्दोषत्वे सति गुणपूर्णत्वरूपमहाप्रमेयविरोधित्वेन बहुतमयुक्त्या विरोधनिरास इत्यन्यत्र विस्तरः । मूले विशेष्यानुक्तेर्योग्यं विशेष्यमध्याहरति **विरोधिप्रतीतय इति** । विरोधिन्यः प्रतीतयो याभिरिति विरोधिप्रतीतयः, विप्रतिपत्तय इत्यर्थः । विरोधिप्रतीतयो न विरुध्यन्त इति विप्रतिषिद्धमेतदित्यतः स्वकार्याकारितया तथोक्तिरित्यभिप्रेत्य तदभिप्रायमाह **अन्वयं प्रतीत्यादिना** । दुराग्रहगृहीतत्वादित्युत्तरग्रन्थानुरोधादाह **अभियोग आग्रह इति** । 'अनादिकालतो वृत्ताः समयाः', 'वर्तन्ते समयाः सदे'त्युत्तरग्रन्थानुरोधादत्र दर्शनशब्दः शास्त्रपरः न ज्ञानपर इति भावेन तस्य शास्त्रपरतां व्युत्पादयति **दृश्यत इति** । आशङ्कत इत्युक्तसंशयप्रकारदर्शनपूर्वमभियोगतो दर्शनानां प्रवृत्तत्वस्य तत्रोक्तहेतुत्वं चोपपादयन्नाह **एतदुक्तं भवतीति** । 'उपलम्भादिती'त्यत्रत्यस्येतिशब्दस्य पूर्वेणैतच्छब्देन सम्बन्धः ।

वा०र०— एतदधिकरणेति । असदधिकरणे श्रुतिसंवादित्वमेव युक्तीनां न तु श्रुतिमूलत्वं तत्सिद्धत्वरूपमित्याशयः । **भोक्त्रापत्तेरित्यादीति** । आदिपदेन सम्पूर्णसूत्रपरिग्रहः । भोक्त्रापत्तेरित्येतदधिकरणेत्यर्थः । बहुयुक्तीत्यनेन तत्सङ्गहस्तु न सम्भवति । उक्तं च तदधिकरणमूले । इदानीं तु श्रुतिसिद्धत्वेन प्रबलयेति । तदुत्तराधिकरणेऽपि प्रमाणमूलत्वतत्संवादित्वाभ्यां प्रबलया युक्त्योक्तेऽर्थविरोधो निराकृतः । बाहुल्यलक्षणबलवद्युक्तिविरोधपरिहारायेदमधिकरणमारभ्यत इत्युक्तम् । ततश्चन्द्रिकावर्णकान्तरपरैवेति न तदुक्तप्रकाराश्रयणं शङ्कनीयमिति ज्ञेयम् । **स्मृतियुक्तीति** । मूल इत्यतः प्राक् चतुर्विधा इतीति प्रतीकोपादानम् । प्रतीकोपादानयुक्तपाठाभावे वा चतुर्विधा इति मूलस्येदमुपपादनमिति व्याख्येयम् । मूलोक्तं विरोधिप्रतीतीनां चतुर्विधत्वं न सम्भवति । एतत्पादीयैकादशाधिकरणसम्बन्धियुक्तिजनितप्रतीतीनामेकादशत्वादित्यतः कैश्चिदवच्छेदकैस्तेषां तेषां सङ्गहकरणात् क्रोडीकृतरूपापेक्षया चतुर्विधत्वसम्भवान्नानुपपत्तिरित्याशयेन केन कस्य सङ्गह इत्यस्याप्रतीतेस्तत्तत्सङ्गहप्रकारं दर्शयति **स्मृतियुक्तीति मूल इति** । तन्मूलत्वेत्येतदुपपादनं पूर्ववत् ।

अनेकप्रकारताऽनुपदं वक्ष्यमाणा बोध्या । तत्राद्येऽधिकरणे स्मृत्येत्यादि चन्द्रिकानुसारेण विवेकमाह **अत्रायं विवेक इति** । पञ्चमे बहुश्रुतीत्येतच्चन्द्रिकोक्तवर्णकान्तरमपि सम्मतमिति प्रदर्शनायोक्तम् । वस्तुतस्तु श्रुतिसिद्धेत्येवाभिप्रेतमित्युक्तमेव । चन्द्रिकोक्तैकादशाधिकरणेषु आद्यं त्रिकं तदुत्तरं चतुष्टयम् । तदुत्तरमेकं तदुत्तरद्विकं अभिमतं चेति पञ्चपञ्चिकाः कृत्वा तत्तदवान्तरविशेषः प्रागव्युत्पादितोऽप्यधिकोऽस्ति । बहुप्रमाणसंवादितादिव्युत्पादनस्य हेतुमुखफलमुखत्वादिप्रतिपादनस्य च तत्र सत्त्वात् । स विशेषोऽप्यत्रानुसन्धेय इत्याशयेनाह **अन्यत्र विस्तर इति** । स्वकार्याकारितयेति पाठः । **वृत्ताः समया इति** । अत्र समय इत्यन्तमेकं वाक्यम् । वर्तन्त इत्यादि वाक्यान्तरमिति बोध्यम् । **एतच्छब्देनेति** । एतदुक्तं भवतीत्यत्रत्यैतच्छब्देनेत्यर्थः ।

स०व्र०— विशेष्यानुक्तेराह **चतुर्विधा विरोधिप्रतीतय इति** । विरोधिन्यः प्रतीतयो याभिरिति विरोधिप्रतीतयः विप्रतिपत्तयः इत्यर्थः ।

विठ्ठल०— श्रुतिगुणेत्यत्र षष्ठीतत्पुरुषत्वे युक्त्युपसर्जनपादे युक्तिपादस्यान्तर्भावो भवेदतो बहुव्रीहिसमास इत्याह **श्रुतयो गुणा इति** । चतुर्विधा इत्यस्य विशेष्यादर्शनादध्याहार्यमाह **विरोधिप्रतीतय इति** । विरोधविषया प्रतीतयः प्रतीताः विरोधिन इति यावत् । कथमनेन मूलेनोक्तगतार्थताशङ्काच्छादनेनास्य पादस्य आरम्भणीयतासिद्धिरित्यत आह **एतदुक्तं भवतीति** । साधितेऽर्थे कथं शङ्कोत्पत्तिरिति शङ्कते **कस्मादिति** । तदुत्तरतया मूलं सङ्गमयति **अभियोगत इति** । साङ्ख्यादिदर्शनप्रवृत्तिमात्रस्य शङ्काहेतुत्वाभावादाह **तदुपलम्भादिति** । प्रबलयुक्तिभिरुपक्रमादिभिः निरस्तेति । प्रथमपादे दोषप्रतिपक्षनिरासस्य कृतत्वादिति भावः ।

चषकः— **उपसर्जनभूताः** उपसर्जनत्वं प्राप्ताः । उपसर्जनत्वं च मूलत्वसंवादकत्वान्यतररूपेण विवक्षितम् । **विरोधिमतय इति** । योग्यविशेष्योपस्कारः । **दर्शनानीति** । करणसाधनल्युडन्तोऽयमिति भावः ।

* * *

॥ अथ च तत्र कपिलादिमतानां प्रवाहतोऽनादित्वात्
उच्छेदाभावेन मन्दस्य तच्छङ्कासम्भवः ॥

६ **सु०— 'ननु च श्रुतयस्तावदपौरुषेयतयाऽनाशङ्कितदोषाः बहुल(प्रबल)युक्तिभिश्चानुसंहितार्था निरस्तसमस्तप्रतिपक्षाश्च । तत्कथं तत्समन्वयसिद्धेऽर्थेऽभियोगप्रवृत्तदर्शनोपलम्भमात्रेणान्यथात्वशङ्का स्यात्, अतिप्रसङ्गात् । नन्वत एवोक्तं मन्द इति; मैवम्, प्राप्तिमनालोच्य शङ्कमानस्याविचिकित्सितशङ्कस्य शास्त्रेऽनधिकारात्' इत्यतः 'अभियोगतो दर्शनानां प्रवृत्तत्वादि'त्युक्तशङ्काकारणं विवृणोति अनादीति ।**

अनु०— अनादिकालतो वृत्ताः समया हि प्रवाहतः ।
न चोच्छेदोऽस्ति कस्यापि समयस्येति

कपिलकणादादीनां प्रणेतृणां स्मरणात् कथमनादित्वमित्यत उक्तं प्रवाहत इति । कपिलादयो हि पूर्वैः प्रणीतान्येव शास्त्राणि कालबलादुत्सन्नानि स्व(तपः)प्रभावादिनाऽवगम्य प्रबन्धान्तररचनया प्रवर्तयन्ति । एवं पूर्वेऽपि पूर्वतरैरित्येवं प्रवाहतोऽनादित्वाददोषः । तथैव च स्मरणानीति । इति हेतोः, आशङ्कत इति पूर्वेण सम्बन्धः ।

इदमुक्तं भवति । करणदोषबाधकप्रत्ययवशादेव ह्यप्रामाण्यं कल्पनीयम्, अन्यथा अतिप्रसङ्गात् । तत्र यथा श्रुतीनामनादित्वात् करणदोषाभावः, तथा समयानामपि । स्वरूपानादित्वं प्रवाहानादित्वमिति तु वैषम्यमात्रम्, पुरुषदोषसञ्चाराभावस्योभयत्रापि साम्यात् । यथा चानुच्छेदेनानुवृत्तेः श्रुतीनां बाधकाभावः, एवं समयानामपि । यदि करणदोषबाधकप्रत्ययोपेताः स्युः, तदोन्मत्तवाक्यवदिदम्प्रथमाः समुच्छेदवन्तश्च स्युः । न चैवम्, अतः कथमप्रामाण्यमश्नुवते । यथा च श्रुतयो बलवद्युक्त्यनुसंहितार्था एवं समया अपि । न च तासामाभासत्वमुक्तमिति वाच्यम्, सर्वेषां तदनुवर्तिनामस्माभिरनवगतत्वेन तत्परिहारसम्भावनात् । एवमेवाप्रतिपक्षत्वं श्रुतीनामिव समयानां सम्भावितम्; कथमन्यथा सूत्रकृदेकधुरीणाः शौद्धोदनिप्रभृतयः अभियोगतः तान् प्रवर्तयेयुः, कथं च प्रेक्षावन्तोऽनेकेऽभियोगेनैवोपाददीरन् । तदेवं श्रुतितुल्य(समान)योगक्षेमतां समयानां मन्यमानस्य स्यादेवोक्तार्थे सन्देह इति ।

परि०— अतिप्रसङ्गादिति । प्रमाणनिर्णीतार्थमात्रेऽप्येवं सम्भवादित्यर्थः । तथा च निःशङ्काप्रवृत्तिः क्वापि न स्यादिति भावः । **प्राप्तिं** शङ्काबीजमित्यर्थः । **स्मरणानीति** । कपिलकणादादिप्रणेतृणां स्मरणान्यप्येवमेव सन्तीति वा, नेयानीति वार्थः । एतावता किमाशङ्काबीजमुक्तमित्यत आह **इदमुक्तमिति** । **अतिप्रसङ्गादिति** । प्रमाणमात्रो(त्सादन)च्छेदप्रसङ्गादित्यर्थः । **समयानामपीति** । अनादित्वात् करणदोषाभाव इत्यन्वयः । तर्कैर्दृढतरैरित्यग्रे अभिधानात् तद्व्यावर्त्यं स्वयमाह **यथा च श्रुतय इति** । तासां युक्तीनां आभासत्वं पूर्वपाद इत्यर्थः । **तदनुवर्तिनामिति** । तत्तन्मतानुवर्तिनां पुंसामित्यर्थः । **परिहारेति** । उक्तस्य परोक्तयुक्तीना-

माभासत्वदोषस्य परिहारसम्भावनादित्यर्थः । प्रतिपक्षत्वादिकं समयानां कथं ज्ञेयमित्यत आह **कथमन्यथेति** । **सूत्रकृदेकधुरीणा इति** । सूत्रकृतामेकधुरां मुख्यभारं वहन्तीति वा, सूत्रकतां मध्ये श्रेष्ठा इति वा, सूत्रकृतश्च ते एकधुरीणाश्च इति वार्थः । 'एकधुराल्लुक्चेति' ख(श्)प्रत्यये तस्य ईनादेशे अन्त्यलोपे (रेफोत्तरस्य आकारस्य लोपे) णत्वे च रूपम् । **शौद्धोदनिप्रभृतयः** जिनादय इत्यर्थः । सन्देह इतीतीतिशब्दस्य इदमुक्तमिति पूर्वेणान्वयः ।

यादु०— अचिकित्सितेत्यत्र भावे क्तः । तथा च न विद्यते चिकित्सितं, चिकित्सा परिहारो यस्याः साऽचिकित्सिता, तथाविधा शङ्का यस्य स तथोक्तः तस्येत्यर्थः । परिहारशून्यशङ्कस्येति यावत् । **स्मरणादिति** । स्मृतिषूक्तत्वादित्यर्थः । **तथैव** उक्तरीत्या सम्प्रदायप्रवर्तकतयैव । 'स्मरणानी'त्यनन्तरं योज्यानीति शेषः । प्रकारान्तरेण बाधाभावादिकमुपपादयति **यथा च श्रुतय इत्यादिना** । **तासामिति** । बलवद्युक्तीनामित्यर्थः । **तदनुवर्तिनामिति** । तत्सिद्धान्तानुसारिणां विदुषामित्यर्थः । इदं च बाधाभावाद्युपपादनमभियोगतो दर्शनानां प्रवृत्तत्वादित्यनेन सूचितमित्याशयेनाह **कथमन्यथेति** । **एकधुरीणा इति** । एकधुरां वहन्तीत्येकधुरीणाः तत्समा इति यावत् । 'एकधुराल्लुक् चे'ति विकल्पेन खप्रत्ययविधानादिदं साध्विति मन्तव्यम् ।

वं०प०— **अतिप्रसङ्गादिति** । सिद्धेऽप्यर्थे यद्यन्यथात्वशङ्केति शेषः । स्फीतालोकमध्यवर्तिन्यपि घटे सन्देहः स्यादित्यर्थः । **अत एव** । सिद्धेऽप्यर्थेऽन्यथात्वशङ्काकरणादेवेत्यर्थः । अचिकित्सितत्वं नाम शङ्काया अपरिहार्यत्व(रूप)म् । **पूर्वतरैः** प्रणीतान्येवेत्यादिसम्बन्धः । **साम्यादिति** । वेदे पुरुषाभावादेव, इतरत्र तु सत्यपि पुरुषे तत्र दोषाभावादेव, तत्सञ्चाराभाव इति साम्यम् । **तासां** समयानुग्राहकयुक्तीनाम् ।

कं०रा०— **तासामिति** । समयार्थोऽपि बृंहकयुक्तीनामित्यर्थः । **सर्वेषामिति** । सर्वेषां साङ्ख्यादिसमयानुवर्तिनामस्माभिरनुपलब्धत्वेन कतिपयतत्समयानुवर्तिकर्तृकस्य युक्त्याभासत्वपरिहारस्य सम्भावनादित्यर्थः । **एतेनेति** । 'भ्रान्तिमूलत्वमेतेषां पृथग्दर्शयति स्फुटमि'त्यत्र पृथग्विस्तरेणेत्यनेन पूर्वपादेनास्य पादस्य प्रपञ्चाप्रपञ्चकभावलक्षणासङ्गतिं स्फुटं सुबोधमित्यनेन तु प्रपञ्चनस्य प्रयोजनं चोक्तं भवतीत्यर्थः । **तदिदमिति** । उक्तसङ्गत्यादिकं 'इतरेषां चानुपलब्धेरि'ति सामान्यतो निराकरणं समयानां कृतं विशेषतो निराकरोत्यस्मिन्पाद इति भाष्येणोक्तमित्यर्थः । न च वाच्यमुदाहृतभाष्यवाक्येन पूर्वपादेनास्य पादस्य प्रपञ्चप्रपञ्चकभावलक्षणसङ्गत्युक्तावपि प्रपञ्चनस्य प्रयोजनं नोक्तमिति विशेषतो निराकरणो हि मन्दानामपि बोधो भवतीति तद्रूपस्य प्रयोजनस्य विशेषतो निराकरोत्यस्मिन्पाद इत्यनेनोक्तप्रायत्वात् ।

श्रीनिधि०— **प्राप्तिमिति** । प्राप्यते अनेनेति प्राप्तिः शङ्काकारणमित्यर्थः । **अविचिकित्सितशङ्कस्यापि** नष्टशङ्कस्यापि । **स्मरणादिति** । स्मृतौ प्रतिपादनादित्यर्थः । **तपःप्रभावादिनेति** । **आदि**पदेन

प्रतिभा गृह्यते । **तथैव च स्मरणानीति** । तथैव उक्तार्थानुसारेणैव **स्मरणानि** स्मृतिवाक्यानि । सन्तीति शेषः । ननु श्रुतीनां स्वरूपानादित्वेन कारणदोषाभावः सम्भवति न समयानामित्यत आह **स्वरूपानादित्वमिति** । **पुरुषदोषसञ्चाराभावस्येति** । स्वतन्त्रपुरुषपूर्वकत्वाभावादिति भावः । इदं **प्रथमासमुच्छेदवन्तश्चेति** कारणदोषोपेतत्वे इदंप्रथमा स्युर्बाधकप्रत्ययोपेतत्वे समुच्छेदवन्तश्च स्युरिति द्रष्टव्यम् । **तासां** युक्तीनाम् । **तदनुवर्तिभिः** तस्याभासत्वस्य परिहारसम्भवात् । ननु तदनुवर्तिन एव न सन्ति सत्त्वे वा तत्परिहारे सामर्थ्यं नास्तीत्यत आह **सर्वेषामिति** । न सन्तीति वा सत्त्वेऽपि सामर्थ्यं नास्तीति वा सार्वज्ञाभावेनास्माभिरवगन्तुमशक्यत्वादिति बुद्ध्या विवेकेन योज्यम् । **सूत्रकृदेकधुरीणामिति** । एका च सा धूश्च एकधूः । एकं युगं तद्वहन्तीति धुरीणाः । नित्यसापेक्षत्वात् समासः । तत्र हि तदभिमतार्थस्य सकलागमविरोध उच्यते । न हि सकलागमविरुद्धार्थवादिनां आगमवादित्वं सम्भवतीति विरोधेनेत्यर्थः ।

शे॰ वा॰— ननु चोक्तेऽर्थेऽन्यथात्वशङ्कोपपादनेन पादारम्भस्य 'अभियोगतः । दर्शनानां प्रवृत्तत्वान्मन्द आशङ्कते पुनरि'त्येतावतैव सिद्धेः 'अनादिकालतो वृत्ताः समयाः' इत्यादिसमयानामनादिकालानुवृत्तत्वादिवर्णनपरम् उत्तरवाक्यमनर्थकम् । न च समयानां श्रुतितुल्यत्वोपपादनेनाप्रामाण्यपरिहारार्थं तदिति वाच्यम् । तद्व्युत्पादनस्यापि प्रकृते उपयोगादर्शनादित्यतो 'दर्शनानां प्रवृत्तत्वादि'त्युक्तशङ्काकारणविवरणार्थत्वान्न तस्यानर्थक्यमिति भावेन तद्विवरणपरतया तद्योजयितुमभियोगतः प्रवृत्तदर्शनोपलम्भस्य श्रुत्याऽतुल्यबलत्वेन तदुक्तेऽर्थे अन्यथात्वशङ्काकारणत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । **अचिकित्सितेति** । अत्र भावे क्तः । न विद्यते चिकित्सितं, चिकित्सा परिहारः, यस्याः सा अचिकित्सिता । तथाविधा शङ्का यस्य स तथोक्तस्तस्येत्यर्थः । परिहारशून्यशङ्कस्येति यावत् । ननु समयानामनादित्वकथनमात्रेणाभियोगप्रवृत्तदर्शनोपलम्भस्य उक्तसंशयकारणत्वनिर्वाहान्न तत्प्रवाहस्यानादित्ववर्णनस्य प्रकृते कश्चिदुपयोग इति तत्पर 'प्रवाहत' इति भाष्यखण्डवैयर्थ्यम् । न चैतत्पूर्वोक्तस्य समयानादित्वस्य प्रवाहानादित्वव्यवस्थापनपरमिति वाच्यम् । स्वरूपानादित्वपरित्यागेन प्रवाहानादित्वे तद्व्यवस्थापने निमित्ताभावादित्याशङ्क्य कर्तृमत्तया स्मर्यमाणानां समयानां स्वरूपानादित्वस्य बाधितत्वाद्युक्तं समयानादित्वस्य प्रवाहानादित्वे पर्यवसानमित्यभिप्रेत्य स्वरूपानादित्वासम्भवमुपदर्शयति **कपिलेति** । **कथमिति** । अन्यथा कर्तृमत्तया प्रसिद्धलौकिकवाक्यस्याप्यनादित्वं स्यादविशेषादिति भावः ॥ **अदोष इति** । स्वरूपानादित्वानङ्गीकारान्न कर्तृस्मरणानुपपत्तिरिति भावः । ननु भवेदेतदेवं यदि कपिलादयः पूर्वैः प्रणीतान्येव शास्त्राणि कालबलादुत्सन्नानि तपःप्रभावादिनाऽवगम्य प्रबन्धान्तररचनया प्रवर्तयन्ति इत्येतत्सिद्धं स्यात् । तदेव कुत इत्यतः 'शौद्धोदनिप्रभृतयः सम्प्रदायप्रवर्तका' इति स्मृतिषु सम्प्रदायप्रवर्तकत्वोक्त्या पूर्वं सतामेव शास्त्राणां कालबलादुत्सन्नानां तपःप्रभावादिनाऽवगम्य प्रबन्धान्तररचनया प्रवर्तकत्वस्योक्तत्वेन तासां स्मृतीनामेवोक्तार्थनियामकतया तद्बलादुक्तार्थसिद्धिरित्याशयेनाह **तथैवेति** । स्मरणानीत्यतःपरं सन्तीति शेषः । साकाङ्क्षत्वप्रयुक्तां वाक्याभासतां परिहरति **इतीति** ।

ननु 'अनादिकालतो वृत्ताः' इत्यनेन वाक्येन कथमुक्ताक्षेपपरिहारः । समयानां श्रुतितुल्यताया अनुक्तत्वात् । न चानादिकालतो वृत्तत्वादिना समयानामप्रामाण्याभावप्रतिपादनेन श्रुतितौल्यस्य व्युत्पादितत्वात् तत्परिहार इति वाच्यम् । अनादिकालतोऽनुवृत्तत्वानुच्छिन्नत्वयोरप्रामाण्याभावेन प्रयोज्यप्रयोजकभावप्रतीत्या ताभ्यां तत्साधनायोगात् । योगे वाऽन्यतरेणाप्यप्रामाण्याभावस्यैकैकमात्रेणासिद्ध्या कथञ्चिदुभयोपपादनस्या-वश्यकतायाम् अनादिकालतोऽनुवृत्तत्वादिना तदप्रामाण्याभावसिद्धावपि न समयानां श्रुतितुल्यत्वसिद्धिः । प्रमाणतयोभयोः साम्यप्राप्तावपि युक्तिभिरनुसंहितार्थत्वभावाभावाभ्यां निरस्तसमस्तसत्प्रतिपक्षत्वभावाभावाभ्यां साम्ये हेत्वनुक्त्या तस्येहाप्रतिपादितत्वात् । तथा च समयानां श्रुतितुल्यत्वसमर्थनान्न समयोपलम्भस्य श्रुत्युक्तेऽर्थे अन्यथात्वशङ्काधायकत्वसिद्धिरित्यतो नात्रानादिकालतोऽनुवृत्तत्वादेः साक्षादप्रामाण्याभावसाधक-त्वमभिप्रेतं येनाप्रयोजकत्वं स्यात् । किन्नामाप्रामाण्यप्रयोजकदोष-बाधकप्रत्ययाभाव-प्रतिपादनमुखेनैवेति नाप्रयोजकत्वम् । तत्राप्यनादित्वस्य अप्रामाण्योत्पादकदोषाभावप्रतिपादनद्वारा, अनुच्छिन्नत्वस्य चाप्रामाण्य-ज्ञापकबाधकाभावप्रतिपादनद्वारैवेति नान्यतरवैयर्थ्यमपि । अभियोगतो दर्शनानां प्रवृत्तत्वान्यथाऽनुपपत्त्यैव युक्तिभिरनुसंहितार्थत्वनिरस्तसमस्तसत्प्रतिपक्षत्वयोः सिद्ध्या अभियोगतो दर्शनानां प्रवृत्तत्ववर्णनपर-पूर्ववाक्येनैवास्यार्थस्याप्यर्थतः सिद्धत्वान्न तदनुक्तिरपीत्यनेनैव वाक्येन समयानां श्रुतितुल्यत्वसमर्थनाद्युक्तं समयोपलम्भस्य श्रुत्युक्तार्थेऽन्यथात्वशङ्काकारणत्वमिति न कश्चिद्दोष इत्यभिप्रेत्य अनादिकालतोऽनुवृत्त-त्वादिना अप्रामाण्याभावसाधनं तावदुपपादयति **इदमुक्तं भवतीत्यादिना** । **अन्यथेति** । करणानामुत्पत्तौ प्रामाण्यस्वतस्त्वापवादकस्य दोषस्य, ज्ञप्तौ स्वतस्त्वापवादकबाधकस्याभावेऽप्यप्रामाण्य इत्यर्थः । **अति-प्रसङ्गात्** श्रुतीनां तदुभयरहितानामप्यप्रामाण्यप्रसङ्गादित्यतिप्रसङ्गात् । अस्तु तर्हि दोषबाधकप्रत्ययवशादेव समयानामप्रामाण्यमित्यतो भवेदेवं यदि दोषादिकं भवेत् । न चैवम् । अनादित्वादिना तदभावसिद्धेरित्यभि-प्रेत्य अनादित्वेन दोषाभावसाधनं तावदुपपादयति **तत्रेति** । ननु न श्रुतिप्रतिबन्धा समयानां निर्दोषता उपपादयितुं शक्या, श्रुतेः स्वरूपानादित्वेन समयानां च तदभावेन वैषम्यात् इत्यतः पुरुषदोषसञ्चारापादकस्य पौरुषेयत्वस्यैव निर्दोषविरोधित्वेन, समयानां च पौरुषेयत्वेऽपि प्रवाहतोऽनादित्वेन पुरुषदोषसञ्चाराभावेन अस्य पौरुषेयत्वस्य तदनापादकतया पुरुषदोषसञ्चारापादकपौरुषेयत्वाभावस्य उभयत्राप्यविशिष्टत्वाद्युक्तः प्रतिबन्दीग्रह इत्याह **स्वरूपेति** । अनुच्छिन्नत्वेन बाधकाभावसाधनमप्युपपादयति **यथा चेति** । एवं समयानां प्रमाणत्वेन श्रुतितुल्यतामुपपाद्य पूर्ववाक्योक्त-'अभियोगतः प्रवृत्तत्व'-अन्यथाऽनुपपत्त्या बलवद्युक्त्यनुसंहितार्थत्वसिद्धि-मुपपाद्य तेनापि रूपेण श्रुतितुल्यतां समयानां दर्शयितुमाह **यथा चेति** । समयेष्वपि स्वोक्तार्थे संवादकतया युक्तीनामपि कथनादिति भावः । **तासामिति** । बलवद्युक्तीनामित्यर्थः । **तदनुवर्तिनामिति** । तत्सिद्धान्तानु-वर्तिनां विदुषामित्यर्थः । एतच्चावैषम्यम्, अभियोगतः दर्शनानां प्रवृत्तत्वादित्यनेनैव सूचितमिति न पृथगुक्त-मित्यभिप्रेत्याह **कथमिति** । **एक(धू)धुरीणा इति** । एका चासौ धूश्चेति 'पूर्वकालैके'त्यादिना समासः । 'ऋक्पूरब्धूः' इत्यकारः समासान्तः । तत्र धूःशब्दस्य स्त्रीलिङ्गत्वात् 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरि'ति वचनात् स्त्रियां टापि द्वितीयासमर्थात् तद्वहतीत्यर्थे 'एकधुराल्लुक्चेति' खप्रत्ययस्य, विकल्पेन तल्लुकश्च विधानात्

खप्रत्यये, तल्लुगभावपक्षे चैकधुरीणा इति सिद्ध्यतीति ज्ञेयम् । एकधुरां वहन्तीत्येकधुरीणा इति विग्रहो द्रष्टव्यः ।

वा०२०— शङ्काकारणविवरणार्थत्वादिति । शङ्काकारणस्य कारणत्वानुपपत्तिशङ्कापरिहारायेति शेषः । **दर्शनोपलम्भस्येति** । उपलब्धदर्शनानामित्यर्थः । मूलेऽपि तथैवार्थः । तेन श्रुतिसाम्योपपादकानादिकालानुवृत्तत्वाद्युपपादनस्य असङ्गतिशङ्कानवकाशः । एवमुत्तरत्रापि । उपलम्भविशिष्टदर्शकानां कारणतोपलम्भरूपे विशेषणे पर्यवस्यतीति विशेषणप्राधान्यमाश्रित्योपलम्भस्येत्युक्तमिति द्रष्टव्यम् । चिकित्साशून्यत्वप्रतिपादनाय चिकित्सेत्येव वक्तव्यतया अचिकित्सितेति कर्मणि क्तप्रत्ययो असङ्गत इत्यत आह **अत्र भाव इति** । **प्रवाहानादित्वेति** । तद्रूपत्वेनेत्यर्थः । प्रवाहानादित्व इति सप्तमीप्रयोगादुत्तरत्रेति ज्ञेयम् । विशेषव्याप्त्यभावमाशङ्क्याह **अविशेषादिति** । **शौद्धोदनिप्रभृतय इति** । बौद्धप्रमुखा इत्यर्थः । **उक्तत्वेनेति** । लब्धत्वेनेत्यर्थः । **उक्तार्थेति** । कपिलादयः पूर्वैरित्यादिनोक्तार्थेत्यर्थः । **अप्रामाण्याभावेनेति** । सहार्थे तृतीया । युक्तिभिरनुचिन्तनार्थत्वनिरस्तसमस्तप्रतिपक्षत्वाभ्यां साम्य इति पाठः । वक्ष्यति च युक्तिभिरनुसंहितार्थत्वनिरस्तसमस्तप्रतिपक्षत्वयोः सिद्ध्येति । क्वचिदनुसंहितार्थत्वभावाभावाभ्यां निरस्तसमस्तप्रतिपक्षत्वभावाभावाभ्यां साम्य इति पाठः । तत्र युक्तिभिरनुसंहितार्थत्वादिना साम्यमात्रे तात्पर्येण उभयत्रापि तदुभयभावो वा तदुभयाभावो वा चेत् तदैवं साम्यमुपपद्यते अन्यथा तु नेति युक्तिभिरनुसंहितार्थत्वनिरस्तसमस्तप्रतिपक्षत्वभाववत् तदुभयाभावोऽप्युक्तः । न तु प्रकृतसाम्यनिर्वाहः । उक्तभावाभावाभ्यामित्याशयेनेत्याहुः । तथा निरस्तसमस्तप्रतिपक्षत्वेति पाठः । सत्पदं लेखकागतम् । एवमुत्तरत्रापि । **इत्यनेनैवेति** । इत्येवमनेनैव वाक्येन अनादिकालतो वृत्ता इत्येतद्वाक्यसमुदायेनैवेत्यर्थः । **समयोपलम्भस्य** उपलब्धसमयानामित्यर्थः । **इदमुक्तं भवतीत्यादिनेति** । अयं प्रघट्टकावतारेऽपि अप्रामाण्याभावसाधनोपपादनांशे कारणानां दोषेत्यादि मूलाद्यवतारोऽपि भवतीत्यतस्तावदुपपादयतीत्युक्त्वा इदमुक्तं भवतीत्यादिनेति प्रतीकमुपात्तमिति ज्ञेयम् । **इदंप्रथमा इति** मूलम् । अयं प्रथमोपासामितीदंप्रथमाः । अस्मदादिज्ञातोत्पत्तिकाला इत्यर्थः । पौरुषेयत्वाभावस्य चोभयत्रापीति चशब्दयुक्तः पाठः स्वरसः । चशब्दाभावे वा तदर्थगर्भ एवार्थः । **एवं समयानामिति** । अत्र प्रमाणत्वेन श्रुतितुल्यमुपपाद्यते नापि रूपेण श्रुतितुल्यतामिति सम्बन्धः । **तेनापि** इत्यस्य बलवद्युक्त्यनुसंहितार्थत्वेन रूपेणापीत्यर्थः । **दर्शयितुमाह** दर्शयतीत्यर्थः । तद्रूपस्यासिद्धौ तेन श्रुतितुल्यत्वप्रदर्शनायोग इत्यत उक्तम् । पूर्ववाक्योक्तेत्यादिसिद्धम् उपपाद्येत्यन्तम् । अत्रोपपाद्येत्यस्योपपादनविशिष्टमेव श्रुतितुल्यत्वप्रदर्शनमिति बलवद्युक्त्यनुसंहितार्थत्वोपपादनस्य तेन श्रुतितुल्यत्वोपदर्शनस्य च साहित्यमात्रे तात्पर्यम् । ननु क्त्वादेशल्यबुक्तमुपपादनस्य प्राक्कालत्वमपि विवक्षितम् । येनोपपादनस्य कथमन्यथेत्यादिना करिष्यमाणतया प्राक्कालत्वाभिधानायोग इति शङ्का स्यात् । यद्वा मुखं व्यादाय स्वपितीत्यादिवत् पौर्वापर्यं विपरीतम् । अत एव प्रक्रियायां तत्कालेऽपि क्वचित् । मुखं व्यादाय स्वपिति, नेत्रे निमील्य हसतीत्युक्तम् । एतेन कथमन्यथेत्येतन्न केवलमप्रतिपक्षत्वोपपादकमपि तु बलवद्युक्त्यनुसंहितार्थ-

त्वस्यापीति प्रतिपादितं भवति । वक्ष्यति च **एतच्चावैषम्यमिति** । न केवलं बलवद्युक्त्यनुसंहितार्थत्वरूपमवैषम्यं किन्तु एतदप्रतिपक्षत्वरूपं च । तदुभयमपीति यावत् । कथमन्यथेत्यस्योभयोपपादकतया तदुपपादकत्वेनैव तस्य योजनीयत्वादिति ज्ञेयम् । बुद्ध्या विविच्य बलवद्युक्तिपरामर्शविवक्षया प्रवृत्तायामित्येतद्व्याचष्टे **बलवद्युक्तीनामित्यर्थ इति** । एकधुरीणा इत्यत्र समासाद्यप्रतीतेराह **एका चासाविति** । धुर्वी हिंसायामिति 'हिंसार्थाद्भुर्बुधाभ्राजभासधुर्विधुतोर्जिष्टं जुग्रावस्तुवः क्विबि'ति सूत्रेण क्विपि तस्य सर्वापरिहारलोपे च सति क्वौ परतोराल्लोप इत्यनेन रेफात्परच्छकारवकारयोर्लोपविधायकेनात्र रेफोत्तरवकारलोपे कृत्तद्धितेति प्रातिपदिकत्वेन स्वाद्युत्पत्त्या प्रथमेकवचनेऽसौ हलन्तत्वेन तल्लोपे धुरित्यस्य सुबन्तत्वेन पदतयार्वोरुपधादीर्घ इक इत्यनेन रेफान्तधातोः पदभूतस्य उपधाभूत इक् तस्य दीर्घे सति धुरिति रूपम् । अत्र धूश्चेत्येकधुरिति समासपदपाठानन्तरं पूर्वकालेत्यादिपाठश्चेत् स पाठः सर्वा चासौ धूश्चेति सर्वधुरेत्यादि शेष्यादिगतपाठानुसार्येव । यदि तु धूश्चेति पूर्वकालैकेति पाठस्तदा इति विगृह्य एकधुरेति समास इति योज्यम् । अत एव एकधुरां वहन्तीत्येव तद्धितविग्रहप्रदर्शनमुपरि, मञ्जर्यामपि यः सर्वधुरादिति सूत्रे सर्वा चासौ धूश्चेति पूर्वकालेत्याद्युक्तेस्तत्रेव तदनुसारिप्रकृतग्रन्थेऽपि पूरणस्योपपत्तेरिति ध्येयम् । एकधुरेतिसमासपदनिष्पत्तिं वदन् एकधुरां वहन्तीत्यर्थलाभोपयुक्तं प्रत्ययादिकं चाह **ऋक्पूरब्धूरित्यादिना** । **तत्रेति** । 'ऋक्पूरब्धूः पथामानक्ष' इति सूत्रेण ऋचाद्यन्ते समासे अकारः समासान्तो भवतीति विधानात् धूःशब्दान्तसमासादकाप्रत्यये अजादिपरत्वाद्यचि भमिति भत्वेन पदत्वाभावात् वोरुपधाया दीर्घ इत्यनेन दीर्घाप्राप्तेरकारान्तैकधुरशब्दनिष्पत्तौ सत्यामित्यर्थः । एकधुरशब्दान्तर्गतधूःशब्दस्येत्यर्थलाभाय तत्रत्यस्य धूरित्युत्तरेणापि सम्बन्धः । स्त्रियां टापीत्यत्र धूःशब्दादिति विभक्तिविपरिणामेन वर्तते । उक्तधूःशब्दस्य कथं स्त्रीलिङ्गत्वम् । स्त्रीलिङ्गस्वभावत्वे वा कथं समासेन लिङ्गापहाराभाव इत्यतो वचनादित्यन्तं पूर्वदलम् । तथा च धूःशब्दस्य स्त्रीलिङ्गस्वभावत्वात् स्त्रियां टाप् सम्भवति । नापि समासेन लिङ्गापहारमाप्तिः । परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्यनेन परपदधूःशब्दलिङ्गस्यैवावशेषोपपत्तेः । तदेतदाह **वचनात्स्त्रियामिति** । वचनप्रयुक्तानवगतस्त्रीत्वे सतीत्यर्थः । अथवा स्त्रियां टापट हि स्त्रीलिङ्गप्रयुक्तः । धूःशब्दस्यापि परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति स्त्रीत्वात् स्त्रियां टाबुपपत्तिः । स्वाभाविकस्त्रीलिङ्गत्वाभावे परपदलिङ्गत्वेनापि स्त्रीलिङ्गाप्राप्तिरित्यत उक्तं धूःशब्दस्य स्त्रीलिङ्गत्वादितीति योजनीयम् । वस्तुतस्तु तत्र समासे विद्यमानधूःशब्दस्य स्त्रीलिङ्गत्वादित्यत्र वचनादित्यन्तो हेतुः । एवं च उक्तवचनात्तस्य स्त्रीलिङ्गत्वात् स्त्रीलिङ्गत्वानपायेन तल्लिङ्गस्यैवानपायेन तल्लिङ्गस्यैवावशिष्टत्वादुक्तशब्दात् स्त्रियां टापीति योज्यमिति कश्चित् क्षुद्रोपद्रवः । खः सर्वधुरादित्येतत्सूत्रीयस्त्रीलिङ्गे न्याय्य इति काशिकावाक्यव्याख्यानमञ्जर्यां स्त्रीलिङ्गत्वात् परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति वचनादित्युक्तेस्तदनुसारेणात्र वाक्यविन्यासेऽपि पूर्वापरवाक्यव्यत्यासेन योजनायाः सुलभत्वात् । **तद्वहतीत्यर्थ इति** । तद्वहति रथ युगप्रासङ्गमिति पूर्वसूत्रात् तद्वहतीत्यस्याधिकारादिति भावः । **एकधुरादिति** । खः सर्वधुरादित्यतः खः इत्यनुवर्तते । एकधुरादिति च प्रातिपदिकमात्रविवक्षया नपुंसकनिर्देशः । नदीबन्धुनि बहुव्रीहाविवत् । (उक्तं च मञ्जर्यां बन्धुनीति शब्दस्वरूपापेक्षया नपुंसकनिर्देश इति । स्त्रीलिङ्गे न्याय्ये सर्वधुरादिति प्रातिपदिकमात्रापेक्षयेति निर्देश इति काशिकायाम् । सर्वधुरादेकधुरादित्यादि-

निर्देशः प्रातिपदिकमात्रापेक्षयेति शेष्याम् ।) अन्यथैकधुराया इति स्त्रीलिङ्गप्रसङ्गात् । एकधुराशब्दात् खः स्यात् । तस्य लुक् वा स्यादिति सूत्रार्थः । **लुगभावपक्ष इति** । खस्यायनेयीनीयि यः फठखछघां इत्यनेन इनादेशे यस्येति चेत्याकारलोपे णत्वे चैकधुरीणप्रातिपदिकनिष्पत्तिः । सम्पूर्णखस्य वा ज्ञानमात्रस्य वा अयमादेश इत्येतद्विचारस्तु ठस्येक इत्येतत्सूत्रीयमञ्जर्याद्यनुसारेणादेशविचारस्तृतीये पादेऽस्माभिः करिष्यते तत एव विप्रतिपत्तव्यः । लुक्पक्षे तु एकधुर इति काशिकाद्युक्तं रूपम् । एकधुरामित्येव विग्रहेण विग्रहे यन्नियतविभक्तिकं तस्य चैकविभक्ति चाप्राप्तेरिति ज्ञेयम् । काशिकायामेकं धुरं वहतीति धूःशब्दस्य समासान्ताकारान्तनपुंसकेन निर्देशैकवचनान्तवहतीत्याभ्यां विग्रहप्रदर्शनात्प्रकृते च (पूर्वनिपात इत्यनेनोपसर्जनतया नियतविभक्तिकैकधुराशब्दस्योपसर्जनत्वे सति गोस्त्रियोरित्यनेन ह्रस्वेऽतिमाल इत्यादिवदेकधुर इति) टाप् बहुवचनानुसारेण विग्रहस्य प्रदर्शनीयत्वात् तथा विग्रहं दर्शयति **एकधुरामिति** । धातुवृत्त्यादावेवं विगृहीतम् **इति विग्रह इति** । इत्येकधुरीणा इत्यस्य विग्रह इत्यर्थदिकधुरीणा इत्यस्यान्तर्भविऽपि न दोषः । उक्तप्रकारेण विशेषणसमासाश्रयणेन साधुत्वव्युत्पादनं चैकधुरमित्येकधुरामिति च विग्रहकाले एकधुरशब्दे समस्तव्यवहारः काशिकादौ च दृश्यत इति तदनुसारेण टीकायां कृतम् । यदि तु मञ्जरीकृतां सर्वधुरां वहतीति विग्रहं सर्वधुरीणशब्दे प्रदृश्यापि ख इति योगविभागोदाहरणभूतदक्षिणधुरीणः उत्तरधुरीण इत्येतयोः दक्षिणाधुरं वहतीति उत्तरां धुरं वहतीति च विगृह्य तद्धितार्थेत्यनेन तद्धितार्थे समासानन्तरं ऋक्पूरित्यनेन समासान्ताकार इत्युक्तेरेकां धुरं वहतीत्याद्युक्तेश्चैकधुरीण इत्यत्रैकां धुरं वहतीति विग्रहे तद्धितार्थे विषये एकपदरूपसङ्ख्यावाचकपदस्य समानाधिकरणधूःशब्देन तद्धितार्थोत्तरेत्यनेन समासे सति समासान्ताकारे चैकधुरशब्दादुक्तरीत्यैव स्त्रीत्वात् टापि एकधुरादिति सूत्रेण खप्रत्यये पूर्ववदेवैकधुरीणप्रातिपदिकनिष्पत्तिरिति मतम् । तदैकां धुरं वहन्तीति विग्रहो द्रष्टव्य इति व्युत्पादनप्रकारोऽवसेय इति सूरयो विदांकुर्वन्तु ॥

स०व्र०— अचिकित्सितत्वम् । अत्र शङ्काया अपरिहार्यत्वं द्रष्टव्यम् । **स्मरणादिति** । तेषां तत्प्रणेतृत्वप्रतिपादकस्मृतेरित्यर्थः । **अदोष इति** । स्मृतिविरोधलक्षणदोषो नास्तीत्यर्थः । ननु अपूर्वप्रबन्धनिर्मातृत्वमेव प्रतिपादयन्तीनां स्मृतीनां सत्त्वात् कथं तद्विरोधाभाव इत्यत आह **तथैव च स्मरणानीति** । इममेवार्थं प्रतिपादयन्तीति शेषः । **सर्वेषां तदनुवर्तिनाम्** समयानुवर्तिनां पुरुषाणाम्, **अनवगतत्वेन** ज्ञातुमशक्यत्वेन, आभासपरिहारः तैः कर्तुं शक्यत इति सम्भावनादित्यर्थः । **एवमेवेति** । 'सर्वेषां तदनुवर्तिनामनवगतत्वादि'त्युक्तप्रकारेणैवेत्यर्थः । सूत्रकृता सह एकां धुरं वहन्तीत्येकधुरीणा इत्यर्थः ।

विट्ठल०— अचिकित्सितशङ्कस्य इत्यस्यापरिहृतशङ्कस्येत्यर्थः । पूर्वोत्तरापरामर्शेन तूष्णीं शङ्कामात्रशीलस्येति यावत् । **स्मरणात्** इत्यस्य स्मृतिसिद्धत्वादित्यर्थः । **तथैव स्मरणानीति** । तदभिप्रायेणैव कपिलादीनां साङ्ख्यादिशास्त्रप्रणेतृत्वपराः स्मृतयो ज्ञेया इति भावः । अपौरुषेयत्वादिना प्रबलश्रुतिनिश्चितेऽर्थेऽपि दुर्दर्शनोपलम्भेन शङ्काप्राप्तिमुपपादयितुमाह **इदमुक्तं भवतीति** । यच्छ्रुतीनां युक्तिभिरनुसंहितार्थत्व-

मुक्तं तत्समयेष्वपि सममित्याह **यथा च श्रुतय इति** । **तासामिति** । समयोपबृंहकयुक्तीनां आभासत्वं प्रथमपादे उक्तमित्यर्थः । **तदनुवर्तिनामिति** । तत्तत्समयानुवर्तिनां युक्त्याभासत्वनिरसनसमर्थानामित्यर्थः । **एकधुरीणा इति** । एकं भारं वहन्तीत्येकधुरीणाः । एकधुक्चेति विकल्पेन कप्रत्ययविधानात् । सूत्रकृता समा इत्यर्थः ।

चषकः— **अनुसंहितार्थाः** अधिगतार्थाः । **अचिकित्सितशङ्कस्येति** । नपुंसके भावे क्तान्तस्य नञा बहुव्रीहिगर्भो बहुव्रीहिः शङ्कान्तस्यावसेयः । दुःसमाधेयशङ्कस्येत्यर्थः । **तदनुवर्तिनां** तत्सिद्धान्तमनुरुन्धानानाम् । **एकधुरीणा इति** । सूत्रकृतैकधुरां मुख्यभारं वहन्तीत्यादिरर्थ इति स्थितम् । 'एकधुराल्लुक्चे'ति वैकल्पिकखप्रत्ययविधानात् साध्विति मन्तव्यम् । **शौद्धोदनिः** जिनः ।

॥ इति कपिलादिमतानां प्रवाहतोऽनादित्वात् उच्छेदाभावेन मन्दस्य तच्छङ्कासम्भवः ॥
॥ इति दर्शनानामभियोगतः प्रवृत्तत्वात् उक्तेऽर्थे पुनर्मन्दस्य शङ्कोद्भवः ॥

* * *

॥ अथ तच्छङ्कानिरसनार्थश्च उपायः ॥
॥ अथ तन्निरसनार्थं तन्मतानां भ्रान्तिमूलत्वस्य विस्तरेण स्फुटदर्शनम् ॥

७ **सु०**— नन्वेवं सति परस्परविरुद्धानामनेकेषां प्रामाण्यं तावन्न सम्भवति, वस्तुविकल्पापत्तेः; तथा चावश्याश्रयणीये कस्यचिदेव प्रामाण्ये अनादिकालतोऽनुवृत्तत्वादेः अन्येष्वन्यथासिद्धौ सर्वथा कल्पनीयानाम् 'इतरेषां चानुपलब्धेः' इत्युक्तदिशा साङ्ख्यादिसमयानाम् अप्रामाण्यं कल्पयितुं शक्यत एव; तत्कथं श्रुतिसमन्वयसिद्धेऽर्थे पुनः शङ्केति । उच्यते । यो हि 'इतरेषां चानुपलब्धेः' इति सङ्क्षेपेणोदितं न्यायं पर(परि)कल्पितेषु प्रमेयविशेषेषूत्प्रेक्षितुं क्षमते, तं प्रत्येवमेतत् । यस्त्वेवं न क्षमः स यावदयं सङ्क्षेपो न प्रपञ्च्यते तावदन्यपरित्यागेनैकग्रहणस्यानीशानः शङ्कतैव । न चैवं शास्त्रे नाधिक्रियेत । सङ्ग्रहप्रपञ्चोच्छेदप्रसङ्गात् । तदिदमुक्तं **मन्द आशङ्कत इति** । किमतो यद्येवमित्यत आह **अत इति** ।

अनु०— अतो विभुः ।
भ्रान्तिमूलत्वमेतेषां पृथग्दर्शयति स्फुटम् ॥

भ्रान्तिपदं विप्रलम्भस्याप्युपलक्षणम् । **पृथक्** विस्तरेण । **स्फुटं** सुबोधम् ।

तत्तत्समयोक्तार्थानामप्रामाणिकत्वं प्रमाणविरुद्धत्वं (च) प्राक् सङ्क्षेपेणास्फुटं चोक्तम्, अत्र विस्तरेण स्फुटं दर्शयन् तेषां भ्रान्त्यादिमूलत्वं ज्ञापयतीत्यर्थः ।

एतेन पूर्वपादेनास्य पादस्य प्रपञ्च्यप्रपञ्चकभावलक्षणा सङ्गतिः, प्रपञ्चने प्रयोजनं चोक्तं भवति । तदिदमुक्तमितरेषामित्यादि भाष्येण ।

परि०— अनेकेषामिति । समयानामित्यर्थः । **कस्यचिदेवेति** । समयस्येत्यर्थः । **न्यायमिति** । तदुक्तफलविसंवादिरूपन्यायमित्यर्थः । **अनीशानः** असमर्थः ।

बौद्धादिमतसाधारण्यायाह **भ्रान्तिपरमिति** । **एतेनेति** । 'अतो विभुः । भ्रान्तिमूलत्वमेतेषां' इत्यादिवाक्येनेत्यर्थः । **पूर्वपादेनेति** । विरोधिभूताशेषस्मृतियुक्तीनां सङ्क्षेपेण पूर्वपादेन निरस्तानामप्यत्र प्रपञ्चनेन निरासादिति भावः । **प्रयोजनं चेति** । अल्पमतीनामपि इतरप्रहाणेन पूर्वाध्यायोक्तार्थस्यैव बुद्धौ सुदृढमवस्थानरूपप्रयोजनं चेत्यर्थः ।

यादु०— उदितं न्यायमिति । अप्रामाणिकत्वरूपं प्रमाणविरुद्धत्वरूपं चेत्यर्थः । बौद्धसमयस्य न भ्रान्तिमूलत्वं दर्शयितुं शक्यम् । तत्कर्तरि बुद्धे भ्रान्तेरभावादत आह **भ्रान्तिपदमिति** । **पूर्वपादेनेति** । पूर्वपादीयेन इतरेषामिति सूत्रेणेत्यर्थः । **प्रपञ्चनप्रयोजनमिति** । मन्दाशङ्कानिवृत्तिरूपमित्यर्थ इति केचित् । वस्तुतस्तु मन्दस्याधिकारिणोऽस्मिन् शास्त्रे निश्शङ्कप्रवृत्तिरूपमित्यर्थः । उक्तं हि तत्त्वप्रकाशिकायाम् । 'न ह्यनादिकालानुवृत्तानां प्रतीतिसुन्दराणां तेषां सामान्यतो निराकरणेऽधिकारिणो निश्शङ्का प्रवृत्तिर्भवती'ति । एवं च 'शङ्कैतैवे'ति सुधायां निष्कम्पप्रवृत्त्यर्थमिति शेषोऽवगन्तव्यः ।

वं०प०— अन्यथासिद्धौ प्रवाहत इत्यर्थः । **समन्वयसिद्धेऽर्थे पुनः शङ्केति** । समन्वयेऽन्यथात्वशङ्केत्यर्थः । **एवं** शङ्कायाम् । **नाधिक्रियेतेति** । प्राप्तमनालोच्येत्युक्तरीत्येति शेषः । **मन्दः** अन्यपरित्यागेनैकग्रहणस्यानीशान इत्यर्थः । ननु बौद्धसमयस्य न भ्रान्तिमूलत्वं दर्शयितुं शक्यम्, तत्कर्तुर्बुद्धस्य नारायणावतारत्वेन भ्रान्तिरहिततया तस्य तन्मूलकत्वासम्भवादित्यत आह **भ्रान्तिपदमिति** ।

शे०वा०— नन्वेवं श्रुत्युक्तेऽर्थे अन्यथात्वशङ्काया न्यायप्राप्तत्वात् कथं भाष्ये 'मन्द आशङ्कते' इति मन्दाशङ्कात्ववर्णनम् इत्यतस्तदुपपादयितुमुक्तशङ्कानुपपत्तिमाशङ्कामुखेन दर्शयति **नन्वेवमित्यादिना** । अन्येषु विरोधिसमयान्तरेषु । **उक्तन्यायमिति** । अप्रामाणिकत्वप्रमाणविरुद्धत्वरूपमित्यर्थः । **न चैवमिति** । प्राप्तिमनालोच्य शङ्कमानस्याचिकित्सितशङ्कत्वादिति भावः । **सङ्गहप्रपञ्चोच्छेदेति** । तस्य मन्दमात्राधिकारिकत्वात् तस्य चोक्तरीत्या अनधिकारादिति भावः । **तदिदमिति** । तथा च मन्दपदं सार्थकमिति भावः । बौद्धसमयस्य

न भ्रान्तिमूलकत्वं दर्शयितुं शक्यम् । तत्कर्तुर्बुद्धस्य भगवदवतारतया भ्रान्त्ययोगादित्यत आह **भ्रान्तिपदमिति** । तावताऽपि कथमनारम्भणीयत्वशङ्कापरिहार इत्यत आह **तत्तदिति** । **प्रागिति** । पूर्वपाद इत्यर्थः । **एतेनेति** । अस्य पादस्य प्रथमपादार्थत्वप्रपञ्चकत्वकथनेनेत्यर्थः । यद्यपि 'इतरेषां चानुपलब्धेरि'ति प्रथमपादस्थाधिकरणार्थप्रपञ्चकत्वमेवास्य पादस्य, तथापि प्रथमपादस्थाधिकरणार्थोऽपि प्रथमपादार्थ एव । अन्यथा तदर्थाप्रतिपादकत्वात् 'इतरेषां चानुपलब्धेः' इत्यस्य पादान्तर्भावाभावप्रसङ्गात् । एतदेव चाभिप्रेत्य असदधिकरणे 'प्रथमपादार्थप्रपञ्चनाद्वितीयस्ये'त्युक्तम् । उत्तरत्र च 'प्राधान्याद्युक्तिविरोध(परिहार)स्य प्राथम्ये तत्प्रपञ्चात्मकत्वेन समयविरोधपरिहारस्य तदानन्तर्ये' इति वक्ष्यतीति द्रष्टव्यम् । **प्रयोजनं चेति** । समयान्तरपरित्यागेनैतच्छास्त्रग्रहणरूपनिःशङ्कप्रवृत्तिलक्षणमित्यर्थः । ननु स्फुटमित्युक्त्यनुरोधेन तत्तत्समयोक्तार्थानां प्रागप्रामाणिकत्वादिकमस्फुटमुक्तम्, अत्र तु स्फुटमित्यर्थलाभेऽपि, पृथगित्यनेन प्राक् सङ्क्षेपेणोक्तम्, अत्र तु विस्तरेणेति कथमर्थलाभः । तस्य तत्रासामर्थ्यादित्यतः " 'इतरेषां चानुपलब्धेः' इति सामान्यतो निराकरणं समयानां कृतम् । विशेषतो निराकरोत्यस्मिन्पादे" इति भाष्ये स्पष्टमस्य प्रकारस्योक्तेः तदनुरोधेन पृथगित्यस्यैतदर्थत्वसिद्धेर्नानुपपत्तिरिति सूचयन्नेवात्रत्यः सर्वोऽप्युपपादनप्रकारो भाष्येऽप्यनुसन्धेय इत्याह **तदिदमुक्तमिति** ।

वा०र०— तदुपपादयितुमिति । मन्दाशङ्कात्वं बुद्ध्या विविच्य तच्छब्देन परामृश्यते । **उक्तशङ्का** उक्तार्थेऽन्यथात्वशङ्का । अचिकित्सिता परिहारशून्या शङ्का यस्य सः अचिकित्सितशङ्कः तस्य भावः तत्त्वं तस्मादित्यर्थः । एतत् प्रागुपपादितं टीकायाम् । **तस्येति** । सङ्ग्रहप्रपञ्चस्येत्यर्थः । **तस्य च** । मन्दस्य च । **अनधिकारादिति** । अनधिकाराङ्गीकारादित्यर्थः । **बौद्धसमयस्य न भ्रान्तीति** । भ्रान्तिमूलत्वमित्यतःपरं तदितरसमयानां दर्शयितुमशक्यमपीति शेषः । बौद्धसमयातिरिक्तसमयानां दर्शयितुं शक्यमपि भ्रान्तिमूलत्वं बौद्धसमयस्य न दर्शयितुं शक्यमिति योजना । ततश्चैतेषामिति साधारणोक्तिर्भाष्येऽनुपपन्नेति शेषः । **इत्यत आहेति** । इत्याशङ्कापरिहाराय बौद्धसमयसाधारण्येन भ्रान्तिमूलत्वमित्येतद्योजयतीत्यर्थः । भ्रान्तिपदं न केवलं भ्रान्तिसङ्ग्राहकम् । किन्तूपलक्षणया विप्रलम्भस्यापि सङ्ग्राहकमिति मूलार्थः अतो न कश्चित्क्षुद्रोपद्रवः । तथा च भ्रान्त्यादिमूलत्वमुपदर्शयतीत्यर्थलाभात् बौद्धसमये विप्रलम्भमूलकत्वं दर्शयति । इतरसमयेषु तु भ्रान्तिमूलकत्वं सर्वत्र क्वचिद्विप्रलम्भमूलकत्वं च दर्शयतीत्यनुव्याख्यानयोजना ज्ञेया । **उत्तरत्र चेति** । वियदधिकरणीय 'अथाशेषे'त्यनुभाष्यमूलेत्यर्थः ।

स०व्र०— अन्येष्विति । विरोधिसमयान्तरेष्वित्यर्थः । **तं प्रतीति** । एतच्छङ्काभाव इत्येतदित्यर्थः । **भ्रान्तिपदमिति** । बौद्धसमयस्य भ्रान्तिमूलत्वं न दर्शयितुं शक्यम् । तत्कर्तुर्बुद्धस्य नारायणावतारत्वेन, तस्य भ्रान्तिरहितत्वेन, तन्मूलत्वासम्भवादिति भावः । **प्रपञ्चने प्रयोजनं चेति** । मन्दाशङ्कानिवृत्तिरूपमित्यर्थः ।

विठ्ठल०— नन्वस्त्वेवं तथापि नायं पाद आरम्भणीयः 'इतरेषां चानुपलब्धेरि'ति सामान्यतः समयानां पूर्वपादे निराकृतत्वेन तत्रोक्तं न्यायं दिङ्मात्रीकृत्य दोषसमयनिराकरणसम्भवेन पुनः शङ्कानुदया-दित्याशयेन शङ्कते **नन्वेवमिति** । **उदितं न्यायमिति** । अप्रमाणिकत्वप्रमाणविरुद्धत्वरूपन्यायमित्यर्थः । **न चैवमिति** । असत्त्वे सतीत्यर्थः । बुद्धरचितानां भ्रान्तिमूलत्वासम्भवादाह **विप्रलम्भस्यापीति** । **पूर्वपादे-नेति** । पूर्वपादीये 'नेतरेषामि'ति सूत्रेणेत्यर्थः । **प्रपञ्चप्रयोजनमिति** । अधिकारिणामुक्ताशङ्कानिवृत्तिद्वारा अस्मिन् शास्त्रे निश्शङ्कप्रवृत्तिरूपं प्रयोजनमित्यर्थः ।

चषकः— भगवदवतारबुद्धकर्तृकबौद्धसमयसङ्ग्रहायाह **भ्रान्तिपदमिति** । **पूर्वपादेनेति** । पूर्वपाद-निरूपितैतत्पादाधिकरणिका सङ्गतिरित्यर्थः ।

* * *

॥ अथ तन्निरसनाशक्यताशङ्कानिरासः ॥

८ **सु०— नन्वेतदशक्यम्, तैः स्वप्रमेयाणां दृढतर्कागमसाधितत्वात् परकीय-तर्कादिर्निरस्तत्वात्; इत्यत आह तर्कैरिति ।**

अनु०— तर्कैर्दृढतमैरेव वाक्यैरा(श्चा)गमवादिनाम् ॥

तर्कशब्दः सोपस्क(ा)रानुमानार्थः । दृढतमैः परकीयतर्कबाधकैः तदबाध्यैः (च), वाक्यैश्च दृढतरै(मै)रिति सम्बध्यते । पूर्वेण सम्बन्धः (अन्वयः) । वेदादिवाक्यानां प्रामाण्यमनभ्युपगच्छन्तं प्रति कथं तदुपन्यास इत्यत उक्तम् आगमवादिनामिति । आगमस्य वेदादेः प्रामाण्यमभ्युपगच्छतां पुंसां समयानामिति सम्बन्धः । यद्वा स्वागम-प्रामाण्यवादिनामित्यर्थः, ततश्च स्वागमप्रामाण्याभ्युपगमन्यायेन वेदादेरपि प्रामाण्यं तैरङ्गी-कार्यमिति(रयित्वेति) (र्येति) भावः । अथवा आगमस्य वेदादेः प्रामाण्यवादिनां, शिष्याणां व्यपेक्षयेति शेषः, तथा च बौद्धाधिकरणान्तेन न विरोधः ।

यद्यप्येतदनुपदमेव प्रदर्शयिष्यते, तथाऽपि श्रोतृमनःसमाधानार्थमुक्तमिति ।

परि०— परकीयेति । स्वस्वमतविरोधिवाद्यन्तरोक्ततर्काणामित्यर्थः । तथा च सिद्धा-न्तीयतर्काणामपि निरासप्राप्तिरिति भावः । **सोपस्करेति** । व्याप्तिसमुचितदेशवृत्तित्वानुकूलतर्कादि-

परिकरोपेतेत्यर्थः । ननु 'आगमवादिनामि'त्यस्य वेदादिप्रामाण्यवादिनां पुंसां सम्बन्धिसमयानां सुदृढतर्कागमैः भ्रान्त्यादिमूलकत्वं दर्शयतीति व्याख्याने 'विप्रतिषेधाच्चासमञ्जसमि'ति साङ्ख्यनयान्तिमसूत्रेण 'अपरिग्रहाच्चात्यन्तमनपेक्षे'ति वैशेषिकनयान्तिमसूत्रेण 'विप्रतिषेधाच्चे'ति शक्तिनयान्तिमसूत्रेण चाविरोधेऽपि 'सर्वथाऽनुपपत्तेश्चे'ति बौद्धनयान्तिमसूत्रेण विरोधः । तस्यापि सूत्रस्य 'सर्वश्रुतिस्मृतिविरुद्धत्वाच्च नैते पक्षाः ग्राह्याः' इति बौद्धान्प्रति तत्सूत्रे तन्मतविरोधिश्रुत्याद्युक्तेरित्यतो वेदादिवाक्यानामित्यादिना कृतचोद्यस्य 'सर्वथे'ति सूत्र एवोदयात् तन्निवृत्त्यर्थं व्याख्यानान्तरमाह **यद्वा स्वागमेति** । सर्वसाधारण्येन समाध्यन्तरमाह **अथवेति** । चरमव्याख्यानद्वयस्य फलमाह **तथा चेति** । **एतदिति** । तर्कैरित्यादिनोक्तमित्यर्थः । **अनुपदमिति** । 'चेतनेच्छानुसारेण' इत्यादिना अग्रेतनग्रन्थ एवेत्यर्थः ।

गु०दी०— स्वागमवाक्यानां प्रामाण्यवादिनां समयानां वाक्यैर्भ्रान्तिरूपत्वं दर्शयतीति न युक्तम् । बौद्धाधिकरणान्ते सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वान्नैते पक्षा ग्राह्या इति श्रुत्यादिविरोधेन शास्त्रस्याप्रामाण्यसाधनात् तद्विरोधः स्यादित्याशङ्क्य परिहरति **तथा च बौद्धाधिकरणान्तेन न विरोध इति** ।

यादु०— नन्वाद्यव्याख्यानेऽस्वरसादर्शनात् किमर्थं यद्वेत्यादिव्याख्यानद्वयमित्यत आह **तथा च बौद्धेति** । बौद्धाधिकरणान्ते सर्वथाऽनुपपत्तेश्चेति सूत्रे बौद्धान्प्रत्यपि श्रुत्यादिविरोधस्योक्तत्वेन आद्यव्याख्याने तद्विरोधो नात्रेत्यर्थः । आद्यव्याख्यानं त्वनुभवयुक्तिविरोधमात्रेणैतत्सूत्रतात्पर्यम् इत्यभिप्रेत्येति द्रष्टव्यम् । **यद्यप्येतदिति** । शिष्याणां व्यपेक्षयेत्येतदित्यर्थः । **अनुपदमेवेति** । 'तथाऽपि शुद्धबुद्धीनामि'ति श्लोक इत्यर्थः ।

वं०प०— सोपस्कारेति । अनुकूलतर्कलक्षणो य उपस्कारः तदुपेतानुमानोपलक्षणार्थ इत्यर्थः । सोपस्कारेति लक्षणाबीजसम्बन्धप्रदर्शनायोक्तम् ।

कं०रा०— अङ्गीकार्येति । एतच्च ल्यबन्तम् । आगमवादिनां वेदादिप्रामाण्यमभ्युपगच्छतां पुंसां समयानां दृढवत्तमैः वेदादिवाक्यैः भ्रान्तिमूलत्वं दर्शयतीति योजनायां सर्वथानुपपत्तेश्चेति बौद्धाधिकरणान्ते प्रमाणाभावात्सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च नैते पक्षा ग्राह्या इति वेदादिप्रामाण्यमनभ्युपगच्छतां समयानामपि वेदादिविरुद्धत्वेनाप्रामाण्यस्य वक्ष्यमाणत्वात् तेन विरोधोऽस्ति । यद्वा स्वागमप्रामाण्यवादिनामित्यर्थ इत्यादिनोक्तपक्षद्वये तु नायं विरोध इत्याह **तथा चेति** ।

श्रीनिधि०— एतदनुपदमेवेति । एतत्स्वतर्कादीनां परकीयतर्कादीनां परकीयतर्कादिबाधकत्वं तदबाध्यत्वं चेत्यर्थः ।

शे०वा०— ननु 'तर्कैर्दृढतमैरि'त्यादिना दृढतमतर्कागमाभ्यामस्य पादस्य समयभ्रान्त्यादिमूलकत्व-दर्शकत्वमुच्यते, तदनर्थकमित्याशङ्क्य प्रागुक्तस्य भ्रान्त्यादिमूलकत्वदर्शकत्वस्याशक्यत्वशङ्कानिरासार्थं तदिति भावेन तच्छङ्कानिवर्तकतया तद्योजयितुं तदशक्यत्वशङ्कामुत्थापयति **नन्वेतदिति** । **सम्बध्यत इति** । 'मध्ये-दीपिका'न्यायेनेति भावः । **पूर्वेणेति** । भ्रान्त्यादिमूलत्वं दर्शयतीति पूर्वेणेत्यर्थः । समयानामागमप्रामाण्य-वादिपुरुषसम्बन्धित्ववर्णनानर्थक्यमाशङ्क्य प्रमाणतया आगमोपन्यासस्य युक्तत्वोपपादनार्थत्वात् न तत्परोत्तर-विशेषणवैयर्थ्यमित्यभिप्रेत्य सयुक्तिकागमोपन्यासानुपपत्तिशङ्कामुत्थापयति **वेदादीति** । ननु आगमस्य वेदादेः प्रामाण्यमभ्युपगच्छतां पुंसां समयानामिति व्याख्यानमनुपपन्नम् । तथात्वे बौद्धाधिकरणीय 'सर्वथाऽनुपपत्तेश्च' इत्येतत्सूत्रव्याख्यानरूप 'सर्वश्रुतिविरोधतः' इत्युत्तरग्रन्थविरोधापातात् । तत्र वेदाप्रामाण्यवादिनं बौद्धं प्रत्यपि श्रुत्यादिविरोधस्योक्तेः, इत्यतोऽत्रोक्तद्वितीयतृतीयपक्षयोस्तत्राप्यभिमतत्वान्न तेन विरोध इत्याह **तथा चेति** । **एतदिति** । शिष्याणां व्यपेक्षयेत्येतदित्यर्थः । **अनुपदमेवेति** । 'तथाऽपि शुद्धबुद्धीनामीशानुग्रहयोगिनामि'-त्यादावित्यर्थः ।

वा०र०— **अस्य पादस्य समयेति** । दृढतमतर्कागमाभ्यां तत्समयानां भ्रान्त्यादिमूलकत्वस्य दर्शकं तस्य भावस्तत्त्वं तथादर्शकत्वमस्य पादस्योच्यत इति योजना । **मध्येदीपिकेति** । **दृढतमैरितीति** मूले दृढतमैरेवेतीति प्रतिपादनस्य सिद्धत्वादेव शब्दसहितस्य तस्योभयत्र सम्बन्ध इत्यर्थकतयैवं शब्दव्यवधाना-नवकाशः । विशेषणविशेष्यसम्बन्धे निपातानामव्यवधायकत्वमिति वा । वाक्यैरित्यत्र समुच्चायकशब्दप्रयोगा-भावेन सामानाधिकरण्यभ्रान्तिः स्यादित्यतश्चशब्दाध्याहारेण वाशब्दार्थ एवशब्द इत्याश्रित्य वा योजना कृता । **वाक्यैश्चेति** मूलम् । मूले यद्वा स्वागमप्रामाण्येति योजनायामङ्गीकार्येति पाठः । स तु सेच्छं चेत् किमचेतन-मित्युत्तरानुव्याख्यानमूलेऽङ्गीकार्येति पाठोऽस्ति । तद्वदेव तत्रत्यटीकानुसारेण साधुतयोपपाद्यः । अङ्गीकारयित्वेति पाठश्चेत् क्वचिदस्ति सोऽप्युक्तस्थलीयटीकानुसारेणोपपाद्यः ।

स०व्र०— **तर्कशब्द इति** । अनुमानार्थ इत्येवोक्ते आभासानुमानस्यापि प्रसक्तिः स्यात् । अतः **सोपस्कार** इत्युक्तम् । व्याप्त्याद्युपस्कारसहितेत्यर्थः । अत एव **दृढतमैः** इत्युपपन्नम् । **पूर्वेणेति** । भ्रान्ति-मूलत्वमित्यनेनेत्यर्थः ।

ननु आगमस्य वेदादेः प्रामाण्यमभ्युपगच्छतां पुंसां समयानामिति प्रथमं व्याख्यानमनुपपन्नम् । तथात्वे बौद्धाधिकरणान्तस्थ'सर्वथाऽनुपपत्तेश्चे'त्येतद्व्याख्यानरूप-**सर्वश्रुतिविरोधता**-इत्यनेन विरोधापत्तेः । तत्र वेदाप्रामाण्यवादिनं प्रत्यपि श्रुत्यादिविरोधस्योच्यमानत्वात् । तत्राह **तथा चेति** । **आगमवादिनाम्** इत्यस्य स्वस्वागमप्रामाण्यवादिनां शिष्याणां व्यपेक्षयेति वेति व्याख्यानस्याभिप्रेतत्वान्न तेन विरोधः । अस्यार्थद्वयस्य बौद्धाधिकरणान्तेऽप्यभिप्रेतत्वादिति भावः ।

विट्ठल०— सोपस्करेति । मूलप्रमाणानुकूलतर्काद्युपेतेत्यर्थः । **बौद्धाधिकरणान्तेनेति** । 'सर्वथानुपपत्तेश्चे'ति बौद्धाधिकरणान्तिमसूत्रे श्रुत्यादिविरोधस्योक्तत्वेन बुद्धेः श्रुत्यादिप्रामाण्यस्यानङ्गीकृतत्वात् तान् प्रतिश्रुत्याद्युक्तिरनुपपन्नेति शङ्का निरस्ता भवति । प्रसाध्याङ्गतया वा शिष्यापेक्षया वा श्रुत्याद्युक्तेरिति भावः । आद्यव्याख्यानं तु पाशुपताद्यपेक्षया । 'सर्वथानुपपत्तेरि'त्यत्र त्वनुभवयुक्तिमात्रविरुद्धत्वाभिप्रायेणेति ज्ञेयम् । **यद्यप्येतदिति** । शिष्यव्यपेक्षयेत्येतदित्यर्थः । **अनुपदमिति** । 'तथापि शुद्धबुद्धीनामित्यत्रे'त्यर्थः ।

चषकः— सोपस्कारेति । साध्याहारेत्यर्थः । 'उपात्प्रतियत्नवैकृतवाक्याध्याहारेष्वि'ति सुटस्तत्र विधानात् । **तथा च बौद्धेति** । श्रुत्यादिविरोधस्यापि तत्राभिहिततया तद्विरोधः पूर्वव्याख्यायामेव नैतद्व्याख्यायामिति भावः ।

॥ इति तन्निरसनाशक्यताशङ्कानिरासः ॥

॥ इति तन्निरसनार्थं तन्मतानां भ्रान्तिमूलत्वस्य विस्तरेण स्फुटदर्शनम् ॥

* * *

॥ अथ तत्र भ्रान्तिमूलत्वे समानेऽपि समयानां उन्मत्तवाक्याद्वैलक्षण्ये कारणम् ॥

९ **सु०—** ननु चानाद्यनन्तकालेऽनुच्छेदेन प्रवर्तमानानां समयानां न भ्रान्त्यादिमूलत्वमुचितम्, न हि तथाविधस्योन्मत्तवाक्यादेरनाद्यनन्तकालेऽनुवृत्तिरस्ति । तदयं प्रयोगः । साङ्ख्यादिसमयाः; प्रमाणभूता, न भ्रान्त्यादि(न्ति)मूला वा; सर्वदाऽनुवर्तमानत्वात्, महाजनपरिगृहीतत्वात् (वा); वेदवदिति । तथा च वक्ष्यमाणस्य तर्कादिर्बाधितविषयत्वमिति । मैवम् । किमत्र सर्वेषामपि समयानां प्रामाण्यादिकं साध्यम्, उत एकस्य । नाद्यः, परस्परविरुद्धानां प्रामाण्यादिसाधने वस्तुविकल्पापत्त्या बाधितविषयत्वात्, परस्परप्रतिक्षेपरूपत्वेन सत्प्रतिपक्षत्वाच्च । न द्वितीयः, पक्षीकृतादन्यस्य प्रामाण्याद्यभ्युपगमे प्रागुक्तदोषानुषङ्गात्, अनभ्युपगमे तत्रैव व्यभिचारात्; वेदप्रामाण्याद्यभ्युपगमे प्रतिज्ञातार्थानुपपत्तिः, अनभ्युपगमे च दृष्टान्तदोषः ।

भवेदेवम्, भ्रान्त्यादिमूलत्वे समाने सत्युन्मत्तवाक्येऽविद्यमाना अनाद्यनन्तकालानुवृत्तिरेतेषामेव तर्हि किन्निमित्तेति सुहृद्भावेन पृच्छन्तं प्रत्याह **दौर्लभ्यादिति** ।

अनु०— दौर्लभ्याच्छुद्धबुद्धीनां बाहुल्यादल्पवेदिनाम् ।

तामसत्वाच्च लोकस्य मिथ्याज्ञानप्रसक्तितः ॥
विद्वेषात्परमे तत्त्वे तत्त्ववेदिषु चानिशम् ।
अनादिवासनायोगादसुराणां बहुत्वतः ।
दुराग्रहगृहीतत्वाद्वर्तन्ते समयाः सदा ॥

समयप्रवर्तकानां पुंसां दुराग्रहगृहीतत्वाद्वर्तन्ते समयाः सदा । नैवमुन्मत्तवाक्ये विद्यते ।

नन्वाग्रहेऽपि किं कारणमित्यत उक्तं **विद्वेषादिति** ।

तर्हि द्वेषोत्पत्त्यनन्तरं प्रवर्तताम्, कथं सदा इति; अत उक्तम् **अनिशमिति** ॥

ननु पुरुषार्थकामाः कथं (वि)द्वेषनिमित्तादाग्रहादन्यायं प्रवर्तयन्तीत्यत उक्तम् **अनादीति** ।

वासनावशात् तेभ्यः तदेव रोचयत इति भावः ॥ नन्वनादिवासनाऽपि बलवत्प्रयत्नेन कुतो न निवर्तत इत्यत उक्तम् **असुराणामिति** । विपरीतप्रयत्नादिप्रेरकाणां बुद्ध्याद्यभिमानिनामिति शेषः ।

ननु साधूनां विदुषां निवारणात् कुतो न निवर्तन्त इत्यत उक्तं **दौर्लभ्यादिति** । **अल्पवेदिनां** भ्रमाधिष्ठानस्वरूपमात्रविदां समयप्रवर्तकानाम् । तर्हि राजादिर्लोको निवारयिष्यति इत्यत उक्तं **तामसत्वादिति** । तत एव कुपण्डितनिमित्तमिथ्याज्ञानप्रसक्तितश्च । न चैतानि कारणानि स्वरूपतोऽप्यनादौ वेदे सम्भवन्तीति ।

यद्यप्येतत्पादान्ते वक्तव्यम्; तथाऽप्यत्र प्रसङ्गा(दा)गतं बुद्धिसमाधानायोक्तमिति ।

परि०— वक्ष्यमाणप्रयोगे अनुकूलव्याप्तिं व्यनक्ति **ननु चानाद्यनन्तेति** । अन्यथा हेतूच्छित्तिरिति भावेन साध्यहेतुव्यतिरेकयोः व्याप्तिं व्यनक्ति **तथाविधस्येति** । भ्रान्त्यादिमूलस्येत्यर्थः । **तदयमिति** । तस्माद्वचास्यादेर्भावादित्यर्थः । **वक्ष्यमाणेति** । 'रचनानुपपत्तेः',

'प्रवृत्तेश्चे'त्यादौ वक्ष्यमाणेत्यर्थः । 'प्रामाण्यादिकमि'त्यादिपदेनाभ्रान्तिमूलत्वग्रहः । **बाधितेति** । प्रमाणभूतसमयेन समयान्तरस्य विषयस्यापहारेण तत्प्रामाण्यं तेन बाधितमिति भावः । **प्रतिक्षेपरूपत्वेनेति** । हेतुनेति योज्यम् । सर्वसमयाः न प्रमाणं भान्तिमूला वा, परस्परनिषेधरूपत्वात्, अन्योन्यनिषेधकघटोऽस्ति घटो नास्तीत्यादिरूपवाक्यवदिति सत्प्रतिपक्षत्वाच्चेत्यर्थः । **प्रागुक्तेति** । बाधितविषयत्वदोषेत्यर्थः । **व्यभिचारादिति** । 'सर्वदानुवर्तमानत्वादि'ति हेतोरिति योज्यम् । दोषान्तरं चाह **वेदेति** । **प्रतिज्ञा(ता)र्थानुपपत्तिरिति** । परेण पक्षीकृतसमयस्य तद्विरुद्धार्थकप्रमाणभूतवेदेन बाधादिति भावः । **दृष्टान्तदोष इति** । साध्यहीनतेत्यर्थः । चरमवाक्यं तावद्योजयति **समयप्रवर्तकानामिति** । आकाङ्क्षाक्रमेण पदानि योजयति **नन्वाग्रहेऽपीति** ।

साधूनामिति । साधुभिः विद्वद्भिः निवार्यमाणत्वादित्यर्थः । **स्वरूपमात्रेति** । मात्रपदेन तन्निष्ठासाधारणधर्मवेदित्वं निवार्यते । वेदादिवदित्युक्तवेदसाम्यं निराह **न चैतानीति** । ननु समयानां भ्रान्त्यादिमूलत्वव्युत्पादनानन्तरमेव 'कथं तर्ह्युन्मत्तवाक्येऽविद्यमानं सर्वदा वर्तमानत्वादिकं समयानामि'ति शङ्कोदयात् तन्निवर्तनपरं दौर्लभ्यादिकं पादान्त एव वाच्यमित्याशङ्क्य निराह **यद्यप्येतदित्यादिना** । **प्रसङ्गेति** । 'भ्रान्तिमूलत्वमेतेषामि'त्युक्तिप्रसङ्गेत्यर्थः ।

यादु०— परस्परप्रतिक्षेपरूपत्वेनेति । परस्परप्रतिक्षेपरूपत्वेन हेतुनोक्तानुमानस्य सत्प्रतिपक्षितत्वाच्चेत्यर्थः । दूषणान्तरमाह **वेदप्रामाण्यादीति** । **प्रतिज्ञातार्थानुपपत्तिरिति** । वस्तुविकल्पापत्त्या बाधितविषयत्वादित्यर्थः । साधूनां विदुषामिति कर्तरि षष्ठी । **यद्यप्येतदिति** । समयानामुन्मत्तवाक्याद्वैषम्ये कारणमित्यर्थः । सर्वेषां समयानां भ्रान्तिमूलत्वप्रदर्शनानन्तरमेव ह्येवं भ्रान्त्यादिमूलत्वे समानेऽपि उन्मत्तवाक्येऽविद्यमानानन्तकालानुवृत्तिरितरेषां किन्निमित्तेति शङ्कावकाशो नेदानीमेवेति भावः ।

वं०प०— तथाविधस्य भ्रान्ति(आदि)मूलकस्य । **प्रागुक्तेति** । वस्तुविकल्पापत्त्या बाधितविषयत्वादित्युक्तबाधरूपेत्यर्थः । **दृष्टान्तेति** । वेदप्रामाण्यानभ्युपगमे वेदरूपे दृष्टान्ते प्रामाण्यरूपसाध्यवैकल्यरूपेत्यर्थः । **भवेदेवमिति** । उक्तरीत्या अनुमानं दुष्टं भवत्वित्यर्थः । **तेभ्य इति** । 'रुच्यर्थानां प्रीयमाण' इति रुच्यर्थधातुयोगे चतुर्थीविधानादिति भावः । **विदुषां निवारणात** तत्कर्तृकनिवारणात् । मात्रशब्देन प्रकारव्यावृत्तिः ।

कं०रा०— वेदप्रामाण्याद्यभ्युपगम इति । वेदस्य प्रमाणत्वभ्रान्त्यादिमूलकत्वाभावयोरभ्युपगमे वेदविरुद्धार्थस्य पक्षीकृतसमयस्य प्रामाण्याद्यसम्भवात् प्रतिज्ञार्थानुपपत्तिः । वेदप्रामाण्याद्यनभ्युपगमे अनुवेदरूपदृष्टान्तस्य साध्यवैकल्यमित्यर्थः । **तेऽन्त्यस्तदेव रोचत** इति ऋच्यर्थानां प्रीयमाण इति सम्प्रदानसंज्ञायां

चतुर्थी । **साधूनां विदुषामिति** कर्तरि षष्ठी । तथा च साधुविद्वत्कर्तृकनिवारणात् समयाः कुतो न निवर्तन्त इत्यर्थः । **न चैतानीति** । **एतानि** भ्रान्त्यादीनि **कारणानि** स्वरूपत एव **अनादौ वेदे** न हि सम्भवन्ति अपौरुषेये पुरुषदोषाणां शङ्कितुमर्हत्वादिति भावः । **हठः** स्वभावाख्ययोग्यता ।

श्रीनिधि०— प्रामाण्यादिकमिति । आदिपदेन भ्रान्त्यादिमूलत्वाभावस्य ग्रहणम् । एवमुत्तरत्रापि । **प्रागुक्तदोषानुषङ्गादिति** । वस्तुविकल्पापत्त्या बाधितविषयलक्षणदोषानुषङ्गादित्यर्थः । **तत्रैव व्यभिचारादिति** । सर्वदानुवर्तनत्वहेतोरिति भावः । **प्रतिज्ञातार्थानुपपत्तिरिति** । प्रतिज्ञातार्थस्य वेदविरोधादेवेति भावः । सुहृद्भावेन पृच्छन्तं प्रत्याह **दौर्लभ्यादिति** । इदं वाक्यप्रतीकग्रहणम् । आकाङ्क्षानुसारेण उत्तरत्रावतारयिष्यतीत्यनुसन्धेयम् । **तेभ्यः तदेव रोचयत इति** । रुच्यर्थानां प्रीयमाण इति चतुर्थी द्रष्टव्या । **विदुषां निवारणादिति** । तत्कर्तृकादित्यर्थः । **भ्रमाधिष्ठानेति** । याथार्थ्येनेति शेषः । अत एवाल्पवेदित्वं अन्यथा प्रकारज्ञानस्याभूयसोऽपि विद्यमानत्वात् बाधः स्यात् । अल्पवेदित्वं च न स्यादिति द्रष्टव्यम् । **तत एव कुपण्डितेति** । राजामात्यादिलोकस्य तामसत्वादेव तदाश्रितकुपण्डितनिमित्तमिथ्याज्ञानप्रसक्तितोऽपि अनादिवासना उपोद्बलितैव भवति न निवर्तत इत्यर्थः । **यद्यप्येतदिति** । एतद्दौर्लभ्यात् । **शुद्धबुद्धीनाम्** इत्यादिनोक्तं सर्वम् ।

शे०वा०— 'दौर्लभ्यादि'त्यादिकं भाष्यकारीयं समयानां भ्रान्त्यादिमूलत्वेऽप्यनादिकालानुवृत्तत्ववचनम्, अनादिकालानुवृत्तत्वेन समयानां भ्रान्त्यादिमूलत्वाभावसिद्धेर्न समयानां तन्मूलत्वमुपदर्शयितुं शक्यमिति 'अनादिकालतो वृत्ताः' इत्यादिना प्रागुपदर्शिताक्षेपसमाधानार्थम्, इति भ्रान्तिनिरासाय परिहारं स्वयं प्रकारान्तरेण वक्तुं तन्मूलत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । **वक्ष्यमाणस्येति** । 'तर्कैर्दृढतमैरि'त्यादिना वक्ष्यमाणस्येत्यर्थः । एवमाक्षेपमुपदर्श्य स्वयं तं परिहरति **मैवमिति** । प्रामाण्यादिकमित्यादिपदेन भ्रान्त्यादिमूलकत्वाभावपरिग्रहः । **प्रागुक्तेति** । वस्तुविकल्पानुपपत्त्या बाधितविषयत्वलक्षणेत्यर्थः । **अनभ्युपगम इति** । प्रामाण्यावनभ्युपगम इत्यर्थः । **तत्रैवेति** । पक्षीकृतादन्यस्मिन्समय एवेत्यर्थः । **व्यभिचारादिति** । सत्यप्यनादिकालानुवृत्तत्वादौ प्रामाण्यादेरभावादिति भावः । दोषान्तरमप्याह **वेदेति** । **प्रतिज्ञातार्थानुपपत्तिरिति** । वस्तुविकल्पानुपपत्त्या बाधितविषयत्वादिति भावः । **दृष्टान्तदोष इति** । दृष्टान्तीकृते वेदे प्रामाण्यादिरूपसाध्याभावात् साध्यवैकल्यमिति भावः । तर्ह्याक्षेपस्योपर्येव परिहारात् किं 'दौर्लभ्यादि'ति भाष्येणेत्यतस्तद्योजयति **भवेदेवमिति** । उक्तरीत्याऽनुमानं दुष्टं भवेदित्यर्थः । तत्तत्समयिभिरपि स्वस्वसमयातिरिक्तसमयानां भ्रान्त्यादिमूलत्वस्यानादिकालानुवृत्तत्वादेश्च स्वीकृतत्वेन स्वं स्वं प्रत्यपि तत्कारणनियोगप्रसक्त्या प्रतिवादिभावेनोक्तप्रश्नायोगादाह **सुहृद्भावेनेति** । ननून्मत्तवाक्येऽविद्यमानानादिकालानुवृत्तता समयानामेव किन्निमित्तेनेति निमित्तप्रश्नस्य 'दौर्लभ्यादि'ति कथमुत्तरमित्यतः; प्रतीकोपादानमात्रमेवैतत्, उत्तरं त्वन्यदेवेति नानुपपत्तिरित्यभिप्रेत्य व्यवहितत्वाद्योग्योत्तरप्रदर्शनपूर्वकमाकाङ्क्षाक्रमेणोत्तरविशेषणजातं योजयति **समयेति** । **कथं सदेतीति** । कादाचित्कदोषाधीनस्याग्रहस्य सर्वदाऽसत्त्वादिति भावः ।

साधूनां विदुषामिति । कर्तरि षष्ठ्यौ । साधुविद्वत्कर्तृकनिवारणादित्यर्थः । स्वरूपमात्रविदामित्यत्र बुद्धव्यतिरिक्तानामिति शेषः । मात्रशब्देन प्रकारव्यावृत्तिः । तामसत्वाच्चेति चशब्दो भिन्नक्रम इत्यभिप्रेत्याह **तत एवेति** । तर्हि समयानामिव वेदस्याप्रामाण्येऽपि अनादिकालानुवृत्तत्वादेरुपपत्तेः कथं तेन तस्याप्रामाण्यविरहसिद्धिरित्यत आह **न चेति** । **एतदिति** । समयानामुन्मत्तवाक्याद्वैषम्ये कारणमित्यर्थः । साङ्ख्यादिसमयानां भ्रान्त्यादिमूलत्वप्रदर्शनानन्तरमेव, एवं भ्रान्त्यादिमूलत्वे समाने उन्मत्तवाक्येऽविद्यमानानादिकालानुवृत्तता तेषां किन्निमित्तेति शङ्कावकाशेन, ततः प्राक् तदनवसरादिति भावः ।

वा०र०— भ्रान्त्यादिमूलत्वेऽप्यनादिकालानुवृत्तत्वादिति । भ्रान्त्यादिमूलत्वेऽपि यदनादिकालानुवृत्तत्वेऽपीति योजना । आदिपदेनोच्छेदाभावपरिग्रहः । **तत्परिहारं** तदाक्षेपपरिहारम् । **तन्मूलत्वानुपपत्तीति** । तन्मूलत्वमाक्षिपतीत्यर्थः । एवमाक्षेपमित्युत्तरत्रोक्तेः । तदुभयसम्भववर्णनमित्यर्थः । **शक्यमितीति** । इति यः प्रागुपदर्शितस्य श्रुतितुल्ययोगक्षेमत्वस्याक्षेप इति योज्यम् । दौर्लभ्यादित्यादिकं वर्णनमाक्षेपसमानार्थमिति भ्रान्तीति सम्बन्धः । **तत्कारणनियोगेति** । तत्तत्समयिभिर्यदङ्गीकृतं स्वस्वव्यतिरिक्तसमयानां भ्रान्त्यादिमूलत्वे सत्यप्यनादिकालानुवृत्तित्वं तत्कारणनियोगः । उन्मत्तवाक्येऽविद्यमानानाद्यन्तकालानुवृत्तिरेतेषामेव किन्निमित्तेत्यनादिकालानुवृत्तत्वकारणं किमिति प्रश्न इति यावत् तत्प्रसक्त्येत्यर्थः । यदि त्वयानादिकालानुवृत्तत्वेन समयानां भ्रान्त्यादिमूलत्वाभावः साध्यते तर्हि तत्तत्समयिभिः स्वस्वव्यतिरिक्तसमयानां यदङ्गीकृतं भ्रान्त्यादिमूलत्वं तदभावोऽप्यनादिकालानुवृत्तत्वेन साधयितुं शक्यः स्यात् । यदि चोन्मत्तवाक्येऽविद्यमानानादिकालानुवृत्तिरेतत्समयानां कुत इति मां प्रति त्वया पर्यनुयोगः क्रियते तर्हि तवाप्युक्तपर्यनुयोगः समानः । त्वमपि स्वानभिमतसमयानां तथात्वाङ्गीकारेण तथात्वं कुत इति पर्यनुयोगप्रवृत्तेः । न तु उक्तप्रश्नायोगः प्रतिवादिन इति इत्याशयः । **सुहृद्भावेन** शिष्यभावेनेति स्पष्टम् । तं प्रति उक्तं पर्यनुयोगानवकाशादिति भावः । **प्रतीकेति** । दौर्लभ्यादित्यारभ्य वर्तते समयाः सदेत्यन्तपद्यवाक्यस्योपादानाय वाक्यादिभागरूपैकदेशस्य निर्देशमात्रं कृतम् । ननूक्तशङ्कापरिहारोऽप्याभागेनेत्याशयेन । तत्परिहारस्तु चरमवाक्येनैव । तदुपयुक्तार्थप्रतिपादनाय च पूर्ववाक्यजातमित्यतो न तस्य वैयर्थ्यमपि शङ्कनीयमित्याशयः । तदेतदुक्तम् **आकाङ्क्षेति** ।

कर्तरि षष्ठ्या लब्धमर्थं दर्शयति **साधुविद्वदिति** । स्वरूपमात्रविदामिति न सर्वसमयप्रवर्तकसाधारणम् । बुद्धे तदसम्भवादित्यत आह **बुद्धौ व्यतिरिक्तानामिति शेष इति** । समयप्रवर्तके बुद्धौ तु विप्रलम्भेच्छावशात् तन्निवारकता न सम्भवतीति भावः । मूले **एतानीति** । समयिनां दुराग्रहगृहीतत्वादितुल्यानि वेदप्रवर्तकानां दुराग्रहगृहीतत्वादीनीत्यर्थः । **स्वरूपत इति** । समयेष्विव वेदे प्रथमप्रवर्तयितुरेवाभावेन तद्दोषनिबन्धनाप्रामाण्यादि न प्रसज्यते । उपाध्यायादिवदेव सम्प्रदायप्रवर्तकत्वमेवेश्वरादीनामिति भावः ।

स०व्र०— वक्ष्यमाणेति । 'तर्कैर्दृढतमैः' इत्यनेन वक्ष्यमाणस्य तर्कादिरित्यर्थः । **परस्परेति** । समयाः, न सर्वे प्रमाणम्, परस्परप्रतिपक्षरूपत्वात्; इति सत्प्रतिपक्ष इत्यर्थः । **प्रागुक्तेति** । वस्तुनि

विकल्पापत्त्या बाधितविषयत्वलक्षणदोषानुषङ्गादित्यर्थः । **प्रतिज्ञार्थानुपपत्तिरिति** । वेदविरुद्धत्वेन बाधितविषयत्वादित्यर्थः । **दृष्टान्तदोष इति** । वेदप्रामाण्यानभ्युपगमे वेदरूपदृष्टान्ते प्रामाण्यरूपसाध्यवैकल्यमित्यर्थः । **भवेदेवमिति** । उक्तरीत्या अनुमानं दुष्टं भवत्वित्यर्थः ।

साधूनामिति । तत्कर्तृकनिवारणादित्यर्थः । **भ्रमाधिष्ठानस्वरूपमात्रविदामिति** । अत्र बुद्धव्यतिरिक्ताः समयप्रवर्तका द्रष्टव्याः । मात्रशब्देन प्रकारव्यावृत्तिः । ननु समस्तेन पादेन, दृढतमतर्कैः, आगमैश्च भ्रान्तिमूलत्वे प्रदर्शिते अनन्तरं 'कथं भ्रान्तिमूलत्वे मूलवाक्ये अत्र च समानेऽपि तत्राविद्यमानानादिकालतोऽनुवृत्तिरत्र' इति शङ्काया उदयात् पादान्त एव तदुपपादनावसरो नात्र; इत्यभिप्रेत्य शङ्कते **यद्यपीति** । ननु एतादृशानां समयानां कथं निराकरणं सङ्गच्छत इति शङ्कानिरासार्थं भ्रान्तिमूलत्वात् तन्निराकरणं सङ्गच्छत इत्यवश्यं वक्तव्यत्वेन; तत्र च कथं तर्हि अनादिकालतोऽनुवृत्तिरिति स्मृतस्य तस्य परिहारः सङ्गच्छत इत्यभिप्रेत्याह **तथाऽपीति** ।

स०ना०— तर्कैर्दृढतमैरेव वाक्यैश्चागमवादिनामिति मूलसुधायां **परस्परविरुद्धानामिति** । यदि विरुद्धानां समयानां प्रामाण्यं स्यात् तर्हि वस्तुविकल्पः स्यात् । न चासौ । तस्मान्न सर्वेषां प्रामाण्यमिति तर्केण सर्वप्रामाण्याभावस्य सिद्धत्वेन तथा शास्त्राणां सत्प्रतिपक्षत्वात् सत्प्रतिपक्षयोश्चान्यतराप्रामाण्यनियमेन सर्वशास्त्रेषु प्रामाण्याभावरूपसाध्याभावस्य सिद्धत्वेन सर्वशास्त्राणां प्रामाण्यसाधकानुमानस्य बाधितविषयत्वादित्यर्थः ।

विठ्ठल०— वक्ष्यमाणतर्कादिरिति । प्रत्यधिकरणपरसिद्धान्तबाधकतया वक्ष्यमाणयुक्त्यादेरित्यर्थः । **वस्तुविकल्पेति** । प्रधानादीनां जगत्कारणत्वं चेत्यादि वस्तुविकल्पप्रसङ्गात्तस्य च प्रबलप्रमाणविरुद्धत्वेन बाधितविषयत्वस्यापरस्परप्रतिक्षेपरूपत्वहेतुनोक्तानुमानस्य सत्प्रतिपक्षत्वाच्चेत्यर्थः । एकस्यैव प्रामाण्यं साध्यत इति द्वितीयपक्षे किमन्यस्यापि समयस्य प्रामाण्यादिकमभ्युपगम्य न वेति विकल्पं मनसि निधायाद्ये दूषणमाह **पक्षीकृतादिति** । **प्रागुक्तेति** । वस्तुविकल्पानुपपत्त्येत्यादिनोक्तदोषद्वयानुषङ्गादित्यर्थः । द्वितीये आह **अनभ्युपगम इति** । तत्र सर्वदानुवर्तमानत्वादि हेतुमत्सु समयान्तरेषु साध्याभावाद्व्यभिचार इत्यर्थः । दूषणान्तरमाह **वेदप्रामाण्यादीति** । प्रतिज्ञा अनुपपत्तिरिति उभयोः प्रामाण्ये वस्तुविकल्पानुपपत्त्या बाधितविषयत्वादित्यर्थः । **साधूनां विदुषामिति** । कर्तरि षष्ठी तत्कर्तृकनिवारणादित्यर्थः । **भ्रमाधिष्ठानेति** । सर्वज्ञाधर्मिण्यभ्रान्तमित्युक्तेः । अधिष्ठानांशे सम्यग्ज्ञानवतां भ्रान्तानामित्यर्थः । **यद्यप्येतदिति** । **एतत्** समयान्युक्तवाक्याद्वैषम्यं सर्वेषां समयानाम् । भ्रान्तिमूलत्वप्रदर्शनान्तरमेव पादान्ते वक्तव्यम् । सदैव भ्रान्तिमूलत्वे कथमनादिकालतोऽनुवृत्तत्वं भ्रान्तिमूलकेऽन्यवाक्यादौ तदभावादिति भावः ।

चषकः— साधूनां विदुषामिति । 'कर्तृकर्मणोः कृती'ति स्मृतेस्तादृशल्युट्समभिव्याहारनिबन्धना विद्वत्पदप्रकृतिका षष्ठी निरूपकताप्रत्यासत्त्योत्तरपदार्थान्वयिकर्तृत्वार्थिका । साधुपदोत्तरा तु साधुत्वार्था मता-

न्तरदिशाभेदार्थिका तत्समानलिङ्गवचनविशेषणवाचकपदोत्तरविभक्तित्वात् । साध्वभिन्नविद्वन्निष्ठकर्तृत्वनिरूपक-निवारणादिति समुदितार्थः ।

॥ इति भ्रान्तिमूलत्वे समानेऽपि समयानां उन्मत्तवाक्याद्वैलक्षण्ये कारणम् ॥
॥ इति तन्निरसनार्थश्च उपायः ॥

* * *

॥ अथ तन्निरासवैयर्थ्यशङ्कापरिहारः ॥
॥ अथ तत्र सज्जनगतकुसमयाहिताज्ञाननाशकत्वात् तन्निरासस्सार्थक्यम् ॥

१० **सु०**— यद्येवं तर्ह्येतेषां सुदृढनिरूढानां समयानां सर्वथोत्सादनस्याशक्यत्वात् व्यर्थेयं निराकृतिरित्यत आह **तथापीति** ।

अनु०— तथापि शुद्धबुद्धीनामीशानुग्रहयोगिनाम् ।
सुयुक्तयस्तमो हन्युरागमानुगताः सदा ।
इति विद्यापतिः सम्यक् समयानां निराकृतिम् ।
चकार

यद्यपि कुसुमया न सर्वथा समुच्छेद्याः, **तथापि** । **तमः** अज्ञानम् । **सुयुक्तित्वस्य** विवरणं **सदाऽऽगमानुगता इति** । प्रमाणगृहीतव्यास्यादियुक्ताः तत्संवादयुक्ताश्च । **इति** इत्येवमर्थम् ॥ एतदुक्तं भवति । न साङ्ख्यादिसमयसमुच्छेदार्थोऽयं प्रयत्नः, येनोक्तदोषः स्यात्; किन्नाम केषाञ्चित्पुंसां तैस्तैः समयैराहिता(न)ज्ञानसंशयविपर्ययान् आगमसहिताभि-र्युक्तिभिः तत्त्वज्ञानमुत्पाद्य अपनेतुमिति ।

नन्वेतदप्ययुक्तम् 'अतिनिरूढनिबिडवासनानुबद्धमनाद्यज्ञानम् इदानीमेवोत्पन्नेन तत्त्वज्ञानेनापनीयत' इति, किन्तु तत्त्वज्ञानं परिभूय स्ववासनावशात् पुनरुद्भवति, प्रवर्तयति च स्वोचितं कार्यमित्यत उक्तं **शुद्धबुद्धीनामिति** । यथार्थज्ञानस्वभावानां मोक्षयोग्यानाम् ॥ अयं भावः । वक्ष्यते हि केचन चेतना मोक्षयोग्याः केचन नेति ।

तत्र नायोग्यानामज्ञानमपनेतुमयमारम्भः, किन्तु योग्यानामेव । ते च विशुद्धविज्ञान-स्वभावाः । तथा च प्रमाणैरिदानीमेवोत्पन्नमपीदं मनोवृत्तिरूपं तत्त्वज्ञानमन्तरङ्गभूतेन विशुद्धस्वरूपज्ञानेनोपोद्बलितं सत् बहिरङ्गमनाद्यपि सवासनमज्ञानं समूलघातं हन्ति, स्वभावस्य सर्वतोऽपि बलवत्त्वात् । न चैवं प्रमाणवैयर्थ्यम्, स्वभावस्य बाह्यप्रयत्न-सचिवस्यैव कार्यकारित्वात् । यथोक्तम् 'विना यत्नं न हठो नापि कर्मे'ति ।

किञ्च सर्वतोऽपि बलीयानीश्वरानुग्रह इति तावत्सुप्रसिद्धम् । अस्ति चासौ मोक्षयोग्येषु (जीवेषु) अनादित इति वक्ष्यते । तथा च तत्सचिवमिदं वृत्तिज्ञानम् अज्ञानमतिनिरूढनिबिडवासनानुबद्धमनाद्यपि समूलकाषं कषत्येव । अतो न व्यर्थेयं समयानां निराक्रियेति भावेनोक्तम् ईशानुग्रहयोगिनामिति । न चैवं तत एवाविद्या-निवृत्तिर्भविष्यति किं तत्त्वज्ञानेनेति वाच्यम्, ईश्वरानुग्रहस्य पुरुषप्रयत्नानुसारेणैव फल-जननस्वाभाव्यात् । तथा चोक्तम् 'फलप्रदो वासुदेवः अखिलस्ये'ति । अखिलस्य योग्यताकर्मप्रयत्नसाकल्यस्य न पुनरेकैकस्येत्यर्थः ।

७ **परि०— वक्ष्यत इति** । 'अनिष्टादिकारिणामपि च श्रुतमि'त्यधिकरणे 'संयमने त्वनुभूये-तरेषामारोहावरोहावि'त्यादौ वैराग्यपादे मुक्त्ययोग्यानामप्युक्तेः । ज्ञानपादे च 'असार्वत्रिकी'तिनये 'मुक्तिहेतुज्ञाने केषाञ्चिदेवाधिकारः न सर्वेषामि'त्युक्त्या केचिन्मुक्तियोग्याः केचिन्नेति लाभात् । तथा तत्रैव 'सर्वथापि तु त एवोभयलिङ्गात्', 'न चाधिकारिकमपि पतनानुमानात्तदयोगादि'त्यधिकरणयोश्च मुक्तियोग्यतदयोग्यानां च व्यक्तत्वाच्च । एतदधिकरणद्वयार्थव्याख्यानपरे(ण) 'अनादियोग्यतां चैव कलिवाणीश्वरावधिमि'त्यादिना 'अदृष्टाच्चेद्विशेषोऽयमनादित्वं कुतो न तदि'त्यन्तग्रन्थेन योग्यता-भेदस्य प्रपञ्चनाच्चेति भावः । **समूलघात हन्तीति** । 'समूलाकृतजीवेषु हन्कृञ्ग्रह इति णमुल् । 'अत उपधायाः' इति, वृद्धिः । 'हो हन्तेरि'ति कुत्वम् । 'हनस्त चे'ति नकारस्य तकारः । 'कषादिषु यथाविध्यनुप्रयोगः' यस्माद्धातोर्णमुल्कृतः स एवानुप्रयोज्य इति समूलघातं हन्ती-त्युक्तम् । समूलं हन्तीत्यर्थः । **यथोक्तमिति** । भारततात्पर्यनिर्णये द्वाविंशेऽध्याये । **हठो** योग्यता । हठः कर्म च द्वयं यत्नं विना न कार्यक्षममित्यर्थः । **इति वक्ष्यत इति** । 'सर्वथापि तु त एवे'ति ज्ञानपादीयाधिकरणे विशेषानुग्रहं चेति गुणसूत्रे वक्ष्यत इत्यर्थः । 'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यम्' इत्यादिनाऽनुव्याख्याने चेति भावः । **समूलकाषमिति** । समूलघातमितिवदयं

ज्ञेयः । कषतेः 'निमूलसमूल्योः कषः' इति णमुल् । समूलं कषतीत्यर्थः । **तथा चोक्तमिति** । भारततात्पर्ये । सर्वजनस्येति भ्रान्तिनिरासाय व्याचष्टे **अखिलस्येति ।**

यादु०— वक्ष्यत इति । 'विभागः शतवदि'त्यत्रेति शेषः । **यथोक्तमिति** । महाभारततात्पर्य-निर्णय इति शेषः । स्वभावापरपर्यायो हठो बाह्मप्रयत्नं विना न स्वकार्यकारी । कर्मापि न तं विना स्वकार्यं करोतीत्यर्थः । **इति वक्ष्यत इति** । विशेषानुग्रहं चेत्यत्रेति शेषः । **एकैकस्येति** । न चात्रेश्वरानुग्रहानुपा-दानादसङ्गतमिदं सम्मतिकथनमिति वाच्यम् । योग्यताग्रहणेन तन्नियतेश्वरानुग्रहस्यात्राभिप्रेतत्वात् । तथा चैकस्येत्यस्य योग्यतामात्रस्य, तन्नियतेश्वरानुग्रहमात्रस्य, कर्ममात्रस्य, प्रयत्नमात्रस्य वेत्यर्थो विवक्षितः । अतो नासङ्गतिरिति द्रष्टव्यम् । ईश्वरानुग्रहस्य योग्यतानियतत्वं च 'अस्ति चासौ मोक्षयोग्येषु जीवेष्वनादितः' इति पूर्ववाक्ये स्पष्टम् ।

वं०प०— न चैवमिति । स्वभावस्य सर्वतो बलवत्वे तेनैवाज्ञाननिवृत्त्युपपत्तौ मनोवृत्तिरूपतत्त्व-ज्ञानाख्यप्रमाणवैयर्थ्यं न चेत्यर्थः । 'स्वभावाख्या योग्यता या हठाख्या' । मूलस्य काषः कषणं नाशनं यथा स्यात् तथा कषति नाशयतीत्यर्थः । **तत एव** ईश्वरानुग्रहादेव ।

श्रीनिधि०— वक्ष्यमाणन्यायेन भ्रान्तिमूलत्वे दृढनिरूढे भ्रान्तिमूलत्वाविशेषे उन्मत्तवाक्ये अविद्यमाना अनन्तकालानुवृत्तिः कुत इति शङ्का तत्रैव सङ्गता । शङ्काबीजस्य भ्रान्त्यादिमूलत्वस्य दृढनिरूढत्वात् नात्र तदनिरूढेरिति भावः । **उपोद्बलितं** सहकृतम् । **समूलघातं हन्तीति** । समूलं हन्तीत्यर्थः । अमूलन्तं प्रयोगः । **हठस्वरूपयोग्यतायत्नं** विना फलप्रदो न भवतीति कर्मापि तथा तत्स्वरूपनिष्पत्त्यभावेनैवेत्यर्थः । **स्वमूलकाषं कषतीति** । समूलं कषयतीत्यर्थः । अयमपि णुमुलन्तः । योग्यताकर्मप्रयत्नलक्षणसाकल्यस्ये-त्यनेन प्रयत्नस्यापि फलं भगवदधीनमिति उक्तम् । तेन प्रयत्नानुसारेणैव भगवदनुग्रहस्य फलजननस्वाभाव्यमिति लभ्यते । ईश्वरानुग्रहपुरुषप्रयत्ननैरपेक्ष्येण फलप्रदत्वे यत्नफलप्रदत्वकथनस्यासङ्गतत्वापत्तेरिति द्रष्टव्यम् । तस्मात् तत्त्वज्ञानार्थं यत्नः कर्तव्य एवेति ।

शे०वा०— ननु समयनिराकरणस्य 'तथाऽपी'त्युत्तरग्रन्थे सप्रयोजनत्वनिरूपणमनर्थकमित्याशङ्क्य निष्प्रयोजनत्वेन तदकर्तव्यताशङ्कानिरासार्थत्वात् तस्य न तदिति भावेन तच्छङ्कानिरासकतयोत्तरवाक्यं योजयितुं तन्निष्प्रयोजनत्वशङ्कामुत्थापयति **यद्येवमिति** । सर्वथा समयोत्सादो हि तन्निरासप्रयोजनम् । प्रयोजनान्तरा-निरूपणात् । स च तेषां सुदृढनिरूढतया अशक्य इति न प्रयोजनं सम्भवतीत्यतो व्यर्था समयनिराकृति-रित्यर्थः । **तमोऽज्ञानमिति** । सम्यग्ज्ञानप्रतिरूपत्वस्योभयत्र साम्याद्गौण्या वृत्त्या तमःशब्दोऽज्ञानपर इति भावः । **विवरणमिति** । अतो न व्यर्थत्वं तस्येति भावः । अचेतनतया युक्तीनामागमानुगमनायोगात्प्रकारान्तरेण तन्निर्वक्ति **प्रमाणेति** । अज्ञाननिरासस्य समयनिरासप्रयोजनताया मूलारूढतासिद्ध्यर्थमितिशब्दं तथा व्याचष्टे

इतीत्येवमर्थमिति । ननु साङ्ख्यादिसमयोच्छेदस्याशक्यत्वेन तदुच्छेदस्य प्रयोजनत्वानुपपत्तिशङ्काया अपरिहारात् कथमनेन समयनिराकरणवैय्यर्थ्यशङ्कापरिहार इत्यतः, समयनिराकरणस्य प्रयोजनान्तरार्थत्वेन समयोच्छेदार्थत्वासम्मतेर्नानुपपत्तिरित्याह **एतदिति** । 'अपनेतुमिती'त्यत्रत्यस्येतिशब्दस्यैतच्छब्देन सम्बन्धः ।

ननु कुसमयाहिताज्ञानादिनिरासकत्वमात्रवर्णनेन समयनिराकरणस्य प्रयोजनवत्त्वसिद्ध्या तद्वैयर्थ्यशङ्कापरिहारसिद्धेः पुरुषाणां शुद्धबुद्धीनामिति यथार्थज्ञानस्वभावत्वादिवर्णनमनर्थकम् । न च मनोवृत्तिरूपतत्त्वज्ञानस्य स्वरूपज्ञानेनोपोद्बलितत्वप्रतिपादनार्थं तदिति वाच्यम्, तदुपोद्बलितत्ववर्णनस्य प्रकृतोपयोगादर्शनात्; इत्यतः सदागमानुगृहीतयुक्तिजन्यमनोवृत्तिरूपतत्त्वज्ञानस्य प्रागुक्तकुसुमयाऽऽहिताज्ञाननिवर्तकत्वसम्भवोपपादनार्थत्वात् नानर्थक्यमिति भावेन तन्निवर्तकत्वासम्भवनिवर्तकतया शुद्धबुद्धीनामिति विशेषणं योजयितुं तन्निवर्तकत्वासम्भवशङ्कामुत्थापयति **नन्विति** । एतदित्युक्तं प्रपञ्चयति **अतिनिरूढेति** । निवर्त्यनिवर्तकभावप्रयोजकप्राबल्यादेरभावान्न तत्त्वज्ञानस्याज्ञाननिवर्तकतेति दर्शयितुमतिनिरूढत्वादिना अज्ञानस्य प्राबल्यम्, इदानीन्तनत्वविशेषणेन च तत्त्वज्ञानस्य दौर्बल्यं निरूपितम् । न केवलं तत्त्वज्ञानस्याज्ञानापेक्षया प्राबल्यात् तेनैव तत्त्वज्ञानस्य परिभव इत्याह **किन्त्विति** । **परिभूय** स्वप्रयोजनाक्षमीकृत्य । यथार्थस्वरूपज्ञानेन वृत्तिरूपज्ञानस्योपोद्बलितताया मूलारूढतालाभाय शुद्धबुद्धीनामित्येतत् तत्परतया व्याचष्टे **यथार्थज्ञानेति** । यथार्थज्ञानस्वभावत्वस्यासम्भावनां परिहरति **मोक्षयोग्यानामिति** । **वक्ष्यते हीति** । तृतीयस्य चतुर्थे 'विभागः शतवदि'त्यत्रेति शेषः । **अयमारम्भ इति** । येनोक्तदोषः स्यादिति शेषः । तेषामयथार्थज्ञानस्वभावतया तदीयमनोवृत्तिरूपतत्त्वज्ञानस्य स्वरूपभूतयथार्थज्ञानोपोद्बलितत्वासम्भवेन स्वरूपभूतानाद्यज्ञाननिवर्तकत्वासम्भवादिति भावः । कथमनाद्यज्ञानस्येदानीमेवोत्पन्नेन तत्त्वज्ञानेन निवृत्तिरित्यतः अनादिभूतस्यापि तस्य बहिरङ्गत्वान्निवृत्तिः । इदानीमुत्पन्नत्वेऽपि तत्त्वज्ञानस्यान्तरङ्गभूतस्वरूपज्ञानोपोद्बलितत्वान्निवर्तकत्वमिति दर्शयितुं बहिरङ्गभूतमिति, अन्तरङ्गभूतेनेति च विशेषणम् । **समूलघातं हन्तीति** । 'समूलात्कृतजीवेषु हन्कृञ्ग्रृह' इत्यनेन समूलशब्दे कर्मण्युपपदे हन्तेर्णमुल्प्रत्ययः । 'हो हन्तेर्ञ्णिन्नेष्वि'ति हकारस्य घकारः । 'हनस्तोऽचिण्णलोरि'ति णकारस्य तकारः । 'अत उपधायाः' इत्युपधावृद्धिः । 'कषादिषु यथा विध्यनुप्रयोगः' इति यस्माण्णमुल् तस्यैवानुप्रयोगश्चेति ज्ञेयम् । ततश्च समूलघातं हन्तीत्यस्य मूलेन सह हन्तीत्यर्थः । **एवमिति** । स्वभावस्य सर्वतो बलवत्त्वत इत्यर्थः । **प्रमाणवैयर्थ्यमिति** । मनोवृत्तिरूपतत्त्वज्ञानस्य अज्ञाननिवर्तकत्वकल्पनवैयर्थ्यं स्वरूपज्ञानेनैव अनाद्यज्ञाननिवृत्तिसम्भवादिति भावः । उक्तार्थे आचार्यसम्मतिमाह **यथोक्तमिति** । महाभारततात्पर्यनिर्णय इति शेषः । तद्वाक्यं पठति **विनेति** । स्वभावापरपर्यायो हठो बाह्यप्रयत्नं विना न स्वकार्यकारी, कर्मापि तेन विना न स्वकार्यकारीत्यर्थः ।

'तथाऽपि शुद्धबुद्धीनामि'त्यनेनैव मनोवृत्तिरूपज्ञानस्य स्वरूपभूतयथार्थज्ञानोपोद्बलितत्वकथनात् अनाद्यज्ञाननिवर्तकत्वसमर्थनेन समयनिराकरणस्य साफल्यसिद्धेः 'ईशानुग्रहयोगिनामि'त्यंशवैयर्थ्यमित्यतो मनोवृत्तिरूपज्ञानस्य अनाद्यज्ञाननिवर्तकत्वे ईश्वरानुग्रहसचिवत्वरूपहेत्वन्तराभिधायकत्वान्न तदिति भावेन हेत्वन्तरपरतया

तद्योजयितुमाह **किञ्चेति** । **वक्ष्यत इति** । 'विशेषानुग्रहं चे'त्यत्रेति शेषः । **समूलकाषं कषतीति** । समूलं कषतीत्यर्थः । 'निर्मूलसमूलयोः कष' इति समूलशब्दे कर्मण्युपपदे कषतेर्णमुल्प्रत्ययः । 'अत उपधायाः' इत्युपधावृद्धिः । 'कषादिषु यथा विध्यनुप्रयोगः' इति यस्माण्णमुल् तस्यैवानुप्रयोगश्चेति द्रष्टव्यम् । **तत एवेति** । ईश्वरानुग्रहादेवेत्यर्थः । अत्राप्याचार्यसम्मतिमाह **तथा चोक्तमिति** । तात्पर्यनिर्णय एवेति शेषः । तद्वाक्यं पठति **फलप्रद इति** ।

ननु सर्वस्यापि फलप्रदो वासुदेव इत्यर्थप्रतिपादकस्य 'फलप्रदो वासुदेवोऽखिलस्ये'त्यस्य प्रयत्नसापेक्षस्य हरिप्रसादस्य फलसाधनत्वमिति प्रकृतार्थाप्रतिपादकत्वात् नास्योदाहरणमत्र सङ्गतम्, इत्यतोऽस्माद्वाक्यात्पूर्ववाक्ये योग्यतांकर्मप्रयत्नानामेव प्रकृतत्वादखिलस्येत्यनेन तस्यैव परामर्शे हरिप्रसादसहकृतयोग्यतादेरेव फलसाधनत्व-प्रतिपादकत्वात् प्रकृतोपयोग इति भावेन; तथा सति प्रत्येकमेव योग्यतादेः फलसाधनत्वं वाच्यम् । तच्च न प्रत्येकं, फलव्यभिचारात् । दण्डादेस्तु प्रत्येकं स्वरूपयोग्यतारूपमेव कारणत्वं, न तु फलोपधानमिति न व्यभिचारः । प्रकृते च फलप्रद इति फलोपधानकारणत्वमेवाभिमतमिति योग्यतादेः प्रत्येकं फलजनकतया भवेदेव व्यभिचार इति, न विवक्षितार्थप्रतिपादकत्वमस्य, इत्यतः अत्राखिलस्येति भावप्रधानो निर्देशः । भावोऽपि न यः कश्चिदभिमतः, किन्नाम प्रकृतयोग्यतादिसमुदाय एव । समुदायस्य च समुदाय्यभिन्नत्वान्न समुदायहेतुत्वेऽपि योग्यतादेरहेतुत्वप्राप्तिः । ततश्च योग्यतादिसमुदायस्यैव हेतुत्वलाभान्नानुपपत्तिरिति भावेन व्याख्याति **अखिलस्येति** । **न पुनरिति** । न चात्रेश्वरानुग्रहानुपादानात्, केवलेश्वरानुग्रहस्य साधनत्वालाभात् असङ्गतमेतदिति वाच्यम् । योग्यताग्रहणेन तन्नियतेश्वरानुग्रहस्याप्यत्राभिमतत्वात् । तथा चैकैकस्येत्यस्य योग्यतामात्रस्य, तन्नियतेश्वरानुग्रहमात्रस्य, कर्ममात्रस्य, प्रयत्नमात्रस्य चेत्यर्थपर्यवसानाददोषः । ईश्वरानुग्रहस्य योग्यतानियतत्वं च 'अस्ति चासौ मोक्षयोग्येषु जीवेष्वनादितः' इति पूर्वग्रन्थसिद्धमित्यवधेयम् ।

वा०२०— स च तेषामिति । तेषां सुदृढनिरूढतया स चाशक्य इति सम्बन्धः । **स च** इत्यस्य सर्वथा समयोत्साद इत्यर्थः । **अनुगमनायोगादिति** । ततश्चानुगत इत्यस्य गुर्वनुगतः शिष्य इत्यादाविव तदर्थकत्वायोगेनेति शेषः । **तन्निर्वक्तीत्यत्र** तत्पदेनागमानुगता इत्यस्य परामर्शः । प्रकारद्वयेनेति शेषः । **एतच्छब्देनेति** । एतदुक्तं भवतीत्यत्रत्य एतच्छब्देनेत्यर्थः । **नानर्थक्यमिति भावेन** इत्यत्र यथार्थमज्ञान-स्वभावत्वादिवर्णनस्येति वचनव्यत्यासेनानुवर्तते । सौरालोकेन प्रदीपप्रकाशाभिभवस्थले परिभवशब्दार्थो यः क्लृप्तः तदर्थकतया परिभूयेत्येतदनूद्य व्याचष्टे **परिभूयेति** । **समूलाकृतजीवेषु हन्कृञ्ग्रह इत्यनेनेति** । समूलाकृतजीवेषूपपदेषु कर्मवाचिषु यथासङ्ख्यं हन्कृञ्ग्रह इत्येतेभ्यो णमुल्प्रत्ययो भवतीति सूत्रार्थः । **होहन्तेरिति** । ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं स्यादिति सूत्रार्थः । **घकार इति** । कवर्गचतुर्थस्यैव हकारेण सावर्ण्यादिति भावः । **हनस्तोऽचिण्णलोरितीति** । हन्तेस्तकारो तादेशः स्यात् चिण्णल्वर्जिते ञिति णिति परत इति सूत्रार्थः । चिण्णलोरिति नकारस्य तकार इति पाठः । समूल-घनित्यत्रत्यनकारस्य णमुल्रूपमिति परतस्तकार इत्यर्थः । **अत इति** । उपधाभूताकारस्य ञिति णिति च

वृद्धिर्भवतीति सूत्रार्थः । ततश्च णमुलि णकारोकारलकारलापेमित्यवशेषे अघातभू इति स्थितेऽनुस्वारे च घातमिति सिद्ध्यतीति भावः । **हन्तीत्यर्थ इति** । सह मूले न हननं करोतीत्यर्थः । अत्र णमुल्-प्रकृत्याऽनुप्रयुज्यमानधातुना च यद्यप्येक एवार्थो उपस्थितो भवति । तेन भेदनिरूपितविशेषणविशेष्यभावो न सम्भवतीत्याभाति । तथाप्युपपदार्थविशिष्टो णमुल् प्रकृतेरर्थः । अनुप्रयोगार्थश्च सामान्यम् । ततो विशिष्टे विशेष्य भेदसत्त्वात् । विशेष्यस्य मान्यस्योक्तः प्रकृत्यर्थो विशेषणं सम्भवति । उक्तं च शेष्यम् । नव्येन च । एकस्यापि धात्वर्थस्यानिर्मूलादिविशेषणसम्बन्धाद्भेदे सति सामान्यविशेषभावेन विशेषणविशेष्यभाव इतीति ज्ञेयम् । तात्पर्यनिर्णयवाक्यस्योक्तार्थपरतायाः स्पष्टमप्रतीतेस्तस्योक्तार्थोपष्टम्भकतासिद्ध्यर्थं तद्वाक्यं तथा योजयति **स्वभावपरपर्याय इति** । निर्मूलसमूलयोः कष इति सूत्रे निर्मूलादाहरणं तु निर्मूलकाषं कषतीति । निर्गतं मूलमस्य । निर्मूलं कषणं करोतीत्यर्थ इति शेषी । मूले च ससहसमूलम् । कषणं करोतीत्यर्थः । कष हिंसायामिति धातुः । विशेषणविशेष्यभावः प्राग्वदुपपाद्यः । **इत्यर्थप्रतिपादकस्येति** । आपाततस्तथार्थ-प्रतीतेरिति भावः । **पूर्ववाक्य इति** । स्वभावाख्या योग्यता या हठाख्येत्यादि पूर्ववाक्य इत्यर्थः । **तस्यैव परामर्श इति** । प्रयत्नानामिति बहुवचनोक्तानामपि प्रकृतत्वेन रूपेण परामर्शदिकवचनोपपत्तिः । प्रकृतस्य योग्यतादेरित्यर्थात् । मूलेऽखिलस्येत्यनूद्य योग्यताकर्मप्रयत्नरूपस्येत्येव वक्तव्ये साकल्यस्य धर्मप्राधान्येन व्याख्यानं निमित्तोपन्यासेन प्रवृत्तयस्तदुपपादयति । **तथा सति** प्रत्येकमित्यादिना । **फलसाधनत्वमिति** । फलोपधानरूपकारणत्वं वाच्यमित्यर्थः । न च दण्डादिवत्कारणत्वं प्रकृत इत्याह **प्रकृते चेति** । **फलप्रद इति** । प्रकर्षप्रतिपादनात्फलोपधानस्यैव च प्रकर्षत्वादिति भावः । फलं प्रददातीति फलप्रद इति प्रपूर्वाद्दातेः कर्मण्यणपवादेन प्राप्तान्नोऽनुपसर्गे क इति कप्रत्ययाप्राप्तेरण्येव सति अतो युक् चिण्कृतोरिति युगागमे गोदाय इतिवत् प्रदाय इति तु न भवति । प्रदोज्ञ इति प्रपूर्वाद्दातेर्जानातेश्च कप्रत्यये आतोलोप इटि चेत्याकारलोपे गोद इतिवत् प्रद इत्येव प्राप्त इति ज्ञेयम् । **भावप्रधान इति** । भवतोऽस्मात्प्रत्ययव्यवहाराविति भावः । प्रवृत्तिनिमित्तं तत्प्रधाने । लक्षणया तत्प्रतिपादक इत्यर्थः । अप्रयुज्यमानोऽपि भावप्रत्ययो द्वयेकयोरित्यादि-वद्विवक्षितार्थप्रत्यायक इत्यर्थः । **यः कश्चिदिति** । गोत्वं पटुत्वं वाचकत्वमित्यादौ विद्यमानो जातिगुणक्रियादि-रित्यर्थः । **समुदाय एवेति** । समुदाय एष्वस्तीति समुदायिन इति समुदायिषु तच्छब्दप्रवृत्तिनिमित्तं समुदायो भवत्येवेति भावः ।

स०व्र०— न चैवमिति । स्वभावस्य सर्वतो बलवत्त्वेन तेनैवाज्ञाननिवृत्त्युपपत्तौ मनोवृत्तिरूप-तत्त्वज्ञानमेव न कल्पनीयमिति न वाच्यमित्यर्थः । **उक्तं** महाभारततात्पर्यनिर्णये । **हठो** योग्यता । **न पुन-रिति** । अनेन योग्यताकर्मणोः प्रयत्नोत्पत्तावेवोपयोगात् प्रयत्नस्यैव फलदत्वं निरस्तं भवतीत्यर्थः ।

विठ्ठल०— वैय्यर्थ्यशङ्कानिवारणायाभिप्रायमाह **एतदुक्तं भवतीति** । अनादिदुर्वासनावतां कथं शुद्धबुद्धित्वमित्यत आह **अयं भाव इति** । **वक्ष्यत इति** । 'अनादियोग्यतां चैव कलिवाणीश्वरावधिमि'त्यारभ्य

'श्रुण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेनीयमानः', 'राक्षसीमासुरी चैव प्रकृतिं मोहिनीश्रिताः', 'दैवीं प्रकृतिमाश्रिताः', 'द्विविधो भूतसर्गोऽत्र देव आसुर एव चे'त्यादि प्रमाणोदाहरणेन ज्ञानपादे वक्ष्यत इत्यर्थः । विना यत्नं रूढयोग्यतापर नापरनामकः स्वभावः कर्मापि न कार्यं करोतीति तात्पर्यनिर्णयवाक्यार्थो बोध्यः । अस्ति चासौ मोक्षयोग्यजीवेष्वनादित इति । **वक्ष्यत इति** । 'परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेती'ति श्रुत्युदाहरणेन ज्ञानपादे वक्ष्यत इत्यर्थः । तत्र 'वितर्तुराण' इत्यनेन अनाद्यनुग्रहो मोक्षयोग्येषु लभ्यत इति ज्ञेयम् । **तत एवेति** । ईश्वरानुग्रहादेवेत्यर्थः । कथमस्योक्तार्थे सम्मतित्वमित्यतोऽखिलस्येति पदलब्धार्थमाह **अखिलस्येति** । तथा चेश्वरानुग्रहो यदि योग्यताकर्मप्रयत्नानां मध्ये एकैकमात्रस्यानुसारेण फलप्रदः स्यात् तर्हि किं ज्ञानादिप्रयत्नेन योग्यताकर्मणोरन्यतरापेक्षयापि फलदानोपपत्तेरिति शङ्का स्यात् । न चैवं किन्तु भगवदनुग्रहस्त्रितयसमुदायस्यैव फलप्रद इत्युदाहृतवाक्यादवगम्यते । तत्र प्रयत्न एव प्राधर्मिकः यत्नो यतो दृढकर्मप्रयोक्तेत्युक्तेः । अतः प्रयत्नानुसारेण फलजननस्वाभाव्यादित्युक्तार्थे सम्मतित्वमुपपन्नम् । न चात्र प्रसादो न श्रूयत इति वाच्यम् । फलप्रद इत्यनेनैव फलदानोन्मुखतारूपानुग्रहलाभात् । स्वाभाव्यादित्यनेन स्वभावोऽयमीशानुग्रहस्य यदेतानुपेक्ष्यैव फलदातृत्वम् । **अतो न काचिदनुपपत्तिरिति** ।

चषकः— वक्ष्यते हीति । 'विभागः शतवदि'त्यत्रेति पूरणीयम् । **समूलघातमिति** । समूलाकृतजीवेषु हन्कृञ्ग्रह' इति समूलपदोपपदाद्धातोर्णमुल्विधानात् 'कषादिषु यथाविध्यनुप्रयोगः' पूर्वस्मिन्निति स एवानुप्रयोज्य इति युक्तो विन्यासः समूलं हन्तीत्यर्थः । **यथोक्तमिति** । महाभारततात्पर्यनिर्णय इति पूरणीयम् । निसर्गापरपर्यायः हठः बाह्यप्रयत्नमन्तरेण न स्वकार्यकारी कर्मापि न तादृशमिति भावः । **इति वक्ष्यत इति** । विशेषानुग्रहं चेत्यत्र अभिधास्यत इत्यर्थः । **समूलकाषं कषतीति** । 'निमूलसमूलयोः कष' इति समूलपदोपपदात् कर्षेर्णमुल्विधानात् पूर्ववत् साधुतावसेया । समूलं कषतीत्यर्थः ।

॥ इति सज्जनगतकुसमयाहिताज्ञाननाशकत्वात् तन्निरासस्सार्थक्यम् ॥

* * *

॥ अथ तथात्वेऽपि ब्रह्मादिभिरादर्तव्यत्वे कारणम् ॥

११ **सु०— "यद्येवं साधूनां कुसमयाहितमज्ञानमपनेतुं भगवान् समयानां निराकृतिं चकार, तदेयं ब्रह्मादिभिरनादर्तव्या स्यात्, तेषु कुसुमयैरज्ञानस्यानाहितत्वेन प्रयोजनाभावात्, तथा च 'एवंविधानि सूत्राणि कृत्वे'त्यागमविरोध" इत्यत आह निजेति ।**

अनु०— निजभक्तानां बुद्धिशाणत्वसिद्धये ।

कुसुमयैरनाहिताज्ञानानां ब्रह्मादीनां, बुद्धिं प्रति, युक्तीनां शाणत्वसिद्धये युक्तिशाणेन ज्ञानादेरतिशयितनैश(य)त्यसिद्ध्यर्थमिति यावत् । पूर्वेणैव सम्बन्धः । कुसुमया(हिता)-ज्ञाननिरसनप्रयोजनाभावेऽपि ज्ञानवैशद्यप्रयोजनस्य विद्यमानत्वात् तैरिदमादरणीयमिति भावः ।

परि०— इत्यागमेति । भाष्योक्तागमोऽयम् । तद्वाक्यशेषे 'ब्रह्मरुद्रादिदेवेषु ज्ञानं संस्थाप्ये'त्युक्तेरिति भावः ।

यादु०— अतिशयितनैशित्येति । 'केवलं विरिञ्चस्य धर्मकारणमि'त्यादेः प्रायिकत्वाभिप्रायकत्वान्न तद्विरोधोऽत्रेति ज्ञातव्यम् । अत एव गीतातात्पर्ये 'विष्णोः प्रीत्यर्थमेवास्य श्रोतव्यं प्रायशो भवेदि'ति प्रायिकत्वं स्पष्टमुक्तम् । एवं च 'क्रमेण वर्धमानमि'त्यादिकमप्यनुकूलितं भवतीति ज्ञातव्यम् । केचित्तु नैशित्योक्तिरतिशयितफलाभिप्राया अतः 'केवलं विरिञ्चस्य धर्मकारणमि'त्यादिना न विरोध इत्याहुः ।

कं०रा०— एवंविधानीति । 'एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः । ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः' इत्यागमविरोध इत्यर्थः । **तैरपीति** । ब्रह्मादिभिरपीत्यर्थः ।

शे०वा०— ननु 'निजभक्तानामि'ति भाष्यखण्डो व्यर्थः । न च समयनिराकरणप्रदर्शनपरः स इति वाच्यम् । 'तथाऽपी'त्यादिनैव कुसमयाहिताज्ञाननिवर्तकतया समयनिराकरणस्यार्थत्वप्रतिपादनात् । न च प्रयोजनान्तरप्रदर्शनमेतदिति वाच्यम्, तस्यानर्थक्यात् इत्यतः समयनिरासस्य ब्रह्मादीन्प्रत्युपादेयतासमर्थनार्थत्वात् न प्रयोजनान्तरकथनवैयर्थ्यम् इत्यभिप्रेत्य तत्परतया तत्र योजयितुमाद्यप्रयोजनानुरोधेन तदनुपादेयताशङ्का-मुत्थापयति **यद्येवमिति** । इष्टापत्तिं निरस्यति **तथा चेति** । **अतिशयितनैशित्येति** । अत्रातिशयितता-फलाभिप्रायात् केवलं विरिञ्चस्य धर्मकारणमित्यादिना न विरोधः । अत एवोक्तं 'विरिञ्चस्य तु संशयाभावात् केवलं धर्मकारणं भवति । महतोऽपि धर्मस्य कारणं परमेश्वरादध्ययनमि'ति । प्रायिकत्वाभिप्रायकत्वाद्वा न विरोधः । अत एव 'विष्णोः प्रीत्यर्थमेवास्य श्रोतव्यं प्रायशो भवेदि'ति प्रायिकत्वमेव स्पष्टमुक्तम् । 'यत आहुर्ब्रह्मणस्तु प्रायो नाप्रतिभासितमि'ति च । एवञ्च क्रमेण वर्धमानमित्यनुकूलितं भवतीति ज्ञातव्यम् । वैशद्यप्रयोजनस्येत्यस्याप्ययमेवार्थः ।

वा०र०— स्पष्टमुक्तमिति । गीतातात्पर्य इति शेषः ।

स०व्र०— अतिनैशित्येति । अत्रातिशयितफलाभिप्रायात् 'केवलं विरिञ्चस्य धर्मकारणम्' (सुपर्णादिर्विरिञ्चस्य केवलं धर्मकारणम् । इति ऋग्भाष्यम् १-१-१) इत्यादिना न विरोधः । 'वैशद्यप्रयोजनस्य' इत्यस्याप्ययमेवाभिप्रायः ।

विद्वल०— आगमविरोध इति । तत्र 'ब्रह्मरुद्रादिदेवेषु ज्ञानं संस्थाप्ये'त्युक्तेरिति भावः । **ज्ञानादेरतिशयितनैय्यत्यसिद्ध्यर्थमिति** । न च पारोक्ष्यात्पूर्णज्ञानं सदैव हीत्येकादशतात्पर्ये, 'विरिञ्चस्य केवलं धर्मकारणमि'ति ऋग्भाष्ये चोक्तेः विरिञ्चस्य कथं सूत्रेण ज्ञानातिशयलाभोक्तिरिति वाच्यम् । परोक्षात्पूर्णमित्यस्य स्वयोग्ययावद्भगवद्गुणरूपक्रियाद्यशेषविषये सदापरोक्षज्ञानस्य पूर्णत्वमर्थः । सुधायास्तु परोक्षतः सदा ज्ञानगुणरूपादिष्वेव तत्तद्भूतावान्तरविविधविचित्रानन्तप्रकारविशेषेष्वतिशयितज्ञानलाभ इति भिन्नविषयकत्वे विरोधाभावात् । अन्यथोदाहृतभाष्यवाक्यविरोधात् । क्रमेण वर्धमानं आमुक्तेरित्युक्तिविरोधाच्च । केचित्तु पारोक्ष्येण पूर्णमित्यस्य सरस्वत्यादिजीवापेक्षया सदा पूर्णमिति वार्थमाहुः । नापि ऋग्भाष्यवचनविरोधः । तस्य पाठमात्रविषयकत्वेन तत्रैव स्फुटं प्रतीतेः धर्मकारणत्वं प्रायिकत्वाभिप्रायेणेत्यप्याहुः । अन्ये तु सुधावाक्यं फलविशेषाभिप्रायकमिति मन्यते ।

॥ इति तथात्वेऽपि ब्रह्मादिभिरादर्तव्यत्वे कारणम् ॥
॥ इति तन्निरासवैयर्थ्यशङ्कापरिहारः ॥
॥ इति स्वमतानुसारेणैतत्पादप्रयोजनाभावशङ्कानिरसनम् ॥
॥ इति एतत्पादीयानारम्भणीयत्वशङ्कानिरासः ॥
॥ इति पादारम्भसमर्थनम् ॥

* * *

॥ अथ आद्याधिकरणे निराक्रियमाणस्य निरीश्वरसाङ्ख्य(विन्ध्य)मतस्य स्थितिदर्शनम् ॥
॥ अथ तत्रादौ एतेषाम् 'ईश्वरमनभ्युपगम्य जीवजडात्मकतत्त्वद्वयमात्र'वादित्वम् ॥

१२ **सु०—**

ब्र०सू०— ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥

तदेवं समर्थितः पादारम्भः ।

तत्राद्याधिकरणे निरीश्वरसाङ्ख्यमतं निराक्रियते । न च तत्स्वरूपाज्ञाने दूषणं सुबोधं भवति इत्यतः तन्मतस्थितिं तावद्दर्शयति **चेतनेति** ।

अनु०— चेतनाचेतनं तत्त्वद्वयमेव निरीश्वराः । आहुः

चेतनमचेतनं चेति द्वन्द्वैकवद्भावः । आहुः साङ्ख्या इति शेषः ।

ननु च विधान्तरासम्भवात् प्रामाणिकैः तत्त्वद्वयमेव वक्तव्यम्; तत्किं तेषां वैषम्यमुच्यत इत्यत उक्तं निरीश्वरा इति । ईश्वरमनभ्युपगम्य जीवजडात्मकं तत्त्वद्वय-मेवाहुरित्यर्थः ।

परि०— द्वन्द्वैकवद्भाव इति । सर्वो द्वन्द्वो विभाषयैकवद्भवतीत्युक्तेरिति भावः ।

श्रीनिधि०— ननु चेतनाचेतनमिति यदि च द्विगुसमासः तदा अकारान्तोत्तरपदो द्विगुस्त्रियां भाष्यत इति स्त्रीत्वे द्विगोरिति चेतनाचेतनीति स्यात् । द्वन्द्वत्वे चेतनाचेतने इति द्विवचनान्तत्वं स्यात् । न तु चेतनाचेतनमित्यत आह **चेतनमचेतनं चेति** । एकवद्भावे सनपुंसकमिति नपुंसकलिङ्गतेति द्रष्टव्यम् ।

शे०वा०— भाष्यकारीयपरमतानुवादप्रयोजनोक्त्या तद्वैयर्थ्यं परिहर्तुं सङ्गतिं सूचयन्नेव वृत्तानुवादपूर्वकं वर्तिष्यमाणमर्थं दर्शयति **तदेवमित्यादिना । सुबोधं भवतीति** । सामयिकानेकपदार्थाश्रितन्यायाभाससन्दृब्धे मते बुद्धिस्थे सत्येव तद्दूषणज्ञानसम्भवादिति भावः । **एकवद्भाव इति** । ततश्च नैकवचनानुपपत्तिरिति भावः । **विधान्तरासम्भवादिति** । ऐकविध्यबहुविध्ययोः प्रत्यक्षादिबाधिततयाऽसम्भवादित्यर्थः । **तत्त्वद्वयमेव वक्तव्यमिति** । अन्यथा 'द्विविधं तत्त्वमिष्यत' इति सिद्धान्तेऽपि तदुक्तिर्न स्यादिति भावः ।

वा०र०— सामयिकेति । समयः शास्त्रम् । तत्रभवाः सामयिकाः । शास्त्रकारीयसङ्केतविषयाः ये पदार्थास्तदाश्रिता ये न्यायाभासास्तैः संदृब्धं सङ्घटितेत्यर्थः । ततश्च **नैकवचनेति** । सर्वो द्वन्द्वो विभाषयैकवद्भवतीति परिभाषया एकवद्भावसिद्धावेकवचनोपपत्तिरित्यर्थः । तेष्वपुनर्वस्वोरित्येतत्सूत्रकारीयैत-त्परिभाषाविचारस्य पूर्वं भक्तिपादे तत्र तत्र कृतत्वादत्राव्युत्पादनं न दोषाय । **प्रत्यक्षादीति** । तत्त्व-सङ्ख्यानादिटीकोक्तरीत्येति शेषः । **सिद्धान्तेऽपि तदुक्तिरिति** । ननु स्वतन्त्रास्वतन्त्रभेदेन तत्त्वद्वैविध्यमेव सिद्धान्तेऽभिहितम् । न तु चेतनाचेतनत्वेनेति उक्तप्रकारेण द्वैविध्याश्रयणे सिद्धान्तेन साधक इति चेन्न । चेतनाचेतनत्वाभ्यां तत्त्वविभागस्य सिद्धान्तसम्मतत्वेऽपि प्राधान्यमात्रमाश्रित्य स्वातन्त्र्यास्वातन्त्र्याभ्यां विभागः कृतः । न त्वेवं विभागे न्यूनाधिक्यादिबाधकमस्तीति न स त्याग इति सिद्धान्तीय द्वैविध्यकथनमप्यत्र साधकं सम्भवत्येव, विधान्तरासम्भवात् सिद्धान्तस्य द्वैविध्यमात्रसाधकत्वाभिप्राये तु न काचिदनुपपत्तिः । अत एवेश्वरं तृतीयत्वमाशङ्क्य निराकरिष्यतीति द्रष्टव्यम् ।

चषकः— **द्वन्द्वेति** । सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीति कात्यायनवचनादिति भावः । **विधान्तरेति** । प्रकारान्तरेत्यर्थः ।

॥ इति एतेषाम् 'ईश्वरमनभ्युपगम्य जीवजडात्मकतत्त्वद्वयमात्र'वादित्वम् ॥

* * *

॥ अथ तत्र तन्मतोक्तस्य तत्त्वविभागान्तरस्य विरोधाभावदर्शनम् ॥

१३ **सु०—** ननु साङ्ख्या मन्यन्ते, "सङ्क्षेपतस्तत्त्वस्य चतस्रो विधाः । कश्चिदर्थः प्रकृतिरेव । कश्चिदर्थो विकृतिरेव । कश्चित्प्रकृतिविकृतिः । कश्चिदनुभयः ॥ तत्र सत्त्वरजस्तमसां साम्यावस्था प्रधानं प्रकृतिरेव । सा हि विश्वस्य कार्यस्य मूलम् । न त्वस्या मूलान्तरमस्ति, महदहङ्कारतन्मात्राः सप्त प्रकृतिविकृतयः । प्रकृतयो विकृतयश्चेति । तथा हि । महत्तत्त्वमहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेः । एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिः, विकृतिश्च महतः । एवं पञ्च तन्मात्राणि (तत्त्वानि) भूतानामाकाशादीनां प्रकृतयो, विकृतयश्च अहङ्कारस्येति ॥ पञ्च भूतान्येकादशेन्द्रियाणीति षोडशको गणो विकृतिरेव । यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः, एवं तद्विकारभेदाः पयोबीजादयः, तेषां दध्यङ्कुरादयः; तथाऽपि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरम्, स्थूलतेन्द्रियग्राह्यतासाम्यात् । तत्त्वोपादानत्वं च प्रकृतित्वमिह विवक्षितमिति ॥ पुरुषस्त्वनुभयो न प्रकृतिर्नापि विकृतिः ॥ तदेवं विस्तरतः पञ्चविंशति तत्त्वानि । यथोक्तम्, "मूलप्रकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति । तत्कथमुच्यते तत्त्वद्वयमेवाहुरिति; आह **तदिति** ।

अनु०— तत्पञ्चपञ्चत्वविभागस्थमचेतनम् ।

चेतनं

पञ्च च ते पञ्चतश्च (पञ्चपञ्चतः) तेषां भावः पञ्चपञ्चत्वम् । स चासौ विभागश्च । तेनोपलक्षितं तिष्ठतीति **पञ्चपञ्चत्त्वविभागस्थम्** । **तत्** चेतनमचेतनं च तत्त्वद्वयमेव; सङ्क्षेपतः चतुर्विधम्, विस्तरतः पञ्चविंशतिप्रभेदमाहुरित्यतो न विरोधः ।

ननु चेतनमचेतनं चासङ्ख्यातं प्रत्यक्षादिप्रमाणैरुपलभमानाः कथमेवमाहुरित्यत आह तदिति ।

अनु०— तदसङ्ख्यातं

तत् इत्युभयपरामर्शः । उपाधिक्रोडीकारेण पञ्चविंशतिप्रभेदं वदन्तोऽप्यवान्तरभेदेन तत्त्वद्वयम् असङ्ख्यातम् आहुरित्यर्थः ।

परि०— उत्तरवाक्यमवतारयितुमाह **ननु साङ्ख्या इति** । **चतस्र इति** । वक्ष्यमाण-सम्मतिश्लोके चातुर्विध्यस्योपलम्भादिति भावः । **प्रकृतिरेवेति** । तत्त्वान्तरं प्रति परिणामिकारण-मेवेत्यर्थः । श्लोकस्थाविकृतिशब्दार्थोक्तिरेवेति । **विकृतिरेवेति** । न कस्यापि तत्त्वस्योपादान-मित्येवकारार्थः । प्रकृत्यादिरूपानर्थान् दर्शयति **तत्र सत्त्वेति** । **साम्यावस्थेति** । अन्योन्यमिश्रणेन विना स्वरूपेणावस्थानम् । तादृगवस्थापन्नानां तेषां नामान्तरमाह **प्रधानमिति** । मूलप्रकृतिरिति श्लोकस्थमूलपदार्थस्य ससम्बन्धिकत्वादाह **सा हीति** । 'महदाद्याः प्रकृतिविकृतयः सप्ते'ति श्लोकस्थं व्यनक्ति **महदिति** । **तन्मात्रा इति** । शब्दस्पर्शरूपरसगन्धाः । **आकाशादीनामिति** । आकाश-वाय्वग्न्यप्पृथिवीनां यथाक्रमं शब्दादयः प्रकृतयः अहंकारस्य विकृतयश्चेत्यर्थः । 'षोडशकश्च विकार' इति श्लोकस्यार्थमाह **पञ्चभूतानीति** । वाक्पाणिपादपायूपस्थश्रोत्रत्वक्चक्षूरसनघ्राणमनांस्येकादशेन्द्रियाणीति षोडशकः षोडशसङ्ख्योपेतः गण इति शेषोक्तिः । प्रत्ययार्थोऽयम् । 'पञ्चद्दषतौ वर्गे वा' इत्यत्र वाशब्दाद्वर्गार्थे कन्प्रत्ययस्याप्युक्तेर्दशपदेन तदन्तस्यापि गृहीतत्वादिति केचिदाहुः । षोडषक-स्त्वित्यत्र तुः एवार्थ इति भावेनोक्तं **विकृतिरेवेति** । विकृतिरेवेत्येतदयुक्तमित्याशङ्क्य, तुशब्द-सूचितसमाधिमाह **यद्यपीत्यादिना** । **स्थूलतेति** । पृथिव्यादेर्यथा स्थूलत्वं इन्द्रियग्राह्यत्वं च तथा तेषामपि तदस्तीति गोघटादयः पृथिव्येव दध्यादयश्च पयआदय (पयोदध्यादय) एवेत्यर्थः । चरमपादार्थमाह **पुरुषस्त्विति** । **पञ्च च ते पञ्चतश्चेति** । विशेषणं विशेष्येण बहुलमिति समासः । स चेत्यस्य पञ्चपञ्चत्वपरामर्शित्वेऽपि विधेयलिङ्गापेक्षया पुन्निर्देशः । **उपलक्षितम्** । उपलक्षणतया व्यावर्तितं ज्ञापितमिति वार्थः । तदित्येतच्चेतनमचेतनमित्यनयोर्विशेषणमिति भावेन अनुवदति **तच्चेतनमचेतनं चेति** ।

यादु०— प्रकृतिरेवेति । अत्र प्रकरोतीति व्युत्पत्त्या प्रकृतिशब्द उपादानपरः । विकृतिशब्दश्च विक्रियत इति व्युत्पत्त्या कार्यपर इति ज्ञातव्यम् । **साम्यावस्थेति** । गुणप्रधानभावपरित्यागेन त्रयाणामपि

प्रधानभावेनैवावस्थितिरित्यर्थः । इयं हि तेषां प्रक्रिया । सृष्टिकाले हि सत्त्वादीनां मध्ये यदुद्भूतं बलीयस्तदङ्गि । अभिभूतं च तदनुगुणतया स्थितमङ्गम् । एवं हि तेषां गुणप्रधानभावे सति महदादौ कार्ये प्रवृत्तिर्भवति । इदमेव च गुणवैषम्यं नाम । प्रलये तु नोक्तरीत्या तेषां गुणप्रधानभावेनावस्थानं किन्तु प्रधानतयैवातस्तेषामियं साम्यावस्थेति गीयते । अत एव प्रधानमिति संज्ञाऽपि तदैवेति । उदाहरिष्यमाणकारिकायां मूलप्रकृतिरित्यत्र मूलपदं प्रधानस्य केवलप्रकृतित्वोपपादकमित्याशयेन प्रधानस्य केवलप्रकृतित्वमुपपादयति **सा हि विश्वस्येत्यादिना** । **मूलान्तरमस्तीति** । अनवस्थाप्रसङ्गादिति भावः । **षोडशको गण इति** । षोडशसङ्ख्यापरिमितो गणः षोडशकः । विकृतिरेवेत्यनेन कारिकायां तुशब्दोऽवधारणार्थः । स च भिन्नक्रम इति सूचितमिति ज्ञातव्यम् । **स्थूलतेति** । प्रधानमहदहङ्कारादीनां हि स्थूलतातारतम्यमिन्द्रियग्राह्यतातारतम्यं चास्ति । अतस्तेषां तत्त्वान्तरत्वम् । नैवं गोघटादीनाम् । तेषां पृथिव्यादिभ्यस्तत्त्वान्तरत्वसाधकयोः स्थूलतेन्द्रियग्राह्यतातारतम्ययोरभावादित्यर्थः । **पञ्च च ते पञ्चतश्चेति** । पञ्चसङ्ख्याकाः पञ्चवर्गा इत्यर्थः । पञ्चदशतौ वर्गे वेत्युक्तत्वात् ।

वं०प०— विवक्षितमिति । पृथिव्यादीनां च भूतानां तदभावान्न प्रकृतित्वं किन्तु विकृतित्वमेवेति भावः । विभागस्थत्वं कथमत आह **तेनेति** । **उपलक्षितं** युक्तम् ।

कं०रा०— महदहङ्कारतन्मात्राणां प्रकृतिविकृतित्वं प्रकृत्यपेक्षया विकृतित्वेन प्रकृतिविकृतिकत्वेन वा न सम्भवतीत्यतः प्रकारान्तरेण तद्दर्शयति **प्रकृतय इति** । महदादीनां किमपेक्षया प्रकृतित्वं किमपेक्षया विकृतित्वमिति जिज्ञासायां तदुपपादयति **तथा हीत्यादिना** । **तत्त्वोपादानत्वमिति** । तथा च पृथिव्यादीनां तत्त्वान्तरोपादानत्वाभावेन प्रकृतित्वे सति विकृतित्वस्याभावान्महदाद्याः सप्तैव प्रकृतिविकृत इत्येतत्सिद्धमिति भावः । पुरुषस्यानुभयत्वमेव दर्शयति **न प्रकृतिर्नापि विकृतिरिति** ।

श्रीनिधि०— साम्यावस्थेति । कार्यानारम्भावस्थेत्यर्थः । **स्थूलेन्द्रियाग्राह्यताविशेषादिति** द्वन्द्वान्ते श्रूयमाणस्य तलः प्रत्येकं सम्बन्धः । स्थूलतेन्द्रियग्राह्यतयोः साम्यादित्यर्थः । **पञ्च च ते पञ्चतश्चेति** । पञ्चपञ्चशब्दः पञ्चविंशतिसङ्ख्येयपरः । त्वप्रत्ययेन तन्निष्ठा सङ्ख्योच्यते । स एव विभागो विभजनम् । पञ्चविंशतिसङ्ख्यापेक्षया बुद्धिजन्यत्वेनानित्यत्वात् न विशेषणत्वं सम्भवतीति भावेनाह **तेनोपलक्षितं तिष्ठतीति** ।

शे०वा०— प्रकृतिरेवेति । प्रकरोतीति व्युत्पत्त्या प्रकृतिशब्दोऽत्रोपादानपरः, विक्रियत इति व्युत्पत्त्या विकृतिशब्दश्च कार्यपरः, इति द्रष्टव्यम् । तत्र का पुनः प्रकृतिरेवेत्यत आह **सत्त्वेति** । **साम्यावस्थेति** । गुणप्रधानभावपरित्यागेन त्रयाणामपि प्रधानभावेनावस्थितिरित्यर्थः । 'कारणमस्य व्यक्तं प्रवर्तते

त्रिगुणतः समुदायाच्च' इत्यस्यां कारिकायां समुदायाच्चेत्यंशेन सृष्टिकाले सत्त्वादीनां समुदितानामेव महदादिभावेन प्रवृत्तेरभिधानात् । गुणानां समुदायस्य च गुणप्रधानभावमन्तरेणायोगात् । गुणप्रधानभावस्य च तद्वैषम्यं विनाऽयोगात् । वैषम्यस्य चोपमर्द्योपमर्दकभावादृतेऽसम्भवात् तद्भावस्य च 'अन्योन्याभिभवाश्रयजनन-मिथुनवृत्तयश्चे'ति कारिकायामन्योन्याभिभववृत्तयश्चेत्यंशेन सत्त्वादीनां त्रयाणां मध्येऽर्थवशादुद्भूतेन सत्त्वेन रजस्तमसी अभिभूय, रजसा च सत्त्वतमसी अभिभूय, तमसा च सत्त्वरजसी अभिभूय, स्वस्वव्यापारजननेन सिद्धत्वात्, सत्त्वादावुद्भूतं बलीयः प्रधानम्, अभिभूतं च तदनुगुणतया स्थितमङ्गमित्येवं गुणप्रधानभावेनैव सर्गकाले स्थितिः । प्रलये तु नैवं गुणप्रधानभावेनावस्थानं, किन्तु प्रधानतयैवेति भावेन साम्यावस्थेत्युक्तम् । अत एव प्रधानमिति संज्ञाऽपि तदैवेत्याशयेनोक्तं **प्रधानमिति** । कस्मादियं प्रकृतिरेवेत्यत आह **सा हीति** । अनेन मूलं चासौ प्रकृतिश्चेति मूलप्रकृतिरिति विग्रहः, प्रधानस्य केवलप्रकृतित्वमुपपादयितुं च मूलपदमि-त्युदाहरिष्यमाणकारिकांशयोजना सूचिता भवति । **न त्वस्या इति** । मूलान्तराभ्युपगमेऽनवस्थाप्रसङ्गात् । न चानवस्थायां प्रमाणमस्तीति भावः । कतमाः पुनः प्रकृतिविकृतयः कियन्त्यश्चेत्यपेक्षायामाह **महदह-ङ्कारेत्यादि** । ननु प्रकृतिविकृतित्वं विरुद्धं कथं महदादेरुच्यत इत्यतो व्यवस्थया विरोधं परिहरन् प्रकृतित्व-मुपपादयति **तथा हीति** । अथ का विकृतिः कियती चेत्यत आह **पञ्चेत्यादि** । **षोडशक इति** । षोडष-सङ्ख्यापरिमितो गणः षोडषक इत्यर्थः । षोडशकस्त्विति तुशब्दोऽवधारणार्थः । स च भिन्नक्रम इत्यभिप्रेत्याह **विकृतिरेवेति** । न प्रकृतिरपीत्यर्थः । **यद्यपीति** । तथा च प्रकृतिविकृतित्वान्न केवलं विकृतित्वमस्येति भावः । **स्थूलतेति** । प्रधानमहदादिभ्यो महदहङ्कारादीनां स्थूलतातारतम्यस्येन्द्रियग्राह्यतातारतम्यस्य च सत्त्वात् तेभ्यः तेषां तत्त्वान्तरत्वेऽपि पृथिव्यादीनां गोघटादीनां च स्थूलतेन्द्रियग्राह्यतयोः साम्येन तत्त्वान्तरत्वसाधक-त्वस्य स्थूलतातारतम्यस्य इन्द्रियग्राह्यतातारतम्यस्य चाभावेन तदपेक्षया तत्त्वान्तरत्वाभावान्न तदुपादानतया पृथिव्यादीनां प्रकृतित्वप्राप्तिरिति भावः । माऽस्तु गोघटादीनां पृथिव्यादिभ्यः तत्त्वान्तरत्वं तथाऽपि गोघटा-द्युपादानत्वमात्रेण पृथिव्यादीनां प्रकृतित्वं किन्न स्यादित्यत आह **तत्त्वोपादानत्वमिति** । तत्त्वान्तरोपादानत्व-मित्यर्थः । कः पुनरनुभयः किञ्च तस्यानुभयत्वमित्यत आह **पुरुषस्त्विति** । ननु सङ्क्षेपतस्तत्त्वस्य चातुर्विध्यं विस्तरतः पञ्चविंशतिप्रभेदत्वं साङ्ख्या मन्यन्त इत्येतत् कुतो विज्ञायत इत्यतस्तद्वाक्यादेवेति भावेन तत्पठति **यथोक्तमिति** । **पञ्चत इति** । अत्र टीकायां पञ्च च ते पञ्चतश्चेति पाठः । मूलपुस्तकेषु तथैव दर्शनात् । पञ्चपरिमाणमेषां वर्गाणामित्यस्मिन्विषये वर्गेऽभिधेये तप्रत्ययविधानेन पञ्चदित्येव, 'पञ्चद्दशतौ वर्गेवे'त्यनेन निपातितत्वात् । पञ्चतोऽत्र पञ्चद्वर्गाः । तेषां पञ्चत्वसङ्ख्यावैशिष्ट्ये पञ्चविंशतिसङ्ख्यालाभेन स्वरसाच्चेति द्रष्टव्यम् । पञ्च च ते पञ्च वेति तु क्वाचित्कः पाठः । तत्राद्यः पञ्चशब्दो द्वितीयपञ्चशब्दबोधितेषु पञ्चत्व-सङ्ख्याविशिष्टेषु समुदितेष्वानीयमानोऽपौनरुक्त्याय प्रत्येकमेवान्वेतीति पञ्चविंशतितासङ्ख्यालाभ इत्यवधेयम् । **स चासाविति** । पञ्चपञ्चत्वमिति यत् स चासौ विभागश्चेति विधेयविभागविशेषणत्वात् स इति पुल्लिङ्गमिति ध्येयम् ।

पञ्चविंशतिप्रभेदत्ववर्णनेनैवोक्तविरोधपरिहारात्, तदसङ्गत्यातत्वकथनमनर्थकमित्याशङ्क्य, प्रत्यक्षादि-प्रमाणविरोधपरिहारार्थं तदित्यभिप्रेत्य, तद्विरोधशङ्कोत्तरतया तद्योजयितुं पञ्चविंशतिप्रभेदोक्त्यसम्भवशङ्कामुत्था-पयति **नन्विति** । **उभयेति** । चेतनाचेतनरूपोभयेत्यर्थः ।

वा०र०— मूलप्रकृतिविकृतिरित्येतत्कारिकारूपभामत्यनुसारेण प्रवृत्तमूलम् । तत्र तदनुसारेणोपयुक्तमर्थं दर्शयति **प्रकरोतीति व्युत्पत्त्येत्यादि** । प्रकरोतीति प्रकृतिः प्रधानमित्येतद्भामत्युपलक्षणमिति मत्वाह **विक्रियत इतीति** । **तत्रेति** मूलाशयस्य तत्र केति टीकायामुपादानात् सत्त्वेत्येव प्रतीकमुपात्तमिति न दोषः । साङ्ग्य-कारिकायाः टीकान्तरमाश्रित्यापि मध्येमध्येऽधिकव्युत्पादनम् । उदाहरिष्यमाणसमुदायाच्चेति कारिकांशलब्धार्थ-विपरीत एव साम्यावस्थाशब्देन प्रतिपाद्योऽर्थ इत्याशयेन तमाह **गुणप्रधानभावेति** । कुतो गुणप्रधान-भावपरित्यागेन त्रयाणां प्राधान्येनावस्थानं साम्यावस्थेत्यतः सर्गादौ विषमावस्थानामेव गुणानां कार्यप्रवर्तकतया प्रधानभावेन व्यवहारकाले न तेषां विषमावस्था । प्रलये तेषां गुणप्रधानभावापन्नानां अभावादित्यादिप्रमेयस्य परकीयकारिकातद्व्याख्यानयोः सङ्गहेण प्रतिपादितस्य सङ्गहेण प्रतिपादनं कर्तुं तत्कारिकांशं उपादाय तद्व्या-ख्यानोक्तरीत्या तत्तल्लब्धमाह **कारणमस्त्यव्यक्तमित्यादिना प्रधानमित्यन्तेन** । टीकान्तरे च मध्येऽनुसृतम् । **तद्भावस्य चेति** । उपमर्दोपमर्दकभावस्य चेत्यर्थः । इत्यंशेन सिद्धत्वात् इत्युत्तरेण सम्बन्धः । **अन्योन्या-ऽभिभवेति** । कारिकायां अन्योन्याऽभिभववृत्तयः । **अन्योन्याश्रयवृत्तयः** अन्योन्यजननवृत्तयः । अन्योन्य-मिथुनवृत्तयः । इत्येवं सम्बन्धानाश्रित्य योजनानां कारणात् प्रकृतोपयोग्यर्थस्य च प्रथमसम्बन्धाश्रयणेन व्याख्यानलभ्यत्वात् आह **अन्योन्याभिभववृत्तयश्चेत्यंशेन इति** । अत्र चशब्दानुवादः । कारिकानुसारात् । व्याख्येयतयोपयोगाभावात् । **रजसा चेति** । अर्थवशात् । **उद्भूतेनेति** । एवं तमसा चेत्यत्रापि । **व्यापार-जननेनेति** । तत्प्रतिपादनेनेत्यर्थः । अंशेन उक्तविधव्यापारजननप्रतिपादनेन उपमर्दोपमर्दकभावस्य तदंशेन सिद्धत्वादित्यर्थः । उक्तकारिकाव्याख्यानलब्धं प्रमेयविशेषं स्पष्टयन् प्रकृतमुपसंहरति **अत एवेति** । सर्गादौ गुणप्रधानभावेनावस्थितगुणानां साम्यावस्थाया अयोगेन साम्यावस्थारूपप्रकृतेः । सर्गादावसत्त्वादेव प्रलयमात्र-काले प्रधानतयैवावस्थितगुणानामेव प्रधानमिति नामेत्यर्थः । **उदाहरिष्यमाणेति** । मूलप्रकृतिरविकृति-रित्यादिरूपेण मूले उदाहरिष्यमाणेत्यर्थः । **अथ का विकृतिरिति** । विकृतिरेवेत्यर्थः । तथैव भामतीपाठात् प्राचीनमूले तथैव विधानकथनात् षोडशसङ्ख्यापरिगणित इत्येवार्थः । **तुशब्द इति** । कारिकागत इति शेषः । एतच्च षोडशकत्वमिति पाठानुसारेण षोडशकाच्च इति चशब्दयुक्तपाठे तु चशब्दोऽवधारणार्थः इति योज्यम् । उदाहरिष्यमाणकारिकायोजनत्वस्य टीकायां प्रागेवोक्तत्वात् । **प्रधानं महदादिभ्य इति** । प्रधानापेक्षया महतः महदपेक्षया अहङ्कारस्य इत्येवंप्रकारेणेत्यर्थः । **तत्त्वान्तरेति** । भामत्यनुसारेण व्याचष्टे **तत्त्वान्तरेति** । **पञ्च-दशतौ वर्गे वेत्यनेनेति** । सूत्रविचारस्तु प्रपञ्चो यदीति श्रुतिविचारावसरे प्रकृत्यधिकरणे टीकायां तद्व्याख्याने चास्मदीयेऽवधेयः । ननु न पञ्चशब्दो वर्गवाची किन्तु पञ्चत्वसङ्ख्याविशिष्टवाची न डतिप्रत्ययप्रसङ्गः इति पञ्च इत्येव स्यात् । इत्यतो न तथात्वं द्वितीयं पञ्चशब्दस्याश्रयितुं युक्तम् । तथा सति पञ्चविंशन्तिसङ्ख्या-

लाभायोगप्रसङ्गात् । किन्तु वर्गाभिधायित्वमेव । वर्गाणां च पञ्चत्वोक्तौ पञ्चत्वविंशतिसङ्ख्यालाभोऽतिसुलभ एव इत्याशयेनाह **पञ्चतोऽत्रेति** । पञ्च च ते पञ्च चेति तु क्वाचित्कः पाठ इति पाठः । पञ्चतेति तकारो लेखकागतः । मूलकोशेऽभावात् अयुक्तत्वाच्चेति ज्ञेयम् । **अपौनरुक्त्यायेति** । तथा चात्र पञ्चविंशतिसङ्ख्यालाभः अन्यथानुपपत्त्येति स्वारस्यस्याभाव इत्युक्तं भवति । **विधेयविभागेति** । 'शैत्यं हि यत् सा प्रकृतिः जलस्ये'त्यादाविवेति भावः । उद्दिश्यमानप्रतिनिर्दिश्यमानयोः ऐक्यं आपादयति । सर्वनामानि क्रमेण तल्लिङ्ग-भाञ्जि भवन्ति इति कैयटेन 'अयं गौरि'त्यत्र कः शब्दः किं यत् सास्नालाङ्गूलककूदखुरविषाणार्थरूपं स शब्दः इत्येतद्भाष्यव्याख्यानावसरे उक्तत्वात्, कस्मै च कार्यायानूद्य मानभूतपञ्चपञ्चत्वस्य प्रतिपाद्यर्थप्रतिपादकविभाग-पदेन ऐक्यमापादयतोः यच्छब्दयोः क्रमेण पञ्चपञ्चत्वविभागलिङ्गत्वप्राप्त्या यच्छब्दस्योद्दिश्यमानपञ्चपञ्चत्व-लिङ्गत्वं तच्छब्दस्य च प्रतिनिर्दिश्यमानविभागपदलिङ्गत्वमिति सिद्धेरिति भावः । अत एव 'तद्गुणोतताम् । स एव ब्रह्मशब्दार्थ' इत्येतद्व्युत्पादनावसरे वाक्यार्थचन्द्रिकायां एतत् कैयटवाक्यमेवानुसृत्य उपपादनं कृतम् । तच्च तत्रैव अस्माभिः विशदीकृतमिति बोध्यम् ।

स०व्र०— मूलान्तरमस्तीति । अन्यथा अनवस्थानात् । न चानवस्थायां प्रमाणमस्तीति भावः । ननु षोडशकस्य गणस्य विकृतित्वमेवानुपपन्नम् । तस्यापि गोघटादिस्वकार्यं प्रति प्रकृतित्वस्यापि सत्त्वात् । तथा च सोऽपि गणः प्रकृतिविकृतिश्चेति पृथक् विभागोऽनुपपन्न इत्यभिप्रेत्य शङ्कते **यद्यपीति** । तथापि तत्त्वान्तरं प्रत्युपादानत्वस्य प्रकृतिशब्दार्थत्वेन विवक्षितत्वात् प्रकृतित्वं नास्तीत्यभिप्रेत्य समाधत्ते **तथापीति** । गवादयः साक्षाद्विकारभूताः बीजादयः परम्परया तद्विकारभूताः पृथिव्यादिभ्यः तत्त्वान्तरं न भवन्तीत्यर्थः । कुतः पृथिव्यादेः सकाशात् तेषां तत्त्वान्तरत्वं नास्तीत्यत आह **स्थूलतेति** । स्थूलत्वेन्द्रियग्राह्यत्वाभ्यां साम्यात् । अत्र स्थूलत्वम् ऐन्द्रियकत्वोपयुक्तं विवक्षितम् । तथा चेत्थमनुमानं फलितम् । गवादयः क्षीरादयो वा न पृथिव्यादिभ्यः तत्त्वान्तरम् । तदुपादेयत्वे सति इन्द्रियग्राह्यताप्रयोजकस्थौल्यतौल्यवत्त्वात् । व्यति-रेकेणाहङ्कारवदिति । **यथोक्तमिति** । तदर्थस्तु मूलप्रकृतिरविकृतिरेव । महदाद्याः सप्त प्रकृतिविकृतयः । षोडशकश्च गणः विकारः विकृतिरेव । पुरुषः न प्रकृतिः न विकृतिरिति । **पञ्च च ते पञ्च चेति** । द्वितीय-पञ्चशब्दः प्रथमपञ्चशब्देन बोधितेषु पञ्चत्वसङ्ख्याविशिष्टेषु समुदितेषु अन्वीयमानः पौनरुक्त्यान्यथानुपपत्त्या प्रत्येकमन्वेतीति पञ्चविंशतिलाभ इति रहस्यम् । अत एव क्वचित्पुस्तके 'पञ्च च ते पञ्चतश्च' इति पाठः । तत्र च न काप्यनुपपत्तिरिति । **स चासाविति** । पञ्चपञ्चत्वमिति यत् स चासौ विभागश्चेति विधेयविशेषणत्वान्न लिङ्गव्यत्यासदोषः ।

नन्विति । एवमुक्तप्रकारेण तत्त्वस्य पञ्चविंशतित्वे प्रत्यक्षादिप्रमाणसिद्धं असङ्ख्यातत्वं कथं वदन्तीति शङ्काभिप्रायः । **उभयपरामर्श इति** । चेतनाचेतनोभयपरामर्श इत्यर्थः । अपि (इति) यद्यपि उपाधिक्रोडीकारेण प्रकृतित्वविकृतित्वप्रकृतिविकृतित्वोभयत्वलक्षणोपाधीन् क्रोडीकृत्य सम्मेलीकृत्य पञ्चविंशतिभेदं वदन्ति । तथापि

अवान्तरभेदेन चेतनाचेतनयोः परस्परं भेदेन असङ्ख्यातत्वमप्याहुः । तत्त्वद्वयस्य प्रत्यक्षादिप्रमाणसिद्ध-मसङ्ख्यातत्वमप्यङ्गीकुर्वन्तीति भावः ।

विठ्ठल०— साम्यावस्थेति । सृष्टिकाले सत्त्वादीनां मध्ये यदुद्भूतं तदप्रधानं एवमेतेषां त्रिगुणानां गुणप्रधानभावरूपवैषम्ये महदादिकार्यप्रवृत्तिर्भवति । प्रलये त्रयाणामपि । प्रधानस्य प्रकृतित्वं नाम सर्वकारण-त्वम् । प्रकर्षेण करोतीति व्युत्पत्त्येत्याशयेनोपपादयति **सा हीति** । एवकारार्थमाह **न त्वस्येति** । **षोडशक इति** । षोडशसङ्ख्यापरिमितिगुण इत्यर्थः । **स्थूलतेति** । महदहङ्कारादीनां उत्तरोत्तरकार्यस्य स्थूलताधिक्यं इन्द्रियग्राह्यताधिक्यं च अतस्तेषां भिन्नत्वं च । न चैवं गोघटादीनां पृथिव्याद्यपेक्षया स्थूलताधिक्यम् । अतो न तत्त्वान्तरेति भावः । ननूपादानत्वं खलु प्रकृतिशब्दार्थः । तच्च 'पृथिवी नो वृक्षादिषु वर्तत एवे'ति कथं प्रकृतित्वाभाव इत्यत आह **तत्त्वोपादानत्वमिति** । कारिकायाम् । न मूलप्रकृतिरविकृतिः किन्तु प्रकृतिरेवे-त्यर्थः । विकार इत्यस्य विकृतिरेवेत्यर्थः । पञ्चत्वसङ्ख्यावद्वर्गपञ्चकत्वेन स्थितत्वेन सर्वदा तत्त्वानां प्रलये अभावादित्यत उक्तं **तेनोपलक्षितं तिष्ठतीति** । जननमरणेति कारिकायां अयमर्थः । अपूर्वदेहाद्यभिसम्बन्धो जन्म तत्त्यागो मरणं कारणानीन्द्रियाणि तेषां प्रति नियमात् पृथक्पृथक् व्यवस्थितत्वात् पूर्वपुरुषानेकत्वे एकैकदेहाद्यभिसम्बन्धत्यागाभ्यां सर्वैः सर्वेषां जननमरणे स्याताम् । एकेन चक्षुरादिनैव सर्वेऽपि रूपादि-कमपरोक्षतः पश्येयुः । एकस्मिन्नन्धादौ सर्वेऽप्यन्धादयो भवेयुः । न चैवं दृश्यते अतः पुरुषाणां बहुत्वं सिद्धं किञ्चैकस्मिन् पुरुषे एकत्र शरीरे प्रयतमाने स एव सर्वशरीरे प्रयते ततश्च सर्वशरीरेषु युगपज्जलाहरणादिप्रवृत्तिः स्यात् । अपि च त्रयो गुणास्त्रैगुण्यं तत्पुरुषेषु विपर्ययो दृश्यते । केचित्सत्त्वबहुलाः यथोर्ध्वरेतसः रजोबहुलाः मनुष्याः तमोबहुलाः तिर्यगादयः । पुरुषैक्ये सोऽयं विपर्ययो न स्यात् । अतो युगपत्प्रवृत्तेः त्रैगुण्यविपर्ययाच्च पुरुषबहुत्वं सिद्धमेवेति ।

चषकः— प्रकृतिः तत्त्वान्तरं प्रत्युपादानकारणम् । **विकृतिः** कार्यप्रत्ययस्य कर्मसाधनत्वात् । **षोडषक इति** । षोडशसङ्ख्योपेतः तत्सङ्ख्यापरिमितो वा इत्यर्थापयन्ति ।

॥ इति तन्मतोक्तस्य तत्त्वविभागान्तरस्य विरोधाभावदर्शनम् ॥

* * *

॥ अथ तत्र चेतनाचेतनयोर्मध्ये भेदाभेदयोर्व्यवस्था ॥

१४ सु०— चेतनानामचेतनानां च प्रत्येकमसङ्ख्यातत्वसाम्येऽपि नोभयोर्भिन्नत्वेन साम्यम्, किं तर्हीत्यत आह भिन्नमिति ।

अनु०— भिन्नमन्यद्भिदोज्झितम् ।

चेतनमिति शेषः । चेतनं परस्परतो भिन्नम् आहुः । यथोक्तम्, 'जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैवे'ति ॥ अन्यत् चेतनात्; अचेतनं भिदोज्झितम् आहुः ।

परि०— भिन्नत्वेनेति । स्वान्तर्गतभेदवत्त्वेनेत्यर्थः । **जननमरणेति** । देहेन्द्रियादियोग-त्यागरूपजन्ममरणयोः चक्षुरादिकरणानां च प्रतिनियमात् प्रत्येकं व्यवस्थितत्वात् पुरुषबहुत्वं सिद्धमेवेति साध्येनान्वयः । पुरुषैक्ये हि एकस्मिञ्जाते मृते अन्धादौ च सति सर्वेऽपि तथा स्युरिति भावः । **अयुगपत्प्रवृत्तेश्च** । सर्वपुरुषाणां युगपत्प्रवृत्त्यसम्भवाच्चेत्यर्थः । पुरुषैक्ये ह्येकत्र शरीरे पुरुषप्रयत्नेन चेष्टायां सर्वदेहेष्वपि चेष्टा स्यादेवेति भावः । **त्रैगुण्येति** । सत्त्वादित्रिगुणा एव त्रैगुण्यं तस्य विपर्ययाद्व्यत्यासाच्च । केचित्सत्त्वप्रधानाः महात्मानः, केचिद्रजःप्रधाना मनुष्याः, केचि-त्तमोगुणकाः पश्वादयः । पुरुषैक्ये तु तन्न स्यात् । अतश्च पुरुषबाहुल्यमित्यर्थः ।

गु०दी०— त्रैगुण्यविपर्ययाच्चैव इत्यत्र त्रैगुण्यविपर्ययो नाम क्वचित्सत्त्वगुणप्रचुरत्वं क्वचिद्रजो-गुणप्रचुरत्वं क्वचित्तमोगुणप्रचुरत्वमित्यादि ।

यादु०— जन्ममरणकरणानामिति कारिकायाश्चायमर्थः । पुरुषबहुत्वं सिद्धं कस्माज्जन्ममरणकरणानां प्रतिनियमात् । निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियाहङ्कारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म, न तु पुरुषस्य परिणामः । तस्यापरिणामित्वात् । तेषामेव च देहादीनामुपात्तानां परित्यागो मरणम् । न त्वात्मनो विनाशः तस्य कूटस्थनित्यत्वात् । करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकरणानां प्रतिनियमो व्यवस्था । सा खल्वियं सर्वशरीरेष्वेकस्मिन्पुरुषे नोपपद्यते । तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेरन् । अन्धादौ चैकस्मिन्सर्व एवान्धादयो, विचित्ते त्वेकस्मिन्सर्व एव विचित्ताः स्युरित्यव्यवस्था । प्रतिक्षेत्रं तु पुरुषभेदे भवति व्यवस्थेति । न चैकस्यापि पुरुषस्य देहोपधानभेदात् व्यवस्थेति युक्तम् । पाणिस्तनाद्युपधानभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात् । न हि पाणौ वृक्ण जाते वा स्तनादौ च महत्यवयवे युवतिर्जाता वा मृता वा भवति । इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह **अयुगपत्प्रवृत्तेश्चेति** । प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी तथाऽपि पुरुषे उपचर्यते । तथा तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत । ततश्च सर्वाण्येव शरीराणि युगपच्चलेयुः । नानात्वे तु नायं दोष इति । इतश्च पुरुषभेद इत्याह **त्रैगुण्यविपर्यया-च्चेति** । एवकारो भिन्नक्रमः । सिद्धमित्यस्यानन्तरं द्रष्टव्यः । सिद्धमेव नासिद्धम् । त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययः अन्यथात्वम् । केचित्खलु सत्त्वनिकायाः सत्त्वबहुला यथोर्ध्वरेतसः । केजिद्रजोबहुला यथा

मनुष्याः । केचित्तमोबहुला यथा तिर्यग्योनयः । सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावस्तेषु सत्त्वादिनिकायेषु न भवेद्यद्येकः पुरुषः स्यात् । भेदे त्वयमदोष इति ।

वं०प०— भिन्नत्वेनेति । चेतनाचेतनयोः स्वस्वावान्तरप्रभेदैः परस्परं भिन्नत्वेनेत्यर्थः ।

कं०रा०— जननमरणेति कस्यचित्पुरुषस्य कदाचिज्जननमेव न तु मरणम् । कस्यचित्कदाचिन्मरणमेव न तु जननं, इदं करणं देवदत्तीयमेव न तु यज्ञदत्तीयं, इदं तु करणं तु यज्ञदत्तीयमेव न तु देवदत्तीयमिति जननमरणकरणानां व्यवस्थितत्वात् पुरुषाणां युगपत्प्रवृत्त्यभावाच्च कश्चित्पुरुषः सात्विकः कश्चिद्राजसः कश्चित्तामस इति त्रैगुण्यव्यवस्थायाः सत्त्वाच्च पुरुषाणां चेतनानां बहुत्वे भिन्नत्वं सिद्धमित्यर्थः ।

श्रीनिधि०— प्रतिनियमात् व्यवस्थायाः । अस्यैव जननं नान्यस्य अस्यैव मरणं नान्यस्येति । **अयुगपत्प्रवृत्तेः** युगपत्प्रवृत्त्यभावात् । यथा कश्चित्प्रवर्तते कश्चिन्निवर्तत इति । **त्रैगुण्यविपर्ययादिति** । **त्रैगुण्यं** त्रिगुणकार्यं सुखादि । तस्य **विपर्ययः** व्यत्ययः । यथा कस्यचित् सुखं कस्यचित् दुःखं न सुखं कस्यचित् राग इत्यादि ।

शे०वा०— यथोक्तमिति । अयमर्थः । पुरुषबहुत्वं सिद्धम् । कस्मात् जन्ममरणकरणानां प्रति नियमादिति निकायनिविष्टाभिरपूर्वाभिर्देहेन्द्रियबुद्धिवेदनाभिः प्रतिपुरुषस्याभिसम्बन्धो जन्म, न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात् । तेषामेव च देहादीनामुपात्तानां त्यागो मरणं, न त्वात्मनो विनाशः । तस्य कूटस्थनित्यत्वात् । करणानि तु बुद्ध्यादीनि त्रयोदश । तेषां जन्ममरणकरणानां प्रति नियमो व्यवस्था । सा खल्वियं सर्वशरीरेष्वेकस्मिन्पुरुषे नोपपद्यते । तदा खल्वेकस्मिञ्जायमाने सर्व एव जायेरन् म्रियमाणे च म्रियेरन् । अन्धादौ चैकस्मिन्सर्व एवान्धादयो विचित्ते चैकस्मिन्सर्व एव विचित्ताः स्युरित्यव्यवस्थाप्रसङ्गात् । प्रतिक्षेत्रं पुरुषभेदे च भवति व्यवस्थेति । न चैकस्यापि पुरुषस्य देहोपधानभेदाद्व्यवस्थेति युक्तम् । पाणिस्तनाद्युपधानभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात् । न हि पाणौ वृक्णे, जाते वा स्तनादौ महत्यवयवे, युवतिर्जाता मृता वा भवतीति । इतश्च प्रतिक्षेत्रं पुरुषभेद इत्युच्यते । **अयुगपत्प्रवृत्तेश्चेति** । प्रवृत्तिश्च प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी तथाऽपि पुरुष उपचर्यते । तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत । ततश्च सर्वाण्यपि शरीराणि युगपच्चालयेत् । नानात्वे तु नायं दोषः । इतश्च पुरुषभेद इत्याह **त्रैगुण्यविपर्ययाच्चैवेति** । एवकारो भिन्नक्रमः । सिद्धमित्यस्यानन्तरं द्रष्टव्यः । त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः । केचित्खलु सत्त्वनिकायाः सत्त्वबहुला यथोर्ध्वरेतसः । केचिद्रजोबहुला यथा मनुष्याः । केचित्तमोबहुला यथा तिर्यग्योनयः । सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावः । तेषु सत्त्वादिनिकायेषु न भवेद्यद्येकः पुरुषः स्याद्भेदे त्वयं न दोष इति ।

वा०र०— भामत्यनुसारेणार्थमाह **अयमर्थः पुरुषबहुत्वमित्यादि** । देहेन्द्रियमनोऽहङ्कारबुद्धीति भामतिवेदनाभिः पुरुषस्येति पाठः । **एकस्मिन्पुरुष इति** । एक एव पुरुषः । सर्वशरीरेष्विति पक्ष इत्यर्थः ।

म्रियमाणे चेति । एकस्मिन्निति वर्तते । **देहाद्युपाध्यधीनभेदादिति** । पाणिस्तनाद्युपाधिभेदेनापीति च भामती । **न हि पाणाविति** । पाणौ स्तनादौ महति अवयवे च जाते चेति सम्बन्धः । यथायोग्यं वृक्ण-महत्यवयवोः जातत्वमृतत्वाभ्यां सम्बन्धो न यथाक्रममिति द्रष्टव्यम् । युगपच्चालयेत् इति भामत्यनुसारेण अचालयेत् इति पाठः । **सिद्धमित्यस्यानन्तरमिति** । सिद्धमेव न सिद्धमिति तदर्थ इति भावः । ऊर्ध्वस्रोतसः इति पाठः । **न दोषः** इत्यत्रत्येतिशब्दस्येत्ययमर्थः इति पूर्वेण सम्बन्धः ।

स०व्र०— जननमरणकरणानाम् इत्यस्यायमर्थः । पुरुषबहुत्वं सिद्धम् । कस्मात् । **जनन-मरणकरणानां प्रतिनियमादिति** । निकायनिविष्टाभिरपूर्वाभिर्देहेन्द्रियबुद्धिवेदनाभिः प्रतिपुरुषस्याभिसम्बन्धो जन्म न तु पुरुषपरिणामः । तस्यापरिणामित्वात् । तेषामेव च देहादीनामुपात्तानां त्यागो मरणम् । न त्वात्मनो विनाशः । तस्य कूटस्थनित्यत्वात् । करणानि तु बुद्ध्यादीनि त्रयोदश । तेषां जन्ममरणकरणानां प्रति-नियमो व्यवस्था । सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते । तदा खलु एकस्मिन् जायमाने सर्व एव जायेरन् । म्रियमाणे च म्रियेरन्, अन्धादौ चैकस्मिन् सर्व एवान्धादयो, विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युरित्यव्यवस्थाप्रसङ्गात् । प्रतिक्षेत्रं तु पुरुषभेदे च भवति व्यवस्थेति । न चैकस्यापि पुरुषस्य देहोपधान-भेदात् व्यवस्थेति युक्तम् । पाणिस्तनाद्युपधानभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात् । न हि पाणौ वृक्णे जाते वा स्तनादौ महत्यवयवे युवतिर्जाता वा मृता वा भवतीति ।

इतश्च प्रतिक्षेत्रं पुरुषभेद इत्युच्यते **अयुगपत्प्रवृत्तेश्चेति** । प्रवृतिश्च प्रयत्नलक्षणा यद्यप्यन्तःकरण-वर्तिनी तथाऽपि पुरुष उपचर्यते । तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेषु एक इति सर्वत्र प्रयतेत । ततश्च सर्वाण्यपि शरीराणि युगपच्चालयेत् । नानात्वे तु नायं दोषः ॥ इतश्च पुरुषभेद इत्याह **त्रैगुण्यविपर्ययाच्चैवेति** । एवकारो भिन्नक्रमः । सिद्धमित्यस्यानन्तरं द्रष्टव्यः । सिद्धमेव नासिद्धम् । त्रयो गुणाः त्रैगुण्यम्, तस्य विपर्ययः अन्यथाभावः । केचित्खलु सत्त्वनिकायाः सत्त्वबहुला यथोर्ध्वरेतसः । केचिद्रजो-बहुला यथा मनुष्याः केचित्तमोबहुला यथा तिर्यग्योनयः । सोऽयमीदृशः त्रैगुण्यविपर्ययः अन्यथाभावः तेषु सत्त्वादिनिकायेषु न भवेत् यदि एकः पुरुषः स्यात् । भेदे त्वयं न दोषः । इति ।

चषकः— यथोक्तमिति । देहिन्द्रियादियोगत्यागरूपजन्ममृत्योश्चक्षुरादिकरणानां च प्रतिनियमात् प्रत्येकं व्यवस्थितत्वात् पुरुषबहुत्वं सिद्धमिति योजना । पुरुषैक्ये सति एकस्मिन् जातेऽन्धादौ च सति सर्वेऽपि तथा प्रसज्येरन्निति भावः । तत्रैव हेत्वन्तरबोधकं द्वितीयहेतुविभक्त्यन्तं सर्वपुरुषाणां युगपत्प्रवृत्त्य-भावार्थकम् । एकत्र शरीरे प्रयत्नेन चेष्टायां सर्वत्रापि तस्मिन् तदापत्त्या नाप्रयोजकताशङ्कावकाशः । तृतीय-मपि तादृगेव । स्वार्थे ष्यञ् । सत्त्वादिगुणत्रिकव्यत्ययाच्च तद्बहुत्वमुपेयमन्यथा केचित्सत्त्वप्रधानाः महात्मानः केचिद्रजःप्रधानाः मानुषास्तमःप्रधानाः पश्वादयः तद्भेदो न स्यादित्यर्थः ।

॥ इति चेतनाचेतनयोर्मध्ये भेदाभेदयोर्व्यवस्था ॥

* * *

॥ अथ तत्र उक्तार्थस्य विवरणम् ॥
॥ अथ तत्रादौ अचेतनस्य स्वातन्त्र्येण कर्तृत्वम् ॥

१५ **सु०—** नन्वीश्वरानभ्युपगमे कस्यापि प्रवृत्त्यनुपपत्तेः, सर्गाद्यसम्भवादीश्वराख्यं तृतीयं तत्त्वमङ्गीकरणीयम्, तत्कथं नाङ्गीकुर्वन्तीत्यत आह **अचेतनस्येति** ।

अनु०— अचेतनस्य कर्तृत्वं स्वातन्त्र्येण निगद्यते ।

निगद्यते साङ्ख्यैरिति शेषः । तथा हि "चेतनः सङ्घातपरार्थत्वादिहेतुसिद्धः । अचेतनं च व्यक्तं प्रत्यक्षादिसिद्धम्, अव्यक्तं च कारणकार्यविभागादिहेतुसिद्धम् । न चैवमनन्यथासिद्धमीश्वरे प्रमाणमस्ति, अचेतनस्यैव प्रधानस्य कर्तृत्वेन सर्गाद्युपपत्तेरदृष्टेश्वरकल्पनानुपपत्तेः" इति मन्यन्त इति ।

नन्वचेतनं चेतनानधिष्ठितं क्वापि न प्रवृत्तिमदुपलब्धम्, ततः प्रधानस्याधिष्ठात्रेश्वरेण भाव्यमित्यत उक्तं स्वातन्त्र्येणेति । चेतनाधिष्ठानेन विनेत्यर्थः । त(य)थोक्तम्, 'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषस्य विमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्ये'ति ।

परि०— इत्यत आहेति । रचनेतिसूत्रव्यावर्त्यमाहेति योज्यम् । **सङ्घातपरार्थत्वादीति** । यथा शयनासनादिकं देहार्थमेवं महदहङ्कारादिसङ्घातरूपो देहादिरपि परार्थ एवेति सङ्घातस्य यत्परार्थत्वमस्ति तेन हेतुना परः कश्चन सिद्धः । स एव चेतनः । तथा सुखदुःखादेरधिष्ठात्रा भाव्यम् । रथादिवद्योऽधिष्ठाता स चेतन इति । सुखदुःखादेरनुकूलवेदनीयत्वदृश्यत्वादिरादिपदार्थः । तेनानुकूलवेदितुरङ्गीकार्यत्वात् दृश्यत्वस्य द्रष्ट्रविनाभावात् तेन द्रष्टुरुपेयत्वात् । **व्यक्तमिति** । योग्यरूपमचेतनमित्यर्थः । **अव्यक्तं चेति** । अयोग्यरूपमचेतनमित्यर्थः । **कारणकार्येति** । एतच्चाग्रे स्वयमेव विवरिष्यते । **कर्तृत्वेनेति** । स्वतः परिणामादिरूपप्रवृत्तिमत्त्वेनेत्यर्थः ।

गु०दी०— चेतनः सङ्घातपरार्थत्वादिहेतुसिद्ध इत्यत्र **सङ्घातस्य** पञ्चमहाभूतात्मकदेहस्य परार्थत्वमन्यस्य सुखदुःखसंसारादिहेतुत्वमित्यर्थः । **अव्यक्तं च कारणकार्यविभागादिहेतुसिद्धम्** इत्यत्र कार्यं घटादिकिञ्चित्कारणादुत्पन्नमिति परम्परया महत्तत्त्वाख्यकार्यमपि किञ्चित्कारणादुत्पन्नम् । तच्च कारणमनवस्थाभिया अनुत्पन्नमेवेत्यव्यक्तसिद्धिरिति भावः ।

यादु०— सङ्घातपरार्थत्वादीति । अव्यक्तमहदहङ्कारादयः सुखदुःखमोहात्मकतया तावत्सर्वे सङ्घाताः । तथा चाव्यक्तमहदहङ्कारादयः परार्थाः सङ्घातत्वाच्छयनासनाभ्यङ्गवदित्यनुमानेन तेषां परार्थत्वे सिद्धे, यः परः सिद्ध्यति स एव चेतन इत्यर्थः । स्यादेतत् । शयनासनादयः सङ्घातशरीराद्यर्था दृष्टा न त्वात्मानं प्रति परार्थाः । तद्वत्पक्षीकृता अपि सङ्घातान्तरमेव परं गमयेयुर्न त्वसङ्घातमात्मानमिति चेन्मैवम् । सङ्घातान्तरार्थत्वे हि तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थेन भवितव्यं तेनापीत्यनवस्थापत्तेः । तस्मादनवस्थाभियाऽयं परोऽसङ्घात एव सिद्ध्यति । स एवात्मेति । आदिपदेन यद्यत्सुखदुःखमोहात्मकं तत्परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः । सुखदुःखमोहात्मकं चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मा । सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते । तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिद्भवितव्यम् । न चानुकूलनीयाः प्रतिकूलनीयाः वा बुद्ध्यादयस्तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात् । तस्माद्योऽसुखाद्यात्माऽनुकूलनीयः प्रतिकूलनीयो वा स एवात्मा । बुद्ध्यादयस्तावद् दृश्याः । न च द्रष्टारमन्तरेण तेषां दृश्यता युक्ता तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्त आत्मेत्यादितदीयहेतूनां सङ्ग्रहः । **कार्यकारणविभागादीति** । कार्यकारणविभागादिहेतूंश्चाग्रे स्वयमेव दर्शयिष्यति ।

वं०प०— ननु सर्गादिकर्तृत्वान्यथाऽनुपपत्त्या ईश्वरसिद्धेः कथमनन्यथासिद्धेश्वरसाधकप्रमाणाभाव इत्यत आह **अचेतनस्यैवेति** । **अनधिष्ठितम्** अप्रेरितम् ।

कं०रा०— अव्यक्तं चेति । कार्यस्य हि सर्वतत्सरूपात्कारणविशेषाद्विभागः तस्मिन्नेव विभागश्च दृश्यते । यथा घटमकुटादेः कार्यस्य तत्स्वरूपान्मृत्सुवर्णादिः कारणाद्विभागस्तस्मिन्नेव चाविभागस्तथा जगतस्तत्सरूपात्प्रधानादुत्पत्तिस्तस्मिन्नेव लयश्च वाच्य इत्यादिहेतुरव्यक्तं च सिद्धमित्यर्थः । **अज्ञस्येति** । अचेतनस्येत्यर्थः ।

श्रीनिधि०— सङ्घातपरार्थत्वादिति । सङ्घातपरार्थत्वे यो हेतुः करणत्वादिरित्यर्थः । एवं पञ्च इन्द्रियसमूहः परार्थक्रियाहेतुः करणत्वात् कुठारवत् व्यतिरेकेण रूपादिवद्वा । तथा च यदर्थक्रिया हेतुः स आत्मेति । यद्वा सङ्घात इन्द्रियसमूहः तस्य परार्थत्वाहेतुना । तथा हि । इन्द्रियसङ्घातेन कश्चिदुपक्रियते । तस्य परार्थत्वादिति । व्यधिकरणस्यापि गमकत्वात् । यत्स्वहेतुनोपक्रियते **स आत्मेति** । **आदि**पदेन शरीरस्य पारार्थ्यं गृह्यते । **यथा प्रवृत्तिः** स्तनान्निस्सरणार्था प्रवृत्तिः । **अज्ञस्य** चेतनस्य । गुरुत्वान्तरकार्यस्यावहतिभेदस्य इति कार्यकारणयोः भेदकरणे गुरुत्वमन्यत् कार्ये च गुरुत्वमन्यत् । एवं च कार्यगतगुरुत्वान्तरेण भाव्यवहतिभेदेन भाव्यम् । तुलायां अङ्गुलीयके आरोपिते पूर्वापेक्षयापि हि न देशसम्बन्धादित्यर्थः । **न च तदस्तीति** । ... ।

शे०वा०— अचेतनस्य स्वातन्त्र्याङ्गीकारानुवादवैय्यर्थ्यमाशङ्क्य तदीयेश्वरानभ्युपगमोपपादनार्थत्वान्न तदिति भावेन तदुपपादकतयोत्तरवाक्यं योजयितुं तदीयेश्वरानभ्युपगमानुपपत्तिशङ्कामुत्थापयति **नन्विति** ।

कथमनेनेश्वरस्यानभ्युपगमनीयत्वसिद्धिरित्यतोऽभिप्रायमाह **तथा हीति** । **सङ्घातेति** । 'सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्त्रभावात् कैवल्यार्थं प्रवृत्तेश्चे'ति सङ्गृहश्लोकोक्ततत्साधक-हेतूनामादिपदेन परामर्शः । अयमर्थः । पुरुषोऽस्ति अव्यक्तादिव्यतिरिक्तः । कुतः । सङ्घातपरार्थत्वात् । अव्यक्तमहदहङ्कारप्रभृतयः परार्थाः सङ्घातत्वात्, शयनासनाऽभ्यङ्गवत् । न चासिद्धो हेतुः । अव्यक्तादीनां सर्वेषां सुखदुःखमोहात्मकतया सङ्घातत्वसिद्धेः । स्यादेतत् । शयनासनादयः सङ्घाताः, सङ्घातशरीराद्यर्था दृष्टा न त्वात्मानं प्रति परार्थाः । तस्मात् सङ्घातान्तरमेव परं गमयेयुः । न त्वसंहितमात्मानमित्यत उक्तं **त्रिगुणादिविपर्ययादिति** । अयमाशयः । सङ्घातान्तरार्थत्वे तस्यापि सङ्घातत्वात् सङ्घातान्तरार्थेन भाव्यम् । एवं तेन तेनापीति न व्यवस्था स्यात् । न च व्यवस्थायां सत्यामव्यवस्था युक्ता । गौरवप्रसङ्गात् । न च प्रमाणवत्त्वेन कल्पनागौरवमपि सह्यम् । संहतत्वस्य पारार्थ्यमात्रेणान्वयात् दृष्टान्तदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गात् । तस्मादनवस्थाभिप्राया । अस्यासंहतत्वेनैव व्याप्यत्वमिच्छता, अत्रिगुणत्वं विवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसविधर्मत्वं चाभ्युपेयम् । त्रिगुणत्वादयो धर्माः संहतत्वेनैव व्याप्ताः । तत्संहतत्वमस्मिन्परे व्यावर्तमानं त्रैगुण्यादि व्यावर्तयति । तस्मादाचार्येण 'त्रिगुणादि-विपर्ययादि'ति वदताऽसंहतः परो विवक्षितः स चात्मेति सिद्धम् । इतश्च पुरुषोऽस्ति । अधिष्ठानात् । त्रिगुणात्मकानामधिष्ठीयमानत्वात् । यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टम् । यथा हि यन्त्रादि कुलालादिभिः । सुखदुःखमोहात्मकं चेदं बुद्ध्यादिः । तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मेति । इतश्चास्ति पुरुषो भोक्तृभावात् । भोक्तृभावेन भोग्येन सुखदुःखे उपलक्षयति । भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते । तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन चान्येन भवि-तव्यम् । न चानुकूलनीयाः प्रतिकूलनीया बुद्ध्यादयस्तेषां सुखदुःखात्मकत्वेन स्वात्मनि वृत्तिविरोधात् । तस्माद्यः सुखदुःखात्मकत्वेनानुकूलनीयः प्रतिकूलनीयो वा स एवात्मेति । अन्ये त्वाहुः । भोग्या दृश्या बुद्ध्यादयः । न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषाम् । तस्मादस्ति बुद्ध्याद्यतिरिक्तः । स चात्मेति । भोक्तृभावाद्द्रष्टृभावाद्दृश्येन द्रष्टुरनुमानादिति यावत् । दृश्यत्वं बुद्ध्यादीनाम् । सुखाद्यात्मतया पृथिव्यादि-वदनुमितम् । इतश्चास्ति पुरुषः । **कैवल्यार्थं प्रवृत्तेश्चेति** । अत्यन्तदुःखशमनलक्षणं कैवल्यं च बुद्ध्यादीनां न सम्भवति । ते हि सुखदुःखात्मकाः कथं स्वभावाद्वियोजयितुं शक्याः । तदतिरिक्तस्य तु अतदात्मन-स्ततो वियोगः शक्यसम्पादनः । तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महाधियां चास्ति बुद्ध्यादिव्यतिरिक्त इति सिद्धम् ।

कारणकार्यविभागादिहेतुसिद्धमित्यत्र आदिपदेन अविभागादिहेतुपरिग्रहः । कार्यकारणविभागादिहेतूंश्चाग्रे ग्रन्थकृदेव दर्शयिष्यतीति ध्येयम् । प्रवृत्त्यनुपपत्त्या सर्गाद्यसम्भवस्यैवेश्वरसाधकत्वात् कथं तत्र प्रामाण्याभाव इत्यत उक्तं **अनन्यथासिद्धमिति** । इदं त्वन्यथासिद्धत्वान्न तत्र प्रमाणमित्यर्थः । अन्यथासिद्धत्वमेव दर्शयति **अचेतनस्यैवेति** ।

यथोक्तमिति । दृष्टमचेतनमपि प्रयोजनेन प्रवर्तमानं यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्तते । एवं प्रकृतिरचेतनाऽपि पुरुषविमोक्षाय प्रवर्त्स्यति । न च क्षीरप्रवृत्तेरीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वात् साधने व्यभिचार इति वाच्यम् । प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात्ते च जगत्सर्गाद्ध्यावर्तमाने प्रेक्षापूर्व-प्रवृत्तित्वमपि व्यावर्तयतः । न ह्याप्तसकलप्रेरिप्सितस्य भगवतो जगत्सृजमानस्य किमपीप्सितं सम्भवति । नापि कारुण्यादस्य सर्गे प्रवृत्तिः । प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुपपत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यम् । उत्तरकालं तु दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुस्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या कारुण्यमिति । अपि च करुणया चोदितः सुखिन एव जन्तून् सृजेत न विचित्रान् । कर्मवैचित्र्यात् तद्वैचित्र्यमिति चेत् । कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन । तदनधिष्ठानमात्रादेव शरीरेन्द्रियविषयानुत्पत्तौ दुःखानुपपत्तेरतिसुकरत्वात् । प्रकृतेस्त्वचेतनाया न स्वानुग्रहो, न वा कारुण्यं प्रयोजनमिति नोक्तदोषप्रसङ्गः । पारार्थ्यमात्रं तु प्रयोजकमुपपद्यते । तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति ।

वा०र०— तत्साधकहेतूनामिति । त्रिगुणादिपर्यायादिरूपहेतूनामित्यर्थः । **सुखदुःखमोहात्मकतयेति** । प्रीत्या प्रीति ईषदाकाशः प्रवृत्तिनियमार्थः । इत्येतत्कारिकाव्याख्यानावसरे प्रीतिः सुखं प्रीत्यात्मकः सत्त्वं गुणः । अप्रीतिः दुःखम् । अप्रीत्यात्मको रजोगुणः । विषादो मोहः । विषादात्मकः तमोगुणः इति प्रीति-अप्रीति-विषादात्मका गुणा इति । परमार्थाः इति भामत्यां परार्थत्वं प्रतिपादितम् । तच्च गुणाः तद्विकाराश्च सुखदुःखमोहात्मकाः त्रिगुणत्वं च संहतत्वेन व्याप्तमिति गुणवत् तद्विकाराणामपि सुखदुःखमोहात्मकत्वात् सादि तत्त्रैगुण्येन सङ्घातत्वसिद्धिः इति विवेचनम् । **आत्मानं प्रतीति** । चेतनशब्दितात्मानं प्रतीति चेतनरूपं यत् परं तदर्था इति यावत् । **संहतशरीराद्यर्थ इति** । भामतीपाठानुसारेण संहतपदं संहतार्थम् । तथा तेन सङ्घातान्तरार्थेन इत्युत्तरानुसारेण संहतपदं सङ्घातार्थम् । अथैकत्वादव्ययानां इति भामतीवत् अत्रापि प्रयोगः । **सर्वानुमानेति** । एतदुपपादनं न्यायवार्तिकटीकायां कृतं इति भामति । त्रिगुणं अविवेकिविषयः सामान्यं अचेतनं प्रसवधर्मीति कारिकानुसारेणाह **अत्रिगुणत्वं विवेकित्वमित्यादि** । भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयतीति भावः । भामत्यां तथोक्तेः । युक्तत्वाच्च । भोक्तृभावो धर्मः । तद्वाचकशब्देन सुखदुःखयोः लक्षणायां शक्य-सम्बन्धप्रदर्शनं भोग्ये इतीति ज्ञेयम् । तस्मात् यो सुखदुःखात्मकत्वेनेति पाठः । येऽसुखे इति छेदः सिद्ध एव । यो सुखायात्मेति भामती । यः सुखेति पाठस्तु लेखकागतः । स चात्मेत्यत्रत्येतिशब्दस्येत्याहुरिति सम्बन्धः । अथ तेषां भोक्तृभावात् इत्येतत् योजनाप्रकारं दर्शयति **भोक्तृभावात् द्रष्टृभावादित्यादि** । **अत्यन्तेति** । आत्यन्तिकदुःखत्रयप्रशमलक्षणमिति भामती । भामत्याद्यनुसारेण कारिकां व्याचष्टे **दृष्टमचेतनमपीत्यादिना** । **प्रयोजनेन** प्रयोजनोद्देशेनेत्यर्थः । **एवं प्रकृतिरचेतनापीति** । अनेन प्रकृतिरचेतनापि प्रयोजनोद्देशे च प्रवृत्तिमती । वस्तुविशेषात् यो वस्तुविशेषः सोऽचेतनोऽपि प्रयोजनोद्देशेन प्रवृत्तिमान् यथा क्षीरमिति प्रयोगः सूचितः । तत्र क्षीरे साध्यवैकल्यपरिहाराय प्राप्तिप्रदर्शनं अर्थतः कर्तुमुक्तं दृष्टं **अचेतनमपीति** । ननु न क्षीरदृष्टान्तेनाचेतनाया अपि प्रकृतेः न जगत्सर्जनादिप्रवृत्तिः अनुमातुं शक्या । क्षीरप्रवृत्तेरपि

ईश्वराधीननिबन्धनस्य तया क्षीरस्यापि प्रयोजनोद्देशेन प्रवृत्तित्वोनोक्तं साध्यं तत्र नास्तीति साध्यवैकल्यात् इत्याशङ्कते **न च क्षीरप्रवृत्तेरिति** । क्षीरप्रवृत्तेः ईश्वराधिष्ठाननिबन्धनतया प्रयोजनोद्देशेन प्रवृत्तिमत्त्वसाधने क्षीरप्रवृत्तावेव व्यभिचारः । **व्यभिचार इति** । साध्यवैकल्योपलक्षणम् । व्यभिचाराविनाभावः साध्यवैकल्यस्यास्तीति दर्शयितुं तथोक्तिः । ननु क्षीरप्रवृत्तेः ईश्वराधिष्ठाननिबन्धनत्वमङ्गीकारात्कृतसाध्यवैकल्यं इत्यत उक्तम् **ईश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वादिति** । क्षीरप्रवृत्तिः प्रेक्षापूर्वा प्रवृत्तिः भवितुमर्हति । प्रवृत्तित्वात् जलाहरणादिप्रवृत्तिवदिति प्रेक्षापूर्वप्रवृत्तित्वे साधिते क्षीरप्रवृत्तौ अन्यदीयप्रेक्षायाः अयोगात् ईश्वरीयप्रेक्षापूर्वत्वमेव तस्याः सिद्ध्यतीत्येवं ईश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वादित्यर्थः । ईश्वराधिष्ठाननिबन्धनत्वं वक्ष्यमाणप्रकारेण प्रेक्षापूर्वप्रवृत्तित्व एव पर्यवसानमिति साधनप्रकारस्यापि तथैव कर्तव्यत्वात् । यद्वा क्षीरप्रवृत्तिः चेतनाधिष्ठाननिबन्धना प्रवृत्तिविशेषत्वात् रथादिप्रवृत्तिवदिति प्रयोगः चेतनाधिष्ठानान्यो न सम्भवतीति । ईश्वर एव तथाविध इत्याशयेनोक्तं ईश्वराधिंष्ठाननिबन्धनत्वेन साध्यत्वादित्येवमिदं वाक्यं योज्यम् । एवं चात्र वाक्यार्थाप्रतिभासादिदोषशङ्कावकाशो नास्ति इति ज्ञेयम् । ननु तथापि प्रेक्षावत्प्रवृत्तेः इत्युत्तरग्रन्थासङ्गतिः । जगत्सर्गादिप्रवृत्तेः प्रेक्षापूर्वप्रवृत्तिः तस्याः साधनेन तन्निरासायावकाशाभावादिति चेत् । न । नायं ग्रन्थः । क्षीरप्रवृत्तेः ईश्वराधिष्ठाननिबन्धनत्वं निराकर्तुं प्रवृत्तः इत्युच्यते । येन जगत्सर्गार्थप्रकृतिप्रवृत्तेरीश्वराधिष्ठाननिबन्धनत्वस्य निराकरणं असङ्गतं स्यात् इति दोषप्रसङ्गः । किन्तु उत्सर्जनादिप्रवृत्तेः ईश्वराधिष्ठाननिबन्धनत्वमेव निराकर्तुं प्रवृत्त इत्युच्यते । ननु तथा सति क्षीरप्रवृत्तेः ईश्वराधिष्ठानत्वस्याशङ्कितस्य निराकरणाभावप्रसङ्गः । अनाशङ्कितस्य च निराकरणप्रसङ्ग इति तदवस्थैवासङ्गतिरिति चेत् न । क्षीरप्रवृत्तेः ईश्वराधिष्ठाननिबन्धनतया प्रयोजनादेव अचेतनस्य प्रकृत्यभावात् साध्यवैकल्यमिति शङ्कितारं प्रति मुखतः तदपरिहृत्यैव कृत एवं क्षीरप्रवृत्तेरेव ईश्वराधिष्ठाननिबन्धनत्वाश्रयणेन साध्यवैकल्यमेव शङ्क्यते । महदादिकार्यं प्रकृतिप्रवृत्तेरेव ईश्वराधिष्ठाननिबन्धनत्वं प्रसाध्य बाधचोदनमेव किं न क्रियते प्रतिज्ञादोषस्य दृष्टान्तदोषापेक्षया अन्तरङ्गत्वेन तत्परित्यागेन नियामकान्तराभावेन च दृष्टान्तदोषस्यैवाशङ्कनायोगात् । न चास्य भिक्षुपादप्रसारणन्यायेन त्वदुक्तार्थ एव तात्पर्यमिति वाच्यम् । महदादि सर्जनार्थप्रवृत्तेरीश्वराधिष्ठाननिबन्धनत्वानुमानस्य प्रतिकूलतर्कपराहतत्वेन तदनुमानस्यानुपपन्नत्वेन बाधचोदनाया प्रयोगात् इत्येवापरा चातुर्यप्रदर्शनमुखेन समानन्यायतया क्षीरादिप्रवृत्तावपि ईश्वराधिष्ठाननिबन्धनत्वनिराकरणलाभेनार्थतः साध्यवैकल्यपरिहारसिद्धिं चाभिप्रेत्य जगत्सर्जनादिप्रवृत्तावीश्वराधिष्ठाननिबन्धनेत्यनुमानस्य प्रतिकूलतर्कपराहतिप्रदर्शनं प्रेक्षावत्प्रवृत्तेरित्यादिना क्रियत इति तद्ग्रन्थयोजनायापि सुलभत्वात् । एवं च नासङ्गतिः । अत्र हि ग्रन्थे ईश्वराधिष्ठाननिबन्धनत्वं ईश्वरप्रेक्षापूर्वकत्वमिति विवरणपूर्वकमीश्वराधीनाचेतनप्रकृतिरित्यस्य प्रेक्षावदीश्वरस्यैव जगत्सर्गादौ प्रवृत्तिरित्यत्र पर्यवसानमित्याश्रित्य ईश्वरप्रवृत्तित्वं सर्गादिप्रवृत्तेः खण्डयितुं यदि सर्गादिप्रवृत्तिः प्रेक्षावतः ईश्वरस्य भवेत् तर्हि स्वार्थकारुण्यपूर्विका स्यात् या या प्रेक्षावत्प्रवृत्तिः सा सा स्वार्थोद्देशपूर्विका कारुण्यपूर्विका चेति नियमस्य देवदत्तादिप्रवृत्तौ दर्शनात् इत्यभिप्रेतप्रतिकूलतर्के व्याप्तिप्रदर्शनपूर्वकं तर्कस्य विपर्ययपर्यवसानं दर्शितामिष्टापत्तिपरिहारायापाद्यस्यानिष्टता च दर्शिता इत्येतावतः प्रमेयस्य प्रतिभासादिति ज्ञेयम् । प्रकृतिरचेतनापि

प्रयोजनाय प्रवर्तते इत्यनुमानप्रतिपक्षभूतप्रवृत्तिरीश्वराधिष्ठिता एव प्रवर्तते इत्यनुमानेऽपि प्रकृतिप्रवृत्तिः नेश्वराधीना स्वार्थकारुण्यरूपप्रेक्षावत्प्रवृत्तिव्यापकशून्यत्वात् । इति व्यापकाभावलिङ्गक प्रत्यनुमानमेव एतद्ग्रन्थेनोक्तं भवति । शिष्टं समाधानं इत्याहुः । साङ्ख्यपरीक्षाग्रन्थोऽवलोकनीयोऽस्ति ।

एवं पूर्वोत्तरग्रन्थयोजनाकारि संस्मृतेः ।
गुरुपादस्य भक्त्या वै तदभावे बुधा सह ॥

स०व्र०— सङ्घातेति । सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्ते'श्च ॥ इति तद्वाक्यादित्यर्थः । तस्य चायमर्थः । सङ्घातपरार्थत्वात्, अव्यक्तमहदहङ्कारादयः परार्थाः, सङ्घातत्वात्, शयनासनाभ्यङ्गवत् । सुख-दुःख-मोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः । स्यादेतत् । शयनासनादयः सङ्घातशरीराद्यर्थाः दृष्टाः । न त्वात्मानं प्रति परार्थाः । तस्मात् सङ्घातान्तरमेव परं गमयेयुः । न त्व(सङ्घात)संहितमात्मानमित्यत आह **त्रिगुणादिविपर्ययादिति** । अयमभिप्रायः । सङ्घातान्तरार्थत्वे तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थत्वेन भवितव्यमेवं तेनापीत्यनवस्था स्यात् । न च व्यवस्थायां सत्यामव्यवस्था युक्ता । कल्पनागौरवप्रसङ्गात् । न च प्रमाणवत्वेन कल्पनागौरवमपीष्यत इति युक्तम् । दृष्टादृष्टसर्वधर्मानुरोधेन (दृष्टान्तदृष्टसाधर्म्यानुरोधेन) अनुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गात् । तस्मादनवस्थाभियाऽस्य असङ्घातत्वमिच्छता अत्रिगुणत्वम्, अविषयत्वम्, विवेकित्वम्, असामान्यत्वम्, चेतनत्वम्, अप्रसविधर्मत्वं चाभ्युपेयम् । त्रिगुणत्वादयो धर्माः संहतत्वेन(नैव) व्याप्ताः । तत्संहतत्वं च अस्मिन्परे पुरुषे व्यावर्तमानं त्रैगुण्यादि व्यावर्तयति । ब्राह्मणत्वं यथा व्यावर्तमानं कर्मठत्वादि व्यावर्तयति । तस्मादाचार्येण त्रिगुणादिविपर्ययादिति वदता असङ्घातः पुरुषो विवक्षितः । स चात्मेति सिद्धम् । इतश्च पुरुषोऽस्ति । अधिष्ठानात् । त्रिगुणात्मकानामधिष्ठीयमानत्वात् । यत् यत् सुख-दुःख-मोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टम् । यथा हि यन्त्रादि कुलालादिभिः । सुख-दुःख-मोहात्मकं चेदं बुद्ध्यादि । तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परः त्रैगुण्यादिरहित आत्मेति । इतश्चास्ति पुरुषः— भोक्तृभावात् भोक्तृभावेन भोग्येन सुख-दुःखे उपलक्षयति । भोग्ये हि सुखदुःखे अनुकूल-प्रतिकूलवेदनीये प्रत्यात्ममनुभूयते । तेन अनयोरनुकूलनीयेन प्रतिकूलनीयेन चान्येन केनचिद्भवितव्यम् । न चानुकूलनीयाः प्रतिकूलनीयाः बुद्ध्यादयः । तेषां सुखदुःखात्मकत्वेन स्वात्मनि वृत्तिविरोधात् । तस्मात् यः सुखदुःखात्मकत्वेन अनुकूलनीयः प्रतिकूलनीयो वा स एवात्मेति । अन्ये त्वाहुः । भोग्या दृश्या बुद्ध्यादयः । न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषाम् । तस्मादस्ति द्रष्टा बुद्ध्याद्यतिरिक्तः, स चात्मेति । भोक्तृभावात् द्रष्टृभावात् दृश्येन द्रष्टुरनुमानादिति यावत् । दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम् । इतश्चास्ति पुरुषाधिष्ठानात् त्रिगुणानां अधिष्ठीयमानत्वाद्यद्यत् सुखदुःखाद्यात्मकं तत्सर्वं परेण अधिष्ठीयमानं दृष्टम् । यथा हि यन्त्रं कुलालादिभिः । तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मा । इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्चेति । अत्यन्तदुःखशमनलक्षणं (वै)कैवल्यं च बुद्ध्यादीनां न सम्भवति । ते हि सुखदुःखात्मकाः

कथं स्वभावात् वियोजयितुं शक्याः । तदतिरिक्तस्य तु अतदात्मनस्ततो वियोगः शक्यसम्पादनः । तस्मात् कैवल्यार्थं प्रवृत्तेः आगमानां महाधियां चास्ति बुद्ध्यादिव्यतिरिक्त इति सिद्धम् ।

विट्ठल०— कस्यापीति । स्वतन्त्रत्वाभावादिति भावः । **सङ्घातेति** । अव्यक्तमहदहङ्कारादयः सङ्घाताः परार्थाः सङ्घातत्वात् वस्त्रालङ्कारशयनादिसङ्घातवदित्यनुमानेन सिद्ध्यन् परश्च तनयेवेति सिद्ध्यतीति भावः । वस्त्रालङ्कारादि सङ्घातः शरीरार्थ एव नात्मार्थ इति अत्रापि परशब्देनाचेतनान्तरमेव सिद्ध्यतीति न चेतनसिद्धिरिति चेत् तर्हि तस्यापि सङ्घातत्वेन परार्थत्वात् सङ्घातान्तरेण भवितव्यमित्यनवस्थापत्तेः क्वचित्पर्यवसाने स एव चेतन इति आदिपदेन सुखदुःखबुद्ध्यादिद्रष्टा कश्चिद् दृश्यते । न च सङ्घातस्य सुखादेर्वा तद् द्रष्टृत्वम् । अतस्तदतिरिक्त आत्मा सिद्ध्यतीत्यादि द्रष्टव्यम् । कार्यकारणविभागादिहेतुरुत्तरत्र स्फुटो भविष्यति । **वत्सविवृद्धीति** । अज्ञस्याचेतनक्षीरस्य यथा वत्सविवृद्ध्यर्थं प्रवृत्तिस्तथा अज्ञस्यैव प्रधानस्य पुरुषविवक्षार्थं सर्गादौ प्रवृत्तिरित्यर्थः ।

चषकः— सङ्घातेति । शयनासनादेर्देहार्थतेव महदहङ्कारादिसङ्घातरूपदेहस्यापि पारार्थ्येन हेतुना चेतनः सिद्धः । **विभागादीति** । स्फुटीकरिष्यति चैतद्ग्रन्थकृदेव ।

॥ इति अचेतनस्य स्वातन्त्र्येण कर्तृत्वम् ॥

* * *

॥ अथ च तत्र अचेतनेषु भेदाभावोक्तेः विवरणम् ॥

१६ **सु०— अन्यद्भिदोज्झितमित्युक्तम् । तदसत् । अचेतनानामपि चेतनवत् परस्परतो भेदस्य प्रत्यक्षादिसिद्धत्वादित्यत आह परस्परेति ।**

अनु०— परस्परविभेदश्च कार्याणामालयं भवेत् ।

आलयं प्रलयपर्यन्तम्, **कार्याणां परस्परविभेदश्च भवेत्** इति निगद्यते तैः ।

एतदुक्तं भवति । कार्यं तावत् कारणव्यापारात्प्रागपि सत्, असदकरणात् । असच्चेत् कारणव्यापारात्पूर्वं कार्यम्, नास्य सत्त्वं कर्तुं शक्यम् । न हि नीलं शिल्पिसहस्रेणापि पीतं शक्यं कर्तुम् ॥ किञ्च कार्येण सम्बद्धं कारणं कार्यस्य जनकम्, असम्बद्धं वा । आद्ये त्वसता सम्बन्धानुपपत्तेः सत्त्वमङ्गीकार्यम् । न द्वितीयः, असम्बद्धत्वाविशेषेण

सर्वस्मात्सर्वसम्भवापत्तेः । असम्बद्धत्वेऽपि कारणं तदेव करोति यत्र शक्तमतो नाति-प्रसङ्ग इति चेत्, सा शक्तिः शक्यविषया वा स्यात् सर्वत्र वा । सर्वत्र चेत् सैवा-व्यवस्था । आद्ये त्वसति शक्ये कथं तद्विषया स्यादिति सदेव कार्यम् । न च कारणादन्यत्कार्यं सदुपलभ्यत इति कार्यकारणयोरभेदोऽङ्गीकरणीयः । किञ्च न पट-स्तन्तुभ्यो भिद्यते तन्तुधर्मत्वात्, यद्यतो भिद्यते तत्तस्य धर्मो न भवति, यथा गौरश्वस्य, उपादानोपादेयभावाच्च । ययोरर्थान्तरत्वं न तयोरुपादानोपादेयभावः, यथा घटपटयोः, संयोगाप्राप्त्यभावाच्च । अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोः, अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः । न चेह संयोगाप्राप्ती, तस्मान्नार्थान्तरत्वम्, गुरुत्वा-न्तरकार्यस्यावनतिभेदस्याग्रहणाच्च ।

एवञ्च कार्याणां परस्परं भेदेऽपि स्वस्वकारणैरभेदात् क्रमेण महाप्रलये मूल-कारणभावं गतानामभेद एव; इत्यनेनाभिप्रायेणान्यद्विदोज्झितमित्युक्तमिति । तच्चोक्तम् 'असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमि'ति ।

परि०— सम्मतित्वेनोदाहरिष्यमाणश्लोके सत्कार्यमिति साध्यभागं व्यनक्ति **कार्यं तावदिति** । अत्रोपात्तहेतुपञ्चकं क्रमेण विवरिष्यन् आद्यं तावद्व्यनक्ति **असदकरणादिति** । कार्यं कारणव्यापारात्पूर्वमसच्चेदित्यर्थः । द्वितीयतृतीयहेतू क्रमात् कल्पद्वयनिरासकाविति भावेन विवृणोति **किञ्चेत्यादिना** ।

उपादानस्य कारणस्य कार्येण ममेदं कारणमिति ग्रहणात् सम्बद्धत्वादिति यावदित्यर्थ-मुपेत्यार्थमाह **आद्य इति** । शक्तस्येत्यादिनोक्तं सङ्कटयितुमाह **असम्बद्धत्वेऽपीति** । द्वेधा विकल्प्यान्त्यं सर्वेति पूर्वहेतुना निरस्य आद्यकल्पेऽस्य हेतोर्घटनां व्यनक्ति **सा शक्तिरित्यादिना** । **सैवेति** । सर्वस्मादित्युक्तेत्यर्थः । कारणभावात्कारणात्मकत्वादिति पञ्चमहेतोरसिद्धिं निरसितुं प्रत्यक्षं तावदाह **न च कारणादिति** । अनुमानैरपि कारणात्मकत्वं कार्यस्य साधयति **किञ्चेति** । **नार्थान्तरत्वमिति** । कार्यकारणयोरित्यनुषङ्गः । अभेदे हेत्वन्तरमाह **गुरुत्वान्तरेति** । तन्तुपटयोर्भेदे तन्तुषु यद्गुरुत्वं ततोऽन्येषु गुरुत्वं पटे स्यात् । न चेष्टापत्तिः । पूर्वं पटोपादानतन्तूनां तुलायां स्थापने यादृशमवनमनं तदुपादानकपटस्थापनेऽपि तादृगवनमनं न स्यात् । किन्तु पुनरधिकावनतिः स्यात् ।

गुरुत्वद्वयसत्त्वात् । न च तथोपलभ्यते । अतो गुरुत्वान्तरकार्यस्यावनमनविशेषस्यादर्शनादनन्यत्वं कार्यकारणयोरित्यर्थः । **एवं चेति** । कार्यस्य कारणाभेदे प्रामाणिके सतीति वा कार्यस्य कारणव्यापारात्प्रागपि सत्त्वे सतीति वार्थः ।

यादु०— उदाहरिष्यमाणकारिकागतमसदकरणादिति हेतुं व्याख्यायोपादानग्रहणादिति हेतुं विवृणोति **किञ्च कार्येणेति** । अनेनोपादानानि कारणानि तेषां ग्रहणं कार्येण । उपादानैः कार्यस्य सम्बन्धादिति यावदिति तद्व्याख्यानं सूचयति **सर्वसम्भवापत्तेरिति** । अनेन सर्वसम्भवाभावादित्यस्य तात्पर्यमुक्तं भवति । शक्तस्य शक्यकरणादित्येतद्व्याख्यातुमाह **असम्बद्धत्वेऽपीति** । कारणभावाच्चेत्यस्य कार्यस्य कारणात्मकत्वात् कारणस्य च पूर्वं सत्त्वात् तदभिन्नमपि कार्यं तदा सदेवेति व्याख्यानं मनसि निधाय स्यादेतद्यदि कार्यस्य कारणाभेदः स्यात् स एव कुत इत्याशङ्कायां प्रत्यक्षं तावत् तत्राह **न च कारणादन्यदिति** । अनुमानान्यप्याह **किञ्चेत्यादिना** । **गुरुत्वान्तरकार्यस्येति** । यत् यस्माद्भिन्नं तस्मात् तस्य गुरुत्वान्तरकार्यं गृह्यते । यथा पुलिकस्य रुचिकस्य यो गुरुत्वकार्योऽवनतिविशेषः ततो द्विपुलिकस्य स्वस्तिकस्य गुरुत्वकार्योऽवनतिभेदोऽधिकः । न च तथा तन्तुगुरुत्वकार्यात् पटगुरुत्वस्य कार्यान्तरं दृश्यते । तस्मादभिन्नस्तन्तुभ्यः पट इत्यर्थः । **एवं चेति** । उक्तरीत्या सत्कार्यवादस्य समर्थितत्वादित्यर्थः ।

वं०प०— **करोतीति** । जीवस्येति शेषः ।

कं०रा०— **न हि नीलमिति** । पीतस्य नीलात्मना प्रागसत्त्वादेव हि नीलं पीतं कर्तुमशक्यं जातमिति भावः । **असतेति** । असता कार्येण कार्यस्य सम्बन्धानुपपत्तेः कार्यस्योत्पत्तेः प्राक् सत्त्वमङ्गीकार्यमित्यर्थः । **असदकरणादिति** । उत्पत्तेः प्राक् कारणात्मना कार्यस्यासत्त्वे सतः कर्तुमशक्यत्वादुपादेयस्योपादानात्मत्वेन ग्रहणात् कार्येणासम्बन्धस्य कारणस्य कार्यजनकत्वे असम्बद्धत्वाविशेषेण सर्वस्मात्सर्वसम्भवापत्तेस्तस्य चाभावात् सम्बन्धत्वे वक्तव्ये असता कार्येण सम्बन्धानुपपत्तेः असम्बद्धत्वेऽपि कारणं तदेव करोति यत्र शक्तमतो नातिप्रसङ्ग इत्यङ्गीकारेऽपि शक्तेः सर्वविषयत्वेऽतिप्रसङ्गतादवस्थ्येन शक्तेः शक्यकार्यविषयत्वे वाच्ये शक्यस्य कार्यस्यासत्त्वे शक्तेस्तद्विषयत्वायोगात् कार्यकारणयोरर्थान्तरत्वे उपादानोपादेयभावस्यायोगेन कार्यस्य कारणाभिन्नत्वाच्च कारकव्यापारात्पूर्वं कार्यं सदेवेत्यर्थः ।

श्रीनिधि०— **उपादानग्रहणादिति** । पटकारणे तन्तौ उपादानत्वस्य ग्रहणादित्यर्थः । न च कारणादन्यत्कार्यं सदुपलभ्यते इति प्रत्यक्षमनेनोक्तम् । क्वचित्कार्यभावादिति पाठः क्वचित्कारणभावादिति । सर्वत्राप्ययमेवाशयः । क्वचित्कार्याभावाच्चेति पाठः । तत्र सनतिभेदस्य गुरुत्वान्तरकार्यस्याभावादित्यर्थः ।

शे०वा०— उदाहरिष्यमाणकारिकागतसत्कार्यमिति प्रतिज्ञानुसारेण प्रतिजानीते **कार्यं तावदिति** । तत्रोदाहरिष्यमाणकारिकागतमसदकरणादिति हेतुमाह **असदकरणादिति** । कथमस्य हेतुत्वमित्यतो हेतुं विवृणोति **असच्चेदिति** । सदसत्त्वे घटस्य धर्मावित्यतो न दोष इति चेत् । तथाऽप्यसति धर्मिणि न तस्य धर्मा इति सत्त्वं तदवस्थमेव । तथा च कथमसत्त्वम् । असम्बन्धेनातदात्मना वाऽसत्त्वे च कथमसन् घटः स्यात् । कारणव्यापारादूर्ध्वमिव प्रागपि ततः सदेव कार्यम् । करणं चास्य सतोऽप्यभिव्यक्तिः । यथा पीडनेन तिलेषु तैलस्य, अवघातेन च धान्येषु तण्डुलानां, दोहनेन च सौरभीषु पयसः । असतः करणे तु न किञ्चिन्निदर्शनमस्ति । न खल्वभिव्यज्यमानं वा उत्पद्यमानं वा क्वचिदसद्दृष्टमिति भावः । तद्गतं 'उपादानग्रहणादि'ति हेतुं विवृणोति **किञ्चेति** । अनेनोपादानानि कारणानि तेषां ग्रहणं कार्येणोपादानैः कार्यस्य सम्बन्धादिति यावदिति हेतुविवरणं सूचितं भवति । **सर्वसम्भवेति** । अनेन सर्वसम्भवाभावादित्येतत् तात्पर्यतो विवृतं भवति । 'शक्तस्य शक्यकरणादि'ति हेतुं योजयितुं शङ्कते **असम्बद्धत्वेऽपीति** । **सदेव कार्यमिति** । शक्तिभेद एव तादृशो यतः किञ्चिदेव कार्यं न सर्वमिति चेन्न । विकल्पासहत्वात् । तथा हि । शक्तिविशेषः किं कार्यसम्बद्धो वाऽभिमतः । सम्बद्धत्वे नासता सम्बन्ध इति सत्कार्यवादप्रसङ्गात् । असम्बद्धत्वे च सैवाव्यवस्थितिरित्यत्र तात्पर्यात् । नन्वचेतनानामपि चेतनवत् परस्परभेदस्य प्रत्यक्षादिसिद्धत्वादभेदः कथमिति शङ्कापरिहाराय तदभेद एव साधनीयः । कार्यस्य कारणव्यापारात्पूर्वं सत्त्ववर्णनं प्रकृतानुपयुक्तं किमर्थमित्यतोऽभेदसाधनार्थमेव तदित्यभिप्रेत्य कार्यस्य प्राक् सत्त्वेऽपि कथमभेदसिद्धिरित्यतस्तत्प्रकारं दर्शयति **न चेति** । कार्यं कारणाभिन्नं ततः पृथगनुपलभ्यमानत्वादित्यनुमाने कार्यकारणयोरभेदाभावेऽपि कार्यस्यासत्त्वादेव पृथगनुपलब्धिसम्भवादप्रयोजकत्वमित्यतः तत्सत्त्वसाधनस्य प्रकृतोपयोग इति भावः । न च कारणभावादित्यस्याननुवादापत्तिर्दोष इति वाच्यम् । तस्य ह्ययमर्थः । कार्यस्य कारणभावो न हि कारणाद्भिन्नं कार्यं कारणं च सदिति कथं तदभिन्नं कार्यमसद्भवेदिति । तथा च कार्यकारणयोरभेदेन कार्यस्य प्राक् सत्त्वं, तस्माच्च कार्यकारणयोरभेदः, इत्यन्योन्याश्रयः स्यात् । अतो भेदसाधनार्थं कार्यस्य कारणव्यापारात्पूर्वमभेदनैरपेक्ष्येण सत्त्वसाधकयुक्तिजातस्यैवात्रानुवाद इति तदननुवादस्यादोषत्वात् । सम्मतं चैतद् ग्रन्थकारस्यापि । अत एव सत्कार्यवादे प्रमाणाभावाच्चेत्यादिना सदकरणादिति कारिकोक्तसत्कार्यवादसाधकयुक्तिनिराकरणावसरे कारणभावाच्चेति युक्त्यनिराकरणं सङ्गच्छते, तस्याः सत्त्वसाधकत्वाभावात् । अन्यथा तदनिराकरणाद् ग्रन्थस्यासामञ्जस्यं स्यादित्यवधेयम् । केचित्तु कारणभावाच्चेत्यस्य कार्यस्य कारणात्मकत्वात् कारणस्य च पूर्वं सत्त्वात्, तदभिन्नमपि कार्यं सदेवेति व्याख्यानं मनसि निधाय, भवेदेतदेवं यदि कार्यस्य कारणाभेदः स्यात् । स एव तु कुत इत्यतः तत्र प्रत्यक्षं तावदाह न च कारणादन्यदितीत्याहुः । अनुमानान्तराण्यप्याह **किञ्चेति** । **यथेति** । धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरमिति भावः । उपादानोपादेयभावश्च तन्तुपटयोः तस्मान्नार्थान्तरत्वमिति भावः । **गुरुत्वान्तरेति** । यद्यस्माद्भिन्नं तस्मात् तस्य गुरुत्वान्तरकार्यं गृह्यते । यथा पुलिकस्य रुचिकस्य यो गुरुत्वान्तरकार्योऽवनतिविशेषः ततो द्विपुलिकस्य स्वस्तिकस्य गुरुत्वकार्योऽवनतिभेदोऽधिकः । न च तथा तन्तुगुरुत्वकार्या-

त्पटगुरुत्वकार्यमधिकं दृश्यते । तस्मादभिन्नस्तन्तुभ्यः पट इति भावः । **एवञ्चेति** । सत्कार्यवादे सिद्धे सतीत्यर्थः ।

वा०र०— उदाहरिष्यमाण इति । मूले साङ्ख्यकारिका उदाहरिष्यते उपष्टम्भकतया तत्र सत् तत्कार्यमिति प्रतिज्ञा । असदकारणात् इत्यादयो हेतवः तदनुसारेण प्रतिज्ञापूर्वं कथितेत्यर्थः । भामत्यनुसारेण व्याख्यानपरं मूलम् । तत्राधिकांशं भामत्युक्तं उपयोगानुसारेणाह **सदसत्वे घटस्येत्यादिना** । तेषां ग्रहणकार्येण सम्बन्धः । उपादानैरिति पाठः । भामत्यां तथैवोक्तेः । युक्तत्वाच्च । कार्येणेत्यनन्तरं सम्बन्ध इत्येतदभावो लेखकागतः । **तात्पर्यत इति** । तेन तद्धेत्वनुवादाभावः इति शङ्का नेति भावः । शक्तिभेद एव समाधत्त इति भामत्यनुसारेणाह **शक्तिभेद एवेत्यादि** । ननु साङ्ख्यपरीक्षाकारिकोक्तरीत्यासदकारणादिहेतुचतुष्टयस्यानुवादेऽपि कारणाभावाच्चेति पञ्चमहेत्वनुवादाभावः इत्याशङ्कते **न च कारणाभावादित्यस्येति** । नास्य हेतोरननुवादो दोषाय । इतरहेतुवत् अस्योपपन्नत्वाभावेनापाततोऽपि साधकतया उपन्यासानर्हत्वात् इत्याशयेन तद्धेतोरयोग-मुपपादयितुं तदर्थं तावदाह **तस्य हि अयमर्थ इति** । **कार्यस्येति** । कार्यस्य कारणात्मकत्वादिति भामती । एवमर्थं कथयित्वा तदयोगं दर्शयति **तथा चेति** । एवं कारणाभावादित्युक्तं हेतोरयुक्तत्वेनानुवादानर्हतामुपपाद्य हेत्वन्तरेऽनुवादार्हतां दर्शयन् उक्तहेतोरनुवादाभावस्यादोषतामुपसंहरति **अतो भेदसाधनार्थमिति** । कुत एवं अनुवादाभावस्यान्यथासिद्धिः कल्प्यते । तदनुभावात् अभावो दोष एव किं नेष्यते इत्यतो यद्यत्रानुवादाभावो दोषत्वेन इष्यते तर्हि मूलकारीयोत्तरत्र तदनिराकरणं न सङ्च्छेत । न हि दूषणाय प्रवृत्तेनानुवादावसरे त्यागे कृतेऽपि वा दूषणावसरेऽपि त्यागः कृत इति शक्यते वक्तुम् । तस्मादनभिप्रेत एवायं हेतुरित्येव द्रष्टव्यमित्याह **अत एव सत्कार्येत्यादि** । **आहुरिति** । कारणव्यापारात् प्राक् कार्यस्य सत्त्वसाधनमात्रं कृतं न त्वभेदः कथमित्याशङ्कापरिहारायाभेदः साधितः इति असदकारणादिहेतूनां असङ्गतिशङ्कापरिहाराय मूलकृतः सङ्गति-प्रदर्शनपरस्यास्य वाक्यस्यानुपपन्नतया अनुवादानर्हकारणभावाख्यहेत्वनुवादपरत्वाश्रयणायोगः । अत एव मिथ्यात्वानुमानखण्डनादावुपनयादेः अनुवादाभावे समर्थनमेव कृतं इत्याशयः । भामत्यां कार्यस्य कारणा-भेदसाधनानि च प्रमाणानि इति प्रतिज्ञाय न पटस्तन्तुभ्यः इत्याद्यनुमानानि तानि मूले उक्तानि इत्याशयेनाह **अनुमानान्तराण्यपीति** । विशेषानुमानानीत्यर्थः । वक्ष्यति च एतदनुमाननिरासमूलटीकायां विशेषानुमाना-न्येवेति । भामत्यनुसारेणाधिकमाह **धर्मश्च पट इत्यादि** । भामत्यनुसारेण विवृणोति **यद्यस्मात् भिन्नमिति** । यथा पुल्लिङ्गकस्य । **रुचिकस्येति** । यथा पुलिकस्येति च भामती रुचिकस्य स्वस्तिकस्येत्यत्र रुचिकं स्वस्तिकं च स्वर्णविकारौ प्रत्येकं भवत इति चतुर्थप्रथमपादीय 'न प्रतीके न हि सः' इत्येतत्सूत्रशाङ्करभाष्यस्थ 'न हि रुचिकस्य स्वस्तिकयोरितरेतरात्मकत्वमस्तीति एतद्वाक्य इवार्थो ज्ञेयः ।

स०व्र०— ननु अचेतनानां चेतनवत् परस्परतो भेदस्य प्रत्यक्षादिसिद्धत्वादभेदः कथमिति शङ्का-परिहारार्थमभेद एवोपपादनीयः (न भेद उपपादनीयः) । कार्यस्य कारणात्पूर्वं सत्त्वसाधनं प्रकृतानुपयुक्तमित्यतः

अभेदसाधनार्थमेव सत्त्वसाधनस्य कृतत्वादित्यभिप्रेत्य कार्यस्य कारणात्पूर्वं सत्त्वेऽपि कथमभेदसिद्धिरित्यतः तत्प्रकारं दर्शयति **न च कारणादन्यदिति** । कार्यं कारणाभिन्नम्, ततः पृथगनुपलभ्यमानत्वादित्येवोक्ते कार्यकारणयोरभेदाभावेऽपि कार्यस्यासत्त्वादेव पृथगनुपलब्ध्युपपत्तेरप्रयोजकत्वमित्यतः **सत्** इत्युक्तम् । एवं च तस्य सत्त्वसाधनं प्रकृतोपयुक्तमिति भावः ।

ननु अभेदसाधनार्थं कार्यस्य कारणात्पूर्वं सत्त्वे साधकयुक्तिप्रतिपादको योऽयम् 'असदकरणात्' इति परकीयः श्लोकः तत्र यावत्यो युक्तय उपनिबद्धाः ताः सर्वा अपि अनुवदनीयाः । तत्र 'कारणभावाच्च' इत्येतद्युक्तिव्यतिरिक्ता एव असदकरणादित्यादियुक्तिरेवानूद्य तदनुवादः कुतो न कृत इति चेत् उच्यते । 'कारणभावादि'त्यस्य हि अयमर्थः । कार्यस्य कारणभाव इति । न च (न हि) कारणाद्भिन्नं कार्यं कारणं च सदिति कथं तदभिन्नं कार्यमसद्भवेदिति । एवं च कार्यकारणयोरभेदेन कार्यस्य सत्त्वं तया युक्त्या प्रसाधितम् । तदनुवादे तु तस्याभेदे सिद्धे सत्त्वसिद्धिः, तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयः स्यात् । अतोऽभेदसाधनार्थं कार्यस्य कारणात्पूर्वमभेदनैरपेक्ष्येणैव सत्त्वसाधकयुक्तिजातमेवानुवदनीयमिति तत्सापेक्षतद्युक्त्यतिरिक्तयुक्त्यनुवाद एव कृत इति नानुपपत्तिः ।

प्रकारान्तरेणाभेदसाधकपरोक्तयुक्तीरनुवदति **किञ्चेति** । अप्राप्तिर्नाम एकदेशसम्बन्धित्वम्, सम्बन्धाभावो वा द्रष्टव्यः । **गुरुत्वेति** । यदि पटः तन्त्वतिरिक्तः स्यात् तदा पटोत्पत्तौ तन्तुनिष्ठगुरुत्वापेक्षया तत्र गुरुत्वान्तरमुत्पन्नमिति वक्तव्यम् । तथात्वे पूर्वं तन्तुत्वदशायां तन्निष्ठगुरुत्वेन तत्कार्यभूता यावती अवनतिरुपलभ्यते तदपेक्षया पटत्वदशायां तन्निष्ठगुरुत्वान्तरेण तत्कार्यावनतिविशेषस्य ग्रहणं स्यात् । न चैतदस्ति । तस्मादभेद इति ।

विठ्ठल०— असदकरणादित्युदाहरिष्यमाणकारिकायां सत्कार्यमिति साध्यांशस्यार्थः कार्यं कारणं व्यापारात्प्रागपि सदिति । असदकरणादिति खण्डव्याख्यानमसदकरणत्वादित्यादि-उपादानग्रहणादित्यंशव्याख्यानं **किञ्च कार्येणेत्यादि** । एतेन उपादानैः कार्यस्य ग्रहणात् सम्बन्धादिति व्याख्यानं सूचयति । **सर्वस्मात्सर्वसम्भवापत्तेः** इत्यनेन सम्भवाभावादित्येतद्विवृतं भवति । **सा शक्तिः शक्यविषया** इत्यादिना शक्तस्य शक्यकरणादित्येतत्कार्यकरणे शक्तियुक्तस्य कारणस्य शक्ये कार्ये सत्येव स्वयं तद्विषयतया तत्करणादिति विवृतं भवति । **न च कारणादन्यत्कार्यम्** इत्यनेन कारणसत्त्वेनैव कार्यस्य सत्त्वं दृष्टमिति कारणस्य च पूर्वमेव भावात् सत्त्वाच्च सदेव कार्यमित्येवं कारणभावाच्च सदेव कार्यमित्यंशो व्याख्यात इति बोध्यम् । कार्यकारणाभेदे अनुमानमप्याह **किञ्चेति** । **तन्तुधर्मत्वादिति** । तन्त्वनुबद्धप्रतीतिविषयत्वं तन्तुधर्मत्वमिति ज्ञेयम् । **उपादानोपादेयभावाच्च** इत्यादौ न पटस्तन्तुभ्यो भिद्यत इत्यनुषञ्जनीयम् । **संयोगाप्राप्त्यभावात्** इत्यस्य तन्तुपटयोः संयोगश्च अप्राप्तेश्चाभावादित्यर्थः । **गुरुत्वान्तरकार्यस्येति** । भिन्नयोः पदार्थयोस्तुलारोपणे गुरुत्वान्तरकार्यभूतो वनविभेदस्तुलायां प्रायेण दृश्यते । न चैतदत्रास्ति । अतस्तन्तुभ्यः पटो भिन्नो नेत्यर्थः ।

एवं चेति । उक्तरीत्या सत्कार्यवादस्य सिद्धत्वात् स्थितिकाले कार्याणां परस्परं भेदेऽपि स्वकारणैरभेदक्रमेण मूलकारणप्रधानात्मकतायत्या अभेदो युक्त एव । न च कार्याणां प्रलये नष्टत्वादभेदायोग इति वाच्यम् । कार्याणां कारणात्मना सत्त्वासत्त्वाभ्युपगमादिति भावः । तस्माच्च विपर्यासादिति कारिकाया अयमर्थः । तस्मादिति तद्ग्रन्थे पूर्वप्रकृतं चेतनत्वमविषयत्वं अत्रैगुण्यं विवेकित्वमप्रसवधर्मत्वं च परामृश्यते । तथा च तस्याचेतनत्वविषयविपर्यासाद्वैषम्याच्चेतनत्वादविषयत्वाच्चास्य पुरुषस्य साक्षित्वं दृष्टत्वं सिद्धम् । अचेतनत्वे ज्ञानविषयत्वे वा न साक्षित्वं दृष्टत्वं च अत्रैगुण्यत्रैगुण्यरूपातिविपर्यासात् कैवल्यम् । अत्रैगुण्यं नाम सुख-दुःखमोहरहितत्वम् । अत एवात्यन्तिकदुःखाभावः कैवल्यम् । अत्रैगुण्यादेव माध्यस्थं भवेत् । अविवेकि-त्वादिप्रसवधर्मित्वाच्चाकर्ते सिद्धमिति ।

चषकः— उदाहरिष्यमाणकारिकायां प्रतिज्ञाभागं तावद्व्याकुरुते **कार्यं तावदिति** । तादृश-साध्यान्वितज्ञापकत्वरूपहेतुत्वावबोधकविभक्त्यन्तपञ्चकमानुपूर्व्या व्याचिख्यासुराद्यं तावद्विवृणोति **असद-करणादिति** । द्वितीयं व्यनक्ति **किञ्चेति** । तृतीयं व्याकुरुते **सर्वसम्भवेति** । तुरीयं व्याख्याति **सा शक्ति-रिति** । पञ्चमतात्पर्यं प्रकाशयति **न च कारणादिति** । तत्र हेत्वतराण्यभिधत्ते **किञ्चेति** ।

॥ इति अचेतनेषु भेदाभावोक्तेः विवरणम् ॥
॥ इति उक्तार्थस्य विवरणम् ॥

* * *

॥ अथ तत्र साङ्ख्यमतभेदः ॥
॥ अथ च तत्र चेतनस्य भोक्तृत्वाभोक्तृत्वाभ्यां मतद्वैविध्यम् ॥

१७ **सु०— तेष्वपि मतभेदमाह भोक्तृतामिति ।**

अनु०— भोक्तृतां चेतनस्याहुः केचित्तामपि नापरे ।

सर्वेऽपि साङ्ख्याः पुरुषस्य कर्तृत्वं नानुमन्यन्ते । क्रियावेशो हि कर्तृत्वम् । न च आत्मनः परिस्पन्दलक्षणा क्रियोपपद्यते, सर्वगतत्वात् । नापि प्रयत्नलक्षणा, तस्याः अन्तःकरणवृत्तित्वात् । न च विक्रियालक्षणा, निर्विकारत्वात् । यथोक्तम्, 'तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्चेति' । तत्र केचिच्चेतनस्य भोक्तृतामाहुः, यथा भोक्तृभावादिति । अपरे तामपि नाहुः, यथा 'तस्मान्न

बध्यते न मुच्यते नापि संसरति कश्चित् । बध्यते संसरति मुच्यते च नानाश्रया प्रकृतिरि'ति ।

परि०— तेष्वपीति । साङ्ख्येष्वपीत्यर्थः । क्रियेति किं परिस्पन्द उच्यते उत प्रयत्नः अथ परिणामः न त्रयमपीति क्रमेण निराह **न चात्मन इत्यादिना** । **तस्माच्चेति** । तदीयग्रन्थे पूर्वप्रकृतत्रिगुणमयत्वादिपरामर्शः । तस्माद्विपर्यासात् चेतनत्वादिकं तस्माच्चेतनत्वात्साक्षित्वं तत एव द्रष्टृत्वं च सिद्धम् । त्रैगुण्यहीनत्वात् कैवल्यम् । तत एवोदासीनत्वान्माध्यस्थ्यं मध्यस्थत्वं सिद्धम् । तत एवाकर्तृभावश्च सिद्ध इत्यर्थः । **नापि संसरतीति** । सुखदुःखभाङ् न भवतीत्यर्थः । **नानाश्रया** नानापुरुषसम्बन्धिनी ।

यादु०— तस्माच्च विपर्यासादिति कारिकाया अयमर्थः । चशब्दः पूर्वोक्ताद्धर्मान्तरसमुच्चायकः । तस्मादित्यनेन च 'त्रिगुणमविवेकी'त्यादि परामृश्यते । तथा च तस्मात्त्रिगुणादेर्यो विपर्यासः पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मत्वं च । तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते । चेतनो हि द्रष्टा भवति नाचेतनः । साक्षी च दर्शितविषयो भवति । यस्मै दर्शितो विषयः स साक्षी । यथा हि लोकेऽर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः । एवं प्रकृतिरपि स्वरचितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी । स चाचेतनो विषयो वा शक्यो न विषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी । अत एव च द्रष्टा भवति । अत्रैगुण्याच्चास्य कैवल्यम् । आत्यन्तिको हि दुःखत्रयाभावः कैवल्यम् । तच्च तस्य स्वाभाविकादेवात्रैगुण्यात्सुखदुःखमोहरहितत्वात् सिद्धम् । अत एवात्रैगुण्यान्माध्यस्थ्यम् । सुखी हि सुखे तुष्यन् दुःखी हि दुःखं द्विषन् मध्यस्थो न भवति । तदुभयरहितस्तु मध्यस्थ इति चोदासीन इति चाख्यायते । विवेकित्वादप्रसवधर्मित्वाच्चाकर्तेति सिद्धमिति । तस्मान्न बध्यत इति कारिकायां तस्मादित्युपसंहारार्थम् । नानाश्रयेत्यस्य नानापुरुषाश्रया सन्तीत्यर्थः । अनेन बन्धमोक्षसंसाराः प्रकृतिगताः पुरुषे उपचर्यन्ते यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते । तदाश्रयेण भृत्यानां तद्भागित्वात् । तत्फलस्य च शोकलाभादेः स्वामिसम्बन्धत्वात् । भोगापवर्गयोश्च प्रकृतिगतयोरविवेकग्रहात्पुरुषसम्बन्ध इत्युक्तं भवति ।

कं०रा०— विपर्यासादिति । निर्विकारचैतन्यमात्रस्वरूपत्वादित्यर्थः । **भोक्तृभावादिति** । सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्चेति केचित्साङ्ख्याश्चेतनस्य भोक्तृतामाहुरिति भावः ।

श्रीनिधि०— तस्माच्च विपर्यासादिति । **विपर्यासो** विपर्ययः । राहित्यमिति यावत् । क्रियावेशराहित्यादित्यर्थः । साक्षित्वमित्यस्य विवरणं **माध्यस्थ्यं द्रष्टृत्वमिति** । माध्यस्थमिति क्रियाविशेषणम् । कैवल्यमित्यस्य विवरणम् **अकर्तृभाव इति** । **नानाश्रयेति** । संसारबन्धमोक्षादिनानाधर्माश्रयेत्यर्थः ।

शे०वा०— यथोक्तमिति । अयमर्थः । चशब्दः पुरुषभेदेन धर्मान्तराणां समुच्चयार्थः । अत्र च विपर्यासादित्येवोक्ते त्रैगुण्यविपर्यासादित्यनन्तरोक्तं सम्बध्यते तन्निरासाय तस्मादित्युक्तम् । अनन्तरोक्तं हि सन्निधानात् इदमो विषयो विप्रकृष्टं च तदो विषय इति विप्रकृष्टं त्रिगुणं सम्बध्यते । तस्मात् त्रिगुणादेर्यो विपर्यासः पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वं अप्रसवधर्मित्वं च । तस्मात् तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते । चेतनो हि द्रष्टा भवति । नाचेतनः । साक्षी च दर्शितविषयो भवति । यस्मै हि प्रदर्श्यते विषयः स साक्षी । यथा हि लोकेऽर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः । एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति चैतन्यादविषयत्वाच्च भवति साक्षी । अत एव द्रष्टाऽपि भवति अत्रैगुण्याच्चास्य कैवल्यम् । आत्यन्तिको हि दुःखत्रयाभावः कैवल्यं तस्य स्वाभाविकादेव अत्रैगुण्यात् सुखदुःखमोहरहितत्वात्सिद्धम् । अत एव अत्रैगुण्यान्माध्यस्थ्यम् । सुखी हि सुखं तुष्यन् दुःखी दुःखं द्विषन् न मध्यस्थो भवति तदुभयरहितस्तु मध्यस्थ उदासीन इति चोच्यते । विवेकित्वादप्रसवधर्मत्वाच्च अकर्तेति सिद्धमिति । **यथा भोक्तृभावादितीति** । यद्यप्येतत्प्रागन्यथा व्याख्यातत्वान्न विवक्षितार्थसाधकं, तथाऽपि करिष्यमाणं व्याख्यानमभिप्रेत्य सम्मतितयाऽस्योपन्यास इति द्रष्टव्यम् । **यथेति** । पुरुषश्चेदगुणोऽपरिणामी कथं तर्ह्यस्य मोक्षः । मुचेर्बन्धनविश्लेषार्थत्वात् । तस्मात्पुरुषमोक्षार्थमिति रिक्तं वच इत्याशङ्कानिरासायेदमुच्यते **तस्मादिति** । कस्तर्हीत्यत आह **बद्ध्यत इति** । अविद्वान्न कश्चित्पुरुषो बद्ध्यते न कश्चित्पुरुषः संसरति न कश्चित्पुरुषो मुच्यते प्रकृतिरेव नानापुरुषाश्रया प्रतिबद्ध्यते संसरति मुच्यते चेति बन्धमोक्षसंसाराः पुरुषे उपचर्यन्ते । यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तदाश्रयेण भृत्यानां तद्गामित्वात् तत्फलस्य शोकलाभादेः स्वामिनि सम्बन्धात्, तथा भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात् पुरुषस्य सम्बन्ध उपपादित इति न दोषः ।

वा०र०— तस्माच्चेति । पुरुषबहुत्वेन धर्मान्तराणि समुच्चिनोति इत्यादि भामत्यनुसारेणाह **चशब्दः पुरुष भेदेनेत्यादिना** । त्रैगुण्यविपर्यासादिति पाठोऽर्थानुवादः । त्रैगुण्यविपर्ययाच्चेति अष्टादशकाशिकायां उक्तेः । एतत्कारिकाव्याख्याने त्रैगुण्यविपर्यासात् इत्यनन्तरोक्तं सम्बध्यते इत्येवोक्तेश्च । त्रैगुण्यविपर्ययासात् इत्येव पाठस्तु स्वरस एव । अयमर्थः । पूर्वकारिकायां त्रैगुण्यविपर्ययासात् इति उक्तेः अत्र विपर्ययासा इत्येवोक्ते व्यवधानेन प्रकृतं बुध्या विविच्य त्रैगुण्यमेव सम्बध्येत इति तत्परिहाराय तस्माद्विपर्ययासादित्युक्तमिति । कथमनेन त्रैगुण्यस्य सन्निहितस्य निरासलाभः इत्यत आह **अनन्तरोक्तं हीति** । **त्रिगुणमिति** । त्रिगुणमविवेकीत्यादिनोक्तमित्यर्थः । तस्मात् त्रिगुणादेरिति त्रिगुणत्वादेरिति भामती । त्रयो गुणा त्रिगुणमिति त्रिगुणमित्येतत् कारिकाव्याख्यानानुसारेण त्रिगुणाद्यात्मकात् यो विपर्यासः इत्यर्थप्रतीतेः गुणादेः इत्येवोक्तम् । विपर्ययासश्च धर्मद्वारैवेति त्रिगुणादिरूपप्रधानधर्मत्रिगुणत्वादिविपरीतमत्रिगुणत्वादि लभ्यते इत्याशयेन त्रिगुणत्वमित्यादि चोक्तमिति द्रष्टव्यम् । अविवेकित्वं अविषयित्वं असाधारणत्वं अविषयत्वं पदघटित एव पाठः । तत्पदत्यागो लेखकागतः । अत एव प्रागपि प्रकृतेस्त्रिगुणं अविवेकविषय इति

विषयत्वमुक्तम् । **अविषयत्वेन चेति** । वक्ष्यति च त्रिगुणत्वादिषड्विधविपर्ययासस्य विशेषेण साक्षित्वादि-साधकमिति प्रतीतिनिरासाय तत्तद्योग्यहेतुं तत्र तत्र हेतुतया दर्शयति **तत्र इति** । चेतनत्वेनेत्यादेः यथायोग्यं सम्बन्धः । अत एव चेतनो हीत्यदि वक्ष्यते । तथा च चेतनत्वाद्द्रष्टा । अविषयत्वाच्च साक्षि इति दर्शितं भवतीत्यर्थः । अविषयत्वं उपपादयति **साक्षी चेति** । यः दर्शितविषयः साक्षीत्युच्यते इत्यर्थः । दर्शितविषयत्वं विवृण्वन् तत्र लोकप्रसिद्धिं प्रमाणमाह **यस्मै हीति** । लोके हि अप्रत्यर्थिनो विवादविषयं साक्षिणे दर्शयतः इति भावः । **एवमिति** । लौकिकसाक्षिवदित्यर्थः । दर्शयतीति पुरुषः । साक्षीति भामत्यनुसारात् दर्शयतीति साक्षी भवतीति सम्बन्धः । साक्षित्वे विषयत्वाभावस्यैव साधकतया उक्तत्वेऽपि न चाचेतनो विषयो वा शक्यो विषयं दर्शयितुं इति चैतन्यात् अविषयत्वाच्च भवति साक्षीति भामत्यनुसारेण न केवलं विषयत्वाभावेनैव साक्षित्वं द्रष्टृत्वसाधकतया उक्तचैतन्यादपीत्याशयेन चैतन्यादित्युक्तम् । एवं द्रष्टृत्वेऽपि चेतनत्वस्येव विषयत्वाभावस्यापि साधकता इत्याशयेन द्रष्टृत्वे उभयोरपि व्यापारमाह **अत एवेति** । **आत्यन्तिको हीति** । आत्यन्तिक-दुःखत्रयाभावरूपं हि कैवल्यं तस्य स्वाभाविकादेवेत्यादि सिद्धमिति सम्बन्धः । **दुःखत्रयाभावः कैवल्यम्** । **तत्र तस्येति** । भामती । अत्रैगुण्यादित्यस्यैव व्याख्यानं **सुखदुःखमोहरहितत्वादिति** । सुखी हि सुखं तुष्यन् दुःखी दुःखं द्विषन् न मध्यस्थो भवतीति पाठः । सुखी हि सुखेन तुष्यन् दुःखी च दुःखं द्विषन् मध्यस्थो न भवति इति भामति । सुखं तुष्यन् मध्यस्थो न भवतीति सम्बन्धः । सिद्धमतीत्यत्रत्येतिशब्दस्य इत्ययमर्थ इति पूर्वेण सम्बन्धः । **प्रागन्यथेति** । सङ्घातपरार्थत्वादिहेतुसिद्धः इत्येतत् मूलव्याख्यावसरे तत्कारिकोदाहरण-पूर्वकं सङ्घातपरार्थत्वादिहेतुविवरणावसरे भोक्तृभावात् इत्यस्य द्रष्टृभावो तु दृश्येत द्रष्टुरनुमानात् इति व्याख्यान-त्वात् इत्यर्थः । प्रागित्यतःपूर्वं अस्माभिः तत्कारिकाटीकारीत्या इतीति शेषः । ततश्च भोक्तृभावादित्यस्य दृश्येन द्रष्टुरनुमानात् इत्यर्थकतया सुखाद्यनुभवितृत्वात् इत्यर्थकत्वाभावेन पुरुषस्योक्तविधभोक्तृत्वरूपविव-क्षितार्थसाधकत्वाभावः इत्यर्थः । यद्वा तस्मात् यो सुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति तद्व्याख्यानादुक्तार्थसाधकत्वाभावः इत्यर्थः । **करिष्यमाणमिति** । सुखदुःखाद्यनुभवितृत्वं हि भोक्तृत्वमिति व्याख्यानमभिप्रेत्येत्यर्थः । तस्मात् न बाध्यते इत्येतत् कारिकाटीकाद्वयानुसारेणाह **पुरुषश्चेदगुण इत्यादि** । इयं कारिकाऽवलोकनीयास्ति ।

स०व्र०— यथोक्तमिति । चशब्दः पुरुषबाहुल्ये(भेदे)न सह धर्मान्तराणि समुच्चिनोति । अत्र विपर्यासादित्येवोक्ते 'त्रैगुण्यविपर्ययात्' इत्यनन्तरोक्तं सम्बध्येत । अतः तन्निरासाय तस्मादित्युक्तम् । अनन्तरोक्तं हि सन्निधानात् इदमो विषयः, विप्रकृष्टं तदो विषय इति विप्रकृष्टं त्रिगुणं सम्बध्यते । तस्मात्, त्रिगुणादेः यो विपर्यासः पुरुषस्य अत्रिगुणत्वं, विवेकित्वम्, अविषयत्वम्, असाधारणत्वम्, चेतनत्वम्, अप्रसविधर्मत्वं च, तस्मात् तत्र चेतनत्वेन अविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते । चेतनो हि द्रष्टा भवति । नाचेतनः । साक्षी च दर्शितविषयो भवति । यस्मै हि प्रदर्श्यन्ते विषयाः स साक्षी । एवं प्रकृतिरपि स्वरचितं विषयं पुरुषाय दर्शयतीति चैतन्यादविषयत्वाच्च भवति साक्षी । अत एव द्रष्टापि भवति । अत्रैगुण्याच्चास्य

कैवल्यम् । आत्यन्तिको हि दुःखत्रयाभावः कैवल्यं तस्य च स्वाभाविकादेवात्रैगुण्यात् सुखदुःखमोहरहितत्वात् सिद्धम् । अत एवात्रैगुण्यान्माध्यस्थ्यम् । सुखी हि सुखं तुष्यन् दुःखी दुःखं द्विषन् न मध्यस्थो भवति । तदुभयरहितस्तु मध्यस्थ उदासीन इति चाख्यायते । विवेकित्वाच्चाप्रसवधर्मित्वाच्च अकर्तेति सिद्धम् । **भोक्तृभावादिति** सङ्घातपरार्थत्वादित्येतच्छ्लोकव्याख्यानावसरे विवृतम् । **तस्मात् न बध्यते इति** । अगुणत्वात् अपरिणामित्वाच्चेत्यर्थः । कस्तर्हीत्यत आह **बध्यत इति** । अविद्वान् न कश्चित् पुरुषो बध्यते न संसरति न कश्चित्पुरुषो मुच्यते इति प्रकृतिरेव नानापुरुषाश्रया सती बध्यते संसरति प्रमुच्यते चेति बन्धमोक्षसंसाराः पुरुष उपचर्यन्ते इति । यथा जयापजयौ भृत्यगतावपि स्वामिनि उपचर्येते तदाश्रयाणां भृत्यानां तद्गामित्वात् तत्फलस्य । (तद्वत् पुरुषस्य) शोकलाभादेः स्वामित्वसम्बन्धात् भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात् पुरुषस्य सम्बन्ध उपपादित इति (न दोषः) । पुष्कलं सर्वम् ।

विष्टल०— तत्रेति । एवं कर्तृत्वाभावे समाने सत्यपीत्यर्थः । **भोक्तृभावादिति** । भोक्तृत्वादित्यर्थः । 'तस्मान्न बध्यत' इत्यत्र तस्मादित्येतद्ग्रन्थपूर्वोक्तोपसंहारार्थकश्चित्पुरुषः नापि संसरति सुखदुःखादिकं नानुभवतीत्यर्थः । नानापुरुषाश्रया प्रकृतिर्बध्यते संसरति मुच्यते चेत्यर्थः । तथा च प्रकृतिगतबन्धसंसारमोक्षाः पुरुषे उपचर्यन्त इति भावः ।

चषकः— तद्वचनं सम्मतित्वेनोदाहरति **यथोक्तमिति** । तस्मादित्यत्र सर्वनाम्ना त्रिगुणमविवेकीत्यादि परामृश्यते । तद्विपर्यासाच्चेतनत्वादिरूपात्साक्षित्वं तत एव द्रष्टृत्वम् । त्रैगुण्यराहित्यात्कैवल्यं तत एवोदासीनत्वान्माध्यस्थ्यं तत एवाकर्तृभावश्च सिद्ध इत्यर्थः । **नापि संसरतीति** । सुखदुःखादिभोगवान्न भवतीत्यर्थः । **नानाश्रया** नानापुरुषसम्बन्धिनी ।

॥ इति चेतनस्य भोक्तृत्वाभोक्तृत्वाभ्यां मतद्वैविध्यम् ॥

* * *

॥ अथ तत्र चेतनस्य भोक्तृत्वं वदतां मतानुसारेण
'चेतनस्य कर्तृत्वाभावेऽपि भोक्तृत्वो'पपादनप्रकारः ॥

१८ सु०— ननु कर्तृताभावे भोक्तृत्वमपि कथम् । तस्यापि क्रियावेशात्मकत्वादित्यत आह स्वरूपेति ।

अनु०— स्वरूपचैतन्यबलात्स्वप्रकाशाच्च भोगिताम् ।

सुखदुःखाद्यनुभवितृत्वं हि भोक्तृत्वम् । तच्चात्मनः(ा) क्रियावेशमन्तरेण स्वरूपचैतन्येनैवोपपद्यत इत्याहुः । कुतो भोक्तृत्वमाहुरित्यत उक्तं स्वप्रकाशादिति । सुखाद्यनुभवितृत्वस्य स्वप्रतीतिसिद्धत्वादित्यर्थः । यथाऽऽह, भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यमिति । न चैवं कर्तृत्वमप्यङ्गीकर्तुमुचितम्, उपपत्तिबाधितत्वेन कर्तृत्वप्रतीतेरध्यासरूपत्वात् ।

परि०— प्रकाश्यत इति प्रकाशः स्वस्य प्रकाशः तस्मात् स्वप्रकाशात् । भावसाधनं चेदमित्युपेत्यार्थमाह **स्वप्रतीतिसिद्धत्वादिति** । **उपपत्तीति** । क्रियावेशो हि इत्यादिना प्रागुक्तोपपत्तिबाधितत्वेनेत्यर्थः ।

यादु०— **स्वप्रतीतिसिद्धत्वादिति** । अनेन मूले प्रकाशशब्दः कर्मणि व्युत्पन्न इत्युक्तं भवति । भोक्तृत्वं स्वरूपचैतन्येनैवेत्यत्र सम्मतिमाह **यथाऽऽहेति** । नन्वेवं भोक्तृत्वस्य स्वाभाविकत्वापत्त्याऽपवर्गाभावप्रसङ्ग इत्यत उक्तं **योग्यतेति** । तथा च मोक्षे भोक्तृत्वयोग्यतासत्त्वेऽपि फलोपधानरूपस्य तस्याभावात् पुरुषार्थत्वोपपत्तिरिति भावः ।

श्रीनिधि०— **कुतो भोक्तृत्वमाहुरिति** । कुतः प्रमाणादित्यर्थः ।

शे०वा०— **क्रियावेशात्मकत्वादिति** । तस्य च परिस्पन्दनादिलक्षणस्य सर्वगतत्वादिना आत्मन्यसम्भवादिति भावः । स्वरूपचैतन्यबलादित्युक्तार्थे परस्यासम्मतिमाह **यथाऽऽहेति** । भोक्तृत्वयोग्यत्वं सुखदुःखाद्यनुभवितृत्वयोग्यत्वं पुरुषस्य चेतनत्वमित्यर्थः । **उपपत्तिबाधितत्वेनेति** । क्रियावेशो हि कर्तृत्वमित्यादिपूर्वोक्तोपपत्तिबाधितत्वेनेत्यर्थः ।

वा०र०— **स्वरूपचैतन्येति** । स्वरूपचैतन्येनैव इत्युक्तस्यार्थानुवादो बलात् इत्युक्तार्थ इत्यादि । यद्वा स्वरूपचैतन्यबलादित्यस्योक्तार्थ इत्यर्थः । तेन सुधायामिदं वाक्यं नास्तीति शङ्का न भवति ।

स०व्र०— **यथाऽऽहेति** । टीकाकार इति शेषः । पुरुषस्य भोक्तृत्वयोग्यता या सा पुरुषस्य चैतन्यमेवेत्यर्थः । **उपपत्तिबाधितत्वेनेति** । 'क्रियावेशो हि कर्तृत्वम्' इत्यादिपूर्वोक्तोपपत्तिबाधितत्वेनेत्यर्थः ।

विट्ठल०— निष्क्रिये भोक्तृताकस्याप्रमाणादिति शङ्कते **कुतो भोक्तृतेति** । **स्वप्रतीतिसिद्धत्वादिति** । अनेन मूले प्रकाशशब्दः कर्मणि व्युत्पन्न इत्युक्तं भवति । भोक्तृत्वं स्वरूपचैतन्यमेवेत्यत्र सम्मतिमाह **यथाऽऽहेति** । मुक्तौ तु योग्यतामात्रं न फलोपधानम् । अतः पुरुषार्थत्वं मुक्तेरिति योग्यतापदं प्रयुञ्जानस्य

भावः । अन्यथा भोक्तृत्वं पुरुषस्य चैतन्यमित्येवं ब्रूयात् । **न चैवमिति** । कर्तृत्वस्याप्यहं कर्तेति प्रतीति-सिद्धत्वादित्यर्थः ।

चषकः— मौलपञ्चम्यन्तप्रकाशपदस्य कर्मसाधनतां भावप्रधानतां चोपेत्य व्याचष्टे **स्वप्रतीतीति** । **उपपत्तीति** । क्रियावेशहीनत्वादित्यर्थः ।

॥ इति चेतनस्य भोक्तृत्वं वदतां मतानुसारेण
'चेतनस्य कर्तृत्वाभावेऽपि भोक्तृत्वो'पपादनप्रकारः ॥

* * *

॥ अथ तत्र अभोगवादिनां मतानुसारेण भोगस्वरूपम् ॥

१९ **सु०— नन्वेवं तर्हि प्रतीतिसिद्धं भोक्तृत्वमपरे कथं नाभ्युपयन्तीत्यत आह प्रकृतेश्चेति ।**

अनु०— प्रकृतेश्च स्वरूपस्य विवेकाग्रहमेव तु ।
अभोगवादिनो भोगमाहुः

भोगं भोगव्यवहारकारणम् ।

अयं तेषामाशयः, 'भोक्तृत्वं हि न पुरुषस्य स्वभावः, अपवर्गाभावप्रसङ्गात् । आगन्तुकं तु नोपपद्यते, अपरिणामित्वात् । अतः कर्तृत्वमिव भोक्तृत्वमप्यात्मनो न शक्यमङ्गीकर्तुम् । न च प्रतीतिविरोधः, प्रतीतेरभावात् । व्यवहार एव हि केवलं भोक्ताऽऽत्मेति, स च कर्तृत्वव्यवहारवत् प्रकृतिपुरुषविवेकाग्रहमात्रनिबन्धन इति ।

यादु०— भोक्तात्मेतीति । इदमुपलक्षणम् । अहं सुखी दुःखीत्यादिरपि व्यवहार एवेत्यपि द्रष्टव्यम् ।

कं०रा०— प्रकृतिपुरुषविवेकाग्रहस्य भोगरूपत्वाभावात् 'प्रकृतेश्च स्वरूपस्य विवेकाग्रहमेव तु । अभोगवादिनो भोगमाहुरि'त्येतदनुपपन्नमित्यतो व्याचष्टे **भोगमिति** । **अपवर्गाभावेति** । सुखदुःखादिभोक्तृत्वस्य चेतनस्य भावत्वे स्वभावस्यानपायेनापवर्गाभावप्रसङ्ग इति भावः । **पुरुषस्येति** । पुरुषस्य प्रधानोपभोगार्थं

कैवल्यार्थं च पुरुषसंयोगात् प्रधानं सर्गादौ प्रवर्तत प्रधानपुरुषयोः संयोग एव कथमित्यत उक्तम् । **पंग्वन्धवदिति** । यथा पंग्वन्धयोः संयोगः पंग्वन्धाभ्यामेव जायते न हेत्वन्तरात्तथा प्रधानपुरुषयोरपि संयोगस्ताभ्यामेव जायते न हेत्वन्तरात्तादृशसंयोगकृतः सर्वोऽपि सर्ग इत्यर्थः ।

श्रीनिधि०— प्रकृतिपुरुषविवेकाग्रहमात्रनिबन्धन इति । अनेन प्रकृतेः स्वरूपस्य च विवेकाग्रहमेव भोगव्यवहारकारणमाहुरिति मूलयोजना उक्ता भवति ।

शे०वा०— स च कर्तृत्वव्यवहारवदिति । न चोपपत्तिबाधितत्वेन कर्तृत्वप्रतीतेरध्यासरूपत्वादित्यादिग्रन्थानुरोधेन, आरोपरूपकर्तृत्वप्रतीतेरभ्युपगमस्य सिद्धत्वात् कर्तृत्वव्यवहारस्य विवेकाग्रहनिबन्धनत्वाभावात् कर्तृत्वव्यवहारवदिति कथं दृष्टान्तीकरणमिति वाच्यम्, मतान्तराभिप्रायकत्वात् । तस्य ग्रन्थस्य तदनुरोधेनैतन्मते तदसिद्धेः । एतन्मते तु भोक्तृत्वप्रतीतिवत् कर्तृत्वप्रतीतिरपि नास्त्येवेति युक्तं दृष्टान्तीकरणमित्यवधेयम् ।

वा०र०— ग्रन्थानुरोधेनेति । स्वरूपचैतन्यबलादित्यनुव्याख्यानसम्बन्धि 'न चैवं कर्तृत्वमप्यङ्गीकर्तुमुचितमि'त्यत्रेति शेषः । कर्तृत्वप्रतीतिरपि नास्त्येवेति विवेकित्वात् अप्रसरधर्मित्वाच्च । अकर्तेत्यर्थकः कर्तृभावश्चेति कारिकोक्तेरित्यर्थः इति भावः ।

स०व्र०— स च कर्तृत्वव्यवहारवदिति । न च पूर्वं प्रतीतेरध्यासरूपत्वादित्यनेनारोपरूपप्रतीतेरङ्गीकृतत्वात् व्यवहारवदिति दृष्टान्तकथनमयुक्तमिति वाच्यम् । अभोगवादिना तस्य अनङ्गीकृतत्वात् । परं तु तद्विषयकव्यवहारस्य स्वमते सिद्धत्वाभिप्रायेण कर्तृत्वव्यवहारवदिति तेषामाशय इत्युक्तमिति न विरोधः ।

विट्ठल०— अपवर्गाभावेति । सुखदुःखादिभोक्तृत्वस्य स्वभावत्वे स्वभावस्यानपायादभोक्तृत्वरूपापवर्गाभावप्रसङ्ग इति भावः । भोक्तृत्वं न स्वभावः किन्तु संसारे आगन्तुकमित्यत आह **आगन्तुकं त्विति** । येषामित्यतःपरम् अत इति शेषः ।

॥ इति अभोगवादिनां मतानुसारेण भोगस्वरूपम् ॥

* * *

॥ अथ तत्र भोगवादिनां मोक्षस्वरूपम् ॥

२० सु०— स्यादेतत् । येषां पुरुषो भोक्ता तेषां मोक्षाभावः स्यात् । प्रकृतिसंयोगनिमित्तो हि पुरुषस्य भोगस्तैरङ्गीक्रियते, 'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा

प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः' इति वचनात् । न च प्रकृतिपुरुष-संयोगः कदाप्यपैति येन पुरुषस्य मोक्षः स्यादित्यत आह भेदग्रहादिति ।

अनु०— भेदग्रहात्तयोः ।

भोगिनां मुक्तिरुद्दिष्टा

तयोः प्रकृतिपुरुषयोः **भोगिनां** पुरुषस्य भोगमभ्युपगच्छतां, मते । अयमभि-सन्धिः तेषाम् । प्रकृतिसंयोगो हि पुरुषस्य न केवलं भोगार्थः, किन्नामापवर्गार्थश्च । तत्र विवेकाग्रहसचिवो भोगाय भवति, विवेकग्रहे चापवर्गाय । करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिः, अनया विवेकख्यातिरकृतेति । कृतविवेकख्यातिस्तु न शब्दा-द्युपभोजयति, अविवेकख्यातिनिबन्धनो हि तदुपभोगो निबन्धनाभावे न भवितुमर्हतीति । तच्चोक्तम् 'दृष्टा मयेत्युपेक्षक एको, दृष्टाहमित्युपरमत्यन्या । सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य' इति । तथा 'रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात् । पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिरि'ति । न च निवृत्ताऽपि पुनः प्रवर्त्स्यतीति शङ्कनीयम्, प्रयोजनाभावात् । उक्तं च 'प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मति-र्भवति । या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य' इति । न च भेदग्रहसद्भावात् कैवल्याभावः, तस्यापि स्वेनैव निवृत्तेः ।

परि०— पुरुषस्य दर्शनार्थमिति । पुरुषकर्तृकप्रधानकर्मकदर्शनार्थम् । अत एव प्रकृति-पुरुषविवेके सति कैवल्यं भवतीति पुरुषस्य कैवल्यार्थमित्यर्थः । **पङ्ग्वन्धादिवदिति** । अन्ध-पङ्ग्वदित्यर्थः । अजाद्यदन्तमित्येतन्नाश्रितम् । **कदाप्यपैतीति** । विभुत्वादित्यर्थः । **विवेकग्रहे चापवर्गायेति** । भवतीति पूर्वेणान्वयः । तत्कथमित्यतो द्वयमपि व्यनक्ति **करोतु नामेति** । **विवेकेति च** । **अनया** प्रकृत्या । अकृतेतीतिशब्दो हेत्वर्थः पूर्वेणान्वयः । **कृतेति** । अनये-त्यनुषङ्गः । **दृष्टेति** । स्वविविक्तत्वेन दृष्टेत्यर्थः । **उपेक्षकः** शब्दादेरभोक्ता । **उपरमतीति** । शब्दादिकं न भोजयति प्रकृतिरित्यर्थः । **रङ्गस्येति** । रङ्गस्थजनस्येत्यर्थः । **दर्शयित्वा** स्वकीयनर्तनमिति योज्यम् । **तस्यापि स्वेनैवेति** । कतकरजोन्यायेनेति भावः ।

यादु०— 'पुरुषस्य दर्शनार्थमि'ति कारिकाया अयमर्थः । प्रधानस्येति कर्मणि षष्ठी । प्रधानस्य सर्वकारणस्य दर्शनं यत्पुरुषेण तदर्थम् । तदनेन भोग्यता प्रधानस्य दर्शिता । ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्ता तस्य भोक्त्रपेक्षा । पुरुषस्यापेक्षां दर्शयितुं पुरुषस्य कैवल्यार्थमिति । तथा भोग्येन हि प्रधानेन सम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते । तच्च सत्त्वपुरुषान्यथाख्यातिनिबन्धनम् । न च सत्त्वपुरुषान्यथाख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते । अनादित्वाच्च संयोगपरम्पराया भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यत इति युक्तम् । ननु भवत्वेतयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत उक्तं **तत्कृतः सर्ग इति** । संयोगो हि महदादिसर्गमन्तरेण न भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थं सर्गं करोतीत्यर्थ इति । 'दृष्टा मयेत्युपेक्षक एक' इत्यस्यायमर्थः । एकः पुरुषो मया दृष्टा भिन्नतया ज्ञाता प्रकृतिरिति मत्वोपेक्षको भवति शब्दाद्युपभोगं न करोतीत्यर्थः । अन्या प्रकृतिरहम् अनेन पुरुषेण स्वभिन्नतया दृष्टेति मत्वोपरमति शब्दादि नोपभोजयतीत्यर्थः । तयोः संयोगे सत्यपीत्यन्वयः । **सर्गस्य प्रयोजनं नास्तीति** । भोगाय विवेकज्ञानाय वा सर्गोऽङ्गीकार्यः । विवेकख्यात्यनन्तरं च तयोः प्रयोजनयोरभावान्न सर्ग इत्यर्थः । तथा हि । कृतविवेकख्यातिरात्मा न शब्दाद्युपभोगं करोति । तन्निबन्धनाविवेकख्यातेरपगमात् । नापि विवेकख्यातिं प्राकृतीं ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हति । पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थौ सन्तौ न प्रकृतिं प्रयोजयतः तदिदमुक्तम् । **प्रयोजनं नास्ति सर्गस्य इति** । अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनं तत् पुरुषार्थत्वेन चास्तीत्यर्थ इति । रङ्गस्य दर्शयित्वेत्यस्य रङ्गस्येति स्थानेन स्थानिनः पारिषदान् लक्षयति । आत्मानं शब्दाद्यात्मना पुरुषाभेदेन प्रकाश्येत्यर्थो ज्ञातव्यः । **पुनः प्रवर्त्स्यतीति** । यथा नर्तकी नृत्यं पारिषदेभ्यो दर्शयित्वा निवृत्तापि पुनस्तत्कुतूहलात्प्रवर्तते तथेत्यर्थः । **प्रयोजनाभावादिति** । उक्तरीत्या प्रकृतिप्रवृत्तिप्रयोजकयोर्भोगविवेकज्ञानरूपप्रयोजनयोरभावादित्यर्थः । पुनरप्रवृत्तौ निमित्तान्तरं तदभिमतं दर्शयितुमाह **उक्तं चेति** । **सुकुमारतरमिति** । पुरुषदर्शनासहिष्णित्वत्यर्थः । या दृष्टाऽस्मीत्यत्र विवेकेनेति शेषः । अयं भावः । असूर्यंपश्या हि कुलवधूर्या यदि प्रमादात् परपुरुषेणालोक्यते तदा तथा प्रयतते, कथं, यथा पुरुषान्तराणि न पुनः पश्यन्तीत्येव प्रकृतिः कुलवधूतोऽप्यधिका, दृष्टा विवेकेन, न पुनर्दृश्यत इति । **न च भेदग्रहेति** । भेदग्रहरूपान्तःकरणवृत्तिनाशकस्यान्यथाभावादित्यर्थः ।

वं०प०— कुत इत्यत आह **अनयेति** । प्रकृत्येत्यर्थः ।

कं०रा०— **करोत्विति** । प्रकृतिः पौनःपुन्येन शब्दाद्युपभोगं करोति नामेत्यन्वयः । कस्मादेवं करोतीत्यतस्तत्र हेतुमाह **अनयेति** । **अनया** प्रकृत्या **विवेकख्यातिरकृतेति** अतःशब्दाद्युपभोगं करोतीति पूर्वेणान्वयः । कृता विवेकख्यातिर्यया सा एवंविधा प्रकृतिस्तु न **शब्दाद्युपभोजयति** इत्यर्थः । **अविवेकख्यातीति** । विवेकख्यात्यभावनिबन्धन इत्यर्थः । **दृष्टेति** । मयेयं प्रकृतिर्विविक्ततया दृष्टेत्येकः

पुरुषशब्दादीन्नोपभुङ्क्ते अन्या प्रकृतिरहं पुरुषेण विविक्ततया दृष्टेत्यपरमिति शब्दादिकं नोपभोजयतीत्यर्थः । **उक्तं चेति** । रमेः परस्मैपदं प्रवत्स्यतीति वृद्धचः स्पसनोरिति वृत्तेः परस्मैपदम् । **तस्यापीति** । भेदग्रहस्यापीत्यर्थः । **स्वेनैवेति** । भेदाग्रहनिबन्धनभ्रमनिवृत्तिरेवेत्यर्थः ।

श्रीनिधि०— पुरुषस्य दर्शनार्थमिति । पुरुषस्येत्यावर्तनीयम् । तथा च पुरुषस्य दर्शनार्थं कैवल्यार्थं च । पुरुषस्य प्रकृतेश्चेत्युभयोरपि संयोगः । **ततः** अनन्तरं तत्कृतः सर्गः । प्रकृतिपुरुष**संयोगकृतः** शरीरेन्द्रियादिसर्ग इत्यर्थः । **पौनःपुन्येन** पुनः पुनः । **अनया विवेकख्यातिरिति** । तत्प्रतियोगिको यो विवेकः ज्ञानमित्यर्थः । **सर्गेऽस्या इति** । **अस्याः** प्रकृतेस्सर्गे । एतत्कर्तृकाया इत्यर्थः । अस्येति क्वचित्पाठः । तदा अस्य शरीरेन्द्रियादेरित्यर्थः । **रङ्गस्य** नाट्यदेशस्थजनस्य । **प्रकृतेः सुकुमारतरमिति** । प्रकृतेः सकाशात् सुकुमारतरम् । अत्यन्तं = मनोहरतरं कार्यं न **किञ्चिदस्ति इति मे बुद्धिर्भवति** ।

शे०वा०— पुरुषस्येत्यस्यायमर्थः । प्रधानस्येति कर्मणि षष्ठी । प्रधानस्य सर्वकारणस्य पुरुषेण यद्दर्शनं तदर्थम् । तदनेन भोग्यता प्रधानस्य दर्शिता । ततश्च प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्ताऽस्य भोक्त्रपेक्षा । पुरुषस्यापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम् । तथा भोग्येन हि प्रधानेन सम्भिन्नः पुरुषः तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते । तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनम् । न च सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थः पुरुषः प्रधानमपेक्षते । अनादित्वात् संयोगपरम्पराया भोगाय संयुक्तोऽपि पुनः कैवल्याय युज्यते इति युक्तम् । ननु भवत्वनयोस्संयोगो महदादिसर्गस्तु कुत इत्यत आह **तत्कृतः सर्ग इति** । संयोगो हि महदादिसर्गमन्तरेण न भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थे सर्वं करोतीत्यर्थ इति । **कदाऽप्यवैतीति** । विभुत्वादिति भावः । **तच्चोक्तमिति** । अयमर्थः । एकः पुरुषो मया प्रकृतिर्दृष्टा भिन्नतया ज्ञातेति मत्वोपेक्षको भवति । न शब्दाद्युपभुङ्क्ते इत्यर्थः । अन्या प्रकृतिरहमनेन पुरुषेण स्वभिन्नतया दृष्टेति मत्वोपरमति शब्दादि नापभोजयतीत्यर्थः । सति संयोगेऽपि तयोरित्यत्र तयोः संयोगे सत्यपीत्यन्वयः । सर्गस्य प्रयोजनं नास्तीत्यस्य भोगाय विवेकज्ञानाय वा सर्गोऽङ्गीकार्यः । विवेकख्यात्यनन्तरं च तयोः प्रयोजनयोरभावान्न सर्ग इत्यर्थः । तथा हि । कृतिविवेक-ख्यातिरात्मा न शब्दाद्युपभोगं करोतीति तन्निबन्धनाविवेकख्यातेरपगमात् । नापि विवेकख्यातिं प्रकृतिम् । ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हति । पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थौ सन्तौ न प्रकृतिं प्रयोजयतः । तदिदमुक्तं प्रयोजनं नास्ति सर्गस्येति । अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनम् । तत्पुरुषार्थत्वेन नास्तीत्यर्थः । ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्तको निवृत्तिस्तु कुतः प्रकृतेरित्यत उक्तं **रङ्गस्येत्यादि** । रङ्गस्येति स्थानेन स्थानिनः परिषदानुपलक्षयति । आत्मानं शब्दाद्यात्मना पुरुषाद्वेदेन च प्रकाश्येत्यर्थः । ननु यथा नर्तकी नृत्यं पारिषदेभ्यो दर्शयित्वा निवृत्ताऽपि पुनस्तत्कुतूहलात् प्रवर्तते, तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्ताऽपि पुनः प्रवर्त्स्यतीत्याशङ्क्य निषेधति **न चेति** । **प्रयोजनेति** । उक्तरीत्या प्रकृतिप्रवृत्तिप्रयोजकयोर्भोगविवेकज्ञानरूपप्रयोजनयोरभावादित्यर्थः । पुनरप्रवृत्तौ पुरुषदर्शनाद्यसह-

कृतत्वरूपं निमित्तान्तरमाह **उक्तं चेति** । सुकुमारताऽतिपेशलता । पुरुषदर्शनाद्यसहकृतेति यावत् । या दृष्टाऽस्मीत्यत्र विवेकेनेति शेषः । अयं भावः । असूर्यंपश्या हि कुलवधूर्यादि प्रमादात्परपुरुषेणेक्ष्यते तदा तथा यतते । यथैतां पुरुषान्तराणि न पुनः पश्यन्तीत्येवं प्रकृतिः कुलवधूतोऽप्यधिका दृष्टा विवेकेन न पुनः पुनर्द्रक्ष्यत इत्यर्थः । **भेदग्रहसद्भावादिति** । भेदग्रहरूपान्तःकरणनिवृत्तिनाशकाभावादिति भावः । **तस्यापि स्वेनैवेति** । कतकरजोन्यायेनेति भावः ।

वा०र०— भामत्यनुसारेणाह **प्रधानस्येत्यादि** । **सत्त्वपुरुषान्यतेति** । सत्त्वं = प्रकृतिः । प्रकृतिपुरुषान्यत्वज्ञानेत्यर्थः । अन्यथेति पाठः । थकारो लेखकागतः । **कैवल्याय युज्यते इतीति** । कैवल्याय युज्यत इत्यर्थः । कैवल्याय पुनः संयुज्यते इति भामती । सर्गं करोतीत्यर्थ इति पाठः । सर्गस्यैव प्रकृतत्वात् । सर्वमिति तु लेखकागतम् । भामत्यनुसारेण व्याचष्टे **एकः पुरुषः इत्यादि** । विवेकख्यातिरपि न पुरुषार्थः इत्याशयेनाह **विवेकख्यातिमिति** । अभिमानानर्हत्वोपपादनायोक्तं **प्रकृतीमिति** । प्रकृतिकार्यमित्यर्थः । ननु पुरुषार्थयोः भोगविवेकख्यात्योः कथं पश्चात् अपुरुषार्थत्वमित्यत आह **पुरुषार्थौ चेति** । **प्रकृत्यारम्भप्रयोजकाविति** । अपुरुषार्थाविति पाठः । नित्येति लेखकागतम् । इतिशब्दो हेतौ यतः । **प्रकृत्यारम्भप्रयोजकावतोऽपुरुषार्थाविति** । तयोः प्रकृत्यारम्भप्रयोजकतया पुरुषार्थत्वमारब्धायां तु प्रकृतौ पुरुषार्थत्वाभाव इत्यर्थः । भामत्यनुसारेण व्याचष्टे **रङ्गस्येति** । स्थानेन इत्यादि पारिषदान् । परिषदि विद्यमानान् । शब्दाद्यात्मनेति आदिपदगर्भपाठः । **असूर्यंपश्या हीति** । असूर्यमिति असमर्थसमासः । दृशिना नञः सम्बन्धात् । सूर्यं न पश्यतीति असूर्यंपश्या । असूर्यशब्दे कर्मण्युपपदे दृशेः असूर्यललाटयोः दृशितयोरित्यनेन स्वस्य सूर्यंपश्या राजदारा इतिवत् असूर्यंपश्येति रूपम् । भामत्यनुसारेणेदं व्युत्पादनम् । शिष्टं द्युभ्वाद्यधिकरणे प्रागस्माभिः प्रपञ्चितं ज्ञेयम् । भेदग्रहणसद्भावमुपपादयति **भेदग्रहरूपेति** । भेदग्रहरूपायान्तःकरणवृत्तिरिति योज्यम् ।

स०व्र०— पुरुषस्य दर्शनार्थमिति । प्रधानस्येति कर्मणि षष्ठी । प्रधानस्य सर्वकारणस्य यद्दर्शनं पुरुषेण तदर्थम् । तदनेन भोग्यता प्रधानस्य दर्शिता । ततश्च **भोग्यं** प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्ताऽस्य भोक्त्रपेक्षा । भोग्येन हि प्रधानेन सम्भिन्नः पुरुषः तद्गतं दुःखत्रयं स्वात्मनि अभिमन्यमानः कैवल्यं प्रार्थयते । तच्च सत्त्वपुरुषान्यथाख्यातिनिबन्धनम् । न च सत्त्वपुरुषान्यथाख्यातिः प्रधानमन्तरेणेति कैवल्यार्थः पुरुषः प्रधानमपेक्षते । अनादित्वाच्च संयोगफलपरम्पराया भोगाय संयुक्तोऽपि पुनः कैवल्याय युज्यत इति युक्तम् ।

ननु भवत्वनयोः संयोगः महदादिसर्गस्तु कुत इत्यत आह **संयोगो हीति** । संयोगो हि महदादिसर्गमन्तरेण न भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थः (सर्गं) करोतीत्यर्थः । **दृष्टेति** । करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिः । अनया विवेकख्यातिरकृतेति कृतविवेकख्यातिस्तु

न शब्दाद्युपभोजयति । अविवेकख्यातिनिबन्धनो हि तदुपभोगो निबन्धनाभावे न भवितुमर्हति अङ्कुर इव बीजाभावे । प्राकृतान् हि सुखदुःखमोहात्मनः शब्दादींश्च अविवेकादेवात्मा मदर्थेयमिति मन्यते । उत्पन्नविवेकः आत्मा न शब्दाद्युपभोगं करोति । पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थौ सन्तौ न प्रकृतिं प्रयोजयत इति । तदिदमुक्तं **नास्ति प्रयोजनं सर्गस्येति** । अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनम् । तच्च पुरुषार्थत्वेन नास्तीत्यर्थः । **रङ्गस्येत्यादि** । रङ्गस्येति स्थानेन स्थानिनः पारिषदानुपलक्षयति । आत्मानं शब्दाद्यात्मना पुरुषात् भेदेन च प्रकाश्येत्यर्थः । **प्रकृतेरिति** । **सुकुमारता** अतिपेशलता । परपुरुषदर्शनासहिष्णुतेति यावत् । असूर्यम्पश्या हि कुलवधू यदि प्रमादात् विगलितसिचयाञ्चला चेदालोक्यते परपुरुषेण तदाऽसौ, तथा प्रयतते यथैतां पुरुषान्तराणि न पुनः पश्यन्तीत्येवं प्रकृतिः कुलवधूतोऽप्यधिका दृष्टा विवेकेन न पुनर्द्रक्ष्यते इत्यर्थः ।

विट्ठल०— पुरुषस्येति कारिकाया अयमर्थः । प्रधानं तावत् स्वदर्शनार्थं भोगार्थं भोक्तारं पुरुषमपेक्षते दर्शनस्य चेतनसम्पकदिव प्रधानेऽङ्गीकारात् । पुरुषोऽपि स्वस्य कैवल्यार्थं प्रधानमुपेक्षते । प्रधानं सम्भिन्नता हि पुरुषस्य दुःखादिहेतुप्रकृतिपुरुषविवेकः कैवल्यहेतुः । अतः कैवल्यार्थं प्रधानापेक्षा तथा च पुरुषस्य प्रधानस्येत्युभयोः पंग्वन्धवत्परस्परापेक्षयोः सम्बन्धदर्शनार्थं कैवल्यं च भवति । ननु भवत्वेवमनयोः संयोगः महदादिसर्गस्तु कुत इत्यत आह **तत्कृतः संयोग इति** । प्रकृतिपुरुषसंयोगो हि महदादिसर्गमन्तरेण न भोगाय कैवल्याय च पर्याप्त इति भोगाय वर्गार्थयोग एव सर्गं करोतीत्यर्थः । विवेकाग्रहस्य भोगसाधनमुपपादयति **करोतु नामेति** । अनया मया प्रकृत्या दृष्टा । मयेत्यस्यायमर्थः । एकः पुरुषः मया प्रकृतेर्विविक्ततया दृष्ट इति मत्वा उपेक्षको भवति । तत्कार्यशब्दाद्युपभोगं न करोति । अन्या प्रकृतिः अनेन पुरुषेणाहं भिन्नतया दृष्टेत्यपरमिति नोपभोजयति । एवं च तयोः संयोगे सत्यपि सर्गस्य प्रयोजनं नास्ति भोगविवेकज्ञानार्थं हि सर्गः भोगाद्यभावो नास्य प्रयोजनमिति । **सर्गेऽस्या इति** पाठे तु सत्यपि संयोगे अस्याः प्रकृतेः सर्गविषये प्रयोजनं नेत्यर्थः । **रङ्गस्य** रङ्गस्थजनस्यादर्शयित्वानुत्तममिति शेषः निवर्तते ततःपरं प्रयोजनाभावादिति च । नृत्ते पुनस्तद्दर्शनौत्सुक्येन लोके प्रवृत्तिवदत्रापि प्रकृतिः पुनः प्रवर्तयतीत्यत आह **न चेति** । दर्शनोत्सुक्यकारणाभावान्न सर्वथात्रास्ति प्रवृत्तिप्रयोजनमित्यत्र सम्मतिमाह **उक्तं चेति** । प्रकृतेरन्यन्न सुकुमारतरं पुरुषदर्शनासहिष्णु नास्तीति मे मतिर्भवति । यानेन विविक्ततया दृष्टास्मीति मत्वा रागं जातः पुरयोषिदिवस्वगूहनेन पुरुषस्य न पुनर्दर्शनमुपैति । विविक्ततया ज्ञातप्रकृतेः सर्वथा पुनर्भोगाद्यहेतुत्वेन प्रयोजनाभावादिति भावः । ननु समस्तप्रकृतिकार्यविलोपो हि, कैवल्यं तथा च कैवल्यसाधनविवेकग्रहस्याप्यन्तःकरणवृत्तेः सद्भावात् कैवल्याभावः स्यादित्यत आह **न च भेदग्रहेति** ।

चषकः— पुरुषस्य दर्शनार्थं पुरुषकर्तृकप्रधानकर्मकदर्शनार्थम् । दृष्टेतिकारिकाया अयमर्थः । एकः पुमान् मया प्रकृतिर्दृष्टा भिन्नत्वेन ज्ञातेति मत्वोपेक्षको भवति शब्दाद्युपभोगं न करोति । अन्या प्रकृतिभिन्नेन

पुंसा स्वभिन्नत्वेन दृष्टेति मत्वोपरमति **शब्दादि नोपभोजयतीति** । रङ्गस्य रङ्गस्थजनस्य दर्शयित्वा स्वकीयनर्तनमिति योज्यम् । **तस्यापि स्वेनैवेति** । कतकरजोन्यायेनेति भावः ।

॥ इति भोगवादिनां मोक्षस्वरूपम् ॥

* * *

॥ अथ अभोगवादिनामपि मोक्षस्वरूपं तदेव ॥

२१ सु०— ननु च येषां मते पुरुषस्य भोग एव नास्ति तेषां कथं मोक्षः, बन्धाभावात्; तथा च योगानुशासनवैयर्थ्यमित्यत आह स एवेति ।

अनु०— स एवाभोगवादिनाम् ।

स भेदग्रह, एव मुक्तिरुद्दिष्टा । भेदाग्रहनिबन्धनो भ्रम एव हि बन्धः, स च भेदग्रहे सति निवर्तते, सैव मुक्तिः, न त्वपराऽस्तीत्यतः स एव इत्युक्तम् । न पुनर्भेदग्रह एव मुक्तिः, तस्यापि निवर्तनीयत्वात् । 'नापि विवेकख्यातिमि'त्युक्तत्वादिति ।

परि०— इत्युक्तत्वादिति । 'नापि विवेकख्यातिं प्राकृतीं ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हति' इति साङ्ख्यैरुक्तत्वात् प्रकृतिसम्बन्धविवेकख्यातिरपि नेत्यर्थः । **पूर्वपक्षोपन्यासः** ॥

यादु०— निवर्तनीयत्वादिति । तस्य पुरुषार्थत्वाभावादिति भावः । भेदग्रहस्य पुरुषेणाभ्यर्थनीयत्वाभाव एव कुत इत्यतः तत्र साङ्ख्यसम्मतिमाह **नापि विवेकेति** । नापि विवेकख्यातिं प्राकृतीं ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हतीति साङ्ख्यैरुक्तत्वादित्यर्थः ।

वं०प०— बन्धाभावादिति । तद्ध्वंसस्यैव मोक्षत्वादित्यर्थः । **योगेति** । बन्धनिवृत्तिसाधनीभूतभक्त्यादियोगप्रतिपादकशास्त्रेत्यर्थः । **सैव** भ्रमनिवृत्तिरेव । **इत्यत इति** । भेदग्रहस्य भ्रमनिवृत्तौ निमित्तत्वेन निमित्तनिमित्तिनोरभेदोपचारमभिप्रेत्येत्यर्थः । एवकारव्यावर्त्यं दर्शयति **न पुनरिति** । अस्य दोषस्योल्बणत्वमित्यन्वयः ।

कं०रा०— **तस्यापीति** । भेदग्रहस्यापि निवर्तनीयत्वेन मोक्षरूपत्वानुपपत्तेरित्यर्थः । मोक्षकाले भेदग्रहस्य निवर्तनीयत्वं कुतो ज्ञायत इत्यत आह **नापीति** । नापि विवेकख्यातिं मोक्षकालेऽभ्युपगच्छाम इति साङ्ख्येनोक्तत्वादिति भावः ।

श्रीनिधि०— लक्षणाबीजं सम्बन्धं दर्शयति **स च भेदग्रहे सति निवर्तत इति** । मुख्यार्थानुपपत्तिं दर्शयति **तस्यापीति** ।

शे०वा०— ननु माऽस्तु तेषां पक्षे मोक्षोऽपीत्यत आह **तथा चेति** । **भेदाग्रहनिबन्धनो भ्रम एव हि बन्ध इति** । ननु भोक्तृत्ववादिनो मते कर्तृत्वाध्यासस्य सत्त्वेऽपि अभोक्तृत्ववादिनो मते कर्तृत्वस्य भोक्तृत्वस्य वा प्रतीतेरेवाभासस्योक्तरीत्या सिद्ध्या तद्विषयकभ्रमस्याङ्गीकर्तुमशक्यत्वात् द्रष्टृत्वादेश्च वास्तवत्वेन तद्विषयकस्यापि तस्यासम्भवात् कथमेतदिति चेत् । न । एतन्मते स्वाधीनत्वविषयकभ्रमसद्भावेन तस्यैव भ्रमशब्देन ग्रहणात् । तथा व्यवहार एव भ्रमशब्देन विवक्षित इत्यप्याहुः । **इत्यत इति** । अनेनाभिप्रायेणेत्यर्थः । **निवर्तनीयत्वादिति** । अपुरुषार्थत्वादिति भावः । भेदग्रहस्यापुरुषार्थत्वे दृष्टा मयेत्येतत्कारिकाव्याख्यानरूपवाचस्पतिग्रन्थसम्मतिमाह **नापीति** । अत्र नापि विवेकख्यातिमित्युक्तत्वादित्येव मूलपाठः । 'प्राकृतीं ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हती'त्युत्तरेणान्वयाच्च विवक्षितसिद्धिरिति द्रष्टव्यम् ।

स०व्र०— अत्र भ्रमशब्देन व्यवहारो ग्राह्यः । भ्रमस्य तेनानङ्गीकृतत्वात् ।

ननु भेदग्रहस्य मुक्तौ निवर्तनीयत्वात् स एव मुक्तिरित्यतस्तदभिप्रायमाह **भेदाग्रहनिबन्धन इति** । **न त्वपराऽस्तीत्यत इति** । **इत्यतः** इत्यभिप्रेत्येत्यर्थः । तस्यापि निवर्तनीयत्वे परकीयसम्मतिमाह **नापि विवेकख्यातिमिति** । नापि विवेकख्यातिमित्य(त्रात्मा)स्य स्वार्थमभिमन्तुमर्हतीत्यनेन सम्बन्धः । **उक्तत्वात्** 'दृष्टा मये'ति श्लोक इति शेषः । यद्यपि परेण विवेकख्यातिप्रकृती इति उभयविषयकाभिमानराहित्यमुक्तम् । तथाऽपि प्रकृतत्वात् नापि विवेकख्यातिमित्येवानूदितम् ।

विट्ठल०— ननु बन्धनिवृत्तिर्मुक्तिः तत्कथं भेदग्रह एव मुक्तिरित्युच्यत इत्याशङ्क्य तत्परिहाराय एवशब्दं सङ्गमयति **भेदाग्रहनिबन्धन इति** । ततश्च मूले स एवेत्यस्य भेदग्रहनिमित्तकबन्धापगम इत्यर्थ इत्युक्तं भवति । यथा प्रतीतो भेदग्रह एव तच्छब्दपरामृष्टः किं न स्यादित्यतो बाधकमाह **न पुनरिति** । भेदग्रहस्य निवर्तनीयत्वे साङ्ख्यसम्मतिमाह **नापि विवेकेति** । मुक्तौ विवेकख्यातिरपि नास्तीत्यर्थः ।

चषकः— **नापीति** । प्रकृतिसम्बन्धिविवेकख्यातिरपि नेत्यर्थः ॥ **इति पूर्मवादिमतोपन्यासः** ॥

॥ इति अभोगवादिनामपि मोक्षस्वरूपं तदेव ॥

॥ इति साङ्ख्यमतभेदः ॥

॥ इति आद्याधिकरणे निराक्रियमाणस्य निरीश्वरसाङ्ख्य(विन्ध्य)मतस्य स्थितिदर्शनम् ॥

* * *

॥ अथ उपन्यस्तमतस्य (साधारणदूषणैः) निरासः ॥

॥ अथ तत्र प्रथमसूत्रव्याख्यानम् ॥

॥ अथ तत्रादौ स्वपक्षसाधनम् ॥

॥ अथ तत्राप्यादौ व्याख्यानक्रमव्यत्यासप्रयोजनकथनपूर्वकं उक्तयोर्द्विविधसाङ्ख्यमतयोरयुक्तता ॥

॥ अथ च तत्र तदयुक्तताया: समर्थनम् ॥

॥ अथ च तत्रादौ ईशस्यासङ्गहादेव न युक्तौ तावुभावपि ॥

२२ **सु०—** एवमुपन्यस्तं मतमधुना निरसनीयम् ।

तत्र सूत्रकृता क्रममविवक्षित्वा 'रचनानुपपत्तेश्च नानुमानमि'ति प्रथमं परपक्षोपालम्भं विधायानन्तरं 'प्रवृत्तेश्चेति' स्वपक्षसाधनं विहितम् । भाष्यकारस्तु साधकप्रमाणस्य तत्त्वप्रतिपत्त्यन्तरङ्गत्वेन तदुपन्यासस्य प्राथम्यं परपक्षनिरासस्य तत्स्थैर्यहेतोर्बहिरङ्गत्वेन तदुपन्यासस्यानन्तर्यमिति क्रममपि ग्राहयिष्यन् व्यत्ययेन व्याचक्षाणः, प्रवृत्तेश्चेति सूत्रस्य पातनिकार्थमाह **ईशस्येति** ।

अनु०— ईशस्यासङ्गहादेव न युक्तौ तावुभावपि ।

असङ्गहात् अनभ्युपगमात् । **एव** इत्यस्य दोषस्योल्बणत्वं सूचयति । **तावुभावपि** पुरुषस्य भोक्तृत्वाभोक्तृत्वपक्षौ ।

परि०— **ग्राहयिष्यन्** प्रतिबोधयिष्यन्नित्यर्थः । **पातनिकार्थमिति** । अवतारिकोदयार्थमित्यर्थः ।

गु०दी०— **सूत्रकृता क्रममविवक्षित्वा** इत्यत्र परपक्षनिरसने सति स्वपक्षसाधनं सुकरमिति भावेन सूर्यवत्परपक्षप्रतिक्षेपे भरवत्तया(?) वेति शेषपूरणं कर्तव्यम् । **ईशस्यासङ्गहात्** इति वदता भाष्यकृता निष्कृष्टार्थस्यैव कथनात् । **पातनिकार्थमाहेत्युक्तः पातनिकार्थः** फलितार्थ इत्यर्थः ।

यादु०— सूत्रकृता इत्यस्यानन्तरं विलम्बमसहमानेनेति शेषः । **पातनिकार्थमिति** । तत्सूत्रनिवर्त्या-शङ्कोत्थापनार्थमादौ किञ्चिद्दूषणमाहेत्यर्थः ।

श्रीनिधि०— पातनिकार्थमिति । प्रसक्तिसम्पादकोऽर्थः पातनिकोऽर्थः, तम् ।

शे०वा०— नन्वीशस्यासङ्ग्रहादेवेति वाक्यं न तावत्पूर्वग्रन्थशेषः । नापि उत्तरग्रन्थशेषः । सूत्र-व्याख्यानरूपत्वाभावात् । न च साक्षात्सूत्रकथनरूपत्वाभावेऽपि प्रवृत्तेश्चेत्येतत्सूत्रव्याख्यानाय पातनिकारूपत्वेन तद्व्याख्यानपरोत्तरग्रन्थशेषत्वं सम्भवतीति वाच्यम् । रचनानुपपत्तेश्चेति पूर्वसूत्रपरित्यागेन पूर्वं प्रवृत्तेश्चेति सूत्रव्याख्यानस्याप्यसङ्गततया तच्छेषत्वासम्भवात् । न च साधकप्रमाणोपन्यासपरत्वात् प्रवृत्तेश्चेत्यस्य प्राथम्यं परपक्षनिरासोपन्यासार्थत्वाच्च रचनानुपपत्तेश्चेत्यस्य आनन्तर्यमिति सूत्रद्वयस्य क्रमज्ञापनाय व्यत्यासेन व्याख्यानमिति वाच्यम् । वैपरीत्यस्यापि वक्तुं शक्यत्वेन स्वपक्षसाधकपरपक्षनिरासोपन्यासत्वेन पूर्वोत्तर-भावनियमायोगात् । योगे वोक्तरीत्या सूत्रद्वयस्य सूत्रकृताऽपि सन्निवेशनीयत्वेन यथोक्तसूत्रकारीयसन्नि-वेशायोगप्रसङ्गादित्यतः पूर्वग्रन्थेन सङ्गतिं सूचयन्नेव प्रवृत्तेश्चेत्येतत्सूत्रव्याख्यानपरोत्तरग्रन्थशेषतया वाक्यं सङ्गमयितुं सूत्रकारीययथोक्तसूत्रद्वयसन्निवेशोपपादनपुरःसरं स्वपक्षसाधकोपन्यासपरतया प्रवृत्तेश्चेत्यस्य प्राथम्यं रचनानुपपत्तेरित्यस्य परपक्षनिरासोपन्यासपरतया तदानन्तर्यं च तत्र हेतूत्त्योपपादयति **एवमित्यादिना** । **पातनिकार्थमिति** । प्रसक्त्यर्थमित्यर्थः । उत्तरत्र प्रकारान्तरेणापि दूषणेनैवकारस्य तद्व्यावर्तकत्वायोगाद्वैयर्थ्यं विरुद्धार्थत्वं चेत्यत आह **एवेतीति** । ताविति न भोक्तृत्वाभोक्तृत्ववादिनोः परामर्शः । तयोः पूर्वत्र प्रकृतत्वेऽपि स्वतो युक्तत्वाभावेनायुक्तावित्यस्यासामञ्जस्यप्रसङ्गात् । अनुपपन्नपक्षस्वीकारेणायुक्तत्वोपपादने च लक्षणा-प्रसङ्गादित्यभिप्रेत्य पूर्वप्रकृतपक्षयोरेव परामर्शोऽयमित्याह **तावुभावपीति** ।

वा०र०— न तावत् पूर्वग्रन्थेति । परप्रक्रियानुवादरूपत्वाभावस्य सिद्धत्वादिति भावः । **पातनीकेति** । प्रसक्तीत्यर्थः । पातनीका रूप्यते निरूप्यते इति पातनिकारूपम् । प्रसक्तिसम्पादकं प्रसञ्जक-मिति यावत् । तत्त्वेनेत्यर्थः । **उत्तरग्रन्थेति** । चेतनेच्छानुसारेणेत्युत्तरेणेत्यर्थः । **पूर्वसूत्रमिति** । अनेनैव प्रवृत्तेश्च इत्यस्य उत्तरसूत्रत्वं सूचितम् । **स्वपक्षसाधकेति** । प्रमाणेत्युपस्कर्तव्यम् । साधकप्रमाणोपन्यास-परत्वेन एवं प्रत्येकं सम्बन्धः । वक्ष्यति च **स्वपक्षसाधकतयेति** । योगे वेति वाशब्दपाठः । **वैय्यर्थ्य-मिति** । उक्तव्यावृत्तिरूपप्रयोजनाभावात् वैय्यर्थ्यम् । प्रकारान्तरप्रतिपादकेन विरोधश्चेत्यर्थः ।

स०व्र०— पातनिकार्थमिति । प्रसक्त्यर्थमित्यर्थः ।

विठ्ठल०— क्रममिति । प्रथमं स्वपक्षस्थापनं पश्चात् परपक्षोपालम्भ इति हि क्रमं तव विविक्षित्वेत्यर्थः । परपक्षप्रतिक्षेपे महोद्योगिभिर्भाव्यमिति ज्ञापनमविवक्षाप्रयोजनमित्याहुः । **पातनिकार्थमिति** । व्यावृत्त्याशङ्कासम्पादनार्थमादौ उच्यमानोऽर्थः पातनिकार्थस्तमाहेत्यर्थः ।

चषकः— **पातनिकार्थं** तत्सूत्रव्युदसनीयशङ्कोत्थापनार्थम् ।

॥ इति ईशस्यासङ्ग्रहादेव न युक्तौ तावुभावपि ॥

* * *

॥ अथ च तत्र अयुक्तत्वाभावशङ्का तन्निरसनञ्च ॥
॥ अथ च तत्रादौ ईश्वरे प्रमाणसद्भावात् तन्मतस्यायुक्तता ॥

२३ **सु०— नन्वप्रामाणिकस्येश्वरस्यानभ्युपगमे कथमयुक्तत्वमित्यतः 'प्रवृत्तेश्च' इति सूत्रार्थतया ईश्वरे प्रमाणमाह चेतनेति ।**

अनु०— चेतनेच्छानुसारेण यदा दृष्टः पटोद्भवः ।
एतादृशत्वमन्यस्य वस्तुत्वात्केन वार्यते ॥

यदा यस्मात् । तस्मादिति लभ्यते । **एतादृशत्वं** पटवच्चेतनेच्छानुसारेणोद्भूतत्वम् । **अन्यस्य** महदादेः, **वस्तुत्वात्** कार्यत्वादनुमीयमानमिति शेषः । **केन** इत्याक्षेपे ।

अयमत्र प्रयोगः । महदादिकं चेतनेच्छाधीनोत्पत्तिकं कार्यत्वात् पटवदिति, यद्वा महदाद्युद्भवः चेतनेच्छाधीन उद्भवत्वात् पटोद्भववदिति प्रयोक्तव्यम् । प्रयोगद्वयसूचनाय पटोद्भवदृष्टान्तमुक्त्वा वस्तुत्वादिति हेतुमाह, एवमुक्तावुपलक्षणत्वं हि उभयत्र ज्ञायेत । उपलक्षणं चैतत् । महदाद्युपादानं चेतनाधिष्ठितं उपादानत्वात् तन्तुवदित्याद्यपि द्रष्टव्यम् । न चान्यश्चेतनस्तथा भवितुमर्हतीति सर्वातिशयी पुरुष ईश्वर एव सिद्ध्यतीति ।

परि०— सूत्रार्थतयेति । पटादावपि चेतनप्रवृत्तेर्दर्शनात्, महदादावपि चेतनप्रवृत्तेरनुमातुं शक्यत्वादिति सूत्रार्थतयेत्यर्थः । वस्तुत्वादित्यस्यार्थः **कार्यत्वादिति** । वस्तुत्वमात्रस्य नित्ये(पि) सत्त्वे(पि)नात्र विवक्षितपरिणामरूपोद्भवत्वाभावेन व्यभिचारापत्तेरिति भावः । **उभयत्रेति** । हेतुदृष्टान्तयोरननुरूपयोरुक्तौ अनुरूपपक्षदृष्टान्तयोरुपलक्षणतया ग्रहणेन प्रयोगद्वयं ज्ञास्यन्ति । आप्तोक्तत्वस्य शिष्याणां निश्चयादिति भावेनैवमुक्तिरित्यर्थः । स्वातन्त्र्येण प्रकृतिकर्तृत्वस्य साक्षाद्विरोध्यनुमानं स्वयमाह **उपलक्षणं चैतदित्यादिना** । **इत्याद्यपीति** । महदादिकं प्रति

स्वतन्त्रकारणं चेतनरूपं स्वतन्त्रत्वात् तादृशपटादिकारणवदित्यादिरादिपदार्थः । **ईश्वर एव सिद्ध्यतीति** । नन्वेवं शास्त्रयोनिसूत्रविरोधः । तत्रानुमानिकत्वनिरासेनेश्वरस्य शास्त्रैकगम्यतोक्तेः । अदृष्टद्वारा जीवानादायोक्तहेतूनामुपपत्तेश्चेति चेन्न । तत्र केवलानुमानगम्यत्वनिरासेऽपि श्रुत्युपेतानुमानगम्यत्वानिरासात् । श्रुतयश्चोत्तरत्र व्यक्ताः । हेतुवादस्य श्रुतौ अतीवादरमकुर्वाणं प्रत्यनुमानस्यैवादावुक्तिरिति तात्पर्यात् ।

यादु०— कार्यत्वादिति । अन्यथा नित्ये व्यभिचार इति भावः । **उभयत्रेति** । हेतुदृष्टान्तवचनयोरित्यर्थः । हेतुवचनेन तदनुरूपो दृष्टान्त उपलक्ष्यते दृष्टान्तवचनेन च स्वानुकूलो हेतुरूपलक्ष्यते अन्यथा वाक्यासामञ्जस्यात् । तथा चोक्तप्रयोगद्वयसिद्धिरिति भावः । **इत्याद्यपीति** । अत्रादिपदेन महदादिकर्तृ चेतनरूपं भवितुमर्हति स्वतःप्रवृत्तिमत्त्वात् पटादिकर्तृवदिति प्रयोगो ग्राह्यः ।

वं०प०— यद्यपि पटोद्भवेऽपि कार्यत्वाख्यं वस्तुत्वमस्तीति युक्तं दृष्टान्तत्वं तथा चैक एव प्रयोगो भविष्यति । तथाऽपि कार्यभूतपटादेरेव दृष्टान्तत्वसम्भवे पटोद्भवपर्यन्तं कुतो धावनं कार्यमित्यकौशलपरिहाराय प्रयोगद्वयेत्युक्तम् । **एतत्** प्रयोगद्वयकथनम् । **अधिष्ठितं** प्रेरितम् । तथाऽधिष्ठाता प्रेरक इत्यर्थः ।

कं०रा०— तथेति । महदाद्युपादानाधिष्ठातेत्यर्थः ।

श्रीनिधि०— वस्तुत्वहेतुः चेतनेच्छानुसारेण उद्भूतत्वं गगनादौ व्यभिचरतीत्यत आह **वस्तुत्वात्कार्यत्वादिति** । एवं मुक्तौ उपलक्षणत्वं हि उभयत्र इति दृष्टान्तस्य हेतूपलक्षकत्वम् । हेतोश्च दृष्टान्तोपलक्षकत्वम् । अन्यथा उद्भवं दृष्टान्तीकुर्वाणः । उद्भवत्वादित्येवावक्ष्यत् । वस्तुत्वादिति हेतुं ब्रुवाणो वा पटमेव दृष्टान्तीकुर्यात् । साध्यसाधनयोरुभयत्र साम्येऽपि पटस्य द्रव्यत्वेनान्तरङ्गत्वात् । कार्यत्वस्य तत्र सत्त्वेऽपि उद्भवत्वस्य तन्मात्रस्थस्य व्यभिचारादिरहितस्य त्यागेनानेकवृत्तिधर्मस्य कार्यत्वस्याग्रहे नियामकाभावात् । अन्यथा साङ्ख्याचार्यानुमानात् तद्वचनाद्वा तदभ्युपगमानङ्गीकारे । अन्यतस्तज्ज्ञानासम्भवादिति भावः ।

शे०वा०— कथमयुक्तत्वमिति । तथा सति भवद्भिरप्यप्रामाणिकस्य नरविषाणादेरनभ्युपगमेन भवत्पक्षस्याप्ययुक्तत्वप्रसङ्गादिति भावः । **प्रमाणमाहेति** । जातावेकवचनम् । अनुमानरूपप्रमाणान्याहेत्यर्थः । यदाशब्दस्य कालार्थतायाः प्रकृतेऽयोगाद्धेत्वर्थतया तं व्याचष्टे **यदा यस्मादिति** । 'यदाशब्दस्तु हेत्वर्थे कालार्थे चापि भण्यत' इति वचनादिति भावः । **लभ्यत इति** । यत्तदोर्नित्यसम्बन्धादिति भावः । **एतादृशत्वमित्यत्र** एतच्छब्दो न प्रकृतपटोद्भवपरामर्शकः । तथा सति वस्तुत्वादिति हेतुकथनस्याश्लिष्टत्वापातात् । किन्तूद्भूतपटपरामर्शक इति भावेनैतादृशत्वमित्येतद्व्याख्याति **एतादृशत्वमिति** । यस्यकस्यचिच्चेतनेच्छानुसारेणोद्भूतत्वसाधनस्य प्रकृतानुपयोगित्वेनान्यपदस्य तत्परत्वायोगात् प्रकृतोपयोगितया तद्व्याचष्टे

अन्यस्येति । अनादिप्रागभावादौ व्यभिचारायाह **कार्यत्वादिति** । वस्तुत्वस्य ज्ञापकहेतुत्वेन कारक-हेतुत्वाभावात् तदनुगुणं शेषं पूरयति **अनुमीयमानमिति शेष इति** । **आक्षेप इति** । न केनापीत्याक्षेप इत्यर्थः । उत्तरत्र परिहाराभावेन प्रश्नार्थत्वायोगादिति भावः । नन्वत्रोद्भवदृष्टान्तानुसारेणोद्भवत्वस्यैव हेतुतया वा, कार्यत्वहेत्वनुरोधेन पटादेरेव दृष्टान्ततया वा वक्तव्यत्वात् तथाऽनुक्तत्वोद्भवस्य दृष्टान्ततया कार्यत्वस्य च हेतुतयोक्तिर्भाष्यकारीया व्यर्थेत्यतः तथोक्तावेकैकप्रयोगमात्रसूचकत्वप्राप्त्या प्रयोगद्वयप्रकारसूचकत्वालाभात् तल्लाभार्थतया तथोक्तेरर्थवत्त्वमित्यभिप्रेत्य प्रयोगद्वयप्रकारसूचकतया तथोक्तेरर्थवत्तामुपदर्शयितुं किं तत्प्रयोग-द्वयमित्यतः तत्प्रकारमुपदर्शयति **अयमत्र प्रयोग इत्यादि** । एवं प्रयोगप्रकारं प्रदर्श्य तत्सूचकतया भाष्यकारीयविचित्रोक्तेरर्थवत्तामाह **प्रयोगद्वयेति** । अन्यथा, उद्भवादित्येवावक्ष्यदिति भावः । उपलक्षणं चैतत् । वस्तुत्वादिति हेतुमुक्त्वा पटोद्भव इति दृष्टान्तमाहेत्यपि द्रष्टव्यम् । कथं विचित्रोक्त्याऽपि प्रयोगद्वयसूचन-सिद्धिरित्यत आह **एवमुक्ताविति** । उद्भवस्य दृष्टान्ततया वस्तुत्वस्य च हेतुतयोक्तावित्यर्थः । **उभयत्रेति** । दृष्टान्तहेतुवचनयोरित्यर्थः । पटोद्भव इति वचनेन स्वानुरूपस्योद्भवत्वहेतोः, कार्यत्वादिति हेतुवचनेन स्वानु-रूपस्य दृष्टान्तस्योपलक्षणत्वं विज्ञायत इत्यर्थः । अन्यथा वाक्यार्थानुपपत्तिरिति भावः । यद्यपि वक्ष्यमाण-रीत्या एकप्रकारोक्तावप्युपलक्षणतया व्याख्यानेनापि प्रयोगद्वयस्य सूचकत्वं सिद्ध्यत्येव । तथाऽपि विचित्रोक्तौ वाक्यार्थानुपपत्त्या उपलक्षणत्वावश्यम्भाववदेकप्रकारोक्तौ तदनुपपत्त्यभावेनोपलक्षणत्वानवश्यम्भावान्न नियमेन तत्सिद्धिरित्यभिप्रेत्य प्रयोगद्वयसूचनार्थत्वं विचित्रोक्तेराश्रितत्वमित्यवधेयम् । **इत्यपीति** । उपलक्षणं चैतत् । महदादिकर्ता चेतनः स्वतःप्रवृत्तिमत्त्वात् कुविन्दवदित्यपि द्रष्टव्यम् । इत्याद्यपीति पाठे आदिशब्दस्यैवायमर्थः । नन्वेतैरनुमानैर्महदादेश्चेतनाधीनत्वमेव सिद्धम् । तच्च जीवाधीनतयाऽप्युपपद्यत इति नानेनेश्वरसिद्धिरित्यत आह **न चेति** । **तथेति** । महदादिनियामक इत्यर्थः ।

वा०२०— जाताविति । एतच्च नविलक्षणत्वाधिकरणे विजानतामिति जातावित्येतद्व्याख्यावसरे उपपादितम् । तद्वदेवात्रापि ज्ञेयम् । विशिष्टमुपपादनं तु चतुर्थस्य प्रथमे स्पष्टमस्माभिः कृतमस्ति, तदनुसारेण अत्र लेख्यम् । प्रमाणत्वविवक्षया एकवचनम् । न तु व्यक्तम् । विवक्षयेत्यर्थः । **उद्भवपरामर्शक इति** । उद्भववत् वर्तमानस्य एतादृशपदार्थत्वमिति नेत्यर्थः । **उद्भवेति** । पटोद्भवस्य चेतनेच्छानुसारित्वे उक्ते समानसंवित्संवेद्यतया उद्भूतपटोत्पत्तिरपि न भवतीति भावः । **प्रकृतेति** । महदाद्युद्भवस्य एव प्रकृतत्वादिति भावः । **अव्यभिचारायाहेति** । वस्तुत्वात् इत्येतत् व्याचष्टे इत्यर्थः । **हेतुतया वेति** । वक्तव्यत्वादित्युत्तरेण सम्बन्धः । **उक्तिः भाष्यकारीया इति** । भाष्यकारीया विचित्रोक्तिरित्यर्थः । विचित्रोक्तेरिति वक्ष्यमाणत्वात् । **तथा चोक्ताविति** । दृष्टान्ताद्यनुसारेण उक्तावित्यर्थः । **तथोक्तेरिति** । षष्ठ्यन्तस्य विचित्रोक्तेरित्यर्थः । **तथोक्तेरिति** । द्वितीयस्यापि अयमेवार्थः । **वक्ष्यमाणरीत्येति** । तृतीयप्रयोगलाभाय उपलक्षणं चैतत् इत्यादि-नोपलक्षणाश्रीयते तत्प्रकारेणेत्यर्थः । **अयमर्थ इति** । आदिपदेन सङ्गृह्योऽयं महदादि इत्युक्तप्रयोग इत्यर्थः । **कार्यत्वादितीति** । वस्तुत्वस्य कार्यत्वरूपेण व्याख्यानात् तथानुवादः इत्यदोषः ।

स०व्र०— एवमुक्ताविति । विचित्रत्वेनोक्ताविति्यर्थः । उद्भवं दृष्टान्तमुक्त्वा उद्भवत्वस्यैव हेतूकर्तुं शक्यत्वेऽपि वस्तुत्वादिति यदा हेतूकृतं तेन ज्ञायते उद्भवपदेन हेतुं तादृशं पक्षं च लक्षयित्वा महदाद्युद्भव इत्यादि द्वितीयप्रयोगः, वस्तुत्वादित्यनेन घटलक्षणं वस्तु दृष्टान्तं लक्षयित्वा तादृशं पक्षं च लक्षयित्वा महदादिकमित्यादि प्रथमप्रयोगश्च ज्ञायत इति भावः । वस्तुत्वादित्यस्य ईश्वरे व्यभिचारात् कार्यत्वादिति व्याख्यातम् । **उपलक्षणं चैतदिति** । परस्य लक्षणया लब्धं यदनुमानद्वयं तदुपलक्षणमित्यर्थः ।

विट्ठल०— वस्तुत्वहेतोर्नित्ये व्यभिचरितत्वादाह **कार्यत्वादिति** । कथमनेन प्रयोगद्वयं सूचितमित्यत आह **एवमिति** । वस्तुत्वादिति हेतुकथनेन हेत्वनुसारादुद्भवदृष्टान्तः पटाख्यवस्तुनो दृष्टान्ततया स्वीकारोपलक्षक इति ज्ञायते । पटोद्भवदृष्टान्तकथनेन तदनुसाराद्वस्तुत्वहेतुरुद्भवत्वहेतोरुपलक्षक इति ज्ञायते । एवमुपलक्षणकरणे वाक्यसामञ्जस्य प्रसक्तेरिति भावः । **इत्याद्यपि** इत्यादिपदेन महदादिकर्ता चेतनो भवितुमर्हति । कर्तृत्वात् पटकर्तृवदित्यादि ग्रहणम् ।

चषकः— कार्यत्वादिति । तेन नित्ये नानैकान्त्यमिति भावः । उभयत्र हेतुनिदर्शनवचनयोः वाक्यासामञ्जस्यपरिजिहीर्षया हेतुवचनेन तदनुरूपो हेतुरुपलक्ष्यत इति भावः । **सर्वातिशयी** सर्वकर्मकातिक्रमकर्ता ।

॥ इति ईश्वरे प्रमाणसद्भावात् तन्मतस्यायुक्तता ॥

* * *

॥ अथ तत्र बाधाश्रयासिद्धिशङ्का तन्निरसनञ्च ॥

२४ सु०— स्यादेतत् । महदादिकं न तावत्प्रत्यक्षसिद्धम्, अव्यक्तत्वात्, अतः साङ्ख्याचार्यवचनात् तत्प्रयुक्तानुमानाद्वा तदवगमोऽभ्युपगन्तव्यः । तैश्चानेवंविधमेव तदुक्तमनुमितं चेति बाधः, अन्यथाऽऽश्रयासिद्धिरिति । मैवम्, वेदतस्तदवगमात् । उक्तं हीदम् 'अजामेकामि'त्यादिश्रुतिः प्रधानमपि प्रतिपादयतीति ।

ननु पुरुषश्चेतनो नान्तःकरणम् । इच्छा चान्तःकरणधर्मो न चेतनस्याविकारस्य । अतः अप्रसिद्धविशेषणता बाधो वा, पटादेरप्येवम्भावाभावाद् दृष्टान्तस्य साध्यवैकल्यं चेति चेन्न; आत्मन एवेच्छावत्त्वस्य वक्ष्यमाणत्वात् ।

परि०— तत्प्रयुक्तानुमानादिति । कार्यकारणविभागादिति हेतुसिद्धमिति प्रागुक्तकार्यकारणविभागादिरूपानुमानादित्यर्थः । **तदिति** । महदादिकम् । उक्तं अनुमितं च तैरित्यर्थः । ननु

जगदुपादानश्रुतीनां परैरविद्यादिपरत्वेन व्याख्यानात् सिद्धान्ते च ब्रह्मपरत्वेन पूर्वत्रानुमानिकपादे अजामेकामित्यादिसर्वस्त्रीलिङ्गशब्दानां ब्रह्मनिष्ठतया प्रकृतिनये व्याख्यानात् कथं वेदतस्तत्सिद्धिरित्यत आह **उक्तं हीति** । 'अजामेकामिति प्राह श्रुतिरेतां यदा तदा । को दोष' इत्यादिना । अतो जगदुपादानं प्रधानं वक्ति सा श्रुतिरित्यनेन आनुमानिकपादे उक्तमित्यर्थः । 'वेदत' इत्युपलक्षणम् । 'पञ्चभिः पञ्चभिर्ब्रह्मे'त्यादिवचनान्महदादिसिद्धिरित्यपि ध्येयम् । 'यद्वा महतः परमव्यक्तमि'त्यादिश्रुत्या महदादिसिद्धिर्ध्येयेति भावः । **वक्ष्यमाणत्वादिति** । 'इच्छाम्यहमिति ह्येवे'त्यादिना अत्रैवाधिकरणे उत्तरत्रेति भावः ।

गु०दी०— प्रधानमपि प्रतिपादयतीत्युपलक्षणम् । 'बह्वीं प्रजां जनयन्तीं सरूपामि'ति महत्तत्त्वस्य च सङ्गृहीतत्वादित्यपि द्रष्टव्यम् । अन्यथा प्रकृतासङ्गतेरपरिहारात् ।

यादु०— ननु सर्वस्यापि वेदस्य भगवत्परत्वस्योक्तत्वात् कथं वेदतो महदाद्यवगम इत्यत आह **उक्तं हीति** । 'अजामेकामिति प्राहे'त्यत्रेति शेषः । तथा च तन्न्यायसाम्यात् कश्चिद्वेदो महदादिकमपि प्रतिपादयिष्यतीति भावः । इदं च, 'अजामेकामि'ति श्रुतिः महदादितत्त्वमपि प्रतिपादयति, न प्रधानमात्रम्; इत्यभिप्रेत्योक्तम् । अतो नासङ्गतिरिति द्रष्टव्यम् । **वक्ष्यमाणत्वादिति** । 'सेच्छं चेत्किमचेतनम् । इच्छाम्यहमिति ह्येव निजानुभवरोधतः । अचेतनेच्छापगते'त्यत्रेति शेषः ।

वं०प०— **तैः** साङ्ख्याचार्यैः । **अनेवंविधं** चेतनेच्छाधीनोत्पत्तिकम् । **तदुक्तं** तेषु शास्त्रेषूक्तमित्यर्थः । **बाधो** धर्मिग्राहकेण । **अन्यथा** महदादेरसिद्धौ । **ननु पुरुष इत्यादि** । तथा च महदादिकं चेतनेच्छाधीनोत्पत्तिकमिति साध्यकरणे चेतनेच्छाया अभावेनाप्रसिद्धविशेषणता स्यादिति भावः । **अविकारस्येति** । 'इच्छादिमत्त्वे तत्कृतविकारापत्तेः । न चैवमिति हेतुगर्भम् ।

कं०रा०— महदादिकं चेतनेच्छाधीनोत्पत्तिकत्वरूपसाध्यस्य क्वाप्यभावादप्रसिद्धविशेषणताबाधः । पटादिरूपदृष्टान्ते साध्यवैकल्यं चेति शङ्कते **ननु पुरुष इति** ।

शे०वा०— मूले केन वार्यत इत्यंशस्य वैयर्थ्यमाशङ्क्य प्रसक्तदोषाणां सुपरिहार्यतया नानुमानाप्रामाण्यापादनक्षमत्वमित्यर्थसूचकत्वान्न तदिति भावेन तत्सूचकतया तद्योजयितुं पक्षसाध्यहेतुषु प्रसक्तदोषान् क्रमेण परिजिहीर्षुः प्रथमं पक्षदोषमुद्धर्तुं तमाशङ्कते **स्यादेतदिति** । महदादिकं किं सिद्धं पक्षीक्रियते किंवाऽसिद्धम् । आद्येऽपि तत्सिद्धिः किं प्रत्यक्षात् किंवा साङ्ख्याचार्यवचनात् तत्प्रयुक्तानुमानाद्वेति विकल्पान् मनसि निधायाद्यं दूषयति **न तावदिति** । द्वितीयतृतीयावुत्थापयति **अत इति** । अन्यस्याभावादिति भावः । अस्त्वेवमेव तर्हीत्यतो धर्मिग्राहकविरोधान्नैवमित्याशयेन पक्षद्वयं दूषयति **तैश्चेति** । **अनेवंविधमेवेति** ।

स्वातन्त्र्येणाचेतनाधीनोत्पत्तिकमेवेत्यर्थः । **अनुमितं चेति** । अनुमानं च भेदानां परिमाणादित्यादिकमुत्तरत्र आकर एव स्फुटम् । असिद्धमेव महदादिकं पक्षीक्रियत इति आद्यद्वितीये दोषमाह **अन्यथेति** । **वेदत इति** । 'महतः परमव्यक्तमि'त्यादिवेदत इत्यर्थः । तथा च नाश्रयासिद्धिर्नापि धर्मिग्राहकप्रमाणबाधः । वेदेनेश्वराधीनतयैव तत्प्रतिपादनादिति भावः । ननु सर्वस्यापि वेदस्य भगवत्परत्वस्यैव त्वयाऽप्यभ्युपगमात् कथं वेदतो महदादिसिद्धिस्त्वत्पक्ष इत्यतः परममुख्यया वृत्त्या तस्य भगवत्परत्वेऽपि मुख्यया वृत्त्याऽन्यप्रतिपादकत्वस्याप्यङ्गीकारान्नानुपपत्तिरित्यभिप्रेत्योक्तार्थे सम्मतिमाह **उक्तं हीति** । **अजामेकामिति** । आहेत्यादिनेति शेषः । प्रधानमित्युपलक्षणम् । महदाद्यपीत्यपि द्रष्टव्यम् । यद्यप्यत्र महदादिकं न तावत्प्रत्यक्षसिद्धमित्यादिपूर्वग्रन्थानुरोधेन महदादिरूपसाधकं वाक्यमेवोदाहर्तव्यम् । न त्वजामेकामिति प्रधानप्रतिपादकं वाक्यमपि । तथाऽप्युपलक्षणं चैतदित्यादिना महदाद्युपादानं चेतनाधिष्ठितमिति महदाद्युपादानपक्षकस्याप्यनुमानस्य प्रदर्शितत्वात् तत्र धर्मिग्राहकत्वाभिप्रायेणाजामेकामिति वाक्यमुदाहृतम् । आदिपदेन च महदादिकं चेतनाधीनोत्पत्तिकमित्याद्यनुमाने धर्मिग्राहकस्य 'महत' इत्यादेः परिग्रहः । यद्यपि चात्र चेतनेच्छानुसारेणेत्यादिमूलोपदर्शितप्रयोगधर्मिभूतमहदादिस्वरूपसाधकवाक्यस्य स्वशब्देन उपलक्षितानुमानधर्मिभूतप्रधानस्वरूपसाधकवाक्यस्य तु आदिशब्देनोपादानमत्र कर्तुमुचितम् । तथापि 'अजामेकामिति प्राह श्रुतिरेतां यदा तदा' इत्यादिना अजामेकामिति वाक्यस्य परममुख्यया वृत्त्या भगवत्परत्वस्य, मुख्यया वृत्त्या प्रधानपरत्वस्य च स्पष्टं वर्णितत्वात् तस्य स्वशब्देनोपादानम् । महदादिप्रतिपादकस्य तु अजामेकामिति वाक्ये भाष्यकारैरुपवर्णितन्यायसञ्चारेण भगवत्परत्वस्य महदादिपरत्वस्य चानुसन्धेयत्वान्न तस्य स्वशब्देन ग्रहणं युक्तमित्यभिप्रेत्य आदिशब्देन तदुपादानं कृतमित्यवधेयम् । साध्यदोषमुद्धर्तुमाशङ्कते **ननु चेति** । **अन्तःकरणधर्म इति** । तस्य परिणामित्वादिति भावः । कुतो नेच्छा चेतनस्य धर्म इत्यतः तस्याविकृतत्वादित्यभिप्रेत्य हेतुगर्भविशेषणमाह **अविकारस्येति** । **अप्रसिद्धविशेषणतेति** । चेतनस्यापरिणामित्वादिच्छाशून्यत्वेन चेतनेच्छाया एवाप्रसिद्धत्वेन तद्घटितसाध्यस्य सुतरामप्रसिद्धत्वादिति भावः । **बाधो वेति** । उक्तरीत्या चेतनस्य इच्छाराहित्यस्य सिद्धत्वेन चेतनेच्छाधीनोत्पत्तिकत्वाभावस्यैव पक्षे सिद्धत्वादिति भावः । **एवं भावाभावादिति** । चेतनेच्छाधीनोत्पत्तिकत्वाभावादित्यर्थः । **वक्ष्यमाणत्वादिति** । 'सेच्छं चेत्किमचेतनम् । इच्छाम्यहमिति ह्येव निजानुभवरोधतः । अचेतनेच्छापगते'त्यादिनोत्तरत्रेति शेषः ।

वा०र०— प्रसक्तदोषाणामिति । अनुमानीयपक्षादिषु इति शेषः । **स्वातन्त्र्येणाचेतनेति** । स्वातन्त्र्यमचेतनेनान्वयि । मूले तत् इत्यस्य महदादिकमित्यर्थः । **अजामेकामिति प्राहेतीति** । आनुमानिकाधिकरणाय व्याख्यानप्रत्याख्यानावसर इत्यर्थः । उदाहृतमित्यनन्तरं इति न दोष इति शेषः । **इत्यादेरिति** । परमव्यक्तमित्यादेः आदिपदेन ग्रहणम् । **यद्यपि चात्रेति** । अत्रोपपादनं कर्तुं उचितमिति सम्बन्धः । अत्र कर्तुमिति पुनः अत्रशब्दपाठस्तु लेखकागतः । तत्पाठेऽपि पूर्वस्य अत्रेत्यस्यात्र ग्रन्थेत्यर्थः । आश्रयासिद्धिनिरासावसरे इति तु उत्तरस्यात्रेत्यस्यार्थः इत्यप्याहुः । **महदादिप्रतिपादकवाक्यस्य त्विति** ।

भगवत्परत्वस्येति वक्ष्यमाणेनान्वयः । **साध्यदोष इति** । अप्रसिद्धविशेषणत्वं बाधरूपं पक्षाश्रितं साध्यवैकल्यरूपं दृष्टान्ताश्रितदोषं चेति योज्यम् । **परिणामित्वादिति भावः इति** । इच्छायाश्च परिणामित्वादिति शेषः । **अविकारस्येतीति** । विकारभूतेच्छाविकाररहितचेतनस्य न धर्म इति मूलार्थः ।

स०व्र०— उक्तं हीदमिति । ननु महदादेरेव पक्षत्वात् तत्सिद्ध्यर्थं तत्प्रतिपादकप्रमाणस्यैवोदाहर्तव्यत्वात् उपादानीभूतप्रकृतिमात्रप्रतिपादकश्रुत्युदाहरणसङ्गतमिति चेन्न । तादृशश्रुत्युदाहरणे सर्वासामपि श्रुतीनां भगवत्परत्वात् कथं महदादिसिद्धिरिति परेणाशङ्कितेऽमुख्यतः तत्प्रतिपादकत्वस्यापि समर्थनीयत्वात्; तत्समर्थनं च प्रकृत्यधिकरणे 'अजामेकामिति प्राहे'त्यादिना आचार्येण कृतमिति तत्प्रकारेणान्यत्र 'महतः परमव्यक्तम्' इत्यादिश्रुतिष्वपि महदादिप्रतिपादकत्वप्रकारो द्रष्टव्य इत्यभिप्रेत्य तदुदाहरणमेव कृतमिति नानुपपत्तिः । अत एव 'अजामेकामित्यादिश्रुतिरि'त्यादिशब्दग्रहणेन प्रधानमपि इत्यत्रापि उपक्रमानुसारेण प्रधानादिकमिति द्रष्टव्यम् । **अप्रसिद्धविशेषणता बाधो वेति** । अप्रसिद्धविशेषणता च घटकधर्मत्वाभावनिश्चयेन तद्घटितसाध्यस्यापि बाधो वेति । यदा घटकधर्मस्य चेतनेच्छालक्षणस्याप्रसिद्ध्या तद्घटितसाध्यस्यापि असिद्धत्वविवक्षायाम् अप्रसिद्धविशेषणता । यदा च घटकधर्मस्याभावनिश्चयेन तद्घटितसाध्यस्याप्यभावनिश्चयविवक्षा तदा बाध इति ज्ञेयम् । **एवम्भावाभावादिति** । चेतनेच्छाधीनोत्पत्तिकत्वाभावादित्यर्थः । आदिशब्देन पटाद्युद्भवो ग्राह्यः । तस्याप्युक्तसाध्याभावादित्यर्थः । **वक्ष्यमाणत्वादिति** । 'इच्छाम्यहमिति ह्येव निजानुभवरोधतः' इत्यादिना वक्ष्यमाणत्वादित्यर्थः ।

विष्टल०— उक्तानुमानानामाभासोद्धारं कर्तुमाशङ्कते **स्यादेतदिति** । **तदुक्तम्** इत्यत्र तन्महदादिकमित्यर्थः । **अन्यथेति** । साङ्ख्याचार्यवचनादिना महदाद्यवगमानङ्गीकार इत्यर्थः । सर्वस्यापि वेदस्य भगवत्परतायाः समर्थितत्वात् कथं वेदतो महदाद्यवगतिरित्यतः समाकर्षेणान्यपरताया अजामेकामिति प्राहेत्यत्रोक्तत्वादित्याह **उक्तं हीति** । यद्वा साङ्ख्यान् प्रति कथं वेदप्रमाणोपन्यास इत्यत आह **उक्तं हीति** । साङ्ख्यैरिति शेषः । ननु पुरुषस्येच्छाया एवासम्भवादप्रसिद्धविशेषणता चेतनेच्छाया अप्रामाणिकत्वे तदधीनोत्पत्त्यादिकं बाधितं चेति शङ्कते **नन्विति** । चेतन इत्येतद्धेतुगर्भविशेषणम्, अन्तःकरणस्य जडत्वादिति भावः । दृष्टान्तोऽपि दुष्ट इत्याह **पटादेरिति** । **वक्ष्यमाणत्वादिति** । 'सेच्छं चेत् किमचेतनम् । इच्छाम्यहमिति ह्येव निजानुभवरोधतः । अचेतनेच्छापगते'त्यत्रेति शेषः ।

चषकः— उक्तं हीति । 'अजामेकामिति प्राहे'त्यादिक 'प्रधानं वक्ति सा श्रुतिरि'त्यन्तेनानुमानिकपादेऽभिहितमित्यर्थः । **वक्ष्यमाणत्वादिति** । 'इच्छाम्यहमिति ह्येवे'त्यादिना प्रकृतनय एवाभिधास्यमानत्वादित्यर्थः ।

॥ इति बाधाश्रयासिद्धिशङ्का तन्निरसनञ्च ॥

* * *

॥ अथ च तत्र उद्भवपदार्थनिर्वचनायोगः ॥

२५ **सु०— 'तथाऽप्युद्भवो नामोत्पत्तिरभिव्यक्तिर्वा । नाद्यः; प्रथमप्रयोगे असिद्ध-विशेषणत्वात्, दृष्टान्तस्य साध्यविकलत्वाच्च । द्वितीये चाश्रयासिद्धेः, मया सत्कार्य-वादस्य अभ्युपगतत्वात् ।**

द्वितीयेऽप्येत एव दोषाः, त्वया व्यक्त्यनभ्युपगमात्' इति चेन्न; असत्कार्यवादस्य साधितत्वात्, सत्कार्यवादे प्रमाणाभावाच्च ।

परि०— द्वितीये चेति । प्रयोग इत्यनुषङ्गः । महदाद्युद्भवः चेतनेच्छाधीनः उद्भवत्वात् पटोद्भववदिति द्वितीयप्रयोग इत्यर्थः । **आश्रयासिद्धेः** पक्षासिद्धेर्दृष्टान्तासिद्धेश्चेत्यर्थः । अप्रसिद्ध-विशेषणत्वसाध्यवैकल्याश्रयासिद्धिषु सकृद्धेतुमाह **मयेति** । तथा चासतः सत्तायोगरूपजनिर्वा परिणामरूपापूर्वावस्थान्तरापत्तिर्वा क्वापि नास्तीत्येते दोषा इति भावः । **द्वितीय इति** । व्यक्तिपक्षे-ऽपीत्यर्थः । **व्यक्तीति** । प्राक् सत एव कार्यस्य कुलालादिव्यापारेणाभिव्यक्तिरूपोद्भवानभ्युप-गमादिति भावः । **साधितत्वादिति** । 'असद्यत्कार्यरूपेण कारणात्मतयास्ति ही'त्यादिना तदन-न्यत्वनय इति भावः ।

यादु०— असिद्धेति । सत्कार्यवादिना मयाऽसतः सत्तासम्बन्धरूपोत्पत्तेः क्वाप्यनङ्गीकारादिति भावः । द्वितीय इत्यत्र प्रयोग इति शेषः । **साधितत्वादिति** । 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम् । असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि । अनवस्थाऽन्यथा हि स्यात् सर्वत्रोत्पत्तिनाशयोरि'ति युक्तिपादे साधितत्वादित्यर्थः । युक्तिं तूत्तरत्र निराकरिष्याम इति यदुक्तमारम्भणाधिकरणे तद्वक्तुमाह **सत्कार्यवाद इति** ।

वं०प०— उत्पत्तिरिति । अभूत्वाभवनरूपेत्यर्थः । **द्वितीये** उद्भवपक्षकानुमाने । कुत इत्यत आह **मयेति** । मया सत्कार्यवादमभ्युपगम्य व्यक्तेरेवाङ्गीकृतत्वेनोत्पत्तेरनङ्गीकारादिति भावः । **द्वितीये** उद्भव-शब्देनाभिव्यक्तिग्रहणे । **त्वयेति** । सिद्धान्तिनेत्यर्थः । तथा चाश्रयासिद्धिरिति भावः । अत्रोत्पत्तिरेवोद्भवशब्देन विवक्षिता । असत्कार्यवादस्य त्वां प्रति साधितत्वेनोक्तदोषाभावादित्यभिप्रेत्याह **असदिति** । **सदिति** । अत्यन्तसदित्यर्थः ।

कं०रा०— प्रथमप्रयोग इति । महदादिकं चेतनेच्छाधीनोत्पत्तिकमित्यत्रेत्यर्थः । **द्वितीय इति** । महदाद्युद्भवश्चेतनेच्छाधीन इत्यत्रेत्यर्थः । उद्भवशब्देनोत्पत्तिविवक्षायामप्रसिद्धविशेषणत्वादिकं कथमित्यत आह **मयेति** । साङ्गत्येन मया सत्कार्यवादस्याभ्युपगतत्वेन प्रागसतः सत्तासम्बन्धादिरूपोत्पत्तेरप्रसिद्धत्वादप्रसिद्ध-

विशेषणत्वादिकमिति भावः । **द्वितीयेऽपीति** । उद्भवशब्देनाभिव्यक्तिर्विवक्षितेति द्वितीयेऽप्यप्रसिद्धविशेषणत्वादय एव दोषास्त्वया सिद्धान्तिना सदेव कार्यमभिव्यज्यत इत्यभिव्यक्तेरनङ्गीकृतत्वेन तद्रीत्याभिव्यक्तेरप्रसिद्धत्वादिति भावः । **असत्कार्यवादस्येति** । 'असद्यत्कार्यरूपेण कारणात्मतयास्ति ही'त्यत्रोत्पत्तेः प्राक्स्थूलरूपेण कार्यमसदित्यसत्कार्यवादस्य साधितत्वात् उत्पत्तेः प्रागपि कार्यं सर्वात्मना सदिति सत्कार्यवादे प्रमाणा-भावाच्चोद्भवशब्देनोत्पत्तिविवक्षायां नाप्रसिद्धविशेषणत्वादिकमिति भावः ।

श्रीनिधि०— द्वितीये चाश्रयासिद्धेरिति । द्वितीयप्रयोग इत्यर्थः । **द्वितीयेऽप्येत एव दोषा इति** । द्वितीयपक्ष इत्यर्थः ।

शे०वा०— प्रथमप्रयोग इति । महदादिकं चेतनेच्छाधीनोत्पत्तिकं कार्यत्वादिति प्रथमप्रयोग इत्यर्थः । **अप्रसिद्धेति** । सत्कार्यवादिना मया असतः सत्तासम्बन्धरूपोत्पत्तेः क्वाप्यनङ्गीकारादिति भावः । द्वितीय इति प्रयोग इत्यनुवर्तते । महदाद्युद्भवपक्षकप्रयोगेऽपीत्यर्थः । आश्रयासिद्धिरित्यत्र आश्रयशब्दः पक्षदृष्टान्तोभयपरः । ततश्च पक्षदृष्टान्तयोरसिद्धेरित्यर्थः । प्रतिज्ञातानप्रसिद्धविशेषणत्वादिदोषानुपपादयति **मयेति** । अत्यन्तसत्कार्यवादाभ्युपगमेन असतः सत्तासम्बन्धरूपचेतनाधीनोत्पत्तिकत्वस्याप्रसिद्धेरप्रसिद्धविशेषणत्वम् । सत्कार्यवादमभ्युपगच्छता पटस्याप्युक्तरूपचेतनाधीनोत्पत्तेरनङ्गीकारात् दृष्टान्तस्य साध्यविकलत्वम् । सत्कार्यवादाङ्गीकारेणोक्तरूपाया महदाद्युत्पत्तेः पटाद्युत्पत्तेर्वा असत्त्वात् पक्षदृष्टान्तयोरसिद्धिरिति भावः । **द्वितीयेऽपीति** । अभिव्यक्तिरुद्भव इति द्वितीयपक्षेऽपीत्यर्थः । **एत एवेति** । अप्रसिद्धविशेषणत्वसाध्यवैकल्याश्रयासिद्धिलक्षणा एवेत्यर्थः । तानेवोपपादयति **त्वयेति** । **साधितत्वादिति** । 'असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि । अनवस्थाऽन्यथा हि स्यात् सर्वत्रोत्पत्तिनाशयोः' इत्यादिना आरम्भणाधिकरण इति शेषः । असत्कार्यवादस्य साधितत्वादित्यनेनैव प्रागुद्भावितशेषदोषपरिहारो यद्यपि सिद्ध एव, तथाऽपि पराभिमतस्य कार्यकारणयोरत्यन्ताभेदस्य निरासार्थं प्राक् सत्कार्यवादसाधकत्वेन परोपन्यस्तहेतून्निराकर्तुं तत्प्रसक्त्यर्थमाह **सत्कार्येति** ।

वा०र०— तथापि उद्भवो नामेति मूलम् । यद्यपि चेतनेच्छाधीनोत्पत्तिकमिति प्रथमप्रयोगे उत्पत्तिरुद्भवशब्दार्थतया निकृष्योक्ति इति नायं विकल्प्य प्रयोगद्वयः साधारणः । तथा च प्रथमप्रयोग इत्यादि दूषणस्य उक्तविकल्पाश्रयणेनाभिधानायोगः । महदाद्युद्भवपक्षकः प्रयोग एवास्य विकल्पस्य उत्थापनीयत्वात् । यदि च तदनुसारेण तथापि उद्भव इत्यस्य द्वितीयप्रयोगमात्रविषयत्वं मन्यसे तर्हि प्रथमप्रयोग इत्युक्तदूषणं न असङ्गतमिति चेत् । सत्यम् । अयमत्राभिप्रायो मूलकारस्य । महदादिचेतनेच्छाधीनोद्भवकं इत्येव प्रयोगशरीरं अभिप्रेतम् । किञ्च वक्ष्यमाणरीत्या उत्पत्तिमर्थमभिप्रेत्य उद्भवेत्यस्य उत्पत्तीत्यनुवादः कृतः । ततोऽत्रत्यविचारात्प्रागुत्पत्तिपदमपि उद्भवमात्रपर्यवसन्नमिति भवत्येवार्थविकल्पः प्रयोगद्वयसाधारणः । अत एव पटवच्चेतनेच्छानुसारेण उद्भूतत्वमिति अतादृशत्वं व्याख्यातम् । तेन प्रथम इत्यादि दूषणमपि युक्तम् । अत एव द्वितीयेऽपि एत एव दोषाः इति वक्ष्यमाणमभिव्यक्त्यर्थत्वदूषणमपि प्रथमप्रयोगसाधारणमिति एत एवेत्यपि

युक्तमिति ज्ञेयम् । मया सत्कार्यवादस्येत्यस्य सन्निधानात् आश्रयासिद्धिमात्रोपपादकत्वमिति प्रतीतिनिरासायाह **प्रतिज्ञातानिति** । **आदिना** साध्यविकलत्वाश्रयासिद्ध्योः सङ्ग्रहः । सत्कार्यवादाभ्युपगमस्य उक्तदोषोपपादकत्वस्याप्रतीतेः तावत् दोषोपपादकत्वमुपपादयति **अत्यन्तसत्कार्येत्यादिना** । **असिद्धिरितीति** । असिद्धिश्चेत्यर्थः । **त्वयेतीति** । प्रथमप्रयोगे चेतनेच्छाधीनाभिव्यक्तिकमिति साधने त्वयाभिव्यक्तेः अनङ्गीकारात् अप्रसिद्धविशेषणत्वम् । पटादावपि तदभावात् दृष्टान्तस्य साध्यवैकल्यम् । द्वितीयप्रयोगे पक्षदृष्टान्तयोः उभयोरपि अभिव्यक्तित्वस्यानङ्गीकारादेव तदुभयासिद्धिश्च इत्येवं एत एव दोषा इति मूलार्थः । असत् यत् कार्यरूपेण इत्युक्तरीत्यैव कार्यात्मना सत्त्वाभावस्याङ्गीकृतत्वादिति ज्ञेयम् । सत्कार्यवादे तु प्रमाणाभाववचनं तदुपपादनयोः आनर्थक्यमाशङ्क्य परिहरति **असत्कार्येति** । **अशेषदोषेति** । असत्कार्यवादाश्रयणे तु असतः सत्तासम्बन्धरूपोत्पत्तेः स्वमते प्रसिद्धिसम्भवात् नाप्रसिद्धविशेषणत्वादिकमिति भावः । यद्यपि स्वमते असतः सत्तासम्बन्धरूपोत्पत्तिर्न प्रसिद्धा तथाविधोत्पत्तेः तत्र तत्र निराकृतत्वात् । तथापि परेणान्यायादिरीत्या उक्तमुत्पत्तिपदार्थमभिप्रेत्य अप्रसिद्धे विशेषणत्वादौ शङ्किते सति स्वमते न्यायादिमतसाधारणोत्पत्तिपदार्थमात्राश्रयणेऽपि तदुक्तदोषोद्धारस्तु सम्भवति । अतः किमर्थं परिणामोत्पत्तिपर्यन्तं गन्तव्यमित्याशयेन समाहितमिति न दोषः । अथवा असतः सत्तेत्यत्रात्यन्तपदान्तर्भविन परकीयोत्पत्तिपदार्थ एव दुष्टः न तु असतः इत्येवोक्ते कश्चित् दोषः । **सत्प्रतिपक्षतेति** । सत्प्रतिपक्षत्वमुक्तमित्यर्थः । प्रतिपक्ष उक्त इति पाठस्तु स्वरस एव ।

स०व्र०— प्रथमप्रयोग इति । महदादिकं चेतनेच्छाधीनोत्पत्तिकं, कार्यत्वात् पटवदिति प्रथमप्रयोग इत्यर्थः । मया सत्कार्यवादस्याभ्युपगमेन चेतनेच्छाधीनोत्पत्तिकत्वस्याप्रसिद्धविशेषणत्वमिति भावः । **दृष्टान्तस्येति** । सत्कार्यवादमभ्युपगच्छता पटस्यापि चेतनेच्छाधीनोत्पत्तिकत्वस्यानभ्युपगमादिति भावः । **द्वितीय इति** । महदाद्युद्भवः चेतनेच्छाधीनः उद्भवत्वात् पटाद्भववदिति द्वितीयप्रयोग इत्यर्थः । **आश्रयासिद्धेः** पक्षासिद्धेः दृष्टान्तासिद्धेश्चेत्यर्थः । सत्कार्यवादाङ्गीकारेण महदाद्युत्पत्तेः पटोत्पत्तेर्वा अनभ्युपगमादिति भावः । **द्वितीयेऽपीति** । अभिव्यक्तिरिति द्वितीयेऽपीत्यर्थः । **एत एव** अप्रसिद्धविशेषणत्वसाध्यवैकल्याश्रयासिद्धिलक्षणा एवेत्यर्थः । **असत्कार्यवादस्येति** । 'अनवस्थाऽन्यथा हि स्यात् सर्वत्रोत्पत्तिनाशयोः' इत्यादिना 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यत्र असत्कार्यवादस्य साधितत्वादित्यर्थः । युक्तिं तूत्तरत्र निराकरिष्याम इत्युक्तमारम्भणाधिकरणे तद्वक्तुमाह **सत्कार्यवाद इति** ।

विट्ठल०— शङ्कते **तथापीति** । **अप्रसिद्धविशेषणत्वादिति** । सत्कार्यवादिना मया अतः सत्तासम्बन्धरूपोत्पत्तेः क्वाप्यनङ्गीकारादिति भावः । **द्वितीय इति** । प्रयोग इति शेषः । साङ्ख्येन मया सत्कार्यवादस्यैवाभ्युपगतत्वात् सत्कार्यवादे चासतः सत्तासम्बन्धरूपोद्भवाभावेन महदाद्युद्भवरूपधर्म्यसिद्धेराश्रयासिद्धिरिति भावः । **द्वितीयेऽपि** द्वितीयविकल्पेऽपि । **साधितत्वादिति** । 'असद्यत्कार्यरूपेण कारणात्मतया अस्ति ही'त्यादिना युक्तिपादे पृथुबुध्नोदराकारत्वादिना प्रागसत एव घटादेरुत्पत्तिरिति साधितत्वादित्यर्थः ।

चषकः— **द्वितीय** इत्यत्र प्रयोग इत्यनुषञ्जनीयम् । अप्रसिद्धविशेषणत्वसाध्यवैकल्याश्रयासिद्धिषु हेतुमभिधत्ते **मया सदिति** । सत्कार्यवादमुपेयुषा असतः सत्तासम्बन्धरूपोत्पत्तेः क्राप्यनङ्गीकारादिति भावः । **द्वितीयेऽपि** । अभिव्यक्तिरेवोद्भव इति कल्पेऽपि । **त्वया** । असत्कार्यवादिना । **साधितत्वादिति** । 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम् । असद्यत्कार्यरूपेण कारणात्मतयास्ति ही'त्यादिना युक्तिपादे तदनन्यत्वनये समर्थितत्वादिति भावः । यत् आरम्भणनये 'युक्तिं तूत्तरत्र निराकरिष्याम' इति प्रत्यज्ञासीत् तत्सिषाधयिषति **सत्कार्यवाद इति** ।

॥ इति उद्भवपदार्थनिर्वचनायोगः ॥

* * *

॥ अथ च तत्र 'असदकरणात्' इत्यादौ साध्यानुपपत्तिः ॥

२६ सु०— 'असदकरणात्' इत्यादिभिश्च किं कार्यस्य प्राक्करणव्यापारात् सत्त्वमात्रं साध्यम्, उत अत्यन्तसत्त्वम् । आद्ये सिद्धसाधनम्, सदसत्त्वाभ्युपगमात् । द्वितीये त्वसदकरणादितिवत् सदकरणादित्यपि समानम्, न हि सन्नात्मा केनचित्क्रियते ।

परि०— असदकरणादित्यादिप्रागुक्तहेतव एव प्रमाणमित्यत आह **असदकरणादित्यादिभिरिति** । **सदसत्त्वाभ्युपगमादिति** । 'असद्यत्कार्यरूपेणे'त्यादिना अस्यार्थस्य साधितत्वादिति भावः ।

शे०वा०— सदकरणादित्यपि समानमिति । अनेन कार्यं, प्राक् सत्, असदकरणादिति परानुमाने कार्यं प्रागसत्सदकरणादिति सत्प्रतिपक्ष उक्तो भवति । व्याप्तिभावाभावाभ्यां वैषम्यान्न सत्प्रतिपक्षतेत्यतोऽस्यापि व्याप्तिमुपपादयति **न हीति** ।

वा०र०— व्याप्तिभावाभावेति । अत्र व्याप्तिप्रकारः इति योज्यमस्ति । न हि सत् आत्मा क्रियते इति मूले सत् अकरणादित्येतत् हेतुमात्रमुच्यते ।

विष्टल०— असदकरणादिति युक्तीनामुपन्यस्तत्वात् कथं प्रमाणाभाव इत्यत आह **असदकरणादित्यादिभिश्चेति** । **सदसत्त्वाभ्युपगमादिति** । असद्यत्कार्यं रूपेणेत्यत्रैव साधितत्वादिति भावः ।

॥ इति 'असदकरणात्' इत्यादौ साध्यानुपपत्तिः ॥

* * *

॥ अथ च तत्र 'असतः कर्मत्वे' आक्षेपसमाधाने ॥

२७ सु०— नन्वसतः कथं कर्मत्वम् । सतः कथं कार्यत्वमित्यपि समानम् । अनेन घटो जायत इत्यपि प्रत्युक्तम् ॥ तर्हि घटं करोतीत्यादेः कोऽर्थः । मृत्तिकां घटीकरोतीति । मृत्तिका घटीभवतीति ॥ असदुत्पत्तौ खरविषाणमपि कुतो नोत्पद्यत इति चेत् । तदात्मकस्योपादानस्याभावादिति ब्रूमः । अन्यथा सत उत्पत्तावात्माऽपि कुतो नोत्पद्यत इति समानम् ।

परि०— कर्मत्वमिति । कर्तृप्रयत्नविषयत्वमित्यर्थः । एतेन कार्यत्वमप्युक्तार्थम् । यदपि घटो जायत इति प्रयोगः सत्कार्यवादे मानं जायत इति क्रियास्वातन्त्र्यरूपकर्तृत्वस्यासतोऽनुपपत्तेरित्युक्तं साङ्ख्यग्रन्थे, तदतिदेशेन निराह **अनेनेति** । सतः कथं कार्यत्वमिति कथनेनेत्यर्थः । **इत्यादेरिति** । घटो भवति घटो जायत इत्यादिरादिपदार्थः । **घटीकरोतीति** । घटत्वेनाभूतं घटत्वेन करोतीत्यर्थः । घटत्वेन प्रागभूतोऽधुना घटत्वेन भवतीत्यर्थः । अघटो घटः सम्पद्यत इत्यर्थे(ऽपि) अभूततद्भावे 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरि'ति च्विप्रत्यये अस्य च्वाविती त्वे च्वेर्लोपे च घटीकरोतीत्यादिरूपनिष्पत्तिरिति ज्ञेयम् । यत्किञ्चिदुपादानस्य सर्वदा सत्त्वादुत्पत्तितादवस्थ्यमित्यत उक्तम् **तदात्मकस्येति** । खरविषाणात्मकतया परिणम्यमानस्येत्यर्थः ।

गु०दी०— अनेन घटो जायत इत्यत्र **अनेन** सतः कार्यत्वासम्भवकथनेन । घटो जायत इति व्यवहारेण खलु घटस्य सत्तामङ्गीकुर्वते । सत्त्वे घटस्येदृक् व्यवहार एव न घटत इति भावः ।

यादु०— कथं कर्मत्वमिति । साक्षात्कर्तृव्यापारविषयस्यैव कर्मत्वादसतश्च तदसम्भवादिति भावः । **अनेन घट इति** । साङ्ख्येन हि स्वशास्त्रे 'सत्कार्यवादे घटो जायत इति प्रयोगान्यथाऽनुपपत्तिर्मानम्, असतः क्रियास्वातन्त्र्यरूपकर्तृत्वस्यासम्भवादि'ति यदुक्तं तदप्यनेन पूर्वमत्यन्तासतः कथं कार्यत्वमित्युक्तदूषणेन निरस्तं ज्ञातव्यमित्यर्थः । सुहृद्भावेन पृच्छति **तर्हीति** । आदिपदेन घटो जायत इत्यस्य ग्रहणम् ।

वं०प०— [1]सदकरणादित्यनेनासत एव कार्यत्वमुक्तं तत्राशङ्कते **नन्विति** । कर्तृव्यापारं प्रति साक्षाद्विषयस्यैव कर्मत्वादसतश्च तदसम्भवेन कर्मत्वान्यथाऽनुपपत्त्या पूर्वं सत्त्वं वाच्यमित्यर्थः । **कार्यत्वमिति** । सिद्धत्वेन कर्तृव्यापाराविषयत्वात् । अन्यथाऽऽत्मनोऽपि तत्स्यादिति भावः । **तर्हीति** । यद्यसत उत्पत्तिरित्यर्थः । **इत्यादेः** घटस्य विद्यमानस्य कर्मताया अयोगात् कर्मत्वप्रतिपादनद्वारा पूर्वं घटसत्ताबोधकस्य वाक्यस्येत्यर्थः । **मृत्तिकामिति** । तथा च मृत्तिकाया एव पूर्वं सत्याः कर्मत्वाङ्गीकारेण घटस्य तदनङ्गीकारादित्यर्थः ।

(१. पृ. ६५९४ 'सदकरणादित्यपि समानम्' इति सुधायाम् ।)

कं०रा०— न हि सन्नात्मा केनचित्क्रियत इति यदसतः कृतिकर्मत्वमुक्तं तदाक्षिपति **नन्वसत इति** । असतो दार्वादाहादिकं प्रति कर्मत्वादर्शनादिति भावः । अत आत्मनः कृतिसाध्यत्वादर्शनात् सतः कथं कार्यत्वमित्यपि तुल्यमित्याह **अनेनेति** । उत्पत्तेः प्राक्कार्यस्यासत्त्वे घटा जायत इत्यादौ घटादेः कथं कर्तृत्वमविद्यमानस्य कर्तृत्वादर्शनादित्यपि चोद्यम् । सत आत्मनः कार्यत्वादर्शनात्प्रागपि घटादेः सत्त्वे कथं कार्यत्वमिति प्रतिबन्दीग्रहणेन निरस्तमित्यर्थः । परपक्षेऽनुपपत्तिसाम्योक्तावपि स्वपक्षेऽनुपपत्तिपरिहारस्यानुक्तेः । पृच्छति **तर्हीति** । **आदि**शब्देन घटो जायत इत्यस्य ग्रहणम् । घटं करोतीत्यस्यार्थमाह **मृत्तिकामिति** । घटो जायत इत्यस्यार्थमाह **मृत्तिकेति** । घटोत्पत्तेः प्राक् मृत्तिकायाः सत्त्वात् कर्मत्वकर्तृत्वे उपपद्येत इति भावः ।

श्रीनिधि०— घटो जायत इत्यपि प्रत्युक्तमिति । सतः कार्यत्वे यदेवंरूपप्रयोगान्यथानुपपत्तेः । प्रमाणत्वमुक्तमित्यर्थः । तथा हि । असतः कार्यत्वे अयं प्रयोग एवानुपपन्नः । न ह्यसति घटत्वमस्तीति ।

शे०वा०— ननु घटं करोतीति द्वितीयया घटस्य कर्मत्वमुच्यत इति तावदविवादम् । कर्मत्वं च कारकविशेषत्वम् । तच्चासतो न सम्भवतीति प्रतिपक्षानुमाने पूर्ववादी प्रतिकूलतर्कमाशङ्कते **नन्विति** । घटं करोतीत्यत्रेति शेषः । एवञ्चासमानबलत्वान्न सत्प्रतिपक्ष इति भावः । असतो द्वितीयोक्तकर्मत्वानुपपत्तिवत् सतोऽपि घटं करोतीत्युक्तकार्यत्वानुपपत्तेः पूर्वानुमानस्यापि प्रतिकूलतर्कपराहतत्वेन साम्याद्युक्तः प्रतिपक्ष इत्याह **सतः कथं कार्यत्वमिति** । ननु तथाऽपि घटो जायत इति घटस्य जनिकर्तृत्वानुभवादसतः कर्तृत्वानुपपत्तेः सत्कार्यवादसिद्धिरित्यतः तर्हि तत एव जायत इत्युक्तकार्यत्वानुपपत्त्या प्रागसत्त्वस्यापि सिद्धेः परस्यापीष्ट-सिद्धेरित्याशयेनाह **अनेनेति** । अस्त्वेवं प्रतिवादिमुखमुद्रणम् । वस्तुतत्वं किमित्यभिप्रेत्य सुहृद्भावेन पृच्छति **तर्हीति** । आदिपदेन घटो जायत इत्यस्य सङ्ग्रहः । घटं करोतीत्यस्य व्याख्या मृत्तिकां घटीकरोतीति । घटो जायत इत्यस्य तु मृत्तिकां घटीभवतीति । नन्वनेन ग्रन्थेन घटो जायत इत्यादीनामर्थान्तराभ्युपगमेनोप-पत्तिरित्युच्यते । 'तस्मात्प्रध्वस्तभेदादी'ति वाक्यव्याख्यावसरे घटो जायते घटं जनयतीत्यनुत्पन्नस्यापि कर्तृत्वं कर्मत्वं च, तस्मात् कार्यस्य कारणाभेदात्प्रागुत्पत्तेर्विनाशोत्तरं च सत्त्वादेव युज्यते । नाप्यत्यन्तासतः कारकत्वमित्यादिना ग्रन्थेन घटादीनां पूर्वं सत्त्वेन घटो जायत इत्यादेरुपपत्तिर्वक्ष्यते । पूर्वत्र तु असत्प्रतीति-व्युत्पादनावसरे कर्तृत्वादेर्बौद्धत्वानभ्युपगमे घटो जायत इत्यादि न स्यादिति चोक्तम् । तत्कथमेषां ग्रन्थानां परस्परं न विरोध इति चेत् । **अत्र गुरवः** । अत्यन्तसत्कार्यानभ्युपगमेऽपि कारणात्मना सत्त्वाभ्युपगमात् कारकव्यापारात्प्रागकार्यात्मकस्य कारणस्य कारकव्यापारेण कार्यरूपतापत्तेः सदसत्कार्यमते जनित्वान्मृत्तिका घटीभवतीत्यादिर्घटो जायत इत्यादेरर्थ इति न कर्तृत्वानुपपत्तिरिति एतद्ग्रन्थाशयः । तस्मात्प्रध्वस्तभेदादीति व्याख्याग्रन्थस्यात्यन्तिकसत्त्वस्योक्तरीत्याऽनेकानुपपत्तिग्रस्तत्वात् कार्यस्य कारणात्मनाऽपि सत्त्वानभ्युपगमे उक्तजनिपदार्थासम्भवात् घटो जायत इति कर्तृत्वाद्यनुपपत्तिरेव । न चासत्ख्यातिग्रन्थोक्तप्रकारेण बौद्ध-कर्तृत्वाद्यभ्युपगमेनोपपत्तौ कारणात्मना कार्यसत्त्वसाधकतया कर्तृत्वाद्युक्तिरयुक्तेति वाच्यम् । प्रतीतिसिद्ध-

प्रध्वस्तभेदसत्त्वस्य प्रकारान्तरेणानुपपत्त्या तदर्थतया कारणात्मना सत्त्वस्य तत एव तादृशजनिपदार्थस्य चावश्याङ्गीकार्यत्वसिद्धेः कर्तृत्वादेरपि निर्वाह इत्याशयेनाभ्युच्चययुक्तितया कर्तृत्वादेरुपन्यासात् । अत एव तत्र भाष्ये स्वशब्देन भेदग्रहणम् । आदिपदेन च कर्तृत्वादेरुपादानम् । न तु कर्तृत्वादेरन्यथानिर्वाहाभावाभिप्रायेण । अथवा भातीत्यादिभानादिक्रियाकर्तृत्वस्य बौद्धस्यासति व्यवहारवत् बौद्धस्य जनिकर्तृत्वस्य नात्यन्तासति व्यवहार इत्याशयेनास्यापि साधकतयैवोपन्यास इत्याशयः । एवञ्च न वक्ष्यमाणग्रन्थेनैकवाक्यतायामनुपपत्तिः । अत एव 'सत्त्वमात्रसाध्ये सिद्धसाधनमि'त्येतद्ग्रन्थे नाप्यत्यन्तासतः कारकत्वमित्यत्यन्तपदमुत्तरग्रन्थे । नाप्यस्य पूर्वग्रन्थेन विरोधः । तत्र परं प्रति प्रतिबन्दीमुखेन च प्रवृत्त्या पराङ्गीकृतात्यन्तासत्कार्यवादस्यानुपपन्नताया वक्ष्यमाणत्वात् सदसत्कार्यवादस्य च परेणानभ्युपगमात् अभावाश्रयादिवत् कर्तृत्वादेर्बौद्धत्वानङ्गीकारे तव घटो जायत इत्यादेरनुपपत्तिरेवेत्याशयात् । तस्मान्न पूर्वेणोत्तरेण च विरोध इति ।

प्रतिपक्षानुमाने बाधकान्तरमाशङ्कते **असदुत्पत्ताविति** । असतो घटादेरुत्पत्तावित्यर्थः । अविशेषादिति शेषः । ततश्चोक्तबाधकभावाभावाभ्यां वैषम्यादनुमानयोर्न प्रतिपक्षत्वमिति भावः । असतो घटस्य तदात्मकोपादानसद्भावादुत्पत्तावपि खरविषाणस्य तद्विरहादनुत्पत्त्युपपत्तेरविशेषासिद्ध्या व्याप्तिविकलोऽयं प्रसङ्ग इत्याशयेनाह **तदात्मकस्येति** । अत्र वैषम्यमात्रे तात्पर्यं न तु यत्रोपादानमस्ति तत्रोत्पत्तिरिति व्याप्तावपि तात्पर्यमभिमतम् । अतो न स्वप्नाधिकरणीयग्रन्थविरोध इत्यवधेयम् । अवश्यं चैतदेवं यदात्मकमुपादानमस्ति तदुत्पद्यते यदात्मकं तन्नास्ति तन्नोत्पद्यत इति, तच्च सद्वाऽसद्वेत्यन्यदेतत् । अन्यथा परस्याप्यगतेरित्यभिप्रेत्य स्थापनानुमाने बाधकान्तरमाह **अन्यथेति** । ततश्च समानबलत्वमेवेति प्रतिपक्षोऽप्रत्यूह इति भावः ।

वा०र०— कारकविशेषत्वमिति । कारकत्वं च क्रियाकारित्वम् । 'क्रियां कुर्वद्धि कारकम्' इत्यभियुक्तोक्तेरिति भावः । **पूर्ववादीति** । **अत्रेति** । प्रतिकूलतर्कपराहतपूर्ववादी प्रतिपक्षानुमाने आशङ्कित इति सम्बन्धः । घटं करोतीत्यादेः परोपन्यस्तस्यार्थकथनोपयोगिपरप्रश्नस्य उत्थापनमाशङ्क्य तं घटयति **अस्त्वेवमिति** । मृत्तिकां घटीकरोतीत्यस्येव मृत्तिका घटीभवतीत्यस्यापि घटं करोतीत्येतदर्थकतया अभिधानमिति भ्रान्तिवारणाय मृत्तिका घटीभवति इत्येतत् आदिपदोक्तघटो जायते इत्येतत् व्याख्यानमिति दर्शयितुं विवेकेन व्याख्यानद्वयविषयमाह **घटं करोतीत्यस्येत्यादि** । 'असद्विलक्षणज्ञात्यै ज्ञातव्यमसदेव हि' इत्येतत् जिज्ञासाधिकरणीयानुव्याख्यानमूले । ननु असतः कथं भाति भास्यते इति कर्तृत्वं कर्मत्वं चेत्याद्याशङ्क्योक्ते समाधाने वाक्यार्थचन्द्रिकाकृता तद्ग्रन्थद्वयविरोधमाशङ्क्य परिहरति **ननु अनेन ग्रन्थेनेत्यादिना तस्मान्न पूर्वेण उत्तरेण च विरोधः इत्यन्तेन । पूर्वत्र त्विति** । जिज्ञासाधिकरणीयासद्विलक्षणेत्यनुव्याख्यानव्याख्यानावसरेत्यर्थः । विषयभेदस्पष्टीकरणेन टीकाग्रन्थः प्रागेव व्याख्यातः । असच्छब्दस्य खरविषाणादिपरत्वे खरविषाणोत्पत्तौ खरेत्यादेरित्याद्यापादनायोगः । अभेदात् । आपादकासिद्धेश्च इत्यतो व्याचष्टे **असतो घटादेरिति** । **न प्रतिपक्षत्वमिति** । अनुमानयोर्वैषम्यात् उत्तरस्य प्राक् असत्त्वानुमानस्य न सत्त्वसाधकपूर्वानुमानप्रतिपक्षत्वमिति

योज्यम् । **तात्पर्यमिति** । अभिमतं इत्युत्तरेण सम्बन्धः । अनुत्पत्तिस्थले उपादानसम्भवात् अत्र तदसम्भवो नास्ति । किन्तु तत्सम्भववत् उत्पत्तिः । सम्भवतीति तदसम्भवनिरासाय सम्भवप्रतिपादनमेव वस्तुगतिमनुरुध्य कृतमिति भावः । **उपादानमस्तीति** । उपादानं सम्भवतीत्यर्थः । **स्वप्नाधिकरणीयेति** । न हि वयं कारणसामग्रीसम्पादनसम्भावनामात्रेणार्थानां सत्यतां आतिष्ठामहे । किन्तु बाधाभावेन इति वक्ष्यामः । यस्योपादानं सम्भवति बाधश्च नास्ति तदेव हि प्रागेव शब्देन व्यवच्छिन्नमिति भाव इति च 'भ्रान्तिः जाग्रत्वमेव हि । कदाचित् दर्शनयोग्यं' इत्येतदनुव्याख्यानव्याख्यानरूपस्वप्नाधिकरणीयग्रन्थेत्यर्थः । ननु कार्योत्पत्तावुपादानसत्त्वप्रयोजकतया उक्तम् । तच्च येन कारणेनासत्कार्यं उत्पादनीयं तत्स्वयं सद्वाऽसद्वा । असतः कारणत्वानुपपत्तेः सदेवेति वाच्यम् । तथा च तदात्मककार्यस्य सत्त्वात् सदकरणं असिद्धं इत्यत आह **तच्चेति** । त्वदुक्तातिप्रसङ्गपरिहाराय उपादानसम्भवासम्भवौ स्वीकृतौ । तेन तावत् अतिप्रसङ्गभङ्गः सिद्ध्यत्येव । कारणस्य कार्याकारेण असत्त्वादेव सदकारणासिद्धिरपि इति सदसद्वेत्येतत् अन्यत् । प्रकृतानुपयोगीत्यर्थः ।

स०व्र०— ननु कार्यं कारणव्यापारात्पूर्वं असत्, सदकरणात् इति साधयितुं न शक्यते । बाधकतर्कसद्भावात् । तथा हि । कार्यस्यासत्त्वे तस्य कृतिं प्रति क्रियाजन्यफलाश्रयत्वलक्षणं कर्मत्वं वक्तव्यम् । न चासतः फलाश्रयत्वं सम्भवति । तस्मात् यदि कार्यमसत्स्यात् तर्हि क्रियाजन्यफलाश्रयत्वलक्षणकर्मत्वोपेतं स्यात्, न भवति च तादृशम् । तस्मादसदित्यभिप्रेत्य शङ्कते **नन्वसतः कथं कर्मत्वमिति** ।

केचित् साक्षात्कर्तृव्यापारस्याव्यवधानेन विषयस्यैव कर्मत्वात् असतश्च तदसम्भवेन कर्मत्वान्यथानुपपत्त्या सत्त्वमभ्युपेयमित्यर्थ इत्याहुः । तर्हि कार्यं सत् असदकरणादिति त्वदीयानुमानेऽपि यदि कार्यं सत्स्यात् तर्हि कृतिविषयत्वलक्षणकार्यत्वोपेतं स्यात् । न च सिद्धस्य तस्य तादृशकार्यत्वं सम्भवति । अन्यथा आत्मनोऽपि तत्स्यादिति बाधकसद्भावान्न तेन कार्यस्य सत्त्वसिद्धिरित्यभिप्रेत्य समाधत्ते **सतः कथं कार्यत्वमिति** । सिद्धत्वेन कर्तृव्यापारविषयत्वाभावात् । अन्यथा आत्मनोऽपि तदापत्तेरिति भाव इत्याहुः । तथाऽपि घटो जायत इत्यादौ कर्तृत्वप्रतीतेरसतश्च तदनुपपत्त्या सत्त्वसिद्धिरित्यत आह **अनेनेति** । सिद्धस्याप्युत्पत्तिकर्तृत्वे आत्मनोऽप्युत्पत्तिकर्तृत्वापत्त्या सत्त्वेऽपि कथं कर्तृत्वमिति प्रतिबन्दीदानेनेत्यर्थः । तर्हि कार्यस्यासत्त्वे घटं करोतीत्यत्र कर्मत्वं, घटो जायते इत्यत्र कर्तृत्वं च कथमुपपादनीयमिति सुहृद्भावेन पृच्छति **तर्हीति** । आदिपदेन कर्तृत्वप्रतिपादकस्य घटो जायत इत्यस्य सङ्ग्रहः । घटं करोतीत्यस्य व्याख्या मृत्तिका घटं (घटी)करोतीति । घटो जायते इत्यस्य मृत्तिका घटीभवतीति । अयं भावः । घटस्य साक्षात्कर्तृव्यापारस्याव्यवधानंन विषयत्वरूपकर्मत्वाभावात् मृत्तिकाया एव तथात्वात् घटस्य चोद्देश्यफलसम्बन्धितयैव कर्मत्वात् तादृशकर्मत्वस्यासत्त्वेऽप्युपपत्तिरिति न तेन सत्त्वसिद्धिरिति । यत्किञ्चिदुपादानस्य सर्वदा सत्त्वादनुपपत्तितादवस्थ्यमित्यतः **तदात्मकस्य** इत्युक्तम् ।

विट्ठल०— कथं कर्मत्वमिति । ग्रामं गच्छतीत्यादौ सत एव कर्मकारकत्वदर्शनादिति भावः । **कथमिति** । अत्यन्तसतः कथं कार्यत्वमिति समानमित्यर्थः । **अनेन घट इति** । साङ्ख्येन स्वशास्त्रे सत्कार्यवादसमर्थनाय घटो जायत यथा प्रयोगान्यथानुपपत्तिर्मानं स्वयमसतः क्रियास्वातन्त्र्यरूपकर्तृत्वासम्भवादिति यदुक्तं तदप्यनेन 'पूर्वमत्यन्तसतः कथं कार्यत्वमि'त्युक्तदूषणेन निरस्तं ज्ञातव्यमित्यर्थः । सुहृद्भावेन पृच्छति **तर्हीति** । **आदि**पदेन घटो जायत इत्यस्य ग्रहणम् । **मृत्तिकामिति** । तथा च मृत्तिकारूपकारणात्मनैव कर्मत्वं मृत्तिकायाश्च सत्त्वान्नानुपपत्तिरित्याशयः । घटो जायत इति प्रयोगमनुसृत्योक्तं **मृत्तिकेति** ।

चषकः— असतः कथमिति । प्राचीनदिशा क्रियाजन्यफलशालित्वरूपं, नव्यदिशा धात्वर्थतावच्छेदकफलशालित्वरूपक्रियाविषयत्वादिरूपं वा कर्मत्वं धर्मिसत्तासापेक्षं कर्तृव्यापारागोचरे सति दुरुपपादमिति भावः । असतः क्रियास्वातन्त्र्यरूपकर्तृत्वानुपपत्त्या घटो जायत इति प्रयोगानुरोध एव सत्कार्यवादे मानमिति यदभ्यधात् साङ्ख्यः तदपि प्रतिविधत्ते **अनेनेति** । सतः कथं कार्यत्वमिति कल्पनेन इत्यर्थः । **घटीकरोतीति** । घटत्वेनाभूतं घटत्वेन करोति, घटत्वेन प्रागभूतः सम्प्रति घटत्वेन भवतीत्यर्थः । 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरि'त्यत्र 'अभूततद्भाव इति वक्तव्यमि'ति कात्यायनवचनादिति भावः । **तदात्मकस्य** खरविषाणात्मकस्य ।

॥ इति 'असतः कर्मत्वे' आक्षेपसमाधाने ॥

* * *

॥ अथ च तत्र कार्यजनने कार्यकारणयोः सम्बन्धासम्बन्धविवेकः ॥

२८ सु०— य(द)यपि कार्येण कारणं सम्बद्धं तदुपजनयति उत असम्बद्धमेवेति पृष्टम् । तत्र कारणशब्देनोपादानं वा विवक्षितं निमित्तं वा ।

आद्ये जनयतीत्येव नेष्यते, किन्तु निमित्तकारणानि तत् कार्यतां नयन्ति ।

द्वितीये तु कार्याकारेणासम्बद्धं कारणाकारेण सम्बद्धमित्युत्तरम् । अत एव नातिप्रसङ्गः ॥ शक्तिश्च कारणानां सदसद्विषया, अन्यथा निर्विषयत्वापातात् । न हि सत् कर्तुं शक्यं भवति ।

परि०— इत्येव नेष्यत इति । कर्तरि प्रयोगो नेष्ट इत्यर्थः । **तदिति** । उपादानकारणमित्यर्थः । **द्वितीये त्विति** । निमित्तकारणमिति पक्षे त्वित्यर्थः । **अत एवेति** ।

कारणत्वरूपेण सम्बद्धं सदेव कार्यं जनयतीत्युक्तत्वादेव प्रागुक्तासम्बन्धपक्षोक्तातिप्रसङ्गदोषो नेत्यर्थः । शक्तस्य शक्यकरणादिति प्रागुक्तं निराह **शक्तिश्चेति** । कारणात्मना यत्सत् कार्यात्मना चासत् तद्विषयेत्यर्थः । कुत एतदित्यतोऽसदविषयत्वस्य परेणैवोपगमात् । सदसद(सद)विषयत्वमेव व्यनक्ति **न हीति** ।

यादु०— न हि सत् कर्तुमिति । न हि सत्कर्तुमशक्यमित्यस्यानन्तरं नाप्यत्यन्तमसदिति शेषो द्रष्टव्यः ।

वं०प०— तत् उपादानम् । 'द्वितीये त्वि'त्यनन्तरं निमित्तकारणमिति शेषः । **अत एव** कारणाकारेण सम्बन्धस्याङ्गीकारादेव । **अतिप्रसङ्गः** असम्बन्धस्य जनकत्वे सर्वस्मात्सर्वसम्भवरूपः । **अन्यथा** सदसद्विषयकत्वाभावे । **आपातात्** कारणानामिति वर्तते । कुत इत्यत आह **न हीति** ।

कं०रा०— आद्य इति । कारणशब्देनोपादानविवक्षायां कारणं कार्यं जनयतीत्येव नेष्यते किन्तु निमित्तकारणानि तत्र कारणशब्दितमुपादानं कार्यरूपतां नयन्तीत्येवेष्यत इत्यर्थः । **द्वितीयें त्विति** । कारणशब्देन निमित्तं विवक्षितमिति द्वितीये तु कार्याकारेणासम्बन्धं निमित्तं कार्यं जनयतीत्युत्तरमित्यर्थः । यत्र शक्तं कारणं तदेव जनयतीत्यत्रासति शक्ये शक्तेस्तद्विषयत्वायोगात्कार्यं सदेवेत्यङ्गीकार्यमिति यदुक्तं तत्राह **शक्तिश्चेति** । कारणानां शक्तिश्चोपादानरूपेण सदुपादेयरूपेण चाद्यत्कार्यं तद्विषयेत्यर्थः । ननु कारणशक्तेः सदसद्विषयत्वाभावेन निर्विषयत्वापत्तिः सत्कार्यविषयत्वाभावेन निर्विषयत्वापत्तिः सत्कार्यविषयत्वसम्भवादित्यत आह **न हीति** ।

श्रीनिधि०— तत्कार्यतां नयन्तीति । तदुपादानं कर्म निर्विषयत्वापत्तेरित्युक्तम् । सतो विषयत्वसम्भवादित्यत आह **न हि सत् कर्तुं शक्यमिति** ।

शे०वा०— एवमत्यन्तसत्त्वं साध्यमिति द्वितीयेऽसदकरणहेतुं निरस्योपादानग्रहणाद्यं हेतुमपि निराकर्तुमाह **यदपीति** । **जनयतीत्येव नेष्यत इति** । मृत्तिकाया घटात्मना भवने शक्तिमत्त्वात् शक्तिरूपकारणत्वस्य तदनुमापकानन्यथासिद्धनियतपूर्ववृत्तित्वस्य च सत्त्वेऽपि अवस्थान्तरापत्तिरूपजनिं प्रति कर्मभूतत्वेन तत्सम्पादकत्वाभावान्न तद्रूपं जनकत्वमिति भावः । तर्हि जनिरेव न सिद्ध्येदिति पृच्छति **किन्त्विति** । उपादानस्याजनकत्वेऽपि निमित्तकारणानां तथात्वात् तत्सिद्धिरित्याह **निमित्तेति** । **अत एवेति** । कार्याकारेणासम्बद्धस्यापि कारणाकारेण सम्बद्धस्यैव तज्जनकत्वाङ्गीकारादेवेत्यर्थः । **अतिप्रसङ्ग इति** । असम्बद्धत्वाविशेषेण सर्वस्मात् सर्वसम्भवापत्तिरूप इत्यर्थः । किञ्चासम्बद्धत्वेऽपि कारणं तदेव करोति

यत्र शक्तमिति कथमतिप्रसङ्गः । ननु सा शक्तिः सर्वत्र चेत् सैवाव्यवस्था, शक्यविषया चेदसति शक्ये शक्यविषयत्वायोगात् सदेव कार्यं स्यादित्यतो यत्कार्याकारेणासत् कारणाकारेण च सत् तद्विषयत्वाश्रयणान्न कश्चिदोष इत्याशयेनाह **शक्तिश्चेति** । निर्विषयत्वमेवोपपादयति **न हीति** । अत्यन्तसदित्यर्थः । उपलक्षणं चैतत् । नाप्यत्यन्तमसत्कर्तुं शक्यमित्यपि द्रष्टव्यम् । ततश्च परिशेषात्सदसद्विषयत्वसिद्धिरिति भावः ।

वा०र०— कारणत्वस्येति । सत्त्वेऽपीत्युत्तरेण सम्बन्धः । **कार्याकारेणेति** । निमित्तकारणस्येति शेषः । निमित्तं हि दण्डदिकं घटेन कार्याकारेणासम्बद्धमपि कारणाकारेण घटेन सम्बद्धमेव घटं जनयति इत्यङ्गीकारादित्यर्थः । परमतानुवादस्थीयग्रन्थानुसारेणाधिकं पूरयन्नाह **किञ्चेति** ।

स०व्र०— आद्य इति । अयं भावः । यद्यपि उपादाने निमित्ते च कारणत्वलक्षणा शक्तिः, तज्ज्ञापकमनन्यथासिद्धनियतपूर्ववृत्तित्वं च तिष्ठत्येव । तथाऽपि उपादानं जनकमिति नोच्यते । जनकत्वं नाम उपादानस्य कार्यत्वावस्थापादने निमित्तत्वम् । न च तदुपपादनस्यास्ति । किं नाम स्वयमेव कार्यत्वावस्थापन्नं भवतीति । **अत एवेति** । कार्येण सम्बद्धस्यापि तत्कारणाकारेण सम्बन्धाङ्गीकारान्नातिप्रसङ्ग इत्यर्थः । **अन्यथेति** । केवलसत्त्वविषयत्वाङ्गीकार इत्यर्थः । तदेवोपपादयति **न हीति** ।

विट्ठल०— जनयतीत्येव नेष्यत इति । एवं च सम्बन्धमसम्बधं चेति विकल्पो दूरोत्सारित इति भावः । तर्हि कारणं कार्यं जनयतीति व्यवहारस्य का गतिरित्याशङ्क्योत्तरमाह **किन्तु निमित्तेति** । तदुपादानभूतं मृत्तिकादि कार्याकारेणेति पृथुबुध्नोदराकारादिमत्वाकारेणासम्बन्धं कारणाकारेण कारणात्मना सम्बद्धमित्यर्थः । **अत एवेति** । एवं प्रकारसम्बन्धस्य सत्त्वादेवासम्बन्धत्वे सर्वस्मात्सर्वसम्भवापत्तिरित्यतिप्रसङ्गो नेत्यर्थः । कारणानां शक्तिपरामर्शेऽप्येकोऽर्थः सिद्ध्यतीत्याह **शक्तिश्चेति** । **न हि सत्कर्तुमिति** । न ह्यत्यन्तसदात्मस्वरूपं कर्तुं शक्यं उपलक्षणमेतत् नाप्यत्यन्ताऽसत्कूर्मरोमादिकं कर्तुं शक्यं भवतीति ग्राह्यम् ।

चषकः— नयतेर्द्विकर्मकतया तदिति व्यस्तं पदम् । उपादानकारणमित्यर्थः । **द्वितीये** निमित्तकारणमिति कल्पे । **अत एव** । कारणरूपेण सम्बद्धमेव कार्यं जनयतीत्यभिहितत्वादेव । **नातिप्रसङ्गः** असम्बन्धकल्पोक्तक्षत्यभावः । **सदसद्विषया** कारणात्मना यत् सत् कार्यात्मना च असत् तद्विषया । **अन्यथा** सदसद्विषयकत्वानुपगमे । विषयतानिरूपकत्वसामान्याभावलक्षणनिर्विषयत्वं असद्विषयकत्वाभावसद्विषयकत्वाभावकूटेन साधनीयम् । तत्र कूटघटकाद्यंशः स्वेनैवोरीकृत इत्यंशान्तरमेव पक्षे व्यनक्ति **न हीति** ।

॥ इति कार्यजनने कार्यकारणयोः सम्बन्धासम्बन्धविवेकः ॥

* * *

॥ अथ च तत्र तन्तुपटयोरभेदानुमाने विवेकः ॥

२९ सु०— यच्च तन्तुपटयोरभेदानुमानं तत्राभेदमात्रसाधने सिद्धसाध(नम्)नत्वम्, भेदाभेदाङ्गीकारात् । अत्यन्ताभेदसाधने तन्तुधर्मत्वं तावदसिद्धम्, न हि स्वयमेव स्वस्य धर्मो भवति । न हि उपचारोऽनुमानप्रवृत्तेरङ्गम्, अतिप्रसङ्गात् ।

परि०— यच्चेति । न पटस्तन्तुभ्यो भिद्यते तन्तुधर्मत्वादिति प्रागुक्तानुमानमित्यर्थः । 'स्वाङ्गे शेते' इतिवदुपचारः किं न स्यादित्यत आह **न हीति** । **अतिप्रसङ्गादिति** । चैत्रः केसरवान् सिंहत्वादित्यनुमानरूपातिप्रसङ्गादित्यर्थः । न च हेतोरसिद्धिः । उपचरितसिंहत्वसद्भावादिति भावः ।

वं०प०— यद्युपचारोऽनुमानप्रवृत्तेरङ्गं स्यात् तदा देवदत्तः क्रौर्यादिमान् सिंहत्वात् सिंहवदित्यप्यनुमानं स्यात् । न चासिद्धिः । औपचारिकसिंहत्वस्य सत्त्वात् । तस्मादौपचारिकं स्वस्यैव स्वधर्मत्वमङ्गीकृत्यासिद्धिं परिहृत्यानुमानं न कार्यमित्याह **अतिप्रसङ्गादिति** ।

कं०रा०— यच्चेति । यच्च न पटस्तन्तुभ्यो भिद्यते तन्तुधर्मत्वादिति तन्तुपटयोरभेदानुमानं तत्राभेदमात्रसाधने सिद्धसाधनत्वं मया तयोः **भेदात्** भेदयोरङ्गीकृतत्वादित्यर्थः । तन्तुपटयोरत्यन्ताभेदोऽप्यौपचारिकं पटस्य तन्तुधर्मत्वं सम्भवतीत्यत आह **न हीति** ।

श्रीनिधि०— ननु मुख्यतः स्वस्य स्वधर्मत्वाभावोऽप्यौपचारिकं तदस्तीत्यत आह **न हीति** । **अतिप्रसङ्गादिति** । माणवकेऽपि गृहदाहकत्वानुमानमङ्गित्वेन स्यादिति भावः ।

शे०वा०— यद्यपि न च कारणादन्यादित्यादिनोक्तमनुमानमनिराकृत्य द्वितीयाद्यनुमानदूषणमयुक्तम् । तथाऽपि द्वितीयाद्यनुमानदूषणेन तस्यापि दूषितप्रायत्वात् स्पष्टदूषणत्वाद्वा तदनिराकृत्य विशेषानुमानान्येव निराचिकीर्षुः पटस्तन्तुभ्यो न भिद्यते तन्तुधर्मत्वादित्यनुमानं तावन्निराकरोति **यच्चेति** । केचित्तु यद्यपि तन्तुपटयोरभेदे प्रत्यक्षमपि प्रमाणमुक्तं तथाऽपि कथायां तदनुद्भाव्यत्वात् तन्मात्रेणापि तन्निराससिद्धेः किं पृथक् तन्निराकरणेनेत्यभिप्रेत्य तदनिराकृत्यैव अनुमानमात्रनिराकरणमिदमित्याहुः । सिद्धसाधनत्वमेव विशदयति **भेदाभेदेति** । असिद्धिमेव प्रकटयति **न हीति** । अन्यथा तन्तोरपि तन्तुधर्मत्वं स्यादिति भावः । ननु यद्यपि पटस्य मुख्यं तन्तुधर्मत्वं नास्ति तथाऽप्युपचरितं तदस्त्येव । तदेव हेतुतयाऽभिमतमिति नासिद्धिरित्यत आह **न हीति** । तथा सति देवदत्तस्याप्युपचरितसिंहत्वेन पशुत्वानुमानं स्यादित्यतिप्रसङ्ग इत्याह **अतिप्रसङ्गादिति** ।

वा०र०— यच्च तन्तुपटयोः इत्युत्तरग्रन्थे प्राप्ताचातुर्रीं परिहरन् आह **यद्यपीति** । **अनुमानमिति** । कार्यं कारणात् अन्यं न भवति । ततो भिन्नत्वेनानुपलम्भात् इति सामान्यानुमानमित्यर्थः । **विशेषेति** । वक्ष्यमाणत्वात् । तस्याप्यनुमानस्याशङ्कने सति तत्परित्यागे निमित्ताभावः इति भावः । **दूषितप्रायत्वादिति** । अभेदमात्रसाधन इत्यादेः तदनुमानेऽपि साम्यादिति भावः । **स्पष्टेति** । उक्तरीत्यैवेति बोध्यम् । **तन्मात्रेणेति** । कथायां तस्यानुद्भाव्यत्वमात्रेणेत्यर्थः । **आहुरिति** । 'न च कारणादन्यत्' इत्येतत् मूलपूर्वग्रन्थे अनुमानस्यैवोक्ततया प्रत्यक्षकथनपरतया तद्ग्रन्थयोजनानुपपत्त्या अत्र प्रत्यक्षमपि प्रमाणमुक्तमित्यस्यायोगात् इत्यादिकं अस्वरसबीजम् ।

स०व्र०— **अत्यन्ताभेदसाधन इति** । कार्यकारणयोरत्यन्ताभेदमङ्गीकुर्वता तयोर्धर्मधर्मिभावस्य विरुद्धत्वेनाङ्गीकर्तुमशक्यत्वादन्यतरासिद्धिः हेतोरित्यर्थः । **अतिप्रसङ्गादिति** । देवदत्तः पशुः सिंहत्वात् सिंहवदित्यपि स्यात् । न चासिद्धिः । उपचरितसिंहत्वसद्भावादिति भावः ।

विठ्ठल०— **न हि स्वयमेव स्वस्य धर्म इति** । यद्यपि यावद्धर्मिभाविस्थले स्वयमेव स्वस्य धर्मो विशेषबलात् । तथापि प्रकृते धर्मपदेनोपादेयस्यैव विवक्षितत्वेनोपादानोपादेययोर्भेदस्याप्यपेक्षितत्वादेवमुक्तिरिति ध्येयम् । उपचरितमत्र धर्मत्वमित्यत आह **न हीति** । उपचरितत्वे वस्तुतस्तदभावेनासिद्धिप्रसङ्गादिति भावः ।

चषकः— **यच्चेति** । पटस्तन्तुभ्यो न भिद्यते तन्तुधर्मत्वादित्यनुमानमित्यर्थः । **अतिप्रसङ्गात** । चैत्रः पशुः सिंहत्वादित्यनुमानप्रसङ्गात् ।

॥ इति तन्तुपटयोरभेदानुमाने विवेकः ॥

* * *

॥ अथ च तत्र पटस्य तन्तुधर्मत्वविवेचनम् ॥

३० सु०— कथं च तन्तुधर्मत्वं पटस्य । तन्तुविशेषणत्वमिति चेन्न, पुरुषादिविशेषणे दण्डादौ व्यभिचारात् । तदाश्रितत्वमिति चेन्न, अभेदेनासिद्धिप्रसङ्गात्, कुण्डबदरादौ व्यभिचाराच्च । तदात्मकत्वमिति चेन्न, साध्याविशिष्टत्वापत्तेः । अभेदेन भेदाभावः साध्यत इति चेन्न, भेदाभावातिरिक्तस्याभेदस्य अनभ्युपगमात्, अभ्युपगमेऽपि बाधात् । एवमुपादानोपादेयभावोऽप्यसिद्ध एव; न हि स्वयमेवोपादानमुपादेयं चेति युक्तम्,

करणत्वकर्मत्वयोर्भेदनियतत्वात् । संयोगाप्राप्त्यभावश्चात्यन्ताभेदाभावादुपपत्स्यते । गुरुत्वान्तरकार्यादर्शनं चाभेदाङ्गीकारेण भविष्यति ।

परि०— अभेदेनेति । तन्तुधर्मत्वादित्यस्य तन्त्वात्मकत्वादित्यर्थोक्तेः । तन्त्वभेदेन हेतुना तन्तुभेदाभावसाधनान्न साध्यावैशिष्ट्यमित्यर्थः । **बाधादिति** । प्रत्यक्षादिना भेदस्याप्यवगमादिति भावः । उपादानोपादेयभावाच्चेति प्रागुक्तभेदसाधकहेत्वन्तरं निराह **एवमुपादानेति** । **भेदनियतत्वादिति** । एतेन बाधादिति प्रागुक्तं स्फुटीकृतं ध्येयम् । संयोगप्राप्त्यभावाच्चेति हेत्वन्तरं निराह **संयोगेति** । प्रागुक्तहेत्वन्तरं च प्रत्याह **गुरुत्वेति** ।

गु०दी०— करणत्वकर्मत्वयोर्भेदनियतत्वात् इत्यत्र उपादीयते अनेनेत्युपादानम् । करणार्थल्युट्-प्रत्ययान्तत्वादुपादानस्येति भावः ।

यादु०— अभ्युपगमेऽपीति । तादात्म्यमेवाभेद इति स्वीकृत्येति शेषः । **बाधादिति** । तन्तु-पटभेदस्य वक्ष्यमाणानुमानसिद्धत्वेन तदभावसाधने बाधादित्यर्थः । **एवमुपादानोपादेयभाव इति** । अत्यन्ता-भेदवादिनस्तव मत इति शेषः । **करणत्वकर्मत्वयोरिति** । उपादीयते वस्त्वनेनेति करणे व्युत्पन्नेन उपादान-शब्देन करणत्वस्य, उपादातुं योग्यमुपादेयमिति कर्मणि व्युत्पन्नेनोपादेयशब्देन कर्मत्वस्य लाभादिति भावः ।

वं०प०— कथं किंप्रकारं कीदृशम् । यद्यद्विशेषणं तत्तेनाभिन्नमिति सामान्यव्याप्तौ व्यभिचारमाह **पुरुषादीति** । **अनभ्युपगमादिति** । तथा च पुनः साध्याविशिष्टत्वमिति भावः । **बाधादिति** । भेदस्यास्माभि-रङ्गीकारादित्यर्थः । **करणत्वेति** । उपादानस्य (कारणत्व)करणत्वमुपादेयस्य कर्मत्वं (कार्यत्वं) बोध्यम् ।

कं०रा०— तदाश्रितत्वं तद्धर्मत्वं पुरुषावलम्बनभूतदण्डादौ च न तदाश्रितत्वमतो न व्यभिचार इति शङ्कते **तदाश्रितत्वमिति** । **कुण्डेति** । कुण्डनिष्ठबदरादौ तदाश्रितत्वरूपं तद्धर्मत्वे सत्यपि तदभेदाभावा-द्व्यभिचार इति भावः । **अभेदेनेति** । तन्तुधर्मत्वशब्दितेन तन्त्वभेदेन भेदाभावसाधनेऽपि साध्याविशिष्टत्व-तादवस्थ्यापातेन तत्स्थानमयुक्तमिति भावः । **अभ्युपगमेऽपीति** । भेदाभावातिरिक्तस्याभेदस्याभ्युपगमेन साध्याविशिष्टत्वपरिहारेऽपि 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयमि'त्यत्र तन्तुपटयोर्भेदस्यापि साधितत्वेन भेदाभावसाधने बाधप्रसङ्गात् तत्साधनमयुक्तमेवेति भावः । यच्चोक्तमुपादानोपादेयभावोऽप्यसिद्ध एव, न हि स्वयमेवोपादानमुपादेयं चेति युक्तम् । उपादीयते कार्यमनेन स्वरूपतया स्वीक्रियत इत्युपादानशब्दस्य करणत्वार्थत्वादुपादेयशब्दस्य च कृत्यप्रत्ययान्तस्य तादृशस्वीकारकर्मत्वार्थत्वात्करणत्वकर्मत्वयोश्च भेदनियत-त्वादित्यर्थः । यच्चोक्तं संयोगाप्राप्त्यभावाच्च ..... तन्तुपटयोरत्यन्ताभेद इति तदन्यथासिद्ध्या दूषयति

संयोगेति । यच्चोक्तं गुरुत्वान्तरकार्यस्यावनतिभेदस्यादर्शनाच्च कार्यकारणयोरत्यन्ताभेद इति तदप्यन्यथासिद्ध्या दूषयति **गुरुत्वान्तरेति** ।

श्रीनिधि०— दण्डादौ व्यभिचारादिति । देवदत्तविशेषणत्वे सत्यपि तदभेदाभावादिति भावः । **अभ्युपगमे वा बाधादिति** । तन्तवो बहवः पटस्त्वेकः पटे शीतापनोदनं न तन्तुः पटः तन्तुरिति सङ्ख्यार्थ-क्रिया संज्ञाभेदेन भेदस्याबाधितानुभवसिद्धत्वादिति भावः ।

शे०वा०— हेत्वनिरुक्त्याऽप्यनुमानं दूषयति **कथं चेति** । तन्तुधर्मत्वं किं तद्विशेषणत्वमभिमतं, किंवा तदाश्रितत्वं, तदात्मकत्वं वेति विकल्पान्मनसि निधायाद्यमाशङ्कते **नन्विति** । **व्यभिचारादिति** । यद्यतो भिद्यते इत्यादिपरोक्तव्यतिरेकव्याप्तावितिं शेषः । द्वितीयमप्याशङ्कते **तदिति** । दूषयति **अभेदेनेति** । **असिद्धिप्रसङ्गादिति** । त्वद्रीत्येति शेषः । वस्तुनि विकल्पासम्भवादन्यतरासिद्धिर्दोष एव नेति मन्यमानं प्रति दोषान्तरमाह **कुण्डेति** । सत्यपि बदराणां कुण्डाश्रितत्वे तदभेदस्याभावेन तदत्यन्ताभेदस्य दूरापास्तत्वादिति भावः । ननु भेदाभावस्यैव साध्यत्वान्न साध्यावैशिष्ट्यमित्याशङ्कते **अभेदेनेति** । **अनभ्युपगमादिति** । परेणेति शेषः । तथा च भेदाभावस्यैव साध्यत्ववत् साधनत्वस्यापि प्रसक्त्या साध्यावैशिष्ट्यप्रसङ्गात् सिद्धसाधनत्वं सन्दिग्धासिद्धिर्वेति भावः । **अभ्युपगमेऽपीति** । तादात्म्यमेवाभेद इति स्वीकृत्येति शेषः । **बाधादिति** । तन्तुपटयोर्भेदस्य 'ह्युपादानेन तु द्वयमित्यादिना साधितत्वात्' उत्तरत्र साधयिष्यमाणत्वाच्च तदभावसाधने बाध इत्यर्थः । **एवमिति** । अत्यन्ताभेदवादिनस्तव मत इति शेषः । **करणत्वकर्मत्वयोरिति** । उपादीयते वस्त्वनेनेति करणव्युत्पन्नेनोपादानशब्देन करणत्वस्योपादातुं योग्यमुपादेयमिति कर्मसाधनेन च तेन कर्मत्वस्य लब्धत्वात् करणत्वकर्मत्वयोरित्युक्तमिति ध्येयम् । **भेदनियतत्वादिति** । अन्यथा लक्षणविरोधप्रसङ्गादिति भावः । **उपपत्स्यत इति** । तथा चान्यथासिद्धत्वान्न तेनात्यन्ताभेदसाधनं सम्भवतीति भावः । **गुरुत्वा-न्तरेति** । गुरुत्वान्तरकार्यावनत्यदर्शनमित्यर्थः । **भविष्यतीति** । तथा चान्यथासिद्धत्वान्नैतदप्यत्यन्ताभेद-साधकमिति भावः ।

वा०र०— परोक्तव्यतिरेकव्याप्तावितिं । यद्यपि तन्तुविशेषणत्वरूपतन्तुधर्मत्वहेतुकरणे यद्यस्य विशेषः न ततो न भिद्यते इति सामान्यान्वयव्याप्तावेव पुरुषादिविशेषणदण्डादौ व्यभिचारो वक्तुं शक्यते तथापि पूर्वमनुमानकथनस्थ यः तन्तुधर्मः सः तन्तुभिन्नो न भवतीत्यन्वयव्याप्तौ दृष्टान्ताभावेन यत् यतो भिद्यते न तस्य धर्मो न भवतीति प्राक् व्यतिरेकव्याप्तेरेव मूलोपन्यासात् व्यतिरेकेत्युक्तमिति ज्ञेयम् । साध्येतीत्यनन्तरं हेतूकृतस्येत्यादिरेव पाठः । मूलपुस्तके हि साध्येत्यनन्तरं तत्रारुच्या तमंशं विनास्य हेतुकृतस्येत्याद्येव लेखनीयं इत्याज्ञप्तेन लेखकेन तथा चेत्यादि नाशितं परन्तु सन्दिग्धेत्यादिकमिव तथा चेत्यंशो नाशिततया स्पष्टं न प्रतीयते अतो लेखकानां तथा चेत्येतत् मेलनेन हेतूकृतस्येत्येतत् लेखनं इत्यवधेयम् । तथा च साध्याविशेषे हेतुवत् साध्यस्यापि निश्चितत्वाश्रयणे सिद्धसाधनता । साध्यवत् हेतोरपि

सन्दिग्धत्वे सन्दिग्धासिद्धिरिति दूषणद्वयस्य स्पष्टत्वात् नोक्तम् । अत एव भेदाभावस्य साध्यत्वशङ्का-निरासपरोत्तरवाक्यव्याख्यावसरे उक्तदूषणद्वयं वक्ष्यतीति ज्ञेयम् । यद्वा अत्रोक्तसाध्यवैशिष्ट्यस्योत्तरग्रन्थेन समनानन्तरमेव तत्फलकथनकार्यमित्याशयेन उत्तरत्र एव तत्फलकीर्तनमिति तस्यात्र कर्तव्यत्वं नेति ज्ञेयम् । **उपादानेन तु द्वयमित्यादिनेति** । आरम्भणाधिकरण इति शेषः । **उत्तरत्रेति** । वैशेषिकपरीक्षायां अंशिनोऽशैरभेदोऽयं इत्यादिना तस्मिन् सत्यपि असत्त्वयुक्त्या साधयिष्यमाणत्वादित्यर्थः ।

स०व्र०— अभ्युपगमेऽपीति । अभेदातिरिक्तभेदाभावाभ्युपगमेऽपि भेदाभावसाधनं न सम्भवति । तत्र भेदस्यापि सिद्धत्वेन बाधादिति भावः । **करणत्वकर्मत्वयोरिति** । उपादीयते कार्यमनेनेति करणेव्युत्पन्नेन उपादानशब्देन करणत्वस्य, उपादातुं योग्यं उपादेयमिति कर्मणिव्युत्पन्नेनोपादेयशब्देन कर्मत्वस्य लाभात् करणत्वं कर्मत्वं चैकस्यैव विरुद्धम् । तयोर्भेदनियतत्वादिति भावः । **गुरुत्वान्तरकार्यादर्शनम्** गुरुत्वान्तर-कार्यावनत्यदर्शनमित्यर्थः ।

विट्ठल०— अभ्युपगमेऽपीति । भेदाभावातिरिक्तस्तादात्म्यमेवाभेद इत्यभ्युपगमेऽपि तन्तुपटयो-र्भेदस्यापि वक्ष्यमाणत्वेन तदभावसाधने बाधादित्यर्थः । **एवमुपादानेति** । त्वया अत्यन्ताभेदाङ्गीकारादिति शेषः । असिद्धिमुपपादयति **न हि स्वयमेवेति** । स्वस्यैवोपादानत्वमुपादेयत्वं कुतो न युक्तिमित्यत आह **करणत्वेनेति** । उपादीयते वस्त्वनेनेति करणव्युत्पन्नेनोपादानशब्देन कारणत्वस्योपादातुं योग्यमुपादेयमिति कर्मणि व्युत्पन्नेनोपादेयशब्देन कर्मत्वस्य लाभात् तयोश्च भेदनियतत्वस्य स्फुटप्रतीतत्वादिति भावः । संयोगप्राप्त्यभावश्चेति तन्तुपटयोः संयोगाभावे प्राप्त्यभावश्चाभेदसाधकत्वेनोक्त इत्यर्थः । **अत्यन्ताभेदाभावा-दिति** । तथा चाभेदस्यापि भावेन संयोगाद्युपपत्तेरत्यन्ताभेदसाधने प्रयोजकतेति भावः ।

चषकः— बाधादिति । तन्तुपटभेदस्य प्रत्यक्षादिनाप्यवगमादिति भावः । **असिद्ध एवेति** । अत्यन्ताभेदोपगन्तृभवन्मत इत्युपस्कार्यम् ।

॥ इति पटस्य तन्तुधर्मत्वविवेचनम् ॥

* * *

॥ अथ च तत्रान्ते कार्यत्वनिर्वचनम् ॥

३१ सु०— एतेन 'कार्यत्वमभूत्वाभावित्वं चेदसिद्धमस्माकम् । अभिव्यक्तिधर्मकत्वं चेद्युष्माकमि'ति च निरस्तम् । तदिदमुक्तं केन वार्यत इति ।

परि०— एतेनेति । उक्तदिशा सत्कार्यत्वादिहेतूनां अपाकरणेनेत्यर्थः ।

यादु०— एतेनेति । सत्कार्यवादस्य दूषितत्वेन, सदसत्कार्यवादस्य समर्थितत्वेन च अभूत्वाभावित्वरूपकार्यत्वस्यासिद्ध्यभावेनेत्यर्थः ।

वं०प०— अस्माकम् अत्यन्तसत्कार्यवादिनां साङ्ख्यानामस्माकमसत एवोत्पत्तिरूपमभूत्वाभावित्वमसिद्धमित्यर्थः । **युष्माकं** सिद्धान्तिभिर्भवद्भिरसत्त्वस्याप्यङ्गीकारेणाभिव्यक्तिर्नाङ्गीकृतेत्यर्थः ।

कं०रा०— एतेनेति । महदादिकं चेतनेच्छाधीनोत्पत्तिकं कार्यत्वादित्यत्र, कार्यत्वमभूत्वाभावित्वं चेदसिद्धं सत्कार्यवादिनामस्माकं अभिव्यक्तिधर्मकत्वं च असत्कार्यवादिनां युष्माकमसिद्धिमिति चोद्यमसत्कार्यवादस्य समर्थितत्वेन सत्कार्यवादस्य निरस्तत्वेन भूत्वाभावित्वस्य कार्यत्वशब्देन विवक्षायामसिद्धिशङ्कानवकाशाद्युदस्तमित्यर्थः ।

श्रीनिधि०— एतेन असदुत्पत्तौ बाधकपरिहारेण । **निरस्तमिति** । हेतुदूषणमिति शेषः ।

शे०वा०— एतेनेति । उद्भवो नाम उत्पत्तिरभिव्यक्तिर्वेति विकल्पदूषणनिराकरणप्रकारेणेत्यर्थः । असत्कार्यवादस्य साधितत्वेन, सत्कार्यवादस्य दूषितत्वेन च अभूत्वाभावित्वरूपकार्यत्वस्य सिद्धतया तदसिद्ध्यप्रसक्तेरिति भावः । कृतस्य चर्चस्योद्भाष्यत्वपरिहाराय मूलारूढतां दर्शयति **तदिदमिति** ।

स०व्र०— एतेनेति । उद्भवो नाम उत्पत्तिरभिव्यक्तिर्वेति पक्षविकल्पदूषणनिराकरणप्रकारेणेत्यर्थः । कार्यत्वं नाम अभूत्वाभावित्वमेव । न चास्माकमसिद्धमिति वाच्यम् । सत्कार्यवादस्य एतावता ग्रन्थकलापेन दूषितत्वादिति भावः ।

विट्ठल०— एतेनेति । असत्कार्यवादस्य दूषितत्वेन सदसत्कार्यस्य वादस्य समर्थितत्वादसत्त्वांशमादाय अभूत्वाभावित्वरूपकार्यत्वस्य सद्भावेनेत्यर्थः ।

चषकः— एतेन उक्तदिशा सत्कार्यवादहेतुप्रत्याख्यानेन ।

॥ इति कार्यत्वनिर्वचनम् ॥
॥ इति अयुक्तत्वाभावशङ्का तन्निरसनञ्च ॥
॥ इति तदयुक्तताया: समर्थनम् ॥
॥ इति व्याख्यानक्रमव्यत्यासप्रयोजनकथनपूर्वकं उक्तयोर्द्विविधसाङ्ख्यमतयोरयुक्तता ॥
॥ इति स्वपक्षसाधनम् ॥

* * *

॥ अथ उपन्यस्तमतनिरासे प्रथमसूत्रव्याख्याने परपक्षनिरसनम् ॥
॥ अथ तत्र साङ्ख्योक्तार्थे 'प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे' प्रमाणाभावः ॥

३२ **सु०— तदेवं 'पटाद्युत्पत्तौ चेतनस्य कुविन्दादेः प्रवृत्तेरुपलम्भात्, तद्वदृष्टान्तेन महदाद्युत्पत्तेरपि चेतनेच्छाधीनत्वमि'त्येवं स्वपक्षं प्रसाध्य परपक्षनिरासार्थं 'रचनानुपपत्तेश्च नानुमानमि'ति सूत्रं व्याख्यातुं पीठमारचयति न चेति ।**

अनु०— न च काचित्प्रमोक्तार्थे

न केवलमस्मन्मते प्रमाणसद्भावः, किन्तु साङ्ख्योक्तार्थे प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे, किमपि प्रमाणं न अस्ति ।

परि०— व्याख्यातुमिति । 'इदं नाचेतनवशमि'त्यादिना व्याख्यातुं श्लोकद्वयेन तदुपोद्घातमारचयतीत्यर्थः । चशब्दस्यार्थो **न केवलमित्यादि** ।

वं०प०— 'प्रवृत्तेश्चे'ति सूत्रार्थं वदन्नेवोत्तरवाक्यमवतारयति **तदेवमित्यादिना** । **प्रधानं** स्वातन्त्र्येण जगत्कारणमित्येवंरूपेणेत्यर्थः ।

शे०वा०— न चेत्याद्युत्तरभाष्ये प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे प्रमाणाभाववर्णनस्यानर्थक्यमाशङ्क्य रचनानुपपत्तेरित्येतत्सूत्रव्याख्यानार्थं पीठिकारचनरूपत्वान्न तदिति भावेन वृत्तवर्तिष्यमाणार्थप्रदर्शनपूर्वकं तत्परोत्तरवाक्यं योजयति **तदेवमित्यादिना** । अनेन सूत्रार्थतयेति प्रागुक्तं विवृतं भवति । **व्याख्यातुमिति** । 'इदं नाचेतनवशमि'त्यादिनेति शेषः । स्वपक्षे प्रमाणसद्भावसमुच्चयद्योतनार्थत्वान्न चशब्दस्यानर्थक्यमित्यभिप्रेत्य समुच्चयप्रदर्शनपूर्वकं परोक्तार्थे प्रमाणाभावोपदर्शनपरतया भाष्यं व्याचष्टे **न केवलमिति** ।

वा०र०— सूत्रार्थतयेति प्रागुक्तमिति । प्रवृत्तेश्चेति सूत्रार्थतया प्रमाणमाहेति यदुक्तं तत् पटाद्युत्पत्तौ चेतनस्य कुविन्दादेः प्रवृत्तेरुपलम्भात् तद्वत् दृष्टान्तेन महदाद्युत्पत्तेरपि चेतनेच्छाधीनत्वमित्येवानुमानरूपं प्रमाणमाहेति विवृतमित्यर्थः । निरासार्थमित्यनन्तरं मूलं प्रवृत्तमिति शेषः ।

स०व्र०— ननु स्वपक्षसाधनत्वेन पूर्वोक्तानुमानजातं कथं 'प्रवृत्तेश्च' इति सूत्रारूढमित्यतः सूत्रारूढं कुर्वन्नुपसंहरति **तदेवमिति** ।

* * *

॥ अथ तत्रादौ प्रत्यक्षप्रमाणाभावः ॥

३३ **सु०—** तथा हि । किमत्र प्रत्यक्षं प्रमाणं स्यादुत आगमोऽथवाऽनुमानं वा ।

नाद्यः, तद्धयस्मदादीनां वा योगिनां वा । न प्रथमः, अस्यार्थस्यातीन्द्रियत्वात् । न द्वितीयः, असिद्धेः । न हि एवं योगिनः पश्यन्तीत्यस्माकं प्रमाणमस्ति ।

परि०— मूले निरासक्रमानुरोधादागमानुमानयोर्व्युत्क्रमेण निर्देशः **उतागम इत्यादि** ।

शे०वा०— प्रमाणसामान्याभावं प्रतिज्ञाय प्रत्यक्षाभावमनुपपाद्य श्रुत्यनुमानरूपतद्विशेषाभावोपपादनमसङ्गतमित्यतः तन्निरासस्य स्पष्टत्वेन शिष्यैरेव ज्ञातुं शक्यत्वान्न पृथक् तन्निरास इति भावेन स्वयं प्रत्यक्षाभावमुपपादयितुं सम्भावितान्पक्षान्विकल्पयति **तथा हीत्यादिना** । **अस्यार्थस्येति** । प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वमित्यस्यार्थस्येत्यर्थः । **असिद्धेरिति** । अस्मान्प्रतीति शेषः । तथा च न तेनाप्यस्माकमुक्तार्थसिद्धिरिति भावः । कुतोऽस्माकं तदसिद्धिरपीत्यतः तत्साधकप्रमाणाभावादित्याह **न हीति** । न तावदेवं योगिनः पश्यन्तीत्यत्रार्थे प्रत्यक्षं मानं सम्भवति । अस्यार्थस्यातीन्द्रियत्वेन तदनवकाशात् । नाप्यनुमानम् । तत्प्रतिबद्धलिङ्गाभावात् । नाप्यागमः । वक्ष्यमाणरीत्या तदसम्भवादिति भावः ।

॥ इति तत्र प्रत्यक्षप्रमाणाभावः ॥

* * *

॥ अथ तत्र आगमप्रमाणाभावः ॥
॥ अथ तत्रादावपौरुषेयागमप्रमाणाभावः ॥

३४ **सु०—** नाप्यागमः, स ह्यपौरुषेयः पौरुषेयो वा स्यात् । नाद्य इत्याह **श्रुतिरेवेति** ।

अनु०— **श्रुतिरेव प्रमा हि नः ।**

श्रुतिः नः अस्माकमेव मते प्रमा हि । सर्वाऽपि हि श्रुतिरीश्वरमेव स्वातन्त्र्येण सकलजगत्कारणं सर्वज्ञं सर्वशक्तिं प्रतिपादयति, प्रधानं च तदायत्तसत्ताप्रतीतिप्रवृत्तिमत्तदधिष्ठितं जगदुपादानमात्रमिति । तथा हि । 'यः सर्वज्ञः सर्ववित्', 'यो योनिमधितिष्ठत्येक' इत्यादि । तथा च श्रुतिः परस्य प्रतिपक्षभूतैव ।

परि०— एवकारो भिन्नक्रम इत्युपेत्याह **अस्माकमेवेति** । **योनिं** जगदुपादानभूतकृतिमित्यर्थः । फलितमाह **तथा चेति** ।

कं०रा०— श्रुतिरिति । श्रुतिरस्मदभिमत-ईश्वरस्वातन्त्र्यादावेव **प्रमा हि** इत्यर्थः । तदेवोपपादयति **सर्वापीति** । **जगदुपादानमात्रमितीति** । **अस्येति** शब्दस्य इति प्रतिपादयतीति पूर्वेणान्वयः ।

श्रीनिधि०— यो योनिमिति । सर्वकारणानीत्यर्थः ।

शे०वा०— 'ननु श्रुतिरेव प्रमा हि न' इति श्रुतिप्रामाण्यमुक्त्वा कथं तद्विरुद्धं वक्तुराप्तत्वासिद्ध्या तदप्रामाण्यवर्णनमित्यतो, नैतद्वयं श्रुतिविषयं येनोक्तदोषः, किन्तु भिन्नविषयकमित्यभिप्रेत्य तथोत्तरवाक्यद्वयं योजयितुं, सम्भावितविकल्पद्वयप्रदर्शनपूर्वकमाद्यपक्षनिरासपरतया आद्यवाक्यं योजयति **नापीति** । ननु श्रुतितुल्यतया 'अनुप्रमाणमेतानि ह्यक्षयुक्तिवचांस्यत' इत्यादिना प्रत्यक्षादेरपि प्रामाण्याभ्युपगमात् कथं 'श्रुतिरेव प्रमा हि न' इत्युक्तिरित्यतोऽत्रावधारणस्य भिन्नक्रमत्वेन यथास्थितसम्बन्धानाश्रयणान्नानुपपत्तिरित्यभिप्रेत्य भिन्नक्रमतया तद्योजयति **श्रुतिरिति** । कथं श्रुतेः स्वपक्षमात्रसाधकतेत्यत आह **सर्वाऽपि हीति** । तत्र सार्वज्ञादिविशिष्टतयेश्वरप्रतिपादिकां श्रुतिमुदाहरति **तथा हि** । **यः सर्वज्ञ इति** । प्रधानस्येश्वरायत्तत्वप्रतिपादिकां श्रुतिमुदाहरति **यो योनिमिति** ।

वा०र०— आद्यवाक्यमिति । श्रुतिरेवेत्येतद्वाक्यमित्यर्थः । **तद्योजयतीति** । श्रुतिरेवेत्यवधारणं योजयतीत्यर्थः । कथं श्रुतेः इत्याद्याहेत्यन्तं उपलक्षणमेतत् । अन्यैरपि श्रुतिप्रामाण्याङ्गीकारात् कथं स्वमते एव प्रामाण्यमित्युक्तिश्चेत्यपि द्रष्टव्यम् । तथा अस्मन्मते एवेत्यनेनास्मदभिमते जगत्कारणत्वादिविशिष्टेश्वरादावेवेत्यर्थस्य विवक्षितत्वात् नानुपपत्तिः इत्यप्याहेत्यपि द्रष्टव्यम् ।

॥ इति तत्रापौरुषेयागमप्रमाणाभावः ॥

* * *

॥ अथ तत्र पौरुषेयागमप्रमाणाभावः ॥
॥ अथ च तत्र श्रुतीतिहासपुराणानां अस्मन्मतानुसारित्वम् ॥
॥ अथ च ततः साङ्ख्याचार्यस्य च आप्तत्वानुपपत्तिः ॥
॥ अथ च तत्रादौ श्रुतिविरुद्धभाषित्वादिना तस्याप्तत्वानुपपत्तिः ॥

३५ **सु०— पौरुषेयोऽपि किं स्मृतीतिहासपुराणलक्षणः, उत साङ्ख्याचार्यप्रणीतः । नाद्यः, तस्याप्यस्मन्मतानुसारित्वात्, 'प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास**

भगवान् सृष्ट्यर्थं जगतो विभुः' इत्यादिवचनात् । न द्वितीयः, तत्प्रामाण्यस्यासम्मतेः । आप्तोक्तत्वेन तत्प्रामाण्यसिद्धिरिति चेत् तत्राह **आप्तत्वमिति** ।

अनु०— आप्तत्वमुक्तमार्गेण वक्तुर्नैवोपपद्यते ।

उक्तमार्गेण 'श्रुतिरेव प्रमा हि न' इत्युक्तरीत्या, श्रुतिविरुद्धभाषित्वादित्यर्थः । **वक्तुः** साङ्ख्यप्रणेतुः ।

यद्वा इतरेषां चानुपलब्धेरित्युक्तमार्गेण । साङ्ख्यशास्त्रेऽपि ह्याख्यायिकासु योग्यानुपलब्धिबाधिता बहवोऽर्थाः प्रतिपाद्यन्ते ।

अथवा 'अविप्रलम्भस्तज्ज्ञानमि'त्याद्युक्तमार्गेण आप्तत्वनिश्चायकप्रमाणाभावात् इत्यर्थः ।

'कपिलो वासुदेवाख्यस्तन्त्रं साङ्ख्यं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थपरिबृंहितम् । सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि'ति पुराणोक्तमार्गेणेति वा ।

'ऋषिं प्रसूतं कपिलमि'त्यादिश्रुत्युदाहरणमप्यनेनैव निरस्तम् ।

एतेनैव 'आगमाद्योगिप्रत्यक्षावगम' इत्यपाकृतम् ।

परि०— मूले श्रुतिरित्युपलक्षणं मत्वा श्रुतिरेवेत्यादिवाक्यस्य फलितार्थमाह **तस्याप्यस्मन्मतानुसारित्वादिति** । **इत्युक्तमार्गेणेति** । इति पूर्वपादीयस्मृत्यधिकरणसूत्रेण 'न चाप्तिनिश्चयस्तत्र शक्यते व्यभिचारत' इत्यनुव्याख्यानोक्तमार्गेणेत्यर्थः । **इत्याद्युक्तमार्गेणेति** । जिज्ञासाधिकरणे वेदापौरुषेयत्वोक्तिप्रस्तावे 'अविप्रलम्भस्तज्ज्ञानं तत्कृतत्वादयोऽपि च । कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तत्' इत्युक्तमार्गेणेत्यर्थः । **तथैवासुरय इति** । आसुरिनाम्ने मुनय इत्यर्थः । साङ्ख्यमासुरय इत्यत्र आसुरिरयोग्यः कश्चिज्ज्ञेयः । **इति पुराणेति** । प्रथमस्कन्धतृतीयाध्यायतात्पर्योक्तपद्मपुराणेति ज्ञेयम् । **ऋषिमिति** । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्चायं वै देवं कपिलमुदाहरन्ती'ति साङ्ख्यकृतश्रुत्युदाहरणमपि

पुराणोदाहरणेन भगवदवतारपरत्वेनोपपादनेन तदभिमतार्थपरत्वं निरस्तमित्यर्थः । **एतेनैवेति** । वक्तुराप्तत्वनिश्चयायोगकथनेनेत्यर्थः ।

यादु०— ऋषिं प्रसूतमिति । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'त्यादिश्रुत्युदाहरणं स्वशास्त्रे क्रियमाणमित्यर्थः । **अनेनैव निरस्तमिति** । उदाहृतपुराणबलेनैव श्रुतेर्भगवदवतारकपिलपरत्वस्यैव कल्पनादिति भावः ।

वं०प०— एतेनैवेति । ननु प्रधानं स्वातन्त्र्येण जगत्कारणमित्यत्र योगिप्रत्यक्षं मानम् । न च न ह्येवं योगिनः पश्यन्तीत्यत्र प्रमाणमस्तीत्युक्तमिति वाच्यम् । आगमस्यैव तत्र सत्त्वादितीत्येतदप्येतेनैव अपास्तम् । भृग्वादीनां योगिनां वासुदेवेन स्वोक्तसाङ्ख्यशास्त्रोपदेशस्यागमसिद्धत्वात् तच्छास्त्रोक्तप्रकारेण च ज्ञातव्यत्वात् । तत्र च प्रधानाद्यस्वातन्त्र्योक्तेः । प्रधानादिकमस्वातन्त्र्येणैव जगत्कारणमित्येव पश्यन्ती-त्यागमालब्धत्वेन नागमाद्योगिप्रत्यक्षावगम इत्यर्थः ।

कं०रा०— अविप्रलम्भ इति । 'अविप्रलम्भस्तज्ज्ञानं तत्कृतत्वादयोऽपि च । कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तदि'त्यत्रोक्तमार्गेणेत्यर्थः । ननु साङ्ख्यप्रणेतुः कपिलस्याप्तत्वसिद्धये 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'ति श्रुतिरुदाह्रियते । तत्र 'तं भगवन्तं ऋषिं कपिलं च पश्येदि'त्युक्ते कथमृषित्वमिति जिज्ञासायां यः पूर्वकल्पेषु प्रसूतं जातं जायमानं वर्तमानमागामिं च जगत् ज्ञानैर्बिभर्ति जानातीति निरुपचरितसर्वज्ञत्वेन ऋषित्व-स्योपपादनात्सर्वज्ञस्याज्ञानादिदोषाभावेनाप्तत्वसम्भवादित्यत आह **ऋषिमिति** । साङ्ख्यप्रणेतुराप्तत्वसिद्धये 'ऋषिं प्रसूतं कपिलमि'त्यादि श्रुत्युदाहरणमपि । 'कपिलो वासुदेवाख्यास्तन्त्रं साङ्ख्यं जगदाहे'त्यादि पुराणवचनेनैव **निरस्तम्** । पुराणवचनानुसारेण ऋषिं प्रसूतमित्यादिश्रुतेः सर्ववेदार्थपरिबृंहित-सत्साङ्ख्यप्रणेतृवासुदेवावतार-कपिलसार्वज्ञपरतया सर्ववेदविरुद्धकुतर्कपरिबृंहितासत्साङ्ख्यप्रणेतृवासुदेवान्यकपिलसार्वज्ञपरत्वाभावेन तया तस्य सर्वज्ञत्वासिद्ध्याप्तत्वनिश्चयायोगादित्यर्थः । **एतेनैवेति** । प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे प्रमाणभूतस्य योगिप्रत्यक्षस्यागमादवगम इत्येतदपि श्रुत्यादेरस्मन्मतानुसारित्वात् साङ्ख्याचार्यप्रणीतागमस्याप्तोक्तत्वानिश्चयेन प्रामाण्यासम्मतेरित्यनेनैव **अपाकृतम्** इत्यर्थः ।

श्रीनिधि०— कुतर्कपरिबृंहितमिति । कुतर्कपरिबृंहितमप्रमाणं तथा च तत्प्रणेतुः नाप्तत्वम् । न ह्युन्मत्तादेराप्तत्वमस्तीति भावः । **अनेनैव निरस्तमिति** । पुराणवचनोदाहरणेनैवेत्यर्थः । तस्य भगव-द्विषयत्वादिति भावः । **श्रुत्युदाहरणमिति** । आप्तत्वबोधकश्रुत्युदाहरणमित्यर्थः । **एतेनैव** = आगमादिति आगमप्रणेतुराप्तत्वानिश्चयेनेत्यर्थः ।

शे०वा०— ननु स्मृतीतिहासादिरूपपौरुषेयागमस्य श्रुतिमूलतयेश्वरस्य सार्वज्ञ्यादिना आप्तिमूलतया च प्रामाण्याभ्युपगमात् 'आप्तत्वमुक्तमार्गेणे'त्युत्तरग्रन्थानुपपत्तिरित्यतो न स्मृत्यादिविषयं तत्, किन्तु साङ्ख्यागमविषयमेवेति नानुपपत्तिरिति भावेन, तर्हि माऽस्तु साङ्ख्यागमः प्रमाणं स्मृत्यादिरूपस्त्वागमः प्रमाणं भवेदेवेति न परोक्तार्थस्याप्रामाणिकत्वसिद्धिः इत्यतोऽत्र सम्भावितविकल्पद्वयप्रदर्शनपूर्वकमाद्यपक्षस्य परेणावक्तव्यतां चोपपाद्य द्वितीयपक्षनिरासतयोत्तरमूलं योजयितुं विकल्पद्वयं तावदाह **पौरुषेयोऽपीति** । स्वमतानुसारितामेव प्रमाणेनोपदर्शयति **प्रकृतिमिति** । उक्तमार्गेणेति भाष्ये सामान्योक्तिर्नानाप्रकारोपसंहारायेति भावेनानेकधा व्याख्याति **श्रुतिरेवेत्यादिना** । किमनेनोक्तं भवतीत्यत आह **श्रुतिविरुद्धेति** । असिद्धिं परिहरति **साङ्ख्यशास्त्रेऽपीति** । अथ वेति पक्षेऽभिप्रायमाह **आप्तत्वमिति** । ननु 'ऋषिं प्रसूतं कपिलं यस्त्वमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'ति बाभ्रव्यश्रुतिरेव साङ्ख्यशास्त्रप्रणेतुराप्तत्वनिश्चायिका अस्तीति कथं तन्निश्चायकप्रमाणाभाव इत्यत उक्तमार्गेणेत्येतत्प्रकारान्तरेण योजयति **कपिल इत्यादिना** । किमेवं व्याख्यानस्य प्रयोजनमित्यत उक्तशङ्कानिरास एवेत्याह **ऋषिं प्रसूतं कपिलमित्यादिश्रुतिवचनमपीति** । **अनेनैवेति** । उक्तमार्गेणेत्यस्य पुराणोक्तमार्गेणेति व्याख्यानेन इत्यर्थः । 'कपिलो वासुदेवाख्य' इत्युदाहृतपुराणवाक्यानुसारेण 'ऋषिं प्रसूतमि'त्युदाहृतश्रुतिवचनस्य भगवदवतारकपिलपरत्वेन त्वदभिमतसाङ्ख्यप्रणेतृकपिलपरत्वाभावान्न तेन तस्य सार्वज्ञ्यादिसिद्धिरिति भावः । **एतेनैवेति** । अपौरुषेयागमस्योक्तरीत्या परं प्रति प्रतिकूलत्वात् पौरुषेयस्यापि स्मृतीतिहासादेः अस्मन्मतानुसारित्वात् तदन्यस्य साङ्ख्याचार्यप्रणीतागमस्य प्रामाण्यस्यैव असम्मतेः न आगमावष्टम्भेनापि प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वविषयकयोगिप्रत्यक्षसिद्धिरिति भावः ।

वा०र०— स्मृतीतिहासादीति । ईश्वरप्रणीतेति शेषः । **पौरुषेयागमस्येति** । श्रुतिमूलतया आप्तिमूलतया च प्रामाण्याभ्युपगमात् इति सम्बन्धः । आप्तिमूलकत्वं उपपादयितुं उक्तम् **ईश्वरस्य सार्वज्ञ्यादिनेति** । आदिपदेन न विप्रलम्भाभावादि परिग्रहः । इत्यादि श्रुत्युदाहरणमपि इतीति पाठे तु उदाहरणशब्दो मूलेन भावसाधनः । अपि तु उदाह्रियते इत्युदाहरणमिति कर्मसाधन इत्येव प्रतीकोपादानम् । **श्रुतिवचनमपीति** । तथा च श्रुतिवचनमपीति मूलवाक्यकार इति द्योतयितुं वचनमपीतीति प्रतीकोपादानं इत्यप्याहुः । **त्वदभिमतं साङ्ख्यशास्त्रेति** । अत्र त्वदभिमतेति साङ्ख्यशास्त्रस्य विशेषणम् । **प्रधानस्य स्वातन्त्र्येणेति** । प्रधानस्य यत् स्वातन्त्र्येण जगत्कारणत्वं तद्विषयकेति योजना ।

स०व्र०— अनेनैव निरस्तमिति । 'कपिलो वासुदेवाख्यः' इत्याद्यागमविरुद्धत्वेनेत्यर्थः । 'ऋषिं प्रसूतं कपिलम्' इत्यादिश्रुतेरपि ईश्वरविषयत्वादिति भावः इत्याहुः । **एतेनेति** । अपौरुषेयस्य अस्मन्मतानुसारित्वेन, पौरुषेयस्यापि स्मृतीतिहासपुराणलक्षणस्य अस्मन्मतानुसारित्वेन अन्यस्य चाप्रमाणत्वेनेत्यर्थः ।

विष्ठल०— ऋषिं प्रसूतमिति । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'ति श्रुत्युदाहरणं स्वशास्त्रे क्रियमाणमित्यर्थः । अस्य विष्णवंशकपिलपरत्वस्य पुराणे सूचितत्वेनेति भावः । स्पष्टं चैतद्गीताभाष्ये 'एतेनेति सङ्गृह्य पौरुषेय' इत्यादि विकल्पदूषणेनेत्यर्थः ।

चषकः— तथैवासुरय इति । आसुरिनाम्ने मुनय इत्यर्थः । साङ्ख्यमासुरय इत्यत्र तन्नामक-कश्चिदयोग्योऽधिगन्तव्यः । **इति पुराणेति** । प्रथमस्कन्धतृतीयाध्यायतात्पर्योदाहृतपद्मपुराणेत्यर्थः । **ऋषि-मिति** । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्ती'त्यादिश्रुत्युदाहरणं साङ्ख्यशास्त्रे क्रियमाणं पुराणोक्तदिशा भगवदवतारतात्पर्यकत्वोपपादनेन तदभिमतार्थतात्पर्यकत्वाभावव्युत्पादनेन प्रतिविहितमित्यर्थः ।

॥ इति श्रुतीतिहासपुराणानां अस्मन्मतानुसारित्वम् ॥
॥ इति श्रुतिविरुद्धभाषित्वादिना साङ्ख्याचार्यस्याप्तत्वानुपपत्तिश्च ॥

* * *

॥ अथ च तत्र अनुपपन्नभाषित्वाच्च तस्याप्तत्वानुपपत्तिः ॥
॥ अथ तत्रादौ ज्ञानानां प्रामाण्याप्रामाण्ययोः स्वतस्त्वाङ्गीकारः ॥

३६ **सु०— न केवलमुक्तमार्गेण आप्तत्वानुपपत्तिः, किन्नामानुपपन्नभाषित्वादपीत्याह अप्रामाण्येति ।**

अनु०— अप्रामाण्यस्वतस्त्वस्य स्वीकारादपि

अपिशब्देन प्रामाण्यस्वतस्त्वमपि समुच्चिनोति । ज्ञानानां प्रामाण्यमप्रामाण्यं च ज्ञानकारणमात्राधीनोत्पत्तिकमिति स्वीकरोति साङ्ख्यः, तच्चानुपपन्नमित्यतोऽप्यसौ नाप्तः ।

परि०— अपिपदस्य षष्ठ्यन्तपूर्वपदेनान्वयमुपेत्याह **अपिशब्देनेति** । स्वतस्त्वशब्दार्थः **ज्ञानकरणेत्यादि** ।

शे०वा०— आप्तत्वमुक्तमार्गेणेत्यनेनैव साङ्ख्याचार्यप्रणीतागमस्याप्रामाण्यव्युत्पादनात् किमप्रामाण्य-स्वतस्त्वस्येत्युत्तरवाक्येनेत्यत आप्तत्वानुपपत्तौ हेत्वन्तरोपदर्शनार्थत्वान्न तदिति भावेन तत्स्वरूपप्रदर्शनपूर्वकं

तत्परतयोत्तरवाक्यं योजयति **न केवलमिति** । **अपिशब्देनेति** । अनेनाप्रामाण्यस्वतस्त्वस्य स्वीकारादपीत्यपिशब्दो न केवलमनुपपन्नभाषित्वरूपहेत्वन्तरसमुच्चयार्थः, किन्तु व्याहतभाषित्वोपपादकप्रामाण्यस्वतस्त्वस्वीकारस्यापि समुच्चयार्थ इत्युक्तं भवति ।

वा०र०— स्वतस्त्वमपि समुच्चिनोतीत्यपिशब्दार्थं दर्शयति **अनेन प्रामाण्यस्येति** ।

* * *

॥ अथ तत्र मायिवदस्यापि स्वोक्ताखिलनिषेधित्वापत्तिः ॥

॥ अथ तत्रादौ विकल्पत्रयस्याप्यनुपपत्तिः ॥

॥ अथ च तत्रादौ विकल्पत्रयम् ॥

३७ **सु०— कथं प्रामाण्याप्रामाण्ययोः स्वतस्त्वमनुपपन्नमित्यत आह मायिवदिति ।**

अनु०— मायिवत् ।

स्वोक्ताखिलनिषेधी स्यात्

प्रामाण्याप्रामाण्ययोर्ज्ञानकारणमात्रजन्यत्वे साङ्ख्यस्य वचनेनोत्पन्नं ज्ञानं प्रमाणमप्रमाणं चेत्युभयात्मकं वा स्यात्, परस्परविरोधेनोभयविकलं वा ज्ञानमात्रमुत्प(द्येत)द्यते, निःस्वभावस्य ज्ञानस्यानुपपत्त्या नोत्प(द्यते)द्येत वा ।

कं०रा०— **परस्परेति** । प्रामाण्याप्रामाण्ययोः परस्परविरुद्धत्वेनैकस्योभयात्मकत्वायोगादुभयविकलं ज्ञानमात्रं साङ्ख्यवचनेनोत्पद्यतेत्यर्थः । **नोत्पद्यत वेति** । साङ्ख्यवचनेन ज्ञानमित्यनुवर्तते ।

चषकः— **उभयविकलम्** । प्रामाण्याप्रामाण्योभयविनिर्मुक्तम् ।

॥ इति विकल्पत्रयम् ॥

* * *

॥ अथ तत्र आद्यविकल्पानुपपत्तिः ॥

॥ अथ तत्रादौ मायिवदिति दृष्टान्तस्य स्पष्टीकरणम् ॥

३८ सु०— आद्ये सदसद्विलक्षणं विश्वं मन्यमानो मायावादी यथा स्वोक्तनिषेधी; सद्विलक्षणमित्युक्त्या प्राप्तस्यासत्त्वस्य स्वयमेव असद्विलक्षणमिति निषेधात्, असद्विलक्षणमित्युक्त्या च प्राप्तस्य सत्त्वस्य स्वयमेव सद्विलक्षणमिति निषेधात्; तथा साङ्ख्योऽपि स्वोक्ताखिलनिषेधी स्यात् । तद्वाक्यजनितज्ञानस्य याथार्थ्ये हि प्रकृतिर्जगत्कारणमित्यादिकोऽर्थो यो लब्धः स एवार्थस्तस्यायाथार्थ्ये निषिद्धः स्यात्, अयाथार्थ्यस्य विषयविपर्यासानतिरेकात् ।

उभयस्वतस्त्वे वस्तुनो विरुद्धाकारद्वयालिङ्गितत्वं प्रसज्येतेति भावः ।

परि०— ज्ञानानां द्विरूपत्वेन प्रामाण्याप्रामाण्यघटकयोरन्योन्यविरहरूपत्वाभावात् कथं 'स्वोक्ताखिलनिषेधी स्या'दित्युक्तिरित्यतोऽभिप्रायमाह **उभयस्वतस्त्व इति** ।

यादु०— नन्वेवं प्राप्तस्य प्रकृतेर्जगत्कारणत्वतदभावरूपविरुद्धाकारद्वयालिङ्गितत्वस्यानिषेधात् कथमखिलनिषेधी स्यादित्यतोऽभिप्रायमाह **उभयस्वतस्त्व इति** ।

श्रीनिधि०— अनेन किं दूषणमुक्तमित्यत निष्कर्षमाह **उभयस्वतस्त्व इति** ।

शे०वा०— सद्विलक्षणमित्युक्त्या प्राप्तस्येति । 'भावस्य तु निषेधेऽपि नाभावस्य निषेधनमि'ति न्यायादिति भावः । **इत्युक्त्या च प्राप्तस्येति** । 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत' इति न्यायादिति भावः । इष्टापत्तिमाशङ्क्य परिहरति **उभयस्वतस्त्व इति** ।

वा०र०— 'वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिनः' इत्येतत् जिज्ञासाधिकरणीयानुव्याख्यानव्याख्यानरूप इदमुक्तं भवति । यदि प्रागभावादिकं पक्षीकृत्य इत्यादि मूलव्याख्यानरूपवाक्यार्थचन्द्रिकायां उक्तं अनुव्याख्यानरूपं नियामकमेवासद्विलक्षणमित्युक्त्या सत्त्वप्राप्तौ साधकतयाह **भावस्य तु निषेधेऽपीति** । उदाहृतस्थलीयमूलानुसारेणाह **द्वौ नञौ इति** । यद्यप्यत्र नञ्द्वयस्य श्रवणं नास्ति तथापि नञर्थकविलक्षणशब्दस्य विद्यमानत्वात् तदभिप्रायेण द्वौ नञाविति्युक्तम् । अत एव विनञ्भ्यां नानानञौ न सहेतेत्यत्र न सहेत्यर्थे इति विवक्षायां न सहेत्यर्थप्राप्तिरिति न सहेति एतत्प्रकृत्यर्थविशेषणमित्युक्तम् । तत्र वीत्युपसर्गपक्षेऽपि न न सहेति नञ्द्वयोक्त्या विशब्दो नञर्थक इत्याश्रित्य तथोक्तिरिति ध्येयम् । तथा च सत्त्वं असद्विलक्षणमिति वाक्यलभ्यम् । एकेन नञर्थेन विशिष्टतया तद्वाक्यप्रतिपाद्यत्वे सति तत् नञर्थान्वयी ।

तद्वाक्यप्रतिपाद्यनञर्थान्तरवत् । तत्तत्प्रतिपाद्यं यथा अघट विलक्षणो घटः इति वाक्यप्रतिपाद्यो घटः इत्युपपादने अस्य तात्पर्यम् । एतच्च 'विलक्षणं सदसतोरि'ति चेति । 'अन्यत् सदसतोः विश्वं' इति चेति भक्तिपादीयानुव्याख्यानमूलव्याख्याने गुरुचरणैरेव कर्मनिर्णयटीकानुसारेणाभिहितम्, तत एव विस्तरेण प्रतिपत्तव्यम् ।

विट्ठल०— नन्वेवं प्राप्तस्य प्रकृतेर्जगत्कारणत्वतदभावरूपविरुद्धाकारद्वयालिङ्गितत्वस्य निषेधात् कथमखिलनेषेधी स्यादित्युच्यत इत्यतोऽभिप्रायमाह **उभयस्वतस्त्व इति** । प्रामाण्याप्रामाण्ययोरुभयोः स्वतस्त्वे तच्छास्त्रोक्तस्य वस्तुनः प्रामाण्याप्रामाण्याभ्यां प्रसक्तिविरुद्धाकारद्वयालिङ्गितत्वं ततश्चोक्तरीत्या अन्योन्यनिषेधरूपत्वमेव प्रसज्यत इत्यर्थः ।

चषकः— **उभयस्वतस्त्वे** । प्रामाण्याप्रामाण्योभयस्य दर्शितलक्षणौत्पत्तिकस्वतस्त्वोपगमे । **वस्तुनः** प्रधानस्य । **विरुद्धाकारद्वयालिङ्गितत्वं** जगत्कर्तृत्वतदभावविशेषितत्वम् ।

॥ इति मायिवदिति दृष्टान्तस्य स्पष्टीकरणम् ॥

* * *

॥ अथ तत्र अनुव्याख्यानगतमायिपदप्रयोगस्य साधुता ॥

३९ **सु०— मायाशब्दस्य व्रीह्यादित्वान्मायीति साधु ।**

परि०— ननु मायाशब्दान्मत्वर्थे 'अस्मायामेधास्रजोविनिरि'ति विनिप्रत्यये मायावीति भाव्यम् । कथं मायिवदिति मायिपदप्रयोग इत्यत आह **मायाशब्दस्य व्रीह्यादित्वादिति** । व्रीह्यादिगणे पठितत्वाद् 'व्रीह्यादिभ्यश्चे'ति सूत्रेण इनिप्रत्यये 'यस्ये'त्याकारलोपे मायीति साध्वित्यर्थः ।

गु०दी०— **मायीति साधु** इत्यत्र 'अत इनिठनावि'त्यकारान्तादेव पदात् इनिठनोर्विधानात् आकारान्तमायापदात् कथं मायीति इन्नन्तप्रयोग इति शङ्का । 'व्रीह्यादिभ्यश्च' इति उत्तरसूत्र एव ईकारान्तव्रीह्यादिपदेभ्योऽपि इनो विधानान्न दोष इत्युत्तरम् ।

यादु०— ननु मायाशब्दस्यादन्तत्वाभावात् 'अत इनिठनावि'त्यस्याप्रवृत्त्या कथं मायीति रूपमित्यत आह **मायाशब्दस्येति** । **व्रीह्यादित्वात्** व्रीह्यादिगणे पठितत्वात् । तथा च व्रीह्यादिभ्यश्चेत्यनेनैवात्र इनिरिति भावः ।

कं०रा०— ननु 'अत इनि ठनावि'त्यदन्तादिनिप्रत्ययस्य विहितत्वान्मायाशब्दस्य चादन्तत्वाभावादिनिप्रत्ययाप्राप्तेः कथं मायिवदित्यत्र मायिशब्द इत्यत आह **मायाशब्दस्येति** । व्रीह्यादिक्यश्चेत्यदन्तत्वरहितव्रीह्यादिशब्देभ्य इनिप्रत्ययस्य विहितत्वान्मायाशब्दस्य च व्रीह्यादित्वादिनिप्रत्ययप्राप्तेर्मायीतिशब्दः साधुरित्यर्थः ।

श्रीनिधि०— ननु मायीति कथम् । अत इनि ठनौ इत्यत्र तपरकरणात् मायाशब्दस्य पादान्तत्वाभावादित्यत आह **मायाशब्दस्येति** । व्रीह्यादेराकृतिगणत्वादिति भावः । एवमपि ज्ञानकरणे गुणदोषयोर्युगपत्समावेशे ज्ञानं प्रमाणमप्रमाणं च स्यात् ।

शे०वा०— 'अस्मायामेधास्रजो विनिरि'ति मायाशब्दात् विनिप्रत्ययश्रवणात् सति तस्मिन् मायावीति भवितव्यम् । मायीति तु कथमित्यतो विनिप्रत्यये सति मायावीतिवत् व्रीह्यादित्वात् व्रीह्यादिभ्यश्चेति इनिप्रत्यये सति मायीत्यपि साध्वित्याह **मायाशब्दस्येति** । व्रीह्यादित्वं चास्य तद्गणपठितत्वादित्यवधेयम् ।

विठ्ठल०— ननु मायाशब्दस्याकारान्तत्वेन ह्रस्वाकारान्तत्वाभावेन अत इनि ठनाविति सूत्रेणेन्प्रत्ययाप्राप्तेः कथं मायीति रूपमित्यत आह **मायाशब्दस्येति** । व्रीह्यादिगणस्य पठितत्वात् 'व्रीह्यादिभ्यश्चे'ति सूत्रेणेन्प्रत्ययोपपत्तेरिति भावः ।

चषकः— **व्रीह्यादित्वात्** व्रीह्यादिभ्यश्चेति इनिप्रत्ययविधायकयोगोपात्तव्रीह्यादिगणपठितत्वात् । **साधुरिति** । तथा च मायाशब्दस्यानदन्ततया 'अत इनिठनावि'त्यनेन इनेरप्राप्तावपि दर्शितयोगान्तरेण तन्निर्वाहान्न क्षतिरिति भावः ।

॥ इति अनुव्याख्यानगतमायिपदप्रयोगस्य साधुता ॥

* * *

॥ अथ च तत्र तथात्वे (परस्परविरोधे) न च किञ्चित्प्रसिद्ध्यति ॥

४० सु०— नन्वेवमपि याथार्थ्येन प्रकृतिर्जगत्कारणमित्यादिकोऽर्थस्तावत्सिद्ध्यतीत्यत आह न चेति ।

अनु०— न च किञ्चित्प्रसिद्ध्यति ।

न हि परस्परविरोधे किमपि सिद्ध्यतीति भावः । तर्हि प्रामाण्यस्य का गतिरिति चेत्, अप्रामाण्येऽपि दीयतां दृष्टिः ।

परि०— अप्रामाण्येऽपीति । प्रकृतिर्जगत्कारणमित्यादेरर्थस्य भावे अप्रामाण्यस्य का गतिरित्यपि दृष्टिर्दीयतामित्यर्थः ।

यादु०— प्रकृतिकारणत्वस्यासिद्धौ तज्ज्ञाने प्रामाण्यं व्यर्थं स्यादित्याशयेन शङ्कते **तर्हीति** । तज्ज्ञानगतस्याप्रामाण्यस्यापि सार्थक्याय तदभावोऽपि सिध्यतु इत्याशयेनाह **अप्रामाण्येऽपीति** ।

शे०वा०— सिद्ध्यतीति । तेन विना ज्ञानयाथार्थ्यानिर्वाहादिति भावः । **न हीति** । अन्यथा सदसद्विलक्षणत्ववादेऽपि यत्किञ्चिदेकसिद्धिप्रसक्तेरिति भावः । **तर्हीति** । जगत्कारणत्वादिना विना याथार्थ्यानिर्वाहात्प्रकृतेर्जगत्कारणत्वाभावे तद्वाक्यजनितविज्ञानस्य याथार्थ्यमेव न स्यादिति भावः । जगत्कारणत्वाभावादिना विना अयाथार्थ्यानिर्वाहात् प्रकृतेर्जगत्कारणत्वे तद्वाक्यजनितज्ञानस्यायाथार्थ्यमपि न स्यादित्यपि सममित्याह **अप्रामाण्येऽपीति** ।

विट्ठल०— ननु परस्परविरोधेऽपि प्रामाण्यस्यापि भावात् । तद्वैय्यर्थ्यपरिहाराय प्रकृतिर्जगत्कारणमित्यङ्गीकार्यमिति शङ्कते **तर्हीति** । तद्गताप्रामाण्यस्यापि सार्थक्याय तदभावोऽप्यङ्गीकार्य इत्याशयेनाह **अप्रामाण्येऽपीति** ।

॥ इति तथात्वे न च किञ्चित्प्रसिद्ध्यति ॥
॥ इति आद्यविकल्पानुपपत्तिः ॥

* * *

॥ अथ तत्र द्वितीयविकल्पानुपपत्तिः ॥

४१ सु०— द्वितीये दोषमाह न चेति । ज्ञानं हि यथावस्थितमयथावस्थितं वाऽर्थं विषयीकुर्यात्, तृतीयप्रकारानिरूपणात् । तथा च प्रामाण्याप्रामाण्यविकलं ज्ञानम् अयःशलाकावदविषयमेव स्यात्, एवञ्च न साङ्ख्यवचनात् किञ्चित् प्रसिद्ध्यतीति ।

परि०— प्रामाण्याप्रामाण्यविकलं ज्ञानमात्रमिति पक्षनिरासकत्वेनापि तदेव वाक्यं योजयति **द्वितीय इति** ।

शे०वा०— परस्परविरोधेनेति प्राग्विकल्पितद्वितीयतृतीयपक्षदूषणपरतयाऽप्येतदेव भाष्यमुपन्यस्य व्याख्यातुमाह **द्वितीय इत्यादिना** ।

विठ्ठल०— **एवं चेति** । साङ्ख्यवचनजनितज्ञानस्य निर्विषयत्वे सतीत्यर्थः ।

॥ इति द्वितीयविकल्पानुपपत्तिः ॥

* * *

॥ अथ तत्र तृतीयविकल्पानुपपत्तिः ॥

४२ **सु०— तृतीये तु जगदान्ध्यमेव स्यादित्याह न चेति ।**

परि०— तृतीये त्विति । ज्ञानमेव नोत्पद्यत इति पक्षे त्वित्यर्थः ।

॥ इति तृतीयविकल्पानुपपत्तिः ॥
॥ इति तत्र विकल्पत्रयस्याप्यनुपपत्तिः ॥

* * *

॥ अथ तत्र पुनस्त्रिविधाभ्यधिकाशङ्कापरिहारः ॥
॥ अथ च तत्र प्रथमाभ्यधिकाशङ्कापरिहारः ॥

४३ **सु०— स्यादेतत्; यदा ज्ञानकरणं गुणोपेतं तदा तदीयायामप्रामाण्यजननशक्तौ गुणेन प्रतिबद्धायां प्रमाणज्ञानमेवोत्पद्यते, यदा तु दोषोपेतं तदा दोषेण प्रामाण्यजननशक्तौ प्रतिबद्धायां अप्रमाणज्ञानमेवोत्पद्यते; न हि किमपि करणं युगपदुभयोपेतमुभयविकलं वा सम्भवति, येनोक्तदोषः स्यादिति । उच्यते । किमर्थमित्थं कल्प्यते । ज्ञानस्योभयाकारत्वप्रसक्तेरिति चेत्, तत्प्रसक्तिरपि कुतो नाभ्युपगन्तव्या । विरोधभयादिति चेत्, करणेऽप्युभयशक्तिविरोधात् कुतो न बिभेषि ।**

यादु०— ज्ञानस्योभयाकारत्वं यथा विरुद्धं तथा करणे विरुद्धाकारद्वयजननानुकूलशक्तिद्वयसमावेशोऽपि विरुद्धः अतो नाङ्गीकारार्ह इत्याह **करणेऽपीति** । अनेन किञ्चित्करणे विरुद्धं शक्तिद्वयं न सिद्ध्यतीति मूलयोजनोक्तेति ज्ञातव्यम् ।

कं०रा०— उभयोपेतमिति । गुणदोषोपेतमित्यर्थः । **उभयशक्तिविरोधादिति** । प्रामाण्याप्रामाण्यजननशक्त्योर्विरोधादित्यर्थः ।

श्रीनिधि०— परस्परविरोधेन उभयविरहे उभयविकलं वा स्यात् नोत्पद्येत वा इति प्रागुक्तदोषः स्यादित्यत आह **न हि किमपि करणमिति** । **उभयोपेतमुभयविकलमिति** । उभयपदेन गुणदोषौ गृह्येते । **करणं** ज्ञानकरणम् । तत्कार्यदर्शनादिति भावः ।

शे०वा०— **करणेऽपीति** । ज्ञानस्योभयाकारताया विरुद्धत्ववत् करणस्यापि विरुद्धाकारद्वयजननानुकूलशक्तिद्वयवत्ताया अपि विरुद्धत्वादिति भावः । अनेन किञ्चित्करणे विरुद्धं शक्तिद्वयं न सिद्ध्यतीति मूलयोजना सूचिता भवति ।

विट्ठल०— **येनोक्तदोष इति** । गुणदोषोभयोपेतत्वे आद्यपक्षोक्तदोषः तदुभयविकलत्वे द्वितीयपक्षोक्तदोष इत्यर्थः ।

चषकः— **उभयोपेतं** गुणदोषोभयविशेषितम् । **उभयविकलं** तदुभयविनिर्मुक्तम् ।

३३॥ इति प्रथमाभ्यधिकाशङ्कापरिहारः ॥

* * *

३४॥ अथ तत्र द्वितीयाभ्यधिकाशङ्कापरिहारः ॥

४४ सु०— यदपि विरुद्धकार्यद्वयजनकं करणं तत्सहकारिसाहित्याहितशक्तिकमेव । प्रकृते च तथाऽभ्युपगमे द्वयोरपि परतस्त्वापत्तिः ।

किञ्च वचने कौ गुणदोषौ । आप्तानाप्तत्वप्रणीतत्वे इति चेत्, तर्ह्युभयाभावाद्वेदवाक्येनोभयात्मकमनुभयात्मकं वा ज्ञानमुत्पद्येत नोत्पद्येत वा । अनाप्ताप्रणीतत्वं गुण इति चेत्, तर्ह्याप्ताप्रणीतत्वं दोषोऽपि किन्न स्यादिति स एव प्रसङ्गः ।

परि०— नन्वेवं वेत्रबीजस्य वेत्राङ्कुरजननशक्तिमत्त्वं कदलीकाण्डजननशक्तिमत्त्वं चोपलभ्यते । अभिज्ञाजनकचक्षुरादेः प्रत्यभिज्ञाजनकत्वं च दृश्यते । तथैकमेव चक्षुरादिकं प्रमां भ्रमं चोपजनयदुपलभ्यते । तथा च कथं करणेऽप्युभयशक्तिविरोधादित्युक्तिरित्यत आह **यदपीति** । विरुद्धकार्यजनकं यत्करणमस्ति तदपि सहजशक्त्यैककार्यं जनयत्सहकारिसामर्थ्यादाहितशक्तिकं विरुद्धकार्यान्तरं जनयति । न तु शक्तिद्वयमपि सहजमेवेत्यर्थः । प्रकृतेऽपि तथाऽस्त्वित्यत आह **प्रकृते चेति** । गुणाहितशक्तिकं चक्षुरादिकं प्रमां जनयति । दोषाहितशक्तिकं तु भ्रममित्यङ्गीकारे

चेत्यर्थः । एका शक्तिः सहजा । अपरा त्वाहितेत्युक्तौ तूभयं स्वत इत्युक्तिविरोध इति भावः । **उभयात्मकमिति** । प्रमाणमप्रमाणमित्यर्थः । **अनुभयेति** । परस्परविरोधाद्धेतोरिति भावः । **नोत्पद्येत वेति** । ज्ञानमित्यनुषङ्गः । निःस्वभावस्योदयायोगादिति भावः । **स एवेति** । प्रागुक्तत्रिविधकल्पदोषप्रसङ्ग इत्यर्थः ।

यादु०— नन्वेवं दावदहनदग्धवेत्रबीजादौ विरुद्धकार्यद्वयजनकशक्तिद्वयसमावेशो न स्यादित्यत आह **यदपीति** । तथा च तत्रापि न शक्तिद्वयं युगपदस्ति किन्तु दाहादिलक्षणसहकारिसामर्थ्यात् पूर्वशक्तिनाशानन्तरं शक्त्यन्तरमुत्पद्यत इति भावः । मूलं प्रकारान्तरेण योजयितुमाह **किञ्च वचन इति** । साङ्ख्यवचनस्यैव प्रस्तुतत्वात् वचनग्रहणम् । **वेदवाक्येनेति** । तथा च वेदवाक्येन किञ्चन न सिद्ध्यतीति मूलं योजनीयमिति भावः ।

वं०प०— **तर्ह्युभयाभावादिति** । केवलं प्रामाण्य एव प्रयोजकस्याप्तोक्तत्वरूपगुणस्य अप्रामाण्य एव प्रयोजकस्यानाप्तोक्तत्वरूपदोषस्य चेत्यर्थः । **उभयात्मकमिति** । अयमर्थः । वेदवाक्येनोत्पद्यमानं ज्ञानं प्रमाणमेव मा भवतु । तन्निमित्ताभावात् । तथाऽप्रमाणमेव मा भवतु । तन्निमित्तस्याप्यभावात् । उभयात्मकं प्रमाणाप्रमाणसमाहारात्मकं तु स्याद्बाधकाभावाद्योगरूढिरूपतृतीयवृत्तिवदिति । यथा योगस्याभावे रूढेश्चाभावे योगरूढिरूपा समाहारवृत्तिर्नास्ति तथा निमित्तद्वयाभावेन प्रामाण्यस्य वाऽप्रामाण्यस्य वाऽभावे उभयात्मकत्वमसम्भावितमित्यस्वरसादाह **अनुभयात्मकं वेति** । परस्परविरोधेन प्रामाण्याप्रामाण्योभयविकलं अयःशलाकावन्निर्विषयं ज्ञानमात्रमुत्पद्येतेत्यर्थः । **नोत्पद्येत वेति** । निःस्वभावस्य ज्ञानस्यानुत्पत्त्येति शेषः । अनाप्ताप्रणीतत्वं गुण इत्यङ्गीकृत्य वेदस्य सर्वथा अप्रणीतत्वेनोक्तगुणसत्त्वात् तज्जन्यं ज्ञानं प्रमाणमेवेति यद्युच्यते तर्ह्याप्ताप्रणीतत्वं दोष इत्यङ्गीकृत्य सर्वथा अप्रणीते वेदे उक्तदोषसत्त्वात् तत एव तज्जन्यं ज्ञानमप्रमाणमपि स्यादित्युक्त एवातिप्रसङ्ग इत्याह **अनाप्तेत्यादिना** ।

कं०रा०— नन्वेकस्मिन्नेवौषधादौ धातुसाम्यतद्वैषम्यादिरूपविरुद्धकार्यजननशक्तिद्वयवद् ज्ञानकरणेऽपि प्रामाण्याप्रामाण्याजननशक्तिद्वयस्य सम्भवेन तद्विरोधस्यैवाभावान्न ततो भीतिरित्यत आह **यदपीति** । यदौषधादिकं विरुद्धकार्यजनकं तदप्यनुपानादि विशेषरूपसहकारिसाहित्याहितशक्तिकमेव न तु विरुद्धकार्यद्वयजनने स्वाभाविकशक्तिकम् । प्रकृते च ज्ञानकरणस्य प्रामाण्याप्रामाण्यजनने सहकारिसाहित्याहितशक्तिकत्वाभ्युपगमे प्रामाण्याप्रामाण्यमुभयोरपि परतस्त्वापत्तितः स्वाभाविकशक्तिकत्वस्यैवाङ्गीकार्यत्वाद्विरुद्धोभयानुकूलस्वाभाविकशक्तिद्वयस्य च विरुद्धत्वात् ततोऽवश्यं भेत्तव्यमिति भावः । **किञ्च वचन इति** । यौ ज्ञानकरणनिष्ठाप्रामाण्यजननशक्तिप्रामाण्यजननशक्त्योः प्रतिबन्धकौ तौ गुणदोषौ वाक्ये कावित्यर्थः । **तर्हीति** । आत्मप्रणीतत्वानाप्तप्रणीतत्वयोर्वाक्ये गुणदोषरूपत्वे अपौरुषेयवेदवाक्ये अप्रामाण्यप्रामाण्यजननशक्तिप्रतिबन्धकयोरुक्तयोर्गुणदोषयोरभावाद्वेदवाक्येन प्रमाणाप्रमाणरूपं ज्ञानं वा प्रामाण्याप्रामाण्ययोः परस्परविरुद्धत्वेनैकत्र

समावेशायोगादनुभवात्मकं ज्ञानं चोत्पद्येत निःस्वभावस्य ज्ञानस्यानुपपत्त्या तेन ज्ञानं नोत्पद्येत वेत्यर्थः । **आप्तानाप्तप्रणीतत्वमिति** । तथा चापौरुषेये वेदेनाप्ताप्रणीतत्वरूपगुणस्याप्रामाण्यजननशक्तिप्रतिबन्धकस्य सत्त्वात्तेन जायमानं ज्ञानं प्रामाण्यमेव जायते नोभयात्मकं न चानुभयात्मकमिति भावः । अस्त्वाप्ताप्रणीतत्वं दोषस्ततः किमित्यत आह **इति स एवेति** । प्रामाण्यजननशक्तिप्रतिबन्धकाप्ताप्रणीतत्वरूपदोषसत्त्वाद्वेदेन जायमानं ज्ञानमप्रामाण्यजननशक्तिप्रतिबन्धकानाप्तप्रणीतत्वरूपगुणसत्त्वात् प्रमाणमिवाप्रमाणमपि जायेतेत्युभयात्मकं स्यादुभयप्रतिबन्धकसद्भावादनुभयात्मकं वा स्यात् निस्वभावस्य ज्ञानस्यानुपपत्तेस्तेन ज्ञानं नोत्पद्येत वेति पूर्वोक्त एव प्रसङ्ग इत्यर्थः ।

श्रीनिधि०— यदपीति । वेत्रबीजादिकमित्यर्थः । **द्वयोरपि परतस्त्वापत्तिरिति** । नष्टोत्पत्तिः द्वयोरपि स्वतस्त्वाङ्गीकारादिति द्रष्टव्यम् । **उभयात्मकमनुभयात्मकं वेति** । गुणदोषाभावयोरप्रामाण्यप्रयोजकत्वे गुणाभावप्रयुक्तमप्रामाण्यम् । दोषाभावप्रयुक्तं प्रामाण्यं चेत्युभयात्मकं स्यात् । गुणदोषयोरेव प्रयोजकत्वे अनुभयात्मकं स्यादिति द्रष्टव्यम् । **स एव प्रसङ्ग इति** । प्रागुक्त एव, उभयात्मकं ज्ञानं स्यादित्यनिष्टप्रसङ्ग इत्यर्थः ।

शे०वा०— नन्वेवं दावदहनदग्धवेत्रबीजादौ विरुद्धकार्यद्वयजनकशक्तिद्वयसमावेशोऽपि न स्यात् इत्यतो न तत्रापि शक्तिद्वयं युगपदस्ति । किन्तु दाहादिलक्षणसहकारिसामर्थ्यात् पूर्वशक्तिनाशानन्तरमेव तत्र शक्त्यन्तरमिति नानुपपत्तिरित्याह **यदपीति** । तर्हि तद्वदेव प्रकृतेऽपि गुणदोषरूपसहकारिसाहित्याहितशक्तिकं कारणमेव विरुद्धकार्यद्वयजनकमित्यस्त्वित्यत आह **प्रकृते चेति** । तथा चोभयं स्वत इति सिद्धान्तभङ्ग इति भावः । अङ्गीकृत्य चेदमुदितम् । वस्तुतस्तु गुणदोषयोरेव परपक्षे दुर्निरूपत्वान्न तदाहितशक्तिकस्य कारणस्य विरुद्धकार्यद्वयजनकता स्वीकारार्हेत्याशयेनाह **किञ्चेति** । प्रमाणमेवाप्रमाणमेव वा ज्ञानमुत्पद्यत इति नियमहेतोर्गुणस्य दोषस्य चाभावादिति भावः । प्रामाण्यहेतोर्गुणस्याभावेऽपि प्रामाण्ये, अप्रामाण्यहेतोर्दोषस्याभावेऽप्यप्रामाण्यं स्यादिति वेदजन्यज्ञानमुभयात्मकम्, अप्रामाण्यहेतोरनाप्तप्रणीतत्वस्याभावेनाप्रामाण्याभावे च प्रामाण्यप्रयोजकस्याप्तप्रणीतत्वस्याभावेन प्रामाण्यमपि न स्यादित्यनुभयात्मकं वा ज्ञानमुत्पद्येतेत्यर्थः । **नोत्पद्येत वेति** । परस्परविरोधेनोभयात्मकज्ञानायोगान्निःस्वभावस्य च ज्ञानस्यानुत्पत्तेर्नोत्पद्येतेत्यर्थः । **अनाप्तेति** । तथा च वेदवाक्येन प्रमाणज्ञानस्योत्पत्तिर्युक्तेति भावः । **तर्हीति** । वेदे आप्ताप्रणीतत्वरूपदोषस्य सत्त्वादप्रमाणज्ञानस्योत्पत्तिप्रसङ्ग इत्यर्थः । अस्त्वेवमित्यत आह **स एवेति** । अनाप्ताप्रणीतत्वरूपगुणस्येव आप्ताप्रणीतत्वरूपदोषस्यापि वेदे सत्त्वेन वेदजन्यज्ञानस्य 'उभयात्मकं वा ज्ञानमुत्पद्येत नोत्पद्येत वे'त्युक्त एव प्रसङ्ग इत्यर्थः ।

स०व्र०— ननु कारणे विरुद्धशक्तिद्वयस्याभावे एकस्मात्कारणात् कार्यद्वयं कुत्रापि न स्यादित्यत आह **प्रकृत इति** । सहकारिसाहित्याहितशक्तिकत्वाङ्गीकारे ज्ञानकरणातिरिक्तसहकारिसापेक्षत्वेन परतस्त्वापत्ति-

रित्यर्थः । **तर्हीति** । गुणाभावेऽपि वेदवाक्येन प्रमाणात्मकमेव ज्ञानमुत्पद्यते इत्युच्यते तर्हि दोषाभावेऽपि अप्रमाणात्मकमप्युत्पद्यते इत्यङ्गीकर्तव्यम् । विनिगमकाभावादिति भावः ।

विष्टल०— ननु यथा ज्ञानस्योभयाकारत्वं वस्तुनो विरुद्धाकारद्वयालिङ्गितत्वे प्रसञ्जकत्वेन विरुद्धमङ्गीकारार्हम् । न तथा कारणे विरुद्धाकारद्वयजननानुकूलशक्तिमत्वं विरुद्धं वेत्रबीजादौ विरुद्धकार्यद्वयजननशक्तिद्वयसमावेशदर्शनादित्यत आह **यदपीति** । तथा च वेत्रबीजेन शक्तिद्वयं युगपदस्ति किं तूदाहारिकारिबलात् पूर्वशक्तिनाशानन्तरं शक्त्यन्तरमुत्पद्यत एवेति कारणेषु शक्तिद्वयविरोध इत्युक्तं युक्तमिति भावः । **प्रकृते चेति** । प्रामाण्याप्रामाण्ययोरपि सहकारिकृतत्वे द्वयोरपि परतस्त्वापत्तिः । ततश्चोभयोः स्वतस्त्वमिति गतः पक्ष इति भावः । यद्यपि विरुद्धकार्यद्वयजनके वेत्रबीजादौ वेत्राङ्कुरादिजनने स्वारसकी शक्तिः कदलीकाण्डादि जननादौ तु सहकारिकृतत्वं न तूभयत्रापि सहकारिकृता तथैव प्रकृतेऽपि कल्पयितुं युक्तं तथापि परेण गुणदोषोपेतज्ञानकारणस्य प्रामाण्याप्रामाण्यजननशक्त्यङ्गीकारेणोभयोरपि परतस्त्वापादनं युक्तमिति ध्येयम् । मूलं प्रकारान्तरेण योजयितुमाह **किञ्च वचन इति** । साङ्ख्यवचनस्यात्र प्रस्तुतत्वाद्वचनग्रहणं अन्यथाकरणे इति वक्तव्यम् । **वेदवाक्येन** इत्यनेन न किञ्चिदपि वेदवाक्येन सिद्ध्यतीति मूलं योजितं भवति । **स एवातिप्रसङ्ग इति** । वेदवाक्योभयात्मको ज्ञानं स्यादिति पूर्वोक्त एवातिप्रसङ्गः स्यात् । अभावरूपयोर्गुणदोषयोः समावेशादित्यर्थः ।

चषकः— **उभयाभावादिति** । वेदस्यापौरुषेयत्वादिति भावः ।

३४॥ इति द्वितीयाभ्यधिकाशङ्कापरिहारः ॥

* * *

३५॥ अथ तृतीयाभ्यधिकाशङ्कापरिहारः ॥

४५ सु०— एतेन 'साङ्ख्याचार्यवचनं स्वत एव प्रमाणं किमाप्तिनिश्चयेने'त्यपि निरस्तम्, अप्रामाण्यस्यापि स्वतस्त्वेनोक्तसकलदोषापत्तेः । अथ महाजनपरिग्रहात् तत्प्रामाण्यनिश्चय इति चेन्न; पूज्यार्थत्वेऽसिद्धेः, बह्वर्थत्वे सव्यभिचारत्वात् सन्दिग्धासिद्धेश्चेति ।

परि०— **उक्तसकलेति** । प्रागुक्तत्रिविधेत्यर्थः । **सव्यभिचारत्वादिति** । बौद्धादिग्रन्थेष्वपि प्रामाण्यहीनेषु सत्त्वादिति भावः । ननु तदपेक्षयाऽपि बहुजनपरिगृहीतत्वं हेतुरस्त्वित्यत आह **सन्दिग्धेति** । ततोऽप्यधिकसङ्ख्यावत्त्वस्यानिर्णयादिति भावः ।

गु०दी०— सन्दिग्धासिद्धेः इत्यत्र यदि बहुत्वमात्रं तर्हि बौद्धशास्त्रादौ व्यभिचारः । यदीयत्तावच्छिन्नं बहुत्वं विवक्षितं तदाऽतीतवर्तमानानागतसङ्ख्यसमयिषु इयत्ताया निर्णेतुमशक्यत्वात् सन्दिग्धासिद्धिरित्यर्थः ।

यादु०— उक्तसकलेति । साङ्ख्यस्य वचनेनोत्पन्नं ज्ञानं प्रमाणमप्रमाणं वेत्युभयात्मकं वा स्यादित्यादिना त्रेधा विकल्पदोषा अभिहिताः ते सर्वेऽप्यत्र स्युरित्यर्थः । **पूज्यार्थत्व इति** । मह पूजायामिति धातोरिति भावः । ननु बहुजनपरिगृहीतत्वस्य न बौद्धागमादौ व्यभिचारः, बौद्धागमादिव्यावृत्तस्य बहुतमजनपरिगृहीतत्वस्य हेतुतया विवक्षितत्वादित्यत आह **सन्दिग्धासिद्धेरिति** । त्वदागमपरिगृहीतॄणां बौद्धागमपरिगृहीत्रपेक्षया बहुतमत्वं न निश्चेतुं शक्यमिति भावः ।

वं०प०— एतेनेत्युक्तं विवृणोति **अप्रामाण्यस्यापीति** । **असिद्धेः** त्वदागमपरिगृहीतॄणां पूज्यत्वस्यास्माकमसिद्धेरित्यर्थः ।

कं०रा०— एतच्छब्दपरामृष्टं हेतुं दर्शयति **अप्रामाण्यस्यापीति** । **तत्प्रामाण्यनिश्चय इति** । साङ्ख्याचार्यवचनप्रामाण्यनिश्चय इत्यर्थः । **पूज्यार्थत्व इति** । महच्छब्दस्य पूज्यार्थत्वे वेदविरुद्धसाङ्ख्यशास्त्रपरिगृहीतॄणां पूज्यत्वाभावेन पूज्यजननपरिग्रहस्यासिद्धिरिति भावः । **बह्वर्थत्व इति** । महच्छब्दस्य बहुत्वार्थत्वे बहुत्वस्य च द्वित्वाधिकसङ्ख्यारूपत्वे द्वित्वाधिकसङ्ख्यावज्जनपरिग्रहस्य साङ्ख्यशास्त्रविरुद्धशास्त्रान्तरेऽपि सत्त्वाद्व्यभिचारः शास्त्रान्तरपरिगृहीतॄसङ्ख्याधिकसङ्ख्यारूपत्वे तादृशबहुत्वस्य प्रकृते निश्चयाभावात् सन्दिग्धासिद्धिरिति भावः ।

श्रीनिधि०— पूज्यार्थत्वत इति । महच्छब्दस्येति शेषः । अस्माभिस्तस्य पूज्यत्वेनैव सम्मतत्वादिति भावः । **व्यभिचारादिति** । बौद्धादिशास्त्रेष्विति भावः । **सन्दिग्धासिद्धेश्चेति** । साङ्ख्यानुवर्तिनो बहवो बौद्धानुवर्तिनो बहवो वेति सन्देहेनासिद्धिः निश्चायकाभावादिति भावः ।

शे०वा०— उक्तसकलेति । उभयात्मकमनुभयात्मकं वा ज्ञानमुत्पद्यते नोत्पद्यते वेत्युक्तसकलदोषा इत्यर्थः । **तत्प्रामाण्येति** । साङ्ख्याचार्यप्रणीतागमप्रामाण्येत्यर्थः । किमत्र महच्छब्देन पूज्यताऽभिमता, सङ्ख्याप्रकर्षो वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **पूज्यार्थत्वे इति** । **असिद्धेरिति** । साङ्ख्यागमपरिगृहीतॄणां पूज्यत्वस्य परं प्रत्यसिद्धेरित्यर्थः । द्वितीयं दूषयति **बह्वर्थत्वे इति** । बौद्धागमादाविति शेषः । देशविशेषे तस्यापि बहुजनपरिगृहीतत्वादिति भावः । ननु बौद्धागमादिव्यावृत्तस्य बहुतमजनपरिगृहीतत्वस्य हेतुतया विवक्षितत्वान्न बौद्धागमादौ व्यभिचार इत्यत आह **सन्दिग्धासिद्धेश्चेति** । जनानामियत्तापरिज्ञानस्याशक्यतया त्वदागमपरिगृहीतॄणां बौद्धागमपरिगृहीतजनापेक्षया बहुतमत्वस्य निश्चेतुमशक्यत्वादित्यर्थः ।

वा०र०— इत्युक्तसकलदोषेत्यर्थ इति पाठः । दोषाः इति सन्ध्यभावो लेखकागतः । वेदापौरुषेयत्ववादीय-तत्त्वनिर्णयटीकोक्तरीत्या विवृणोति **किमत्रेति** ।

विट्ठल०— **उक्तसकलदोषेति** । साङ्ख्यवचनेनोत्पन्नं ज्ञानं प्रमाणमप्रमाणं चेत्युभयात्मकं स्यादित्यादिना त्रेधा कल्प्य ये दोषाऽभिहितास्ते सर्वेऽप्यत्र स्युरित्यर्थः । किमिदं महत्त्वं पूज्यत्वं बहुत्वं वेति हृदि निधाय क्रमेण दूषयति **पूज्यार्थत्व इति** । बौद्धागमादिव्यावृत्तये बहुतमजनपरिगृहीतत्वमिह हेतुतया विवक्षितमतो न बौद्धागमादौ व्यभिचार इत्यत आह **सन्दिग्धासिद्धेरिति** । बौद्धागमपरिगृहीत्रपेक्षया साङ्ख्यागमपरिगृहीतॄणां बहुतमत्वस्य सन्दिग्धत्वादित्यर्थः ।

चषकः— **असिद्धेरिति** । तत्परिगृहीतॄणां पूज्यत्वस्य प्रतिवादिभिरनुपगमादिति भावः । **सव्यभिचारत्वादिति** । प्रामाण्यविनिर्मुक्तबौद्धादिग्रन्थसाधारण्यादिति भावः । **सन्दिग्धेति** । बौद्धशास्त्रपरिगृहीत्रवधिकबहुत्वस्य साङ्ख्यशास्त्रपरिगृहीत्रधिष्ठानकस्यानवधृतेरिति भावः ।

॥ इति तृतीयाभ्यधिकाशङ्कापरिहारः ॥
॥ इति पुनस्त्रिविधाभ्यधिकाशङ्कापरिहारः ॥
॥ इति मायिवदस्यापि स्वोक्ताखिलनिषेधित्वापत्तिः ॥
॥ इति ज्ञानानां प्रामाण्याप्रामाण्ययोः स्वतस्त्वाङ्गीकारः ॥
॥ इति अनुपपन्नभाषित्वाच्च तस्याप्तत्वानुपपत्तिः ॥
॥ इति साङ्ख्याचार्यस्य च आप्तत्वानुपपत्तिः ॥
॥ इति तत्र पौरुषेयागमप्रमाणाभावः ॥
॥ इति तत्र साङ्ख्योक्तार्थे आगमप्रमाणाभावः ॥

* * *

॥ अथ तत्रानुमानप्रमाणाभावः ॥
॥ अथ तत्र विविधानुमानानि ॥

४६ सु०— मा भूत् प्रकृतिकारणत्वे प्रपञ्चस्य प्रत्यक्षं प्रमाणम्, मा च भूदागमः, अनुमानं तु भविष्यति । यथोक्तम्, 'भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्ये'ति ।

अयमर्थः । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य मूलकारणमस्त्यव्यक्तम् । यथा कूर्मशरीरे सन्त्येवाङ्गानि ततो विभज्यन्ते, तस्मिन्नेवाव्यक्तीभवन्ति; एवं कारणा-

न्मृत्पिण्डाद्धेमपिण्डाद्वा कार्याणि घटमुकुटादीनि विभज्यन्ते । सन्त्येव च पृथिव्यादीनि कारणात् तन्मात्रात् । सन्त्येव च तन्मात्राण्यहङ्कारात् । सन्नेव चाहङ्कारो महतः । सदेव च महत्परमाव्यक्तादिति । सोऽयं कारणात्परमाव्यक्तात्पारम्पर्येण विश्वस्य कार्यस्य विभागः प्रतिसर्गे ॥ मृत्पिण्डं हेमपिण्डं वा घटमुकुटादयो विशन्तोऽव्यक्तीभवन्तीति तत्कारण-रूपमेवानभिव्यक्तघटमुकुटादिकार्यमपेक्ष्याव्यक्तं भवति । एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्रमव्यक्तयन्ति । एवं तन्मात्राण्यहङ्कारं विशन्त्यहङ्कारमव्यक्त-यन्ति । एवमहङ्कारो महान्तमाविशन्महान्तमव्यक्तयति । महान्प्रकृतिं स्वकारणं विशति । प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव । सोऽयमविभागः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य कार्यस्य ॥ तस्मात्कारणे कार्यस्य सत एव **विभागा-विभागाभ्याम् अव्यक्तं कारणमस्तीति ।**

इतश्च, **शक्तितः प्रवृत्तेः** । कारणशक्तितो हि कार्यं प्रवर्तते, अशक्तात्कारणात्कार्य-स्यानुत्पत्तेः । शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वादन्या । अस्तु तर्हि महत एव परमाव्यक्तत्वमित्यत उक्तं **भेदानां परिमाणादिति** । महदादीनामव्यापकत्वादव्यक्त-कारणकत्वं घटादिवदित्यर्थः । इतश्च, **समन्वयात्** । सुखदुःखमोहसमन्वितानि हि कार्याणि । यानि च यद्रूपमनुगतानि तानि तत्स्वभावाव्यक्तकानि, यथा मृद्धेमरूप-मनुगता घटमुकुटादयो मृद्धेमपिण्डाव्यक्तकाः । तस्मादस्ति सुखदुःखमोहात्मकानां सत्त्व-रजस्तमसां साम्यावस्थाऽव्यक्तं भेदानामिति ।

परि०— इदमित्यादिमूलमवतारयितुमाह **मा भूदित्यादिना** । उत्तरार्धं तावद्विवृण्वन् साध्योक्त्याऽऽकाङ्क्षां तावत्पूरयति **कारणकार्येति** । कारणकार्यविभागादिति हेतुं व्यनक्ति **यथे-त्यादिना विभाग इत्यनेन** । **सन्त्येवेति** । विद्यमानान्येवेत्यर्थः । एवमग्रेऽपि । **विभज्यन्त इति** । विभक्ततया दृश्यन्त इ(ति भावः)त्यर्थः । **तस्मिन्नेवेति** । यथेत्यनुषङ्गः । अयं च दृष्टान्तः प्रतिसर्ग इत्यादावविभागहेतूपपादनस्थले उपयोक्ष्यमाणोऽपीह प्रसङ्गादुक्तः । **तन्मात्रा-दिति** । गन्धरसरूपादित इत्यर्थः । विभज्यन्त इत्यनुषङ्गोऽत्रोत्तरत्र च ध्येयः । वैश्वरूप्यस्ये-त्यस्यार्थो **विश्वस्य कार्यस्येति** । अविभागहेतुं च व्यनक्ति **प्रतिसर्ग इत्यादिना नानारूपस्य कार्यस्येत्यन्तेन** । यथा कूर्मशरीरे तदङ्गान्यव्यक्तीभवन्ति एवमित्येतावतो वाक्यस्यानुकर्षः ।

तन्मात्राणीति द्वितीया । विशन्तोऽव्यक्तीभवन्तीत्यनुषङ्गोऽत्र उत्तरत्र च ज्ञेयः । स्वापेक्षयेत्यस्य तन्मात्रादेर्व्यक्तत्वेऽपि पृथिव्यादेरव्यक्तत्वेन हेतुनाऽव्यक्तव्यवहार इत्यर्थो ध्येयः । वैश्वरूप्यस्येत्यनुवादः नानेत्यादि व्याख्या । स्वार्थे ष्यञ् इति भावः । **इतश्चेति** । अस्मादपि हेतोरिति भावः । तमाह **शक्तितः प्रवृत्तेरिति** । तद्वचाचष्टे **कारणेति** । परिमाणादित्यस्य परिमितत्वादित्यर्थमुपेत्याह **अव्यापकत्वादिति** । समन्वयादित्येतदवतार्य व्याचष्टे **इतश्चेति** । **समन्वितानि हि कार्याणीति** । सुखादिजनकानि वनितादिकार्यभूतवस्तूनीत्यर्थः । **यद्रूपमिति** । यज्जननस्वभावं प्राप्तानि तानि तज्जननस्वभावकाव्यक्तानीत्यर्थः । किञ्चिद्वनितादिवस्तु कस्यचित्स्वानुभवितुः पुंसः सुखहेतुर्भवति तं प्रति सत्त्वगुणस्योद्रेकात् । कस्यचित्सपत्नीप्रभृतेर्दुःखहेतुर्जायते तं प्रति रजोगुणस्योद्रेकात् । कस्यचित् तत्कामुकादेर्मोहहेतुस्तमोगुणस्योद्रेकात् । इत्येवंरूपेण सुखादिहेतुभूतसत्त्वरजस्तमोनुरूपाव्यक्तकानि कार्याणि सर्वाणीति भावेनाह **तस्मादस्तीत्यादिना** । **साम्यावस्थेति** । अन्योन्यमिश्रणेन विना विद्यमानावस्थान्येव सत्त्वादीन्यव्यक्तं मूलकारणमित्यर्थः ।

गु०दी०— यथा कूर्मशरीरे सन्त्येव इत्यादिना यः कूर्माङ्गदृष्टान्त उक्तः स तावत् प्रकृतासङ्गत एव । घटादिकार्यं हि मुद्गरप्रहारादिना चूर्णीभवत्प्रत्यक्षेणोपलभ्यते । अतस्तस्य कारणात्मता नाम कारणमृदाकारमात्रस्योर्वीरिततैव । न तु घटस्याप्यविनष्टाकारस्यैव तदन्तःप्रवेशोऽपि । एवं पृथिव्या अपि सङ्कर्षणमुखाग्निना दाहेन भस्मीभावे सति तन्मात्रामात्रमुर्वीरितं भवति । एवं मूलप्रकृतिपर्यन्तं सर्वस्य कार्यस्य स्वस्वकारणे नाश एव । न त्वविनष्टकार्यरूपस्यैव कारणेषु प्रवेशः । कूर्माङ्गानि तु कूर्मशरीरेणैव सहोत्पन्नानि मध्येमध्येऽनुत्पत्तिमन्त्येव बहिर्निःसरन्ति । पुनरविनष्टान्येव चान्तः प्रविशन्ति । अतः क्वायं दृष्टान्तः क्व च ते दार्ष्टान्तिकम् । **सुखदुःखमोहसमन्वितानि हि कार्याणि** इति यदुक्तं तदपि चिन्त्यम् । देहिनां देहान्तर्वर्तिमनोमात्रस्य दुःखादिरूपत्वसत्त्वेऽपि महदादिपृथिव्यन्तकार्यराशेः सुखदुःखादिरूपता न ते मते नाप्यस्मन्मते । अत इदमप्यसिद्धेनैवासिद्धसाधनमिति ।

यादु०— कारिकायां साध्यानुक्तेस्तत्पूरयति **मूलकारणमस्त्यव्यक्तमिति** । तत्र तावत्कार्यकारणविभागादिति हेतुमुपपादयति **यथा कूर्मशरीर इत्यादिना** । तस्मिन्नेवाव्यक्तीभवन्तीत्येतद्वक्ष्यमाणविभागरूपहेतौ दृष्टान्तकथनायेति ज्ञातव्यम् । अत्र विभागशब्देनाभिव्यक्तिरेव विवक्षिता । सन्त्येवेत्येतदभिव्यक्त्युपपादनाय । असत्त्वे उत्पत्तेरेव प्रसङ्गेनाभिव्यक्तेरसम्भवात् । नन्वयं विभागः प्रलयकाले कस्मान्न भवतीत्यत उक्तं **प्रतिसर्ग इति** । सर्गकाल इत्यर्थः । तथा च सर्गकालो विभागकारणमतो नोक्तदोष इति भावः । एवमविभागेऽपि प्रलयकालः कारणमिति द्रष्टव्यम् । अविभागाख्यं हेतुमुपपादयति **मृत्पिण्डमित्यादिना** । नन्वेवं कार्यस्य महदादेरेवाव्यक्ततापत्तिर्न प्रधानस्येत्यत आह **तत्कारणरूपमेवेति** । सत्यं प्रलये कार्यमेवाव्यक्तं भवतीति

तथाऽपि तद्यत्राव्यक्तं तत्कारणस्वरूपमेवानभिव्यक्तकार्याभेदेनाव्यक्तमुच्यते । अतः प्रधानस्याव्यक्ततोपपद्यत इति भावः । तदिदमुक्तं **कार्यमपेक्ष्येति** । कार्यस्याव्यक्तत्वात् तदभिन्नं कारणमव्यक्तमित्यर्थः । स्वापेक्षया तन्मात्राण्यव्यक्तयन्तीत्यादिकमपि स्वेषामव्यक्तत्वात् स्वाभिन्नं तन्मात्रादिकमव्यक्तयन्तीति व्याख्येयम् । सोऽयमविभागः प्रकृतावित्यत्र साक्षात्पारम्पर्येणेति शेषः । अत्राविभागोऽनभिव्यक्तिः । हेतुद्वयं निगमयति **तस्मात्कारण इति** । कारण इति प्रकृताभिप्रायेणैवोक्तम् । कूर्मशरीरस्य स्वाङ्गाकारणत्वात् । ततश्च व्यक्त्यव्यक्ती हि पूर्वं कुत्रचित् सत एव पदार्थस्य कूर्माङ्गादौ दृष्टे नासतः, अतो महदादेरपि कार्यस्य व्यक्त्यव्यक्ती कुत्रचित् सत एव वक्तव्ये इति ताभ्यां सन्महदादिसकलकार्यगर्भमेकं वस्तु कूर्मशरीरस्थानीयं सिद्ध्यति तदेवाव्यक्तमित्यर्थः ।

अव्यक्तत्वादन्येति । सत्कार्यपक्षे कार्यस्याव्यक्तताया अन्यस्यां शक्तौ मानाभावात् । अत एव सिकताभ्यस्तिलानां तैलोपादानानां भेद उपपद्यते । यदेष्वेव चैतदस्त्यनागतावस्थं न सिकतास्विति भावः । **महत एव (परमा)व्यक्तत्वमिति** । उक्तहेतुभिर्महत एवाव्यक्तत्वं साध्यतां किं ततः परेणाव्यक्तेनेत्यर्थः । भेदानामित्यस्य व्याख्यानं **महदादीनामिति** । परिमाणादित्यस्य परिमितत्वादित्यर्थमभिप्रेत्याह **अव्यापकत्वादिति** । **घटादिवदिति** । घटादेः कार्यस्याव्यक्तावस्थैव मृदादिकारणमित्यङ्गीकारान्न साध्यवैकल्यमिति भावः । एवं च महदादीनां कारणं सिद्ध्यति तदेव व्यापकं प्रधानं परमाव्यक्तम् । परतराव्यक्तकल्पनायां च न मानमिति भावः ॥ **सुखदुःखमोहसमन्वितानीति** । सुखदुःखमोहस्वभावानीत्यर्थः । सुखादिहेतुतयाऽभिमतं वनितादिकं सुखादिस्वभावमेवेति तेषामाशयः । यथाऽऽहुः । 'प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते यथा मैत्रदारेषु पद्मावत्यां मैत्रस्य सुखं तत्कस्य हेतोः । तं प्रति तस्याः सत्त्वगुणसमुद्भवात् । तत्सपत्नीनां च दुःखं तत्कस्य हेतोः ताः प्रत्यस्या रजोगुणसमुद्भवात् । चैत्रस्य तु स्त्रैणस्य तामविन्दतो मोहो विषादः स कस्य हेतोः । तं प्रत्यस्यास्तमोगुणसमुद्भवात् । पद्मावत्यां च सर्वे भावा व्याख्याता' इति । अत्र पद्मावत्याः सुखादिस्वभावत्वं मैत्रादेस्तदनुभवोऽन्यथा न स्यादिति भावः । **सुखदुःखमोहात्मकानामिति** । यत्सुखात्मकं तत्सत्त्वं यद्दुःखात्मकं तद्रजो यन्मोहात्मकं तत्तम इत्यर्थः ।

वं०प०— तत् अव्यक्तस्वरूपम् । **कार्यस्याव्यक्तत्वादिति** । अव्यक्तकार्यगर्भितत्वादन्या नेत्यर्थः ।

कं०रा०— तन्मात्रादिति । विभज्यन्त इत्यन्वयः । एवमुत्तरत्रापि अव्यक्तमिति । न तु किञ्चिदपेक्ष्य प्रकृतिर्व्यक्तमित्यर्थः । भेदानामित्यस्य व्याख्यानमाह **महदादीनामिति** । **परिमाणात्** इत्यस्य व्यापकत्वादिति मूलानुमेति वेति । तथा च इदं नाचेतनवशं वस्तुत्वात् प्रतिपन्नवदिति प्रत्यनुमानेनैव प्रतिषिद्धस्य प्रधानस्वातन्त्र्यस्य मूलानुमासाधकानुमानेन सामर्थ्येन मूलानुमानवदित्यावृत्त्या योजनोपपत्तेः । प्रमाणमित्यध्याहारो न कार्य इति भावः ।

श्रीनिधि०— कार्यकारणविभागादिति । कार्यकारणयोर्विभाग इत्यर्थः । यद्वा कारणाद्विभागः कारणविभागः । कार्यस्य कारणविभागः कार्यकारणविभाग इत्यर्थः । **वैश्वरूप्यस्येति** । स्वार्थिकोऽण्-प्रत्ययः । विश्वरूपस्येत्यर्थः । वैश्वरूपस्येति च पाठः क्वचित् । तत्र स्वार्थे ष्यञ्प्रत्ययः । **अङ्गानि** पाद-रूपाणि । **कारणात्** तन्मात्रात् । विभज्यन्त इत्यनुवर्तते । एवमुत्तरत्रापि । एवं कारणात् कार्यस्य विभागमुपपाद्याविभागमुपपादयति **मृत्पिण्डं हेमपिण्डं वेत्यादिना** । मृत्पिण्डं हेमपिण्डं वा विशन्तो = व्यक्तीभवन्तीत्ययुक्तम् । मृत्पिण्डस्य वा हेमपिण्डस्य वा प्रत्यक्षसिद्धत्वात् तद्व्यतिरेकेण तदा घटकूटादे-रभावादित्यत आह **तत्कारणरूपमेवेति** । यद्यस्माद्विभज्यते तत्र संविशति च तत् तत्र प्रागेव सदिति सामान्यव्याप्तिप्रदर्शनार्थं **यथा कूर्मशरीरे सन्त्येवाङ्गानीति** दृष्टान्त उक्त इति ध्येयम् । **विभागाभ्यां** हेतुभ्यामिति भावः । **अव्यक्तकारणमस्तीति** । मूलकारणमित्यर्थः । **अव्यक्तकारणवत्वमिति** । अव्यक्त-लक्षणकारणवत्वमित्यर्थः । सुखदुःखसमन्वितानि कार्याणि महदादीनीति तत्प्रक्रियानुसारेण, **तत्स्वभावा-व्यक्तकानि** तद्रूपवत् कारणकानि । **यद्रूपमनुगतानीति** । नियमेन यद्रूपवन्तीत्यर्थः । **भेदानामिति** । भिन्नानां महदादीनामित्यर्थः । कार्यतामापन्नेष्वेव भेदो नाव्यक्ततातापन्नानामिति महदादिषु भेदशब्दः । भेदवतामित्यर्थः । अर्श आद्यजन्तः ।

शे०वा०— मा च भूदिति । मा भूच्चेति सम्बन्धः । किं तदनुमानमित्यतः तत्सङ्गृहरूपां कारिकां पठति **यथोक्तमिति** । **कारणमस्त्यव्यक्तमिति** । अनेन 'कारणमस्त्यव्यक्तं प्रवर्तते । त्रिगुणतः समुदायाच्चे'-त्युत्तरकारिकास्थस्य कारणमस्त्यव्यक्तमित्यस्य न केवलमुत्तरवाक्येऽन्वयः, किन्तु पूर्वकारिकायामपीति न साध्यानुक्तिदोष इत्युक्तं भवति । तत्र कारणकार्यविभागादिति हेतुमुपपादयितुं दृष्टान्तं तावदाह **यथा कूर्मेति** । तत इत्यतःपरं निस्सरन्तीति शेषः । **विभज्यन्त** इदं कूर्मशरीरमेतान्यस्याङ्गानीत्येवं प्रतीयन्ते सन्त्येवेत्यभिव्यक्त्युपपादनायोक्तम् । तस्मिन्नेवेत्यतःपरं पूर्वं निविशमानानीति शेषः । एवं दृष्टान्तमुक्त्वा विभागरूपहेतुमुपपादयति **एवमिति** । घटमुकुटादीनीत्यतःपरं सन्त्येवेति शेषः । कारणात् तन्मात्रादित्यादौ विभज्यन्त इति यथायोगं पूरणीयम् । विभज्यन्त इत्यत्र विभागशब्देनाभिव्यक्तिरभिप्रेता । तेन विभागस्य संयोगपूर्वकत्वेन संयोगस्याप्यङ्गीकर्तव्यत्वेन 'संयोगाप्राप्त्यभावाच्चे'ति संयोगाभावेन कार्यकारणयोरत्यन्ता-भेदसाधनमनुपपन्नमिति चोद्यानवकाशः । पारम्पर्येणेत्युपलक्षणम् । साक्षादित्यपि द्रष्टव्यम् । महत्तत्त्वस्य परमाव्यक्तात्पारम्पर्येण विभागाभावात् । तत्रापि पारम्पर्यस्य बाहुल्याभिप्रायेण साक्षादुपादानम् । साक्षात्त्वस्य क्वाचित्कत्वादुपलक्षणत्वेनोपादानमिति ध्येयम् । नन्वयं विभागः प्रलयकालेऽपि कस्मान्न भवतीत्यतः सर्गकालस्यापि विभागकारणत्वात् तदभावान्न प्रलये विभाग इत्याशयेनोक्तं **प्रतिसर्ग इति** । अविभागाख्यं हेतुमुपपादयति **मृत्पिण्डमित्यादिना** । प्रलयकालस्याप्यविभागकारणत्वान्न सृष्टिकालेऽपि तत्प्रसङ्गः । नन्वेवं कार्यस्य घटमुकुटादेरेवाव्यक्तता स्यान्न मृत्पिण्डादेरित्यत उक्तं **तत्कारणरूपमेवेति** । सत्यं प्रलये कार्यमेवा-व्यक्तं भवतीति तथाऽपि तद्यत्राव्यक्तं तत्कारणस्वरूपमेवानभिव्यक्तकार्याभेदेनाव्यक्तमुच्यत इति मृत्पिण्डादेरप्य-

व्यक्तत्वमुपपद्यते । तदिदमुक्तं **कार्यमपेक्ष्येति** । एवं स्वापेक्षया तन्मात्राण्यव्यक्तयन्तीत्यादिकमपि स्वेषामव्यक्तत्वात् स्वाभिन्नं तन्मात्रादिकमव्यक्तयन्तीति व्याख्येयम् । सोऽयमविभागः प्रकृतावित्यत्र साक्षात्पारम्पर्येणेति शेषः । अविभागश्चोक्तरीत्याऽनभिव्यक्तिः । वैश्वरूप्यस्येति स्वार्थिकः ष्यञित्यभिप्रेत्याह **नानारूपस्येति** । हेतुद्वयं निगमयति **तस्मादिति** ।

अव्यक्तत्वादन्येति । सत्कार्यपक्षे कार्याव्यक्तताया अन्यस्यां शक्तौ प्रमाणाभावादयमेव हि सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमनागतावस्थं न सिकतास्विति भावः । **महत एव परमाव्यक्तत्वमिति** । उक्तहेतूनां महत एवाव्यक्तत्वसाधकत्वसम्भवान्न ततः परेणाव्यक्तेन किमपि कृत्यमिति भावः । भेदानामित्यस्यार्थो **महदादीनामेवेति** । परिमाणादित्यस्य परिमितत्वादित्यर्थमभिप्रेत्याह **अव्यापकत्वादिति** । **घटादिवदिति** । अत्रायं प्रयोगः । विवादाध्यासिता भेदा अव्यक्तकारणवन्तः परिमितत्वात् घटादिवत् । न च दृष्टान्तासङ्गतिः । घटादयो हि परिमिता मृदाद्यव्यक्तकारणा दृष्टाः । कार्यस्याव्यक्तावस्थाया एव सर्वत्र कारणत्वोक्तेः । यच्च महतः कारणं तत्परमाव्यक्तम् । परतराव्यक्तकल्पनायां प्रमाणाभावादिति भावः । भिन्नानां सरूपता(सिद्धावपि जगतः कथं सत्त्वाद्यात्मकप्रधानारब्धत्व)समन्वय इत्यभिप्रेत्य सरूपतामुपदर्शयति **सुखेति** । सुखदुःखमोहस्वभावानीत्यर्थः । सुखदुःखमोहसमन्विततया बुद्ध्यादीनां प्रतिभासात् । न च सुखं घट इत्याद्यनुपलम्भान्न तदात्मत्वेन अनुगतिरिति वाच्यम् । घटविषया हि बुद्धिः तमनुकूलं प्रतिकूलं वा गोचरयतीत्यनुवृत्त्युपपत्तेरिति भावः । इयमत्र परेषां रीतिः । प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते । यथा मैत्रदारेषु रूपयौवनकुलशीलसम्पन्ना पद्मावती नाम काचन स्त्री स्वामिनं मैत्रं सुखीकरोति । तत्कस्य हेतोः तं प्रति तस्याः सुखस्वरूपसमुद्भवात् । सैव स्त्री सपत्नीं दुःखीकरोति । तत्कस्य हेतोः तां प्रति तस्या दुःखस्वरूपसमुद्भवात् । चैत्रस्य तु स्त्रैणस्य तामविन्दतो मोहो विषादः । कस्य हेतोः तं प्रति तस्या विषादस्वरूपसमुद्भवात् । पद्मावत्या च सर्वे पदार्था व्याख्याता इति सिद्धं सर्वपदार्थानां सुखदुःखमोहात्मकत्वमिति । ननु चैतावता सुखदुःखाद्यात्मकवस्त्वारब्धत्वसिद्धिरित्याशङ्कामुपसंहारव्याजेन परिहरति **तस्मादिति** । **सुखदुःखमोहात्मकानामिति** । यत्सुखहेतुः तत्सुखात्मकं सत्त्वं, यद्दुःखहेतुः तद्दुःखात्मकं रजः, यन्मोहहेतुः तन्मोहात्मकं तमः इत्येवं सुखदुःखमोहात्मकानां सत्त्वरजस्तमसामित्यर्थः । **साम्यावस्थेति** । गुणप्रधानभावं विहाय स्वरूपेणावस्थानमित्यर्थः ।

वा०र०— मा भूदिति । पूर्वोक्तक्रियायाः क्रियान्तरसमुच्चयाय मा भूच्चेति वाच्यं इत्यतः चशब्दस्य तथा सम्बन्धाङ्गीकारात् नानुपपत्तिरित्याशयेनाह **मा भूच्चेति सम्बन्ध इति** । वस्तुतस्तु माङ् योगो हि साक्षात् माङ् उत्तरप्रयोगः । मध्ये चशब्दप्रयोगे च साक्षात् तद्योगाभावापत्त्या लुङनुपपत्तिः इत्यतः चशब्दं भिन्नक्रमतया योजयति । मा भूच्चेति इति योजनीयम् । कारणमस्त्यव्यक्तं इत्यंशस्य कारिकायामभावात् साध्यानुक्तिः इत्यतः मूले विशेषाणां महदादीनां कारणमस्त्यव्यक्तं इति भामत्यनुसारेण तत्पूरणं कृतम् ।

तच्छेषपूरणताभ्रान्तिवारणाय मध्येदीपिकान्यायेन उत्तरटीकाकारिकाप्रथमभागगतं उत्तरत्रेव पूर्वत्रापि सम्बन्धार्हमिति दर्शयति **अनेनेति** । भामत्यनुसारेण मूलं प्रवृत्तमित्यतो मध्ये मध्ये स्पष्टत्वाद्याशयेन त्यक्तांशं भामतिगतं स्वयमाह **उपपादयितुमिति** । कारणकार्यभावापन्ना प्रकृत्यादि घटाद्यन्तपदार्थेष्विति शेषः । एवमुपपादयतीत्युत्तरत्रापि । ततः इत्यतःपरमित्यादिना निःसरन्तीति शेषपूरणेन च विभिज्यते इत्येतत् विज्यन्ते चेति व्याख्येयमिति सूचितं भवति । तथा च सन्त्येव निःसरन्तीति निःसृतानि चाविर्भवतीत्यपि भामत्यनुसारेण ज्ञेयम् । सत्ये चेति शेष इति सन्त्येवाविर्भवन्तीति शेष इत्यर्थः । भामत्यां तथैवोक्तेः । प्रकृतोपयोगाच्च । विभज्यन्ते इत्यस्य विभज्यन्ते चेत्यर्थः इत्यप्यनेनोक्तं भवति इति । **विभज्यन्ते** विभज्यते इतीति । उपलक्षणं चैतत् । आविर्भवन्ति आविर्भवतीत्यपि यथायोग्यं पूरणीयं इत्यपि ज्ञेयम् । कुतः साक्षात् इत्यनुक्तं द्रष्टव्यं भामत्यां तथैवोक्तेरित्यभिप्रेत्य तत्रापि तदुक्तिः कुतः इत्यत आह **महत्तत्त्वस्येति** । तथा च पारम्पर्यस्य सर्वत्राभावात् सर्वसङ्ग्रहाय साक्षात् इत्यपि वक्तव्यमित्यर्थः । यद्येवं पारम्पर्यवत् साक्षात्वमपि वक्तव्यं तर्हि तस्योपलक्षणया पारम्पर्यस्य तु मुखत उपादानमिति वैषम्याश्रयणं कुतः इत्यतः तत्र निमित्तं दर्शयति **तत्रापि पारम्पर्यस्येति** । साक्षाद्वचनवृत्त्येत्यर्थः । पारम्पर्येण इत्यादौ अव्युत्पन्नात् परम्पराशब्दात् स्वार्थे ष्यञि पारम्पर्यशब्दः इत्यादिना व्याप्त्युक्तरीत्या ज्ञेयम् । प्रतिसर्ग इत्येतत् मूलपदं पूर्वोपयोगात् पूर्वशेष इत्याशयेन तत्कृत्यमाह **नन्वयं विभाग इति** । प्रतिसर्ग इत्येतत् पूर्वशेषभूतमपि मृत्पिण्डं इति उत्तरत्रापि सम्बध्यते । अनुवर्तते इति भावेन तत्प्रयोजनमाह **प्रलयकालस्यापीति** । अनेन पूर्ववाक्ये प्रतिसर्गः इत्यस्य तत्तत्सर्गः इत्यर्थः । अत्र तु सर्गविपरीतः प्रलयः । प्रतिसर्गः इत्यपि सूचितं भवति । प्रतिसर्गपदानुसारेणोत्तरवाक्ये प्रतिप्रलयः इत्यपि पूरणीयमित्याशयेनाह **प्रलयेतीति वा** । विभागे साक्षात् पारम्पर्यवत् अविभागेऽपि साक्षात् पारम्पर्यस्य स्पष्टतया भामत्यामनुक्तिरिति व्यञ्जयन् आह **साक्षात्पारम्पर्येणेति शेष इति** । **स्वार्थिकष्यञिति** । वर्तमानसामीप्य इति सूत्रे चत्वारो वर्णा चातुर्वर्ण्यं इत्यादिरूपे चातुर्वर्ण्यादिसिद्ध्यर्थकस्वाधिकष्यञ्ज्ञापनार्थं समीप एव सामीप्यमिति स्वार्थिकष्यञन्तसामीप्यशब्दप्रयोगेण तज्ज्ञापकात् प्रकृतेऽपि स्वार्थिकष्यञिति भावः । न हि सत्कार्येति भामत्यनुसारेणाह **सत्कार्यपक्ष इति** । कार्याव्यक्तताया: इत्यादेः कार्यव्यक्तताव्यतिरिक्तशक्ताविति्यर्थः । अर्थो महदादीनामितीति पाठः । एवेत्यधिकं लेखकप्रयुक्तम् । तर्हि महत् कारणाख्यपराव्यक्तात् परतराव्यक्तमप्यस्ति किमित्यतः पराव्यक्तसद्भावे उक्तवक्ष्यमाणवत् अन्यत्र तदभावात् न तदङ्गीकारप्रसक्तिः इत्याह **परतरेति** । मूले शेषपूरणं सूचयन् समन्वयात् इत्येतदर्थत्वं स्पष्टयति **समन्विततयेत्यादि** । सत्त्वं लघुप्रकाशकं इत्येतत् कारिकाव्याख्यानरूपं तत् यथा एकैव स्त्रीरूपयौवना इत्यादि भामत्यनुसारेण रीतिमाह **इयमत्रेति** । सुखदुःखमोहात्मकत्वोपपादनकथने टीकान्तरमपि अनुसृत्य भामति विशदीकृता । **कथं सत्त्वाद्यात्मकतेति** । तत्सत्त्वाद्यात्मकं आरम्भकं प्रधानमिति सिद्धिः कथमित्यर्थः । सर्वभावानां प्रत्येकत्रैगुण्यवत्त्वेनानुभवानुसारेण तत्कारणं त्रिगुणस्वभावं इति सामान्यतो यद्यपि सिद्ध्यति तथापि तत्प्रधानमेवेति कुतः सिद्ध्यतीति यावत् । **यत्सुखहेतुरित्यादि** । एतच्च प्रागेवास्माभिः उपपादितम् । प्रीत्यप्रीतिविषादाकाः प्रकाशप्रवृत्तिनियमार्थाः इत्येतत् कारिकाव्याख्याने प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः

इत्यादिना स्वरूपेणावस्थानसाधनमिति । प्रलयकालीनतादृशावस्थाविशिष्ट एव प्रधानमिति नामेत्यादि प्रागेव प्रतिपादितमिति भावः ।

स०व्र०— भेदानां परिमाणादिति । 'असदकरणादि'त्यादिना कार्यस्य सत्त्वं सिद्धम् । पूर्वत्र विद्यमानमस्त्यव्यक्तमित्यनुवर्तते । 'भेदानां परिमाणादि'त्यनेन विद्यमानस्य भेदानामित्यस्य तन्त्रेण योजना । तथा च भेदानां महदादिकार्याणाम् अस्त्यव्यक्तम् । कुत इत्यतो हेतुमाह 'कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य' इति । तत्र कारणकार्यविभागादिति हेतुं सदृष्टान्तमुपपादयति **यथा कूर्मेत्यादिना** । **मृत्पिण्डाद्वा कार्याणीति** । दृष्टान्ते विद्यमानस्य 'सन्त्येवे'त्यस्याप्यावृत्तिरिति ज्ञातव्यम् । तथा च सन्त्येव कार्याणीत्यर्थः । **विभज्यन्त इति** । अत्र विभागशब्देन अभिव्यक्तिरभिप्रेता । तेन विभागस्य संयोगपूर्वकत्वेन संयोगस्याप्यङ्गीकर्तव्यत्वेन संयोगप्राप्त्यभावाच्चेति, संयोगाभावेन कार्यकारणयोरत्यन्ताभेदसाधनमनुपपन्नमिति चोद्यानवकाशः । **पारम्पर्येणेति** । उपलक्षणमेतत् साक्षादित्यपि द्रष्टव्यम् । महतः परमव्यक्तात् पारम्पर्येण विभागाभावात् । पारम्पर्यस्य स्वशब्देनोपादानं तु बहुत्वाभिप्रायेणेति बोध्यम् । प्रतिसर्गे इत्यस्य विश्वस्य कार्यस्य विभाग इति पूर्वेण सम्बन्धः । न तूत्तरत्र । **घटमुकुटादिकार्यमिति** । सर्वत्र कार्यमपेक्ष्यैव तत्कारणस्याव्यक्तत्वं ज्ञातव्यमित्यभिप्रेत्य कार्यमित्युक्तम् । क्वचित्पुस्तके घटमुकुटादिकमपेक्ष्येत्येव पाठः । तस्मिन्पक्षे यथास्थित एवार्थः । **वैश्वरूप्यस्येति** । विश्वरूपमेव वैश्वरूप्यमिति 'स्वार्थिकः ष्यञ्' इत्युक्तं भवति । **शक्तिश्चेति** । न हि सत्कार्यपक्षे कार्यस्याव्यक्तताया अन्यस्यां शक्तावस्ति प्रमाणमिति भावः । **कार्याणीति** । बुद्ध्यादीनीत्यर्थः । परेण तथैव व्याख्यातत्वादिति द्रष्टव्यम् । **साम्यावस्थेति** । तल्लक्षणमव्यक्तमित्यर्थः ।

विट्ठल०— कारिकायां साधनानुक्तेस्तत्पूरयति **मूलकारणमस्त्यव्यक्तमिति** । तत्र तावत्कार्यकारणविभागादिति हेतुमुपपादयति **यथा कूर्मशरीर इति** । विभज्यन्त इत्यर्थः । तस्मिन्नेवाव्यक्तीभवन्तीत्येतद्वक्ष्यमाणाविभागरूपहेतौ दृष्टान्तकथनायेति ज्ञेयम् । **घटमुकुटादीनि** इत्यत्र सन्त्येवेति ग्राह्यम् । अभिव्यक्त्युपपादनाय सर्वत्र सन्त्येवेत्युक्त्यसत्त्वे उत्पत्तेरेव प्रसङ्गेनाभिव्यक्तेरसम्भवात् । कारणात् तन्मात्रादित्यादौ प्रविभज्यन्त इत्यनुवर्तते । **सोऽयं कारणात्** इत्यनेन कार्यकारणविभागादित्येतत्कार्यस्य सर्वस्य कारणात् प्रविभाग इति व्याख्यातं भवति । **प्रतिसर्ग** इत्यस्य प्रतिसृष्टिकाल इत्यर्थः । एतेन अयं विभागः प्रलयकाले कुतो न भवतीति परास्तम् । सर्गकालस्य निमित्तकारणत्वेन प्रलये तदभावादिति हेतुमुपपादयति **मृत्पिण्ड इत्यादिना** । नन्वेवं कार्यस्यैव कारणे प्रवेशेनाव्यक्तीभावे एवं परम्परया कार्यस्य महदादेरेवाव्यक्तत्वमापन्नं न तु प्रधानस्येत्यतः कार्यकारणयोरभेदात्कार्यात्मनाभिव्यक्तप्रधानादेः कार्यस्य कारणे प्रवेशेनानभिव्यक्तकार्यत्वमपेक्ष्याव्यक्तत्वमुच्यत इत्याशयेनानभिव्यक्तघटाद्यपेक्षयैव पृथिव्यादेरव्यक्तत्वमित्याह **तत्कारणरूपमिति** । **स्वापेक्षयेति** । स्वेषामव्यक्तत्यपेक्षया स्वाभिन्नं स्वकारणं तन्मात्रादिकमव्यक्तयन्तीत्यर्थः । **सा सर्वकार्याणामिति** । सैव प्रकृतिः सर्वकार्यात्मकत्वात् सर्वकार्याणामव्यक्तत्वमपेक्ष्य अव्यक्तमेवेत्युच्यते ।

स्वस्यान्यत्रप्रवेशाभावान्न महदादिवदित्यर्थः । कारिकायाः वैश्वरूप्यस्य नानारूपस्य घटमकुटाद्यारभ्य महत्यर्थे तस्य कार्यस्य प्रकृताववविभागादव्यक्तत्वादिति योजनां सूचयति **सोऽयमविभाग इति** । विभागादविभागादिति हेतुद्वयमध्याहृतसाध्यसम्बन्धं दर्शयन्नुपसंहरति **तस्मादिति** । ततश्च कूर्मशरीरस्य स्वाङ्गकारणत्वं यथा तथा महदादिकार्यजातस्यापीति व्यक्तव्यक्तत्यास्पदेन केनचिद्भाव्यं तदेव परमाव्यक्तमिति भावः । एतेनाशेष-कार्यप्रविभागः कुतश्चिज्जातः विभागत्वात् कूर्माङ्गविभागवत् अविभागोऽनभिव्यक्तिः किञ्चिद्गतः अविभागत्वात् कूर्माङ्गाविभागवदिति प्रयोगौ सूचितौ । **इतश्चेति** । अस्त्यव्यक्तमिति योज्यम् । **प्रवर्तत इति** । व्यज्यत इत्यर्थः । सा शक्तिरव्यक्तिमत्कार्यत्वमेव ततश्चाविभागादित्यनेनैवैतल्लाभात्पुनः किमुच्यत इत्यतः कूर्मश्च व्यञ्जकशक्तिरेवान्यैव कारणशक्तिरित्याह **शक्तिश्चेति** । एतेन महदादयः स्वव्यञ्जकत्वशक्तिमत्कारणसापेक्षाः कार्यत्वात् कूर्माङ्गवदित्युक्तं भवति । तर्हि महत एव परमव्यक्तत्वं साध्यतां किं ततः परेणाव्यक्तेनेति शङ्कते **अस्तु तर्हीति** । भिद्यन्त इति व्युत्पत्त्या भेदानां महदादीनां परिमाणात्परिमितत्वादिति कारिकार्थ इत्यभिप्रेत्याह **महदादीनामिति** । **घटादिवदिति** । यथा परिमितघटादेर्व्यक्तत्वव्यक्तिदशापन्नमृत्पिण्डादिकारणत्वं तथेत्यर्थः । एवं च परिमितमहदादिकारणभूतं कारणान्तरशून्यं यद्व्यापकं तदेव परमाव्यक्तमिति भावः । **समन्वयात्** इत्येतत्सुखदुःखमोहानां समन्वयात्सम्बन्धादित्यर्थः इत्याशयेन व्याचष्टे **इतश्च समन्वयादिति** । **यानि च यद्रूपमनुगतानीति** । यानि कार्याणि यद्रूपयुक्तानि तानि तत्प्रकारकस्वभावोपेतकारणकानीत्यर्थः । **मृद्धेम-पिण्डाद्यव्यक्तका इति** । मृत्वहेमत्वरूपस्वभावोपेतकारणका इत्यर्थः । **सुखदुःखमोहात्मकानामिति** । यत्सुखात्मकं तत्सत्त्वम् । यद्दुःखात्मकं तद्रजः यन्मोहात्मकं तत्तमः । **साम्यावस्थेति** । अन्यतरस्या-नभिव्यक्ततया विद्यमानावस्थेत्यर्थः ।

चषकः— मा च भूदिति । न माङ्योग इत्यडभावं ध्वनयितुं चोऽन्तरा कृतः । श्रुतानुपूर्व्याः सवर्णदीर्घभ्रान्तिव्युदासकत्वाभावात् । कारिकोत्तरदलं विवृण्वानस्तत्र साध्यबोधकपदसमभिव्याहारविरहेण तत्पूरयति **मूलेति** । आद्यहेतुविभक्त्यन्तं तावद्व्याकुरुते **यथेत्यादिकविभाग इत्यन्तेन** । सन्त्येवेत्यस्तेर्न रूपं किन्तु सदेः क्विबन्तात् क्लीबे प्रथमबहुवचनस्येति विद्यमानानीत्यर्थकम् । **विभज्यन्ते** विविक्ततया दृश्यन्ते । **तस्मिन्नेवेति** । अनुषञ्जनीयेन थालन्तेनान्वेति । इदं चाभिधास्यमानाविभागरूपहेतौ निदर्शन-प्रदर्शनायेति ज्ञेयम् । **तन्मात्रात्** गन्धरूपरसादितः । विभज्यन्त इत्यस्योत्तरत्रानुषङ्गोऽवसेयः । **विभागः** उत्पत्तिः । विभागे सर्गकालोऽविभागे प्रलयकालो हेतुरिति ध्येयम् । द्वितीयहेतुविभक्त्यन्तं व्याख्याति **मृत्पिण्ड इति** । शक्तितः प्रवृत्तेरिति व्याकरोति **कारणशक्तितो हीति** ।

॥ इति विविधानुमानानि ॥

* * *

॥ अथ एतेषामनुमानानां साध्यसम्बन्धश्च ॥

४७ सु०— यद्यप्येतान्यनुमानान्यव्यक्तस्वरूपं साधयन्ति तथाऽपि महदादिकारणतयैव तदेतैः सिद्ध्यतीति ।

परि०— कारणतयैवेति । कार्याणामव्यक्तावस्था कारणमेवेत्यङ्गीकारादिति भावः ।

यादु०— यद्यप्येतानीति । विभागाविभागाभ्यामुक्तदिशा कूर्मशरीरादिवदनभिव्यक्तकार्यावस्थमेकं वस्तु सिद्ध्यतीत्येव न तु तत्कारणमपीति । शक्तितः प्रवृत्त्याऽपि कार्यस्याव्यक्तावस्थैव सिद्ध्यति न त्वव्यक्तं कारणमिति । अव्यापकत्वेनाप्यव्यापकस्य कार्यस्यैकत्र प्रवेशेन कूर्माङ्गवत् अनभिव्यक्ततासम्भवान्महदाद्यव्यापकवस्तुप्रवेशाधिकरणमेकं वस्तु सिद्ध्यति न तु तत्कारणताऽपि । एवं समन्वयेनापि यानि यद्रूपानुगतानि तानि तत्स्वभावाव्यक्तकानीति व्याप्तिबलात् तत्स्वभावमव्यक्तमेव सिद्ध्यति न तु तत्कारणताऽपीति भावः । **तथाऽपीति** । कार्याणामव्यक्तावस्था कारणमेवेति साङ्ख्यैरङ्गीकारादिति भावः ।

शे०वा०— यद्यपीति । विभागाविभागादिनोक्तरीत्या कूर्मशरीरादिवत् अनभिव्यक्तकार्यावस्थैकवस्तुमात्रसिद्धिरिति भावः । **तथाऽपीति** । कार्याणामव्यक्तावस्था कारणमेवेति साङ्ख्यैरङ्गीकारादिति भावः ।

वा०र०— कार्याणामिति । कार्याणां या व्यक्तावस्था सैव कारणमिति स्वीकारादित्यर्थः ।

विट्ठल०— यद्यप्येतानीति । विभागाद्यनुमानानि कूर्मशरीरादितुल्यमनभिव्यक्तकार्यावस्थमेकं वस्तु साधयति । न तु तस्य सर्वकारणत्वं तथाप्यनभिव्यक्तकार्यावस्थस्यैव कारणत्वमिति साङ्ख्यैरङ्गीकारात् तत्सिद्ध्यन् महदादिकारणतयैव सिद्ध्यतीत्यर्थः ।

॥ इति एतेषामनुमानानां साध्यसम्बन्धश्च ॥

* * *

॥ अथ एतेषामनुमानानां (मूलोक्तसाधारणदोषैः) दूषणम् (सत्प्रतिपक्षत्वम्) ॥

४८ सु०— अत्र वक्तव्यम् । किमेतैरनुमानैर्जगदुपादानतामात्रेणाव्यक्तं सिद्ध्यति, उत स्वातन्त्र्येणा(पीति)पि । आद्ये सिद्धसाधनम्, अस्माभिरपि विश्वोपादानस्य प्रधानस्याभ्युपगतत्वात्, 'शरीररूपके'ति ह्युक्तम् । द्वितीयं निराकर्तुं सूत्रम् रचनानुपपत्तेश्च नानुमानमिति । तद्व्याचष्टे इदमिति ।

अनु०— इदं नाचेतनवशं वस्तुत्वात्प्रतिपन्नवत् ।
इत्येव प्रतिषिद्धस्य केन मूलानुमा भवेत् ॥

महदादिकार्यमित्यर्थः । अचेतनवशं स्वतन्त्राचेतनाधीनोत्पत्तिकम् । **प्रतिपन्नवत्** । प्रधानवत् । आस्तां तावद्दूषणान्तरम् **इति** प्रत्यनुमानेन **एव प्रतिषिद्धस्य** प्रधानस्वातन्त्र्यस्य **मूलानुमा** साधिकानुमा **केन** सामर्थ्येन **भवेत्** प्रमाणमिति शेषः ।

मूलानुमेति वाऽऽवर्तनीयम् । **किम्** आक्षेपे । अकार्यत्वमत्रोपाधिरिति चेन्न; पटादौ साध्याव्याप्तेः, पटादेः कुविन्दाद्यधिष्ठिततन्त्वादिकार्यत्वस्यान्वयव्यतिरेकाभ्यामुपलम्भात् ।

परि०— नन्वव्यक्तादिशब्दानामपि ब्रह्मणि समन्वयात् कथमेवमुक्तिरित्यत आह **शरीररूपकेति** । शरीरस्य रूपमिव भगवत्तन्त्रं रूपं यस्येति व्युत्पत्त्या शरीररूपके शरीरवद्विद्यमाने प्रधाने विन्यस्तस्य हरेरव्यक्तशब्देन गृहीतेरित्यानुमानिकपादे अव्यक्तपदेन प्रधानमपि तच्छब्दमुख्यार्थ-भगवत्सम्बन्धाद्गृह्यत इति ह्युक्तमित्यर्थः । एवकारतात्पर्यं व्यञ्जयन्नेवोत्तरार्धं व्याचष्टे **आस्तामिति** । **इति वा आवर्तनीयमिति** । तथा च **मूलानुमा** साधकानुमा । **केन** सामर्थ्येन **मूलानुमा** मूल-भूतानुमा अव्यक्तानुमापिका स्यादिति तदर्थ इति भावः । **अत्रेति** । महदादिकं, स्वतन्त्रा-चेतनाधीनोत्पत्तिकं न, वस्तुत्वात् प्रधानवदिति प्रयोग इत्यर्थः ।

यादु०— ननु वैदिकानामव्यक्तादिशब्दानां भगवत्परत्वस्य साधितत्वात् कथमप्रामाणिकस्य प्रधानस्य विश्वोपादानत्वाभ्युपगम इत्यत आह **शरीररूपकेति** । सत्यं परमात्मन एवाव्यक्तादिशब्दा इति तथाऽपि तत्तन्त्रत्वेन तच्छरीररूपत्वादितरस्याप्यव्यक्तादिशब्दा इति प्रथमाध्यायस्य चतुर्थपादे उक्तम्, अतो नाप्रामाणिकं प्रधानमिति भावः ।

वं०प०— **आवर्तनीयमिति** । तथा च **मूलानुमा** साधकानुमा । **कथं मूलानुमा** व्याप्तिपक्ष-धर्मतामूलकानुमा निर्दोषोपपत्तिरूपाऽनुमानरूपं प्रमाणमिति यावत् । **कथं** भवेदित्यर्थः । ननु पटादावपि स्वतन्त्राचेतनतन्त्वाद्यधीनोत्पत्तिकत्वेन साध्यमेव नास्तीति चेत् तत्राह **पटादेरिति** । **अधिष्ठितेति** । प्रेरितेत्यर्थः ।

कं०रा०— **केन मूलानुमा भवेत्** इत्यत्र किंशब्दस्य परिहारादर्शनेन प्रकृत्यसङ्गत्या च प्रश्नार्थत्वा-योगादाक्षेपार्थः स इत्याह **किमिति** । **अकार्यत्वमिति** । स्वतन्त्राचेतनाधीनोत्पत्तिकत्वाभावरूपसाध्यवति प्रधाने

अकार्यत्वस्य सत्त्वात्पक्षीकृते महदादौ वा सत्त्वात्तस्योपाधित्वमिति भावः । **उपलम्भादिति** । तथा च साध्यवति पटादावकार्यत्वस्याभावात् साध्यव्याप्तिरिति भावः ।

श्रीनिधि०— स्वतन्त्राचेतनाधीनोत्पत्तिकमिति । स्वतन्त्रपदं विहाय उक्तबाधः स्यात् अस्माभिरपि प्रधानजन्यत्वाङ्गीकारात् अतः **स्वतन्त्रेति** । उद्देश्यसिद्ध्यर्थमुत्पत्तिपदम् । **साधिकानुमा** साधकत्वाभिमतानुमा । **केन सामर्थ्येनेति** । अप्रतिपक्षत्वादिरूपेणेत्यर्थः । व्याप्तिवत् तत्प्रयोजकस्यापि सामर्थ्यत्वादिति भावः । **मूलानुमेति वाऽऽवर्तनीयमिति** । साधकानुमेत्यर्थः ।

शे०वा०— ननु च सिद्धसाधनत्वेनैव भेदानां परिमाणादिति शङ्कितानुमानस्य निराससिद्धेर्न सूत्रेण प्रयोजनमिति किं तद्व्याख्यानपरोत्तरभाष्येणेत्याशङ्क्य, कारणत्वमात्रेण प्रधानस्योक्तानुमानैः सिद्धिपक्षे तत्प्रसक्तावपि स्वतन्त्रकारणत्वेनोक्तानुमानैः तत्सिद्धिपक्षे तदप्रसङ्गात् तन्निरासकतया सूत्रस्यार्थवत्त्वात् तद्व्याख्यानरूपोत्तरभाष्यं योजयितुं विकल्पप्रकाशप्रदर्शनपूर्वकमाद्यं पक्षं बहिरेव दूषयति **अत्र वक्तव्यमिति** । कुतः सूत्रकारीयप्रधानाद्यभ्युपगमसिद्धिः इत्यतस्तद्वाक्यादेवेत्यभिप्रेत्य तदुपन्यस्यति **शरीररूपकेति ह्युक्तमिति** । **व्याचष्ट इति** । तात्पर्यत इति शेषः । अचेतनवशात्वस्य सिद्धान्तेऽप्यङ्गीकारात् तदभावसाधनेऽपसिद्धान्तो बाधश्चेत्यत आह **स्वतन्त्रेति** । इत्येवेत्येवशब्दस्य व्यर्थत्वविरुद्धार्थत्वे निराकर्तुं तत्तात्पर्यमाह **आस्तामिति** । अत्र पक्षे प्रमाणमिति शेषपूरणं भवतीत्यपरितोषादाह **मूलानुमेति वेति** । **अकार्यत्वमिति** । उक्तसाध्यवति प्रधानेऽकार्यत्वसत्त्वेन साध्यव्यापकत्वात् साधनवति च महदादौ तदभावेन साधनाव्यापकत्वाच्चेति भावः । उक्तसाध्यवत्यपि पटादावकार्यत्वाभावान्न साध्यव्यापकतेत्यनुपाधित्वमित्याह **पटादाविति** । ननु च तत्रोक्तरूपसाध्यस्यैवासम्मतेर्न तदव्यापकत्वमित्यत आह **पटादेरिति** । **अन्वयव्यतिरेकाभ्यामिति** । तत्सधीचीनप्रत्यक्षेणेत्यर्थः ।

वा०र०— कारणत्वमात्रेणेति । प्रधानस्य कारणत्वमात्ररूपेणानुमानैः सिद्धिपक्षे इत्यर्थः । **तत्प्रसक्तावपीति** । सिद्धसाधनत्वप्रसङ्गेऽपीत्यर्थः । **स्वतन्त्रेति** । स्वतन्त्रकारणत्वरूपेणेत्यर्थः । **तदप्रसङ्गादिति** । ततः तेनानुमाननिरासासिद्धेरिति शेषः । **तन्निरासकतयेति** । उक्तानुमाननिरासतयेत्यर्थः । **सम्भावितेति** । अनुमानैः प्रधानसिद्धिं वदन्तं प्रतीति पूरणीयम् । **इति ह्युक्तमितीति** । तत्प्रकृतेः शरीरत्वोक्त्या तदधिष्ठितस्य भगवतोऽव्यक्तपदेन ग्रहणोक्त्या चाव्यक्ताधिष्ठितेश्वरकारणतायाः तच्छरीरस्यापि तत्प्राप्तेरिति भावः । तात्पर्यमुक्तमिति वक्ष्यमाणमूलानुसारेणाह **तात्पर्यत इति** । मूले इतीत्यनूद्य प्रत्यनुमानेनैवेति व्याख्यानम् । इत्यत आह । पटादेरिति पाठः । इत्याहेति पाठेऽपि इति कारणादाहेत्येवार्थः । द्वितीयाध्यायगीताभाष्यगत 'नासतो विद्यते भावः' इत्येतदवतारिकाटीकायां इत्याहेत्यस्येति शङ्कायामिति शेषः । इत्युक्तत्वात् । कारणतायाः अतीन्द्रियशक्त्यात्मकतया तत्कार्यत्वमपि केवलप्रत्यक्षागम्यमपि अन्वयव्यतिरेकसधीचीनप्रत्यक्षगम्यमेवोचितमिति कथमन्वयव्यतिरेकमात्रोपादानं इत्यतः तदुपादानस्य तत्रैव पर्यवसानात् न दोषः इत्याह **तत्सधीचीनेति** ।

विट्ठल०— प्रधानाङ्गीकारप्रतिपादकं सूत्रं पठति **शरीररूपकेति** । यद्वा अव्यक्तादिसर्वशब्दानां भगवत्परतायाः समर्थितत्वेन प्रधाने प्रमाणाभावात् कथं प्रधानाभ्युपगम इत्यत आह **शरीररूपकेति** । तथा च भगवतो व्यक्तादिशब्दमुख्यवाच्यत्वेऽपि तत्प्रतिमात्वादितरस्याप्यव्यक्तादिशब्दवाच्यत्वमित्यानुमानिकाधिकरणे उक्तत्वेन नाप्रामाणिकं प्रधानस्येत्यर्थः । दोषं विनापि योजयति **मूलानुमेति वा आवर्तनीयमिति** । तथा चैवं मूलयोजना । इत्येव प्रतिषिद्धस्य प्रधानस्वातन्त्र्यस्य मूलानुमा मूलत्वेन साधकत्वेनाभिमतानुमा केन प्रकारेण मूलानुमा साधकानुमा भवेत् । न भवेदेवेति । **पटादाविति** । प्रधाने साध्योपाध्योर्विद्यमानत्वेऽपि अचेतनोत्पत्तिकत्वाभावरूपसाध्यवति घटादावकार्यत्वाभावात्साध्याव्यापकत्वमित्यर्थः । साध्यं तत्रोपपादयति **पटादेरिति** ।

चषकः— **अकार्यत्वमत्रेति** । स्वतन्त्राचेतनाधीनोत्पत्तिकत्वाभावसाध्यकानुमान इत्यर्थः ।

॥ इति एतेषामनुमानानां (मूलोक्तसाधारणदोषैः) दूषणम् (सत्प्रतिपक्षत्वम्) ॥

* * *

॥ अथ उक्तार्थस्य विवरणम् ॥
॥ अथ तत्र प्रतिपक्षान्तरम् ॥

४९ सु०— एवं प्रधानस्य रचनायाः स्वतन्त्रप्रवृत्तेरनुमानविरोधेन अनुपपत्तेर्नानुमानं तत्र प्रमाणमिति सूत्राक्षरयोजनां मनसि निधाय सूत्रतात्पर्यमुक्तम् । इदानीं तामेव विवृण्वन् प्रतिपक्षान्तरमाह स्वतन्त्रेति ।

अनु०— स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुतः ।

चशब्दोऽनुमानान्तरसमुच्चये । कुत एव इत्यन्वयः । अयमत्र प्रयोगः । प्रधानं स्वतन्त्रप्रवृत्तिरहितम् अचेतनत्वात्, तन्त्वादिवदिति ।

परि०— तामेवेति । सूत्राक्षरयोजनामिति योज्यम् । रचनानुपपत्तिमेवेति वार्थः । **इत्यन्वय इति** । एवशब्दस्येति योज्यम् ।

शे०वा०— अनुमानान्तरसमुच्चय इति । प्रतिपक्षान्तरसमुच्चय इत्यर्थः । **अन्वय इति** । ततो न व्यर्थत्वविरुद्धार्थे इति भावः । 'इदं नाचेतनवशमि'त्यस्यैव 'स्वतन्त्रवृत्ती रचने'त्यस्यैव यथाश्रुतस्य प्रतिपक्षत्वासम्भवादाह **अयमत्रेति** ।

वा०र०— योजनामिति मूले सर्वज्ञानुमान इत्युत्तरानुव्याख्याने तु रचनानुमानमिति योजना कृता इति भावः । प्रतिपक्षान्तरमिति पूर्वमूलानुसारायाह **प्रतिपक्षान्तरेति** । **व्यर्थत्वेति** । चशब्देनैव समुच्चयसिद्धेः एवशब्दस्य वैय्यर्थ्यम् । एवचशब्दयोः समुच्चयावधारणरूपविरुद्धार्थकत्वेनैवशब्दस्य चशब्देन विरुद्धार्थत्वं च नायातीत्यर्थः । अयं भावः । सा च इतिशब्दस्य तावत् अनुमानान्तरसमुच्चयार्थत्वोक्त्या अचेतने च सा कुतः इति सम्बन्धस्य मूले सूचितया एवशब्दस्य च सा एव इति सम्बन्धे व्यर्थत्वापत्त्या सन्नियोगशिष्टन्यायेन उत्तरत्रैव सम्बन्धाश्रयणे कार्ये तत्र समुच्चयावधारणरूपार्थद्वयविरोधापत्तिरिति किल वाच्यम् । न च तथा सम्बन्धश्रवणमस्ति । एवशब्दस्य कुत एव इति सम्बन्धाश्रयणेन विरुद्धार्थकशब्दद्वयसमावेशानङ्गीकारात् । कुत एवेत्यत्र सम्बन्धस्य च सर्वथाऽयोगसूचनरूपप्रयोजनसम्भवात् न व्यर्थतापीति ।

॥ इति प्रतिपक्षान्तरम् ॥

* * *

॥ अथ तत्र अप्रयोजकत्वशङ्का तथा स्वव्याघातेन प्रमाणविरोधेन च तन्निरासः ॥

५० सु०— नन्वचेतनत्वेऽपि प्रधानस्य स्वातन्त्र्येण प्रवृत्तिरस्तु को विरोधः, तथा च विपक्षे बाधकाभावादप्रयोजकोऽयं हेतुरित्यत आह अचेतनत्वमिति ।

अनु०— अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतम् ।

तावदेव ह्यनेनाशङ्कनीयं यस्मिन्नाशङ्क्यमाने स्ववचनस्वक्रियास्वन्यायप्रमाणान्तरविरोधो न प्रादुष्यात् । न हि कश्चिदेवं शङ्कते, 'मूकोऽपि वक्ता किन्न स्यात्', 'शब्दोऽप्रतिपादकः किन्न भवेत्', 'अनुमानत्वात् अनुमानमात्रमप्रमाणं कुतो न स्यात्', 'अग्निरनुष्णः कुतो न भवेदि'ति । न ह्येषा शङ्कापिशाची कदाचिच्छान्तिमुपगच्छति । तस्मादेवमाशङ्कमानो न लौकिको नापि परीक्षक इत्युन्मत्तवदुपेक्षणीयः । प्रकृते चाचेतनत्वं स्वातन्त्र्यं चात्मप्रमाहतम्, स्वव्याहतं, प्रमाणविरुद्धं च । तस्मादचेतनत्वेऽपि स्वतन्त्रप्रवृत्तिरस्तु प्रधानस्येति शङ्कैव नोत्पत्तुमर्हतीति किमत्र बाधकोपन्यासेनेति ।

परि०— प्रकृते चेत्यादिना मूलं विवृण्वन्नुपोद्घातमाह **तावदेवेति** । **अनेनेति** । शङ्काकृता इत्यर्थः । **न प्रादुष्यात्** न प्रादुर्भवेदित्यर्थः । 'उपसर्गप्रादुर्भ्यामस्तिर्यच्पर' इत्यस्तेः षत्वम् । स्ववचनादिविरुद्धशङ्काचतुष्टयं क्रमेण व्यनक्ति **मूकोऽपीत्यादिना** । न भवेदितीतिशब्दस्येत्येवं न हि

कश्चिच्छङ्कत इति पूर्वेणान्वयः । एवं कुतो न शङ्कनीयमित्यत आह **न ह्येषेति** । ततश्च किं प्रकृते अप्रयोजकोऽयं हेतुरित्यस्योत्तरमित्यत आह **प्रकृते चेति** ।

यादु०— स्ववचनस्वक्रियास्वन्यायप्रमाणान्तरविरोधास्पदाः शङ्काः क्रमेणोदाहरति **मूकोऽपीत्यादिना** ।

वं०प०— स्ववचनविरोधादेरुदाहरणं दर्शयति **मूकोऽपीति** । **शब्द इति** । शब्दोऽप्रतिपादक इति ब्रूते परबोधनायेममेव शब्दं प्रयुङ्क्ष इति स्वक्रियाविरोधः । आत्मप्रमाहतमित्यत्र आत्महतं प्रमाहतं चेति योजनामभिप्रेत्याह **स्वव्याहतमित्यादि** ।

श्रीनिधि०— स्ववचनादिविरोधानां क्रमेणोदाहरणमाह **मूकोऽपीत्यादिना** । आत्मप्रमाहतमिति स्वकीयप्रमाणबाधितमिति प्रतीयते अतो व्याचष्टे **स्वव्याहतं प्रमाणविरुद्धं चेति** । समानाश्रय**चैतन्येति** चैतन्यज्ञानम् । उपलक्षणमेतत् । समानविषयेत्यपि द्रष्टव्यम् ।

शे०वा०— अचेतनत्वस्वातन्त्र्ययोः स्वव्याहतत्वादिवर्णनानर्थक्यमाशङ्क्य अप्रयोजकताशङ्कापरिहारार्थत्वान्न तदिति भावेन तत्परतयोत्तरवाक्यं योजयितुं तच्छङ्कामुत्थापयति **नन्विति** । नन्वचेतनत्वमित्यादिमूलेन विपक्षे बाधकानुपन्यासात् कथमप्रयोजकताशङ्कापरिहार इत्यतस्तदभिप्रायमाह **तावदेव हीति** । ननु कुतोऽयं नियम इत्यत आह **न हीति** । **कश्चित** प्रेक्षावानिति शेषः । **एवं** स्ववचनादिविरुद्धम् । स्ववचनस्वक्रियास्वन्यायप्रमाणान्तरविरोधाश्रयशङ्काः क्रमेणोदाहरति **मूकोऽपीत्यादिना** । यदर्थं स्वक्रियाविरुद्धादेरनाशङ्कनीयत्वं वर्णितं तदिदानीमाह **प्रकृते चेति** । आत्मप्रमाहतमित्यत्र आत्महतं प्रमाहतं चेति सम्बन्धमाश्रित्य तदुभयस्वरूपं दर्शयति **स्वव्याहतमित्यादिना** । नोत्पत्तुमर्हतीत्यत्र प्रेक्षावत इति शेषः ।

वा०र०— तावदेव हीतीति । अनेनेत्येतत् शङ्कितसामान्यपरम् । अत्र शङ्कितुः बुद्धिस्थत्वात् । यस्मिन्निति यच्छब्दस्य तावत् इत्यनेन सम्बन्धः । **प्रादुष्यात्** । प्रादुर्भवत् । यस्मिन्नाशङ्क्यमाने स्ववचनविरोधो न प्रादुर्भवति तावदेव शङ्क्यमानेन शङ्कनीयमिति मूलार्थः । **इत्यत आहेति** । व्याप्तिनिश्चायकं अव्यभिचारनिश्चयं उपपादयतीत्यर्थः । व्याहतभाषिणः शङ्कोदयो दुष्परिहरः इत्यतः कश्चित् इत्यनूद्य तत्परतः शेषं पूरयति **प्रेक्षावानिति शेष इति** । न हि कोऽपि प्रेक्षावान् इति विशिष्टार्थलाभाय कश्चित् इत्यस्यैव तथा व्याख्यानं न कृतं इति ज्ञेयम् । मूकोऽपीत्याद्यैकैकमेव विरोधचतुष्टयोदाहरणतया उच्यत इति भ्रान्तिमव्यवस्थया एकैकोदाहरणत्वं भ्रान्तिं च वारयन्नाह **क्रमेणेति** । **उभयस्वरूपमिति** । आत्महतत्वप्रमाहतत्वयोः स्वरूपं दर्शयतीत्यर्थः । स्वव्याहतत्वं प्रमाणविरुद्धत्वरूपेण तयोर्विवरणस्य करणादिति भावः । **प्रेक्षावतः इति** । अप्रेक्षावत्वाङ्गीकारे तु शङ्कमानस्य तव उन्मत्तवत् उपेक्षणीयत्वेन बाधकोपन्यासो नावश्यकः इति मूलाशयं अनेन सूचयति ।

स०व्र०— ननु परेणाचेतनत्वहेतोरप्रयोजकत्वशङ्कायां कृतायां हेतूच्छित्त्यादिलक्षणबाधकमेव वक्तव्यम् । 'अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतम्' इति प्रकृतानुपयुक्तमित्यत आह **तावदेव हीति** ।

विठ्ठल०— शब्द इति । प्रकृतिप्रत्ययादिरूप इत्यर्थः । अतो न मातृका पटादावप्रतिपादकत्व-मस्तीति विरोध इति शङ्कावकाशः । **अनुमानत्वादिति** । एतस्मिन्ननुमानेऽप्यनेनैव न्यायेनाप्रामाण्याप्राप्तेः स्वन्यायविरोध इति भावः । **अग्निरनुष्ण इति** । प्रमाणान्तरविरोधस्येदमुदाहरणम् । आत्मशब्दस्य स्वशब्दार्थत्वमुपेत्याह **स्वव्याहतमिति** । तथा चात्महते प्रमाहतं चेति योजितं भवति ।

चषकः— प्रादुष्यात् प्रादुर्भवेत् । 'उपसर्गप्रादुर्भ्यामस्तिर्यच्पर' इति षत्वम् ।

* * *

॥ अथ तत्रादौ स्वव्याघातोपपादनम् ॥
॥ अथ च तत्रादौ स्वातन्त्र्यव्याख्या ॥

५१ सु०— नन्वचेतनस्य स्वातन्त्र्यशङ्कायां कथं स्वव्याहतिः; न हि स्वातन्त्र्यं नाम चैतन्यम्, नाप्यचेतनत्वं नामास्वातन्त्र्यम्; कथं च प्रमाणविरोधः; इत्यतः स्वव्याघातं तावदुपपादयितुं स्वातन्त्र्यं व्याख्याति स्वेच्छेति ।

अनु०— स्वेच्छानुसारितामेव स्वातन्त्र्यं हि विदो विदुः ।

प्रवृत्ताविति शेषः । विदो विदुः इत्यनेन सकलविद्वत्सम्मतमेतदित्याह । अत एव हि स्वातन्त्र्याभावात् 'वृक्षस्तिष्ठती'त्यादिकर्तृत्वव्यवहारो गौण इति सर्वे प्रतिपन्नाः ।

परि०— स्वव्याघातं तावदिति । इच्छामीत्यादिना प्रमाणविरोधोपपादनात् तावच्छब्दः । **उपपादयितुमिति** । कुत इत्यादिना श्लोकेनेति भावः । नन्वेवं सति स्वतन्त्रः कर्तेति पाणिन्युक्तदिशा स्वातन्त्र्यरूपकर्तृत्वस्य वृक्षादावचेतनेऽभावात्, तत्र कर्तृवाचितिङ्प्रयोगो न स्यादित्यत आह **अत एव हीति** । तर्कताण्डवे त्वाख्यातवादे मण्याद्युक्ताख्यातकृत्यर्थत्वभङ्गे रथो गच्छतीत्यादिप्रयोगोऽपि मुख्य (एवेत्यु)इत्युक्तिस्तु व्यापारवत्त्वं कर्तृत्वमित्युपेत्येत्यविरोधः ।

यादु०— गौण इतीति । यत्तु तर्कताण्डवे वृक्षस्तिष्ठतीत्यादावपि कर्तृत्वव्यवहारो मुख्य एवेति समर्थितं, तत् धात्वर्थानुकूलव्यापारे प्राधान्यमेव स्वातन्त्रं न तु कृतावेवेति नियमः । तदेव च कर्तृत्वमित्यभिप्रेत्य अतो न विरोधः ।

वं०प०— **अत एव** एवमेव स्वातन्त्र्यनिर्वचनस्य सर्वविद्वत्सम्मतत्वादेव । **स्वातन्त्र्येति** । निरुक्तेरित्यर्थः । **कर्त्रिति** । स्वतन्त्रः कर्तेत्युक्तेरिति भावः । **गौणः** पारिभाषिकः ।

शे०वा०— स्वेच्छानुसारितामिति स्वेच्छानुसारित्वस्य स्वातन्त्र्यरूपत्ववर्णनमिच्छाम्यहम्, इति प्रमाणविरोधोपदर्शनं चानर्थकमित्याशङ्क्य प्रतिज्ञातस्ववचनविरोधप्रमाणविरोधव्युत्पादनार्थत्वान्न तदिति भावेन स्ववचनविरोधानुपपत्तिनिरासपरतया तावदुत्तरवाक्यं योजयितुं तच्छङ्कामुत्थापयति **नन्विति** । स्वक्रियास्वन्यायविरोधयोरप्रसरादिति भावः । अस्तु तर्हि स्ववचनविरोधरूपैव स्वव्याहतिरित्याशङ्क्य सा किं स्वातन्त्र्यस्य चैतन्यरूपतयाऽभिमता, किं वा अचेतनस्यास्वातन्त्र्यरूपतया वेति विकल्पं मनसि निधाय नाद्य इत्याह **न हीति** । किन्नाम कारकान्तरानपेक्षत्वमिति नानेन प्रकारेण स्ववचनविरोध इति भावः । द्वितीयं दूषयति **नापीति** । किन्नाम चैतन्यविरह एवेति नानेनापि प्रकारेण स इति भावः । **तावदिति** । इच्छाम्यहमिति प्रमाणविरोधस्याप्युपपादनात् तावदित्युक्तम् । **प्रवृत्ताविति शेष इति** । इच्छापूर्वककर्तृत्वापरपर्यायस्वातन्त्र्यरूपत्वादिति भावः । सकलविद्वत्सम्मतत्वे ज्ञापकमाह **अत एवेति** । प्रवृत्तौ स्वेच्छानुसारिताया एव स्वातन्त्र्यशब्दार्थत्वादेवेत्यर्थः । **स्वातन्त्र्याभावात्** प्रवृत्तौ स्वेच्छानुसारित्वाभावादित्यर्थः । वृक्षस्तिष्ठतीत्यादिपदेन वृक्षेण स्थीयत इत्यादेः परिग्रहः । **सर्वे** न्यायवाचस्पत्युदयनादयः । प्रवृत्तौ स्वेच्छानुसारित्वस्यैव स्वातन्त्र्यरूपत्वसम्मतेरेव वृक्षस्तिष्ठतीत्यादिकर्तृत्वव्यवहारस्य वृक्षादीनां प्रवृत्तौ स्वेच्छानुसारित्वाभावेन मुख्यत्वासम्भवात् तृतीयादिप्रयोजकपारिभाषिकवैय्याकरणाभिमतकारकान्तरानपेक्षत्वरूपामुख्यकर्तृतायाः सत्त्वात् उक्तविधकर्तृत्वव्यवहारस्य गौणतोक्तिः तेषां सङ्गच्छते । अन्यथा तु कारकान्तरानपक्षेत्वरूपकर्तृताया वृक्षस्तिष्ठतीत्यादावपि सत्त्वात् तद्व्यवहारस्य गौणतोक्तिरयुक्ता स्यादिति द्रष्टव्यम् । यद्यपि वृक्षस्याचैतन्यपक्षेऽपि तत्र मुख्यकर्तृत्वाभावात् तद्व्यवहारस्य गौणत्वप्राप्तावपि चैतन्यपक्षे मुख्यमेव कर्तृत्वं सम्भवतीति तद्व्यवहारस्यामुख्यत्ववर्णनमनुचितम् । तथाऽप्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा घटस्तिष्ठति घटेन स्थीयत इत्यादेरौपचारिकव्यवहारत्वेनाभिमतत्वान्नानुपपत्तिः । अत एव न्यायवाचस्पतिना 'घटस्तिष्ठतीत्यौपचारिकः प्रयोग' इत्येवोक्तमित्यवधेयम् । वस्तुतश्चैतन्येऽपि वृक्षस्य स्वस्थित्यनुकूलेच्छाप्रयत्नसद्भावे मानाभावान्न मुख्यकर्तृत्वमिति यथाश्रुत एवायं ग्रन्थः साधुः ।

वा०र०— निरासपरतयेति पाठः । निराकरणपरतयेति तु मूलकोशे पाठः । कथं स्वव्याहतिरित्यस्य न कथमपि । स्वक्रियाविरोधरूपायाः वा स्वन्यायविरोधरूपाया वा तस्याः प्रसराभावादिति व्याख्यानं मनसि कृत्वाह **स्वक्रियेति** । अनेनैव मूले कथमिति सर्वव्याहत्यपेक्षे सति न हीत्यादिना स्ववचनविरोधरूपाया एवाभावस्य उपपादनं न युक्तमिति शङ्का निराकृतेति ज्ञेयम् । **इति नानेनेति** । कारकान्तरानपेक्षत्वरूपं स्वातन्त्र्यं चैतन्यविरोधश्चाचेतनत्वमिति न परस्पराभावरूपता, येन नित्यत्वानित्यत्ववत् विरोधावकाशः । अतो नानेन प्रकारेण स्ववचनेति योज्यम् । स्वातन्त्र्यस्वरूपनिरूपणेन व्याघातशङ्के वा अचेतनत्वस्वरूपनिरूपणेन

नापि व्याघातशङ्का प्रसरति । ततश्च व्याघातशङ्कान्तरप्रकारप्रदर्शनाय नापीत्युत्तरमूलं सार्थकम् । अन्यथा पूर्ववाक्येनैव चेतनत्वस्य स्वातन्त्र्यरूपत्वेऽचेतनत्वस्य तदभावरूपतया व्याघात इति सूचनात् उत्तरवाक्य-वैय्यर्थ्यं स्यात् । अतः शेषपूरणेन प्रत्येकं व्याघातद्वयसूचनमुखेन तन्निराकरणं विवक्षितमिति मूलाशयं सूचयितुं इति नानेन प्रकारेणेति स्थलद्वयेऽपि प्रकारपदोपादानमिति ज्ञातव्यम् । **न्यायवाचस्पत्युदयनादय इति** । न्यायपञ्चाध्यायी न्यायभाष्यव्याख्यानन्यायवार्तिकव्याख्याने न्यायवाचस्पतिमिश्रास्तद्वाचस्पतिव्याख्यावसरे चोदयनः । आदिपदेनोदयनकृततात्पर्यशुद्धिव्याख्यानकर्तृवर्धमानपरिग्रहः इति ज्ञेयम् । न्यायसूत्रतद्भाष्य-तत्तद्वार्तिकवाचस्पतितदुदयनतद्वर्धमानग्रन्थप्रवृत्तिप्रकारस्तु इत्थम् । यत् अनिमित्तं न तत् परमार्थसत् । यथा रज्वामारोपितं सर्पत्वम् । तामेव हि रज्जुं तदैव हि कश्चित् सर्प इति कल्पयति । कश्चित् वा नेति । स एकदा कदाचित् सर्प इति कल्पयित्वा पश्चाद्वा नेति कल्पयति । एवं प्रमाणं प्रमेयं इत्येतत्समाख्या-निमित्तभूतप्रमाणप्रमेयभावस्य कल्पितत्वात् न परमार्थसत्त्वं इत्याशङ्कायाः परिहाराय प्रमेया च तुलाप्रामाण्यवत् इति सूत्रम् । तत्र योजना उक्तशङ्कायाः परिहाराय प्रमेया तुलाप्रामाण्यवत् इति सूत्रं प्रवृत्तम् । तत्र योजनयोक्तशङ्कापरिहारो भाष्यवार्तिकयोरपि प्राप्त एव । प्रमाणप्रमेयमिति च समाख्या वर्तत इत्यादिभाष्ये प्रमाणं प्रमेयं इति चेयं समाख्या समासेन वर्तते इत्येतत् समाख्यांनिमित्तत्वात् इत्यादि तद्वार्तिके च उपलब्धिसाधनत्वरूपप्रमाणमिति समाख्यानिमित्तत्वस्योपलब्धिविषयत्वरूपप्रमेयमिति च समाख्यानिमित्तस्य च सत्त्वात् न प्रमाणप्रमेयभावस्य कल्पितत्वं इति युक्तम् । परमार्थसत्त्वं इत्यस्य प्रतिपादनात् । तथा प्रमाण-प्रमेयसमाख्ययोः निमित्तवशेन सत्त्वेऽपि यदेव वस्तु अनेकं सर्गीभवति तदा समाख्यानिमित्तं तन्त्रत्वात् अनेकसमाख्यानिमित्तवत् वस्तु अनेकशब्दाभिलाप्यमस्य चार्थस्य ज्ञापनार्थं प्रमेया च तुलाप्रामाण्यवत् इति सूत्रं प्रवृत्तम् । तस्यार्थः । गुरुत्वं परिमाणज्ञानसाधनं तुलाद्वयं समाहारगुरुत्वस्य इयत्तापरिच्छेदे निमित्तत्वात् प्रमाणमित्येव केवलं न किन्तु यदा तुलाद्रव्येऽपि प्रामाण्यविषये सन्देहो भवति तत्तदा सिद्धं प्रमाणभावेन तुलान्तरेण परीक्षितं सुवर्णादिकं तुलाप्रामाण्ये प्रमाणं भवति । तदा तुला प्रमेया च सुवर्णादिना परिच्छिद्यमाने इयत्तावत्वेन परिच्छेदविषयतया व्यवतिष्ठमानायास्तुलायाः उपलब्धिविषयत्वरूपप्रमेयत्वानिवारणात् । यद्यपि प्रामाण्यशब्दस्य स्वार्थिकष्यञन्तत्वमाश्रित्य प्रथमा समर्थद्वयाङ्गीकारे यथा प्रमाणं तुलाप्रमाणाच्च तथा प्रमेया च इत्यर्थलाभो भवति इति शक्यं व्याख्यातुं तथापि तुलाप्रामाण्ये पूर्वपक्षिणो विप्रतिपत्तेः अभावेन तुलायाः प्रमेयत्वदृष्टान्तेन प्रामाण्योक्तिपरत्ववत् प्रामाण्यदृष्टान्तेन प्रमेयत्वपरत्वमपि अयुक्तम् । व्यर्थतापत्तौ किन्तु इन्द्रियादिप्रामाण्ये विप्रतिपत्त्यनुसारेण तत्र तुलाया एव दृष्टान्तीकर्तव्यत्वात् यथा तुलाप्रामाण्यविषये प्रमेया चैवान्यदपि इन्द्रियादि प्रमाणम् । प्रामाण्ये प्रमेयं चेति सप्तमीसमर्थद्विति प्रत्ययमाश्रित्यैवार्थस्याश्रयणीय-त्वमित्याशयेन यथा प्रामाण्ये इत्यादि योजना वाचस्पतौ दर्शितेति । तथोक्तार्थप्रतिपादके च तत्सूत्रे तुलादृष्टान्तेन एकत्र प्रमाणप्रमेयशब्दयोः वृत्तिप्रतिपादनं उदाहरणमात्रतया कृतम् । किन्तु प्रमेयतया परिगणितस्यापि आत्मनः उपलब्धिविषयतया प्रमेयत्ववत् उपलब्धौ स्वातन्त्र्यात् प्रमातृत्वं तेनैव प्रमितेन स्वगतगुणानुमाने प्रमाणत्वं चेत्यस्यैव प्रमेयत्वात् प्रमाणशब्दाभिलाप्यत्वम् । एवं बुद्धौ प्रमाणत्वप्रमेयत्व-

फलत्वानां समावेशो ज्ञेयः । एवं कारकशब्दानामपि निमित्तसमावेशात् समावेशोऽस्ति । तद्यथा वृक्षः तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् वृक्षः कर्ता । वृक्षं पश्यतीति दर्शनेनाप्तुं इष्यमाणतमत्वात् कर्मावृक्षेण चन्द्रमसं पश्यति । वृक्षाय उदकमासिञ्चति वृक्षात् पर्णं पतति वृक्षे वयांसि इत्येवं यथाक्रमं साधकतमः । सम्प्रदानं अपादानं अधिकरणं चेति । कारकशब्दश्चायं प्रमा प्रमेयमिति इत्यतः प्रत्यक्षादीनामनुपलब्धिहेतुत्वतद्विषयाभ्यां निमित्ताभ्यां तदुभयशब्दसमावेशवत्तायुक्तेत्यपि भाष्यादौ प्रतिपादितम् । तत्र भाष्ये वृक्षस्तिष्ठतीति स्वातन्त्र्यात् कर्तेति वृक्षस्य स्वातन्त्र्यं युक्तम् । तत्र वार्तिककारेण किं पुनः वृक्षस्य स्वस्थितौ स्वातन्त्र्यमित्याशङ्क्य कारकान्तरानपेक्षत्वमिति प्रतिपादितम् । तत् वाचस्पतिनापि कारकान्तानपेक्षस्य हि प्रयोजकतया कथञ्चित् स्वातन्त्र्यं विवक्ष्यते । तदनपेक्षस्य नितरां स्वातन्त्र्यमिति प्रतिपादितम् । तदुदयनेनापि स्वातन्त्र्यं युक्तमिति वाक्ये वैय्याकरणमतमाश्रित्य उत्तरयता तदुपपादयति कारकान्तरापेक्षस्य हि इत्यवतारः कृतः । ननु कारकान्तरानपेक्षत्वं अजनकसाधारणम् । नैय्यायिकानां अकर्तृत्वं तत् किमर्थं उपपाद्यते इत्यत आह **वैयाकरणेतीत्येवं वर्धमानेनापि अवतारकृत इति** । कथं तेषां स्वप्रवृत्तौ स्वेच्छाधीनत्वरूपस्वातन्त्र्यसम्मतिः उदाहृतग्रन्थात् ज्ञायते इत्यतो अन्यथानुपपत्त्या इत्याशयेनाह **स्वप्रवृत्तौ स्वेच्छेति** । सम्मतेरेवेत्यस्योक्त-विधकर्तृत्वस्य व्यवहारस्य गौणत्वोक्तिः तेषां सङ्गच्छते इति सम्बन्धः । सम्मतस्वातन्त्र्याभावं वृक्षादावुपपादयति **वृक्षस्तिष्ठतीत्यादिकर्तृत्वव्यवहारस्येति** । मुख्यत्वासम्भवादित्यनेन सम्बन्धः । **तत्र हेतुः वृक्षादीनामिति** । अत्र कर्तृत्वपदं स्वातन्त्र्यपरम् । समानार्थतया परग्रन्थ इव सङ्करेण व्यवहारः इत्यदोषः । गौणकर्तृत्वस्वरूपविवरणपूर्वकं तत्सम्भवमाह **तृतीयादीति** । **आदिना** प्रथमा षष्ठीपरिग्रहः । प्रयोगक्रमस्याविवक्षितत्वादेवासदधिकरणमूले वृक्षेण स्थीयते इत्यादावित्युक्तेऽपि इह मूले वृक्षस्तिष्ठति इत्यादावित्युक्तमिति टीकायामपि अव्यवस्थयोक्तिरिति न विरोधः । **अमुख्यकर्तृताया इति** । अमुख्यकर्तृतायाश्चेति योज्यम् । पञ्चम्यन्तद्वयं गौणतोपपादकम् । यद्यपि वृथाक्षादीनां गौणः कर्तृत्वव्यवहारः इति परेषां मुखतो नोक्तिरस्ति । तथापि मुख्यं नैयायिकाभिमतं कार्यत्वमनुपादायाजनकसाधारणं वैय्याकरणाभितं कर्तृत्वं उपादाय च कर्तृत्वोपपादनं उक्तव्यवहारस्य गौणत्वकथने एव पर्यवसन्नमिति भावेन तथोक्तिः । अत एव वर्धमानकृता चिकीर्षा कृतिसमवायित्वं कर्तृत्वमिति निष्कर्षो दर्शितः । अत एव प्राक् उक्तकारकान्तरानपेक्षत्वस्य कर्तृत्वरूपत्वं तिष्ठतेः गतिनिषेधवचनत्वपक्ष इति प्रतिपाद्य पदाप्यस्तेरभिधायकं इत्यादि पक्षान्तराणि वार्तिकोक्ता व्याकुर्वता वाचस्पतिना गेहे घटोऽस्ति इत्यौपचारिकः प्रयोग इत्युक्तम् । तथोक्तप्रकाराणां फलं कथयता उदयनेनापि तदेवमुक्तेष्वपि पक्षेष्वनपेक्षतया वृक्षादीनां कर्तृत्वं यद्यपि व्युत्पादितं तथापि उपचारमेतत् इति मन्तव्यमिति प्रतिपादितम् । तच्च वर्धमानेनैवमवतारितम् ॥ ननूक्तकर्तृत्वप्रकारेषु चेतनाचेतनसाधारणं कर्तृत्वं व्यवस्थापितम् । तथा च क्षित्यादिकर्त्रनुमानेऽवयवानामेवासमवायिकारणसंयोगहेतुक्रियावतां कर्तृत्वेन उपपत्तौ चेतनेन सिद्ध्येत् इत्यन्तमाह **तदेवमितीति** । ततोऽपि उपचारः आश्रितः इति गम्यते इति ज्ञेयम् । **अन्यथेति** । उक्तस्वातन्त्र्यस्य तेषामसम्मतत्वे वैयाकरणोक्तस्य एव च सम्मतत्वे इत्यर्थः । वर्धमानोक्तरीत्या आशङ्कते **यद्यपि वृक्षस्येत्यादि** । समाधिं स्वयमाह **तथाप्यत्रेति** । **घटस्तिष्ठतीत्यौपचारिक इति** । यद्यप्येवं

न वाचस्पत्युक्तं तथापि गेहे घटोऽस्तीत्यौपचारिकप्रयोगः इति तदुक्तिं मनसि निधाय तिष्ठतेश्चास्त्यर्थत्व-मुपादाय इदमुक्तमित्यादि द्रष्टव्यम् । वर्धमानोक्तरीत्यापि समाधानमाह **वस्तुतश्च चैतन्येऽपीत्यादिनेति** सर्व-मवदातम् । असदधिकरणीया बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वं इत्यनुव्याख्यानमूलटीकापि एवमेव व्याख्येयेति ज्ञेयम् । नविलक्षणत्वाधिकरणस्थ प्रमेयचतुष्टयसूत्रोदाहरणमूलटीकायामपि एवमेवोपपादनं ज्ञेयम् ।

स०व्र०— अत एवेति । स्वेच्छानुसारित्वस्यैव स्वातन्त्र्यशब्दार्थत्वेन सम्मतत्वादेवेत्यर्थः । **वृक्ष इति** । धात्वर्थानुकूलव्यापारवत् कर्तृत्वस्याप्याख्यातार्थत्वात् । वृक्षस्तिष्ठतीत्यत्र धात्वर्थानुकूलव्यापाररूपा-ख्यातार्थस्य मुख्यत्वेऽपि कर्तृत्वरूपतदर्थो न मुख्य इत्यर्थः ।

विट्ठल०— कर्तृत्वव्यवहार इति । क्रियास्वातन्त्र्यं हि कर्तृत्वं तस्य वृक्षे अभावाद्गौणोऽयं व्यवहार इति भावः । तिष्ठतीत्यादि क्रियां प्रति प्राधान्यं कर्तृत्वमिति विवक्षया कर्तृत्वव्यवहारो मुख्य इति तर्कताण्डवोक्तिरिति न विरोध इति ज्ञेयम् ।

॥ इति स्वातन्त्र्यव्याख्या ॥

* * *

॥ अथ च तत्र इच्छायाः स्वसमानाश्रयचैतन्यकार्यत्वम् ॥

५२ **सु०— तथाऽपि कथं स्वव्याहतिः; न ह्यचेतनत्वं नामेच्छाविरहः, किन्नाम चैतन्यविरहः; इत्यत आह कुत इति ।**

अनु०— कुत इच्छाऽचेतनस्य

अचेतनस्येच्छा कुतः कारणाज्ज्ञायते, न कुतश्चित् । ज्ञानमेव हीच्छाया जनक-मित्यर्थः । तथाऽपि किमित्यत आह **सेच्छं चेदिति** ।

अनु०— सेच्छं चेत् किमचेतनम् ।

सेच्छं चेत् अङ्गीकृतं तदा तत् **अचेतनं किं** चेतनमेवेत्यर्थः ।

एतदुक्तं भवति । अचेतनमपि प्रधानं स्वातन्त्र्येण प्रवृत्तिमदस्त्विति वदता-

ऽचेतनमिच्छावदस्त्वित्युक्तं स्यात्, स्वेच्छानुसारित्वस्य स्वातन्त्र्यशब्दार्थतया सर्वसम्मतत्वात् । अचेतनस्येच्छावत्त्वमङ्गीकुर्वाणेन चेतनत्वमप्यङ्गीकर्तव्यं स्यात्, अन्वयव्यतिरेकाभ्यामिच्छायाः स्वसमानाश्रयचैतन्यकार्यत्वावधारणात्, कार्याङ्गीकारे कारणानङ्गीकारस्यानुचितत्वात् । अचेतनं चेतनमिति च स्फुटा व्याहतिरिति ।

कं०रा०— चैतन्यविरह इति । ज्ञानविरह इत्यर्थः ।

शे०वा०— तथाऽपीति । अचेतनस्य स्वातन्त्र्योक्त्या सेच्छत्वलाभेऽपीत्यर्थः । **कथमिति** । अचेतनस्य चैतन्यालाभादिति भावः । ननु चैतन्यलाभेनैव स्वव्याहतिर्वक्तव्येति न निर्बन्धे कारणमस्ति । स्वातन्त्र्योक्त्या लब्धस्य सेच्छत्वस्य तद्विरहरूपाचैतन्यसमर्पकाचेतनपदेन तन्नैरपेक्ष्येणैव स्वव्याहतिसम्भवादित्यतो भवेदेतदेवं यद्यचेतनत्वमिच्छाविरह इति स्यान्न चैतदस्तीत्याह **न हीति** । तर्ह्यचेतनत्वं नाम किमिति पृच्छति **किन्नामेति** । परिहरति **चैतन्येति** । ननु तथाऽपि कथं स्वव्याहतिरित्यतः स्वेच्छानुसारिता-म्वेत्यादिवाक्यैरुक्तस्यार्थस्य स्वव्याहत्युपपादने उपयोगमाकाङ्क्षाक्रमेण दर्शयन्नेव तामुपपादयति **एतदुक्तं भवतीति** । समानाश्रयेत्युपलक्षणम् । समानविषयेत्यपि द्रष्टव्यम् । **अनुचितत्वादिति** । अन्यथाऽकारणकार्योत्पत्तिप्रसङ्गादिति भावः ।

वा०र०— अचेतनपदेनेति । निषेधादिति शेषः । अतो नानन्वयः शङ्कनीयः । यद्वा स्वातन्त्र्योक्त्येत्यादेः स्वेच्छत्वसमर्पकस्वतन्त्रपदस्येत्यर्थः । **समानविषयेत्यपीति** । इदमुपलक्षणम् । समानकालीनेत्यपि ज्ञेयम् ।

विट्ठल०— अचेतनस्येच्छोत्पत्तौ कथं कारणाभाव इत्यत आह **ज्ञानमेव हीति** । अचेतनस्य ज्ञानप्रसक्त्यभावादिच्छाविरह इति भावः । **तथापीति** । अचेतनस्येच्छाभावेऽपि किमत्रायातमित्यत आहेत्यर्थः । कथमनेन व्याहतिरुपपादितेत्यत आह **एतदुक्तं भवतीति** ।

॥ इति इच्छायाः स्वसमानाश्रयचैतन्यकार्यत्वम् ॥

* * *

॥ अथ च तत्रान्ते अचेतनत्वस्वातन्त्र्ययोर्विरोधो न साक्षात्
अपि तु स्वातन्त्र्यबलेन चैतन्याङ्गीकारणद्वारा ॥

५३ सु०— एतेनैतदपि निरस्तम्, 'अचेतनत्वं स्वातन्त्र्यं च यदि परस्परव्याहतं तर्ह्यचेतनत्वेन स्वतन्त्रप्रवृत्तिराहित्यसाधने साध्याविशिष्टतादोषः स्यादि'ति । न ह्यस्मा-

भिरचेतनत्वस्वातन्त्र्ययोः वन्ध्या अपत्यवतीतिवत् साक्षाद्विरोधोऽभिहितः, किन्तु स्वातन्त्र्यबलेन चैतन्यं परेणाङ्गी(कार्य)कारयित्वा । अनेनैव स्वातन्त्र्याङ्गीकारेऽचेतनत्वानुपपत्तिरिति बाधकं चोक्तं भवति ।

परि०— अङ्गीकारयित्वेति । विरोधोऽभिहित इति पूर्वेणास्यान्वयः । तथैव प्रागुक्तेरिति भावः । अङ्गीकारशब्दादनुमत्यर्थकात्, तत्करोति तदाचष्ट इति णिचि कृते णाविष्ठवद्भावात् प्रातिपदिकस्य टिलोपे सनाद्यन्ता धातव इति धातुसंज्ञायां त्त्वाप्रत्यये 'न त्त्वा सेडि'ति कित्त्वाभावाद्गुणे समासपदत्वाभावेन समासेऽनञ्पूर्वे त्त्वो ल्यबिति ल्यपोऽनवकाशात् साधुरेवायं ध्येयः । **अनेनैवेति** । अचेतनत्वेऽपि प्रधानस्य स्वातन्त्र्येण प्रवृत्तिरस्त्विति शङ्कायां स्वव्याहत्युपपादकग्रन्थेनैव हेतूच्छित्तिरूपविपक्षबाधकं चोक्तमित्यर्थः । शङ्कोदयाङ्गीकारवादेन चेयं बाधकोक्तिर्ध्येया ।

यादु०— परेणाङ्गीकार्येत्येव साम्प्रदायिकः पाठो न त्वङ्गीकारयित्वेति । येन समासेऽनञ्पूर्वे त्त्वो ल्यबिति ल्यबादेशेऽङ्गीकार्येति भवितव्यं तत्कथमङ्गीकारयित्वेति शङ्काऽवकाशः । अप्रयोजकत्वशङ्कामभ्युपेत्य तत्र बाधकोक्तिपरतयाऽपि मूलयोजनामभिप्रेत्याह **अनेनैवेति** । स्वेच्छानुसारितामेवेत्यादिमूलेनेत्यर्थः ।

वं०प०— तर्हीति । तदा परस्परविरहरूपत्वेन व्याहतत्वं तदाऽचेतनत्वं स्वेच्छाधीनप्रवृत्तिमत्त्वरूपस्वातन्त्र्यविरहरूपत्वमेवेत्यचेतनत्वेन स्वतन्त्रप्रवृत्तिराहित्यसाधने साध्याविशिष्टतेत्यर्थः । **अभिहित इति** । येनोक्तदोषः स्यादिति शेषः । **अङ्गीकार्य** अङ्गीकारयित्वा विरोधोऽभिहित इत्यन्वयः । ततश्च परस्परविरहव्याप्यत्वाङ्गीकारान्नोक्तदोष इति हृदयम् । **अनेनैव** मूलेनैव ।

कं०रा०— साक्षादिति । परस्परविरहरूपत्वलक्षण इत्यर्थः । **अङ्गीकारयित्वेति** । विरोधोऽभिहित इति पूर्वेणान्वयः ।

शे०वा०— स्वेच्छानुसारितामेवेत्यादिस्वव्याहत्युपपादनस्य न केवलमप्रयोजकताशङ्कानिरासः प्रयोजनं, किं तर्हि प्रतिपक्षानुमाने दोषान्तरपरिहारोऽपीत्यभिप्रेत्य तत्परतया भाष्ययोजनां सूचयितुमाह **एतेनेति** । स्वेच्छानुसारितामेवेत्यादिस्वव्याहत्युपपादनपरभाष्येणेत्यर्थः । एतदित्युक्तमेव निर्दिशति **अचेतनत्वमिति** । **साध्याविशिष्टतेति** । अचेतनत्वास्वातन्त्र्ययोरभेदादिति भावः । **साक्षादिति** । परस्परविरहरूपत्वेनेत्यर्थः । **अङ्गीकारयित्वेति** । यद्यप्यनङ्गमङ्गं सम्पद्यत इति कृद्योगेऽभूततद्भावे कृभ्वस्तियोगे सम्पद्ये कर्तरि च्विरित्यनेनाङ्गशब्दात् च्विप्रत्यये अस्य च्वावित्यङ्गशब्दस्य ईत्वे च सति निष्पन्नस्याङ्गीशब्दस्य ऊर्यादिच्विडाचश्चेति गतिसंज्ञस्य करोतेर्णिचि वृद्धौ रपरत्वे च निष्पन्नकारिशब्दस्य सनाद्यन्ता धावत इति

धातुसंज्ञायां समानकर्तृकयोः पूर्वकाल इति तस्मात्काप्रत्यये आर्धधातुकस्येड्वलादेरितीडागमे गुणायादेशयोश्च सतोर्निष्पन्नेन कारयित्वेति क्त्वान्तशब्देन कुगतिप्रादय इति सूत्रेण गतिसमासे सति समासेऽनञ्पूर्वे क्त्वो ल्यप् इत्यनञ्समासे क्त्वाप्रत्ययस्य ल्यबादेशविधानाल्लुचपि णेरनिटीति सति णिलोपेऽङ्गीकार्येत्येव भाव्यम् । उभयथैव हि क्त्वो ल्यप्निवृत्तिः । यदि नञ्समासोऽकृत्वेत्यादिवत् यदि वा समासाभावः कृत्वेत्यादिवत् । न चानयोरन्यतरस्य अस्त्यत्रावकाशः । अनञ्समासत्वात् कुगतिप्रादय इत्यनेन विहितसमासस्य नित्यतया गतिसमासेन समस्तत्वात् । न च कुगतिप्रादय इत्यनेन विहितस्य समासस्य नित्यत्वे ज्ञापकाभावादसमासम्भवान्न ल्यबादेशप्राप्तिरिति वाच्यम् । कुगतिप्रादय इत्यत्र नित्यं क्रीडाजीविकयोरित्यतो नित्यग्रहणानुवृत्त्या तस्य नित्यत्वसिद्ध्या समासाभावायोगात् । न च अनित्यग्रहणानुवृत्तावपि यथा प्रादिसमासस्यानित्यत्वं तथा गतिसमासस्यापि तद्भविष्यतीति वाच्यम् । उपसर्गादसमासेऽपि णोपदेशस्येत्यत्र असमासग्रहणेन प्रादिसमासस्यानित्यताज्ञापनादनित्यत्वेऽपि गतिसमासस्यानित्यतायां ज्ञापकाभावेन तदसिद्ध्या समासाभावायोगात् । तथा च समासेऽनञ्पूर्वे क्त्वो ल्यबिति अनञ्समासे ल्यबादेशोऽवर्जनीय एव । ततश्चाङ्गीकारयित्वेति टीकाकारीयो व्यवहारोऽनुपपन्न इवाभाति । तथाऽप्यङ्गीकारपदमव्युत्पन्नमभिप्रेत्य तस्मादङ्गीकारं करोतीत्यङ्गीकारयतीत्यङ्गीकारयित्वेति 'तत्करोति तदाचष्ट' इति णिति उक्तरीत्या क्त्वाप्रत्यये सति क्त्वान्तेन समासाभावेन समासेऽनञिति क्त्वो ल्यबप्राप्तेरङ्गीकारयित्वेति रूपसिद्धिरित्यभिप्रेत्यैवमुक्तमिति ध्येयम् । क्वचिदङ्गीकार्येत्यपि पाठः ।

स्वव्याहतत्वेनाप्रयोजकत्वशङ्काया न विपक्षे बाधकोपन्यासापेक्षेत्युक्तम् । इदानीमङ्गीकृत्याप्रयोजकताशङ्कां तत्र बाधकोक्तिपरतयाऽपि मूलयोजनामभिप्रेत्याह **अनेनैवेति** । स्वेच्छानुसारितामेवेत्यादिभाष्येणैवेत्यर्थः ।

वा०२०— एवं हरिं वदतीति समर्थयित्वेति चरमाध्यायतात्पर्यनिर्णयप्रयोगे भट्टोज्युक्तं दूषणं अङ्गीकारयित्वेति मूलेऽपि समानन्यायतया प्राप्तं उद्धर्तुं मूले अङ्गीकारयित्वेति पाठो न भवति किन्तु अङ्गीकार्येत्येव पाठ इति केचित् आस्थिताः । तान् निराकर्तुं अङ्गीकारयित्वेत्यस्य दुर्घटत्वमाशङ्क्य निराकरोति । **यद्यपि अनङ्गं अङ्गं सम्पद्यते इतीत्यादिना एवमुक्तमिति ध्येयं इत्यन्तेन** । अङ्गशब्दात् च्विप्रत्ययस्य 'अभूततद्भाव' इति सूत्रेण सम्भवं उपपादयितुं अनङ्गं अङ्गमित्यादि । अत्रानङ्गं अङ्गं सम्पद्यते तत् करोति अङ्गीकरोति इत्येवं विग्रहस्य सम्पूर्णस्योपलक्षणया एकदेशेन ग्रहणात् अभूततद्भावस्य गम्यत्वं कृधातुयोगश्च स्पष्ट इति ज्ञातव्यम् । अत एव कृद्योगे इत्युक्तम् । अत्र च कृयोग इत्येव पाठः । कृधातुयोग इत्यर्थः । कृत् योग इति तु लेखकागतः । मूलकोशेऽभावात् । नूतनपुस्तकेऽपि भ्रान्ते न शोधितत्वात् इति ज्ञेयम् । तथा चाकृष्णः कृष्णः सम्पद्यते । तं कृष्णीकरोतीत्यत्रेवागशब्दात् कृधातुयोगेऽनङ्गस्याङ्गत्वसम्पत्तिसद्भावेनाभूततद्भावस्य गम्यत्वाच्च च्विप्रत्ययेत्युक्तं भवति । अभूततद्भाव इत्येतत् वार्तिकस्यापि 'कृभ्वस्तियोगे इत्यादि सूत्रसहपाठेन वृत्तावुदाहृतत्वात् विशिष्टं सूत्रतयैव निर्दिष्टम् । सम्पद्यते यः कर्ता तद्वाचिनः कृभ्वस्तियोगे अभूततद्भावे गम्ये च्विः स्यात् इति सूत्रार्थः । विकारं प्राप्नुवन्त्यां प्रकृतौ वर्तमानात् शब्दात् स्वार्थे च्विप्रत्ययः भवतीति नव्येन व्याख्यातम् । **अस्येति** । च्वोपरतोऽवर्णस्य इत्वं भवतीति सूत्रार्थः । **अङ्गशब्दस्येति** ।

अङ्गशब्दान्त्यवर्णस्य दीर्घे ईकारे सतीत्यर्थः । 'कुगतिप्रादयः' इत्यनेन समासोपपत्तये अङ्गीशब्दस्य विशेषणं ऊर्यादिच्विडाचश्चेति इति वार्तिकसंज्ञकस्येति । उरी आदिः येषां ते उर्यादयः । तत्र उरी उररी इत्यङ्गीकारे उरीकृत्य उररीकृत्य इत्युदाहरणम् । **आदिना** ताली आताली वेतालीयापीत्यादीनां ग्रहणम् । ततश्चोर्यादयः च्व्यन्ताः डाजन्तश्च क्रियायोगे गतिसंज्ञाः स्युः इति सूत्रार्थः । तथा च यथा शुक्लीकृत्य यत् शुक्लीकरोति इत्यादौ अशुक्लः शुक्लः सम्पद्यते शुक्लीकृत्या इत्यादिसूत्रे या शुक्लशब्दात् च्वौ सति सनाद्यन्तत्वेन शुक्लीशब्दस्य उर्यादि च्विप्रत्ययश्च इति गतिसंज्ञा तथैवाङ्गीशब्दस्य गतिसंज्ञेत्यर्थः । गतिसंज्ञकस्याङ्गीशब्दस्य कारयित्वेति क्त्वान्तशब्देन कुगतिप्रादयः इति सूत्रेण गतिसमासे सति इति सम्बन्धः । **कारयित्वेति** । एतत् निष्पत्तिप्रतिपादनं करोतेरित्यादि । **णिचीति** । एकः करोति तमन्यः प्रेरयति इति कर्तुः प्रयोजकाख्यो हेतुः तत् व्यापारे प्रेरणादिरूपे वाच्ये धातोर्णिच्प्रत्यये विधायकेन हेतुमति चेत्यनेन णिचीत्यर्थः । वृद्धौ । अधाञ्णिति इत्यनेन सनाद्यन्ता धातवः इति । सनादयः कर्मेर्णिडन्ता ये प्रत्ययाः ते अन्ते येषां ते धातुसंज्ञाः स्युः इति सूत्रार्थः । धातुत्वात्तिप्शबादिके प्रसक्ते सति तदपवादेनेति शेषः । **समानकर्तृकयोरिति** । अत्र धात्वधिकारेऽपि समानकर्तृकतायाः क्रिययोरेव सम्भवात् तयोरेव ग्राह्यत्वम् । समानशब्द एकशब्दपर्यायः । तथा च एककर्तृकयोः धात्वर्थयोः मध्ये पूर्वः कालो यस्यार्थस्य तस्मिन्नर्थे वर्तमानात् धातोः क्त्वा स्यादिति सूत्रार्थः । तथा च विष्णुं नत्वा स्तौति इत्यत्रेवास्माभिरङ्गीकारयित्वा विरोधोऽभिमतः । इत्येतत् मूलानुसारेण कारयित्वाऽभिमतः इत्युक्त्योः अङ्गीकाराभिमतिक्रिययोः अङ्गीकारक्रियायाः पूर्वकालीनतया तत्क्रियायां वर्तमानात् कारीति धातोः क्त्वाप्रत्यय इत्यर्थः । **कुगतिप्रादयः इतीति** । कुशब्दो गतिसंज्ञकः प्रादयश्च समर्थेन नित्यं समस्यन्ते इति सूत्रार्थः । ततश्च शुक्लीकृत्येत्यादाविवाङ्गीशब्दस्य गतिसंज्ञकतया कारयित्वेत्यनेन समर्थेन सुबन्तेन नित्यं समास इत्यर्थः । कारयित्वेत्यस्य कृदन्ततया कृत्तद्धितेति प्रातिपदिकत्वेन स्वाद्युत्पत्तावव्ययात् परसुब्लोपे च सुबन्तत्वम् । **समासेऽनञ्पूर्वेति** । अत्र नञिव युक्तं न्यायेनानञ्पूर्व इति नञ्सदृशं नञ्भिन्नं पूर्वपदं यस्य समासस्य इत्यर्थः । सादृश्यं चाव्ययत्वेन इत्याद्याश्रित्याव्ययपूर्वपदेऽनञ्समासे क्त्वाप्रत्ययस्य ल्यबादेशः स्यात् इति सूत्रार्थः । अव्ययपदपूर्वत्वोक्त्या परमकृत्वेत्यादेः व्यावृत्तिर्भवति । उक्तं च मञ्जर्याम् । परमकृत्वेत्यत्र सन्महत इत्यादिना समासः । तुमर्थाधिकारात् भावे क्त्वाप्रत्ययः । पारम्यमयीह क्रियाया एव विशेषणं इति सामानाधिकरण्यं इति । अङ्गीशब्दस्तु षष्ठ्यन्तत्वेन प्रागीश्वरात् निपाताः इत्यनेन निपातः । तेषां चाव्ययसंज्ञायाः स्वरादिनिपातमव्यय इत्यनेन सिद्धेरव्ययत्वं सम्भवतीति युक्तं अव्ययपूर्वपदत्वम् । एवं शुक्लीकृत्य इत्यादावपि । अत एवोक्तं **अर्थश्चेति** । काशिकाव्याख्यानावसरे पदमञ्जर्यां वाच्यार्थः । तथा च सम्पद्यवत्कर्तरि च्विरितीति ज्ञेयम् । **णेरनिटीति** । अनिडादावार्धधातुकेऽणः लोपः स्यात् इति सूत्रार्थः । तथा च यकारस्य इडादिव्यतिरिक्तत्वे सिद्धे तिङ्शित्सार्वधातुकमित्यस्य धात्वधिकारे विहितत्वेनार्धधातुकत्वात् तस्मिन् परतो युक्तोऽणिलोपः इति भावः **नित्यग्रहणानुवृत्त्येति** । नित्यमित्यनुवर्तत इति तत्सूत्रकाशिकायामुक्तेः समासे नञ्पूर्वः इत्यादि सूत्रेषु क्त्वान्तेन नित्यं समास इति टीकाकाराणां उक्तेश्चेति भावः । **प्रादिसमासस्य नित्यत्वमिति** । उत्तरवाक्योक्तसौत्रज्ञापकादिति गूढाभिसन्धेः शङ्केयम् । सिद्धान्ती पूर्वपक्ष्याशयं व्यञ्जयन्नेव

वैषम्येण परिहरति **उपसर्गादसमासेऽपीति** । उपसर्गावस्थात् परस्य गौणोपदेशस्य धातोर्नस्य णः स्यात् समासेऽसमासेऽपि वेति सूत्रार्थः । प्रणामः इति समासे प्रणत् अतीति असमासेऽपि इत्यादि शेष्यादौ स्पष्टम् । तथा च समासवत् असमासस्यापि शब्देनोक्त्या नित्यत्वे तदुक्त्ययोगप्रसङ्गरूपबाधकात् बाधकमात्रापवाद्यनियमस्य तदंशे त्यागेऽपि अङ्गीकार इवेत्यादि च्व्यन्तादिरूपगतिसंज्ञकस्यान्येन समासस्यानित्यताकल्पकाभावेन तदंशेऽपि अनित्यत्वाश्रयणायोगात् इत्यर्थः । **अङ्गीकारपदं अव्युत्पन्नमिति** । अङ्गीकारपदस्याङ्गीकरोतीत्यङ्गीकारः इत्यादिरूपेण समासत्वेऽङ्गीकारशब्दात् अणि चिणाविष्टत्वात् प्रातिपदिकस्येति वार्तिकेन इष्टनिप्रत्ययो परतो यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपवत् मतुप्लोपयणादिलोप प्रस्थस्याद्यादेशभसंज्ञा तद्वत् णावपि पुंवत् भावादिकं भवतीति विधानात् टेरित्यनेनेष्टेमे यः सुटेर्लोपविधायकेन टिलोप अङ्गीकारशब्दात् त्त्वाप्रत्यये समासे नञि सूत्रेण ल्यप् स्यादेव इत्यतोऽव्युत्पन्नत्वाश्रयणम् । **अङ्गीकारयतीति अङ्गीकारयित्वेति** । पूर्वकालस्य विलक्षणा तिङ् स्थाने त्त्वाप्रत्यय इति भावः ।

तत्करोति तदाचष्टे इतीति । चुरादिगणे हि त्रीणि धातुसूत्राणि । प्रातिपदिकाद्धात्वर्थे बहुलं इष्टवच्चेति प्रथमम् । तत् करोति तदाचष्टे इति द्वितीयम् । तेनातिक्रामतीति तृतीयम् । प्रातिपदिकाद्धातोरर्थे विशेषरूपे वाच्ये णिच् भवति । इष्टनीचास्मिन् बहुलं प्रागुक्तम् । पुंवद्भावरभावटिलोपादिकं कार्यं भवतीति प्रथमसूत्रार्थः । कूलमुल्लङ्घयति । उत् कूलयतीति उदाहरणम् । अस्यैव प्रपञ्चः । उत्तरसूत्रद्वयम् । तत्र तदिति कर्मत्वोपलक्षणम् । कर्मत्वविशिष्टात् प्रातिपदिकात् । करोत्यर्थे णिच् । तथोक्तप्रातिपदिकात् आचष्ट इत्यर्थे णिच् इति प्रथमार्थः । कविं पटुं करोतीति आचष्टे वा कवयेति । पटयतीत्यादिकं उदाहरणम् । तेनेति करणत्वोपलक्षणम् । करणत्वविशिष्टात् प्रातिपदिकात् अतिक्रामतीत्यर्थे णिच् इत्यर्थः । अश्वेनातिक्रामति अश्वपतीत्युदाहरणम् । तथा च तत् करोति तदाचष्टे इति चतुरादिगणपठितसूत्रेण चुरादित्वादेव सुबन्तात् अङ्गीकारशब्दात् अङ्गीकारं करोति इत्यर्थे णिच् इत्यर्थः । अङ्गीकारशब्दात् इत्याच् अनन्तरं णाविष्टवच्चेति णौ परतः टिलोप एव प्राप्तः । यत्र हि पटुमाचष्टे पटयतीत्यादौ पटुशब्दादिणजानन्तरं टिलोपे वकाररूपस्याको लोपेऽप्यनः लोपप्रयुक्तसन्वद्भावे त्वदीर्घरूपकार्यप्रसक्त्याभावेन बाधकाभावः । तत्र प्रथमत एव टिलोपस्य दृष्टत्वात् । अपि पटुरित्यादौ तु प्रथमत एव टिलोपेऽलोपितयाऽनङ्लोपित्वप्रयुक्त सन्वद्भावे त्वादीर्घदिः अप्राप्त्या सनीवेति द्वित्वाप्राप्तेर्विवक्षितरूपासिद्धिः प्राप्नोतीत्यतः तत्र परत्वात् प्रथमतो वृद्धिमाश्रित्यानङ्भूतौकारस्य टितया तल्लोपेऽनञ्लोपे त्वदीर्घाद्युपपत्तिराश्रीयते । न च वृद्धेः प्रागिव तदनन्तरमपि अको निवृत्तिः । अकारे आकारप्राप्तावपि तस्याप्यत्तत्वात् अग्लोपानन्तरम् अनङ्लोपप्रयुक्त-उक्तकार्यस्याप्यनपेक्षितत्वेन तत्कार्यायोगः इति बाधकस्याप्रसक्तेश्च । तथा च प्रथमत एव टिलोपे अङ्गीकारशब्दस्य सनाद्यन्ताः इति धातुसंज्ञायां तिपि प्रसक्तेः पूर्वकालस्य वाच्यतया तिबपवादेन त्त्वाप्रत्ययः इत्याह **उक्तरीत्या त्त्वाप्रत्यये सतीति** । इडादौ सत्यपि उक्तरीत्येत्यनेनैव उक्तम् । अत्र टिलोपवृत्तिपरत्वापरत्वविचारः आनुमानिकसूत्रेऽवरादिशब्दे कृतः तदनुसारेण ज्ञेयः । **समासाभावेनेति** । अङ्गीकारयित्वेत्यत्राङ्गीशब्दस्य कारयित्वेत्यनेन समासाभावेनेत्यर्थः । अङ्गीशब्दस्य

च्व्यन्तत्वाश्रयणे प्रागुक्तरीत्या समासप्रसक्तावपि अङ्गीकारशब्दस्याव्युत्पन्नस्याङ्गीकारे कत्वेत्यादाविव च्व्यन्त-पूर्वपदाभावात् गतिसमासाभावः इत्याशयः । **अङ्गीकार्येत्यपि पाठ इति** । स चाशङ्काग्रन्थोक्तरीत्या सूपपाद एवेति न तत्र उपपादनापेक्षेति भावः । एतेनैवाङ्गीकार्येत्येव पाठ इति वदतां पक्षे आगमवादिनां इत्येत-त्सम्बन्धिमूले शास्त्रयोनित्वाहिकुण्डलाधिकरणादिमूलादौ चोक्तः त्त्वान्तः प्रयोगो नेति वक्तव्यं स्यात् । तात्पर्यनिर्णयेऽपि पाठान्तरं कल्पनीयं स्यात् । इति दूषणं सूचितम् ।

स०व्र०— एतेनेति । स्वातन्त्र्यशब्दस्य स्वेच्छानुसारित्वार्थकत्वेन व्याख्यानेनेत्यर्थः । यदि अचेतनत्वस्वातन्त्र्ययोः परस्परव्याहतिरुच्यते तर्हि स्वातन्त्र्यं नाम चेतनत्वमिति वा अचेतनत्वं नाम अस्वातन्त्र्यमिति वा वक्तव्यम् । तथा च साध्यावैशिष्ट्यमिति भावः ।

अङ्गीकारयित्वेति । ननु अनङ्गमङ्गं सम्पद्यत इति कृद्योगे पूर्वस्मात् च्विप्रत्ययेन 'ऊर्यादि-च्विडाचश्चे'त्यनेन गतिसंज्ञायां 'कुगतिप्रादय' इत्यत्र नित्यं क्रीडाजीविकयोरित्यतो नित्यमित्यस्यानुवृत्तेः 'कुगतिप्रादय' इति समासे अनञ्पूर्वे 'त्त्वो ल्यबिति' ल्यबादेशे अङ्गीकार्येति भवितव्यम् । अङ्गीकारयित्वेति कथमिति चेन्न । अङ्गीकारं करोति अङ्गीकारयति । अङ्गीकारयतीत्यङ्गीकारयित्वेति व्याख्यानाददोषात् । वस्तुतस्तु 'अङ्गीकार्य' इत्येव पाठः । एवं च नानुपपत्तिरिति ध्येयम् । एवमचेतनमपि स्वातन्त्र्येण प्रवृत्तिमदस्त्विति शङ्कायाः स्ववचनविरुद्धत्वेनानुदयात् दूरे बाधकोपन्यास इत्यर्थपरत्वेन मूलं व्याख्याय अस्तु वा शङ्कोदयः, तथाऽपि अनेन मूलेन हेतूच्छित्तिलक्षणबाधकमपि सूचितमित्याह **अनेनैवेति** । स्वानुमाने परकीयाप्रयोजकत्वशङ्कायाः स्वव्याहतत्वव्युत्पादनेनेत्यर्थः । स्वेच्छानुसारित्वलक्षणस्वातन्त्र्याङ्गीकारे चेतन-त्वस्यैवाङ्गीकार्यत्वेनाचेतनत्वानुपपत्तिरिति भावः ।

विट्ठल०— अङ्गीकार इत्यतःपरं अप्रयोजकताशङ्कापरिहारायेत्यनेन मूलेन लब्ध इत्याह **अनेनैवेति** । स्वातन्त्र्येच्छागर्भत्वेन तदङ्गीकारे च तत्कारणस्य चैतन्यस्याप्यङ्गीकारादचेतनत्वरूपहेतूच्छित्तिर्बाधकम् । अन्यथा अकारणकार्योत्पत्त्यापत्तेरिति भावः ।

॥ इति अचेतनत्वस्वातन्त्र्ययोर्विरोधो न साक्षात् अपि तु स्वातन्त्र्यबलेन चैतन्याङ्गीकारणद्वारा ॥
॥ इति स्वव्याघातोपपादनम् ॥

* * *

॥ अथ तत्र प्रमाणविरोधोपपादनम् ॥
॥ अथ च तत्र प्रत्यक्ष-अनुभवविरोधः ॥

५४ सु०— एवमचेतनस्य स्वातन्त्र्याङ्गीकारे स्वव्याहतिमुपपाद्य प्रमाणविरोधमप्युप-पादयति इच्छामीति ।

अनु०— इच्छाम्यहमिति ह्येव निजानुभवरोधतः । अचेतनेच्छापगता

हिशब्देनास्यानुभवस्य विश्वजनप्रसिद्धत्वं सूचयति । एवशब्दस्य अपगतैव इत्यन्वयः । निजानुभवः साक्ष्यनुभवः ।

अहमिच्छामीति तावदिच्छा आत्मसम्बन्धिनी साक्षिणानुभूयते । न च सा द्विकर्तृका सम्भवति, क्वाप्येकस्य व्यापारस्य द्विकर्तृकत्वानुपलम्भात् । ततश्चाचेतनस्येच्छाङ्गीकृता(वैतद)चे(त्त)द् अनुभवविरोधादचेतनस्येच्छाऽपगता नास्तीति यावत् । इच्छाभावे च स्वेच्छानुसारित्वलक्षणं स्वातन्त्र्यं दूरोत्सारितमिति भावः ।

परि०— प्रमाणविरोधमिति । चेतन एव इच्छावत्त्वगोचरसाक्षिरूपप्रमाणविरोधमित्यर्थः **द्विकर्तृकेति** । आत्मान्तःकरणरूपचेतनाचेतनकर्तृकेत्यर्थः ।

गु०दी०— क्वाप्येकस्य द्विकर्तृकत्वानुपलम्भात् इत्यत्र प्रासादादेरंशभेदेन बहुकर्तृकत्वेऽपि स्वस्वांशभागे स्वैकैककर्तृकत्वेन न नियमभङ्ग इति ज्ञेयम् ।

वं०प०— व्यापारस्य इच्छाया अपि व्यापारविशेषत्वादिति भावः ।

कं०रा०— न च सेति । नित्यनिर्विकारस्यात्मन आगन्तुकमिच्छादिकर्तृत्वं न सम्भवति किन्तूत्पत्तिमत्त्वेन विकारित्वादन्तःकरणस्यैव सम्भवतीत्यर्थः ।

श्रीनिधि०— ननु चेतने इच्छाया अनुभवसिद्धत्वेऽपि अचेतनेनास्तीति न युक्तम् । अचेतनेऽपि तत्प्रवृत्त्युपपत्तेरित्यत आह **न च सेति** । एकस्य द्विकर्तृत्वानुपलम्भादिति उक्ते द्वाभ्यां कृते पटे व्यभिचारः स्यात् अतः **व्यापारस्य** इत्युक्तम् । क्रियाया इत्यर्थः ।

शे०वा०— सूचयतीति । एतत्सूचनं च तस्यानपलपनीयत्वज्ञापनार्थमिति बोध्यम् । **अनुभवविरोधादिति** । अहमिच्छामीत्यनुभवविरोधादित्यर्थः । यद्यप्यहमिच्छामीत्यनुभवस्येच्छाया आत्मसम्बन्धितामात्रावगाहित्वेन तद्बलादिच्छाया आत्मसम्बन्धित्वमात्रसिद्धावप्यचेतने तदभावाविषयकत्वान्न बाधकत्वं सम्भवति । तथाऽप्येकस्य व्यापारस्य द्विकर्तृकत्वानुपलम्भसनाथस्याहमिच्छामीत्यनुभवस्याचेतनेच्छाऽभावग्राहकत्वमविरुद्धमित्यभिप्रेत्यैवं बाधकोक्तिरित्यवधेयम् ।

स०व्र०— ततश्चेति । अन्यकर्तृकत्वानुपलम्भसहकृतेन साक्ष्यनुभवेन आत्मसम्बन्धित्वस्यैव विषयीकृतत्वेन एतदनुभवविरोधादित्यर्थः ।

चषकः— द्विकर्तृका । आत्मान्तःकरणसन्निधानात् । तत्सन्निधाननिमित्तभेदाग्रहणादिति यावत् ।

* * *

॥ अथ च तत्रापि 'तस्य भेदाग्रहनिमित्तव्यवहारमात्रत्वं न त्वनुभवत्वम्' इतिपक्षस्य दूषणम् ॥

५५ **सु०— ननु नायमस्त्यनुभवः किन्त्वहमिच्छा(मीच्छा)मीति व्यवहारमात्रम् । तस्यापि निमित्तं भेदाग्रहः । आत्मा हि नित्यो निर्विकारश्चैतन्यमात्रवपुर्न तस्येच्छादिकर्तृत्वमागन्तुकं सम्भवति; किन्त्वन्तःकरणस्यैव प्रसवधर्मत्वात्, तयोश्चात्मान्तःकरणयोर्भेदाग्रहादितरेतरधर्मव्यवहारः प्रवर्तते । भेदाग्रहे च निमित्तं सन्निधानम् । यथोक्तम्, 'तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन' इति । अतोऽनुभवबलाच्चेतनस्यैवेच्छावत्त्वं नाचेतनस्येत्ययुक्तमित्यत आह यदीति ।**

अनु०— यदि भेदाग्रहोऽत्र च ।
कथं स न घटस्य स्यात्

यदि एवमनुभव एव नास्ति किन्तु व्यवहारमात्रम्, अत्र च व्यवहारे भेदाग्रह एव निमित्तमुच्यते, तदा स भेदाग्रहो घटस्य किं (कथं) न स्यात् । व्यवहारहेतुरिति शेषः ।

इदमुक्तं भवति । स्वप्रकाशानुभवापलापदोषस्तावत् । व्यवहारे च निमित्तं नास्ति । न च भेदाग्रहः, विशिष्टव्यवहारस्य तादृशज्ञानकार्यतानियमात्; अन्यथा घटपटावपीतरेतरभेदं न गृह्णीत इतीतरेतरधर्मसंसर्गव्यवहारः स्यादिति ।

परि०— न तस्येच्छादिकर्तृत्वमिति । नित्यत्वानुपपत्तिसिद्धनिर्विकारत्वविरोधादिति भावः । **प्रसवेति** । परिणामिधर्मिकत्वात् तस्येति भावः । तस्मादिति श्लोकस्यायमर्थः । तस्मादात्मा

हीत्यादिना प्रागुक्तयुक्त्या चैतन्यकर्तृत्वयोः क्रमादात्मान्तःकरणधर्मत्वात् । तत्संयोगात् तयोरात्मान्तःकरणयोः सन्निधानात् तत्सन्निधिनिमित्तभेदाग्रहादिति यावत् । लिङ्गमन्तःकरणम् । अचेतनं चेतनावदिव चैतन्योपेतमिति व्यपदिश्यते । गुणकर्तृत्वे चान्तःकरणस्य कर्तृत्वे चोदासीनः कर्तृत्वहीनश्चेतनः कर्तेव कर्तेति व्यवह्रियत इति । 'यदी'त्यनुवादः । तस्यार्थः 'एवमि'त्यादि । 'अत्रे'त्यनुवादः । 'व्यवहार' इति व्याख्या । अस्फुटत्वाद्भावमाह **इदमुक्तमिति** । अनुभवापलापोऽनुभवगोचरानुभवविरुद्ध इति द्योतनाय स्वप्रकाशानुभवापलाप इति स्वप्रकाशत्वविशेषणम् । **विशिष्टव्यवहारस्येति** । इच्छामीतीच्छाविशेषणकात्मविशेष्यकव्यवहारस्येत्यर्थः । **इतरेतरधर्मेति** । घटः पटभेदं स्वस्य न गृह्णाति पटश्च स्वस्य घटभेदं न गृह्णातीति घटोऽपि अहम् आतानवितानात्मक इति व्यवहरतु । पटोऽप्यहं पृथुबुध्नोदराकार इति व्यवहरत्वित्यर्थः । मूले घटस्येति उपलक्षणमिति भावः ।

गु०दी०— प्रसवधर्मत्वात् इत्यत्र उत्पन्नधर्मत्वादित्यर्थः ।

यादु०— नित्यत्वोपपादनाय **निर्विकार इति** । एतदुपपादनाय **चैतन्यमात्रवपुरिति** । **आगन्तुकं सम्भवतीति** । नित्यत्वहानिप्रसङ्गादिति भावः । 'तस्मात्तत्संयोगादि'ति कारिकाया अयमर्थः । यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भेदाग्रहाल्लिङ्ग महदादिसूक्ष्मपर्यन्तमचेतनं तदात्मकमन्तःकरणमिति यावत् चेतनावदिव चैतन्यवदिव भवति व्यवह्रियते । तथा गुणस्य सत्त्वाद्यात्मकस्यान्तःकरणस्य वस्तुतः कर्तृत्वेऽप्युदासीनः कर्तृतारहितश्चेतनः कर्तेव भवति व्यवह्रियते । एवं भेदाग्रहादितरेतरधर्मव्यवहार एव न तु प्रतीतिः । भेदाग्रहेऽपि बीजं दर्शयितुं तत्संयोगादित्युक्तम् । तयोरात्माऽन्तःकरणयोः संयोगः सन्निधानं तस्मादिति । यद्यप्येतत्कारिकाटीकायां भ्रान्तिरियमित्यर्थः इत्युक्तत्वात् प्रतीतिमभ्युपेत्येतरेतरधर्माध्यास एवात्र व्याख्यातः । तथाऽप्युक्तरीत्या व्याख्यानमप्यत्र साङ्ख्यानामभिप्रेतमिति तदीयसम्प्रदायानुसारेणास्या उक्तार्थे सम्मतित्वेनोदाहरणमिति मन्तव्यम् । विशिष्टव्यवहारस्येत्यत्र दण्डपुरुषाविति समूहालम्बनव्यवहारव्यावृत्त्यै विशिष्टेति विशेषणम् ।

वं०प०— प्रसवः विकारः । तद्धर्मवत्त्वादित्यर्थः । कुतो भेदाग्रहो व्यवहारे निमित्तं न चेत्यत आह **विशिष्ट इति** । इच्छावत्त्वविशिष्टो व्यवहारः । **तादृशेति** । विशिष्टेत्यर्थः । **अन्यथेति** । विशिष्टव्यवहारस्य तादृशज्ञानकार्यतामनङ्गीकृत्य भेदाग्रहमात्रकार्यतामङ्गीकृत्यानुभवापलापकरण इत्यर्थः ।

कं०रा०— भेदाग्रहे चेति । आत्मान्तःकरणयोः परस्परभेदाग्रहे चेतरेतरसन्निधानं निमित्तमित्यर्थः । **तस्मादिति** । अचेतनं लिङ्गमन्तःकरणमात्मसन्निधानाच्चेतनवदिव भवति तथा उदासीनो कर्ताऽप्यात्मा

गुणस्यान्तःकरणस्य कर्तृत्वेन तत्सन्निधानात् कर्तेव भवतीत्यर्थः । गुणकर्तृत्वे चेति पाठे गुणस्यान्तःकरणस्य कर्तृत्वे सति तत्सन्निधानकर्तेव भवतीत्यर्थो द्रष्टव्यः । **तादृशेति** । विशिष्टविषयज्ञानकार्यतानियमादित्यर्थः ।

श्रीनिधि०— प्रसवधर्मत्वादिति । प्रसवो स धर्मो यस्यासौ प्रसवधर्मः । सविकारत्वादित्यर्थः । **तस्मात्** तत्संयोगादित्यादि । **अचेतनं** ज्ञानरहितम् । **लिङ्गं** लिङ्गशरीरम् । **तत्संयोगाद्वा** चेतनसंयोगाद्वा चेतनावरकज्ञानवदिति च । **गुणकर्तृत्वे** गुणनिष्ठकर्तृत्वे । आत्मा चाचेतनसंयोगादुदासीनोऽपि कर्त्रेव भवतीति योज्यम् । चशब्दसूचितं दोषमाह **स्वप्रकाशेति** ।

शे०वा०— ननु 'यदि भेदाग्रह' इत्याद्युत्तरभाष्यमनर्थकम् । न च भेदाग्रहस्य व्यवहारकारणत्व-निराकरणार्थं तदिति वाच्यम् । भेदाग्रहस्य व्यवहारकारणतायाः परेणावक्तव्यतया तन्निराकरणस्याप्यनर्थकत्वात् इत्यतोऽनुभवविरोधपरिहारार्थं परेण तस्य वक्तव्यत्वान्न तन्निराकरणपरोत्तरग्रन्थस्यानर्थक्यमित्यभिप्रेत्य तत्पर-तयोत्तरग्रन्थं योजयितुमनुभवविरोधानुपपत्तिशङ्कामुत्थापयति **ननिवति** । ननु व्यवहारस्य व्यवहर्तव्यज्ञानपूर्वक-त्वात् कथमनुभवाभावे तथा व्यवहार, इत्यतो मुख्यव्यवहारस्य तत्सापेक्षत्वेऽपि उपचरितव्यवहारस्य तदभावादस्य च उपचरितत्वान्न विशिष्टज्ञानसापेक्षत्वमित्याह **तस्यापीति** । नन्वात्मसम्बन्धितयेच्छानु-भवत्वमेवास्याभ्युपेत्य तन्मूलकत्वस्यैवोक्तव्यवहारे सम्भवादुपचरितत्वमाश्रित्य भेदाग्रहनिमित्तकत्ववर्णनमनर्थक-मित्यत आत्मन इच्छासम्बन्धित्वानुपपत्तेः तदनुभवत्वायोगात् तदाश्रयणमित्यभिप्रेत्येच्छाया आत्म-सम्बन्धिताऽभावमुपपादयति **आत्मा हीति** । हीति नित्यत्वादिकं श्रुतिप्रसिद्धमिति दर्शयति । तर्ह्यकर्तृक-क्रियाप्रसङ्ग इत्यभिप्रेत्य पृच्छति **किन्त्विति** । उत्तरमाह **अन्तरिति** । तत्र हेतुमाह **प्रसवेति** । विकारि-त्वादित्यर्थः । यद्यन्तःकरणस्याचेतनस्यैवेच्छावत्त्वं कर्तृत्वं च कथं तर्हि चेतनोऽहं चिकीर्षन् करोमीति कृत्यादेः सामानाधिकरण्यव्यवहारः । चेतनस्याकर्तृत्वात् कर्तुश्चाचेतनत्वादित्यतः प्रागुक्तं भेदाग्रहस्येतरेतर-धर्मव्यवहारकारणत्वं तत्स्वरूपोपदर्शनेनाह **तयोश्चेति** । आत्मान्तःकरणयोः सन्निधानाद्भेदाग्रहः । ततश्चे-तरेतरधर्मव्यवहार इत्यत्र तद्वाक्यं पठति **यथोक्तमिति** । यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भेदाग्रहाल्लिङ्गं महदादिसूक्ष्मपर्यन्तमचेतनं तदात्मकमन्तःकरणमिति यावत् । चेतनावदिव चैतन्यवदिव भवति व्यवह्रियते । तथा गुणस्य सत्त्वाद्यात्मकान्तःकरणस्यैव वस्तुतः कर्तृत्वेऽप्युदासीनः कर्तृत्वरहित-श्चेतनः कर्तेव भवति । कर्तेति व्यवह्रियते । एवं भेदाग्रहादितरधर्मव्यवहार एव भवति । न त्वियं प्रतीतिः । भेदाग्रहेऽपि बीजं दर्शयितुं तत्संयोगादित्युक्तम् । तयोरात्मान्तःकरणयोः संयोगः सन्निधानं तस्मादिति । यद्यप्येतत्कारिकाटीकायां 'भ्रान्तिरियमित्यर्थ' इत्युक्तत्वात् प्रतीतिमभ्युपेत्येतरेतरधर्माध्यास एव व्याख्यातः । तथाऽप्युक्तरीत्या व्याख्यानमप्यत्र साङ्ख्यानामभिप्रेतमिति तदीयसम्प्रदायानुसारेणास्या उक्तार्थे सम्मतित्वेनोदाहरणमिति मन्तव्यम् । नन्वित्यादेः सर्वस्याप्याक्षेपस्य मूलारूढतासिद्ध्यर्थं मूलं तत्परतया योजयति **यद्येवमित्यादिना** । विशिष्टव्यवहारस्येत्यत्र दण्डपुरुषाविति समूहालम्बनव्यवहारव्यावृत्त्यै विशिष्टेति विशेषणम् ।

वा०र०— नैवमस्ति अनुभव इति मूलम् । अत्र एवमनुभवो नास्तीति विशिष्टनिषेधात् एवं विद्यमानस्य कस्यचित् अनुभवत्वनिषेधे तात्पर्यम् । सविशेषणे विधिन्यायेनाहमिच्छामीत्येवंभूते अनुभवसिद्धे अनुभवत्वाकारमात्रनिषेधोपपत्तेः । विशेषणविशेष्यान्यतरत् उपसङ्क्रामतः सत्यन्यतरस्मिन् बाधे इति न्याय-शरीरपक्षेऽनुभवसिद्धाहमिच्छामीत्याकारस्योत्त्वोत्तमाशङ्क्यतया तन्निषेधस्य अनुभवत्वरूपविशेष्ये पर्यवसानमिति वा । ततश्चाहमिच्छामीति यदस्ति नासौ अनुभवः । किन्तु व्यवहारमात्रमिति योजनायां यद्येवमाकारकं यदस्ति तदनुभवो न भवति, तर्हि तत् किं इत्येव शङ्कोदयात् किन्तु इत्यनेन तदाशङ्कायां व्यवहारमात्रमेतत् अङ्गीकरणीयम् । न तु आत्मनः इच्छासम्बन्धानुभव इति वक्ष्यमाणत्वाच्च । एतेन यद्येवं न अनुभवः तर्हि कथं अनुभव इति शङ्कोदयानुसारेण प्रकारान्तरेणानुभवस्यैव प्रदर्शनीयतया व्यवहारमात्रमिति परिहारासङ्गति-रिति शङ्का गर्भस्रावेणैव निरस्तेति ज्ञातव्यं इत्याह **किन्त्वितीति** । किन्त्वित्यादीत्यर्थः । अत्र इत्यतःपरं इति शङ्कते इत्यर्थकं किन्तु इत्येतत् तदवताररूपम् । इत्याहेत्यन्तं तु परिहरतीत्यर्थकं व्यवहारमात्रस्यावतार इति विवेकः शिष्यैरेव बोध्यः इति भावेन विशिष्टावतारकरणात् । अत एव व्यवहारमात्रमित्यस्यानुवादेन व्याख्यानम् । न तु प्रतीकमुपादाय । तथैव पाठस्तु स्वरस एव किन्तु इत्येतत् स्थले सर्वत्रावतारद्वयसत्त्वात् । अनुपदमेव तथा दर्शनाच्च इति ज्ञेयम् । **वर्णनमिति अनर्थकमिति** । **वर्णनं** कल्पनं **अनर्थकं** अयुक्त-मित्यर्थः । उक्तव्यवहारसम्भवे सति उपचारादिकल्पनं अयुक्तमिति योज्यम् । मुख्यासम्भवे एव तस्या-श्रयणीयत्वादिति भावः । भामत्यनुसारेणाह **यद्यन्तःकरणस्येत्यादि** । **तद्वाक्यं** इत्यत्र तच्छब्दप्रकृतसाङ्ख्या-चार्यप्रकृतपरः । भामत्यनुसारेण व्याचष्टे **यतः इति** । **भिन्नाधिकरणे युक्तित इति** । अधिकरणे सप्तम्यङ्गीकारात् । भिन्नाधिकरणनिष्ठतया युक्तितः इत्यर्थः । यदधिकरणे कर्तृत्वं न तत्र एव चैतन्यम् । यत्र च चैत्यत्वं न तत्र कर्तृत्वमिति प्रत्येकं तत्तदधिकरण एव सिद्धे इति यावत् । न तु एकस्मिन्नधिकरणे सिद्धे तस्मादित्यर्थः । यद्वा भिन्नेऽधिकरणे ययोस्ते इति बहुव्रीहिः । **भिन्नाधिकरणके युक्तित इति** भिन्नाधिकरणकतया युक्तितः सिद्ध इत्यर्थः । लिङ्गमित्यनूद्य व्याख्यानं **महदादीत्यादि** । तत्तात्पर्यमाह **तदात्मकमिति** । **व्याख्यानमप्यत्रेति** । प्रतीतिमभ्युपेत्य व्याख्यानान्तरम् । **अत एव नान्तःकरणधर्म-स्यात्मन्यारोप इति** । युक्तमिति उत्तरमूले निरस्यते इति भावः ।

स०व्र०— तस्मादिति । यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे, तस्माद्भ्रान्तिरिय-मित्यर्थः । लिङ्गं महदादिसूक्ष्मपर्यन्तम् अचेतनं **तत्संयोगात्** चेतनसंयोगात् चेतना अस्यास्तीति चेतनावत् प्रकृतिसंयोगात् तदिव चेतनमिवेति यावत् । गुणकर्तृत्वे सत्त्वरजस्तमसामेव कर्तृत्वे विद्यमानेऽपि उदासीनः अयं जीवः **तत्संयोगात** प्रकृतिसंयोगात् कर्तेव भवतीत्यर्थः ।

विठ्ठल०— नित्यत्वोपपादनं **निर्विकार इति** । एतदुपपादनाय **चैतन्यमात्रवपुरिति** । **आगन्तुकं सम्भवतीति** । तथात्वे विकारित्वापत्त्या नित्यत्वहानिप्रसङ्गादिति भावः । तस्मात्तत्संयोगादिति कारिकाया

अयमर्थः । लिङ्गमहदादिकं अचेतनकारणं तदात्मकमन्तःकरणमिति यावत् । तत्संयोगादात्मसंयोगलब्धादिति यावत् । तस्माद्भेदाग्रहाच्चेतनवदिव भवति । उदासीनाकर्तैवात्मा गुणकर्तृत्वे सत्त्वादिगुणज्ञानकार्यज्ञानादिकर्तैव भवतीति । चेतनस्येच्छावत्त्वानुभव एव नास्ति किन्तु व्यवहारमित्यस्य किं तद्दूषणं आत्मान्तः-करणयोः भेदाग्रहणव्यवहारे घटस्य स कथं न स्यादित्यापादनं नानुचितम् । व्याप्तिदर्शनादित्यत आह **इदमुक्तं भवतीति** । **अन्यथेति** । अनेनाविशेषो व्याप्तिरित्युक्तं भवति ।

चषकः— लिङ्गमन्तःकरणमचेतनं चेतनावदिव चैतन्योपेतमिति व्यपदिश्यते तथा गुणस्य सत्त्वाद्यात्मकस्यान्तःकरणस्य वस्तुतः कर्तृत्वे **उदासीनः** कर्तृतारहितश्चेतनः कर्तेव व्यवह्रियते । एवं भेदाग्रहादितरेतरधर्मव्यवहार एव । न तु प्रतीतिरिति । **विशिष्टव्यवहारस्य** किञ्चिद्विशेषितार्थप्रत्यायका-भिलपनादिरूपस्य । **तादृशेति** । विशिष्टार्थविषयकेत्यर्थः ।

* * *

॥ अथ च तत्रापि 'गृह्यमाणयोर्भेदाग्रहस्य व्यवहारहेतुत्वं न भेदाग्रहमात्रस्य' इतिपक्षस्य खण्डनम् ॥
॥ अथ तत्रादौ 'कथं स न घटस्य स्यात्' इत्यनुव्याख्यानस्य अष्टधा व्याख्यानम् ॥
॥ अथ अस्य विशिष्टस्य भेदाग्रहस्य अन्तःकरणधर्मत्वं आत्मधर्मत्वञ्चानुपपन्नम् ॥

५६ **सु०**— 'ननु गृह्यमाणयोर्भेदाग्रहो व्यवहारहेतुर्न तु भेदाग्रहमात्रम् । न च घटपटौ स्वरूपं गृह्णीतस्तत्कथमतिप्रसङ्ग' इति चेत् । किमयं विशिष्टो भेदाग्रहोऽन्तःकरणस्य, उतात्मनः ।

नाद्यः; तस्याचेतनत्वेन स्वरूपग्रहानुपपत्तेः, उपपत्तौ वा **स कथं विशिष्टो भेदाग्रहो घटस्य न स्यात्,** तथा च व्यवहारोऽपि स्यात् । नन्वन्तःकरणेऽस्ति चैतन्यारोपो न घटे, अतो नातिप्रसङ्ग इति चेत्; किं तस्य निमित्तम्; सन्निधानमिति चेत्, तर्हि सर्व-गतात्मसन्निधानं घटेऽप्यस्तीति **कथं स न घटस्य स्यात्** । ननु न संयोगमात्रं निमित्तम्, किन्तूपकार्योपकारकभावे सति; स चास्त्यात्मान्तःकरणयोः, 'पुरुषस्य दर्शनार्थमि'त्युक्त-त्वात् इति चेत्; तर्हि घटोऽपि पुरुषस्योपकारक इति **कथं स न घटस्य स्यात्** ।

द्वितीये व्यवहारोऽपि किमात्मन उतान्तःकरणस्य । नाद्यः, तस्य निर्विकारस्य व्यवहारक्रियानुपपत्तेः, उपपत्तौ वा किमिच्छयाऽपराद्धम् । द्वितीयेऽन्यगतेन भेदाग्रहेणा-न्य(त्र)स्य व्यवहारश्चेत् **कथं स न घटस्य स्यात्** ।

परि०— ननु गृह्यमाणयोरिति । स्वस्वरूपज्ञानवतोरन्योन्यभेदाग्रहोऽन्योन्यधर्मसंसर्ग-व्यवहारहेतुरित्यर्थः । **विशिष्ट इति** । स्वरूपग्रहणसहितो भेदाग्रह इत्यर्थः । **व्यवहारोऽपीति** । परधर्मसंसर्गव्यवहार इत्यर्थः । घटस्येत्यनुषङ्गः । **अन्तःकरणेऽस्तीति** । तथा च तस्य सम्भवति प्रागुक्तविशेषणयुक्तभेदग्रह इति भावः । **इत्युक्तत्वादिति** । 'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्ग' इति प्रागुक्तत्वात् । सत्त्वादिगुणात्मान्तः-करणस्य च प्रधानात्मकत्वादिति भावः ।

यादु०— ननु गृह्यमाणयोरिति । स्वस्वकर्तृकग्रहणविषययोरित्यर्थः । **स्वरूपग्रहेति** । स्वविषयक-ग्रहणकर्तृत्वानुपपत्तेरित्यर्थः । **अस्ति चैतन्यारोप इति** । तथा चान्तःकरणं स्वज्ञातृ भविष्यतीति भावः ।

वं०प०— गृह्यमाणयोरिति । स्वेनेति शेषः । **विशिष्ट इति** । स्वेन गृह्यमाणयोरिति विशेषण-विशिष्टेत्यर्थः । एवमुत्तरत्रापि । **तस्येति** । चैतन्यारोपस्येत्यर्थः । **सः** चैतन्यारोपः । तन्निमित्तो व्यवहारश्चे-त्यर्थः । **निमित्तमिति** । चैतन्यारोप इति शेषः । **सः** उपकार्योपकारकभावप्रयुक्तोऽपि चैतन्यारोपः । **द्वितीये** विशिष्टो भेदाग्रह आत्मन इति पक्षे । तज्जन्यो व्यवहार इत्यर्थः । **अपराद्धमिति** । विकारप्राप्तिभियैव हीच्छा त्वया नाङ्गीकृतेति भावः । **अन्येति** । आत्मेत्यर्थः । **अन्यत्र** अन्तःकरणे । **स** आत्मनिष्ठेन भेदाग्रहेणान्यत्र घटेऽप्यात्मधर्मभूतेच्छाव्यवहारः स्यादित्यर्थः ।

कं०रा०— विशिष्ट इति । स्वरूपग्रहविशिष्ट इत्यर्थः । **उपपत्तौ वेति** । अन्तःकरणस्याचेतनत्वेऽपि स्वरूपग्रहविशिष्टात्मभेदाग्रहस्य तत्रोपपत्तौ वा स्वरूपग्रहविशिष्ट आत्मभेदाग्रहः घटस्य कथं न स्यादचेतन-त्वाविशेषात् तथा च घटेऽप्यात्मधर्मव्यवहारः स्यादित्यर्थः । **तस्येति** । अन्तःकरणविषयचैतन्यारोपस्येत्यर्थः । **सन्निधानमिति** । अन्तःकरणचैतन्यारोपस्यात्मसन्निधानं निमित्तमित्यर्थः । **पुरुषस्य दर्शनार्थमिति** । पुरुषस्य **दर्शनार्थं** कैवल्यार्थं तथा प्रधानस्य पंग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्ग इति प्रकृतेः पुरुषोपकारकत्वोक्तेः प्रकृत्यात्मकान्तःकरणस्यापि तदुपकारकत्वं सिद्धमिति भावः । **द्वितीय इति** । स्वरूपग्रहविशिष्टभेदाग्रह आत्मन इति द्वितीयपक्ष इत्यर्थः । **उपपत्तौ वेति** । निर्विकारस्यात्मनो व्यवहाररूपक्रियोत्पत्तावित्यर्थः । **अन्य-गतेनेति** । आत्मगतेन भेदाग्रहणेनान्तःकरणस्य व्यवहारस्य इत्यर्थः ।

श्रीनिधि०— गृह्यमाणयोरिति । विषयसप्तमी । गृह्यमाणनिष्ठयोर्भेदस्तद्ग्रह इत्यर्थः । आत्मान्तः-करणयोश्चात्मनो गृह्यमाणत्वात् घटपटयोश्चान्यतरेण गृह्यमाणत्वाभावादिति भावः । **विशिष्टो भेदाग्रह इति** । गृह्यमाणनिष्ठभेदाग्रह इत्यर्थः । **अन्तःकरणेऽस्ति चैतन्यारोप इति** । एवं चारोपितचैतन्यमेव स्वरूपग्रह इति भावः । **घटोऽपि पुरुषस्योपकारक इति** । जलाहरणादिद्वारेति भावः ।

शे०वा०— ननु गृह्यमाणयोरिति । स्वस्वकर्तृकग्रहणविषययोरित्यर्थः । **स्वरूपग्रहेति** । स्वविषयकग्रहणकर्तृत्वानुपपत्तेरित्यर्थः । **व्यवहारोऽपीति** । इतरेतरधर्मसंसर्गव्यवहार इत्यर्थः । **चैतन्यारोप इति** । तेनान्तःकरणं स्वज्ञातृ भविष्यति । ततश्च तत्प्रयुक्तविशिष्टभेदाग्रहनिमित्तकेतरेतरधर्मसंसर्गव्यवहारो युक्त इति भावः । **नातिप्रसङ्ग इति** । कथं स विशिष्टो भेदाग्रह इत्यादिनोक्तोऽतिप्रसङ्ग इत्यर्थः । उक्तरीत्या वैषम्येणातिप्रसङ्गमूलभूताविशेषासिद्धेरिति भावः । न चैतन्यारोपभावाभावाभ्यामन्तःकरणघटयोरुक्तं वैलक्षण्यम् । चैतन्यारोपहेत्वनुक्त्या तदसिद्धेः । तथा हि । संयोगापरपर्यायं सन्निधानमात्रमेतदारोपहेतुतयाऽभिमतं किंवोपकार्योपकारकभावविशिष्टं तदिति विकल्पं मनसि निधाय निमित्तं पृच्छति **किमिति** । आद्यं शङ्कते **सन्निधानमिति चेदिति** । तदुत्तरतया कथं स न घटस्य स्यादिति वाक्यमेव योजयति **तर्हीति** । द्वितीयपक्षमुत्थापयति **नन्विति** । आत्मान्तःकरणयोरुपकार्योपकारकताऽस्तीत्यत्र तद्वाक्यं प्रमाणयति **पुरुषस्येति** । एतत्पक्षदूषणपरतयाऽपि कथं स न घटस्य स्यादिति वाक्यं सोपस्कारं योजयति **तर्हीति** ।

द्वितीय इति । विशिष्टो भेदाग्रह आत्मन इति द्वितीयपक्ष इत्यर्थः । **किमपराद्धमिति** । ततश्च निर्विकारतयेच्छाकर्तृत्वनिराकरणानुपपत्तिरिति भावः । **द्वितीय इति** । अन्तःकरणस्य व्यवहार इति द्वितीय इत्यर्थः । एतत्पक्षदूषणपरतयाऽपि कथमित्यादिमूलं सोपस्कारं प्रकारान्तरेण योजयति **अन्यगतेनेति** । अन्यगतेन भेदाग्रहेणान्यत्र व्यवहारश्चेदित्येतावानुपस्कारोऽन्यत्तु व्याख्यानमिति द्रष्टव्यम् ।

वा०र०— गृह्यमाणत्वविवक्षायाः उपयोगार्थं व्याचष्टे **स्वस्वेति** । यौ स्वस्वस्वरूपं गृह्णतः तयोः यो भेदाग्रहः इति विवक्षितम् । आत्मान्तःकरणयोस्तु स्वस्वस्वरूपग्राहकतास्तीति अभिमान इति भावः । अचेतनस्यापि घटादेः स्वरूपेण ग्रहो देवदत्तस्यास्ते त्विति कथमेतत् इत्यतो व्याचष्टे **स्वविषयकेति** । **अविशेषेति** । विशेषव्याप्त्यभावात् अविशेषलक्षणसामान्यव्याप्तिबलेन कथं स न घटस्य स्यात् इत्यतिप्रसङ्ग इति वाच्यम् । **उक्तरीत्या वैषम्ये च** । विशेषेऽसिद्ध इति मूलशैथिल्यात् तर्काभासोऽयमिति व्याख्यानं अनेन सूचितमिति ज्ञेयम् । **न चैतन्येति** । वैलक्षण्यं यदुक्तं तन्न सम्भवतीत्यर्थः । **तद्वाक्यं प्रमाणयतीति** । प्रधानस्य पुरुषेण दर्शनार्थमिति प्रधानस्य भोग्यता दर्शिता इत्येवं तदर्थस्य प्राक् टीकायां उक्तत्वात् एतद्वाक्यस्य प्रकृतोपयोग इति स्पष्टम् । सोपस्कर इति पाठः । किं शब्दस्य यथाश्रुतसम्बन्धे अर्थान्तरप्रतिभासशङ्कानिवृत्त्यर्थं उत्तरपदसम्बन्धः । किं शब्दस्य इति सूचयन् विशिष्टमेव प्रतीकतयोपादत्ते **किमपराद्धमितीति** । **अन्यत्त्विति** । कथं इत्यादिकमुर्वरितं इत्यर्थः । अत्र च व्याख्यानत्वोक्तिर्निगदव्याख्यानत्वाभिप्राया । मूलकृता कथमित्यादि पाठमात्रेण एव भाष्यं व्याख्यातं इत्याशयेन यथाश्रुतपाठमात्रकरणात् । यद्धि स्वपाठेनैव व्याख्यायते न तु व्याख्यानान्तरमपेक्षते तत् निगदव्याख्यानमित्युच्यते इति ज्ञेयम् ।

स०व्र०— नन्विति । स्वरूपग्रहणविशिष्टभेदाग्रहस्यैव व्यवहारहेतुत्वात् घटपटयोरितरेतरस्वरूपज्ञानाभावेन तद्विशिष्टभेदाग्रहाभावेन प्रयोजकाभावान्न व्यवहार इति भावः ।

विठ्ठल०— अविशेषोऽसिद्ध इत्याशयेन शङ्कते **ननु गृह्यमाणयोरिति** । स्वकर्तृकग्रहणं विषययोरित्यर्थः । **विशिष्टो भेदाग्रह इति** । गृह्यमाणत्वविशिष्टयोरित्यर्थः । **स्वरूपग्रहेति** । स्वविषयग्रहणं कर्तृत्वानुपपत्तेरित्यर्थः । **अतो नातिप्रसङ्ग इति** । अन्तःकरणे आरोपितचैतन्यसद्भावात् तस्य स्वज्ञातत्वं भविष्यति अतो अहमिच्छामीति विशिष्टव्यवहार उपपद्यते । घटे तु चैतन्यारोपाभावान्न तत्रापि विशिष्टव्यवहारः स्यादित्यतिप्रसङ्ग इति भावः । **पुरुषस्येति** । पुरुषस्य ज्ञानार्थत्वपुरुषोपकारकत्वमस्तीत्यर्थः । **द्वितीय इति** । आत्मगतेन भेदाग्रहेणान्तःकरणे विशिष्टव्यवहारश्चेदात्मगतेन घटपटभेदाग्रहणेनापि घटपटयोरितरेतराभेदाव्यवहारः स्यादविशेषादित्यर्थः ।

चषकः— **गृह्यमाणयोः** स्वस्वकर्तृकग्रहणविषययोः । **द्वितीये** आत्मनो विशिष्टो भेदाग्रह इति कल्पे ।

॥ इति अस्य विशिष्टस्य भेदाग्रहस्य अन्तःकरणधर्मत्वं आत्मधर्मत्वञ्चानुपपन्नम् ॥

* * *

॥ अथ तत्र भेदाग्रहादन्तःकरणधर्मभूतेच्छायाः आत्मनि व्यवहर्तव्यत्वानुपपत्तिः ॥

५७ सु०— किञ्च यदि भेदाग्रहात् अन्तःकरणधर्म एवेच्छा आत्मनि व्यवहियत इत्यङ्गीक्रियते तदा घटस्य अपि आत्मना भेदाग्रहात् पृथुबुध्नोदराकारोऽहमिति व्यवहारः कथं न स्यात् इति गूढाभिसन्धेरुत्तरम् ।

यद्वा अत्र च आत्मान्तःकरणयोश्च, स्फुटं प्रतिभासमानभेदयोरपीति हृदयम्, यदि भेदाग्रहः स्यात् तदा कथं स घटस्य आत्मनश्च न स्यात् इति योजना ।

अथवैवं वदन् प्रष्टव्यः, भेदाग्रहः किं भेदग्रहस्य विरोधी न वेति । नेति पक्षे कथं स घटस्य आत्मना पटादिना वा न स्यात् इत्युत्तरम् ।

परि०— प्रकारान्तरेण योजयति **किञ्चेति** । **गूढाभिसन्धेरिति** । अत्र यथा भेदग्रहसत्त्वाद्भेदाग्रहो नास्त्येवमात्ममनसोरपि भेदग्रहसत्त्वात् तद्विरोधिभेदाग्रहोऽसिद्ध इत्यभिप्रायो निगूढोऽत्र 'मनो मे' इत्यग्रे व्यक्तं भविष्यतीति भावः । अत्र चेति मूलानुवादः । आत्मेत्यादि व्याख्या । चोऽप्यर्थः सन् विरोधद्योतक इति भावेन तदभिप्रायमाह **स्फुटमिति** ।

यादु०— ननु घटस्यात्मना भेदग्रहाभावेऽप्यात्मनो घटेन भेदग्रहोऽस्त्येव । स चाभेदग्रहविरोधी । अतः कथं तस्य पृथुबुध्नोदराकारोऽहमिति व्यवहारापादनमित्यत उक्तं **गूढाभिसन्धेरिति** । तर्हि प्रकृतेऽप्यात्मनो मनसा भेदस्य गृहीतत्वाद्भेदाग्रहोऽसिद्ध इति वक्ष्याम इति प्रतिबन्ध्यभिप्रायोऽत्र गूढ इति द्रष्टव्यम् । गूढाभिसन्धिरत्र चेति पदद्वयेन विवेकिभिर्ज्ञातुं शक्य इति दर्शयन् योजनान्तरमाह **यद्वेति** । हृदयमित्यनन्तरमिदं चाविवेकिनां गूढमिति शेषः । चशब्दोऽप्यर्थ इत्यभिप्रेत्याह **अपीति** । एतदुपर्युत्तरग्रन्थमुत्थापयितुमाह **अथवेति** । यद्यपि भेदग्रहः किं भेदाग्रहविरोधी न वेति विकल्प्य नेति पक्षेऽतिप्रसङ्ग इत्युक्त्वा आद्यपक्षोत्तरत्वेनोत्तरग्रन्थो लापनीयः । अथवेत्यस्य तु नात्र कृत्यमस्ति तथाऽपि नेति पक्षेऽतिप्रसङ्गप्रदर्शनस्य कथं स न घटस्य स्यादित्यनेन लाभात् तन्मात्रस्यैव योजनान्तरमभिप्रेत्य, अथवेत्युक्तमिति ज्ञातव्यम् ।

वं०प०— ननु नैवमस्त्यनुभव इति पूर्वशङ्काया एवोत्तरत्वेन मूलं प्रकारान्तरेण योजयति **किञ्चेति** । अस्मिन्पक्षे मूलं योजयति **यदि भेदाग्रहादिति** । अत्र चेत्यस्यान्वयं दर्शयन् मूलं योजयति **यदि भेदाग्रहः स्यादिति** । चशब्दोऽन्तःकरणसमुच्चयार्थ इत्यभिप्रेत्य आत्माऽन्तःकरणयोश्चेत्युक्तम् । अत्र चेत्यत्र चशब्दोऽप्यर्थ इत्यभिप्रेत्य अत्र चेत्यनयोर्योजनान्तरमाह **स्फुटमिति** । स्फुटं प्रतिभासमानभेदयोरप्यात्माऽन्तःकरणयोरिति वर्तते । **घटस्यात्मनश्चेति** । स्फुटं(प्रतीय)प्रतिभासमानभेदवतो घटस्यात्मनश्चेत्यर्थः । **एवं वदन्निति** । भेदाग्रहादन्यनिष्ठो धर्मोऽन्यत्र व्यवह्रियत इत्यङ्गीकुर्वाण इत्यर्थः । **स** भेदाग्रहः । **घटस्यात्मना पटादिना वेति** । तथा च घटादिनिष्ठः पृथुबुध्नोदराकारादिधर्मोऽप्यात्मनि व्यवह्रियेतेत्यर्थः । न च घटभेदग्रहण एवास्तीति न तदग्रहनिमित्त उक्तव्यवहार इति वाच्यम् । स्यादिदं यद्ययं भेदग्रहो भेदाग्रहविरोधी स्यात् । न चैवम् । अविरोधित्वाङ्गीकारादिति भावः ।

कं०रा०— नन्वविदितभेदस्यापि सम्बन्धित्वेन ग्रहणं किं न स्यादित्यत आह **आत्मनीति** । अविदितभेदस्यापि सम्बन्धित्वेन ग्रहणे मनसि चात्मन्यप्यात्मसम्बन्धित्वग्रहणप्रसङ्गादविदितभेदस्याप्यस्तु सम्बन्धित्वग्रहणमित्येतदयुक्तमिति भावः ।

श्रीनिधि०— **गूढाभिसन्धेरिति** । भेदाग्रहः प्रतिबन्धक इति परेण समाधाने शङ्कते ममापि तुल्यमिति गूढाशय इत्यर्थः । **अथवैवंवदन्निति** । पूर्वं यदि स्फुटं प्रतिभासमानभेदयोरपि यदि भेदाग्रहः स्यादित्यादित्यापादकम् । अत्र तु भेदग्रहः भेदाग्रहप्रतिबन्धकः न भवेदिति विशेषः । **घटस्याप्यात्मभेदाग्रहादिति** । आत्मना घटसम्बन्धिभेदाग्रहादित्यर्थः । **घटस्यात्मना पटादिना चेति** । **सः** भेदग्रहः आत्मान्तरेणेति भावः ।

शे०वा०— उत्तरग्रन्थमुत्थापयितुं 'कथं स न स्यादि'त्येतद्दूषणान्तरसमर्पकतयाऽपि योजयति **किञ्चेति** । नन्वात्मनो घटेन सह भेदग्रहसद्भावात् तस्यैव च भेदाग्रहविरोधित्वात् कथं तस्य पृथुबुध्नो-

दराकारोऽहमिति व्यवहारापादनमित्यत उक्तं **गूढाभिसन्धेरिति** । तर्ह्यात्मनोऽपि मनसा भेदस्य गृहीतत्वात् तस्यैव च भेदाग्रहविरोधित्वात् स एवासिद्ध इति न तद्बलादुक्तव्यवहारनिर्वाह इति प्रतिबन्ध्यभिप्रायो गूढ इति द्रष्टव्यम् ।

योजनान्तरमाह **यद्वेति** । अत्र चेत्यस्य व्याख्या **आत्मान्तःकरणयोश्चेति** । तस्यैव तात्पर्यमाह **स्फुटमिति** । **इति हृदयमिति** । इति भाव इत्यर्थः । चशब्दः अप्यर्थ इत्यभिप्रेत्याह **अपीति** ।

वा०र०— इत्येतत् दूषणान्तरेति । इत्येतत् इति द्वितीयान्तम् ।

स०व्र०— गूढाभिसन्धेरिति । अत्र भेदाग्रहे स्वेनोक्ते परेण तद्विरुद्धभेदग्रहे सति भेदाग्रह एवानुपपन्न इत्युक्ते तर्हि मनसोऽपि भेदग्रहात् न भेदाग्रह इत्यभिप्रायादिति भावः । अत्र चेत्यस्य व्याख्या आत्मान्तः-करणयोश्चेति । तस्यैव तात्पर्यमाह **स्फुटमिति** । तर्हि अस्मिन् व्याख्याने आपादनप्रकारः कथमित्यत आह **यदि भेदाग्रह इति** । स्फुटं प्रतिभासमानभेदयोरपि आत्मान्तःकरणयोर्यदि भेदाग्रहः स्यादित्यर्थः ।

विठ्ठल०— व्यवहारोऽपि किमात्मन एवेत्याद्यपक्षे दोषान्तरमाह **किञ्चेति** । **यदि भेदाग्रहादिति** । आत्मगतान्तःकरणप्रतियोगिकभेदाग्रहादित्यर्थः । **घटस्येति** । आत्मना घटप्रतियोगिकभेदाग्रहादित्यर्थः । नन्वात्मनो यदन्यो घट इति भेदाग्रहविरोधिनो भेदग्रहणस्य विद्यमानत्वात् कथं भेदाग्रहमूलकः पृथुबुध्नो-दराकारोऽहमिति व्यवहारः स्यादित्यापादनमित्यत उक्तम् । **गूढाभिसन्धेः** पूर्वपक्षिणः प्रति गूढाभिसन्धेः सिद्धान्तिन उत्तरमित्यर्थः । उक्तकारकाभिसन्धेः पूर्वपक्षिणानुद्घाटितत्वात् सिद्धान्त्यपि स्वाभिसन्धिगूढ इत्ये-वोत्तरमाहेति भावः । तर्हि प्रकृतेऽप्यात्मनो मम मन इति मनसा भेदस्यैव गृहीतत्वात् भेदाग्रहसिद्ध इत्यभि-सन्धिर्गूढ इति ज्ञेयम् । इदानीं मद्वचेति मूलपदमभिसन्धिसूचकमिति दर्शयन् मूलं योजयति **यद्वेति** । **अत्र चेति** । पदद्वयस्य आत्मान्तःकरणयोः स्थूलं प्रति भासमानभेदयोरपीति तात्पर्यं अयमभिसन्धिर्गूढ इति ज्ञेयम् । अत्र स्फुटं प्रतीयमानभेदयोरात्मान्तःकरणयोरपि भेदाग्रहः स्यात् । तदा कथं अभेदाग्रहो घटस्यात्मनश्च न स्यादित्येकतया सम्बन्धो ज्ञातव्यः । आत्मान्तःकरणयोः स्पष्टं भेदोपपादकं मनो म इत्युत्तरमूलं प्रकृतेन सङ्गमयितुं प्रकारान्तरेण कथं सन् घटस्येत्येतद्योजयति **अथवेति** । **एवं वदन्निति** । अहमिच्छामीत्ययं नानुभवः किन्तु भेदाग्रहनिमित्तं व्यवहारमिति वदन्नित्यर्थः । **नेति पक्ष इति** । भेदाग्रहोऽत्र व्यवहारे कारणं भेदग्रहश्च भेदाग्रहविरोधी नेति पक्ष इत्यर्थः ।

चषकः— गूढाभिसन्धेरिति । घटकर्तृकस्य स्वानुयोगिकात्मप्रतियोगिकभेदग्रहस्याभावेऽप्यात्म-कर्तृकस्वानुयोगिकघटप्रतियोगिकभेदग्रहस्याभेदग्रहविरोधिनः सत्त्वेन न पृथुबुध्नोदराकारोऽहमिति व्यवहार इतिवत् प्रकृतेऽपि मनःकर्तृकग्रहस्य भावेऽप्यात्मकर्तृकस्वानुयोगिकमनःप्रतियोगिकभेदग्रहस्य तदग्रहविरोधिनः सत्त्वेन तदग्रहोऽसिद्ध इति न तादृशव्यवहार इत्याशयोऽत्र निगूढ इति ध्येयम् ।

॥ इति भेदाग्रहादन्तःकरणधर्मभूतेच्छायाः आत्मनि व्यवहर्तव्यत्वानुपपत्तिः ॥
॥ इति तत्र 'कथं स न घटस्य स्यात्' इत्यनुव्याख्यानस्य अष्टधा व्याख्यानम् ॥

* * *

॥ अथ तत्र 'मनो म' इतिवत् 'अहमिच्छामि' इति व्यवहारस्य
अनुभवनिमित्तत्वमेव न तु भेदाग्रहनिमित्तत्वम् ॥

५८ **सु०**— 'ननु भेदग्रहो भेदाग्रहविरोधी, स चास्ति घटे; इति कुतस्तत्र भेदाग्रहस्तत्प्रयुक्तो व्यवहारो वे'ति गूढाभिसन्धिमजानतो द्वितीयपक्षमाशङ्क्याह **मन इति** ।

अनु०— मनो म इति भेदतः ।
मनसोऽपि गृहीतत्वात्

भेदत इति तृतीयार्थे तसिः । यदि भेदग्रहो भेदाग्रहविरोधीति भेदेन गृह्यमाणे घटे न भेदाग्रह इत्युच्यते, तदा **मे मन इति मनसोऽपि** भेदेन **गृहीतत्वात्** नात्मना भेदाग्रहः स्यात् । तथा च भेदाग्रहनिमित्तः 'अहमिच्छामी'ति व्यवहार इत्यसत्, किन्त्वनुभवनिमित्त एव ।

अत एव नान्तःकरणधर्मस्यात्मन्यारोप इत्यपि युक्तम्, भेदग्रहसद्भावेन आरोपहेतोर्भेदाग्रहस्यायोगात् । न ह्यविदितभेदं सम्बन्धितया गृह्यते, आत्मन्यपि प्रसङ्गात् ।

परि०— गूढाभिसन्धिमिति । आत्ममनसोरप्येवमित्यभिप्रायमजानत इत्यर्थः । **द्वितीयेति** । विरोधीति पक्षमित्यर्थः । **तसिरिति** । 'प्रतियोगे पञ्चम्यास्तसिरि'ति सूत्रे 'आद्यादिभ्य उपसङ्ख्यानमि'त्युक्तेराद्यादेश्चाकृतिगणत्वादिति भावः । ननु मनो मे इत्यनेन कथं भेदग्रहः प्राप्त इत्यत आह **न हीति** । **आत्मन्यपीति** । ममाहमिति सम्बन्धितया ग्रहणप्रसङ्ग इत्यर्थः ।

यादु०— एवं तर्हि प्रकृतेऽपि भेदाग्रहोऽसिद्ध इत्युत्तरस्य स्पष्टत्वात् कथं शङ्केत्यत उक्तं **गूढाभिसन्धिमजानत इति** । **द्वितीयमिति** । पूर्वस्याप्युत्तरापेक्षया द्वितीयत्वादाद्यमित्यर्थः । विकल्पितपक्षयोरेकस्य दूषणेऽवशिष्टमिति यावत् । **आहेति** । निगूढं प्रतिबन्ध्यभिप्रायं स्पष्टयतीत्यर्थः । 'तस्मात् तत्संयोगादचेतनमि'ति कारिकाटीकायां यद्भान्तिरियमित्यर्थः इत्युक्तं तदपि दूषयति **अत एवेति** । ननु मे मन

इत्यन्तःकरणमात्मसम्बन्धितयैवानुभूयते न भिन्नतयेत्यत आह **न ह्यविदितेति** । अविदितभेदेऽपि सम्बन्धिताग्रहे स्वात्मन्यपि ममाहमिति सम्बन्धिताग्रहः स्यादिति बाधकमाह **आत्मन्यपीति** । अन्यथेति शेषः ।

वं०प०— स चेति । भेदग्रहः । **घट इति** । घटविषयेऽस्तीत्यर्थः । **तत्र** आत्मनि । **व्यवहारः** पृथुबुध्नोदराकारोऽहमित्यादिः । इति द्वितीयं पक्षमित्यन्वयः । **गूढाभिसन्धिमजानत इति** । एतच्छङ्कोत्तरत्वेन 'मनो म' इत्यनेन वक्ष्यमाणो गूढो यः सिद्धान्तिनोऽभिसन्धिः तमजानतः पूर्वपक्षिणः । **द्वितीयपक्षं** तेन स्वीकृतं पक्षमिति यावत् । **घटे** विषये । **न भेदाग्रह इति** । घटधर्मिक आत्मादिप्रतियोगिको यो भेदः तद्ग्रह आत्मन्यस्तीति न तत्प्रयुक्तो व्यवहार इत्युच्यत इत्यर्थः । **नात्मनेति** । मनोधर्मिक आत्मप्रतियोगिको यो भेदः तदग्रह आत्मनि नास्तीत्यर्थः । **आरोप इति** । पूर्वं स्फटिके लौहित्यमिवान्तःकरणगतमिच्छादि प्रतिफलितमित्यभिप्रायः । अत एवेत्युक्तं विशदयति **भेदग्रहेत्यादिना** ।

कं०रा०— ननु मे मन इत्यात्मसम्बन्धित्वेन मनसैव गृहीतत्वेऽपि तद्भिन्नत्वेनागृहीतत्वात् कथमुच्यते मनो म इति भेदतः मनसोऽपि गृहीतत्वादितीत्यत आह **न हीति** । यद्यस्मादविदितभेदं तस्य तत्सम्बन्धित्वेन ग्रहादर्शनान्मे मन इति सम्बन्धग्रहानुसारेणात्मभिन्नतया मनसो गृहीतत्वं निश्चीयत इति भावः ।

श्रीनिधि०— तत्प्रयुक्तो व्यवहार इति । 'पृथुबुध्नोदरो घट' इति व्यवहार इत्यर्थः । **अत एवेति** । आत्मान्तःकरणयोर्भेदाग्रहासम्भवादेवेत्यर्थः । ननु मे मन इति प्रतीतौ न भेदो विषयः किन्तु सम्बन्ध एवेत्यत आह **न ह्यविदितभेदमिति** ।

शे०वा०— एवं तर्हि प्रकृतेऽपि भेदाग्रहोऽसिद्ध इत्युत्तरस्य स्पष्टत्वात् कथं शङ्केत्यत उक्तं **गूढाभिसन्धिमजानत इति** । **द्वितीयमिति** । पूर्वस्याप्युत्तरापेक्षया द्वितीयत्वात् द्वितीयमित्युक्तम् । वस्तुतस्त्वाद्यमित्यर्थः । **आहेति** । गूढप्रतिबन्ध्यभिप्रायं स्पष्टयतीत्यर्थः । 'तस्मात्तत्संयोगादचेतनमि'ति कारिकाटीकायां 'यद्धान्तिरियमित्यर्थ' इत्यादिना कृतिचैतन्ययोः सामानाधिकरण्यानुभवमभ्युपेत्य तद्धमत्वं वर्णितं तदपि दूषयति **अत एवेति** । ननु मे मन इत्यन्तःकरणमात्मसम्बन्धितया गम्यते न तु भिन्नतयेति कथं 'मनो म इति भेदतः । मनसोऽपि गृहीतत्वादि'त्युच्यत इत्यत आह **न हीति** । अविदितभेदस्यापि मनसः सम्बन्धितया ग्रहे बाधकमाह **आत्मन्यपीति** । अन्यथेति शेषः । अविदितभेदस्यापि मनसः सम्बन्धितया ग्रहे आत्मनः सकाशादविदितभेदस्याप्यात्मनो ममाहमित्यात्मसम्बन्धितया ग्रहः स्यादित्यर्थः ।

वा०र०— द्वितीयं पक्षमिति मूलपाठानुसारेण द्वितीयमितीति संविभक्तिकी प्रतीकोपादानम् । भेदग्रहो भेदाग्रहविरोधीति पक्षस्य प्रथमपक्षतया तद्वितीयत्वोक्तिः अयुक्ता इत्यतः तामुपपादयति **पूर्वस्यापीति** । अयमाशयः । यत्राद्यद्वितीयपुरस्कारेण व्यवहारः तत्र द्विपशब्दस्याद्वितीयपरत्वं यथाश्रुतमेव । यत्र तु एतयोः पक्षयोः एकस्मिन्निरस्ते द्वितीयोऽवशिष्यते इत्यादि वचनं तत्र एकत्वं द्वितीयत्वेऽव्यवस्थया एव व्यवहीयते ।

तथा चात्रापि मूलेन पक्षे इति सामान्येन पूर्वमुक्तेः तत्पक्षापेक्षयाऽन्यत्वसमर्पकद्वितीयप्रयोगविवक्षिको युक्त एव । विकल्पक्रममपेक्ष्य द्वितीयस्यानाश्रयणादिति विवक्षया प्राप्तमर्थं अभिनयेन दर्शयति **वस्तुतस्त्विति** । **अभ्रमत्वं वर्णितमिति** । पूर्वं तु तत्कारिकाव्याख्यानसम्प्रदायानुसारेण भेदाग्रहनिमित्तं व्यवहारमात्रमिति एतत्साधकतया तत्कारिकोदाहरणमिति तु प्रागेव टीकाकृतोक्तं इति ज्ञेयम् । **ममाहमितीति** । मे चैतन्यमिति तु व्यवहारमात्रं सिद्धमेवेति भावः ।

स०व्र०— ननु मे मन इति मनसो भिन्नत्वेन न ग्रहणम् । येन भेदाग्रहविरोधिभेदग्रहसद्भावः । किं तु आत्मसम्बन्धित्वेनैव ग्रहणमित्यत आह **न ह्यविदितभेदमिति** । **आत्मन्यपीति** । सम्बन्धित्वेन ग्रहणस्येति शेषः ।

विट्ठल०— आद्यं पक्षमाशङ्कते **नन्विति** । नन्वात्मान्तःकरणयोर्भेदाग्रहस्य विरोधिनोऽभावाद्भेदाग्रहो नास्तीति सिद्धान्त्यभिमतत्वात् कथमियमाशङ्केत्यत आह **गूढाभिसन्धिमिति** । एवं तर्हि आत्मान्तःकरणयोरपि भेदाग्रहोऽस्तीत्यभिसन्धिमित्यर्थः । **द्वितीयपक्षमिति** । आद्यपक्षस्याप्युत्तरपक्षापेक्षया द्वितीयत्वादित्थमुक्तिः विकल्पितपक्षयोरेकस्य दूषणे अविशिष्टमिति यावत् । आद्यपक्षमित्यर्थः । क्वचित्पुस्तकेषु द्वितीयं पक्षमित्यस्य कुण्डलं लिखित्वा आद्यपक्षमिति लिखितं वर्तते । **आह** इत्यस्य स्वाभिसन्धिमुद्घाटयतीत्यर्थः । **अहमिच्छामीति** । इच्छामीत्ययं व्यवहार इति योजना । मनसः अन्तःकरणधर्मस्यात्मन्यापाद्यारोपितमिच्छामीति व्यवहारः । नन्वनुभव इति पक्षं दूषयति **अत एवेति** ; अत एवेत्युक्तं व्यञ्जयति **भेदग्रहेति** । ननु मनो म इत्यात्मसम्बन्धितामात्रेण प्रतीयते न तु भिन्नतया अतः कथमियं प्रतीतिर्भेदग्रहरूपतयोपन्यस्यत इत्यत आह **न हीति** । अविदितभेदस्यापि मनसः सम्बन्धितया प्रतीत्यङ्गीकारे स्वात्मन्यपि ममाहमिति सम्बन्धितया प्रतीतिप्रसङ्ग इति । बाधकमाह **आत्मन्यपीति** ।

* * *

॥ अथ मनसः साक्षिवेद्यत्वम् ॥

५९ सु०— केन पुनः प्रमाणेन मनो गृह्यते । साक्षिणेति वदामः ।

परि०— आनुमानिकत्व(लक्षण)पक्षे मनो म इति भेदग्रहायोगं मन्वानः पृच्छति **केनेति** ।

यादु०— मनसोऽपि गृहीतत्वादित्यत्र कारणानुक्तेस्तटस्थः पृच्छति **केनेति** । पुनःशब्दो वाक्यालङ्कारे । **साक्षिणेति** । तथा च मूले साक्षिणेति पूरणीयमिति भावः । तेन मूलोक्तं मनसो यत्साक्षिगृहीतत्वं तदुपपादनायैवेयं चर्चाऽतो नासङ्गतिशङ्केति ध्येयम् ।

शे०वा०— ननु नात्मभिन्नतया मनसा तावन्मनसो ग्रहणं सम्भवति । मनसोऽतीन्द्रियत्वान्मनोविषयत्वाभावेन तद्भेदग्राहकताया अनुभवविरुद्धत्वात् । अन्यस्य च प्रमाणस्याभावात् । तथा च मे मन इति भेदग्रहस्यैवाभावेन आत्मान्तःकरणयोर्भेदाग्रहसम्भवाद्युज्यत एव तन्निमित्तकोऽहमिच्छामीति व्यवहार इत्यभिप्रेत्य शङ्कते **केनेति** । केनेत्याक्षेपे न केनापीत्यर्थः । आत्मनो भिन्नत्वेनेति शेषः । पुनःशब्दो वाक्यालङ्कारे । साक्षिविषयत्वान्मनसो मे मन इत्यात्मभिन्नत्वेन तद्ग्रहणं साक्षिणा सम्भवतीति भावेन सिद्धान्तयति **साक्षिणेति वदाम इति** ।

वा०र०— 'केन पुनः प्रमाणेने'ति मनःसाधकप्रमाणाक्षेपो न युक्तः । आत्मनो भिन्नत्वेन मनसो गृहीतत्वोक्तौ तथा गृहीतत्वं केन प्रमाणेनैव इत्येवाक्षेप्तव्यत्वात् इत्यतः तस्याक्षेपस्य तत्रैव तात्पर्यात् न दोष इत्याशयेनात्मभेदपुरस्कारेणैव मनःसिद्ध्यसम्भवमुत्तरग्रन्थार्थतया दर्शयन्नवतारयति **ननु नात्मभिन्नतयेति** । उक्ताशयेनैवोत्तरत्राशेषपूरणमिति ज्ञेयम् । अत्र मनसेत्युपलक्षणम् । चक्षुरादिपञ्चेन्द्रियैरपीति ज्ञेयम् । अत एव मनसो अतीन्द्रियत्वरूपहेतुरिन्द्रियमात्रसाधारण एव वक्ष्यते इति न दोषः । अनुमानादिनेत्यादिपदेन अर्थापत्तिरागमश्च गृह्यते । **अन्यस्य च** इत्यस्योपमानादेः इत्यर्थः । अभावादित्यस्य पृथक्प्रमाणतयाऽभावादित्यर्थः । यद्वाऽन्यस्य सादृश्यादिनियतविषयत्वेन मनसा आत्मभिन्नत्वे प्रमाणस्याभावात् प्रमाणत्वेनाभावात् तत्प्रमाणत्वानुपपत्तेरिति यावत् इति योज्यम् । उक्ताक्षेपफलं दर्शयन् तद्वैय्यर्थ्यं परिहरति **तथा च इति** । अत एव तस्य च तेनैव आत्मनः इत्येतत्प्रसङ्गात् अन्ते मूलकृद्वक्ष्यतीति भावः ।

स०व्र०— 'ननु मनो म इति भेदत' इत्यनेन मनसो भिन्नत्वेन गृहीतत्वात् न भेदाग्रह इत्युक्तं तदयुक्तम् । मनसो भिन्नत्वग्राहकतादृशप्रमाणस्यैवाभावादित्यभिप्रेत्य शङ्कते **केन पुनरिति** ।

विठ्ठल०— 'अन्यथेति ग्राह्यं मनसोऽपि गृहीतत्वादि'त्यत्र करणानुक्तेस्तार्किकः पृच्छति **केनेति** । **साक्षिणेति** । तथा च साक्षिणेति मूले पूरणीयमित्युक्तं भवति ।

* * *

॥ अथ तत्रादौ मनसश्चक्षुरादिप्रत्यक्षावेद्यत्वम् ॥

६० सु०— तथा हि । न तावच्चक्षुरादिना तदवगमः, अरूपिद्रव्यत्वात्, चक्षुरादिद्रव्यापारेऽप्युपलब्धेः ।

परि०— कुतः साक्षिणेत्यतः परिशेषादिति भावेन तमाह **तथा हीत्यादिना** तस्मात् सिद्धं साक्षिग्राह्यत्वं मनस इत्यन्तेन ।

श्रीनिधि०— चक्षुराद्यव्यापारेति । चक्षुरादिव्यापाराभावेऽपीत्यर्थः ।

शे०वा०— भवेदेतदेवं यदि मनसः साक्षिविषयत्वं सिद्धं स्यात् तदेव कुत इत्यतः प्रकारान्तरेण तदसिद्धेः परिशेषेण साक्षिविषयत्वसिद्धिरित्यभिप्रेत्य प्रसक्तप्रमाणनिरासेन परिशेषमुपपादयितुं प्रतिजानीते **तथा हीति** । किं प्रत्यक्षेण मनसो ग्रहः किंवाऽनुमानेन अथवा आगमेनेति विकल्पान्मनसि निधायाद्यं दूषयति **न तावदिति** । तत्र चक्षुर्मात्रेण तदनवगमे हेतुमाह **अरूपिद्रव्यत्वादिति** । द्रव्यत्वमात्रं घटे व्यभिचारीति पूर्वभागः । तावन्मात्रं च गुणादौ गतमिति चरमभागः । अरूपित्वं चात्र रूपात्यन्ताभाववत्त्वमेवाभिमतं न तु तत्प्रागभाववत्त्वं तत्प्रध्वंसवत्त्वं वा । तथा सति गुणादौ व्यभिचाराभावेन द्रव्यपदवैयर्थ्यापत्तेरिति द्रष्टव्यम् । एवं चक्षुषोऽसाधारणदोषेण तत्र प्रामाण्यं निराकृत्य तत्र दोषान्तरमपि सूचयन् चक्षुरादिना तदनवगमे हेतुमाह **चक्षुरादीति** । चक्षुर्मात्रेण तदनवगमस्य पूर्वेण प्राप्तावपि चक्षुरादिना तस्य तेनाप्राप्तेरस्य न तत्र हेत्वन्तरत्वमिति चशब्दाभावः ।

वा०र०— प्रकारान्तरेणेति । वक्ष्यमाणरीत्या प्रत्यक्षादिप्रमाणरूपप्रकारान्तरेणेत्यर्थः । **परिशेषेणेति** । मनः साक्षी प्रमाणं ग्राह्यम् । प्रमाणान्तरेणानुपपद्यमानग्रहणत्वे सति सप्रमाणकत्वात् । यद्यदन्यप्रमाणेनानुपपद्यमानग्रहणत्वे सति सप्रमाणकं तत्तत्प्रमाणकम् । यथा रूपं चक्षुः प्रमाणकं इति परिशेषप्रयोगो ज्ञेयः । उपपादयितुं इति मूले चक्षुरादिनेत्युपलक्षणम् । मनसापीत्यपि ज्ञेयम् । चक्षुराद्यव्यापारेऽपि इत्येतन्मूलस्य व्यापारेऽव्यापारे चेति नार्थः । किन्तु तद्व्यापाराभाव एवोपलब्धेः तस्यातीन्द्रियत्वात् इत्यर्थो विवक्षितः । तेन मनोव्यावृत्तिरपि सिद्ध्यति । अत एवोक्तमूलाशयं स्पष्टयितुं केनेत्येतदवतारे मनःपुरस्कारेण चक्षुराद्युपलक्षणामाश्रित्यातीन्द्रियत्वरूपहेतुः प्राक्टीकाकृतोक्तिरिति ज्ञेयम् । चक्षुरादिना तदवगमाभावं प्रतिज्ञाय चक्षुर्मात्रेणानवगमे हेत्वभिधानमसङ्गतमित्याशङ्कापरिहाराय नेदं चक्षुरादिसाधारणदूषणम् । अपि तु चक्षुमात्रस्य गमकत्वपक्षे । साधारणं दूषणं तु चक्षुरादि इत्युत्तरवाक्योक्तमिति न दोषः इत्याशयेन तथा योजयति **तत्र चक्षुर्मात्रेणेति** । **घटे व्यभिचारीति** । स्थित्यापन्नघटादावित्यर्थः । मुरारिभट्ट्यां तथैवोक्तेः । अन्यथा घटस्यापि प्रथमक्षणे चक्षुर्ग्राह्यत्वाभावेन साध्यस्यापि सत्त्वात् तत्र व्यभिचाराभावापातात् इति बोध्यम् । प्रथमक्षणावच्छिन्नघटेऽचाक्षुषसाधकतया उक्ता रूपिद्रव्यत्वनिष्कर्षो मुरारिभट्ट्यां कृतः तत्प्रकारस्यात्रायोगात् । अत्र विवक्षितमर्थमाह **अरूपित्वं चेति** । **गुणादाविति** । प्रागभावप्रध्वंसयोः प्रतियोगिसमानाश्रयतया प्रतियोग्यनधिकरणे गुणादाववृत्तेः इति भावः । **द्रव्यपदेति** । उपलक्षणमेतत् । दृष्टान्ततयाऽभिमते वाद्यादौ रूपप्रागभावप्रध्वंसाभावयोः अभावेन साधनवैकल्यं च स्यात् इत्यपि ज्ञेयम् । **चक्षुष इति** । चक्षुषः प्रामाण्यं निराकृत्येति सम्बन्धः । **तत्रेति** । चक्षुषः प्रामाण्यमित्यर्थः । **चक्षुरादिनेति** । चक्षुःसहितरसनादिप्रमाणेनेत्यर्थः । उत्तरहेतो रसनाद्यंश इव चक्षुरंशेऽपि प्रवृत्तेरिति भावः । **चक्षुरादिनेति** । द्वितीयस्य रसनादिसहितचक्षुषेत्यर्थः । पूर्वहेतोः चक्षुषाऽनवगमसाधकत्वेऽपि रसनादिना नवागमसाधकत्वादिति भावः । चक्षुरंशे दूषणान्तरत्वप्रयुक्तचशब्दप्रयोगस्य कर्तव्यत्वात् तदकरणं दोषः इत्यत आह **चक्षुर्मात्रेणेति** ।

स०व्र०— अरूपिद्रव्यत्वादिति । उपलक्षणमेतत् । निस्स्पर्शिद्रव्यत्वादित्यपि द्रष्टव्यम् ।

विट्ठल०— अत एव मूलोक्तं मनसः साक्षिवेद्यत्वं साधयितुमाह **तथा हीति** ।

॥ इति मनसश्चक्षुरादिप्रत्यक्षावेद्यत्वम् ॥

* * *

॥ अथ तत्र मनसोऽनुमानावेद्यत्वम् ॥

६१ सु०— न चानुमानेन, लिङ्गाभावात् । नन्वस्ति युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् । तथा हि । बाह्येन्द्रियेषु स्वैः स्वैर्विषयैर्युगपत्सन्निकृष्टेष्वात्मनाऽधिष्ठितेष्वपि न युगपज्ज्ञानानि जायन्ते । तेन ज्ञायतेऽस्त्येतेभ्योऽन्यत्सहकारि, यत्संयोगक्रमवशाज्ज्ञानक्रमः प्रक्रमत इति ।

परि०— तार्किकमतमाशङ्कते **नन्वित्यादिना अत्रोच्यत इत्यन्तेन** । न्यायसूत्रं पठित्वा विवृणोति **युगपदित्यादिना** । **बाह्येन्द्रियेष्विति** । शष्कुलीं भक्षयतः पुंस इति योज्यम् ।

यादु०— गौतमसूत्रोक्तं लिङ्गमाशङ्कते **नन्वस्तीति** । युगपज्ज्ञानानुत्पत्तेर्ज्ञानधर्मत्वात् कथं मनोलिङ्गतेत्यपेक्षायां 'रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठापकान्तरापेक्षाण्ययुगपदुत्पत्तेः । तद्यथाऽनेकशिल्पिपर्यवदातस्य पुरुषस्यानेकं वा स्यादित्युगपत्सन्निधानेनावस्थितमपि हस्ताद्यधिष्ठापकापेक्षं न युगपदनेकां क्रियां निर्वर्तयति । तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति । तस्मादधिष्ठापकान्तरमपेक्षत' इति न्यायवार्तिकं मनसि निधाय सूत्रार्थमुपपादयति **तथा हीति** । **युगपत्सन्निकृष्टेष्विति** । इदं च दीर्घशष्कुलीभक्षणदशायां द्रष्टव्यम् ।

वं०प०— एतेभ्यः आत्मनो बाह्येन्द्रियेभ्यश्च ।

श्रीनिधि०— आत्माधिष्ठितेष्वपीति । आत्मसम्बन्धस्य सर्वदाविद्यमानत्वेऽपि कार्यानुकूलादृष्टवदात्मसंयोगकादाचित्क इति भावेनैवमुक्तम् ।

शे०वा०— द्वितीयं दूषयति **न चेति** । गौतमसूत्रोक्तं लिङ्गमाशङ्कते **नन्वस्तीति** । युगपज्ज्ञानानुत्पत्तेरन्यथासिद्धत्वादप्रयोजकत्वाच्च न मनोलिङ्गत्वमित्याशङ्क्य 'रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठापकान्तरापेक्षाण्ययुगपदुत्पत्तेः । तद्यथाऽनेकशिल्पिपर्यवदातस्य पुरुषस्यानेकं वाश्यादि युगपत्सन्निधानेनावस्थितमपि हस्ताद्यधिष्ठापकापेक्षं न युगपदनेकां क्रियां निर्वर्तयति । तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति ।

तस्मादधिष्ठापकान्तरमपेक्षत' इति न्यायवार्तिकं मनसि निधाय सूत्रार्थमाह **तथा हीति** । **युगपत्सन्निकृष्टेष्विति** । इदं च दीर्घशष्कुलीभक्षणदशायामिति बोध्यम् ।

वा०र०— गौतमसूत्रेति । प्रथमस्य प्रमाह्निके विद्यमानेति शेषः । **अन्यथासिद्धत्वादिति** । वक्ष्यमाणरीत्या व्याकरणरीत्या आत्मनः एव एवंविधसामर्थ्यकल्पनोपपत्त्या अन्यथासिद्धत्वादित्यर्थः । **अप्रयोजकत्वाच्चेति** । मनःसंयोग्यनपेक्षस्येन्द्रियार्थसन्निकर्षस्यैव ज्ञाननिमित्तत्वोपपत्तेः इति भावः । उपलक्षणं चेदम् । वक्ष्यमाणमूलोक्तरीत्या अनैकान्त्यं ज्ञेयम् । यद्यपि न्यायवार्तिकोक्त्यानुमानप्रकाराश्रयणानन्तरमपि अत्र कश्चित् इत्यादि वक्ष्यमाणमूलोक्तरीत्या अन्यथासिद्ध्यादिशङ्कावतारोऽस्त्येवेति न तत्परिहारकत्वं वार्तिकस्य सम्भवतीत्यतः इत्याशङ्केत्यादिकमयुक्तं इत्याभाति ।

तथा दृष्टान्तानुसारिणीत्यादिवक्ष्यमाणमूलोक्तरीत्या परिहारो वार्तिकाभिमत इति वार्तिकप्रवृत्त्यनन्तरमपि पुनस्तच्छङ्कनं वार्तिकाभिमतं परिहारस्पष्टीकरणार्थं इति युक्तं वार्तिकस्यान्यथासिद्ध्यादिशङ्कापरिहारकतया प्रवर्तमानमिति ज्ञेयम् । वस्तुतस्तु युगपज्ज्ञानानुपपत्तेरसिद्धत्वात् न मनोलिङ्गत्वं इत्येव मूलकोशे पाठः । युगपज्ज्ञानानुपपत्तिरूपां सिद्धिमेवाशङ्क्य रूपीत्यादेः प्रवृत्तत्वात् । तदनुसारेण चासिद्धत्वादित्यस्य पक्षेण सम्बन्धाभावादित्यर्थः । तथा चासिद्धिशङ्कामात्रपरिहाराय वार्तिकं पर्याप्तमिति न कश्चित् क्षुद्रोपद्रवः । अन्यथासिद्धत्वात् इत्यादि पाठस्तु परिशोधित एव । तत्पाठेऽपि अन्यथासिद्धत्वं नाम पक्षं विना अन्यत्रसिद्धत्वमिति पक्षसम्बन्धाभाव एव तात्पर्यम् । अप्रयोजकत्वमपि न वक्ष्यमाणरीत्या अनैकान्त्यनिबन्धनं अपि तु दृष्टान्तव्याप्त्यप्रमित्या हेतोः प्रयोजकता कथन्ताभिप्रायेणैव । न युगपज्ज्ञानानि जायन्ते इत्युत्तरमूले अन्यथा तानि जायेरन् इति विपक्षे बाधकस्योक्तेः अप्रयोजकत्वम् । वक्ष्यमाणप्रकारातिरिक्तप्रकारेणेति स्पष्टत्वात् । तथा च वक्ष्यमाणान्यथासिद्धिरप्रयोजकत्वं च प्रकारान्तरेणेति वार्तिकावतारं निरस्य तदुभयशङ्कनं युक्तम् । रूपादीत्यादिग्रन्थस्तु यथाश्रुत एवेति ज्ञेयम् ।

अनेकशिल्पिपर्यवदातस्येति । अनेकशिल्पिविद्यावतः इत्यर्थः । वाश्यादिकरणानिहिततच्छिल्पिविद्यावताधिष्ठितां निरवसाध्यां क्रियां निष्पादयन्ति । एकस्यैव पुरुषस्यानेकशिल्पिविद्यावत्वे तु तेनैकेनैवाधिष्ठितानि तत्तत्क्रिया सम्पादयन्तीति प्रसिद्धमिति ज्ञेयम् । **दीर्घशष्कुलीति** । दीर्घत्वाभावे सकृन्मुखे प्रवेशनीयत्वोपपत्त्या भक्षणकाले चक्षुषापि ज्ञानं न सिद्ध्येदित्यतो दीर्घेति शष्कुली विशेषिता । जातिरप्राणिनां इति सूत्रीय एकवद्भावोदाहरणतयोक्तधानाशष्कुलीये तदुपादाय शष्कुलीभक्ष्यविशेषः । षण्णां रसानां कुलं शष्कुलम् । गौरादिषु निपातनात् रूपसिद्धिरिति मञ्जर्यादावुक्तेः तदनुसारेण भक्ष्यविशेषार्थकः शष्कुलीशब्दः । इदं च यत् पदार्थभक्षणदशायां सदा यो हस्तेन स्पृश्यते चक्षुषा दृश्यते दन्तैश्चूर्णीकरणेन जायमानशब्दश्च तत्रत्यः श्रूयते तद्गतो गन्धश्च घ्राणेन गृह्यते रसश्च रसनेन तद्गतो ज्ञायते तादृशपदार्थोपलक्षणम् । तत्रानेकज्ञानानां युगपदुत्पत्त्यभिधानसम्भवात् । तादृशस्थले वस्तुतोऽनेकज्ञानाभाव इति पराभिसन्धिः ।

स०व्र०— नन्वस्तीति । ज्ञानानि दृष्टकारणातिरिक्तक्रमेण संयोगवत् कारणोपेतानि दृष्टकारणेषु सर्वेष्वपि सत्सु क्रमेणोत्पद्यमानत्वात् क्रमवत् क्रियाजन्य(वतः)वृक्षात्पततः फलस्य क्रमभाव्याकाशसंयोगवदित्यनुमानमुक्तं भवति । तत्र हेतुमुपन्यस्यति **तथा हीति** ।

विठ्ठल०— एतेभ्यो अन्यदिति । विषयसन्निकृष्टात्माधिष्ठितेभ्य इन्द्रियेभ्योऽन्यत्स्वव्यतिरिक्तसहकारीत्यर्थः । **प्रक्रमते** युज्यते ।

चषकः— प्रक्रमते सङ्गच्छते ।

६२ सु०— अत्र कश्चिदाह 'आत्मन एवैवंविधसामर्थ्यकल्पनोपपत्तावन्यथासिद्धमनुमानम् । मनसः अतीन्द्रियसंयोगव्यापारे क्रमवति कारणान्तरशून्येऽनैकान्तिकं च । फलस्य च वृक्षात्पततः क्रमवर्तिन्याकाशसंयोगे कुठारादिव्यापारे च । इन्द्रियाणां प्रतिविषयसंयोगव्यापारे चे'ति ।

तदयुक्तम् । दृष्टानुसारिणी हि कल्पना । कर्ता ह्यनेककरणाधिष्ठानेन युगपन्नानाकार्याणि कुर्वाणो दृष्टः । तथा हि, युगपन्माणवको गच्छति पठति पन्थानमीक्षते वहति च कमण्डलुम्, तस्मान्नैष कर्तृधर्मो युक्तः कल्पयितुम्, किन्तु दृष्टत्वाद्द्रव्यान्तरमेवाव्यापकम् ॥ अनैकान्त्यं तु नास्त्येव, तत्रापि क्रियाक्रमादेर्निमित्तस्य विद्यमानत्वादिति ।

परि०— कश्चिदाहेति । दूषणमिति योज्यम् । **एवंविधेति** । क्रमेण ज्ञानोत्पादरूपेत्यर्थः । **अनुमानमिति** । रूपरसादिज्ञानानि चक्षुरादीन्द्रियात्माऽन्यक्रमिकसंयोगवत् सहकारिसापेक्षाणि । अयुगपदुत्पत्तिमत्त्वात् । सम्मतवदित्यनुमानमित्यर्थः । न केवलमप्रयोजकं व्यभिचारि चेत्याह **मनस इति** । चक्षुरादीन्द्रियैः सह क्रमेणोत्पद्यमाने मनःसंयोगेऽयुगपदुत्पद्यमानत्वरूपहेतुसत्त्वेन पूर्वोक्तसहकारिरूपकारणान्तरशून्यतया साध्याभावेन व्यभिचार इत्यर्थः । मनस्सिद्ध्यसिद्धिभ्यां नानैकान्त्यमित्यतोऽन्यत्र तदाह **फलस्येति** । कुठारादिव्यापारे चेत्यादौ क्रमवर्तिनीति कारणान्तरशून्ये चेति अनैकान्तिकमिति चानुषङ्गः । तार्किको निराह **तदयुक्तमिति** । **अव्यापकमिति** । तादृशस्यैव क्रमिकसंयोगजननसम्भवादिति भावः । **क्रियाक्रमादेरिति** । प्रयत्नक्रमः आदिपदार्थः ।

यादु०— एवंविधसामर्थ्येति । एकः कर्ता एकदा एकामेव क्रिया कर्तुं समर्थो नानेका इति कर्तुरेव ज्ञानक्रमप्रयोजकसामर्थ्यकल्पनेन अयुगपदुत्पत्तिरूपहेतोरुपपत्तावित्यर्थः । **अनुमानमिति** । रूपादिग्रहणपक्षकं

वार्तिकोक्तमनुमानमित्यर्थः । **मनसः प्रतीन्द्रियेति** । तत्तदिन्द्रियमनःसंयोगरूपे व्यापार इत्यर्थः । इदं च तर्कितं मनःसंयोगमादाय बोध्यम् । तेन मनःसिद्धौ किमनैकान्त्येन । तदसिद्धौ कस्य संयोगे व्यभिचार इति शङ्काऽनवकाशः । **अव्यापकमिति** । क्रमिकसंयोगवतो द्रव्यस्य व्यापकत्वासम्भवादिति भावः । एतच्च मनसोऽणुत्वं धर्मिग्राहकमानसिद्धमिति स्वरूपकथनार्थमेवेति ज्ञातव्यम् । **क्रियाक्रमादेरिति** । आदिपदेन प्रयत्नादिक्रमो ग्राह्यः । तेन कुठारादिव्यापारे उद्यम्यनिपतनादिरूपे क्रमप्रयोजकः प्रयत्नक्रमोऽस्त्यतो न तत्र व्यभिचार इति भावः । न च क्रमिकक्रियादावेवानैकान्त्यम् । तत्र अदृष्टक्रमस्यैव निमित्तत्वात् । न च क्रमिकादृष्टेष्वेवानैकान्त्यं तत्रापि पूर्वादृष्टक्रमस्यैव निमित्तत्वात् । अनवस्था च प्रामाणिकीति द्रष्टव्यम् ।

वं०प०— एवंविधेति । स्वसंयोगक्रमेण कार्ये क्रमसम्पादकत्वरूपं सामर्थ्यं कल्पयित्वा तत्संयोगक्रमेणैव ज्ञाने क्रमकल्पनोपपत्तेरित्यर्थः । **अनुमानमिति** । रूपरसादिप्रतीतिः क्रमिककारणान्तरसाध्याक्रमिककार्यत्वात् । व्यतिरेकेण व्योमादिवदिति । **अन्यथा** मनोविनाऽपि । क्रमवतीति हेतुसद्भावोपपादनम् । साध्याभावमुपपादयति **कारणान्तरेति** । मनस एव तत्र कारणत्वेन तद्व्यतिरिक्तं कारणान्तरं नास्तीति (अर्थः) भावः । एवमुत्तरत्रापि । फलकुठारेन्द्रियाणामेव करणत्वेन तत्रापि कारणान्तरं नास्तीति व्यभिचार इति ध्येयम् । आत्मन एव करणैः स्वसंयोगक्रमेण क्रमादेव ज्ञानादिकार्योत्पादकत्वमस्त्वित्युक्तं दूषयति **कर्ता हीति** । कर्ता ह्यात्मा युगपत् पादवाक्चक्षुर्हस्तरूपकरणमधिष्ठाय गमनादिरूपकार्यं युगपदेव करोति । तथा च एकः कर्ता एकदा एकामेव क्रियां करोति नानेकामित्ययुक्तमित्यर्थः । **एषः** स्वसंयोगक्रमेण क्रमात् कार्यजनकत्वरूपः । **दृष्टत्वादिति** । तत्तदिन्द्रियाणां तत्तद्विषयसम्बन्धे आत्मसम्बन्धे च सत्यपि मनःसंयोगक्रमेणैव ज्ञानक्रमस्य व्यासङ्गदशायां दृष्टत्वादित्यर्थः । **क्रियेति** । तथा चोक्तसंयोगस्य क्रियारूपा(त्म)समवायिकारणजन्यत्वात् । क्रियारूपकारणक्रमस्य तत्तत्संयोगक्रमे निमित्तस्य सत्त्वेन कारणान्तरशून्यत्वं नास्तीति साध्यस्यापि सत्त्वान्न व्यभिचार इत्यर्थः । न च क्रियाक्रमे एव मनआदिव्यतिरिक्तकारणान्तरशून्ये व्यभिचार इति वाच्यम् । तत्राप्यदृष्टरूपकारणान्तरक्रमेणैव क्रमस्य सत्त्वात् । तत्रापि पूर्वादृष्टक्रमस्य निमित्तत्वेनानादित्वाददोषः ।

कं०रा०— आत्मन एवेति । आत्मन एव क्रमिकज्ञानजननसामर्थ्यकल्पनया युगपज्ज्ञानानुत्पत्त्युपपत्तेस्तद्रूपलिङ्गमन्यथासिद्धमित्यर्थः । स्थलान्तरेष्वप्यनैकान्तिकमित्याह **फलस्य चेति** ।

श्रीनिधि०— आत्मन एवैवंविधेति । क्रमिकक्रियानिवर्तनोपयोगिसामर्थ्यकल्पनया ज्ञानक्रमस्येत्युपपत्ताविति बुद्ध्या विवेकेन व्याख्येयम् । **अतीन्द्रियसंयोगव्यापार इति** । अतीन्द्रियसंयोगलक्षणव्यापार इत्यर्थः । **अधिष्ठानेन** सम्बन्धेनेत्यर्थः । **नैष कर्तृधर्म इति** । क्रमिकक्रियानिवर्तनोपयोगि धर्म इत्यर्थः । **दृष्टत्वाद्द्रव्यान्तरमेवाव्यापकमिति** । आत्मद्रव्यसामर्थ्यस्यान्यथादृष्टत्वेनान्वय-अव्यभिचारात् ज्ञानक्रमनियमनसमर्थनम् । आत्मद्रव्यापेक्षया द्रव्यान्तरं कल्प्यमित्यर्थः । तस्यापि शरीरव्यापित्वे पुनरुक्तदोष इति **अव्यापकम्** इत्युक्तम् । **क्रियाक्रमादेरिति** । **आदि**पदेन क्वचित्कुठारव्यापारादौ यत्नक्रमः उच्यते ।

शे०वा०— आत्मन एवैवंविधसामर्थ्येति । एकः कर्ता एकदा एकामेव क्रियां कर्तुं समर्थो नानेका-मिति कर्तुरेव ज्ञानक्रमप्रयोजकसामर्थ्यकल्पनेनायुगपदुत्पत्तिरूपहेतोरुपपत्तावित्यर्थः । **अनुमानमिति** । रूपादिग्रहणपक्षकं वार्तिकोक्तानुमानमित्यर्थः । **मनसः प्रतीन्द्रियेति** । तत्तदिन्द्रियमनःसंयोगरूपे व्यापार इत्यर्थः । **क्रमवतीति** तत्र हेतुसत्त्वोपपादनम् । **कारणान्तरशून्य** इति साध्याभावोपपादनम् । इदं च तर्कित-मनःसंयोगमादाय द्रष्टव्यम् । तेन मनःसिद्धौ किमनैकान्त्येन, तदसिद्धौ च कस्य संयोगे व्यभिचार इति शङ्कानवकाशः । यद्वा एतदस्वरसादाह **फलस्य चेति** । क्रमवर्तिनीत्यतःपरं कारणान्तरशून्ये च अनैकान्त्यमिति वर्तते । कुठारादिव्यापारे चेत्यादौ क्रमवर्तिनि कारणान्तरशून्येऽनैकान्त्यमिति वर्तते । अन्यथासिद्धिं निराकरोति **दृष्टेति** । **अव्यापकमिति** । क्रमिकसंयोगवतो द्रव्यस्य व्यापकत्वायोगादिति भावः । **अनैकान्त्यं त्विति** । मनसः प्रतीन्द्रियसंयोगादाविति शेषः । **क्रियाक्रमादेरिति** । आदिपदेन प्रयत्नादिक्रमो ग्राह्यः । तेन कुठारादि-व्यापारे उद्यम्योद्यम्य निपतनादिरूपे क्रमप्रयोजकप्रयत्नक्रमसत्त्वान्न तत्र व्यभिचार इति बोध्यम् । न च तर्हि क्रमिकक्रियादावेवानैकान्त्यमिति वाच्यम् । तत्राप्यदृष्टक्रमस्यैव निमित्तत्वेन तदसम्भवात् । न च तर्हि क्रमिक-दृष्टेष्वेव व्यभिचार इति वाच्यम् । तत्रापि पूर्वपूर्वादृष्टक्रमस्यैव निमित्तत्वात् । न चैवमनवस्था, सिद्धविषय-त्वादित्याशयात् । केचित्तु क्रियायां वेगादेर्नियतस्य कारणत्वेन क्रमवत्कारणस्यापि सद्भावेन साध्यस्यापि सत्त्वान्न व्यभिचार इत्याहुः । अन्ये तु संयोगसामान्यं प्रति क्रियासामान्यस्य साधारणकारणत्वेनोक्तसन्निकर्षेषु क्रियारूपसामान्यकारणसत्त्वे सति क्रमवत्त्वरूपहेतुसत्त्वात् कारणान्तरस्य चाभावात् तत्र व्यभिचारेऽप्याद्य-क्रियायां गुरुत्वस्य द्वितीयादिक्रियायां च वेगादेरेव कारणत्वेन क्रियामात्रे एकस्य साधारणकारणस्याभावात् क्रियाक्रमे च क्रियासाधारणकारणत्वे सति क्रमवत्त्वहेतोरेवाभावान्न व्यभिचार इत्याहुः ।

वा०र०— अत्र कश्चित् आह आत्मन एव एवंविध इति मतम् । .....कारीयं विवरणे-ऽप्युक्तम् । तत्र हि 'ननु न साक्षिवेद्यं अन्तःकरणम् । किन्तु आत्मेन्द्रियविषये समवहितेषु ज्ञानोत्पाद-क्रमसामर्थ्यगम्यमित्याशां शङ्क्यानन्यथासिद्धत्वात् आत्मन एव क्रमज्ञानजननसामर्थ्यकल्पनयाऽन्यथासिद्धः क्रमोत्पादः इत्याद्यभिधायार्थापत्त्या मनःकल्पनामनङ्गीकृत्यानुमानेव मनःसिद्धिराशङ्किता' इत्थं च तदनुमानम् । आत्मनः सर्वविषयसन्निधाने क्रमकार्योत्पादः । कर्तुः क्रमकारि साधारणकारणापेक्षः । सन्निहितबहुविषयस्य कर्तृकर्मकार्योत्पादनत्वात् । सन्निहितबहूच्छेद्यस्य देवदत्तस्य कुठारसापेक्षक्रमच्छेदनवदिति । ततः तद्दूषणं न एतत्सारम् । अतीन्द्रियसंयोगव्यापार इत्यादिना कृतमिति । तदनुसारेणाधिकमुपयुक्तं ज्ञेयम् । कर्ता हि अनेककरणाधिष्ठानेन इत्युत्तरमूलानुसारेण एवंविधेत्येतद्व्याख्याति **एकैकदेति** । तदनुसारेण आह **इदं च तर्कितेति** । नृसिंहाश्रमकृते विवरणव्याख्याने तु सन्दिग्धव्यभिचारमाह **समनसः इति** । इत्यवतारः कृतः । न च तत्र मन एव क्रियावत् करणमिति वाच्यम् । उपादानान्यस्यैव करणत्वात् । अन्यथाज्ञानेऽपि आत्मनः करणत्वापत्तेः । नापि क्रियैव तत्र विभागद्वारा करणमिति । एकस्याः क्रियायाः सर्वेन्द्रियसंयोगाहेतुत्वात् । इति भावोऽपि तत्र विवृत्त इति ज्ञेयम् । यदा एतदस्वरसादेव हि इत्येतत्तु न य वेदकार्येति युक्तिपादीयव्याख्या

मूलटीकास्थ एतद्वाक्यस्यास्मद्व्याख्यानप्रकारेण व्याख्येयम् । **मूले फलस्य चेतीति** । अत्रायुगपदुत्पत्ति-मात्रस्य हेतूकृतत्वात् फलानि अष्टक्रमत्वादिति हेतूकरणात् जीवप्रयत्नाभावे पतितफले उक्तहेतोर्व्यभिचारायोगात् जीवेन पीततेति फलविशेषणान्तरं नृसिंहाश्रमेण कृतमित्यवधेयम् । स हि अनेककरणाधिष्ठानेन युगपत् नाना कार्याणीत्यादि न्यायवाचस्पत्यनुसारेणाह **कर्ता ह्यनेककरणेति** मूलम् । किन्तु दृष्टत्वादिति वाक्येऽनुगुणक्रिया योज्यास्ति । आदिपदार्थमाह **क्रियाक्रमादेरिति** । .....सारेणाह । **न च तर्हि क्रमिकक्रियादावेवेत्यादि** केचित् इत्यादिपक्षः । अन्येतिपक्षश्च । इदं च प्रमेयं व्याख्येयमस्ति । न्यायभाष्यादिकं लीलावतीकिरणावली-कुसुमाञ्जलि इत्यादिकमनुसृत्य ग्रन्थो व्याख्येयोऽस्ति ।

स०व्र०— एवंविधसामर्थ्येति । क्रमेणैव ज्ञानजनकत्वात्मकसामर्थ्येत्यर्थः । **प्रतीन्द्रियेति** । तत्त-दिन्द्रियसंयोगेत्यर्थः । **इन्द्रियाणां प्रतिविषयेति** । आदौ घ्राणगन्धसंयोगः । अनन्तरं तदाश्रयीभूतचन्दन-खण्डचक्षुषोः संयोगः । अनन्तरं स्पर्शनेनेत्येवं क्रमेण जायमानसंयोगक्रम इत्यर्थः । **तदयुक्तमिति** । आद्यो वदतीति शेषः । **क्रियाक्रमादेरिति** । न चैवं तत्रैवानैकान्त्यमिति वाच्यम् । तत्राप्यदृष्टक्रमस्यैव नियामक-त्वात् । न चानवस्था । प्रामाणिकत्वेन मूलक्षयाभावादित्यत्र तात्पर्यात् ।

विट्ठल०— एवंविधसामर्थ्येति । एकः कर्ता एकदा एकामेव क्रियां कर्तुं समर्था नानेकमिति कर्तुरेव ज्ञानक्रमप्रयोजकसामर्थ्यकल्पनारूपहेतोरुपपत्तावित्यर्थः । **अनुमानमिति** । रूपादिज्ञानानि इन्द्रिय-व्यतिरिक्तसहकारिसापेक्षोत्पत्तिकानि युगपदनुत्पद्यमानत्वात् । सामान्यव्याप्त्या युगपदनुत्पद्यमानप्रासादादि-निर्माणक्रियावदित्यनुमानमित्यर्थः । **मनसः अतीन्द्रियेति** । अनुमानेन मनसः कल्पनापक्षेऽपि तस्य नेन्द्रियै-र्युगपत्संयोगोऽङ्गीकर्तुमुचितः । तत्कल्पनावैय्यर्थ्यात् । तथा च क्रमेण जायमाने मनःसंयोगव्यापारे उक्त-हेतुसद्भावेऽपि क्रमनियामकस्वव्यतिरिक्तसहकार्यभावादनैकान्त्यमिति भावः । **व्यापारे च** इत्यत्र क्रमवर्तिनी-त्यनुवर्तते । अनैकान्त्यमिति च आकाशसंयोगे आकाशभोगैः संयोगे कर्ता हीति । आत्मा हि कर्ता स च व्याप्तः तस्य च युगपदनेकेन्द्रियाधिष्ठातृत्वं युक्तम् । तथा चात्मन एव युगपदनेकेन्द्रियाधिष्ठानेन युगपन्नाना-कार्यकारणसामर्थ्यस्य दृष्टत्वाद्दृष्टानुसारिकल्पनस्य न्यायत्वादज्ञानक्रमस्य कर्तृधर्मत्वायोगेनाकर्मनियामकतया अव्यापकमेव द्रव्यान्तरमङ्गीकरणीयमिति भावः । **क्रियाक्रमादेरिति** । क्रमवर्तिन्याकाशसंयोगे फलसमवेतस्य क्रियाक्रमस्य उद्यमनिपतनादिरूपे कुठारादिव्यापारे च कर्तृप्रयत्नस्य निमित्तस्य विद्यमानत्वान्न तत्र व्यभिचार इत्यर्थः । न च क्रियाक्रमादावनैकान्त्यं वाच्यम् । तत्रादृष्टस्यैव निमित्तत्वात् । अदृष्टेऽपि पूर्वपूर्वादृष्टं निमित्त-मिति ध्येयम् ।

चषकः— एवंविधसामर्थ्येति । क्रमेण ज्ञानोत्पादनरूपेत्यर्थः । **अनुमानमिति** । रूपरसादि-ज्ञानपक्षकात्मचक्षुरादीन्द्रियान्यक्रमिकसंयोगवत् सहकारिसापेक्षत्वसाध्यकायुगपदुत्पत्तिमत्त्वहेतुकानुमानमप्रयो-जकमित्यर्थः । **मनस इति** । मनोनुयोगिकचक्षुरादीन्द्रियप्रतियोगिकसंयोगे दर्शितसाध्यविनिर्मुक्तेऽनैकान्त्य-मित्यर्थः । **चेतीति** । अनैकान्तिकमित्यनुषञ्जनीयम् ।

६३ **सु०—** अत्रोच्यते । अस्ति तावदविवेकिनामपि मनःप्रतीतिः, मम मनोऽन्यत्र गतमित्यादिव्यवहारात् । न च ते युगपज्ज्ञानानुत्पत्तिं जानन्ति, प्रत्युत युगपदेव ज्ञानोत्पत्तिं मन्यन्ते । अन्यथा व्यासङ्गे क्रमदर्शनेनान्यत्रापि क्रमानुमानं परस्य व्यर्थं स्यात् । तस्माल्लिङ्गदर्शनात्प्रागेव भवदिदं मनोज्ञानं न तन्निमित्तकमिति ।

अस्तु तर्हि बुद्ध्यादीनामसमवायिकारणस्य संयोगस्याश्रयतया मनःसिद्धिः । मैवम् । प्रत्यक्षज्ञाने तावदिन्द्रियात्मसंयोगस्यैवासमवायिकारणत्वस्योपपत्तेः, अनुमित्यादौ लिङ्गज्ञानादेः, स्मृतौ भावनायाः, सुखादाविष्टार्थोपलब्ध्यादेरिति । नित्यविशेषगुणानां संयोगासमवायिकारणत्वनियमान्नैवमिति चेन्न, विभाग(ज)शब्दजशब्दे व्यभिचारात् । अश्रावणत्वेन हेतुविशेषणान्नेति चेत्; यथा तर्हि विभागादिजशब्दे कारणान्तरदर्शनात् तन्निरासार्थं व्याप्तिग्रहणवेलायां प्रयत्यते तथा सुखादिनिरासाय प्रयतनीयम्, असमवायिकारणान्तरदर्शनस्य तुल्यत्वात् । निमित्तं तदिति चेन्न, असमवायिकारणलक्षणस्यातिव्याप्तिप्राप्तेरिति ।

न च सुखाद्युपलब्धिकरणत्वेन मनस्सिद्धिः, साक्षिसिद्धतयाऽन्यथासिद्धेः ।

एवमनुमानान्तरमपि निरसनीयम् ।

परि०— उक्तलिङ्गाप्रतिसन्धानेऽपि मनसः ज्ञायमानत्वात् नोक्तानुमानगम्यतेति समाधत्ते **अत्रोच्यत इत्यादिना** । **अन्यथेति** । पामराणां युगपज्ज्ञानानुत्पत्तिज्ञान इत्यर्थः । **अन्यत्रापीति** । सर्वेन्द्रियाणां स्वस्वविषयसन्निकर्षस्थले शष्कुलीभक्षणादावपीत्यर्थः । **बुद्ध्यादीनामिति** । बुद्धिसुखदुःखेच्छादीनां आत्ममनःसंयोगकारणत्वादिति भावः । शङ्कते **नित्येति** । नित्यद्रव्यनिष्ठविशेषगुणानामित्यर्थः । **नैवमिति** । लिङ्गज्ञानादेर्नासमवायिकारणत्वमित्यर्थः । **विभागजशब्दजशब्द इति** । वंशादौ दलद्वयविभागजे शब्दजे च शब्द इत्यर्थः । तयोः क्रमाद्विभागशब्दासमवायिकारणकत्वेन संयोगासमवायिकारणत्वरूपसाध्याभावेऽपि बुद्ध्यादयः संयोगासमवायिकारणकाः नित्यनिष्ठविशेषगुणत्वात् भेरीताडनजन्यशब्दवदित्यभिमतहेतोः व्यभिचारादित्यर्थः । व्यभिचारज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वादाह **व्याप्तीति** । यो यो नित्यजन्यविशेषगुणः सोऽसौ संयोगासमवायिकारणक इति व्याप्तिग्रहणदशायां विभागादिजन्यशब्दैः अव्यभिचारायाश्रावणत्वे सति नित्यजन्यविशेषगुण इति विशेषणदानाय यथा प्रयत्नः क्रियते तथा सुखादावव्यभिचारायानात्मीयत्वे

सतीत्यादिरूपविशेषणदानायापि प्रयत्यतामित्यर्थः । कुत इत्यतोऽविशेषादित्याह **असमवायीति** । **तदिति** । लिङ्गज्ञानादिकमित्यर्थः । **लक्षणस्येति** । समवायिकारणप्रत्यासन्नत्वे सत्यवधृतसामर्थ्य-रूपासमवायिकारणलक्षणस्येत्यर्थः । **न च सुखादीति** । सुखाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावत् इति सामान्यतः करणसिद्धौ परिशेषात्सिद्धचतो मनस्त्वादित्यर्थः ।

यादु०— युगपदेव ज्ञानोत्पत्तिमिति । दीर्घशष्कुलीभक्षणादिदशायामित्यर्थः । **अन्यथेति** । दीर्घ-शष्कुलीभक्षणादौ युगपज्ज्ञानोत्पत्तिभ्रमाभाव इत्यर्थः । **अन्यत्रापि** । दीर्घशष्कुलीभक्षणादावपि । **क्रमानुमान-मिति** । विप्रतिपन्नानि ज्ञानानि क्रमभावीनि जन्यज्ञानत्वात् व्यासङ्गदशापन्नानेकज्ञानवदित्यनुमानमित्यर्थः । **व्यर्थं स्यादिति** । सन्दिग्धविपर्यस्तान्यतरं प्रत्येवानुमानस्य सार्थक्यादिति भावः । **अस्तु तर्हीति** । बुद्ध्यादयः संयोगासमवायिकारणिका नित्यकार्यविशेषगुणत्वाच्छब्दादिवदिति प्रयोगोऽत्राभिप्रेतः । **नित्यविशेषगुणाना-मिति** । पार्थिवपरमाणुरूपादीनामपि तेजःसंयोगासमवायिकारणकत्वादिति भावः । अत्र कार्येति विशेषणमपि द्रष्टव्यम् । अन्यथा जलादिपरमाणुरूपादिषु व्यभिचारप्रसङ्गात् । **तथा सुखादिनिरासायेति** । बाह्येत्यपि हेतौ विशेषणीयमित्यर्थः । तथा च बुद्ध्यादौ हेत्वसिद्ध्या साध्यासिद्धिरिति भावः । **न च सुखाद्युपलब्धीति** । सुखाद्युपलब्धिः सकरणिका क्रियात्वाच्छिदिक्रियावदित्यनुमानेन मनःसिद्धिरिति न वाच्यमित्यर्थः ।

वं०प०— अन्यथेति । यद्यविवेकिनोऽपि लिङ्गभूतां युगपज्ज्ञानानुत्पत्तिं जानन्ति सर्वेऽप्यन्यत्रापि दीर्घशष्कुलीभक्षणादिस्थलेऽपि क्रमादेव ज्ञानान्युत्पद्यन्त इति जानन्तीति यावत् । तर्हि दीर्घशष्कुलीभक्षणादि-स्थलेऽपि जायमानानि विप्रतिपन्नानि ज्ञानानि क्रमभावीनि ज्ञानत्वात् व्यासङ्गस्थलीयज्ञानवदित्यनुमानं व्यर्थं स्यात्सिद्धसाधनतापत्तेरित्यर्थः । **भवत्** अविवेकिनामिति शेषः । बुद्धिर्द्विविधा । अनुभवः स्मृतिश्च । अनुभवो-ऽप्यपरोक्षपरोक्षभेदाद् द्विविधः । तत्र सर्वत्राप्यात्ममनस्संयोगस्य माऽस्त्वसमवायिकारणत्वमित्याह **मैवमिति** । अनुमित्यादावित्यत्रादिपदेन वाक्यार्थज्ञानं ग्राह्यम् । द्वितीयादिपदेन पदज्ञानम् । ततश्चेन्द्रियात्मसंयोगस्य लिङ्गज्ञानस्य भावनारूपसंस्कारस्येष्टार्थज्ञानस्य चापरोक्षपरोक्षज्ञानस्मृतिसुखादिसमवायिकारणीभूते आत्मनि प्रत्यासन्नत्वात् कारणत्वाच्च युक्तं असमवायिकारणत्वमित्यर्थः । **नित्येति** । नित्यस्येत्यर्थः । यो गुणः स संयोगासमवायिकारणक इत्युक्ते विभागजविभागे हस्ततरुविभागात्कायतरुविभागे व्यभिचारः स्यादतो विशेषे-त्युक्तम् । तावत्युक्ते घटगतरूपे, अतो नित्यस्येत्युक्तम् । समग्रस्यापि हेतोर्नित्यजलपरमाण्वादिगते नित्ये रूपादौ, अतो नित्यस्य कार्यविशेषगुणत्वादिति वक्तव्यम् । तथा च न कोऽपि दोषः । **विभागेति** । विभागजशब्दे वंशपाटनानन्तरं जायमाने चटचटशब्दे शब्दजशब्दे चेति विवेकः । **अश्रावणत्वेनेति** । अश्रावणत्वे सति यो नित्यस्य कार्यविशेषगुणः स संयोगासमवायिकारणक इत्युच्यत इत्यर्थः । विभागादीत्यत्रादिपदेन शब्दो ग्राह्यः । **प्रयत्यते** तद्बुद्ध्यावर्तकाश्रावणत्वरूपं विशेषणं दत्वेत्यर्थः । **प्रयतनीयमिति** । पक्षीभूतसुखादिव्यतिरिक्ते स्थलेऽयं नियम इति व्याप्तेः सङ्कोचः क्रियतामित्यर्थः । ननु विभागादिजशब्दनिरासाय यतनीयं तत्र विभाग-

शब्दरूपासमवायिकारणान्तरस्य क्लृप्तत्वेनोक्तसाध्याभावेन व्यभिचारापत्तेः । न हि सुखादौ तादृशमसमवायिकारणं क्लृप्तम् । येनात्रापि तन्निरासाय यतनीयं स्यादित्यत आह **तुल्यत्वादिति** । सुखादावपीष्टार्थोपलब्ध्यादेरसमवायिकारणस्य क्लृप्तत्वादित्यर्थः । **तदिति** इष्टार्थदर्शनम् । **प्राप्तेरिति** । इष्टार्थोपलब्ध्यादावेवेत्यर्थः । **साक्षीति** । साक्षिरूपकरणेत्यर्थः । **सिद्धेः** सुखाद्युपलब्धेरिति शेषः ।

कं०रा०— युगपत्कार्यानुत्पत्तिरूपलिङ्गमनैकान्तिकं चेत्याह **प्रतीतिरिति** । प्रसिद्धेन्द्रियाणां क्रमिको यो मनःसंयोगस्तद्रूपकार्ये युगपदनुत्पत्तेः सत्त्वेऽपि क्रमिकज्ञानेषु क्रमिकमनःसंयोगरूपकारणान्तरस्यैव क्रमिकहेत्वन्तरस्याभावाद्युगपत्कार्यानुत्पत्तिरूपलिङ्गं तत्रानैकान्तिकं चेत्यर्थः । प्रतिविषयसंयोगव्यापारे चेति अनैकान्तिकमित्यनुवर्तते । **लिङ्गज्ञानादेः** इत्यादेः असमवायकारणत्वोपपत्तेरित्यनेनान्वयः । **सुखादौ** इत्यादिपदेन दुःखस्य ग्रहणम् । **इष्टार्थोपलब्ध्यादेः** इत्यादिपदेन त्वनिष्टार्थोपलब्धेरिति ध्येयम् । **नित्येति** । नित्यस्य ये विशेषगुणाः तेषां संयोगासमवायिकारणकत्वनियमादनुमित्यादीनां लिङ्गज्ञानाद्यसमवायिकारणकत्वं न सम्भवतीति भावः । **विभागेति** । विभागजशब्दशब्दे च नित्यनिष्ठविशेषगुणत्वस्य सत्त्वेऽपि संयोगाद्यसमवायकारणकत्वाभावाद्व्यभिचार इति भावः । **अश्रावणत्वेनेति** । अश्रावणत्वविशेषितस्य नित्यनिष्ठविशेषगुणवत्वस्येन्द्रियात्मसंयोगासमवायिकारणके प्रत्यक्षज्ञाने साध्येन सह व्याप्तिः सिद्धान्तिनः सम्मता पूर्वपक्षिणस्त्वग्निसंयोगजन्यपार्थिवपरमाणुरूपादौ सा सम्मतेति भावः । **निमित्तमिति** । सुखादाविष्टार्थोपलब्ध्यादिकं निमित्तमेव नासमवायिकारणमतस्तत्रासमवायिकारणान्तरदर्शनाभावेनाश्रावणत्वविशेषितनित्यनिष्ठविशेषगुणवत्त्वस्य संयोगासमवायिकारणत्वव्यभिचाराप्रसक्तेर्व्याप्तिग्रहणवेलायां न सुखादिनिरासाय प्रयतनीयमिति भावः । **नेति** । सुखादाविष्टार्थोपलब्ध्यादेर्निमित्तत्वे तस्य सुखादिसमवायिकारणात्मसमवेतत्वेन सुखादिकं प्रत्यवधृतसामर्थ्यत्वेन चासमवायिकारणलक्षणस्य तत्रातिव्याप्तिप्रसक्तेरिष्टार्थोपलब्ध्यादेः सुखादिकं प्रति निमित्तत्वमयुक्तमिति भावः । **एवमिति** । अहमित्यात्मोपलब्धिकरणत्वेन मनःसिद्धिरित्यनुमानान्तरमप्यात्मनः साक्षिसिद्धतया अन्यथासिद्धेरुक्तन्यायेन निरसनीयमित्यर्थः ।

श्रीनिधि०— व्यर्थं स्यादिति । सिद्धत्वादिति भावः । **भावनाया इति** । भावनाख्यसंस्कारस्येत्यर्थः । **इष्टार्थोपलब्धेः** इत्युक्तम् । तत्कल्पनस्य प्रमाणविरुद्धत्वात् । तथा हि । सुखादिकं संयोगासमवायिकारणकं नित्यविशेषगुणत्वात् । आद्यशब्दवदिति शङ्कते **नित्यविशेषगुणानामिति** । **प्रयतनीयमिति** । अनात्मविशेषगुणत्वविशेषणेनेत्यर्थः । **असमवायिकारणान्तरदर्शनेति** । विभागपूर्वशब्दरूपेत्यर्थः । **सुखाद्यनुपलब्धिरिति** । **आदि**पदेन दुःखाद्युपलब्धिर्गृह्यते । **एवमनुमानान्तरमपीति** । आत्मोपलब्धिः करणसाध्येत्येवमादिकमित्यर्थः । अथवा स्मृतिः सकरणिकक्रियात्वादित्याद्यनुपलब्धिरिति । न निरासस्तु अस्ति तावदविवेकिनामपि मनःप्रतीतिरित्युक्तप्रकारेण इति द्रष्टव्यम् ।

शे०वा०— नन्वन्यनिष्ठप्रतीतेरन्यं प्रत्यप्रत्यक्षत्वात् कथं तत्सत्तानिश्चय इत्यतोऽप्रत्यक्षतया प्रत्यक्षेण तदसिद्धावपि विशिष्टव्यवहारस्य तज्ज्ञानकार्यतयाऽन्वयव्यतिरेकाभ्यामवधारिततया व्यवहाररूपकार्यलिङ्गका-

नुमानेन तत्सिद्धिर्युक्तैवेत्याशयेनाह **ममेति** । अस्त्वविवेकिनामपि मनःप्रतीतिः । साऽपि युगपज्ज्ञानानुपपत्ति-रूपलिङ्गजन्यैव किन्न स्यादित्यतो भवेदेतद्यदि तेषामुक्तलिङ्गानुसन्धानं स्यात् । न च तदस्तीत्याह **न चेति** । अविवेकित्वादेवेति भावः । न केवलं तेषामुक्तलिङ्गज्ञानाभावमात्रं किं तर्हीत्यत आह **प्रत्युतेति** । **युगपदेव ज्ञानोत्पत्तिमिति** । दीर्घशष्कुलीभक्षणादिदशायामिति शेषः । **अन्यथेति** । अविवेकिनामपि दीर्घशष्कुली-भक्षणादिदशायां युगपज्ज्ञानोत्पत्तिभ्रमाभावे युगपज्ज्ञानानुत्पत्तिरूपलिङ्गानुसन्धाने चेत्यर्थः । **अन्यत्रापीति** । दीर्घशष्कुलीभक्षणादावपीत्यर्थः । **क्रमानुमानमिति** । विप्रतिपन्नानि ज्ञानानि क्रमभावीनि जन्यत्वात् व्यासङ्ग-दशापन्नानेकज्ञानवत् इत्यनुमानमित्यर्थः । **व्यर्थं स्यादिति** । सन्दिग्धविपर्यस्तान्यतरं प्रत्येवानुमानस्यार्थ-वत्त्वादिति भावः । **अस्तु तर्हीति** । जन्यं बुद्ध्यादिकमसमवायिकारणजन्यं भावकार्यत्वात् घटवदित्यनुमानेन बुद्ध्यादेरसमवायिकारणजन्यत्वसिद्धौ, बुद्ध्याद्यसमवायिकारणं संयोगः, नित्यविशेषगुणासमवायिकारणत्वात्, भेर्याकाशसंयोगवदित्यनुमानमत्राभिप्रेतम् । यद्वा जन्या बुद्ध्यादयः संयोगासमवायिकारणकाः, कार्यत्वे सति नित्यविशेषगुणत्वाच्छब्दवदिति प्रयोगो द्रष्टव्यः । स च संयोगः परिशेषान्मनःसंयोग एवेति तदाश्रयतया मनःसिद्धिरिति भावः ।

बुद्ध्यादिकमित्यत्र बुद्धिशब्देन किं प्रत्यक्षज्ञानमभिमतं, किं वाऽनुमितिरूपं, शाब्दं, स्मृतिरूपं वेति विकल्पान्मनसि निधायाद्यं दूषयति **प्रत्यक्षेति** । **उपपत्तेरिति** । तथा च न परिशेषेण तदाश्रयतया मन-स्सिद्धिरिति भावः । द्वितीयतृतीयौ दूषयति **अनुमित्यादाविति** । लिङ्गज्ञानादेरित्यतःपरमसमवायिकारण-त्वोपपत्तेरिति वर्तते । एवमुत्तरत्रापि द्रष्टव्यम् । ततश्चान्यथासिद्धत्वाद् बुद्ध्याद्यसमवायिकारणस्य संयोगत्व-साधनं बुद्ध्यादेर्वा संयोगासमवायिकारणकत्वसाधनमनुपपन्नमिति भावः । चतुर्थं दूषयति **स्मृताविति** । तथा च अन्यथासिद्धत्वाद् बुद्ध्यसमवायिकारणादेः संयोगत्वादिसाधनमनुपपन्नमिति भावः । बुद्ध्यादिपदोक्तबुद्ध्यंशे अनुमानमन्यथासिद्ध्या प्रदूष्यादिपदोक्तसुखाद्यंशेऽप्यन्यथासिद्ध्या तद्दूषयति **सुखादाविति** । सर्वत्र तल्लक्षणा-क्रान्तत्वादिति भावः । यन्नित्यविशेषगुणासमवायिकारणं स संयोग इति वा ये नित्यविशेषगुणास्ते संयोगा-समवायिकारणका एवेति वा निरुपाधिकसहचारभङ्गस्यैव विपक्षे बाधकत्वान्नाप्रयोजकत्वमित्याशङ्कते **नित्य-विशेषगुणानामिति** । अत्र कार्यत्वे सतीत्यपि हेतुविशेषणस्याभिमतत्वान्नेश्वरबुद्ध्यादौ व्यभिचारः । पार्थिव-परमाणुरूपादीनामपि तेजःसंयोगजन्यत्वान्न तत्रापि व्यभिचार इति ध्येयम् । शब्दासमवायिकारणभूते विभागादौ सत्यपि नित्यविशेषगुणासमवायिकारणत्वे संयोगत्वाभावाद्विभागादिजन्ये शब्दे च, सत्यपि कार्यत्वे सति नित्यविशेषगुणत्वे, संयोगासमवायिकारणकत्वाभावेन व्यभिचारान्नैतद्विपक्षे बाधकमित्याशयेनाह **विभागेति** । शब्दापेक्षया विभागस्य शब्दं प्रति प्रथमकारणत्वेनाभ्यर्हितत्वात् पूर्वनिपातः । अन्यथाऽल्पाच्तरशास्त्रप्रवृत्त्या शब्दविभागज इत्येवावक्ष्यदिति भावः । नित्यस्याश्रावणो यो विशेषगुणस्तदसमवायिकारणकत्वस्य वा कार्यत्वे सत्यश्रावणत्वे च सति नित्यविशेषगुणत्वस्य वा हेतुत्वेन विवक्षितत्वान्न विभागादौ विभागजशब्दादौ च व्यभिचार इति शङ्कते **अश्रावणत्वेनेति** । विभागादिजेत्यत्रादिपदेन शब्दपरिग्रहः । **कारणान्तरेति** । विभाग-

शब्दरूपासमवायिकारणान्तरेत्यर्थः । **प्रयत्यते** अश्रावणत्वेन हेतुर्विशेष्यत इत्यर्थः । **तथेति** । बाह्यत्वेन हेतुर्विशेष्यतामित्यर्थः । **असमवायिकारणान्तरेति** । आत्मनः संयोगातिरिक्तेष्टार्थोपलब्ध्यादिरूपासमवायिकारणान्तरेत्यर्थः । तथा चोक्तानुमाने हेत्वसिद्धिरिति भावः । **तत** इष्टार्थोपलब्ध्यादिकम् । **अतिव्याप्तिप्राप्तेरिति** । समवायिकारणप्रत्यासन्नत्वादेस्तत्रापि सत्त्वादिति भावः । सुखाद्युपलब्धिः सकरणिका क्रियात्वाच्छिदिक्रियावत् इत्यनुमानमाशङ्क्य निषेधति **न चेति** । यद्वा सुखाद्युपलब्धिरिन्द्रियकरणिका जन्यसाक्षात्कारत्वात् । जन्यरूपप्रतीतिवदित्यनुमानमत्र अभिमतम् । न च श्रोत्रादिनाऽन्यथासिद्धिः । यदि हि बाह्यैः श्रोत्रादिभिः सुखादयो गृह्येरन् तर्हि बधिरादिभिर्नोपलभ्येरन्निति बाधकसद्भावेन तदनवकाशादिति द्रष्टव्यम् ।

वा०र०— प्रत्यक्षज्ञान इत्यादि मूले बुद्ध्यादेः ग्रहणम् । विवेके नास्तीति दर्शयितुं विकल्पमुखेन प्रवृत्तिर्बुद्ध्यंशे एवेति च दर्शयति **बुद्ध्यादिकमित्यत्रेति** । शाब्दं वेति पाठः । किं चेत्यस्यानुवृत्त्यभिप्रायात् शाब्दमित्येव पाठः इत्यप्याहुः । बुद्ध्याद्यसमवायिकारणस्येति स्थलद्वयेऽपि बुद्धिरूप एकदेशे अन्यथासिद्ध्या मनसः अनावश्यकत्वे सिद्धे सम्पूर्णबुद्ध्यादेः मनसः आवश्यकत्वं निराकृतं भवतीत्यभिप्रायः । एतेनादिपदायोगशङ्कानवकाशः । अत एव बुद्ध्यादिकमित्यत्रेति पूर्वग्रन्थो बुद्ध्यादिपदोक्त इत्यादिरुत्तरटीकाग्रन्थश्चोक्तार्थसूचनायेति ज्ञेयम् । आत्मसंयोगादेः कथमसमवायिकारणत्वं इत्यतो लाघवाच्चरमस्थल एव सर्वोपपादकमाह **सर्वत्रेति** । इन्द्रियात्मसंयोगादि उदाहरणस्थले विशिष्टार्थोपलब्ध्याद्युदाहरणस्थलमेवेत्यर्थः । परमाणुरूपादीनामपि तेजःसंयोगजन्यत्वादिति पाठः । **शब्दविभागज इतीति** । एतच्च विभागशब्दजेति पाठानुसारेण । क्वचित् मूले विभागजशब्दजेति पाठः । तत्रापि विभागजशब्दजेति अवक्ष्यत् इति प्रसङ्गो ज्ञातव्यः । तदसमवायिकारणत्वस्येति पाठः । कारणकेति ककारो लेखकप्रयुक्तः । मूलकोशेऽसत्त्वात् । अश्रावणत्वस्य हेतुविशेषणत्वमप्रतीतेः स्पष्टयति **नित्यस्येति** । प्रागुक्तबुद्ध्याद्यसमवायिकारणपक्षकानुमानीयनित्यविशेषगुणासमवायिकारणत्वहेतावश्रावणत्वप्रवेशं उपदर्श्य बुद्ध्यादिपक्षानुमानीयकार्यत्वे सति नित्यविशेषगुणत्वहेतावपि तत्प्रवेशं दर्शयति **कार्यत्वे सतीत्यादि** ।

नन्वेवं हेतुद्वये अश्रावणत्वप्रवेशने भेर्याकाशसंयोगे दृष्टान्ते प्रथमहेतोः शब्दरूपदृष्टान्ते च द्वितीयहेतोः असत्त्वात् साधनवैकल्यप्राप्तिरिति कथं एवं हेतुविशेषणाश्रयणेन शङ्केति चेत् । सत्यम् । एतद्विशेषणपक्षे उक्तसंयोगशब्दयोः दृष्टान्तत्वासम्भवेनान्वयव्याप्त्ययोगेऽपि शब्दासमवायिकारणयोर्विभागशब्दयोः संयोगत्वरूपप्रथमानुमानीयसाध्याभाववत्त्वादश्रावणनित्यगुणसमवायिकारणत्वरूपसाधनाभाववत्त्वाच्च व्यतिरेकदृष्टान्तत्वं तयोरस्तीत्याद्यनुमानीय व्यतिरेकव्याप्तिः सम्भवति । तथा विभागजशब्दजशब्दयोः संयोगासमवायिकारणत्वरूपद्वितीयानुमानीयसाध्याभाववत्त्वात् अश्रावणत्वे सतीत्यादि साधनाभाववत्त्वाच्च व्यतिरेकदृष्टान्तत्वं तयोरस्तीति तदनुमानीयव्यतिरेकव्याप्तिरपि सम्भवति । ततो न दोषः इत्याशयस्य सत्त्वात् । यद्वा मूलटीकयोः हेतुविशेषणत्वोक्तिः व्याप्यविशेषणत्वाभिप्राया । तथा चानुमानप्रविभागदशायां हेतोर्विशेषणं इत्यनङ्गीकारात् न भेर्या-

काशसंयोगादिदृष्टान्ते साधनवैकल्यदोषः । नापि विभागजादिशब्दयोः व्यभिचारः । यत्र नित्यविशेषगुणा-समवायिकारणत्वं तत्र संयोगत्वमित्येव प्रकारेण व्याप्तिग्रहवेलायामेवाश्रावणत्वस्य प्रवेशेन व्यभिचाराभावात् । अत एव मूले व्याप्तिग्रहवेलायां इत्यधिकमुक्तम् । व्याप्यव्यापकयोः अन्यादृश्यत्वेऽपि साध्यसाधनयोः अन्या-दृशत्वेऽपि साध्यसाधकयोरन्याकारत्वस्य सामान्यतो दृष्टानुमानरूपस्यैवेत्येवकारं परित्यज्य यत् इन्द्रियं रूपादिषु पञ्चसु यं गुणं गृह्णाति तदिन्द्रियं तद्गुणवत् इत्यादिस्थले दृष्टत्वेनादोषात् इत्याशयसत्त्वेन दोषाभाव इत्यव-धेयम् । **बाह्यत्वेनेति** । नित्यस्य बाह्यो यो विशेषगुणः तदसमवायिकारणत्वं आद्यो हेतुः । कार्यत्वे सति बाधत्वे सति नित्यविशेषगुणत्वं च द्वितीयहेतुः इत्येवं व्याप्तिग्रहणवेलायां साधनं विशेष्यतामित्यर्थः । अस्तु वा बाह्यत्वेन हेतुविशेषणं ततः किं प्रकृते इत्यतो मूलाभिप्रेतं दोषं दर्शयति **तथा चेति** । **उक्तानुमान इति** । अनुमानद्वयेऽपीत्यर्थः ।

एवं च विभागजादिशब्दे संयोगासमवायिकारणकत्वानुपपत्त्या तदतिरिक्तशब्दस्यैव संयोगासमवायि-कारणकत्वमिति यथा पर्यवसानं क्रियते एवं बुद्ध्यादि कर्मान्तरं नित्यविशेषगुणं परित्यज्य बाह्यनित्यविशेष-गुणस्यैव संयोगासमवायिकारणकत्वमिति सङ्कोचेन पर्यवसानमपि कर्तुं शक्यम् । तथा च बुद्ध्यादेः संयोगा-समवायिकारणत्वसाधकाभावेन तदसमवायिकारणसंयोगासिद्ध्या न तादृशसंयोगः आत्ममनःसंयोगः इत्याश्रित्य मनःसिद्धिः सम्भवतीति उक्तं भवतीति ज्ञेयम् ।

स०व्र०— अन्यथेति । यदि अविवेकिनोऽपि युगपज्ज्ञानानुपपत्तिं जानन्तीत्यर्थः । **क्रमानुमान-मिति** । विप्रतिपन्नज्ञानानि क्रमभावीनि ज्ञानत्वात् । व्यासङ्गज्ञानवदित्यनुमानमित्यर्थः । अन्यथा सिद्धसाधन-त्वादिति भावः । परस्परं प्रतीत्यर्थः । **अस्तु तर्हीति** । बुद्ध्यादिकमसमवायिकारणसहितं भावकार्यत्वात् घटादिवदिति । अनेनानुमानेनासमवायिकारणसामान्ये सिद्धे परिशेषात् तदसमवायिकारणं मनस्संयोगरूपमेवेति संयोगाश्रयतया मनस्सिद्धिरिति भावः । ननु सामान्येन सिद्धबुद्ध्याद्यसमवायिकारणं पक्षीकृत्य तत्तु संयोगरूपं भवितुमर्हति, नित्यस्य योऽयं विशेषगुणः बुद्ध्यादिर्हि तदसमवायिकारणत्वात् । अयं घट इति ज्ञान-कारणेन्द्रियार्थसंयोगवदिति संयोगत्वसाधनान्न लिङ्गज्ञानादिकमादायार्थान्तरमिति शङ्कते **नित्यविशेषेति** । **विभागशब्दजशब्दे इति** । तत्करणीभूते विभागे शब्दे च व्यभिचार इत्यर्थः । यद्वा बुद्ध्यादिकं संयोगा-समवायिकारणकम्, नित्यविशेषगुणत्वादिति साधनं परस्याभिप्रेतम् । तस्य च विभागशब्दजशब्दे स्फुटो व्यभिचारः । **अश्रावणवत्त्वेनेति** । अश्रावणो योऽयं नित्यस्य विशेषगुणः तदसमवायिकारणत्वादिति हेतुः क्रियते इत्यर्थः । द्वितीयप्रकारे तु अश्रावणत्वे सति नित्यविशेषगुणत्वादित्यर्थः । **सुखादिनिरासायेति** । प्रबलप्रमाणेन सुखादिकं प्रति इष्टार्थोपलब्धेः असमवायिकारणत्वस्य निश्चितत्वेन यत्तु नित्यविशेषगुणासमवायि-कारणम्, तत्तु संयोगरूपमिति व्याप्तिग्रहवेलायां बाधापत्त्या सुखाद्यतिरिक्तनित्यविशेषगुणासमवायिकारणमिति विशेषणं दातव्यम् । अन्यथाऽश्रावणत्वविशेषणमपि न दातव्यमिति भावः । **न चेति** । सुखादयो यदि (श्रोत्रादीन्द्रियैः) गृह्येरन् (तर्हि) बधिरादिभिर्नोपलब्धाः स्युरिति भावः ।

विष्ठल०— अविवेकिनामपि युगपज्ज्ञानानुपपत्तिरूपानुमानमूलैव मनःप्रतीतिरिति आह **न च त इति** । युगपदेवानेकज्ञानोत्पत्तिमिति सुगन्धिलामार्दवदीर्घचाष्कुलीभक्षणादावित्यर्थः । **अन्यथेति** । युगपज्ज्ञानानुत्पत्तिः सर्वप्रतीतिसिद्धत्वाङ्गीकारे व्यासङ्गदशायां ज्ञानक्रमस्य दर्शनेन हेतुनान्यत्रापि ज्ञानक्रमोऽनुमीयत इति स्वग्रन्थे प्रतिपादनपरस्य व्यर्थं स्यादित्यर्थः । बुद्धिसुखदुःखादीनामात्ममनःसंयोगो समवायिकारणमिति तार्किकप्रक्रिया । तथा च बुद्ध्याद्यसमवायिकारणसंयोगो धर्मिद्वयाश्रितः संयोगत्वादित्यनुमानेन तदाश्रयानुमाने परिशेषात्मनः सिद्ध्यतीत्याशयेन शङ्कते **अस्तु तर्हीति** । **इन्द्रियात्मसंयोगस्येति** । तथा चेन्द्रियसिद्ध्यन्यथासिद्धमनुमानमिति भावः । तर्ह्यनुमित्यादावसमवायिकारणसंयोगाश्रयतया मनःसिद्धिरित्यतो मनसः ज्ञानसुखादीनां संयोगासमवायिकारणकत्वोपपत्तेरित्याह **अनुमित्यादाविति** । ननु पार्थिवपरमाण्वादि नित्यद्रव्यगतजन्यविशेषगुणानां रूपादीनां तेजःसंयोगसमवायिकारकत्वनियमात् कथमनुमित्यादावन्यदेवासमवायिकारणमित्युच्यत इति शङ्कते **नित्यविशेषगुणानामिति** । अनुमित्यादयः संयोगासमवायिकारणकाः नित्यविशेषगुणत्वादित्यभिप्रेतानुमाने अश्रावणत्वे सतीति हेतुविशेषणान्न विभागजशब्दादौ व्यभिचार इति शङ्कते **अश्रावणत्वेनेति** । **यथा तर्हीति** । तर्हि यथा विभागादिजशब्दे विभागाद्यसमवायिकारणान्तरदर्शनात् तत्र व्यभिचारनिरासाय विशेषणं दीयते तथा खादाविष्टार्थोपलब्धाद्यसमवायिकारणान्तरदर्शनात् तन्निरासायापि बाह्यविशेषगुणत्वादिति विशेषणं देयम् । अविशिष्टहेतोर्व्यभिचारे विशेषणस्वीकारस्य तवेष्टत्वात् । तथा च बुद्ध्यादौ हेत्वसिद्ध्याऽसिद्धिरिति भावः । **तदिति** । इष्टार्थोपलब्ध्यादिकमित्यर्थः । **अतिव्यामेरिति** । समवायिकारणप्रत्यासन्नत्वादिरूपलक्षणस्येष्टार्थोपलब्ध्यादौ सत्त्वादित्यर्थः । अथ सुखाद्युपलब्धयः करणसाध्याः क्रियात्वाच्छिदिक्रियावदित्यनुमानेन मनःसिद्धिर्भविष्यतीत्याशङ्क्य निराह **न च सुखादीति** । विवादपदं स्मृत्यादिकमिन्द्रियकरणकं आत्मविशेषगुणत्वाद्गन्धाद्युपलब्धिवदित्याद्यनुमानं मनस्साधकं भविष्यतीत्यत आह **एवमनुमानान्तरमिति** । उक्तलिङ्गपरिज्ञानशून्यानामविवेकिनामपि मनःप्रतीतैः साक्षिणान्यथासिद्धत्वाच्चेति निरसनीयमित्यर्थः ।

चषकः— **नित्यविशेषगुणानाम्** । नित्यद्रव्याश्रितविशेषगुणानां पार्थिवपरमाणुरूपादीनामपि तेजःसंयोगासमवायिकारणकत्वादिति भावः । **प्रयतनीयमिति** । हेतुशरीरे बाह्यत्वांशोऽपि निवेशनीय इत्यर्थः । असमवायिकारणान्तरस्य लिङ्गज्ञानादिरूपस्य । तत् लिङ्गज्ञानादिरूपम् । **साक्षिसिद्धतयेति** साक्षिरूपज्ञानविषयतया मनःकारणकज्ञानविषयत्वासिद्धेरिति भावः ।

॥ इति मनसोऽनुमानावेद्यत्वम् ॥

* * *

॥ अथ मनसि आगमप्रमाणाभावः ॥

६४ **सु०— न चागमो मनसि प्रमाणम् । जातिबधिराणामपि तत्प्रत्ययात् ।**

तस्मात्सिद्धं साक्षिग्राह्यत्वं मनसः । तस्य च तेनैवात्मनो भिन्नतया ग्रहणाद्भेदाग्रहासम्भवेनेच्छाम्यहमिति न भेदाग्रहनिबन्धनो व्यवहार इति ।

परि०— ननु सुखदुःखाद्यनुभवः इन्द्रियजन्यः प्रत्यक्षाश्रयत्वात् । चाक्षुषज्ञानवत् । अहमित्यनुभव इन्द्रियजन्यः प्रत्यक्षानुभवत्वादित्यादिना अस्तु मनस्सिद्धिरित्यत आह **एवमिति** । साक्षिसिद्धतयान्यथासिद्धेरित्युक्तप्रकारेणेत्यर्थः । **तस्मादिति** । परिशेषादित्यर्थः ।

यादु०— नन्वथाऽपि स्मृत्यादयो बाह्येन्द्रियभिन्नकरणप्रयोज्याः गन्धादिक्रियान्यक्रियात्वात् रथादिक्रियावत् । सुखादयो वा बाह्येन्द्रियभिन्नकरणप्रयोज्याः गन्धादिभ्योऽन्यत्वे सति विषयत्वाद्रथादिवत् । तद्यथा रथादयोऽपि विषयाश्चक्षुरादिव्यतिरिक्तं करणं वाह्यादि प्रयोजयन्ति । विषयाश्च सुखादयस्तस्मात्तैरपि करणान्तरं प्रयोजयितव्यमिति वार्तिकोक्तमनुमानद्वयं वा, विवादाध्यासिताः स्मृत्यादय इन्द्रियजन्मान आत्मविशेषगुणत्वाद्गन्धादिप्रत्ययवदिति वाचस्पत्युक्तं वाऽनुमानं मनःसाधकं भविष्यतीत्यत आह **एवमनुमानान्तरमपीति** । उक्तलिङ्गाज्ञानिनामविवेकिनामपि मनःप्रतीत्या साक्षिणाऽन्यथासिद्ध्या च निरसनीयमित्यर्थः । एवमेव वर्धमानादिनवीनोत्प्रेक्षितानुमानान्यपि निरसनीयानि । तदग्रहासम्भवो मे चैतन्यमितिवदित्याद्येकमेव वाक्यं विवक्षितम् । तेन 'तेमयावेकवचनस्ये'त्यत्र पदात्परयोरित्यनुवृत्तेरभिप्रेतत्वात् प्रकृते च पदात्परत्वाभावेन मयादेशाप्राप्तेर्मे चैतन्यमित्ययुक्तमिति शङ्कानवकाशः ।

वं०प०— **एवमिति** । स्मृतिः शरीरावच्छिन्नात्मसंयुक्तद्रव्यसाध्या कार्यत्वे सत्यात्मविशेषगुणत्वात् । रूपादिज्ञानवत् । अत्र साध्ये शरीरावच्छिन्नेत्युद्देश्यसिद्ध्यर्थं विशेषणम् । दृष्टान्ते चक्षुरादिद्रव्यमादाय साध्यपर्यवसानं पक्षे तु मन आदायेति द्रष्टव्यम् । गुणात्वादित्येवोक्ते आत्मगतैकत्वादिसङ्ग्रहाद्यादौ शरीरावच्छिन्नात्मसंयुक्तद्रव्यभूतचक्षुरादीन्द्रियजन्ये व्यभिचारवारणाय विशेषेत्युक्तम् । तावत्युक्ते घटरूपादौ अतः आत्मेत्युक्तम् । तावत्युक्ते ईश्वररूपात्मविशेषगुणे नित्ये ज्ञानादौ, अतः कार्यत्वे सतीत्युक्तम् । अविवेकिनामपि मनःप्रतीतेरुक्तत्वान्न हि ते एतल्लिङ्गं जानन्तीत्युक्तरीत्या निरस्तमित्यर्थः । **तदिति** । तस्य मनसः प्रत्ययादित्यर्थः । **तस्य चेति** । मनस इत्यर्थः । **तेनैवेति** । साक्षिणैवेत्यर्थः ।

शे०वा०— ननु च स्मृत्यादयो बाह्येन्द्रियभिन्नकरणप्रयोज्या गन्धादिक्रियान्यक्रियात्वात् रथादिक्रियावत् । सुखादयो वा बाह्येन्द्रियभिन्नकरणप्रयोज्या गन्धादिभ्योऽन्यत्वे सति विषयत्वाद्रथादिवत् । तद्यथा

रथादयो विषयाश्चक्षुरादिव्यतिरिक्तं करणं वाश्यादि प्रयोजयन्ति, विषयाश्च सुखादयः तस्मात्तैरपि करणान्तरं प्रयोजयितव्यमिति वार्तिकोक्तमनुमानद्वयं वा, विवादाध्यासिताः स्मृत्यादय इन्द्रियजन्मान आत्मविशेषगुणत्वाद्गन्धादिप्रत्ययवदिति वाचस्पत्युक्तमनुमानं वा, स्मृतिः शरीरावच्छिन्नात्मसंयुक्तद्रव्यसाध्या कार्यत्वे सत्यात्मविशेषगुणत्वाद्रूपादिज्ञानवत् । अत्र संस्कारसाध्यत्वेन सिद्धसाधनतापरिहाराय द्रव्यपदम् । कालादिसाध्यत्वेन तत्परिहारायात्मपदम् । न च कालादेरप्यात्मसंयोगाद्दोषतादवस्थ्यम् । अजसंयोगनिराकरणेन तदनवकाशात् । शरीरसाध्यत्वेन सिद्धसाधनतावारणाय शरीरपदम् । संयोगादौ रूपादौ च व्यभिचारवारणाय हेतौ विशेषणद्वयमित्युदयनोक्तमनुमानं वा मनःसाधकं भविष्यतीत्यत आह **एवमनुमानान्तरमपीति** । साक्षिणाऽन्यथासिद्धेरुक्तलिङ्गाननुसन्धानेऽपि मनःप्रतीतेश्च सर्वत्राविशिष्टत्वादिति भावः । तृतीयमाशङ्क्य निराकरोति **न चेति** । एवं प्रसक्तप्रतिषेधमुपपाद्य परिशेषयति **तस्मादिति** । किमेतावताऽपि सिद्धमित्यतः केन पुनः प्रमाणेनेति शङ्कानिरासः सिद्ध इत्यभिप्रेत्य तत्प्रकारमुपदर्शयति **तस्य चेति** ।

वा०र०— अपि तु गन्धादि क्रियान्यत्वे सति क्रियात्वात् कारणान्तरप्रयोजकत्वम् । या गन्धादिक्रियाभ्योऽन्या क्रिया सा कारणान्तरप्रयोजिका दृष्टा । यथा रथादिक्रिया । क्रिया चेयं स्मृत्यादिकेत्यादि वार्तिकानुसारेणाह **ननु च स्मृत्यादयो बाह्येन्द्रियेत्यादिना** । अत्र च ये आत्मनो विशेषगुणाः ते सर्वे इन्द्रियजन्मानः । यथा गन्धादिप्रत्ययाः इत्यादि वाचस्पत्यनुसारेणाह **विवादाध्यासिताः स्मृत्यादयः इत्यादि इन्द्रियजन्मानः इति** । शरीरसंयुक्तातीन्द्रियरूपकरणजन्मान इत्यर्थः इति सम्बन्धः । वाचस्पत्यनुसारेणाकृत्यान्याह **अत्र संस्कारेति । उदयनोक्तमिति** ।

स०व्र०— **एवमनुमानान्तरमपि** इत्यस्यार्थः स्मृतिः शरीरावच्छिन्नात्मसंयुक्तद्रव्यसाध्या कार्यत्वे सत्यात्मविशेषगुणत्वात् रूपादिज्ञानवत्, यद्द्रव्यं तन्मन इति अनुमानान्तरम् । एतादृशलिङ्गानुसन्धानाभावेऽपि मे मनोऽन्यत्र गतम् इति मनःप्रतीतेः । किञ्च साध्याभावेऽपि हेतुरस्तु विपक्षे बाधकाभावात् । न च स्मृत्यनुत्पत्तिर्बाधिका । भावनया तदुपपत्तेः । न च नित्यविशेषगुणानां संयोगासमवायिकारणत्वनियमः । विभागशब्दजशब्दे व्यभिचारात् । अश्रावणत्वेन हेतुविशेषणान्नेति चेत् तर्हि यथा विभागादिशब्दे कारणान्तरदर्शनात् तन्निरासार्थं व्याप्तिग्रहणवेलायां प्रयत्यते, तथा स्मृतावपि भावनालक्षणासमवायिकारणान्तरस्य दर्शनेन तन्निरासाय यतनीयम् । तस्य निमित्तत्वे असमवायिकारणलक्षणस्य अतिव्याप्तेरिति भावः । न च व्यासक्तस्य देवदत्तस्य घटसंयुक्तं त्वगिन्द्रियं घटसाक्षात्कारकारणकिञ्चिद्द्रव्यसंयोगशून्यम्, तदा घटसाक्षात्काराजनकत्वात् घटासंयुक्तत्वगिन्द्रियवदित्यनुमानेन तत्सिद्धिरिति वाच्यम् । साधारणदूषणानिस्तारात् अप्रयोजकत्वाच्च । न च तथात्वे तदानीमपि घटसाक्षात्कारापत्तिः इति वाच्यम् । विषयान्तरविषयकज्ञानस्य प्रतिबन्धकत्वादेव तदा तदनुत्पत्तिसम्भवादित्यलम् । केचित्तु श्रोत्रादिभिरन्यथासिद्धत्वात् स्मृतिरित्यनुमानं न युक्तमित्याहुः ।

६५ **सु०**— ननु च 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्भीर्ह्रीरित्येतत्सर्वं मन एवे'ति श्रुतौ कामस्यान्तःकरणरूपत्वं तावत् प्रतीयते । न च श्रौतेनार्थेनान्यथा भवितुं युक्तम् । अतो बलवद्बाधकोपनिपातात् 'इच्छाम्यहमि'ति भेदाग्रहनिमित्तं व्यवहारमात्रमेतदङ्गीकरणीयम् । न त्वात्मन इच्छासम्बन्धानुभवः । न च 'मे मन' इति भेदग्रहात् तदग्रहासम्भवः, 'मे चैतन्यमि'तिवद्व्यवहारमात्रत्वात् । न चोक्तानुपपत्तिः ।

सत्त्वरजस्तमसामादिकार्यं हि बुद्धिरित्युच्यते । सा चांशत्रयवती । पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेत्यंशाः । भवति ह्यहमिदं करोमीति । तत्र 'अहमि'ति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः । 'इदमि'ति विषयोपराग इन्द्रियप्रनाडिकया परिणतिभेदो दर्पणस्येव मलसम्बन्धः पारमार्थिकः, तथोभयायत्तो व्यापारावेशः । एषैव दिगहमिच्छामीत्यत्रापीति ।

अत आह **उभयेति** ।

अनु०— उभयात्मकता यतः ।
कामस्य तु मनः कामः

तुशब्दोऽवधारणे । तत इत्युपस्कर्तव्यम् । **यतः** कारणात् कामस्योभयात्मकता **अस्ति**, आत्मधर्मता मनोधर्मता च । **तत एव मनः काम** इति श्रुतिरुपपद्यते ।

इदमुक्तं भवति । भवेदिदं भेदाग्रहकल्पनम्, यद्यात्मनः कामवत्त्वं पारमार्थिकं न स्यात् । न चैतदस्ति, बाधकाभावात् । द्विविधो हि कामोऽस्ति, एक आत्मधर्मोऽपरोऽन्तःकरणधर्मः । तत्रान्तःकरणधर्मं काममभिप्रेत्य श्रुतिः प्रवृत्ता, नात्मनः कामवत्त्वं बाधते । न हि 'देवदत्तो गोमानि'ति वाक्यं यज्ञदत्तस्य गोसम्बन्धं बाधितुं शक्नोतीति ।

परि०— बलबद्बाधकेति । श्रुतिरूपेत्यर्थः । **मे चैतन्यमिति वदिति** । 'ते नानिष्टं कथं भवेदि'त्यत्र 'नञा निर्दिष्टमनित्यमि'त्युक्तदिशा 'वाक्यादौ ने'ति निषेधस्य अनित्यत्वात्

'तेमयावेकवचनस्ये'ति सूत्रेण प्राप्तो मे इति प्रयोगः साधुर्ध्येयः । **न चोक्तानुपपत्तिरिति** । 'कथं स न घटस्य स्यादि'त्युक्तानुपपत्तिर्भेदाग्रहनिमित्तव्यवहारपक्ष इत्यर्थः । **आदिकार्यं हीति** । आदिकार्यस्य महत्तत्त्वरूपत्वेऽपि तस्यैव बुद्धित्वात् तस्या एव च तन्मतेऽन्तःकरणत्वोपगमादिति भावः । **व्यापारावेशश्चेति** । कृतिमत्त्वाद्यभिमान इत्यर्थः । **भवति हीति** । इत्याकारो भवतीति योजना । **परिणतिभेदः** बुद्धेः परिणामविशेषः । **इन्द्रियप्रनाडिकयेति** । इन्द्रियाणि विषय-सन्निकृष्टानि तदाकारतया आदौ परिणमन्ते । पश्चात् तदनुसारितया मनः पश्चात् तदनुसारितया मनः पश्चात् बुद्धिरित्येवंरूपेण बुद्धेर्विषयाकारपरिणामभेद इत्यर्थः । **उभयायत्त इति** । चेतनोपराग-विषयोपरागोभयाधीन इत्यर्थः । ततः किं प्रकृत इत्यत आह **एषैवेति** । इदमिति योज्यम् । अहमिति चेतनोपरागः । इदमिति विषयोपरागः । तदुभयाधीन इच्छामीतीच्छावत्त्वरूपव्यापारावेश इत्यर्थः । तत्रेन्द्रियप्रणाड्या बुद्धेः कृत्यात्मना परिणामे करोमीति भवति । वृत्तिरूपेण परिणामे जानामीति इच्छादिरूपेण परिणामे त्विच्छामीत्यादिरूपेण भवतीत्येवं बोध्यम् । **मनः काम इति श्रुतिरिति** । कामः सङ्कल्प इत्यारभ्य एतत्सर्वं मन एवेति श्रुतिरित्यर्थः । शक्नोतीतिशब्दस्यैतदुक्तं भक्तीत्यन्वयः ।

गु०दी०— मे चैतन्यमितिवदिति व्यवहारमात्रत्वात् इत्यत्र आत्मनि सर्वथा चैतन्यस्याभावे कुतस्तस्य संसार इति प्रष्टव्यम् । भेदाग्रहादिति चेत् तस्य मुक्तावपि सत्त्वेन संसारित्वप्रसङ्गात् । अगृहीतभेदे मनस्यभिमानात्संसार इति चेत् कोऽयमभिमानो नाम । अहमिदं ममेदमिति वा ज्ञानं चेत् तत्किं मनोनिष्ठ-मुत आत्मनिष्ठम् । आद्ये पुनः आत्मनः संसारानुपपत्तिरेव । आत्मनश्चेत्कथं न चैतन्यम् । आगन्तुकक्रिया-नुपपत्तिश्चेत् । अनागन्तुकमेव तदङ्गीकर्तव्यम् । तस्मान्ममेदं मन इत्यनुभवे न काचिदनुपपत्तिः । मानस-सुखज्ञानादीनामागन्तुकत्वेऽपि सुखमनुभवामि घटमहं जानामि कदलीपक्कमहमिच्छामीत्याद्याकारेण सुखादि-स्वामित्वमेवात्मन्यनुभूयते । 'कर्तरि लट्', 'स्वतन्त्रः कर्ता' इति स्मरणात् । स्वामित्वं च मुख्यं चेतनस्यैव न जडस्य । मुख्ये सम्भवति च नामुख्यग्रहणं युक्तम् । स्वामित्वस्य तदनुभवस्य चात्मनि नित्यत्वान्न काचिदनुपपत्तिः । स्वरूपभूतेच्छादीनां तु नित्यत्वेऽपि विशेषबलात् तद्वत्त्वे तत्स्वामित्वे तदनुभवे च न काचिदनुपपत्तिः ।

यादु०— नन्विच्छाम्यहमित्येतद्भेदाग्रहनिमित्तं व्यवहारमात्रं न त्वनुभव इति यद्युच्यते तदा कथं स न घटस्य स्यादित्यनेन याऽनुपपत्तिरुक्ता सा स्यादित्याशङ्क्य निषेधति **न चोक्तानुपपत्तिरिति** । **अदिकार्यं हीति** । अनेन बुद्धेः पुरुषप्रतिबिम्ब(नो)तोपाधितोपपादकस्वच्छतोक्तेति ज्ञातव्यम् । बुद्धिरन्तःकरणविशेष इति तन्मतमतो न प्रकृतासङ्गतिरिति ध्येयम् । न चैवं महत्तत्त्वस्यादिकार्यत्वप्रसिद्धिविरोधः । आद्यं कार्यं महत्तत्त्वं

सैव बुद्धिरन्तःकरणं चेति तैरङ्गीकारात् । **व्यापारावेश इति** । कर्तृत्वाद्यभिमान इत्यर्थः । **इन्द्रियप्रणाडिकयेति** । यथा ग्रामाध्यक्षः कुटुम्बिभ्यः करमादाय विषयाध्यक्षाय प्रयच्छति । विषयाध्यक्षश्च सर्वाध्यक्षाय स च भूपतये तथा बाह्येन्द्रियाणि स्वार्थमालोच्य मनसे समर्पयन्ति । मनश्च सङ्कल्प्य अहङ्काराय, अहङ्कारश्च अभिमान्यसर्वाध्यक्षायां बुद्धौ एव चादौ स्वार्थसन्निकृष्टानि बाह्येन्द्रियाणि तदाकारेण परिणमन्ते ततस्तदनुसारि मनआदिकमपि तथैव परिणमत इत्येवमिन्द्रियप्रणाडिकया बुद्धेर्विषयाकारपरिणतिभेदो द्रष्टव्यः । **उभयायत्त इति** । अपारमार्थिकचेतनोपरागपारमार्थिकान्तःकरणपरिणतिभेदरूपोभयायत्त इत्यर्थः । यदाऽन्तःकरणपरिणामो वृत्तिरूपः तदा जानामीत्यभिमानो यदा प्रयत्नरूपस्तदा करोमीत्यभिमान इत्यादि द्रष्टव्यम् । नन्वेतावता किं प्रकृत इत्यत आह **एषैव दिगिति** । इन्द्रियप्रणाडिकया विषयेच्छारूपेऽन्तःकरणपरिणामे सति अपारार्थिकचेतनोपरागात् अहमिच्छामीत्यभिमानमात्रं भवति न त्वात्मान इच्छावत्त्वानुभाव इत्यर्थः । अभिमानोऽहङ्कारस्य कार्यविशेषोऽनुभवोऽन्तःकरणस्येति विवेकः । व्यवहारमात्रमिति पूर्वग्रन्थेऽपि व्यवहारपदेनाभिमानो विवक्षितोऽतो न तेन विरोध इति द्रष्टव्यम् । इदमत्राकूतम् । अन्तःकरणविशेषरूपाया बुद्धेः सत्त्वाद्यादिकार्यत्वेन तर्पणवन्निर्मलत्वात् तत्रैव चेतनोपरागो भवति, न घटे, तस्यास्वच्छतया पुरुषप्रतिबिम्बनोपाधिताया असम्भवात् । नाप्यन्तःकरणस्येव घटस्येन्द्रियप्रनाडिकया विषयाकारः परिणतिभेदः । येनोभयायत्तोऽहमिच्छामीतिव्यापारावेशस्तत्र स्यात् । अतो नोक्तानुपपत्तिरिति ।

वं०प०— उभयेति । व्यापारावेशो नाम करोमीत्यनेन प्रतीयमानं कर्तृत्वं पुरुषोपरागविषयोपरागाधीनम् । तदुभयाभावे निराश्रयं निर्विषयं च कर्तृत्वं न सम्भवतीति कर्तृत्वं बुद्धावेव प्रतीयत इत्यर्थः । बुद्धौ कथितयोश्चैतन्योपरागव्यापारावेशयोः प्रयोजनमाह **एषैवेति** । अहमिदमिच्छामीत्यन्तःकरणव्यापारः । तत्राहमिति पुरुषोपरागः । इदमिति विषयोपरागः । इच्छामीति तूभयायत्तो व्यापारावेशः । तथा चान्तःकरणे चैतन्योपरागोऽस्ति, न घटेऽतस्तन्निमित्तकोक्तभेदाग्रहसद्भावात् आत्मनीच्छामीति व्यवहारमात्रं जायते न त्वनुभव इत्यर्थः । **श्रुतिः** 'कामः सङ्कल्प' इत्यादिका । तदेवेति मनोधर्मत्वप्रतिपादिका एष्टव्या । आत्मधर्मत्वमेव कुत इत्यर्थः । **श्रुतिरिति** । 'स यदि पितृलोककामो भवति' इत्यादिका वक्ष्यमाणा श्रुतिः । कामस्यात्मधर्मत्वप्रतिपादिका द्रष्टव्या । अहमिच्छामीति तु कामस्यात्मधर्मत्वावगाह्यनुभवः ।

कं०रा०— मे चैतन्यमिति । मे मन इत्यस्य मे चैतन्यमिति व्यवहारमात्रत्वेन भेदग्रहस्यैवाभावादित्यर्थः । **न चेति** । अहमिच्छामीति भेदाग्रहनिमित्तं व्यवहारमात्रमित्ययुक्तं तथात्वे घटपटयोरपीतरेतरभेदाग्रहणेतरेतरधर्मसंसर्गव्यवहारापत्तेः । न च वाच्यं स्वरूपग्रहविशिष्टभेदाग्रहो व्यवहारहेतुः स च न घटादावस्तीति नातिप्रसङ्ग इति स्वरूपग्रहविशिष्टभेदाग्रहस्याचेतनान्तःकरणनिष्ठत्वे घटेऽपि तदापत्त्या व्यवहारापातात् । आत्मनिष्ठत्वे तु निर्विकारस्यात्मनो व्यवहाररूपक्रियानुपपत्त्यात्मगतेन तादृशभेदाग्रहणेनान्तःकरणस्य व्यवहाराङ्गीकारे घटेऽपि तदापातादित्याद्यनुपपत्तिः । न च सत्त्वरजस्तमसामादिकार्यस्य पुरुषोपरागविषयोपराग-

व्यापारावेशरूपांशत्रयवतोऽन्तःकरणस्याहमिति चेतनोपरागत्वेन घटादिविलक्षणतया तत्रैव व्यवहारोपपत्तेरिति भावः । कामस्योभयात्मकतामेव दर्शयति **आत्मधर्मतेति** । **तत एवेति** । कामस्योभयात्मकत्वादेवेत्यर्थः । **श्रुतिरिति** । कामः सङ्कल्प इत्यादि श्रुतिरित्यर्थः ।

श्रीनिधि०— न चोक्तानुपपत्तिरिति । विशिष्टो भेदाग्रहः किमन्तःकरणस्य उतात्मन इति विकल्प्य उतानुपपत्तिरित्यर्थः । **आदिकार्यम्** आदिकालीनं कार्यम् । अत्र विशिष्टो भेदाग्रहान्तरणस्यैव । न च तस्या चेतनत्वदोषः । पुरुषोपरागेण तत्परिहारसम्भवात् । घटादौ चैतन्यसन्निधाने विद्यमानेऽपि तदुपरागाभावादिति उक्तानुपपत्तिपरिहारप्रकार उक्तो भवतीति ज्ञेयम् । **इन्द्रियप्रणाडिकया परिणतिभेद इति** । बुद्धेरिन्द्रियसंयोगे इन्द्रियाणां च विषयसंयोगे सति परिणतिभेदः, परिणामविशेषः बुद्धेरिति भावः ।

शे०वा०— ननु च 'उभयात्मकता यत' इति कामद्वैविध्यनिरूपणपरमुत्तरवाक्यमनर्थकम् । न च 'कामः सङ्कल्प' इति श्रुतेरुपपत्तिप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वादित्यतः तद्विरोधेनात्मनः कामवत्ताया अपारमार्थिकत्वशङ्कानिराकरणार्थत्वात् तस्य न तदिति भावेन तच्छङ्का-परिहारकतयोत्तरवाक्यं योजयितुं श्रुतिविरोधेनात्मनः कामवत्ताया अपारमार्थिकत्वशङ्कामुत्थापयति **ननु चेति** । श्रौतेनेति हेतुगर्भविशेषणम् । अन्यथा श्रुतेरप्रामाण्यप्रसङ्गादित्यर्थः । **चैतन्यमितिवदिति** । न च 'तेमयावेक-वचनस्ये'ति पदात्परयोरपादादौ स्थितयोरेव युष्मदस्मदोस्तेमे इत्यादेशविधानात् प्रकृते च पदात्परत्वाभावेन मयादेशाप्राप्तेर्मे चैतन्यमिति कथं टीकाकारीयो व्यवहार इति वाच्यम् । तत्रत्यपूर्वोत्तरवाक्यसन्दष्टतया पदा-त्परत्वेऽप्येकदेशमात्रस्य प्रकृते उदाहरणेन तदुपपत्तेरित्याशयात् । वस्तुतो विभक्तिप्रतिरूपकमव्ययमेवैतदिति द्रष्टव्यम् । विरोधिनि भेदग्रहे सति भेदाग्रहस्यैवासम्भवात् तन्निमित्तकव्यवहारानुपपत्तिरिति 'मनो म इति भेदत' इति वाक्योक्तामनुपपत्तिं भेदग्रहस्यैवाभावव्युत्पादनेन परिहृत्य आत्मान्तःकरणयोर्भेदाग्रहादन्योन्यधर्मसंसर्ग-व्यवहारः स्यादिति कथं स न घटस्य स्यादिति वाक्योक्तामनुपपत्तिं परिहरति **न चोक्तानुपपत्तिरिति** । नापि कथं स न घटस्य स्यादित्यनेनोक्तानुपपत्तिरित्यर्थः । तत्कुत इत्यतो बुद्धेश्चैतन्योपरागरूपांशवत्त्वेन भेदाग्रह-निमित्तचैतन्योपरागरूपनिमित्तेन आत्मान्तःकरणयोरन्योन्यधर्मसंसर्गव्यवहारसम्भवेऽपि घटे तदभावात् घटा-त्मनोर्वा घटपटयोर्वा अन्योन्यधर्मसंसर्गव्यवहाराभावसम्भवादित्यभिप्रेत्य बुद्धेश्चैतन्योपरागरूपांशरूपत्वमुपपादयितुं बुद्धिस्वरूपं तावदाह **सत्त्वरजस्तमसामिति** । सा च कृत्यध्यवसायव्यापारवतीति शेषः । ननु कृत्यध्यवसायो न बुद्धेः व्यापारः । कृतिविषयस्य घटादेर्जडायां बुद्धौ प्रतिभासासम्भवात् । न च कर्तव्येन घटादिना बुद्धेः सम्बन्धान्तरमस्ति । न चासम्बद्धे करोमीत्यध्यवसायोऽतिप्रसङ्गादित्यत आह **सा चेति** । चेतनोपरागबलेन जडाया अपि बुद्धेरिन्द्रियप्रनाडिकया परिणतिभेद एव ज्ञानरूपः कर्तव्येन घटादिना सम्बन्ध इति नोक्तदोष इति भावः । तानेवांशान्विभजते **पुरुषोपराग इति** । कथमेतत्त्रयं बुद्धेर्धर्म इत्याशङ्क्य सम्मुग्धमुदाहरणं दर्शयति **भवति हीति** ।

कथमेतावता अंशत्रयसिद्धिरित्यतो निष्कृष्यांशान् दर्शयति **तत्रेति** । अयमर्थः । बुद्धिचेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः ॥ नीलेन्द्रियसन्निकर्षान्नीलाकारज्ञानरूपपरिणतोत्पादः पारमार्थिको विषयोपरागः । उक्तेनोपरागद्वयेन कर्तव्यविषयस्य प्रतिभासात् तदधीनः करोमीत्यध्यवसायो व्यापारावेश इत्युच्यत इति । तत्र चेतनोपरागो नाम चेतनसम्बन्धः । स च परिणामविशेषः । तत्कथं च चेतनोऽपरिणामी बुद्ध्या सम्बध्येतेत्यत उक्तं **दर्पणस्येति** । निःश्वासाभिहतस्येति शेषः । दर्पणप्राया बुद्धिः कथं दूरस्थेन विषयेणोपरज्येतेत्यत आह **इन्द्रियप्रनाडिकयेति** । यथा हि ग्रामाध्यक्षः कुटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छति विषयाध्यक्षश्च सर्वाध्यक्षाय स च भूपतये । तथा बाह्येन्द्रियाण्यालोच्य विषयं मनसे समर्पयन्ति । अलोचनं च बाह्येन्द्रियव्यापार इत्येके । निर्विकल्पकं ज्ञानमित्यपरे । मनश्च सम्मुग्धदृष्टस्य विशेषणविशेष्यभावेन विवेचनात्मकविकल्परूपव्यापारसहितमहङ्काराय समर्पयति । अहं जानाम्यहं करोमीत्यादिरूपाभिमानलक्षणव्यापारसहितोऽहङ्कारश्च कर्तव्यमेतन्मयेत्यादिलक्षणाध्यवसायरूपव्यापारवत्यां सर्वाध्यक्षायां बुद्धावित्येवमिन्द्रियप्रनाडिकयेत्यर्थः । अत एव 'सान्तःकरणा बुद्धिः सर्वं विषयमवगाहत' इति कारिकायां विषयाध्यवसायिन्या बुद्धेर्बाह्यानीन्द्रियाणि द्वाराणीत्युक्त्वा, न केवलं बाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिः अपि तु ये तेऽहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिरेव प्रधानमिति 'एते प्रदीपकल्पाः' इति कारिकायां मनोहङ्कारयोरपि द्वारत्वमुक्तमिति ध्येयम् । **उभयायत्त इति** । अपारमार्थिक(त्वेन) चेतनोपरागपारमार्थिकान्तःकरणपरिणतिभेदरूपविषयोपरागरूपोभयायत्त इत्यर्थः । यदाऽन्तःकरणपरिणामो वृत्तिरूपस्तदा जानामीत्यभिमानो, यदा प्रयत्नरूपस्तदा करोमीत्यभिमान इत्यादि द्रष्टव्यम् । ततः किं प्रकृत इत्यत आह **एषैव दिगिति** । अयमेव प्रकार इत्यर्थः । इन्द्रियप्रणाडिकया विषयेच्छारूपेऽन्तःकरणपरिणामे सति अपारमार्थिकचेतनोपरागात् अहमिच्छामीत्यभिमानमात्रं भवति न त्वयमात्मन इच्छावत्त्वानुभव इति भावः । अभिमानोऽहङ्कारस्य कार्यविशेषः । अनुभवोऽन्तःकरणस्येति विवेकः । व्यवहारमात्रमिति पूर्वग्रन्थेऽपि व्यवहारपदेनाभिमानो विवक्षित इति न तेनास्य विरोध इति ध्येयम् । अत्रायं निष्कर्षः । अन्तःकरणविशेषरूपबुद्धेः सत्त्वरजस्तमसामादिकार्यत्वेन दर्पणवन्निर्मूलत्वात् तत्र चेतनोपरागो न घटे । तस्यास्वच्छतया पुरुषोपरागासम्भवात् । नाप्यन्तःकरणस्येव घटस्येन्द्रियप्रनाडिकया विषयाकारपरिणतिभेदो येनोभयायत्तो व्यापारावेशस्तत्र स्यादिति नोक्तानुपपत्तिरिति ।

उपस्कर्तव्यमिति । 'उभयात्मकता यत' इति यच्छब्दश्रवणादिति भावः । श्रुतेरन्यथैवोपपत्तिलाभाय तुशब्दमवधारणार्थतया व्याचष्टे **तुशब्द इति** । अवधारणार्थस्य तुशब्दस्योपस्कृतेन तत इत्यनेन सम्बन्ध इत्यभिप्रेत्याह **तत एवेति** । साकाङ्क्षत्वेन प्रसक्तां वाक्याभासतामपेक्षितपूरणेन परिहरति **इति श्रुतिरुपपद्यत इति** । तावताऽपि कथमुक्तशङ्कापरिहार इत्यत आकाङ्क्षाक्रमेण परिहारप्रकारमाह **एतदिति** । इतीत्यस्यैतच्छब्देन सम्बन्धः ।

वा०र०— एतदधिकरणीयमेव चैतन्यं इत्येतत्प्रयोगे अभ्युपगमेऽप्यर्थाभावात् इत्येतदधिकरणीयनवाभ्युपगमो प्रयोजनश्चेति युक्तम् । मे माता वन्ध्येतिवत् तत्त्वप्रकाशिकाप्रयोगे च भट्टोज्युक्तं ममादेशानुपपत्तिं

परिहर्तुं आशङ्कते **न च ते मयेति** । ते मयेति सूत्रे अनुदात्तं सर्वं अपदादौ इत्यतो अपदादावित्यादेः अनुवृत्तिरस्ति इत्याशयेन उक्तं **पदात्परयोरित्यादि** । **तत्रत्यपूर्वोत्तरेति** । अयं भावः । अयं हि ग्रन्थो न स्ववाक्यम् । किन्तु परानुवादः । अनुवादोऽपि परानुपूर्व्यनुसारेण । नार्थानुवादः । एवं च तदीयवाक्यानां अनुवादाय प्रवृत्तेन मूलकृता वाक्यगौरवभयेनाल्पानुवादः कृतः । इति तद्ग्रन्थस्थपूर्वपदविवक्षयैवादेशे विशिष्ट-वाक्यानुवादे दोषाभावः । एतेन पूर्ववाक्यस्थपदात् परत्वेनादेशोपपत्तिरिति परिहाराभासोऽपि निरस्तः । पदात्परत्वोक्त्या वाक्यादेरेवात्र व्यावर्त्यतयोत्तरवाक्यादित्वमात्रेणादेशत्वायोगतादवस्थ्यात् इति । एकदेशस्य उदाहरणेनैव एतदपि सूचितम् । यत् परं वाक्ये मया देशाविष्टतया प्रयोगे सति तत्रत्यस्यानुवादावसरे पूर्वपदाप्रयोगेऽपि तदादेशविशिष्टानुवादो युज्यत इति । तेन परग्रन्थेऽपि न पूर्वपदावश्यकता इति लब्धम् । तथा हि । परवाक्येऽपि मे जन्यमिति न स्ववाक्यम् । अपि तु गङ्गास्नानादिना मे चैतन्यं सन्तोषमागतं इत्यादि प्रामाणिकव्यवहारदर्शनेन तद्वाक्यगत मे चैतन्यमित्येतदंशस्यैवानुवादरूपम् । न हि स्वेऽपि स्वव्यवहारं प्रामाणिकं कर्तुं प्रवृत्तः । तस्य परेणानादरणीयतायाः तत्सम्मतेः । किन्तु तत्प्रतिवादिना सर्वजनसिद्धतयाङ्गी-कृतप्रामाणिकव्यवहार एव तेन दृष्टान्तीक्रियते । यथोत्तराधिकरणे न चैवं प्रतिभास एव नास्ति । अपि तर्हि घटस्य स्वरूपमितिवत् व्यपदेशमात्रमिति चेत् इत्यत्र सर्वसम्मतव्यवहारमात्रमेव दृष्टान्तीक्रियते । ततश्च गङ्गास्नानादिनेत्यादि पूर्वपदापेक्षयादेशस्य सर्वजनप्रयोगसत्त्वेऽपि प्रकृतोपयोगानुसारेण मे चैतन्यमित्येतावन्मात्र-स्योदाहरणे परस्यापि दोषाभावः । तदनुवादे तु सुतरां तदभावः । एवमेव हि मे माता वन्ध्येतिवदित्यत्रापि । न हि इदं स्ववाक्यं किन्तु सर्वजनानां स्वव्याहतत्वेन सम्प्रतिपन्नं यत्कस्यचित्पुरुषस्य इयं मे माता वन्ध्या इति वाक्यम् । तत्रैकदेशस्यैव प्रकृतोपयोगानुसारेणानुवादरूपम् । न हि ग्रन्थकार एव स्वकीयां स्वव्याहतोक्तिं दृष्टान्तयति । वृथा स्वव्याहतवचनस्य स्वस्मिन् अङ्गीकारायोगात् । अन्यथा जात्युदाहरणादपि मूकोऽहं, मे माता वन्ध्येत्यादिरूप व्यवहारो ग्रन्थकारस्यैव कल्पनीय इति प्रामाणिकसर्वग्रन्थेषु प्रमाणतदाभासनिरूपणायोगप्रसङ्गः । तस्मात् मूकोऽहं इत्यादिरूपं किञ्चित् पुरुषीयव्यवहारं सिद्धवत्कृत्वैव स्वक्रियाविरोधादेरुदाहरणतया प्रतिपादनवत् परदूषणाय प्रवृत्तेन परवाक्ये स्ववचनविरोधस्थले मे मातेत्यादेः अवश्यं उदाहर्तव्यतया प्रामाणिकानां तदुदाहरणे च यथाश्रुतानुवाद एव भारेण तथानुवादे दोषाप्रसरः इति सर्वसम्मतमिति । तथाविधोदाहरणे मयादेशानुपपत्तिं शङ्कमान एव स्वाभ्युपगमविरुद्धवादि इत्युपेक्ष्य तत्त्वप्रकाशिकायां मे मातेत्यादि त्वदीयानुवादेऽपि हि मेत्यादेशं प्रति न तत्त्वप्रकाशिकायामिति पूर्वपदं प्रयोजकम् । पदात् परत्वाभावेन मेत्यादेशायोगः इति त्वदीयवाक्येऽपि पदात्परत्वसत्त्वेन तदादेश इत्यपि न तवैव सम्मतम् । तेनानुवादकरणेन दोषाभाव इत्यङ्गीकारात् किं च कुत्र मयादेशायोगः इति त्वयोच्यते । मे मातेति पूर्वपदशून्यस्थले इति चेत् तर्हि त्वदीयतन्निर्देशेऽप्युक्तपर्यनु-योगप्रसङ्गेन स्वन्यायहतत्वप्रसङ्गः । पूर्वपदशून्य मे मातेति स्थल इति चेत् । तत्र त्वदीयपूर्वपदशून्यपदोत्तरत्वेन तदादेशोपपत्तेः । परवाक्ये पूर्वपदं नास्तीति तत्र तदादेशायोगः इति तात्पर्यमिति चेत् । स्वीकृतं तर्हि परानुवादे दोषाभाव इति युक्त्या सम्बन्धः । तदेवं मे चैतन्यमित्यादौ पुरुषान्तरीयप्रयोगे पदात्परत्वेनादेशं सिद्धवत्कृत्य प्रकृतोपयोगानुसारेण एकदेशानुवादेऽपि मयादेशविशिष्ट एव परवाक्यानुवादतया तत्र तदादेशानुपपत्तिचोदनं

सर्वप्रामाणिकव्यवहारविरोधि स्वीकृततया विधव्यवहारकर्तव्यतापरिहारी स्वशङ्कावाक्येऽपि दोषावतारेण स्वव्याहतं चेति तथा चोदनं कुर्वन् उन्मत्ततम एव । अत एव तृजकाभ्यामित्येतत्सूत्रीय पदमञ्जर्यां मे इति यातेरुत्तमवर्णन इति सम्प्रदाने चतुर्थीत्युक्तम् । अत एव चामन्त्रितं पूर्वमविद्यमानवत् इत्येतत् दृष्टं मे द्वितीयकाशिकाया मेशब्दस्य च निमित्तभावं न प्रतिबध्नाति इत्युक्तम् । अत एव चामन्त्रितस्य चेति स्वरसूत्रीपरमायामपि मेशब्दात् परत्वमाश्रित्येति वाक्यादावेव म इति प्रयोगः । तथा च तद्विरोधश्च । एवं तच्चेन्मानं गृहीतं त पृथगधिकरणीयानुव्याख्यानमूलस्थः त इत्यव्ययम् । तृतीयार्थ इति ते म इति वेति प्रयोगोऽपि उपपाद्यः । एवमेवान्यत्राप्येवं ज्ञातीयकेऽवधेयमित्यास्ताम् । अत्र पूर्ववाक्यगतपदसदृशमात्रे वक्तव्ये उत्तरवाक्यसन्देशस्यापि उक्तिरेकदेशत्वस्पष्टनाय वस्तुस्थितिकथनरूपेणेति न दोषः । एतत्पक्षे पूर्ववाक्यसन्देशकथनमाश्रयणीयं भवतीति अपरितोषमाश्रित्य समाधानान्तरमाह **वस्तुतो विभक्तीति** । युष्मच्छब्दस्य चतुर्थीषष्ठीप्रथमवचनं मे इत्येतदस्ति । तथाविधविभक्त्यन्तं तत्प्रतिरूपतत्सदृशमित्यर्थः । अतिचिरायेत्यादिविभक्त्यन्तसदृशचिरायेत्यादिवदिति भावः । एतच्च समाधानं सार्वत्रिकप्रयोगोपपत्तये कृतमपि अङ्गीकारवादेन । वस्तुतस्तु एकदेशोदाहरणेन इत्यनेन सूचिततयाऽस्माभिरुपदर्शितप्रकारेणैव समाधौ तत्तात्पर्यम् । एवमेव सन्ध्याधिकरणीयस्वव्याहतिः मे माता वन्ध्येति वाक्यव्याख्यानटीकायां विभक्तिप्रतिरूपकत्वाश्रयणेन समाधानमपि अङ्गीकारवादेनैव । परानुवादे दोषाभावस्य सर्वसम्मत्या लोकसिद्धये मातेत्युदाहरणस्य उपपादने दोषाप्रसरेण विभक्तिप्रतिरूपकत्वाश्रयणपर्यन्तधावनवैय्यर्थ्यात् । किन्तु एतट्टीकास्थप्रथमसमाधानमेव तत्रापि द्रष्टव्यम् । तदपि पूर्वपदप्रयोगशून्यस्थलाभिप्रायेणैव । न तु तत्स्थलेविवक्षया । तत्स्थलेऽपि व्यवहारदशायां मे मातेत्यादेरेव प्रथमप्रयोगस्यावश्यकतया तत्र वाक्यादितया म या(?)देशानुपपत्तिपरिहाराय सत्त्वाश्रयणम् । अत एव तत्रत्यटीकायां मे मातेत्यारभ्यैव वाक्यप्रयोगः । क्वचित् मूलभूतप्रथमवाक्यं मम माता वन्ध्येत्यप्यस्ति तदनुसारेण विलक्षणं सदसतोरिति चेति स्वप्नाधिकरणमूले मम माता वन्ध्येत्येव मूलभूतं वाक्यम् । तदनुसारेण द्रव्यमेव ततोऽनन्त इति समवायनिराकरणानुव्याख्यानमूले माता वन्ध्येतिवत् अवधेयम् । **व्यवहारानुपपत्तिरितीति** । इत्येवंरूपामित्यर्थः । अन्योन्यधर्मसंसर्गव्यवहारः स्यात् इत्यत्र कथं स नेति पाठः । मूलकोशे तथैव सत्त्वात् । युक्तत्वाच्च । स्यादिति इति लेखकागतपाठेऽपि इति शब्दस्यैवेत्यत्र इत्यर्थ इत्यपि प्राहुः **आत्मान्तःकरणयोरिति** । अन्तःकरणं च बुद्धिरिति प्रकृते विवक्षितमित्याशयो अतो विवक्षामूलका सङ्कोरेण मूलटीकयोः उक्तिर्न दोषाय । अन्यथा मनो भेदे ग्रहेणेच्छामीति प्रत्यये व्यवहारमात्रत्वेन परेणोक्ते मनो भेदे ग्रहे च प्रदर्शिते बुद्धौ चेतनोपचारेण चैतन्यनिमित्तकाहमिति प्रतिभासोपपादनम् । मनसो बुद्धिव्यापारान्तर्गतत्ववचनादिकं चायुक्तं स्यात् इति ज्ञेयम् । वक्ष्यति च । **अन्तःकरणविशेषरूपं बुद्धेरिति** । तत्र चोक्तरीत्या मनोविशेषान्तःकरणरूपा बुद्धेरित्यर्थो विवक्षित इति वक्ष्यति । अत एव बुद्धिरूपलब्धिः ज्ञानं इत्यनर्थान्तरं इत्येतत् गौतमसूत्रसम्बन्धी वार्तिके बुद्ध्यादिपर्यायशब्दाभिधेयो या बुद्धिरिति लक्षणविवरणं कृतम् । उक्तं च कुसुमाञ्जलिवर्धमानव्याख्याने ठक्कूरभगीरथेन । मनो द्विविधं अन्तःकरणं इन्द्रियं च । अन्तःकरणं मनः बुद्धि अहङ्कारभेदेन वैचित्र्यात् इतीत्यादि ज्ञेयम् । मूलकोशानुसारात् संसर्गव्यवहारः स्यात्

इत्यत्रेति पाठः इत्यङ्गीकारेत्यर्थः । इतीत्येव पाठेऽपीत्यत्रेत्यर्थः । **आदिकार्यमिति** मूलम् । महदाख्यमित्यर्थः । तथा महान् ज्ञायते स एव बुद्धिरिति कुसुमाञ्जलिकारिकाशये उक्तेः । **निर्विकल्पकव्यापाराणि** । इन्द्रियाणि । सविकल्पकव्यापारं मनः अविकाराभिमानव्यापारो अहङ्कारः । कृत्यध्यवसायव्यापारा बुद्धिरिति निबन्धं आलोचनं हि व्यापारं इन्द्रियाणां इत्यादि कृत्यध्यवसायो बुद्धेरिति कुसुमाञ्जलिं च मनसि कृत्वाह **सा च कृत्यध्यवसायव्यापारवतीति शेष इति** । अध्यवसायो बुद्धिरिति कारिकाव्याख्यानावसरे सर्वो व्यवहर्ता आलोच्य मत्वा अहमत्राधिकृतः इत्यभिमत्य कर्तव्यमेतत् मया इत्यध्यवस्यति । ततश्च प्रवर्तते इति लोकसिद्धम् । तत्र योऽयं कर्तव्यमिति निश्चयश्चित्तिसन्निधानात् आपन्ना चैतन्यायाः बुद्धेः सोऽध्यवसायबुद्धेः असाधारणव्यापारः । तदभेदात् बुद्धेर्लक्षणं इति भामती । उक्तकुसुमाञ्जलिवर्धमानानुसारेणाह **ननु कृत्यध्यवसाय इत्यादिना नोक्तदोष इति भावः इत्यन्तेन** । साङ्ख्यपरीक्षायां भामतीतत्त्वकौमुदीनामिकाटीकाद्वयम् । प्रमेयतत्त्वबोधादिकं च निष्कास्य विशेषो व्याख्येयोऽस्ति । पुरुषोपरागे विषयोपरागः इत्येतत् कुसुमाञ्जलिव्याख्यानरूप बुधिचेतनयोः इत्यादि वर्धमानानुसारेणाह **अयमर्थः बुद्धिचेतनयोरित्यादिना । परिणतोत्पाद इति** । परिणतिभेदोत्पाद इत्यर्थः । तथैव पाठस्तु स्वरस एव । वर्धमाने तथोक्तेः । **तत्कथमिति** । सम्बन्धस्य परिणामविशेषरूपत्वात् अपरिणामिचेतनो बुद्ध्या कथं सम्बन्ध्यतेत्यर्थः । दर्पणस्यैव इतीति प्रतीकोपादानानन्तरं दर्पणस्येवेतीति द्वितीयस्य नाशने लेखकेन भ्रान्त्या कृतम् । किन्तु मूले इदमिति विषयोपरागो दर्पणस्येव मलसम्बन्धपारमार्थिक इति सम्बन्धसूचनाभिप्रायेण विषयोपरागप्रतिपादकवाक्यस्थदर्पणस्येवेत्यस्यापि प्रतीकतयोपादानमस्ति । तदनन्तरं विश्वासाभिमतस्येति शेष इति पाठः । कुसुमाञ्जलौ मलसम्बन्धोपपादकतया विषयोपरागप्रतिपादकवाक्य एव दर्पणस्येवेत्यस्य विश्वासाभिमतस्येति विशेषितत्वात् । पुरुषोपरागप्रतिपादकवाक्यस्थदर्पणस्येवेत्यस्य तेनापि विशेषणेनाविशेषितत्वाच्चेति ज्ञेयम् । द्वितीयदर्पणस्येवेत्यनन्तरं विश्वासेति पाठस्तु स्वरस एव । दर्पणस्य मुखमलाभ्यां सम्बन्धेऽपि बुद्धेः कुतः पुरुषविषयसम्बन्धः इत्यतो दर्पणस्य साम्यात् बुद्धेस्तद्युज्यते इत्याशयेन साम्यवत् अन्येवेति विशेषणं अवतारयति **दर्पणप्रायेति** । स्वच्छद्रव्यतया दर्पणतुल्येत्यर्थः । **बाह्येन्द्रियव्यापारेति** । विषयेन्द्रियसन्निकर्षरूप इत्यर्थः । **एक इति** । आलोचनव्यापाराणि इन्द्रियाणीति कुसुमाञ्जलिवर्धमानानुसारेण निर्विकल्पकं ज्ञानं इत्यपर इति भामत्याद्यनुसारेणेदं व्युत्पादनम् । **सम्मुग्धदृष्टस्येति** । अनेन मनोव्यापारविकल्पस्य स्वरूपं उक्तम् । अयमेव प्रकारः इत्येतद्विवरणपूर्वकं अतो बलवत् बाधकेत्यादिना पूर्वोक्तफले पर्यवसानशङ्क्या दर्शयति **इन्द्रियप्रनाडिकया इत्यादि** । आलोचनव्यापारकेन्द्रियैर्विषयो मनसि आरोपितः । मनश्च विकल्पव्यापारकं अहङ्काराय । अहङ्कारस्तु अहमिच्छामीत्यभिमानरूपव्यापाररहितः सर्वाध्यक्षायां अहं इदं इच्छामि इत्यध्यवसायलक्षणव्यापारवत्यां बुद्धौ समर्पयति । तदेवंविषयबुद्धिसम्बन्धे विषयेच्छाकान्तःकरणपरिणामो भवतीति प्रनाडिकया परिणामे सतीत्यर्थः । ननु च काम इत्यादि शङ्काग्रन्थस्यावतारमात्रकरणेऽपि तत्र व्यवहारमात्रं इत्यस्याव्याख्यातत्वात् तद्व्याख्यानमनुवादमुखेनैव करोति । **अहमिच्छामीत्यभिमानमात्रमिति** । अनुभवत्वस्यैवाभिमानरूपत्वेन व्याख्यातव्यवहारस्यान्तःकरणकार्यतया तयोः साम्यात् अनुभवाभावे तत्कार्यव्यवहारोऽपि

कथं स्यात् इत्यतोऽसिद्धव्यवहारद्वयम् । एकोऽनुभवसाध्यः । अन्तःकरणकार्यविशेषः । अपरश्चाभिमान-शब्दितो व्यवहारोऽहङ्कारकार्यविशेषः । तयोश्च व्यवहारयोः योऽनुभवसाध्यः अन्तःकरणकार्यो व्यवहारः सः अनुभवाभावे नास्त्येव किन्तु यः उक्ताहङ्कारकार्यविशेषो व्यवहारः सोऽनुभवाभावेऽपि सम्भवत्येव । तस्यैवाभिमानशब्दितत्वमिति न दोषः । अत एव 'मनो म' इति भेदतः इति भाष्यसम्बन्धिमूले भेदाग्रहनिमित्तो यमिच्छामीति व्यवहारः इत्यसत् । किन्तु अनुभवनिमित्त एवेति व्यवहारत्वमभ्युपेत्यापि भेदाग्रहनिमित्तत्व-निराकरणं चोपपन्नम् । व्यवहारे द्विरूपत्वाङ्गीकारेणाभिमानस्यैव निराकरणात् इत्याशयेनाह **अभिमानो-ऽहङ्कारस्येति** ।

पूर्वग्रन्थेऽपीति । यदि भेदाग्रहोऽत्र चेत्यादि भाष्यावतारमूलेनैवास्त्यनुभवः, किन्तु अहमिच्छामीति व्यवहारमात्रमित्यादौ तत्र तत्रेत्यर्थः । **विवक्षित इति** । न तु मनःकार्यानुभवसाध्यो व्यवहारः । येना-त्राभिमानमात्रनिमित्तनिषेधात् तत्र तद्व्यवहारमात्रविवक्षायां एतस्य तद्ग्रन्थविरोधः स्यात् इत्यर्थः । पूर्वग्रन्थेऽपि अभिमानपरो व्यवहारशब्दः इत्यत्रापि अनुभवाभावे तत्साध्यव्यवहारायोगः इत्यादि प्रागुक्तमेव निमित्तं ज्ञेयम् । **अन्तःकरणविशेषरूपबुद्धेरिति** । अत्र मनो द्विविधं अन्तःकरणं इन्द्रियं चेति इत्यादि प्रागुदाहृतग्रन्थानुसारेण मनोविशेषत्वात् अन्तःकरणस्य तदात्मकबुद्धेरपि तथात्वात् अन्तःकरणविशेषरूपेत्यस्य मनोविशेषान्तःकरण-रूपेत्यर्थोऽभिप्रेतः । न तु मनस इवान्तःकरणे एवावान्तरभेदोऽप्यस्तीति विवक्षितमिति न प्रागुक्तविरोध इति ज्ञेयम् । **तत्र चेतनोपराग इति** । सम्भवतीति शेषः । **न घट इति** । चेतनोपराग इति वर्तते अत्रापि सम्भवतीति शेषः । **तस्येति** । घटस्येत्यर्थः । यद्यपि मूले तुशब्दोऽवधारण इत्यनन्तरं ततः इत्युपस्कर्तव्यं इति पठितम् । तथापि तत एवेत्युत्तरमूलानुसारेण उपस्कारप्राथम्यस्य योजनायां प्रतीतेः क्रमं अनुरुध्य प्रतीकोपादानक्रमः कुतः । अत एवावधारणार्थस्य तुशब्दस्य इत्यादिकं मूलक्रमानुसारिवचनमप्यस्तीति ज्ञेयम् । **अपेक्षितपूरणेनेति** । अनेन मनः काम इति भाष्ये मनः काम इत्यनन्तरं इति श्रुतिरुपपद्यते इत्येतावान् शेषः पूरितो मूले इत्युक्तं भवति ।

स०व्र०— मे चैतन्यमितिवत् व्यवहारमात्रत्वादिति । न च 'तेमयावेकवचनस्ये'ति पदात्परयो-रपादादावेव ते मे इत्यादेशविधानात् प्रकृते च पदात्परत्वाभावेन मयादेशाप्राप्तेः मे चैतन्यमिति कथं टीकाकारैरुक्तमिति वाच्यम् । अस्यापि पदात्परत्वेऽपि एकदेशमात्रस्य प्रकृते उदाहरणेन तदुपपत्तेरिति भावः । **न चोक्तानुपपत्तिरिति** । इच्छाम्यहमित्यस्य भेदाग्रहनिमित्तव्यवहारमात्रत्वे मे मन इति भेदग्रहे तदग्रहोऽनुपपन्नः इत्युक्तानुपपत्तिः परिहृता । कुतः । मे मन इत्यस्य व्यवहारमात्रत्वेन भेदग्रहत्वाभावेन तस्य विरोधित्वाभावात् भेदाग्रहोपपत्त्या तन्निमित्तस्य इच्छाम्यहमित्यस्य व्यवहारमात्रत्वस्य सम्भवात् । तथाऽपि भेदाग्रहनिमित्तो यदि इच्छाम्यहमिति व्यवहार एव तर्हि तादृशभेदाग्रहस्य घटादावपि सत्त्वादन्योन्यधर्मसंसर्गव्यवहारस्तत्रापि स्यादिति या अनुपपत्तिः सा नेत्यर्थः । केचित्तु— इच्छाम्यहमित्यस्य भेदाग्रहनिमित्तव्यवहारमात्रत्वे मे मन इति भेदग्रहात् तदग्रहोऽनुपपन्न इत्युक्तानुपपत्तिं परिहृत्य, विशिष्टभेदग्रहः अन्तःकरणस्येति पक्षे तस्याचेतनत्वेन

स्वरूपग्रहानुपपत्तेः उपपत्तौ वा स कथं विशिष्टो भेदग्रहो घटस्य न स्यात् । तथा च व्यवहारोऽपि स्यादिति परोक्तातिप्रसङ्गरूपदूषणपरिहारार्थम् अन्तःकरणे चैतन्यारोपस्य सत्त्वात् मनस आत्मोपकारकत्ववत् घटस्यापि तदुपकारकत्वेन च तत्रापि चैतन्यारोपस्य सत्त्वात् तदधीनो व्यवहारोऽपि घटस्य स्यादिति या अनुपपत्तिः परेणोक्ता साऽपि न सम्भवतीत्याह न चोक्तानुपपत्तिरित्याहुः । मनसीव भेदाग्रहस्य घटेऽपि सत्त्वेऽपि बुद्धेरंशत्रयवत्त्वेन तत्र चैतन्योपरागलक्षणो योऽयमंशः, स आत्मबुद्ध्योर्भेदाग्रहलक्षणनिमित्तेन अतात्त्विकः बुद्धावेव तस्याः स्वच्छत्वेन दर्पणे मुखोपरागवत्सम्भवति । न तु घटे । तत्र भेदाग्रहे सत्यपि घटस्यास्वच्छत्वेन भेदाग्रहनिमित्तस्य चैतन्योपरागस्याभावात् । तथा च मनसि भेदाग्रहनिमित्तचैतन्योपरागस्य सत्त्वात् तत्रैवान्योन्यधर्मसंसर्गव्यवहारः सम्भवति । न तु घटे । तत्र भेदाग्रहे सत्यपि घटस्यास्वच्छत्वेन चैतन्योपरागाभावादित्यभिप्रेत्य तदुपपादयति **सत्त्वेत्यादिना** । आदिकार्यमित्यनेन सूक्ष्मत्वात् स्वच्छत्वमित्युक्तं भवति । दर्पणस्येव इत्यनेन बुद्धेः स्वच्छत्वात् चैतन्योपरागः सम्भवति । न तु घटे । तस्यास्वच्छत्वादित्युक्तं भवति । नाप्युक्तानुपपत्तिरित्यर्थः । कुतो नेत्यतो बुद्धेः स्वच्छत्वेन तत्र चैतन्योपरागवत् अन्तःकरणस्यापि स्वच्छत्वेन तत्र चैतन्यारोपसम्भवेऽपि घटस्यास्वच्छत्वेन तत्र चैतन्यारोपासम्भवान्न घटस्य व्यवहारः, इति वक्तुं बुद्धौ चैतन्यारोपं तावदुपपादयति **सत्त्वरजस्तमसामिति** । आदिकार्यं बुद्धिरिति वदता बुद्धिशब्दो नेदानीन्तनप्रसिद्धबुद्धिपरः । किन्तु बुद्धितत्त्वपरः इत्युक्तं भवति । तेन न प्रकृतासङ्गतिरिति भावः । इदमहं करोमीति बुद्धिव्यापारः । दर्पणस्येवेति वदता बुद्धौ चैतन्यारोपे स्वच्छत्वं निमित्तमुक्तं भवति । **इन्द्रियप्रणाडिकयेति** । बुद्धेरान्तरत्वेन बहिस्थेदमाकारेण साक्षात्परिणतेरसम्भवेन इन्द्रियप्रणाडिकयेत्युक्तम् । अयमाशयः— यथा हि ग्रामाध्यक्षः कुटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छति । विषयाध्यक्षश्च सर्वाध्यक्षाय, स च भूपतये । तथा बाह्येन्द्रियाण्यालोच्य विषयं मनसे समर्पयन्ति मनश्च सङ्कल्पाहङ्काराय । स सङ्कल्पाहङ्कारश्च अभिमान्यसर्वाध्यक्षायै बुद्धये प्रयच्छति । इत्येवं इन्द्रियप्रणाडिकया इति । तदुक्तम्— एते प्रदीपकल्पाः परस्परा गुणविशेषाः कृत्स्नं पुरुषार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति (इति) । **उभयेति** । चैतन्योपराग विषयोपरागप्रयुक्त इत्यर्थः । बुद्धौ चैतन्योपरागोपपादनस्य प्रयोजनमाह **एषैव दिगिति** । इदमहमिच्छामीति अन्तःकरणव्यापारः । तस्यांशत्रयं पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेति । तत्र अहमिति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः । इदमिति विषयोपरागः बाह्येन्द्रियाणि स्वार्थमालोच्य मनसे समर्पयन्ति । मनश्च सङ्कल्पाहङ्कारायेत्येवमिन्द्रियप्रणाडिकया परिणतिभेदो दर्पणस्येव मलसम्बन्धः पारमार्थिकः । तथा उभयायत्तो व्यापारावेश इति । तथा चैतन्योपरागनिमित्तविशिष्टभेदाग्रहेण व्यवहारोपपत्तिरिति भावः इत्यप्याहुः ।

विष्टल०— व्यवहारमात्रमिति मात्रपदाभिप्रायमाह **न त्वात्मन इति । मे चैतन्यमितिवदिति** । उपचारेण व्यवहार इति भावः । ननु इच्छाम्यहमित्यनुभवो नात्मनः किन्तु भेदाग्रहनिमित्तं व्यवहारमात्रमिति यद्युच्यते तदा कथं स तु घटस्य स्यादित्यनेन । या घटस्यापि भेदाग्रहात्संसर्गव्यवहारस्याचेतनत्वाविशेषादित्यनुपपत्तिरुक्ता सा स्यादित्याशङ्क्य निषेधति **न चोक्तानुपपत्तिरिति** । अचेतनत्वाविशेषेऽप्यन्तःकरण-

विशेषरूपाया बुद्धेरादिकार्यत्वेन दर्पणवन्निर्मूलत्वात् तत्रैव चेतनोपरागसम्भवादभेदग्रहप्राप्तिर्न तु घटस्य तस्या-स्वच्छतया चैतन्योपरागासम्भवादित्याशयेनोक्तानुपपत्तिं परिहरति **सत्त्वरजस्तमसामित्यादिना** । **व्यापारा वेदा इति** कर्तृत्वाद्यभिमानरूप इत्यर्थः । अंशत्रयं दर्शयति **अहमिदं करोमीति** । तत्त्रयं क्रमेण विविच्य दर्शयति **तत्राहमितीति** । अहमित्यपि चेतनोपरागाद्बुद्धिगतो व्यवहारः दर्पणे मुखोपरागान्मुखव्यवहारवदित्यर्थः । **इन्द्रियप्रनाडिकयेति** । यथा कर्षकेभ्यः करमादाय ग्रामाध्यक्षः विषयाध्यक्षाय प्रयच्छति स च सर्वाध्यक्षाय भूपतये, तथा बाह्येन्द्रियाणि स्वार्थं मनसे समर्पयन्ति मनश्चाहङ्कारायाहङ्कारश्च सर्वाध्यक्षायां बुद्धावितीन्द्रिय-प्रनाडिकया बुद्धेरिदमिति विषयाकारः परिणतिभेद इत्यर्थः । **उभयायत्त इति** । उक्तोभयविधचेतनाचेतनोपराग-निमित्तकपारमार्थिकान्तःकरणपरिणतिरूपोभयायत्तः कर्तृत्वाभिमानरूपो व्यापारायापदारूप इत्यर्थः । तत्र करोमीत्युत्तमपुरुषप्रयोगलब्धात्मसम्बन्धश्चेतनोपरागायत्तः क्रियाः वेदाः सुखविषयत्ववदचेतनोपरागायत्त इति विवेकः । नन्वेतावता किं प्रकृत इत्यत आह **एषैवेति** । अपारमार्थिके चेतनोपरागादन्तःकरणपरिणामरूपायां बुद्धावहमिच्छामीत्यभिमानमात्रं भवति । न त्वात्मन इच्छावत्त्वानुभव इत्यर्थः । ननु यथा दर्पणस्य मुखोपरागो तात्विकस्तथा चेतनोपरागादहमिच्छामीति भेदाग्रहादयमहमिच्छामीति व्यवहारमात्रमित्यस्य किं दूषणम् । न च बाधकाभावादात्मन इच्छावत्वस्यातात्विकत्वाभाव इति वाच्यम् । कामस्यान्तःकरणपरिणतिरूपतापरश्रुतेरेव बाधकत्वादित्याशङ्कां परिहर्तुमाह **इदमुक्तं भवतीति** । आत्मधर्म इच्छात्मस्वरूपभूतो धर्म इत्यर्थः ।

चषकः— तदग्रहासम्भव इत्यादिकं मे चैतन्यमितिवदिति । तेन पदात्परत्वसत्त्वात् मे इत्या-देशोपपत्तिरिति स्थितम् । तत्रत्यपूर्वोत्तरवाक्यसन्दष्टतया पदात्परत्वेऽप्येकदेशमात्रस्य प्रकृते उदाहरणेन तदुपपत्तेः वस्तुतो विभक्तिप्रतिरूपकमव्ययमेवैतदित्यपि समादधति । नञा निर्दिष्टमनित्यमिति 'न पादादावि'ति निषेध-स्यानित्यत्वात् साधुरयं प्रयोग इत्यपि समादधते । **न चोक्तानुपपत्तिरिति** । कथमित्यादिनोक्तानैकान्त्य-मित्यर्थः । **आदिकार्यं हीति** । पुरुषप्रतिबिम्बनौपयिकोपाधितोपपादिका स्वच्छताऽभिहितेति ज्ञातव्यम् । **आदिकाय** महत्तत्त्वादिरूपम् । बुद्धिरन्तःकरणविशेष इति तन्मतमतः प्रकृतसङ्गतैवेयमुक्तिरिति मन्तव्यम् । **पुरुषोपरागः** विषयोल्लेखः । **व्यापारावेशः** कृतिमत्त्वाद्यभिमानः । **इन्द्रियप्रणाडिकयेति** । स्वस्वविषय-सन्निकृष्टानीन्द्रियाणि तत्तदाकारतया आदौ परिणमन्ते ततस्तदनुरुन्धानं मनः ततः तदनुरुन्धाना बुद्धिरित्येवं दिशा बुद्धेर्विषयाकारपरिणामभेदोऽवसेयः । **उभयायत्तः** । चेतनोपरागविषयोपरागाधीनः । **दिगिति** । अहमिति चेतनोपरागः; इदमिति विषयोपरागः, तदुभयाधीन इच्छावत्त्वरूपव्यापारावेश इत्यर्थः ।

६६ सु०— स्यादेतदेवम्, यदि कामद्वैविध्यं प्रमितं स्यात् । एतदेव कुत इति चेत्, श्रुत्यनुभवबलात् तावत् । प्रकारसहस्रानुसरणेऽप्यघटनायां खल्वनुभवापलापसाहस-मभ्युपेयम् । प्रमाणान्तरं चाह प्रियेति ।

अनु०— प्रियाप्रियविभेदतः ।
द्वैविध्यं दृश्यते चास्य

प्रियम् इत्यात्यन्तिकेष्टमुच्यते **अप्रियमिति** च तात्कालिकेष्टम् । विषयेण विषयिण उपलक्षणम् । **अस्य** कामस्य ।

अयमर्थः । अस्ति तावदास्तिककामुकस्य पुरुषस्य स्रक्चन्दनवनितादौ इदं मे स्यादित्येकतः कामः, अन्यतस्त्यजेयमिति । न चैक एवायम्, विरुद्धरूपत्वात् । न च द्वावपि मनोधर्मौ, यौगपद्यात्; युगपत्सजातीयधर्मजननायोगात् । न च यौगपद्यं नास्ति, अनुभवसिद्धत्वात्, बाधकाभावाच्च । तत्र योऽप्रियविषयः सोऽन्तःकरणधर्मः, यस्तु प्रियविषयः स आत्मधर्म इति ।

यद्वा **प्रियाप्रिय**शब्दाभ्यां मुक्तिसंसारावुच्येते । तत्सम्बन्धिविभेदेन **कामद्वैविध्यं दृश्यत** इति । "अस्ति तावत्संसारे प्रचुरोऽयमन्तःकरणवृत्तिरूपः कामः । अस्ति चासौ मुक्तौ, 'स यदि पितृलोककामो भवती'त्यादिश्रुतेः । न चैक एवायम्, मुक्तावन्तःकरण-विलयात् । तथा चासावात्मधर्मोऽभ्युपेयः । न चागन्तुकधर्मसम्बन्धो मुक्ताविति प्रागपि कामद्वैविध्यं सिद्ध्यतीति ।

परि०— श्रुत्यनुभवेति । श्रुतिबलान्मनोधर्मता । इच्छामीत्यनुभवबलादात्मधर्मतेत्यर्थः । अनुभवोऽयं नेत्युक्तमित्यत आह **प्रकारेति** । **प्रमाणान्तरं चेति** । श्रुत्यनुभवप्रमाणापेक्षया प्रमाणान्तरं कामद्वैविध्यमित्यर्थः । **विषयिण इति** । कामस्येत्यर्थः । आत्यन्तिकेष्टतात्कालिकेष्ट-रूपवस्तुविषयकेच्छाभेदत इत्यर्थः । यौगपद्यानुभवो भ्रम इत्यत आह **बाधकाभावाच्चेति** । **योऽप्रियविषय इति** । तात्कालिकेष्टस्रक्चन्दनादिविषय इत्यर्थः । मुक्ताविति तिशब्दो हेत्वर्थः ।

गु०दी०— यदि च आस्तिकनास्तिकयोर्वैराग्यरागाभ्यामुपहितचित्तयोरेवायं द्विविधः काम इति मतं तदाप्युत्तरमाह **यद्वेति** ।

यादु०— एकतः कारणात् । युगपत्सजातीयेत्यतःपूर्वम् एकेनेति शेषः । लिङ्गपरामर्शानन्तरं अनुमितिजननकाल एव लिङ्गसंस्कारस्यापि आत्मन्युपपत्तेः सजातीयेत्युक्तम् । **यस्तु प्रियविषय इति** । स्रक्चन्दनादिविषयपरित्यागरूपात्यन्तिकेष्टविषय इत्यर्थः ।

वं०प०— ननु नायमनुभव इत्युक्तमिति चेत् तत्राह **प्रकारेति** । **अभ्युपेयमिति** । प्रकृते च कामस्य द्वैविध्यमङ्गीकृत्य अस्य अनुभवत्वोपपादनं योग्यमित्यर्थः । **आह** द्वैविध्य इति शेषः । **विषयिणः** कामस्य । तथा च प्रियविषयकः एकः कामः, अप्रियविषयक एकः काम इति विभेदत इत्यर्थः । एकतोऽन्यतः करणात् । यौगपद्येऽपि कुतो मनोधर्मत्वाभाव इत्यत आह **युगपदिति** । एकस्मिन्निति शेषः । यौगपद्यानुभवस्य भ्रा(न्त)न्तित्वं किं न स्यादित्यत आह **बाधकेति** । **तदिति** । मुक्तिसंसाररूपसम्बन्धिनोर्भेदेनेत्यर्थः । **कामेति** । तत्सम्बन्धेनेत्यर्थः । तत्रत्येति यावत् । नन्वस्तु **मुक्तौ** कामः, न संसारे । अत्रैव मया विप्रतिपत्तेः करणादित्यत आह **न चेति** । न हीत्यर्थः ।

कं०रा०— नन्वहमिच्छामीत्यनुभव एव नास्तीत्युक्तत्वात् कथं श्रुत्यनुभवबलात्कामद्वैविध्यस्य प्रमितत्वमित्यत आह **प्रकारसहस्रेति** । **अप्रियविषय इति** । स्रक्चन्दनवनितादित्यागरूपात्यन्तिकेष्टविषय इत्यर्थः ।

शे०वा०— 'प्रियाप्रियविभेदत' इति कामद्वैविध्यस्य प्रमितत्ववर्णनानर्थक्यमाशङ्क्य पूर्वोक्तस्य श्रुतेः सावकाशत्वेनात्मनः कामवत्तायाः तदविरुद्धत्वोपपादनार्थं तदिति भावेन तदप्रमितत्वेन श्रुतिविरोधशङ्कामुत्थापयति **स्यादेतदेवमिति** । 'द्वैविध्यं दृश्यते च' इति चशब्दसूचितं प्रमाणान्तरत्वमुपपादयितुं स्वयं प्रमाणान्तरमाह **श्रुतीति** । श्रुत्यनुभवान्यथाऽनुपपत्तिरेव तत्र प्रमाणमिति भावेन बलादित्युक्तम् । ननु अनुभवस्यैवाभावोक्तेः कथं श्रुत्यनुभवान्यथाऽनुपपत्त्या तद्वैविध्यसमर्थनमित्यत आह **प्रकारेति** । अन्यथाऽतिप्रसङ्गादिति भावः । ननु सुखत्वादिरूपस्य प्रियत्वादेः कामनिष्ठत्वाभावान्न प्रियाप्रियभेदेन तद्वैविध्यं सम्भावितम् । न च लक्षणया प्रियाप्रियविषयकपरत्वात् प्रियाप्रियशब्दयोः सुखादिपरत्वाभावान्नानुपपत्तिरिति वाच्यम् । प्रियविषयत्वस्य कामनिष्ठत्वेऽपि दुःखविषयत्वाभावेनानेनापि रूपेण तद्वैविध्यायोगादित्यत अत्र इष्टस्यैवावान्तरभेदविवक्षया प्रियाप्रियत्वरूपत्वेन विवक्षितत्वेन सुखदुःखयोस्तत्त्वेनानभिमतत्वाद्विवक्षितप्रियाप्रियविषयकतायाश्च कामे सत्त्वान्नानुपपत्तिरित्यभिप्रेत्याभिमतप्रियाप्रियस्वरूपप्रदर्शनपूर्वकं लक्ष्यार्थपरतामाह **प्रियमितीत्यादिना** । विषयेण विषयिण इति लक्षणाबीजशक्यसम्बन्धकथनम् । ननु च नोक्तरूपप्रियाप्रियविषयकः कामोऽस्ति तादृशकामानुपलम्भात् । सत्त्वेऽपि वा तादृशकामस्यैकत्वान्न द्वैविध्यमिति कथं द्वैविध्याभिधानम् । द्वैविध्येऽपि वा द्वयोरपि मनोधर्मत्वसम्भवान्नात्मनः कामवत्ता सिद्ध्यति । न च यौगपद्यानुपपत्तिप्रसङ्गो बाधकः । मनोधर्मस्यापि यौगपद्ये बाधकाभावात् । साधकाभावेन कामद्वययौगपद्यासिद्धेश्च । न च यौगपद्यानुभवस्तत्साधकः । युगपद्यत्र शतं छिन्नमित्यादिवत् यौगपद्यानुभवस्य भ्रमत्वेन तदसिद्धेः । तथा च नानेनात्मनः कामवत्ता सिद्ध्यतीत्यत आह **अयमर्थ इत्यादिना** । तत्राद्यदोषपरिहारः **अस्तीति** । एकतोऽन्यत इत्याद्यादित्वात् प्रथमासमर्थात्तसिः । द्वितीयं परिहरति **न चेति** । तृतीयं परिहरति **न च द्वावपीति** । अप्रयोजकत्वं परिहरति **युगपदिति** । एकेनेति शेषः । एकं करणमेकदैकामेव क्रियां जनयति नापरामिति नियमादिति भावः । साधकाभावशङ्कां

परिहरति **न चेति** । अनुभवस्य भ्रमतां परिहरति **बाधकेति** । अन्यथाऽतिप्रसङ्गादिति भावः । **यस्त्विति** । स्रक्चन्दनादिविषयपरित्यागरूपात्यन्तिकेष्टविषय इत्यर्थः ।

इष्टस्यैवावान्तरभेदविवक्षया प्रियाप्रियशब्दार्थत्वे प्रियाप्रियशब्दयोरस्वारस्यमित्यपरितोषात् पक्षान्तरमाह **यद्वेति** । नन्वेवं मुक्तित्वसंसारत्वयोः कामेऽसत्त्वात्कथमनेन रूपेण कामद्वैविध्यमित्यतोऽत्र मुक्तिसंसारवाचकयोः प्रियाप्रियपदयोस्तत्सम्बन्धिकामोपलक्षणत्वाश्रयणत्वान्मुक्तित्वादेस्तत्रासत्त्वेऽपि तत्सम्बन्धिकामत्वस्य तत्र सत्त्वान्नानुपपत्तिरित्याह **तत्सम्बन्धीति** । **विभेदेनेति** । आद्यादित्वात् तसिरिति भावः । भवेदेतदेवं यदि मुक्तौ काम एव सिद्धः स्यात् । न चासावस्ति । प्रमाणाभावात् । सद्भावेऽपि वा मनोधर्मस्यैव कामस्य मुक्तौ सम्भवान्न तद्वैविध्यम् । आत्मधर्मत्वेऽपि मुक्तिवदागन्तुकस्यापि कामस्य मुक्तौ सम्भवेन संसारावस्थायां कामद्वयसिद्ध्या प्रकृतासिद्धिरेवेत्यतोऽभिप्रायमाह **अस्ति तावदित्यादिना** । अनुभवसिद्धत्वादिति भावः । **अन्तःकरणविलयादिति** । उपादाननिवृत्तावुपादेयनिवृत्तेरावश्यकत्वादिति भावः । **आगन्तुकेति** । तथा सति मुक्तेरनित्यत्वप्रसङ्गादिति भावः । इतीत्यस्यायमर्थ इत्यनेन अस्तीत्यतः प्राक् पूरणीयेनान्वयः ।

वा०र०— प्रमाणान्तरत्वमुपपादयितुमिति । पूर्वप्रमाणातिरिक्तं प्रमाणं हि प्रमाणान्तरं इत्युच्यते । तत् यदि प्राक् प्रमाणं कामद्वैविध्ये उक्तं स्यात् तदा तदन्तरत्वार्थवाचकशब्दो युक्तः । न चैवं प्रकृतेऽस्ति । प्राक् भाष्ये तदनुपन्यासः नोदाहरिष्यमाणप्रमाणान्तरत्वाभावात् इत्येवंप्राप्तप्रमाणान्तरत्वानुपपत्तिनिरासाय तदुपपादयितुमित्यर्थः । **प्रमाणान्तरमिति** । उत्तरापेक्षया पूर्वस्यापि प्रमाणान्तरत्वात् प्रमाणान्तरमित्युक्तिरुक्ता । चशब्दः समुच्चयप्रमाणमाहेत्यर्थः । **श्रुत्यनुभवान्यथानुपपत्तीति** । काम इति श्रुतिः । कामस्य मनोधर्मतामाह । अहमिच्छामि इत्यनुभवश्चात्मनि कामं विषयीकरोति । तथा चान्यतरमात्रे कामाङ्गीकारे उभयत्र कामशब्दसद्भावसाधकश्रुत्यनुभवयोरपि अन्यतराप्रामाण्यप्रसङ्गात् प्रमाणभूततदुभयान्यथानुपपत्त्या कामद्वैविध्यसिद्धिरिति भावः । **सुखत्वादीत्यादि**पदेन दुःखत्वपरिग्रहः । **प्रियत्वादेरित्यादि**पदेनाप्रियत्वपरिग्रहः । प्रियाप्रियशब्दयोरिति पूर्वत्र उत्तरत्र च सम्बध्यते । **दुःखविषयत्वाभावेनेति** । दुःखविषयत्वस्य कामे अभावेनेत्यर्थः । कामपदं सप्तम्यन्तम् । बुध्या विवेकेन अनुवर्तते वा । 'दुःखं मनागपि मा भूत्' इत्येव कामसद्भावेऽपि 'दुःखं मे स्यादि'ति दुःखविषयककामस्य कदाप्यभावादिति भावः । अप्रियशब्दस्य दुःखपरत्वस्य प्रागुक्तत्वात् अत्र दुःखपदम् । **इष्टस्य एवेति** । इष्टं चात्र सुखसाधनं विवक्षितं इति ज्ञेयम् । **सुखदुःखयोरिति** । अत्र सुखग्रहणं व्यतिरेकदृष्टान्ततयेत्याहुः । वस्तुतस्तु उभयोरपि नाभिमतत्वम् । **किन्तु एकस्यैवेति** । द्वित्वावच्छिन्न-इष्टानिष्टयोः तदर्थत्वं नास्तीति प्रतिपादनाभिप्रायेण इदम् । अत एव इष्टस्यैवेति प्रागुक्तमिति ज्ञेयम् । **मनोधर्मस्यापीति** । मनोधर्मस्य यौगपद्येऽपि इति सम्बन्धः । **शतपत्रं छिन्नमितीति** । एकैकपत्रेण संयोगार्थं क्रिया । क्रियातो विभागः । इत्यादिक्रमेणानेकलक्षणापेक्षायाः सद्भावेन तावल्लक्षणसाध्यतत्तत्पत्रसंयोगस्य एककालावच्छेदेनायोगादिति भावः । पञ्चम्यर्थानुपपत्तिं मनसि निधायाह **प्रथमासमर्थादिति** । एतच्च बहुस्थलेषु व्याकृतं व्याकरिष्यते चेति ज्ञेयम् । **द्वितीयमितीति** । सत्येऽपीत्यादिनोक्तमित्यर्थः । तृतीयं

द्वैविध्येऽपीत्यादिनोक्तं विभेदेन इतीति प्रतीकमुपादाय उक्तव्याख्यानलाभे बीजमाह **आद्यादित्वादिति** । मूलकारस्येति शेषः । अनेन मूले विभेदतः इति तृतीयान्तात् तसिरिति भावेनोक्तं विभेदेनेतीति योजना सूचिता भवति । **सद्भावेऽपि वेति** । कामस्य सद्भावेऽपि इति सम्बन्धः । **अस्ति चासाविति** मूलम् । अत्रान्तः-करणवृत्तित्वं विशेषणं विहाय कामत्वेनैवासाविति परामर्शाभिप्रायात् । न चैकत्वे वेत्युत्तरविरोधो नेति ज्ञेयम् । अन्तःकरणविलयेऽपि कामविलयः कुतः इत्यतोऽभिप्रायमाह **उपादानेति** । इतीत्यस्यायमर्थः । **इत्यनेनेति** । अनेनास्ति तावत् संसारः इत्यतः प्राक् अयमर्थः इति शेषः पूरणीय इत्युक्तं भवति ।

स०व्र०— एकत इति । मनस इत्यर्थः । **अन्यत इति** । आत्मन इत्यर्थः ।

विट्ठल०— श्रुत्यनुभवबलादिति । कामः सङ्कल्प इति श्रुतिबलादन्तःकरणधर्मत्वं अहमिच्छामी-त्यात्मस्वरूपत्वानुभवबलादात्मधर्मत्वमित्यर्थः । काममात्रस्य प्रियविषयत्वात् कथमेवमुच्यत इत्यत आह **प्रियेतीति** । प्रियादिशब्दस्येच्छाविषयपरत्वात् कथं कामद्वैविध्ये हेतुः स्यादित्यत आह **विषयेणेति** । युगपत्सजातीया इत्यतःपूर्वमेकेन करणेनेति शेषः । एतेन विरुद्धकामयौगपद्यान्यथानुपपत्तिः कामद्वैविध्ये प्रमाणमित्युक्तं भवति । **अप्रियविषय इति** । तात्कालिकेष्ट विषय इत्यर्थः । **यस्तु प्रियविषय इति** । स्रक्चन्दनादिविषयपरित्यागरूपात्यन्तिकेष्टविषय इत्यर्थः । सम्बन्धिभेदाद्वा कामद्वैविध्यमित्यत आह **यद्वेति** ।

६७ **सु०— श्रुतिबाधपरिहारस्य प्रयोजनमाह तस्मादिति ।**

अनु०— तस्माद्भेदाग्रहः कुतः ।

श्रुतिविरोधस्य परिहृतत्वाद्भेदाग्रहः कुतः प्रमाणात् कल्पनीयः । कुतश्चानुभवाप-लापेन व्यवहारस्य तन्निमित्तत्वम् । न कुतोऽपीत्यर्थः ।

परि०— श्रुतिबाधेति । मनः कामः इति मूलोपात्त 'कामः संकल्प' इत्यादिका या श्रुतिः तद्बाधपरिहारस्येत्यर्थः । उपलक्षणं मत्वाह **कुतश्चेति** ।

वं०प०— श्रुतिबाधेति । आत्मनः इच्छावत्त्वाङ्गीकारे 'कामः सङ्कल्प' इत्युक्तश्रुतिबाधेत्यर्थः । **अनुमानानां** भेदानां परिमाणादित्याद्यानाम् ।

शे०वा०— हेतुहेतुमद्भावस्याप्रतीतेस्तत्स्फोरणाय तस्मादित्येतत्पराम्रष्टव्यं दर्शयन् परमसाध्याध्या-हारेण वाक्यं योजयति **श्रुतीति** । उत्तरत्र परिहाराभावेन किमुशब्दस्य प्रश्नार्थत्वानुपपत्तेराक्षेपार्थतया तं योजयति **नेति** ।

॥ इति मनसि आगमप्रमाणाभावः ॥

॥ इति मनसः साक्षिवेद्यत्वम् ॥

॥ इति 'मनो म' इतिवत् 'अहमिच्छामि' इति व्यवहारस्य
अनुभवनिमित्तत्वमेव न तु भेदाग्रहनिमित्तत्वम् ॥

॥ इति 'गृह्यमाणयोर्भेदाग्रहस्य व्यवहारहेतुत्वं न भेदाग्रहमात्रस्य' इतिपक्षस्य खण्डनम् ॥

॥ इति 'तस्य भेदाग्रहनिमित्तव्यवहारमात्रत्वं न त्वनुभवत्वम्' इतिपक्षस्य दूषणम् ॥

॥ इति प्रत्यक्ष-अनुभवविरोधः ॥

॥ इति प्रमाणविरोधोपपादनम् ॥

॥ इति अप्रयोजकत्वशङ्का तथा स्वव्याघातेन प्रमाणविरोधेन च तन्निरासः ॥

॥ इति प्रतिपक्षान्तरम् ॥

* * *

॥ अथ उक्तानां व्याघातादिदोषाणां 'अचेतनस्य प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वं'
साधयत्स्वनुमानेष्वपि निर्देशः ॥

६८ **सु०— अनेनाचेतनस्य प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वं साधयतामनुमानानामपि स्ववचनविरोधः प्रमाणविरोधश्चोक्तौ भवतः; दृष्टान्तश्च साध्यविकलः, अचेतनस्वातन्त्र्यस्य क्वाप्यसम्मतेरिति ।**

परि०— अनेनेति । 'स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुतः' इत्यत्रोक्तप्रतिपक्षानुमानस्याप्रयोजकत्वशङ्कानिरासार्थं प्रवृत्तेन 'अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतमि'त्यादिग्रन्थेनेत्यर्थः । **अनुमानानामिति** । भेदानां परिमाणादित्यादिना प्रागुक्तानुमानानां अचेतनत्वेच्छापूर्वप्रवृत्तिमत्वरूपस्वातन्त्र्ययोर्विरोधात् स्ववचनविरोधः । अहमिच्छामीति चेतनस्येच्छावत्त्वानुभवरूपप्रमाणविरोधश्चेत्यर्थः । **दृष्टान्तश्चेति** । अनुमानानामित्यनुषङ्गः । तन्त्वादिरूपदृष्टान्त इत्यर्थः ।

यादु०— अनेनाचेतनस्येति । 'स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुत' इत्यनेनोक्तसत्प्रतिपक्षानुमानेऽप्रयोजकतापरिहारपरेणापि 'अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतमि'त्यादिमूलेनेत्यर्थः । **अनुमानानामिति** । भेदानां परिमाणादित्याद्यनुमानानामित्यर्थः । तेष्वनुमानेषु सिद्धसाधनतापरिहाराय प्रतिज्ञायामचेतनत्वस्वातन्त्र्यरूपविशेषणयोरावश्यकत्वे स्वव्याहतिः । अहमिच्छामीति साक्ष्यनुभवरूपप्रमाहतिश्चेति ज्ञातव्यम् । **दृष्टान्तश्चेति** । तन्त्वादिदृष्टान्त इत्यर्थः । एतदनुमानसिद्धेति सर्वज्ञविशेषणम् ।

वं०प०— अनेनेति । 'इच्छाम्यहमिति ह्येवे'ति मूलेनेत्यर्थः । ननु पयोऽम्बादिदृष्टान्तेन महदादेरपि स्वतन्त्राचेतनाधीनोत्पत्तिकत्वमङ्गीकार्यमिति तु निराकरिष्याम इत्याह **दृष्टान्तश्चेति** । इतीत्यनन्तरं वक्ष्याम इति शेषः । दृष्टान्तश्च साध्यविकलोऽतो नोक्तार्थसाधक इति वक्ष्याम इत्यर्थः । तत्र हेतुः **अचेतनेति** ।

कं०रा०— अनेनेति । अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतमित्यादिना 'इच्छाम्यहमिति ह्येव निजानभवरोधतः । अचेतनेच्छापगते'त्यन्तेन ग्रन्थेन न केवलमचेतनत्वेऽपि प्रधानस्य स्वातन्त्र्येण प्रवृत्तिरस्त्विति शङ्काभ्यामेव स्ववचनविरोधप्रमाणविरोधावुक्तौ किं नामाचेतनस्य स्वातन्त्र्येण जगत्कारणत्वं साधयतामनुमानानामपि तावुक्तौ भवत इत्यर्थः । **दृष्टान्तश्चेति** । अचेतनस्य स्वातन्त्र्येण प्रवृत्तौ च सविवृद्धिनिमित्तं क्षीरस्य 'यथा प्रवृत्तिरज्ञस्ये'त्यादिना यः क्षीरादिरूपदृष्टान्त उक्तः सोऽपि साध्यविकलः क्वाप्यचेतनस्वातन्त्र्यस्य मयाऽनङ्गीकृतत्वादिति भावः ।

श्रीनिधि०— अनेनेति । अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतमित्यादिग्रन्थेनेत्यर्थः । **अनुमानानामपीति** । न केवलम् अचेतनस्वातन्त्र्याङ्गीकारस्य स्ववचनप्रमाणविरोधौ अपि तु अनुमानानामपीत्यप्यर्थः । **क्वाप्यसम्मतेरिति** । कूर्मशरीरादाविति भावः ।

शे०वा०— अनेनेति । 'स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुत' इत्युक्तेः प्रधानं स्वतन्त्रप्रवृत्तिरहितम् । अचेतनत्वात् तत्त्वादिवदिति प्रतिपक्षानुमानेऽप्रयोजकत्वशङ्कायाः स्वव्याहतत्वप्रमाणविरुद्धत्वोपपादनपरेण 'अचेतनत्वं स्वातन्त्र्यमि'त्यादिमूलग्रन्थेनेत्यर्थः । **अनुमानानामिति** । भेदानां परिमाणादित्यादीनामित्यर्थः । ननु च कथं तत्र स्ववचनव्याघातादीत्यत उक्तम् **अचेतनस्य स्वातन्त्र्येण जगत्कारणं साधयतामिति** । सिद्धसाधनतापरिहाराय प्रतिज्ञायामचेतनत्वस्वातन्त्र्ययोरवश्यं विशेषणीयत्वादिति भावः । **दृष्टान्तश्चेति** । तन्त्वादिदृष्टान्त इत्यर्थः । साध्यविकलत्वमेव दर्शयति **अचेतनस्येति** ।

वा०र०— इत्युक्तेः प्रतिपक्षानुमानेति सम्बन्धः । **इत्यादिमूलेति** । अनेन इच्छाम्यहं इत्येतत् मूलपरिग्रहः । **सिद्धसाधनतापरिहारायेति** । भेदानां परिणामादिहेतुभिः विमतं स्वतन्त्राचेतनपूर्वकमिति साधितं भवति । तत्र ईश्वरमादाय सिद्धसाधनतापरिहाराय चेतनमस्माभिः अपि प्रधानकारणतया अङ्गीकारेण सिद्धसाधनतावारणाय स्वातन्त्र्यस्य प्रवेशः आवश्यकः इत्यर्थः ।

स०व्र०— अनेनेति । 'इदं नाचेतनवशम्' इत्यादिना स्वोक्ते प्रधानं स्वतन्त्रप्रवृत्तिरहितम् अचेतनत्वात् तन्त्वादिवत् इत्यनुमाने अप्रयोजकत्वशङ्कायाः स्वव्याहतत्वप्रमाणविरुद्धत्वव्युत्पादनेनेत्यर्थः । मूलकारणं स्वतन्त्रं कार्यस्य यतो विभक्तत्वात् अविभक्तत्वाच्च, अपरिमितत्वात्, कार्यगताव्यक्तत्वलक्षणशक्तिमत्त्वात्, सर्वत्रानुस्यूतत्वादित्याद्यनुमानानामपीत्यर्थः । **दृष्टान्तश्चेति** । मृत्पिण्डादिलक्षणदृष्टान्तश्चेत्यर्थः ।

विठ्ठल०— अनेनाचेतनस्येति । 'स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुत' इत्यनेनोक्तसत्प्रतिपक्षानुमाने अप्रयोजकतापरिहारपरेणाचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतमित्यादि मूलेनेत्यर्थः । **अनुमानानामिति** । भेदानां परिणामादित्याद्यनुमानानामित्यर्थः । **स्ववचने आत्मप्रमाहतम्** इत्यत्र स्ववचनविरोधस्यानुभवादिविरोधस्य चोपपादितत्वादित्यर्थः ।

चषकः— दृष्टान्तश्चेति । तन्त्वादिरूपदृष्टान्त इत्यर्थः ।

॥ इति उक्तानां व्याघातादिदोषाणां 'अचेतनस्य प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वं' साधयत्स्वनुमानेष्वपि निर्देशः ॥
॥ इति उक्तार्थस्य विवरणम् ॥
॥ इति तत्रानुमानप्रमाणाभावः ॥
॥ इति परपक्षनिरसनम् ॥

* * *

॥ अथ प्रथमसूत्रव्याख्यानोपसंहारसहितं 'नानुमानम्'इतिसूत्रांशस्य प्रकारान्तरेण व्याख्यानम् ॥

६९ **सु०—** सूत्रार्थमुपसंहरन् 'नानुमानमि'त्येतत्प्रकारान्तरेण व्याचष्टे **रचनेति** ।

अनु०— रचनानुपपत्तेस्तन्न सर्वज्ञानुमागतम् । अचेतनं जगत्कर्तृ

तत् तस्मात् । **सर्वज्ञानुमागतम्** अनुमानं 'प्रकृत्यादिकं, कस्यचित्प्रत्यक्षं, प्रमेयत्वादि'ति सर्वज्ञसाधकानुमयाऽवगतम् । एतदनुमानसिद्धसर्वज्ञवाक्यावगतमिति यावत् ।

यद्वाऽनुमानसिद्धप्रामाण्यकत्वेनानुमानप्रधानत्वेन च सर्वज्ञाभिमतस्य वाक्यमेव **सर्वज्ञानुमा** उच्यते ।

व्याख्यानान्तरस्य चेदं प्रयोजनम्, यत्प्रागुक्तं 'न योगिप्रत्यक्षेण साङ्ख्याचार्यवचनेन वाऽयमर्थः सिद्ध्यती'ति तदपि सूत्रसूचितमेवेति ज्ञापनम् ।

यदा तु **सर्वज्ञाभिमतोत्प्रेक्षितया** भेदानां परिमाणादित्यादिकया **अनुमया अवगतम्** अनुमानमिति योजना, तदा वैचि(त्र्य)त्रीप्रदर्शनं व्याख्यानान्तरप्रयोजनम् । **जगत्कर्तृ** स्वातन्त्र्येण जगत्कारणम् ।

परि०— प्रकारान्तरेणेति । अनुमानस्येदमानुमानम् अनुमानावगतं प्रकृत्यादिकमिति यावत् । अनुमानपदेन चानुमानसिद्धसार्वज्ञोपेतपुरुषप्रोक्तत्वाद्वा अनुमानसिद्धप्रामाण्यकत्वेन वा अनुमानप्रधानकत्वाद्वा साङ्ख्याचार्यवाक्यं गृह्यते । तथा च साङ्ख्याचार्यवाक्यावगतप्रकृत्यादिकमित्येवं प्रकारान्तरेणेत्यर्थः । प्रागुक्तानुमानसिद्धमित्यर्थपिक्षयाऽस्यार्थान्तरत्वात् प्रकारान्तरेणेत्युक्तम् । **अनुमानसिद्धेति** । प्रत्यक्षयोग्यफलसंवादिकिञ्चित्साङ्ख्यवाक्यदृष्टान्तेन साङ्ख्यवाक्यत्वहेतुना विप्रतिपन्नतदीयसर्ववाक्यप्रामाण्यस्य 'नानुमानमतच्छब्दादि'त्यत्र पूर्वपक्षटीकोक्तदिशाऽनुमीयमानत्वादनुमानसिद्धप्रमाणत्वेनेत्युक्तम् । **अनुमानप्रधानत्वेन चेति** । साङ्ख्यस्य हैतुकत्वेन स्वाभिमतप्रमेयेषु प्राधान्येनानुमानानामेवोक्तेरिति भावः । टीकाकारीययोजनामनूद्य तत्प्रयोजनमाह **यदा त्विति** । **वैचित्रीति** । अनुमानमिति अनुमानमित्येवंरूपेणेत्यर्थः । जगत्कर्त्रिति मूलानुवादः । कर्तृत्वस्येच्छाघटितत्वात् अचेतने तदभावाद्वचाचष्टे **स्वातन्त्र्येण जगत्कारणमिति** । अन्याप्रयोज्यत्वेन जगत्कारणमित्यर्थः ।

गु०दी०— यदा तु सर्वज्ञ इत्यत्र पूर्वं सार्वज्ञस्यैव साधकमनुमानं तद्वाक्यं त्वानुमानिकसार्वज्ञमूलत्वात् तद्वाक्यमप्यनुमानम् । तत्सिद्धत्वात् प्रधानमप्यानुमानिकमित्यौपचारिकवृत्तिमाश्रित्योक्तम् । इदानीं तु साक्षादनुमानसिद्धत्वादेव प्रधानमानुमानिकमिति भेदः । अत्र च सार्वज्ञस्याप्रसङ्गान्नोक्तसाधकत्वेन व्याख्यान्तरस्य सङ्गतिरिति **वैचित्रीप्रदर्शनम्** इत्युक्तम् ।

यादु०— अस्यां योजनायां वाक्यस्य शब्दवृत्त्याऽलाभादाह **यद्वेति** । विमतं प्रमाणमाप्तवाक्यत्वादित्याद्यनुमानसिद्धप्रामाण्यकत्वेनेत्यर्थः । अनेन अनुमाशब्देन वाक्यलक्षणायां शक्यसम्बन्धो दर्शित इति ज्ञातव्यम् । प्रकारान्तरेणापि तं दर्शयति **अनुमानप्रधानत्वेनेति** । साङ्ख्यवाक्ये हि स्वप्रतिपाद्येष्वर्थेषु अनुमानान्येव प्राधान्येन कथ्यन्तेऽतोऽनुमानप्रधानकत्वं तस्येति ज्ञातव्यम् । **तदपि सूत्रसूचितमेवेति** । अनुमानं नेति सूत्रखण्डेन जगत्कर्तृ, अनुमानसिद्धसर्वज्ञवाक्यावगतमचेतनं नेति क्रियमाणो विशिष्टप्रतिषेधोऽनुमानसिद्धसर्वज्ञवाक्यावगतत्वरूपं विशेषणमेव उपसङ्क्रामति । स च उक्तविशेषणप्रतिषेधः सविशेषणप्रतिषेधतया सर्वज्ञस्यानुमानसिद्धत्वरूपं विशेषणमेव उपसङ्क्रामति । तथा च सर्वविषयकप्रत्यक्षवत्त्वरूपसार्वज्ञस्यानुमानसिद्धत्वप्रतिषेधलाभात् 'न योगिप्रत्यक्षेण, तस्यास्माकमसिद्धेरि'त्युक्तदूषणं सूत्रसूचितं भवतीति ज्ञातव्यम् । न साङ्ख्याचार्यवचनेनायमर्थः सिद्धचतीत्येतत्तु यद्वेत्युक्तसूत्रखण्डयोजनायां स्पष्टमेवावगम्यते । **वैचित्रीप्रदर्शनमिति** । नानुमानमिति सूत्रखण्डस्य पूर्वयोजनायामानुमानमितीदानीन्तनयोजनायां अनुमानमिति पदच्छेदस्य विचित्रताप्रदर्शनमेव प्रयोजनमुभयत्र प्रयोगस्यैक्यादिति भावः । कर्तृत्वस्य परेणासाधितत्वादनुक्तोपालम्भतेत्यत आह **स्वातन्त्र्येणेति** ।

वं०प०— नन्विदानीमप्यनुमानावगतं प्रधानं कारणं नेति व्याख्यानस्य क्रियमाणत्वात् प्रकारान्तरेणेति कथमुक्तमत आह **एतदनुमानेति** । वाक्यावगतं वाक्यमेवानुमेति व्याख्यानद्वयमपि व्याख्यानान्तरशब्देन ग्राह्यम् ॥ **वैचित्रीति** । अन्यथा जगत्कारणे प्रधानेऽनुमानं प्रमाणं नेति योजनायाः 'केन मूलानुमा' इत्यनेन कृतत्वादिदानीमपि तथैव व्याख्यायमानत्वेन प्रयोजनाभावाद्व्याख्यानान्तरं व्यर्थमेव स्यात् । ननु भवन्मते कुलालादेरिव मयाऽप्यचेतनस्य प्रधानस्य पारतन्त्र्येण जगत्कारणत्वं नाङ्गीकृतमेवेत्यचेतनं जगत्कर्तृ नेत्युक्ते सिद्धसाधनता स्यादतो व्याचष्टे **स्वातन्त्र्येणेति** ।

श्रीनिधि०— व्याख्यानान्तरस्येति । उक्तव्याख्यानद्वयस्येत्यर्थः । न योगिप्रत्यक्षेण सिद्ध्यतीत्यस्य सूचनम् आद्यव्याख्यानेन । साङ्ख्याचार्यवचनेन सिद्ध्यतीत्यस्य तु द्वितीयेनेति द्रष्टव्यम् । **वैचित्रीप्रदर्शनमिति** । पूर्वमनुमानमिति पदविभागमभिप्रेत्य इदानीं तु अनुमानमिति भागाभिप्रायेणेति वैचित्र्यं द्रष्टव्यम् ।

शे०वा०— 'स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुतः' इत्युक्तत्वात् रचनानुपपत्तेरित्येतदनर्थकमित्यत आह **सूत्रार्थमिति** । तर्हि न सर्वज्ञानुमागतमिति भाष्यखण्डवैयर्थ्यम् । तदितरमूलवाक्येनैव सूत्रार्थोपसंहारसिद्धेरित्यतस्तत्प्रयोजनमाह **अनुमानमित्येतदिति** । उपसंहारत्वस्य मूलारूढत्वसिद्ध्यर्थमाह **तत्तस्मादिति** । **सर्वज्ञेति** । सर्वज्ञानुमागतत्वं सौत्रस्यानुमानमित्यस्यार्थ इत्यर्थः । किं तत्सर्वज्ञत्वसाधकमनुमानं यद्गतत्वं प्रधानस्य स्यादित्यतस्तत्प्रदर्शयंस्तद्गतत्वं व्याख्याति **प्रकृत्यादिकमिति** । ननु सर्वज्ञत्वसाधकानुमानेन सर्वज्ञत्वस्यावगतत्वसम्भवेऽपि प्रधानस्य तदवगतत्वासम्भवाद्विप्रतिषिद्धमेतदित्यतोऽभिप्रायमाह **एतदिति** । एतदनुमानेन सिद्धो यः सर्वज्ञः तद्वाक्यादवगतमिति सम्बन्धः । उक्तयोजनायां सर्वज्ञवाक्यस्य सर्वज्ञानुमापदेन साक्षादलाभ इत्यपरितोषात् तल्लाभायाह **यद्वेति** । ननु सर्वज्ञानुमाशब्दस्य तद्वाक्ये योगरूढ्यादेरभावात् कथं सर्वज्ञवाक्यवाचकत्वमित्यतो रूढ्यादेरभावेऽपि लक्षणया तत्परत्वमिति भावेन लक्षणाबीजशक्यसबन्धमाह **अनुमानसिद्धेति** । विमतं प्रमाणमाप्तवाक्यत्वात् इत्यनुमानसिद्धप्रामाण्यकत्वेनेत्यर्थः । प्रकारान्तरेणापि शक्यसम्बन्धमुपदर्शयति **अनुमानेति** । साङ्ख्यवाक्ये हि स्वप्रतिपाद्येष्वर्थेषु प्राधान्येनानुमानानामेवोक्तत्वात् तस्यानुमानप्रधानत्वमित्यर्थः । **तदपि सूत्रसूचितमेवेति** । अनुमानं नेति सूत्रखण्डेन जगत्कर्त्रनुमानसिद्धसर्वज्ञवाक्यावगतमचेतनं नेति क्रियमाणो विशिष्टः प्रतिषेधोऽनुमानसिद्धसर्वज्ञवाक्यावगतत्वरूपं विशेषणमुपसङ्क्रामति । स चोक्तविशेषणप्रतिषेधः सविशेषणप्रतिषेधतया सर्वज्ञस्यानुमानसिद्धत्वरूपं विशेषणमेवोपसङ्क्रामति । तथा च सर्वविषयकप्रत्यक्षवत्त्वरूपसार्वज्ञस्यानुमानसिद्धत्वप्रतिषेधलाभात् 'न योगिप्रत्यक्षेण, तस्यास्माकमसिद्धेरि'त्युक्तदूषणं सूत्रसूचितमेवेति सिद्धमिति भावः । न साङ्ख्याचार्यवचनेनायमर्थः सिद्ध्यतीत्येतत्तु यद्वेत्युक्तसूत्रखण्डयोजनायां स्पष्टमेवावगम्यत इति । **वैचित्रीप्रदर्शनमिति** । नानुमानमिति सूत्रखण्डस्य पूर्वयोजनायामनुमानमित्येतद्योजनायां चानुमानमिति पदच्छेदस्य विचित्रताप्रदर्शनमेव प्रयोजनं प्रमेयस्यैक्यादिति भावः । ननु परेण स्वातन्त्र्येण जगत्कारणताया एव पूर्वं शङ्कितत्वात् 'इदं नाचेतनवशमि'त्यादिना च तस्या एव

निरस्तत्वात् स्वातन्त्र्येण जगत्कारणं नेत्येवोपसंहर्तव्यं जगत्कर्तृत्वस्य परेण पूर्वं प्रकृतेरनाशङ्कितत्वादनिरस्तत्वाच्च 'न जगत्कर्तृ' इत्युपसंहारोऽयुक्त इत्यतस्तत्प्रकृतोपयोगितया व्याचष्टे **स्वातन्त्र्येणेति** ।

वा०र०— अनुमानं अवश्य इत्येतत् इतीत्येवं प्रतीकोपादानकरणेन मूले उपसंहरन् अनुमानमिति परिच्छेदः । सौत्रनेत्यस्यापि नानुवादः । तस्य व्याख्यानान्तराभावात् इति सूचितं भवति । सर्वज्ञानुमागतं अनुमानं इति मूलस्य सौत्रपदानुव्याख्यानपदयोः सम्बन्धप्रदर्शकत्वमिति स्पष्टयति **सर्वज्ञानुमागतत्वमिति** । **प्रतिषिद्धमिति** । सर्वज्ञत्वसाधकेनानुमानेन प्रधानमवगम्यते इत्येतत् विप्रतिषिद्धम् । अन्यसाधकेनान्यस्य साधने विरोधात् अन्यसाधनमित्युक्ते हि तत्सिद्धिकरणता लब्धा । द्वितीयान्यशब्दस्तु पूर्वोक्तकरणसाध्यसिद्धयविषयं अभिदधातीति । सिद्धयविषयस्य सिद्धिरित्युक्ते कथं न विरोधः इति भावः । **तल्लाभाय आहेति** । साक्षात् तल्लाभाय आहेति अर्थः । यद्यपि पूर्वपक्ष इव एतत्पक्षेऽपि न साक्षाल्लाभः । वचनवृत्तेः एतत्पक्षेऽप्यभावात् तथापि वृत्त्या तल्लाभ एव साक्षात् लाभः इत्याश्रित्य वा पूर्वत्रेव परम्पराभावाभिप्रायेण चैवमुक्तमिति बोध्यम् । **कथं सर्वज्ञत्ववाक्यवाच्यत्वमिति** । 'सर्वज्ञानुमोच्यत इति' इत्यनेन च वाचकत्वस्योक्तत्वात् इत्याशयः । **तत्परत्वमिति भावेनेति** । अनेनोच्यत इत्यपि वृत्त्या प्रतिपाद्यत्वादिमात्राभिप्रायेणेति दर्शितं भवति । **प्रागुक्तमिति** मूलम् । न च काचित् प्रमेयोक्तार्थे इत्यनेनेति शेषः । **अयमर्थः सिद्धयतीति** मूलम् । स्वातन्त्र्येण तु जगत्कारणत्वं प्रधानस्येयमर्थः इत्यर्थः ।

आनुमानमित्यस्य प्रागुक्तार्थद्वयेऽपि योगिप्रत्यक्षसाङ्ख्याचार्यवचनयोः स्वातन्त्र्येण प्रधानजगत्कारणतासाधकत्वं नेत्यर्थपरत्वं अविशेषेणेति भ्रान्तिवारणाय आद्ययोजनायां योगिप्रत्यक्षस्य निराकरणम् । द्वितीययोजनायां तु साङ्ख्याचार्यवचनस्य निराकरणमिति विवेकं दर्शयितुं आद्ययोजनायां योगिप्रत्यक्षस्य स्वातन्त्र्येण प्रधानकारणत्वे साधकत्वनिराकरणलाभ इत्यतः साक्षाल्लाभायोगेऽपि विशिष्टनिषेधस्य विशेषणत्वविशेषणोपसङ्क्रामकत्वप्रमापकतया तन्निराकरणलाभः इति तावद्दर्शयति **अनुमानं नेति सूत्रखण्डेनेत्यादिना** । सर्वज्ञानुमागतमित्यत्र विशेष्यानुक्तिं परिहर्तुमाह **अचेतनमिति** । **विशेषणमुपसङ्क्रामतीति** । 'सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामतः उभयनिषेधे गौरवात्' इति न्यायादिति भावः । एवमुत्तरत्रापि । सर्वज्ञत्वस्यानुमानसिद्धत्वनिराकरणलाभेऽपि सर्वज्ञभूतयोगिप्रत्यक्षेण तत्सिद्धिरित्यस्य निराकरणं न लभ्यते इत्यतः तल्लाभो जातः इति दर्शयति **तथा च सर्वेति** । अत्रापि सर्वज्ञ इत्यस्य सार्वज्ञविशिष्ट इत्यर्थकत्वात् सर्वज्ञः अनुमानसिद्धो न इति सविशेषणप्रतिषेधस्य सर्वज्ञरूपविशेषणोपसङ्क्रामकत्वमित्याशयः । तन्निषेधेऽपि योगिनामुक्तार्थप्रत्यक्षाभावसिद्धिः कथं इत्यतः सर्वज्ञं विवृतं **सर्वार्थविषयकेत्यादि** । तथा च सर्वार्थविषयकप्रत्यक्षसद्भावे अनुमानाभावे उक्ते प्रकृते स्वातन्त्र्येण जगत्कारणत्वसिद्धिः योगिप्रत्यक्षेण न सम्भवति । त एवं पश्यन्तीत्यत्र प्रमाणाभावेन तत्प्रत्यक्षस्य सिद्धेरिति पूर्वोक्तार्थे लाभः अनेन जात इति भावः । **न योगिप्रत्यक्षेण इति** । न योगिनां प्रत्यक्षं प्रमाणं इत्येव प्रागुक्तप्रायकत्वेऽपि इदं तदर्थकथनपरमित्यदोषः । इदं नाचेतनवशं वस्तुत्वात् इत्येतत्पूर्वव्याख्याने सर्वज्ञानुमागतमिति इदानींतनव्याख्याने च किं वैचित्र्यं इत्यत आह **नानुमानमिति**

सूत्रमिति । इति पदच्छेदस्य इत्यादि वदता इदमुक्तं भवति । महदादीनां प्रकृतिकारकत्वे प्रत्यक्षागमयोः प्रामाण्यासम्भवेऽपि तत्र भेदानां परिमाणादित्यादिकमनुमानं प्रमाणं भविष्यतीति शङ्कापरिहाराय 'प्रवृत्तरचनानुपपत्तेः' इति सूत्रस्य हीदं नाचेतनवशं इति पूर्वभाष्ये प्रधानस्य रचनायाः स्वातन्त्र्यप्रवृत्तेरनुमानविरोधेनानुपपत्तेः । नानुमानं तत्र प्रमा इति सूत्राक्षरयोजनां मनसि निधाय इति पूर्वमूलानुसारेण साङ्ख्याचार्योक्तानुमानं प्रकृतेः महदादिकारणत्वे प्रमाणं न प्रधानस्य स्वतन्त्रप्रवृत्तिरूपरचनारूपस्वतन्त्रकारणत्वस्य महदादिकं न स्वतन्त्राधीनाचेतनोत्पत्तिकं वस्तुत्वात् प्रधानवत् । प्रधानं स्वतन्त्रप्रवृत्तिरहितं अचेतनत्वात् तन्त्वादिवत् इत्यनुमानाभ्यां प्रतिषिद्धत्वेनानुपपत्तेरिति योजनाशरीरलाभः । सर्वज्ञाभिमतोत्प्रेक्षितया भेदानां इत्यादिरूप एतन्मूलानुसारेण तु अनुमानम् । भेदानां परिमाणात् इत्यादि साङ्ख्योक्तानुमयावगतं प्रधानरूपं अचेतनं स्वातन्त्र्येण जगत्कारणं न । रचनाशब्दोक्तस्वतन्त्रवृत्तेः तत्रानुपपत्तेः । इति इह भाष्ये योजनाशरीरलाभः । तत्र पूर्वयोजनायां अनुमानं नेति पदच्छेदाश्रयणेन परोक्तानुमानं प्रमाणं नेति सूत्रखण्डार्थः । एतद्योजनायां तु आनुमानोत्प्रेक्षितं अचेतनप्रधानं स्वातन्त्र्येण जगत्कर्तृ न इति तदर्थः । न च एतदर्थद्वयं एकैकयोजनायां लभ्यते । अनुमानपुरस्कारेण प्रामाण्यनिषेधस्यानुमानिकप्रधानपुरस्कारेण जगत्कर्तृतानिषेधस्य च पृथक् पृथक् प्रमेयत्वात् । परन्तु नानुमानिकमिति सूत्रखण्डस्य न केवलं अनुमानं नेति पदच्छेदेन योजना कर्तुं शक्या अपि तु अनुमानं नेति पदच्छेदेनापि स कर्तुं शक्य इत्येवं योजना वैचित्र्ययोजना । सा च तमेव व्याख्यानान्तरप्रयोजनम् । मुखतः प्रमेयभेदप्रतीतावपि पूर्वयोजनास्थप्रतिपक्षस्यैवात्र सूत्रखण्डेनाभिधानात् अत्रत्यानुमानिके जगत्कर्तृतानिषेधस्य साङ्ख्योक्तानुमानं महदादेः प्रकृतिकारणकत्वे प्रमाणं न इत्येतत् पर्यवसायितामाश्रित्यैवानुमानेन तत्सिद्धिशङ्कानिरासाय प्रवृत्तरचनेति सूत्रार्थत्वस्य सिद्धत्वात् फलतः प्रमेयस्य योजनाद्वयेऽपि अविशेषात् तदेतदाह **प्रमेयस्य ऐक्यादिति** । फलतः प्रमेयस्य एकत्वादित्यर्थः इति सूरिभिरालोचनीयम् । मूले वैचित्रीपदं वैचित्र्यार्थकम् । विचित्रस्य भावो वैचित्र्यं इति विचित्रशब्दात् भावार्थे 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे'ति सूत्रेण ब्राह्मणादेराकृतिगणतया ष्यञि सति षकारञकारलोपे 'यस्येति च' इत्यनेन विचित्रशब्दाकारलोपे तद्धितेष्वचामित्यादिवृद्धौ निष्पन्नवैचित्र्यशब्दात् तलन्तस्येव षञन्तस्यापि शब्दस्य स्वभावात् क्वचित् स्त्रीत्वेनास्त्रियां 'षित् द्यौरादिभ्यश्चे'त्यनेन षी इङापि यस्येति चेत्यकारलोपे हलः उत्तरस्य तद्धितयकारस्य लोपविधायकेन हलस्तद्धितस्येति सूत्रेण यकारलोपे वैचित्रीति रूपप्राप्तेः इत्येवं मूलाशयं स्पष्टयितुं उक्तं **वैचित्र्येति** । अत्र वैचित्र्येति पाठः स्वरस एव । विचित्रवतेति पाठे तु तलन्तस्य स्त्रीत्वेन षञन्तस्यापि स्त्रीत्वसम्भावनां दर्शयितुं वैचित्र्यमित्यस्य विचित्रतेति प्रतिपदं उपात्तमिति वदन्ति । कारणसामग्रीति स्मृत्यधिकरणीयमूलव्याख्यावसरे कारणपौष्कल्यस्य सामग्रीपदार्थतया व्याख्यातत्वेन नात्र सामुग्धेनानुवादमात्रं कृतमिति ज्ञेयम् ।

स०व्र०— यदा त्विति । अनुमानमिति पदच्छेदः, आनुमानमिति पदच्छेदश्चेति वैचित्रीदर्शनमित्यर्थः । सामान्यानुमानविशेषानुमानरूपवैचित्रीप्रदर्शनमित्यर्थः । इदं च न सर्वज्ञानुमागतमित्यनेन सूचितम् ।

परेण प्रधानस्य स्वातन्त्र्येण कारणत्वस्यैवोच्यमानत्वेन कर्तृत्वनिराकरणमसङ्गतमित्यत आह **जगत्कर्तृ स्वातन्त्र्येण जगत्कारणमिति** ।

विठ्ठल०— सर्वज्ञानुमागतमिति तद्व्याख्याने प्रकृत्यादिकमिति निष्कृष्टार्थमाह **एतदनुमानसिद्धेति** । इदं च सर्वज्ञविशेषणं एतेन सर्वज्ञानुमागतं अनुमानसिद्धसर्वज्ञवाक्यावगतमचेतनं जगत्कर्तृनेति मूलयोजना । अस्यां योजनायां साङ्ख्याचार्यवाक्यस्य शब्दवृत्त्या अलाभादाह **यद्वेति** । विमतं प्रमाणमाप्तवाक्यत्वादित्याद्यनुमानसिद्धप्रामाणिकत्वेनेत्यर्थः । अनेनानुमानशब्देन वाक्यलक्षणायां शक्यसम्बन्धो दर्शित इति ज्ञातव्यम् । प्रकारान्तरेण शक्यसम्बन्धं उपपादयति **अनुमानप्रधानत्वेनेति** । साङ्ख्यशास्त्रे स्वप्रतिपाद्यार्थे प्रायेणानुमानान्येव कथ्यन्त इत्याशयेनैवमुक्तमिति ज्ञातव्यम् । सूत्रस्य व्याख्यानान्तरेण यो युक्तिविशेषालाभात् किमस्य प्रयोजनमित्यत आह **व्याख्यानान्तरस्येति** । **यत्प्रागुक्तमिति** । न च काचित्प्रमोक्तार्थ इत्यादावित्यर्थः । **तदपि सूत्रसूचितमेवेति** । नानुमानमिति सूत्रखण्डेन जगत्कर्तृ अनुमानसिद्धसर्वज्ञवाक्यावगतं न युक्त्या सर्वज्ञमात्रस्यानुमानसिद्धत्वप्रतिषेधलाभात् सर्वसाक्षात्कारस्तु योगिन एवाश्रित्या न योगिप्रत्यक्षेणायमर्थः सिद्ध्यतीत्युक्तदूषणं सूत्रसूचितं भवतीति ज्ञेयम् । न साङ्ख्याचार्यवचनेनायमर्थः सिद्ध्यतीत्येतत्तु यद्वेति मूलस्यार्थान्तरकथनरीत्या सूत्रखण्डयोजनायां स्पष्टमेवावगम्यते । तर्हि पूर्वयोजना किमर्थेत्यत आह **यदा त्विति** । अनुमानमित्यपि पदविच्छेदवैचित्री प्रयोजनमित्यर्थः । अत एव तत्र अनुमानं जगत्कर्तरि अचेतनेन प्रमाणमिति सूत्रयोजना सुधायामुक्ता । अत्र तु अनुमानसर्वज्ञानुमावगतमचेतनं न जगत्कर्तृ इति योजना मूले स्पष्टा । परेणाचेतनस्य कारणतामात्रोक्तेः कर्तृत्वस्यासाधितत्वादनुक्तोपालम्भ इत्यतोऽनूद्य व्याचष्टे **जगत्कर्तृ स्वातन्त्र्येण जगत्कारणमिति** ।

चषकः— **वैचित्रीति** । षिद्गौरादिभ्यश्चेति ङीष् ।

॥ इति प्रथमसूत्रव्याख्यानोपसंहारसहितं 'नानुमानम्'इतिसूत्रांशस्य प्रकारान्तरेण व्याख्यानम् ॥
॥ इति प्रथमसूत्रव्याख्यानम् ॥

* * *

॥ अथ द्वितीयतृतीय-'पयोम्बुवच्चेत्तत्रापि', 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्'-इत्युत्तरसूत्रद्वयव्याख्यानम् ॥
॥ अथ तत्र 'पयोम्बुवच्चेत्तत्रापि' इतिसूत्रव्याख्यानम् ॥
॥ अथ कारकान्तराप्रयोज्यत्वलक्षणमपि स्वातन्त्र्यं प्रधानस्य नोपपद्यते ॥

७० सु०— "स्यादेतत् । परिमाणादिहेतुभिस्तावन्महदादिकार्याणां किमपि मूलकारणमस्तीत्यवगम्यते, तस्यापि कारणान्तरकल्पने प्रमाणाभावादनवस्थानाच्च । तस्य च स्वातन्त्र्यं कारकान्तराप्रयोज्यत्वमेव न तु स्वेच्छानुसारित्वम्, येनोक्तदोषः स्यात् । तच्च

तत्प्रयोक्तुः कारकान्तरस्याप्रामाणिकत्वादेव सिद्धम् । न चाचेतनस्य तदसम्भावितम्, अचेतनेष्वपि पयोऽम्बुप्रभृतिषु दर्शनात् । अचेतनमेव हि पयोऽन्यानधिष्ठितमपि वत्स-विवृद्ध्यर्थं प्रवर्तते, दधिभावं चापद्यते; घनविनिर्मुक्तं चाम्बु जम्बीरनारिकेलादिष्वनेकविधं विकारं प्राप्नोति, नादेयं चापसर्पति; तृणं च गवा जग्धं क्षीरीभवति; अयश्चायस्कान्त-मभिसर्पति । न च 'इदं नाचेतनवशमि'त्यादिप्रमाणविरोधः, तस्योक्तस्थानेष्वेवानैका-न्त्यात् । न चेदं ब्रह्मवादिनां सम्मतम्, येन सिद्धसाधनं स्यात्'' इत्याशङ्कापरिहारार्थं सूत्रम् **ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ इति** ।

ब्र०सू०— ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥

तद्व्याचष्टे **पयोऽम्ब्वादि चेति** ।

अनु०— पयोम्ब्वादि च नोपमा ।
एतत्प्रशास्तिवचनाच्चेतनाचेतनस्य च ॥

उपमा स्वार्थसम्भावनायामस्मदीयहेतुव्यभिचारे चेति शेषः । यथाऽत्र साध्यं व्यभिचरति तथा पक्षेऽपि व्यभिचरतु हेतुरित्येवमर्थं हि व्यभिचारोद्भावनम् । तदत्र न युज्यते, **चेतनाचेतनस्यैतत्प्रशास्तिवचनात्** । पारमेश्वरप्रेरणाप्रतिपादकश्रुतेः । आद्य-श्चशब्दो लौकिकानां स्वतन्त्रतया प्रतीयमानमपीत्यर्थे, द्वितीयस्तु न केवलमचेतनस्य किन्तूभयस्यापीति ।

एतदुक्तं भवति । कारकान्तराप्रयोज्यत्वलक्षणमपि स्वातन्त्र्यं न प्रधानस्योपपद्यते, असम्भावितत्वात्, उक्तानुमानविरुद्धत्वाच्च ।

परि०— 'पयोऽम्बुवच्चेत् तत्रापी'ति सूत्रभाष्यमादिपदार्थविवरणपूर्वमवतारयति **स्यादेत-दित्यादि** । **परिमाणादीति** । भेदानां परिमाणादिति पूर्वोदाहृतश्लोकस्थहेतुभिरित्यर्थः । कथं तस्य मूलकारणतेत्यत आह **तस्यापीति** । सूत्रे पयोम्बुनोरुक्तिरूपलक्षणमित्युपेत्य मूले 'पयोम्ब्वादी'-त्युक्तम् । अतः पयोम्बुप्रभृतिषु दर्शनादित्युक्त्वा तद्व्यनक्ति **अचेतनमेव हि पय इति** । क्षीर-

मित्यर्थः । **नादेयं** नदीसम्बन्धिरूपं सत् प्रवहतीत्यर्थः । 'नद्यादिभ्यो ढगि'त्युक्तेः । **अयस्कान्तं** अयस्कान्ताख्यमणिम् । **इत्यादिप्रमाणेति** । मूलकारोक्तप्रमाणेत्यर्थः । **स्वार्थेति** । प्रधानं स्वतन्त्रकारणं इत्येवंरूपार्थेत्यर्थः । **अस्मदीयहेत्विति** । 'इदं नाचेतनवशं वस्तुत्वादि'त्यादिनोक्त-हेत्वित्यर्थः । ननु व्यभिचारे च नोपमेत्ययुक्तम् । स्वार्थसम्भावनायां साध्यसाधनवत्तयोक्तसाधर्म्य-वत्त्वेनोपमापदस्वारस्यवत् व्यभिचारे पयोम्बादि च न स्थलमित्येवं वाच्यत्वेनोपमापदस्वारस्य-स्याभावादित्यतः तत्रापि तत्स्वारस्यं दर्शयन् व्याचष्टे **यथात्रेति** । पयोम्ब्वादावित्यर्थः । **पक्षे-ऽपीति** । 'इदं नाचेतनवशं वस्तुत्वादि'त्यादावित्यर्थः । एतत्प्रशास्तिपदयोरर्थः **पारमेश्वरप्रेरणेति** ।

गु०दी०— **अचेतनमेव पय** इत्यत्र स्ववत्सव्यतिरिक्तवत्सान्तरानयने पयःप्रवृत्त्यदर्शनेन गवाख्य-मातृरूपचेतनप्रेरितमेव पयः प्रवर्तते । घननिर्मुक्तं चाम्बु शुष्कजम्बीरादौ रसोदयादर्शनेन विचित्रवृक्षजीवचैतन्य-सहकृतमेव प्रवर्तते । अन्यथा तेषु तेषु विचित्ररससम्पत्तेर्निर्निबन्धनत्वप्रसङ्गः । गङ्गायाः स्त्रीरूपेण शन्तनु-भार्यात्वस्य भीष्ममातृत्वस्य भगीरथानुगमनस्य च प्रसिद्धत्वात् । अस्ति जलान्तः काचन देवता । तन्निदर्शनेन सकलनदीष्वपि चेतनानुप्रवेशस्य सिद्धत्वान्न तन्निदर्शनं परस्य । तृणमपि निर्जीवपशुशरीरे क्षीरपुष्ट्यादेरजननात् सजीवायामपि वन्ध्यायां गवि क्षीरस्यादर्शनाच्च चेतनानुगृहीतमेव कार्यकारि । अयोऽयस्कान्तयोश्चाचेतनस्यैव प्रवृत्तिहेतुत्वे अयसा अयस्कान्तप्रवृत्तिरपि स्यात् । अतो विशेषशक्त्याऽऽधात्री तत्रापि काचिद्देवताऽस्तीति सिद्धम् । किं चाचेतनस्य स्वत एव प्रवृत्तौ नौरेव नदीं कुतो नोत्तारयति । अत एव वनात् कुतो न फल-मानयति । घट एव च कुतो न गृहेगृहे जलमाहरति । अतः स्पष्टदृष्टान्तानुसारेण अस्पष्टदृष्टेऽप्यदृष्ट एव कश्चित्कल्पनीयः । श्रुतिस्तु 'न ऋते त्वत्क्रियते किञ्चनारे'त्याद्या सर्वत्र भगवन्तमेव कर्तारमाह । ईश्वरस्तु सर्वं स्वशक्त्यैव प्रेरयितुं शक्तोऽपि निरीश्वरवादिनां मोहाङ्कुरजननाय कतिपयपदार्थानस्पष्टदृष्टकर्तृकतया प्रेरयन् पुनस्तमेवाङ्कुरं बहुतरदावाग्निना दग्धुकामो न तथा करोति । अतो न लौकिकमर्यादया नाप्यलौकिकमर्यादया परस्य निदर्शनानीत्यूह्यम् ।

यादु०— मूलकारणत्वमुपपादयति **तस्यापीति** । **नादेयं** नद्यां जातम् । नद्यादिभ्यो ढगिति स्मरणात् । अम्बिति वर्तते । व्यभिचारोद्भावने उपयोगं दर्शयति **यथाऽत्र साध्यमिति** ।

वं०प०— **तस्य च** मूलकारणस्य । **तच्च** कारकान्तराप्रयोज्यत्वरूपं स्वातन्त्र्यम् । **तत्** उक्तरूपं स्वातन्त्र्यम् । एकत्राम्लतयाऽपरत्र मधुरतयेत्यनेकविधम् । **इदमिति** । एवं पयोम्ब्वादिषु दृष्टं प्रधानेऽपि साध्यमानं कारकान्तराप्रयोज्यत्वरूपं स्वातन्त्र्यमित्यर्थः । स्वार्थसम्भावनायामस्तूपमात्वं हेतुव्यभिचारे कथमुपमात्वमित्यतस्तद्विवृणोति **यथेति** । **उक्तेति** । इदं नाचेतनवशमित्युक्तेत्यर्थः ।

कं०रा०— नादेयमिति । नद्यां अम्बु चापसरतीत्यर्थः । नद्यादिभ्यो ढगिति भवार्थे नदीशब्दाङ्ढकि डस्य इयादेशे यस्येति चेतीकारलोपे किति चेत्यादिवृद्धौ च नादेयमिति रूपम् । **जग्धमिति** । भक्षितमित्यर्थः । अदो जग्धि लयप्ति कितीति अदेः क्तप्रत्यये जग्धिरादेशः । न च वाच्यमन्नमित्यत्रापि जग्ध्यादेशः कस्मान्न भवतीति अन्ना एन इत्यादि ज्ञापकेन तत्र तदभावोपपत्तेरिति । **एतत्प्रशस्तिवचनादिति** । यद्यपि शास्त्र अनुशिष्टाविति यस्मात् किं नप्रत्यये शास इदङ् लोरित्युपधाया इत्वे ज्ञासिवसिघसीनां चेति सकारस्य पत्वे ष्टुनाष्टुरिति प्रत्यये तकारस्य ष्टुत्वे च प्रशिष्टीति वक्तव्यं तथापि इक्स्तिपौ धातुनिर्देश इति स्तिबंशोऽयं शास्ति शशब्दस्तेन च धातुवाचिनां तदर्थः शासनं लक्ष्यत इति न कश्चिद्दोष इति ध्येयम् । **उक्तानुमानेति** । प्रधानं स्वतन्त्रप्रवृत्तिरहितं अचेतनत्वादित्यनुमानविरुद्धत्वादित्यर्थः ।

श्रीनिधि०— घनविनिर्मुक्तं मेघविनिर्मुक्तम् । **नादेयं** नदीसम्बन्धि । **जग्धं** भक्षितम् । हेतुव्यभिचारे उपमात्वमुपपादयति **यथात्र साध्यमिति** । **प्रागुक्तानुमानेति** । इदं स्वतन्त्रचेतनाधीनोत्पत्तिकं न भवति वस्तुत्वात् पधानवदिति प्रागुक्तानुमानेत्यर्थः । परन्तु पूर्वं स्वातन्त्र्यं नाम स्वेच्छानुसारित्वम् । अत्र तु कारकान्तराप्रयोज्यत्वमिति विशेषः ।

शे०वा०— 'पयोऽम्ब्वादि च नोपमे'त्युत्तरभाष्यानर्थक्यमाशङ्क्य 'पयोऽम्बुवच्चेत्तत्रापी'त्युत्तरसूत्रव्याख्यानरूपत्वान्न तदिति भावेन तत्सूत्रार्थकथनरूपतयोत्तरभाष्यं योजयितुं सूत्रमेव किमर्थमित्यतस्तद्व्यावर्त्यशङ्काप्रदर्शनेन सूत्रस्यार्थवत्तां तावदुपपादयति **स्यादेतदिति** । कथं तस्य मूलकारणत्वमित्यतस्तदुपपादयति **तस्यापीति** । **उक्तेति** । स्वेच्छानुसारितामेवेत्यादिनोक्तेत्यर्थः । भवेदेवं कथञ्चिद्यदि प्रधानस्य कारकान्तराप्रयोज्यत्वमपि सिद्धं स्यात् तदेव कुत इत्यत आह **तच्चेति** । **अप्रामाणिकत्वादिति** । तत्साधकनिरवकाशप्रमाणविरहादिति भावः । **न चेति** । चेतनानधिष्ठितस्याचेतनस्य क्वापि स्वतःप्रवृत्त्यदर्शनादिति भावः । पयोऽम्ब्वादीत्युत्तरमूलस्थादिपदानुरोधादाह **प्रभृतिष्विति** । पयोऽम्बुवदिति सूत्रयोजनामभिप्रेत्य पयोदृष्टान्तं तावदुपपादयति **अचेतनमपीति** । अम्बुवदिति दृष्टान्तमप्युपपादयति **घनेति** । अचेतनमेव चेतनानधिष्ठितमपीत्यनुवर्तते । **नादेयं चेति** । अत्रापि पूर्ववदनुवृत्तिर्द्रष्टव्या । अम्बिति चानुवर्तते । अवृद्धाभ्यो नदीमानुषेभ्य इति प्राप्तस्य छस्य बाधेन नदीशब्दाच्छैषिकेऽर्थे नद्यादिभ्यो ढगिति ढकि नादेयमिति रूपसिद्धिरिति ध्येयम् । प्रभृतिशब्दोक्तं दृष्टान्तमुपपादयति **तृणं चेत्यादिना** । अत्राप्यचेतनमेवेत्यादिकमनुवर्तते । **प्रमाणेति** । प्रतिपक्षरूपेत्यर्थः । **उक्तस्थानेष्विति** । पयआदिकार्येषु दध्यादिष्वित्यर्थः । तत्राचेतनवशात्वस्यैव सत्त्वादिति भावः । न चाचेतनेच्छाधीनोत्पत्तिकत्वाभावस्यैव पूर्वं साधितत्वाद्दध्यादिष्वप्युक्तसाध्यसत्त्वान्न तत्र व्यभिचार इति वाच्यम् । कारकान्तराप्रयोज्याधीनोत्पत्तिकं वदन्तं प्रति तत्साधने सिद्धसाधनतापत्त्या तदधीनोत्पत्तिकत्वाभावस्यैव साधनीयत्वेनोक्तदोषतादवस्थ्यापातात् । ननु पयोऽम्ब्वादेः स्वार्थसम्भावनायामुपमात्वेऽप्यस्मदनुमाने व्यभिचारस्थलत्वेन तत्रोपमात्वाभावात् कथं व्यभिचारे चोपमेत्युच्यत इत्यत आह **यथाऽत्रेति** । व्यभिचारोद्भावनमित्यतःपरं व्यभिचारे चोपमात्वं युक्तमिति शेषः । **तदत्रेति** । उभयत्रोपमात्वमित्यर्थः । **असम्भावित-**

त्वादिति । चेतनानधिष्ठितस्याचेतनस्य क्वापि स्वतःप्रवृत्त्यदर्शनादिति भावः । **उक्तानुमानेति** । 'इदं नाचेतन-वशमि'त्युक्तानुमानेत्यर्थः ।

वा०र०— कथं तस्य मूलेति । अनेनैवकारमस्ति किञ्चित् । तच्च मूलकारणमिति मूलयोजना सूचिता । तेन तस्यापीति मूलगत-तच्छब्देन मूलत्वयागेन कारणमात्रपरामर्श इति च सूचनात् न कश्चित् दोष इति ज्ञेयम् । **उक्तेत्यर्थ इति** । अचेतनं चेतनमिति वचनं पर्यवसानप्राप्त-स्वव्याहतिरूप-उक्तेत्यर्थ इत्यर्थः । अचेतनस्य स्वतःप्रवृत्त्यदर्शनं तु सावकाशतयोत्तरवाक्य एव प्रतिपाद्यते इत्याशयेनाह **निरवकाश इति** । **अवृद्धाभ्यः इति** । तन्नामिकाभ्यः इति सूत्र इति शेषः । अवृद्धानि यानि नदीनां मानुषाणां च नामानि तेभ्योऽण्प्रत्ययेऽण्प्रत्ययो भवति इति सूत्रार्थः । नदीनाम । यमुनेत्यादि । यामुनः नार्मदः इत्यादि । मानुषी नाम चिन्तिता इत्यादि । चिन्तितायाः आपत्यं चेति तः इत्यादिकमुदाहरणम् । ननु नदीशब्दात् न तर्हि अण्प्राप्तिः । यावता नदीभूत-यमुनादीनामेव वाचकानां यमुनादिशब्दानां एव प्राप्तेरिति चेत् न । नदीभूत-यमुनाद्यानां वाचकत्वं यमुनादिशब्दस्येव नदीशब्दस्यापि अस्तीति तस्यापि सामान्यतो नदीमात्रवाचकस्य ग्रहणोपपत्तेः । सूत्रार्थविशेषविचारो मञ्जर्यादौ ज्ञेयः । विस्तृतत्वात् । ततश्च नदीशब्दात् अणि टिलोपे नादं इत्येव प्राप्तं भवतीति ज्ञेयम् । **अत्र चेति** । प्राप्तस्याणः छस्य चेति पाठः । छस्य चेति उक्तिस्तु न प्रकृतेऽण् स्वस्थस्यापि प्रसक्तौ सत्यां तदुभयबाधेनाणित्यादेशे येनापि तु वस्तुतः तस्य सूत्रस्याण इव तदपवादेन बद्धत्वप्रयुक्तछप्राप्तिस्थले तस्यापि बाधेन प्रवृत्तिरस्तीति शिष्यात् ग्राहयितुम् । अत एव 'नद्यादिभ्यो ठक्' इति सूत्रीयप्रसादे अवृद्धेभ्योऽणिवृद्धेभ्यः छवचनमिदं इत्युक्तम् । केचित्तु वृद्धिः यस्याचामादिः इति सूत्रप्राप्त-वृद्धत्वस्यावृद्धत्वस्य च समावेशायोगेऽपि वृद्धिरित्युक्तवृद्धत्वाभावेनावृद्धत्वस्य वा नामधेयस्य वृद्धिसंज्ञेत्यनेनप्राप्त-वृद्धत्वस्य च समावेशे बाधकाभावेन प्रकृतेऽवृद्धत्वप्रयुक्ताणो वृद्धत्वप्रयुक्तछस्य च प्राप्तिरस्तीति तदुभयबाधेन ठगर्थयुक्तविधायकनद्यादिभ्य इत्यस्य प्रवृत्तिरुपवर्णयितुं शक्येत्याह **शैषिकेऽर्थ इति** । उपयुक्तादयेत्यादेः व्यवहितात्सन्निहितात्प्रकृतात् तदस्मिन् अस्तीति देशे तन्नास्ति । तेन निवृत्तं तस्य निवासः । अदूरभव-श्चेतिसूत्रोक्तचतुर्थत्वात् अन्योऽर्थो शेषः । चक्षुषा गृह्यमाणं रूपं चाक्षुषम् । श्रावणः शब्दः । दृष्टदि पिष्टाः दार्षदाः सक्तवः इत्यादि गृह्यमाणपिष्टजात्वादिरूपः तस्मिन् अर्थे विहिताः शैषिकाः भवन्ति इति नदीशब्दादपि जाताद्यर्थे ढगित्यर्थः । अयमत्र समुदायार्थः । 'नन्दिग्राहिपचादिभ्यो ल्युणिन्यचः' इत्यत्र विहिताच्प्रत्यया-श्रयपचादिगणे दैवट् नदट् इत्यादि शब्दानां टित्करणं टिड्ढाणञिति सूत्रेण ङीप प्राप्त्यर्थमिति पदमञ्जर्यादौ प्रतिपादिततया टित्वात् नदेत्यस्मात् ङीपि यस्येति चेति अवर्णलोपे निष्पन्ननदीशब्दस्य स्त्रीप्रत्ययान्ततया स्त्रीभ्यो ठक् इत्यनेन ठक्प्राप्तौ सत्यां तदपवादेनावृद्धाभ्यः इत्यनेन सूत्रेणाण्प्राप्तौ तदपवादेन पुनः ठक्विधायकेन नद्यादिभ्यो ठक् इत्यनेन मही वारणासीत्यादिशब्देभ्यो ठकिमाहेत्यतः वारणसेयः इत्यादिरूपवत् नदीशब्दात् ठकि सति ठस्य ईयादेशे ईकारलोपे च सति नादेयः इति रूपमिति । **न चाचेतनेति** । पयः आदेः इच्छाभावेन उक्तसाध्यस्य दध्यादावपि सद्भावः इत्यर्थः । **कारकान्तरेति** । कारकान्तराप्रयोज्यत्वरूपस्वातन्त्र्यविशिष्ट-

कारणाधीनोत्पत्तिकत्वं वदन्तं प्रतीत्यर्थः । **तत्साधन इति** । अचेतनाधीनोत्पत्तिकत्वाभावसाधनेत्यर्थः । **तदधीनोत्पत्तिकत्वाभावस्यैवेति** । कारकान्तराप्रयोज्याधीनोत्पत्तिकत्वाभावस्यैवेत्यर्थः । **उक्तदोषेति** । दध्यादावुक्तविधोत्पत्तिकत्वस्यैव सत्त्वेन तदभावाभावेन साध्याभावात् व्यभिचारतादवस्थ्यमित्यर्थः । **व्यभिचारोद्भावनमित्यतःपरमिति** । अत्र परमित्यनन्तरं अतो व्यभिचारः इति पाठः । अतः इत्यस्याभावे वा तस्य शेषतया पूरणं वा कार्यम् ।

स०व्र०— प्रमाणाभावात् । इत्यस्य स्वातन्त्र्येण हेतुत्वम् अनवस्थाया दूषणत्वे चोपयुक्तत्वं द्रष्टव्यम् । **नादेयमिति** । नदीसम्बन्धीत्यर्थः । **न चेदमिति** । परिमाणादिहेतुभिः कारकान्तराप्रयोज्यमूलकारणसाधनमित्यर्थः । **नाचेतनवशमिति** । स्वातन्त्र्येण चेतनाधीनोत्पत्तिकत्वाभावसाधने तस्याङ्गीकृतत्वेन सिद्धसाधनापत्त्या स्वतन्त्राचेतनकारणकत्वाभावः साधनीयः । न च तद्युक्तम् । पयःकार्यवत्सविवर्धनदधि-(भाव)घननिर्मुक्ताम्बुकार्यजम्बीरनारिकेलादिनिष्ठोदकनादेयापसर्षण गवादिजग्धतृणकार्यक्षीरादौ व्यभिचारात् । तत्र वस्तुत्वे विद्यमानेऽपि स्वतन्त्राचेतनकारणकत्वस्यैव विद्यमानत्वेन तदभावाभावादित्यभिप्रेत्याह **तस्योक्तस्थानेष्विति** । केचित् **उक्तस्थानेषु** पयोऽम्ब्वादिष्वित्याहुः ।

ननु स्वार्थसम्भावनायां पयोऽम्ब्वादेरुपमानत्वसम्भवेऽपि व्यभिचारे उपमानत्वं नोपपद्यते । किं तु व्यभिचारस्थलमित्येव वक्तव्यमित्यतो व्यभिचारेऽपि तस्योपमानत्वं प्रतिपादयति **यथाऽत्रेति** । अतः तस्य व्यभिचारेऽपि उपमानत्वं युक्तमिति शेषः । पयोऽम्ब्वादि उभयत्रोपमानं कुतो नेत्यतः प्रतिज्ञाय तत्र मूलं हेतुत्वेन योजयति **तदत्र न युज्यते इत्यादिना** । रतिः इत्यत्र औणादिकतिप्रत्ययवत् 'एतत्प्रशास्तिवचनात्' इत्यत्रापि औणादिकतिप्रत्ययसम्भवेन साधुत्वमिति द्रष्टव्यम् । **उक्तानुमानविरुद्धत्वाच्चेति** । 'इदं नाचेतनवशम्' इत्यनुमानविरुद्धत्वादित्यर्थः ।

विष्टल०— मूलकारणत्वमुपपादयति **तस्यापीति** । ननु मूलत्वं नाम स्वातन्त्र्यं तदचेतने न युक्तमित्युक्तमित्यत आह **तस्य चेति** । **कारकान्तरेति** । कर्तादिकारकान्तरेत्यर्थः । **नादेयमिति** । नदीसम्बन्धिजलं स्वयमेव गच्छतीत्यर्थः । नन्वचेतनस्य प्रधानस्योपादानतया मूलकारणत्वमस्माकं सम्मतमेवेति सिद्धसाधनतेत्यत आह **न चेदमिति** । कारकान्तराप्रयोज्यत्वमित्यर्थः । **अस्मदीयेति** । वस्तुत्वादित्युक्तहेत्वित्यर्थः । व्यभिचारोद्भावने उपमोपयोगं दर्शयन् योजयति **यथात्र साध्यमिति** ।

चषकः— **घन**पदं मेघार्थकम् । **नादेयं** नदीसम्बन्धि । नद्यादिभ्यो ढगिति स्मृतेः । **जग्धं** भक्षितम् **अयस्कान्तं** मणिविशेषणम् ।

॥ इति 'पयोम्बुवच्चेत्तत्रापि' इतिसूत्रव्याख्यानम् ॥
॥ इति कारकान्तराप्रयोज्यत्वलक्षणमपि स्वातन्त्र्यं प्रधानस्य नोपपद्यते ॥

* * *

॥ अथ तत्र 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्' इतिसूत्रव्याख्यानम् ॥

॥ अथ अस्य सूत्रस्य पयोम्बुवदित्युदाहरणादरणप्रयोजकसम्भावनाव्यभिचारशङ्कानिरासकत्वम् ॥

७१ **सु०—** यदुक्तमत्र पयोम्ब्वादिवदिति, तदसत्, तत्रापीश्वरप्रेरणाया 'एतस्य वा अक्षरस्य' इत्यादिश्रुतिसिद्धत्वात् । अत एव प्रधानस्य परप्रयोज्यत्वे प्रमाणाभावोऽपि परास्त इति ।

सूत्रे पयोऽम्बुवदित्युक्तेऽपि नोदाहरणमादरणीयम् । स्थलान्तरे सम्भावना व्यभिचारश्च भविष्यत इत्याशङ्कापरिहारार्थस्य 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्' इति उत्तरसूत्रस्यापि व्याख्यानाय **आदि**पदप्रयोगः ।

यद्वा पयोऽम्बुग्रहणमुपलक्षणमित्यभिप्रेत्य **आदि**पदं प्रयुक्तम्; उत्तरसूत्रं तु कैमुत्यार्थम्, चेतनप्रवृत्तेरपि ईश्वरव्यतिरेकेण अनवस्थितेः अचेतनप्रवृत्तेस्तदधीनत्वं किमु वाच्यमिति । तद्व्याख्यानाय **चेतनाचेतनस्य च** इत्युक्तम् ।

परि०— पयोम्ब्वादीति मूलस्थादिपदं नोत्सूत्रमित्याह **सूत्र इति** । **स्थलान्तर इति** । प्रागुक्ततृणायस्कान्तादिरूपस्थलान्तर इत्यर्थः । व्यतिरेकेत्यादिसूत्राणां अर्थः तन्त्रदीपिकायां व्यक्तः । एवं चेत् तर्हि पयोम्ब्वादिवच्चेत्तत्रापीत्येवं सूत्रणीयं न पुनः योगान्तरं कार्यमित्याशयादाह **यद्वेति** । **उत्तरेति** । व्यतिरेकेतिसूत्रं त्वित्यर्थः ।

गु०दी०— **एतस्य वा अक्षरस्य** इति प्रतीकग्रहणेन 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते' इत्यादिश्रुतिं गृह्णाति ।

वं०प०— **अत एव** परप्रयोज्यत्वस्योक्तश्रुतिसिद्धत्वादेव । **सम्भावनेति** । अचेतनस्य स्वातन्त्र्येण प्रवृत्तिरूपस्वार्थसम्भावनेत्यर्थः ।

कं०रा०— 'पयोम्बुवच्चेत्तत्रापी'ति सूत्रे पयोम्बुनोरेव स्वतःप्रवृत्तावुदाहृतत्वात् पयोम्ब्वादि च नोपमेत्यत्रापिपदप्रयोगो व्यर्थ इत्यत आह **सूत्र इति** । **स्थलान्तर इति** । अयस्कान्तादावचेतनस्यापि स्वतःप्रवृत्तिरित्यस्य सम्भावनाप्रधानास्वातन्त्र्यसाधकाचेतनत्वस्य व्यभिचारश्च भविष्यत इत्याशङ्कापरिहारार्थ-स्येत्यर्थः । ननु सूत्रे पयोम्बुग्रहणस्योपलक्षणत्वेनायस्कान्ताद्युदाहरणान्तरमप्यत्रैव यदि निरस्तं स्यात् तर्हि उत्तरसूत्रं व्यर्थं स्यादित्यत आह **उत्तरसूत्रमिति** । यदा 'न ऋते त्वत्क्रियते किञ्चनार' इति श्रुत्या

चेतनप्रवृत्तेरपीश्वरव्यतिरेकेणानवस्थितेस्तदधीनत्वं तदा किमु वाच्यमचेतनप्रवृत्तेस्तदधीनत्वमिति कैमुत्यार्थं 'व्यतिरेकानवस्थितेश्चे'त्युत्तरमित्यर्थः ।

श्रीनिधि०— कैमुत्यार्थमिति । स्वतःप्रवृत्त्यादिमत्त्वेन उपलभ्यमानस्यापि प्रवृत्त्यादिकं यदा भगवदधीनं तदा किमु वाच्यम् । तद्राहित्येनोपलभ्यमानस्येति कैमुत्यं द्रष्टव्यम् ।

शे०वा०— पयोऽम्बुनोरनुपमत्वोक्त्यैव पयोऽम्बुवदिति सूत्रव्याख्यानसिद्धेः पयोऽम्बादीत्यादिपदानर्थक्यमित्याशङ्क्य तस्योत्तरसूत्रव्याख्यानार्थत्वान्न तदिति भावेनोत्तरसूत्रव्याख्यानपरतया तद्योजनां दर्शयितुं तत्सूत्रव्यावर्त्यशङ्काप्रदर्शनपूर्वकं तन्निरासकतया सूत्रमुपन्यस्य तद्व्याख्यानार्थतयाऽऽदिपदं योजयति **सूत्र इति** । **स्थलान्तर इति** । गवा जग्धतृणादावित्यर्थः । एवमादिपदस्योत्तरसूत्रव्याख्यानतया योजनायां पयोऽम्बादि च नोपमा एतत्प्रशास्तिवचनादचेतनस्येतावतैव मूलग्रन्थेन सर्वत्राचेतने व्यभिचारनिराससिद्ध्या चेतनस्य तदधीनतावर्णनस्यानपेक्षितत्वाच्चेतनग्रहणस्यानर्थक्यं भवतीत्यादिपदस्योत्तरसूत्रव्याख्यानतायामपरितोषात् पूर्वसूत्रार्थतामेव तस्याप्युपपादयति **यद्वेति** । तर्ह्युत्तरसूत्रवैयर्थ्यमित्यतस्तत्प्रयोजनमाह **उत्तरेति** । कैमुत्यमेव दर्शयति **चेतनेति** । एवं सूत्रस्यार्थवत्तामुपदर्श्य तद्व्याख्यानरूपतयोदाहृतभाष्यखण्डसार्थक्यमाह **तद्व्याख्यानायेति** ।

वा०र०— तस्योत्तरेति । बुद्ध्या विवेकेनादिपदस्येत्यर्थः । **तत्सूत्रेति** । उत्तरसूत्रेत्यर्थः । **गवा जग्धेति** । आदिना पयसो ग्रहः । **चेतनग्रहणस्येति** । चेतनाचेतनस्य च इत्यत्र चेतनेत्यर्थः । भवतीत्यादीत्यत्र इतिशब्दस्यैवंरूपेत्यर्थः । तस्य चापरितोषात् इत्यनेन सम्बन्धः । **तस्यापीति** । सूत्रे आपदसङ्गाह्याभावेनाप्रतिभासमानतद्व्याख्यानताप्रकारस्यापि आदिपदस्येत्यर्थः । **तर्हीति** । स्थलान्तरेऽसम्भावनादिनिरासाय उत्तरं सूत्रम् । यदि च तन्निरासः आदिपदेन एतत्सूत्रे एव सिद्धः तर्हि तद्वैय्यर्थ्यमेवेत्यर्थः । **तद्व्याख्यानरूपतयेति** । उक्तरूपकैमुत्यार्थकसूत्रव्याख्यानरूपतयेत्यर्थः ।

स०व्र०— अत एवेति । 'एतस्य वाऽक्षरस्य' इत्यादिश्रुत्या प्रधानस्यापि प्रयोजकस्य परस्य ईश्वरस्य बोधितत्वादेवेत्यर्थः । अस्मिन्पक्षे चेतनग्रहणस्य वैयर्थ्यं हृदि निधाय पक्षान्तरमाह **पयोऽम्बुग्रहणमिति** ।

विट्ठल०— ननु प्रधानस्योक्तरूपस्वातन्त्र्याभावः कुतः नियामकानुक्तेः प्रत्युत परप्रयोज्यत्वे प्रमाणाभावात् तस्य स्वातन्त्र्यं सिद्ध्यतीत्यत आह **स्थलान्तर इति** । कूलपतनादिस्थलान्तरे अचेतनस्य कारकान्तराप्रयोज्यत्वं सम्भावनावस्तुत्वानुमानस्य व्यभिचारश्चेत्यर्थः । **उत्तरसूत्रस्यापीति** । 'न ऋते त्वत्क्रियते किञ्चने'तीश्वरव्यतिरेकेण कस्यापि कर्मणोऽनवस्थितेः कुत्रापि क्रियामात्रस्याप्यसम्भवादनपेक्षितमेवाचेतनवादिमतमिति व्याख्यानसूचनायेत्यर्थः । आदिपदप्रयोगे सर्वसङ्ग्रहलाभेन व्यतिरेकानवस्थितिप्राप्तेरिति भावः ।

यद्वेत्युक्तव्याख्याने उत्तरसूत्रमव्याख्यातमेव भविष्यतीत्यतः पदान्तरेण तद्व्याख्यानं सूचितमित्याह **तद्व्याख्यानायेति** ।

॥ इति अस्य सूत्रस्य पयोम्बुवदित्युदाहरणादरणप्रयोजकसम्भावनाव्यभिचारशङ्कानिरासकत्वम् ॥
॥ इति 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्' इतिसूत्रव्याख्यानम् ॥
॥ इति द्वितीयतृतीय-'पयोम्बुवच्चेत्तत्रापि', 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात्'-इत्युत्तरसूत्रद्वयव्याख्यानम् ॥

* * *

॥ अथ साङ्ख्योक्तार्थे तैः प्रमाणत्वेनोदाहृतानुमानानाम् असाधारणदोषैर्निराकरणम् ॥

७२ **सु०**— किञ्च परिमाणादिति हेतुस्तावदनैकान्तिकः । सत्त्वरजस्तमसां साम्यावस्था हि प्रकृतिरुच्यते । सत्त्वादयश्च परिमिता एव । यथोक्तम् । 'अबग्नीरनभोऽहङ्कृन्महत्तत्त्वगुणत्रयैः । क्रमाद्दशोत्तरैः' (आदि.पु. वें.माहा. २-४६) इति । न च प्रकृतिरव्यक्तान्तरवतीति कथं नानैकान्त्यम् । न च परिमितस्यापि मूलप्रकृतित्वे बाधकमस्ति । सार्वत्रिककार्यानुत्पत्तिरिति चेन्न; सर्वत्र कार्यसद्भावे प्रमाणाभावात्, भावेऽप्यनेकैस्तदुत्पत्त्युपपत्तेः । युक्तं च परिमितानामेव कारणत्वम्, तन्त्वादिषु दर्शनात्, अपरिमितस्य कृत्स्नैकदेशविकल्पानुपपत्तेश्च । अस्माकं त्वीश्वरशक्त्यैवोपपद्यते ।

समन्वयादित्यप्यसत्, यत्कार्यं 'यदनुगतिमत्तत्तादृक्कारणोपेतमि'त्यस्या व्याप्तेरव्यक्ताद्व्यक्तजन्माङ्गीकारेणैव भग्नत्वात् । शक्तितः प्रवृत्तेश्चेत्येतदपि न विवक्षितार्थसाधकम्; 'अन्तर्भावितकार्यत्वमेव कारणस्य शक्तिरि'त्यस्य सिद्धौ हि तथा स्यात्, तच्च सत्कार्यवादनिर्वाह्यमिति । अत एव विभागाविभागावपि निरस्तौ, विभागाविभागयोरेव सत्कार्यवादसिद्ध्यधीनयोरसत्त्वात् । स्वप्रक्रियामात्रेणार्थसिद्धौ 'स्थूलकार्यस्य लोष्टादेरि'त्यादिना तार्किकपरिकल्पिताभ्यां विभागाविभागाभ्यां परमाणुकारणत्वमपि स्यादित्यास्तां प्रपञ्चः ।

परि०— मूलगतं चशब्दमनुक्तसमुच्चयार्थं च मत्वा साङ्ख्यमतानुवादोदाहृतश्लोकस्थान् भेदानां परिमाणात् समन्वयादित्यादीन् हेतून् प्रकृतिकारणत्वसाधकानपि विशिष्य निराह **किञ्चेत्यादिना आस्तां प्रपञ्च इत्यन्तेन** । **अनैकान्तिक इति** । सत्त्वरजस्तमोगुणेष्विति शेषः ।

कथमनैकान्तिकत्वमित्यतः साम्यावस्थापन्नसत्त्वरजस्तमोरूपप्रकृतौ परिमितत्वहेतौ सत्यपि त्वदभिमताव्यक्तकारणकत्वरूपसाध्याभावादिति भावेन तत्र साध्याभावहेतुसत्त्वे व्यनक्ति **सत्त्वेत्यादिना** । प्रकृतिरुच्यत इत्यनेन साध्याभाव उक्तः । तदुपपादनं च प्रकृतिरिति वाक्येऽग्रे व्यक्तम् । **यथोक्तमिति** । तात्पर्यनिर्णये एकविंशेऽध्याये । अप्रयोजकश्च हेतुरिति भावेनाह **न च परिमितस्यापीति** । **अनेकैरिति** । परिमितैरिति योज्यम् । **कृत्स्नैकदेशेति** । कात्स्न्र्येन परिणामे एककार्योत्पत्तौ कार्यान्तरमकारणकमापद्येत । अपरिमितपरिणामरूपकार्यस्याप्यपरिमितत्वं चापद्येत । एकदेशेन परिणामे तु निरंशत्वहानिरिति भावः । कथं तर्हि भवन्मतेऽप्यपरिमितायाः प्रकृतेः परिणाम इत्यत आह **अस्माकं त्विति** । **अन्तर्भावितेति** । अव्यक्तकार्यात्मत्वमित्यर्थः । **सत्कार्यवादेति** । स च तदनन्यत्वाधिकरण एव दूषित इति भावः । किञ्चेत्यादिनोपक्रान्तदूषणसमाप्तौ इतिशब्दः । अत एवेत्युक्तहेतुमाह **असत्त्वादिति** । तत्र हेतुतयोक्तं **सत्कार्येत्यादि** । **स्थूलकार्यस्येत्यादि** । द्रव्यकिरणावल्यां ह्युदयनेन परमाणुसिद्धौ विभागाविभागरूपौ हेतू उक्तौ । तथा हि । 'स्थूलकार्यस्य लोष्टादेः अवयवक्रियाविभागन्यायेन विभज्यमानाल्पतरतमादिभावात् यतो नाल्पीयस्तं परमाणुमाचक्ष्महे' इति ग्रन्थेन विभागरूपो हेतुरुक्तः 'एष ह्यवयवावयविप्रसङ्गो न तावन्निरवधिरेव । अनन्तावयवारब्धत्वाविशेषे मेरुसर्षपादीनां परिमाणभेदानुपपत्तेः । न चान्यस्तदवधिः सम्भवति । तस्मान्निरवयवावधिरवयवावयविप्रसङ्ग' इति ग्रन्थेन कार्यद्रव्यस्यावयवाविभागरूपो हेतुरुक्तः ताभ्यामित्यर्थः ।

यादु०— एवं परोक्तानुमानेषु साधारणान् मूलोक्तान् दोषानुपपाद्य मूलमुपलक्षणमित्यभिप्रेत्य असाधारणानपि दोषान् दर्शयति **किञ्चेत्यादिना** । सत्त्वादिषु साध्याभावमुपपादयितुं तेषां तावत्प्रकृतित्वं दर्शयति **सत्त्वरजस्तमसामिति** । एवं हेतुमागमेनोपपाद्य प्रकृतित्वेनैव हेतुना साध्याभावस्तत्र साधनीय इत्याशयेनाह **न च प्रकृतिरिति** । ननूदाहृतप्रमाणोक्तं गुणत्रयं परिमितत्वादेव न प्रकृतिः किन्त्वव्यक्तान्तरवदेव अतो न व्यभिचार इत्यत आह **न च परिमितस्येति** । अनेकैरित्यनन्तरं परिमितैरिति शेषः । **कृत्स्नैकदेशेति** । अपरिमितं प्रधानमादिकार्यजनने किं कात्स्न्र्येन प्रवर्तते उतैकदेशेन । आद्ये आदिकार्यस्याप्यपरिमितत्वापत्तिः । द्वितीयेऽपरिमितद्रव्यस्य निरवयवत्वनियमेनैकदेशासम्भव इति कृत्स्नैकदेशविकल्पयोर्दूषणाभ्यामनुपपत्तिरित्यर्थः । तथा चोदाहृतप्रमाणोक्तं गुणत्रयं परिमितमपि मूलप्रकृतिरित्येवाङ्गीकार्यम् । ततश्च तत्रानैकान्त्योद्भावनं युक्तमिति भावः । यद्यप्युदाहृतप्रमाणोक्तं गुणत्रयं स्वमते न मूलप्रकृतिः, किन्त्वादिकार्यमत एव तत्परिमितम् । मूलप्रकृतिरपरिमितैव । तथा च नोक्तानैकान्त्यं सम्भवति । तथाऽपि परमते महत एवादिकार्यत्वात् तदनन्तरमुक्तं गुणत्रयं परिमितमत उक्तरीत्या मूलप्रकृतिरित्येव वक्तव्यम् । अन्यथोक्तदोषापत्तेरिति । परं प्रति प्रौढिवादे-

नैवेदमनैकान्त्योद्भावनमिति मन्तव्यम् । ननु भवन्मतेऽपि मूलप्रकृतेरपरिमितत्वं नोपपद्यते । कृत्स्नैकदेश-विकल्पानुपपत्तेरित्यत आह **अस्माकं त्विति** । अपरिमितद्रव्यस्य विभिन्नावयवाभावेन निरंशत्वेऽप्यभिन्नावयव-सत्त्वेनैकदेशेन प्रवृत्तिरुपपद्यते । तस्यैकदेशस्यांश्यभिन्नत्वेन पुनः कात्स्न्र्यपक्षोक्तदोषापत्तिश्च अघटितघटकेश्वर-शक्त्यैव परिहार्येति भावः । **अन्तर्भावितेति** । अव्यक्तकार्यवत्त्वमेवेत्यर्थः । **तच्च सत्कार्येति** । सत्कार्यवादश्च प्रागेव दूषित इत्याशयः । **विभागाविभागयोरिति** । व्यक्तयव्यक्तिरूपयोरित्यर्थः । **स्थूलकार्यस्य लोष्टादे-रित्यादिनेति** । 'स्थूलकार्यस्य लोष्टादेरवयवक्रियाविभागादिन्यायेन विभज्यमानस्याल्पतरतमादिभावाद्यतो नाल्पीयस्तं परमाणुमाचक्ष्महे । एष ह्यवयवावयविप्रसङ्गो न तावन्निरवधिरेव । अनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपादीनां परिणामभेदानुपपत्तेः । न चान्यस्तदवधिः सम्भवति । तस्मान्निरवयवावधिरवयवावयविप्रसङ्ग इति विज्ञायत' इति किरणावलीग्रन्थेन प्रतिपादिताभ्यामित्यर्थः । अत्र हि स्थूलेत्यादिना आचक्ष्महे इत्यन्तेन विभागेन मूलकारणपरमाणुसिद्धिरुक्ता । एष ह्यवयवावयविप्रसङ्ग इत्यादिना चाविभागेन । अत्राविभागो नामावयवावय-विनोः सम्बन्धः । कार्यद्रव्यस्य सावयवत्वमिति नियमात् । तदेवावयवावयविप्रसङ्गशब्देनात्राभिप्रेतम् । यथाऽऽहुरेतद्ग्रन्थसम्प्रदायाभिज्ञाः । 'यत्कार्यद्रव्यं तत्सावयवं यच्च सावयवं तत्कार्यद्रव्यम् । तथा च यतो-ऽवयवात् कार्यत्वं निवर्तते तत्र सावयवत्वमपीति निरवयवपरमाणुसिद्धिरिति' ।

वं०रा०— हृदादयोऽव्यक्तकारणका अव्यापकत्वादित्यनुमाने सत्त्वादिषु प्रकृतिसंज्ञिकेष्वनैकान्त्यं वक्तुं हेतुमुपपादयति **सत्त्वरज इत्यादिना** । ननु सत्त्वादेः परिमितत्वान्न मूलप्रकृतित्वं, ततश्च साध्यस्य सत्त्वान्न व्यभिचार इत्यत आह **न चेति** । बाधकमाशङ्कते **सार्वत्रिकेति** । सर्वकार्याणां मूलोपादानं प्रकृतिर्यदि परिमिता तर्हीति शेषः । ननु भवन्मतेऽप्यपरिमितायाः प्रकृतेः कारणत्वं कृत्स्नैकदेशविकल्पेनानुपपन्नमेवेत्यत आह **अस्माकं त्विति** । **उपपद्यते** अपरिमितद्रव्यभूताया अपि प्रकृतेः सावयवत्वमङ्गीकृत्य एकदेशेन परिणाम इत्यर्थः । **तथा** सकलकार्यगर्भितं प्रधानाख्यमव्यक्तसंज्ञकं मूलकारणं स्वतन्त्रं स्यादित्यर्थः । **तच्चेति** अन्त-र्भावितकार्यत्वमेव कारणस्य शक्तिरित्येतत्प्रमेयम् । ततश्च सिद्धेऽत्यन्तसत्कार्यवादे उक्तप्रमेयसिद्धिः तसिद्धौ च तत्सिद्धिरिति परस्पराश्रय इति हृदयम् । एवमुत्तरत्रापि ।

कं०रा०— यदुक्तं भेदानां परिणामादिति महदादीनां परिमितत्वेनाव्यक्तकारणवत्वं साध्यत इति तद्दूषयति **किञ्चेति** । सत्त्वरजस्तमसां साम्यावस्थारूपप्रकृतौ परिमितत्वरूपहेतुसद्भावं सप्रमाणकमुपपाद्य साध्याभावं दर्शयति **न चेति** । अपरिमितस्य कृत्स्नैकदेशविकल्पानुपपत्त्या कारणभावाच्च तन्तुपटयोरभेद इति तदप्ययुक्तमत्यन्ताभेदे उपादानोपादेयसम्भवात् परिमितानामेव कारणत्वं युक्तं चेत् कथं युष्माकमीश्वरस्य कारणत्वं तत्रापि कृत्स्नैकदेशविकल्पानुपपत्तेः सत्त्वादित्यत आह **अस्माकं त्विति** । **अन्तर्भावितेति** । स्वाभिन्नकार्यत्वमेव कारणस्य शक्तिरित्यस्य सिद्धौ हि शक्तितः प्रवृत्तेश्चैतद्विवक्षितार्थसाधकं स्यात् स्वाभिन्नकार्यत्वं च सत्कार्यवादनिर्वाह्यमिति तदसिद्धान्तर्भावितकार्यत्वमेव कारणस्य शक्तिरित्येतदप्यसिद्धमिति

भावः । **यथोक्तमिति** । 'बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इत्याद्युक्त-मुक्तिर्यथाह तथोक्तमस्माभिरिति भावः ।

श्रीनिधि०— अनेकैस्तदुत्पत्त्युपपत्तेरिति । एकस्यैव सर्वदेशसम्बन्धो मास्त्वित्यतः व्रीह्यादि-राशिवत् अनेकद्रव्यात्मकस्यैव प्रकृतित्वम् । अंशतः व्याप्तिरस्त्वित्यभिसन्धिः । **कृत्स्नैकदेशेति** । एकस्मिन् कार्ये कात्स्न्र्येन कारणं वा एकदेशेन वा । नाद्यः कार्यान्तरस्याकस्मिकत्वप्रसङ्गात् । न द्वितीयः । अखण्ड-त्वाङ्गीकारात् इत्यनुपपत्तिः । न हि भवतां कथमिति चेदेकदेशेनेति ब्रूमः । भिन्नांशाभावेऽपि अभिन्नानां सत्त्वात् । ईश्वरशक्त्या चेकदेशेन कार्यारम्भसम्भवात् । तदेतदाह **अस्माकं त्विति** । अनेनैव ज्ञापकेन केचित्प्रकृतेराकाशवदेकद्रव्यत्वमास्थिताः । वयं त्विदमन्यथासिद्धमिति ब्रूमः । गगने पञ्चाशद्वर्णेषु च कृत्स्नैकादेशग्किल्प एवं समाधानात् । तथा हि घटस्याकाशं कात्स्न्र्येनाधिकरणं वा एकदेशेन वा । आद्ये पटाद्यधिकरणं न स्यात् । द्वितीये तु आकाशस्य एकत्वादिति । कात्स्न्र्येन वर्णसन्निकर्षः वर्णबुद्धिहेतुः उक्तः एकदेशेन । नाद्यः । श्रोत्रस्य व्याप्तत्वेन व्याप्तौ कात्स्न्र्येन सन्निकर्षायोगात् । द्वितीये तु एकत्वादिति । समाधानं तु ईशशक्त्येति । तस्मात् सावकाशमिदं वाक्यम् । अन्तः प्रकृतेः समुदायद्रव्यत्वमेव । **तार्किक-परिकल्पिताभ्यां विभागाविभागाभ्यामिति** । व्यक्त्यव्यक्तीविभागाविभागाविति साङ्ख्यमतम् । न्यायमते तु संयोगविभागौ गुणाविति द्रष्टव्यम् । पीलुपाकप्रक्रियायां अवयविद्रव्यस्य परमाणुपर्यन्तं विभागे सति पुन-स्तत्क्रमेण संयोगेन कार्यजननाङ्गीकारादिति द्रष्टव्यम् ।

शे०वा०— एवं मूलोक्तसाधारणदोषैरनुमानानि प्रदूष्य, स्पष्टतया शिष्यैरेवोह्यतामिति भावेन भाष्ये-ऽनभिहितासाधारणदोषैरपि तानि निराकुर्वाण आद्यं तावत्प्रत्याख्याति **किञ्चेति** । कुत्रानैकान्तिकमित्यतः सत्त्वरजस्तमस्वेवेत्यभिप्रेत्य तेषु साध्याभावोपपादकं हेतुमुपोद्घातलक्षणसङ्गत्या पूर्वमाह **सत्त्वरजस्तमसां साम्यावस्थेति** । गुणप्रधानभावपरित्यागेन त्रयाणामपि प्रधानभावेनावस्थितिरित्यर्थः । **प्रकृतिरिति** । मूल-प्रकृतिरित्यर्थः । कथं सत्त्वादिषु व्यभिचार इत्यत उक्तहेतुसत्त्वेऽप्युक्तसाध्याभावादित्यभिप्रेत्य तत्र हेतुवृत्ति-मुपपादयति **सत्त्वादयश्चेति** । किमत्र प्रमाणमित्यत आह **यथोक्तमिति** । तथाऽप्यव्यक्तान्तरवत्त्वरूपसाध्य-स्यापि सत्त्वान्न व्यभिचार इत्यतस्तेषां मूलप्रकृतित्वान्नाव्यक्तान्तरवत्त्वं सम्भवतीत्यभिप्रेत्याह **न चेति** । **प्रकृतिः** मूलप्रकृतिरित्यर्थः । अव्यक्तान्तरवत्त्वे मूलप्रकृतित्वमेव न स्यादिति भावः । न च मूलप्रकृतित्वमेव सत्त्वादीनामसिद्धमिति वाच्यम् । गुणप्रधानभावपरित्यागेन प्रधानभावेनैवावस्थितानां सत्त्वादीनामेव मूल-प्रकृतित्वेन तदसिद्धेरशक्यशङ्कत्वात् । एतदेवाभिसन्धायोपोद्घातलक्षणया सङ्गत्या मूलप्रकृतित्वं साम्यावस्थाया उपदर्शितमिति ध्येयम् ।

परोक्तानुमानेऽप्रयोजकत्वं चाह **न च परिमितस्यापीति** । विपक्षे बाधकसद्भावान्नाप्रयोजकत्वमिति भावेन तदाशङ्कते **सार्वत्रिकेति** । अनेकैरित्यतःपरं परिमितैरपीति शेषः । **अपरिमितस्य कृत्स्नैकदेशविकल्पानुपपत्तेश्चेति** । अपरिमितं प्रधानं जगत्कारणमिति वदन् प्रष्टव्यः । तत्किं कार्त्स्न्येन महदाद्यात्मना परिणमते किं वैकदेशेनेति । नाद्यः । तथा सति कृत्स्नस्यापि प्रधानस्य कार्याकारताप्रसक्त्या, स्थितौ प्रधानाभावेन, प्रकृतिपुरुषविवेकार्थोपदेशानर्थक्यापातात् । नान्त्यः । तथा सत्येकदेशाङ्गीकारेण अन्त्यावयवत्वप्राप्याऽनित्यत्वप्रसङ्गादित्यपरिमितस्य प्रधानस्य कृत्स्नैकदेशविकल्पाभ्यां कारणतानुपपत्तेरित्यर्थः । यद्वा कृत्स्नस्य प्रधानस्य महादाद्यात्मना भवने महदादेरप्यपरिमितमूलकारणकत्वादपरिमितत्वं स्यात् । यद्यावत्परिमाणोपेतमूलकारणकं तत्तावत्परिमाणकं यथा पलपरिमाणसुवर्णकारणकं कटकं पलपरिमाणकं दृष्टम् । न च महदादेरपरिमितत्वं परेणाङ्गीकर्तुं शक्यम् । तथा सति भेदानां महदादीनां परिमाणात्परिमितत्वादित्युक्तहेतोरसिद्धिप्रसङ्गात् । नाप्येकदेशेन परिणामः । अपरिमितस्य द्रव्यस्य निरवयवत्वनियमेनैकदेशायोगादित्यर्थः । यद्वा शक्तितः प्रवृत्तेश्चेत्यस्य कारणं हि शक्तं कार्याकारेण व्यक्तीभवति । तत्र कारणस्य शक्तिर्नामान्तर्भावितकार्यकत्वमेवेति व्याख्यातत्वेनैकदेशेन कारणत्वेऽन्तर्भावितकार्यैकैकदेशत्वस्यैव प्राप्त्याऽन्तर्भावितकार्यकत्वाभावेन तत्राप्यसिद्धिप्रसङ्ग इति । तथा च परिमितत्वेऽपि सत्त्वादेर्मूलप्रकृतित्वेनाव्यक्तान्तरत्वाभावादनैकान्त्यमेवेति हृदयम् । यद्यप्युदाहृतप्रमाणोक्तं गुणत्रयं परिमितमपि न मूलप्रकृतिः किन्त्वादिकार्यमेवेति अव्यक्तान्तरवत्त्वरूपसाध्यसत्त्वादेव न स्वमते तत्र व्यभिचारः । तदन्यमूलप्रकृतिश्चाव्यक्तान्तरवत्त्वाभावेऽपि न स्वमते तस्याः परिमितत्वमिति हेतुविरहादेव न तत्रापि व्यभिचारः । तथाऽपि महदादिकारणगुणत्रयातिरिक्तप्रकृत्यनङ्गीकारिणः परस्य मते गुणत्रयस्यैव मूलप्रकृतित्वेन तत्र चाव्यक्तान्तरवत्त्वाभावस्य परेणाभ्युपगतत्वात् तद्रीत्यैवैतद्व्यभिचारोद्भावनमित्यवधेयम् । नन्वपरिमितस्य कृत्स्नैकदेशविकल्पानुपपत्त्या न कारणत्वानुपपत्तिर्वक्तुं शक्या । तथा सति सिद्धान्तेऽप्यपरिमिततया प्रकृतेः कृत्स्नैकदेशविकल्पानुपपत्त्याऽकारणत्वप्रसङ्गादित्यतः सिद्धान्ते निरवयवस्यापि प्रधानस्य परमेश्वराचिन्त्यशक्तिवशेन कार्यानुगुण्येनैव परिणामसम्भवान्न कृत्स्नप्रसक्तिरित्याशयेनाह **अस्माकं त्विति** ।

तच्चेति । अव्यक्तकार्यवत्त्वमेवेत्यर्थः । **सत्कार्यवादेति** । अत्यन्तसत्कार्यवादश्चासिद्ध एव अन्यथाऽन्योन्याश्रयः स्यादिति भावः । अत एवेत्युक्तमेव विशदयति **विभागाविभागयोरिति** । व्यक्त्यव्यक्तिरूपयोरित्यर्थः । **सत्कार्यवादसिद्ध्यधीनयोरिति** । तथा चान्योन्याश्रय एवेति भावः । **स्थूलकार्यस्येति** । अत्रेत्यादिनेत्यादिपदेनावयवक्रियाविभागादिन्यायेन विभज्यमानस्याल्पाल्पतरतमादिभावाद्यतो नाल्पीयस्तं परमाणुमाचक्ष्महे इत्यादितदुत्तरवाक्यपरिग्रहः । तथा च स्थूलकार्यस्य लोष्ठस्य विभज्यमानावयवस्यावयवविभागे क्रियमाणे य एतद्विभागावधिर्यदविभागप्रक्रमेण यत्संयोगप्रक्रमेण कार्योत्पत्तिर्भवति स परमाणुर्मूलकारणमिति तार्किकपरिकल्पिताभ्यां विभागाविभागाभ्यां परमाणोरपि विश्वकारणत्वं सिद्ध्येदित्यर्थः ।

वा०र०— किञ्च परिमाणात् इत्यादिग्रन्थस्य भाष्यव्याख्यानरूपत्वाभावात् असङ्गतिः इत्याशङ्का-परिहाराय भेदानां परिमाणादिपरोक्तहेतूनां विशिष्य निरासस्यापि उपलक्षणया भाष्याभिप्रेततया तत्प्रकार-प्रदर्शनार्थत्वात् नासङ्गतिरित्याशयेनोत्तरग्रन्थं तथा योजयति । **एवं मूलेति** । इति भावेन भाष्येऽनाभिहितो योऽसाधारणदोषोऽसौ इति योज्यम् । भेदानां परिमाणात् इत्यन्तम् । **साध्याभावेति** । साध्याभावमुपपादयितुं इति पूरणीयम् । **पूर्वम्** इत्यस्य तावत् इत्यर्थः । उत्तरत्र साध्याभावस्यापि वचनात् तावदित्युक्तम् । अहङ्कारादि प्रकृतिरूपाणामपि महदादीनां अव्यक्तान्तरवत्वात् आह **मूलप्रकृतिरित्यर्थ इति** । **सत्त्वादीनामेवेति** । तथाविधानामेव प्रलयकालीनानां प्रधाने संज्ञेति पूर्वमतोपन्यासावसरे उक्तत्वात् इति भावः । श्रुतेस्तु शब्दमूलत्वादिति अधिकरणस्थितौ ब्रह्माभावे तद्दर्शनोपदेशानर्थक्यात् इत्यादीत्येतन्मूलानुसारेणाह **तथा सति कृत्स्नस्यापीति** । **विकल्पाभ्यामिति** । विकल्पपूर्वकानुपपत्तिभ्यामित्यर्थः । अनेन विकल्पाभ्यां अनुपपत्तिः विकल्पानुपपत्तिरिति तृतीयासमासोऽयं इत्युक्तं भवति । **यद्वेति** । एते च पक्षा.....अनुसारेण ज्ञेयाः । **परमेश्वराचिन्त्येति** । 'यद्धि युक्त्या विरुध्येत तदीशकृतमेव ही'ति कृत्स्नप्रसक्तिसूत्रीयभाष्योक्तरीत्या इति शेषः । सदसत्कार्यवादिनामस्माकं मतेऽपि सत्कार्यवादसद्भावात् तदधीनस्याव्यक्तकार्यवत्वस्य सम्भव एवेत्यतः सत्कार्यवादपदं अत्यन्तसत्कार्यवादपरतया व्याकुर्वन् अस्तु तर्हि सत्कार्यवादोऽपि इत्याशङ्कां च परिहरति **अत्यन्तसत्कार्येति । उत्तरवाक्यपरिग्रह इति । परमाणुरूपानित्येति** । पृथिवीप्रकरणे किरणावल्यां परमाणु-सद्भावे प्रमाणकथनपरम् । तथा हि । स्थूलकार्यस्येत्याद्युक्तम् । तत्रत्योत्तरवाक्यपरिग्रहः इत्यर्थः । आदिपदेन एष एव हि अवयवावयविप्रसङ्गेऽपि न तावत् निरवधिरेवेत्यादेः निरवयवावधिरेवावयविप्रसङ्ग इति विज्ञायते इत्यन्तस्य परिग्रहः । **पदविभागक्रमेण** इत्यनुवादः । **तत्संयोगप्रक्रमेण** इति व्याख्यानम् ।

स०व्र०— **अपरिमितस्येति** । प्रधानस्येति शेषः । कात्स्न्र्येन कारणत्वे एकस्य कार्यस्योत्पत्तौ प्रधानस्याभावापत्तिः । एकदेशेन तत्त्वेऽप्यभिन्नस्यैकदेशानुपपत्तिरित्यर्थः । ननु भवतां पक्षेऽप्युपादानत्व-स्याङ्गीकृतत्वेनायं विकल्पः स्यादेवेत्यत आह **अस्माकं त्विति** । अभिन्नस्य प्रधानस्य अभिन्नेनांशेन ईश्वर-शक्त्या कारणत्वमुपपत्स्यत इति भावः । **अव्यक्तादिति** । यत्कार्यं यादृशधर्मोपेतं तत् तादृशधर्मोपेत-कारणकमिति वक्तुं न शक्यते । कार्ये व्यक्तत्वलक्षणधर्मोपेतत्वस्य विद्यमानत्वेऽपि तादृग्धर्मोपेतकारणकत्व-स्याभावेन व्यभिचार इति भावः । **अन्तर्भावितकार्यत्वमेवेति** । कार्यगताव्यक्तत्वमेवेत्यर्थः । **तच्चेति** । न च सत्कार्यवादे कार्यगताव्यक्तत्वातिरिक्तकारणशक्तौ प्रमाणमस्तीति हि वक्तव्यम् । न च तद्युज्यते । सत्कार्य-वादस्य दूषितत्वादीत्यर्थः । ननु अस्मदीयप्रक्रियया तादृशविभागाविभागयोः सिद्धत्वेन युक्तं ताभ्यां मूलकारणसाधनमित्यत आह **स्वप्रक्रियामात्रेणेति** । स्वपरिकल्पितविभागाविभागविरुद्धौ यौ विभागाविभागौ, ताभ्यां परिकल्पितं परमाणुकारणत्वमप्यङ्गीकर्तव्यम् । अयं भावः । अविभागो नाम संयोगः । सृष्टिकाले ईश्वरक्रियया यत् द्वयोः परमाण्वोः संयोगः, तेन द्व्यणुकमुत्पद्यते । चतुर्णां (तत्त्रयाणां) संयोगे त्र्यणुकमित्यादिक्रमेण स्थूलकार्यमुत्पद्यते । एवं प्रलयकार्ये कार्यकारणविभागमारभ्य परमाणुपर्यन्तं विभागे कार्यस्य नाश इति परमाणोरेव कारणत्वमिति परेणोच्यते । तदप्यङ्गीकर्तव्यमिति ।

विट्ठल०— एवं परोक्तानुमानेषु साधारणान्मूलोक्तां न दोषानुपपाद्य मूलमुपलक्षणं मत्वा असाधारण-दोषानाह **किञ्चेत्यादिना** । परिमाणादिहेतुभिर्महदादीनां मूलकारणान्तरसद्भावः परेण साधितः । तत्र मूल-कारणान्तरबृंहितेष्वपि सत्त्वादिषु परिमितत्वादिहेतोस्सत्त्वेनानैकान्त्यमित्याशयेन सत्त्वादिषु साध्यमुपपादयितुं तेषां भावप्रकृतित्वं दर्शयति **सत्त्वरजस्तमसामिति** । तत्र हेतुसद्भावं दर्शयति **अबग्नीरिति** । पुराणस्थमेव वचनं निर्णये उदाहृतमिति प्रकृते तदुदाहरणं युक्तमिति ध्येयम् । सत्त्वादीनां परिमितत्वादेव साध्यं च साधयामि अतो नानैकान्त्यमित्यत आह **न च प्रकृतिरिति** । अपसिद्धान्तापत्तेरिति भावः । महदव्यक्तान्तरवत् परिमितत्वादित्यस्य व्यभिचारमुक्त्वा प्रयोजकत्वं चाह **न च परिमितस्येति** । मूलप्रकृतित्वे व्यक्तान्त-शून्यत्वलक्षणमूलप्रकृतित्व इत्यर्थः । **भावेऽप्यनेकैरिति** । सर्वत्र कार्यसद्भावेऽपि तस्य कार्यजातस्यानेकैः परिच्छिन्नैरेव कारणैः सार्वत्रिककार्योपपत्तेः परिमितस्यापि मूलप्रकृतित्वेन बाधकमित्यर्थः । अनुपपन्नं चापरि-मितस्य कार्यजनकत्वम् । कात्स्न्र्येन जनकत्वे कार्यस्य महदादेरप्यपरिच्छिन्नत्वप्रसङ्गात् परिमितस्य त्वन्मयैते निरवयवत्वेनैकदेशेन जनकत्वाद्यभावादित्याशयेनाह **अपरिमितस्येति** । न चास्मन्मतेऽपि मूलप्रकृतेरपरिमित-त्वादुक्तविकल्पानुपपत्तिरित्यत आह **अस्माकं त्विति** । अपरिच्छिन्नस्याप्येकदेशः सम्भवति । ईशशक्त्या भिन्नावयवोपपत्तेरिति भावः । अतः केचिदभिन्नावयवसद्भाव ईशशक्त्येत्याहुः । विचारितमेतन्मया तत्त्वरत्न-प्रकाशे । एवं भेदानां परिमाणात् समन्वयाच्छक्तितश्चेत्यत्र महदादीनां परिमितत्वं परोदीरितं हेतुं दूषयित्वा समन्वयादित्यत्र सर्वकार्याणां सुखदुःखसमन्वितत्वात् सुखाद्यात्मकसत्त्वरजस्तमसां साम्यावस्था व्यक्तमिति कारणधर्मसमन्वयः कार्ये नियत इत्येतद्दूषयति **समन्वयादित्यप्यसदिति** । शक्तितः प्रवृत्तेश्चेत्येतदपीति कारणशक्त्योरेव कार्यं प्रवर्तते । अतः शक्तिमन्मूलकारणमव्यक्तमित्यर्थः । **अन्तर्भावितेति** । कारणतया-ऽभ्युपगतस्य कारणशक्तिर्नाम अव्यक्तकार्यात्मकत्वं तच्च सदैव कार्यं कारकव्यापारेण व्यज्यत इति पक्षे स्यात् । सत्कार्यवादश्च प्रागेव निरस्त इति भावः । **विभागाविभागाविति** । प्राक् सन्नेव घटमकुटादिमृत्पिण्ड-हेमादेर्विभज्यत इत्यादि विभागः मृत्पिण्डादौ घटादेर्विशतीत्याद्यविभागः । एवं कारणे कार्यस्य सत एव विभागाविभागाभ्यामव्यक्तं कारणमस्तीत्युक्तावित्यर्थः । **स्थूलकार्यस्य लोष्टादेरित्यादिनेति** । लोष्टादेरवयव-क्रियाविभागादिन्यायेन विभज्यमानाल्पाल्पतराल्पतमादिभावाद्यतोऽनल्पीयः स परमाणुः तेषां परमाणूना-मविभागे द्व्यणुकत्र्यणुकादिभावेन सम्बन्धे स्थूलकार्योत्पत्तिः । न चावयवाः निरवधिकास्तथात्वेमे .... सिद्धार्थयोरनन्तावयवारब्धत्वाविशेषेण समपरिमाणत्वापातात् । अतश्चरमावयवः परमाणुस्तेषामेव कारणत्वमिति तत्प्रक्रिया ।

चषकः— **यथोक्तमिति** । महाभारततात्पर्यनिर्णये एकविंशेऽध्याये उक्तमित्यर्थः । **अन्तर्भावि-तेति** । अव्यक्तकार्यात्मत्वमित्यर्थः ।

* * *

॥ अथ तत्र 'आत्मन एवेच्छावत्त्वं न त्वचेतनस्य' इत्युक्तार्थभङ्गशङ्का तन्निरसनञ्च ॥
॥ अथ तत्रादौ कामादेः द्वैविध्येऽपि आत्मस्वामित्वमपोदितुं न शक्यम् ॥

७३ **सु०—** नन्विदं घट्टकुटीप्रभातमनुसरति । 'इच्छावत्त्वमात्मन एव न तु जडस्ये'-त्यत्र हि प्रथममनुभवः प्रमाणीकृतः । तत्र च श्रुतिविरोधे चोदितेऽन्तःकरणधर्म आत्मधर्मश्चेति कामस्य द्वैविध्यान्न विरोध इत्युक्तम् । एवञ्च 'आत्मन एवेच्छावत्त्वं न त्वचेतनस्ये'ति त्यक्तमेवेत्याशङ्कां सिंहावलोकनन्यायेन परिहरति **द्वैविध्येऽपीति** ।

अनु०— द्वैविध्येऽपि तु कामादेः कुतः स्वामित्वमात्मनः ।
साक्षादनुभवारूढं शक्यतेऽपोदितुं क्वचित् ॥

कामादेर्द्वैविध्येऽपि साक्षादनुभवारूढमात्मनः कामादेः स्वामित्वं तु कुतः प्रमाणात् **अपोदितुं शक्यते** न कुतोऽपीति योजना । श्रुत्यपेक्षया **आदि**पदग्रहणम् । अपोदितुमिति सम्प्रसारणं छान्दसम् ।

अयमत्रोत्तरक्रमः । सत्यं कामो द्विविध आत्मधर्मो मनोवृत्तिश्चेति । तत्र मनोवृत्तिमपि कामं प्रत्यात्मन एव स्वामित्वं न मनसः, 'अहं कामय' इति साक्ष्यनुभवसिद्धत्वात् । मनसस्तु कामं प्रत्युपादानत्वमेव, । यथा हि 'क्षेत्रोपादानकानामपि सस्यानां कृषीवल एव स्वामी न क्षेत्रं' तथैव । न च वाच्यं मनस एव कामस्वामित्वम्, 'अहं कामय' इत्यनुभवस्तु भ्रान्तिर्व्यवहारमात्रं वेति; बाधकप्रमाणाभावात् । न च कौटस्थ्यं बाधकम्; अन्तःकरणस्यैव कामोपादानत्वेनाङ्गीकृतत्वात्, स्वामित्वमात्रेण च कौटस्थ्याविघातात्, अन्यथा कृपणधनस्येवात्मनो वैयर्थ्यापत्तेरिति । तदिदमुक्तं **क्वचिदिति** ।

परि०— घट्टकुटीति । यत्र पान्थैः किञ्चिच्छुल्कं दत्वा गन्तव्यं स्थानं तत् घट्टमुच्यते । तत्रत्यं शुल्कग्राहिणां राजभटानां सूक्ष्मगृहं कुटीत्युच्यते । घट्टकुटीं विहाय मार्गान्तरेण गन्तुं रात्रावुत्थितानां मार्गाज्ञानहेतुनां घट्टकुट्यां प्रभातमुदयमनुसरतीत्यर्थः । कामस्यैकस्यैवात्र प्रकृतत्वात् कथं कामादेरित्युक्तिरित्यत आह **श्रुत्यपेक्षयेति** । कामः सङ्कल्प इति श्रुत्युक्तसङ्कल्पादिवृत्त्यन्तरापेक्षयेत्यर्थः । तथा च कामादेः कामसङ्कल्पादेरित्यर्थः उक्तो भवति । नन्वपपूर्वस्य वदतेः 'यजो वपो वहिश्चैव वेञ्व्येञौ श्वयतिस्तथा । वद्वसौ वयतिश्चैव स्मृता नव यजादय' इत्युक्तयजादिगण-

मध्यस्थत्वेऽपि 'वचिस्वपियजादीनां किती'तिसूत्रेण किति परत एव सम्प्रसारणोक्तेः तुमुन्प्रत्ययस्य चाकित्त्वात् कथं वकारस्य सम्प्रसारणम् । येन (वकारस्य) सम्प्रसारणेनोकारे सम्प्रसारणाच्चेत्यकारस्य पूर्वरूपत्वे आद्गुणे च सति अपोदितुमिति स्यादित्यत आह **छान्दसमिति** । बहुलं छान्दसीत्युक्तेरस्यापि छन्दस्तुल्यत्वादिति भावः । कुत इत्याक्षेपलब्धार्थमाह **बाधकप्रमाणाभावादिति** । तस्यासिद्धिनिरासाय सम्भावितमाशङ्क्य निराह **न च कौटस्थ्यमिति** । 'निर्विकारोऽक्षरः शुद्ध' इत्यादिनोक्तं निर्विकारत्वमित्यर्थः । **तदिदमिति** । मनस उपादानत्वमात्मनः स्वामित्वं स्वामित्वानुभवस्याभ्रान्तित्वम् अव्यवहारमात्रत्वमित्येतदित्यर्थः । क्वचिदित्यस्य मनसः उपादानत्वादिविषय इत्यर्थकत्वादिति भावः ।

गु०दी०— क्षेत्रोपादानकानाम् इत्यत्र क्षेत्रान्तरुक्तं बीजमुपलक्ष्यते । इदं चोपलक्षणम् । मृत्कनकतन्त्वाद्युपादानकेषु घटकुण्डलपटादिषु घटी कुम्भकारः कुण्डली देवदत्तः पटी तन्तुवाय इति प्रयोगदर्शनात् मृदादिषु तददर्शनाच्च चेतनेष्वेव घटस्वामित्वापरपर्यायं घटित्वकुण्डलित्वादिकम् । उपादाने तु मनोरूपत्वापरपर्यायमनोमयत्वमेव । रजतमहं जानामीति मानसभ्रमेऽपि तत्स्वामित्वादेवाहंशब्दोदिते जीवे एव जानामीति प्रयोगः । न तु मनसि इत्याद्यपि द्रष्टव्यम् । **स्वामित्वमात्रेण च** इत्यत्र स्वातन्त्र्यापरपर्यायमीशदत्तं स्वामित्वं चेतनस्वरूपमेव । तच्च कदाचित् व्यज्यते । कदाचिच्छक्त्यात्मना तिष्ठति । अतो न तस्योपादानापेक्षेति युक्तिरपि द्रष्टव्या ।

यादु०— घट्टकुटीप्रभातमिति । केचित्खलु वणिजः शुल्कमदित्सन्तः शुल्कग्राहिणो राजभृत्यान् वञ्चयित्वा अन्येन पथा जिगमिषवो रात्रौ तं पन्थानमदृष्ट्वा इतस्ततः सञ्चरन्तो यत्र घट्टे शुल्कग्राहिणां कुटी रचिता तत्रैव प्रभाते समागताः, सोऽयं घट्टकुटीप्रभातन्यायः । नन्विच्छारूपकामस्यैवात्र प्रकृतत्वादादिपदं किमर्थमित्यपेक्षायामाह **श्रुत्यपेक्षयेति** । 'कामः सङ्कल्प' इत्यादिश्रुतौ कामादेरनेकस्योक्तत्वात् तदपेक्षयैवादिपदं प्रयुक्तं न प्रकृतापेक्षयेति भावः । नन्वपवदितुमित्येव वक्तव्यं तुमुनोऽकित्त्वेन वचिस्वपीत्यादिना सम्प्रसारणस्योकारस्यासम्भवादित्यत आह **सम्प्रसारणं छान्दसमिति** । अकित्यपि सम्प्रसारणं छान्दसमित्यर्थः । **तदिदमिति** । आत्मनः कौटस्थ्यं न बाधकमित्यादिकमित्यर्थः । अत्र क्वचिदित्यस्य केनचिदित्यर्थकत्वम् । तेनोक्तबाधकाभावलाभ इति द्रष्टव्यम् ।

वं०प०— श्रुतीति । 'कामः सङ्कल्प' इति श्रुतीत्यर्थः । **त्यक्तमेवेति** । अचेतने इच्छाया अङ्गीकारात् । अन्यथा कामद्वैविध्यायोगादिति भावः । **श्रुत्यपेक्षयेति** । तथा च कामस्य द्वैविध्येऽपि तथा 'कामः सङ्कल्प' इति मनोधर्मताप्रतिपादक 'स यदि पितृलोककाम' इत्यात्मधर्मताप्रतिपादकश्रुत्योश्च द्वैविध्येऽपीत्यर्थः । नन्वपेत्युपसर्गपूर्वकात् वद व्यक्तायां वाचीतिधातोस्तुमुन्प्रत्यये आर्धधातुकस्येड्वलादेरिति इडागमे

टकारलोपेऽपवदितुमिति स्यात् अपोदितुमिति कथमत आह **सम्प्रसारणेति** । ततश्च वकारस्योकाररूपे सम्प्रसारणे जाते तस्य च आद्गुण इत्योकाररूपे गुणे अपोदितुमिति भवतीति ध्येयम् । ननु कथमत्र सम्प्रसारणम् । 'वचिस्वपियजादीनां किती'ति कितिपर एव वच्यादिभ्यो धातुभ्यः सम्प्रसारणविधानाद्वदतेश्च वच्यादिधात्वन्तर्गतत्वेऽपि तुमुन्प्रत्ययान्तत्वेन तुमुन्प्रत्ययस्य चाकित्त्वादत आह **छान्दसमिति** । अकित्यपि तुमुन्प्रत्यये परे यत्सम्प्रसारणं तच्छान्दसमित्यर्थः । **कौटस्थ्यम्** आत्मन इति शेषः । **बाधकम्** इच्छावत्त्वे । **अन्तःकरणस्येति** । यद्यात्मा कामोपादानं स्यात्तर्ह्येव कौटस्थ्यं बाधकं स्यान्न चैवम् । कामं प्रति स्वामित्वमात्राङ्गीकारात् । स्वामित्वाङ्गीकारे तद्बाधकाभावः कुत इत्यत आह **स्वामित्वमात्रेणेति** । **अन्यथेति** । यथेष्टविनियोक्तृत्वरूपस्वामित्वाभावे आत्मनो वैयर्थ्यापत्तेरिति । **आत्मन इति** । कर्मणि षष्ठी । आत्मानं प्रति मनसो वैयर्थ्यापत्तेरित्यर्थः । यथा विद्यमानं धनमव्ययीकुर्वन् कृपणः अस्वामी, तं प्रति तद्वत्त्वर्थमिति यावत् । एवमात्मा स्वकीयमन्तःकरणं तत्तत्कार्येषु यथेष्टं न विनियुंक्ते चेत् तर्हि तं प्रति तद्वत्त्वर्थमेव स्यादित्यर्थः ।

कं०रा०— नन्वात्मन एवेच्छावत्त्वं न त्वचेतनस्येति प्रकृतप्रमेयसिद्ध्यर्थं 'द्वैविध्येऽपि तु कामस्य कुतः स्वामित्वमात्मनः । साक्षादनुभवारूढं शक्यते चोदितुं क्वचिदि'ति कामस्यैव ग्रहणे कर्तव्ये कामादेरित्यादिपदग्रहणमयुक्तमित्यत आह **श्रुत्यपेक्षयेति** । 'कामः सङ्कल्पो विचिकित्से'ति श्रुतौ सङ्कल्पादेरपि गृहीतत्वापेक्षया आदिपदग्रहणं न प्रकृतापेक्षयेति भावः । नन्वपोदितमित्यत्र तुमुन्प्रत्ययस्य कित्वाभावेन वचिस्वपियजादीनां किती'ति सम्प्रसारणाप्राप्तेरपवेदितुमिति वक्तव्येऽपोदितुमिति सम्प्रसारणं कथं प्रायोजीत्यत आह **अपोदितुमितीति** । एतच्चोपलक्षणं अप उत् इत्युपसर्गद्वयपूर्वात् इणुगतावित्यस्मात् तुमुन्प्रत्यये 'संज्ञापूर्वको विधिरनित्य' इति गुणाभावेनैतद्रूपं रेफान्तर्णीतण्यर्थत्वाद्विवक्षितार्थसिद्धिरित्यपि द्रष्टव्यम् ।

श्रीनिधि०— ननु वचिस्वपियजादीनां कृतीति संप्रसारणविधायके सूत्रेतीत्युक्तेः तुमुन्प्रत्ययस्य कित्वाभावात् कथमपोदितमिति वकारस्य सम्प्रसारणमित्यत आह **सम्प्रसारणमिति** । **श्रुत्यपेक्षयेति** । कामः सङ्कल्प इति श्रुतिगृहीतसङ्कल्पाद्यपेक्षयेत्यर्थः । न पुनरिच्छापादानत्वलक्षणमिति येन इच्छावत्त्वेन कर्तृत्वमुपपत्स्यत इत्यर्थः ।

शे०वा०— नन्विच्छाम्यहमित्यनुभवानुरोधेनात्मन इच्छावत्त्वस्योक्तत्वात् पुनरनुभवानुरोधेनेच्छास्वामित्ववर्णनपरोत्तरवाक्यमनर्थकम् । न चेदं मनोवृत्तिरूपकामं प्रत्यात्मनः स्वामित्ववर्णनपरमिति नानर्थक्यमिति वाच्यम् । कामद्वैविध्यप्रतिपादनमात्रेण श्रुतिविरोधपरिहारस्य सिद्धत्वेन तं प्रत्यात्मनः स्वामित्ववर्णनस्याप्यनर्थकत्वादित्यतः कामद्वैविध्याश्रयणे आत्मन इव मनसोऽपीच्छावत्त्वप्राप्त्या आत्मन एवेच्छावत्त्वं न त्वन्तःकरणस्येति स्वोक्तनियमभङ्गेन घट्टकुटीप्रभातवृत्तान्तसाम्यशङ्कानिरासार्थत्वान्न मनोवृत्तिरूपकामं प्रत्यात्मनः स्वामित्ववर्णनानर्थक्यमित्यभिप्रेत्योक्तशङ्कानिवारकतयोत्तरभाष्यं योजयितुं उक्तन्यायसाम्यशङ्का-

मुत्थापयति **नन्विदमिति** । **घट्टकुटीति** । केचित्खलु वणिजः शुल्कमदित्सन्तः शुल्कग्राहिणो राजभृत्यान् वञ्चयित्वा अन्येन पथा जिगमिषन्तो विस्मृतमार्गा रात्रावितस्ततः सञ्चरन्तो, यत्र घट्टे शुल्कग्राहिणां कुटी स्थिता, तत्रैव प्रभाते समागताः । सोऽयं घट्टकुटीप्रभातवृत्तान्तस्तमनुसरतीत्यर्थः । उक्तन्यायसाम्यमेवोपदर्शयति **इच्छावत्त्वमित्यादिना** । नन्वस्याः शङ्कायाः कामद्वैविध्यकथनरूपात् 'द्वैविध्यं दृश्यते चास्ये'त्यादिपूर्वग्रन्था-दनन्तरमेवोत्थानेनैतन्निरासपरैतद्ग्रन्थस्यापि तत्रैव सन्निवेशनीयत्वाद्व्यवधानेनात्र सन्निवेशोऽसङ्गत इत्यत उक्तं **सिंहावलोकनन्यायेनेति** । नन्विच्छारूपकामस्यैवात्र प्रकृतत्वादादिपदं किमर्थमित्यत आह **श्रुत्यपेक्षमिति** । कामः सङ्कल्प इत्युदाहृतश्रुत्यपेक्षं कामादेरित्यादिपदमित्यर्थः । ननु 'वचिस्वपियजादीनां किति' इत्यत्र किति परत एव वदतेः सम्प्रसारणमुक्तम् । उदित उदितवानिति वृत्तौ तथैवोदाहृतं च । ततश्च प्रकृते तुमुन्प्रत्यय-स्याकित्त्वात्तस्मिन्परतः सम्प्रसारणाप्राप्तेरपवदितुमित्येव वक्तव्यम् । अपोदितुमिति तु कथमित्यत आह **अपोदितुमितीति** । किति परतो विहितं सम्प्रसारणं छन्दस्तुल्यत्वादकित्युपपन्नमिति भावः । ननु कोऽसावनु-भवो यत्सिद्धमात्मनोऽन्तःकरणवृत्तिरूपकामस्वामित्वमित्युच्यते । आत्मस्वामिकत्वे मनसो वैयर्थ्यप्रसङ्गाच्च । किञ्चानुभवसिद्धमपि तन्नाङ्गीकर्तुं शक्यम् । लोकेऽन्योपादानकस्यान्यस्वामिकत्वादर्शनिनान्तःकरणवृत्तिरूप-कामस्य आत्मस्वामिकताया असम्भावनाशङ्कापराहतत्वात् । अभिमतानुभवस्य भ्रान्तित्वेन तेन तदसिद्धेश्चे-त्येताः शङ्काः क्रमेण परिहरन्नेवाकाङ्क्षाक्रमेणोक्ताक्षेपपरिहारकतया मूलं योजयति **अयमत्रेति** । **अहमिति** । अनेनानुभवप्रकारप्रदर्शनिनाद्या शङ्का निरस्ता भवति । **उपादानत्वमेवेति** । तथा च न तद्वैयर्थ्यप्रसङ्ग इति भावः । असम्भावनापराहततां दृष्टान्तोक्त्या परिहरति **यथेति** । बाधकमपि किं कौटस्थ्यमेवाभिमतमन्यद्वा किञ्चित् । नान्त्यः तददर्शनादित्यभिप्रेत्याद्यमुत्थाप्य दूषयति **न चेति** । कौटस्थ्यविघातकमपि कामं प्रत्युपा-दानत्वविशिष्टस्वामित्वमभिमतं किंवा स्वामित्वमात्रमिति विकल्प्याद्यमनङ्गीकारेण दूषयति **अन्तःकरण-स्यैवेति** । द्वितीयं प्रत्याह **स्वामित्वमात्रेणेति** ।

वा०र०— ..... दर्शयति **केचित् खल्विति** । **शुल्कमिति** । .....अभिधानानुसारेण । राज्ञा नियमितं द्रव्यमुच्यते । अदित् सन्तः । दातुमनिच्छन्तः । **श्रुत्यपेक्षमिति** । श्रुतिगतसङ्कल्पादिविवक्षयेत्यर्थः । ततश्च नादिपदवैय्यर्थ्यमिति भावः । सङ्कल्पादेरपि द्वैविध्याभिधानं तु कामप्रसङ्गेनेति नासङ्गतिरिति ध्येयम् । **उदित इत्यादि** । अत्र क्तस्येत्युदाहरणं क्तवतोऽस्तु उदितवान् इति ज्ञेयम् । उभयत्रापि कितः परतया सम्प्रसारणं युक्तमिति भावः । **तुमुन्प्रत्ययस्येति** । शकधृषज्ञेति सूत्रेण शक्नोति भोक्तुं इत्यादाविव तुमुन्प्राप्तः तस्येत्यर्थः । शकादियोगाभावस्थले तु लमुन् । शोधः कर्तव्योऽस्ति । **सम्प्रसारणेति** । वकारस्य उकार-रूपसम्प्रसारणे सम्प्रसारणाच्चेति पूर्वरूपे च उकारमात्रपरतः आयातीति भावः । अत्राधिकविरोधैकापोद्यत्वा-दिति तत्त्वप्रकाशिकोपपादनं यत् गुरुकृतमस्ति यच्च तदुपपादनं अस्मदीयं तदुभयानुसारेण ज्ञेयम् । **छन्दस्तुल्यत्वादिति** । सर्वेषां विधीनां छन्दसि निमित्तव्यभिचारसद्भावेन कित्परत्वाभावेऽपि सम्प्रसारणं युक्तमिति भावः । मूले **व्यवहारमात्रं भवतीति** । आत्मान्तःकरणयोः विवेकाग्रहात् औपचारिको व्यवहार इत्यर्थः ।

स०व्र०— घट्टकुटीति । केचित् वणिजः शुल्कमदित्सन्तः शुल्कग्रहणस्थलं वञ्चयित्वा अन्येन पथा जिगमिषन्तो विस्मृतमार्गाः यत्र घट्टे शुल्कग्राहिणां कुटी स्थिता तत्रैव प्रभाते आगताः । सोऽयं घट्टकुटीप्रभातदृष्टान्तः । **श्रुत्यपेक्षयेति** । 'कामस्संकल्प' इति श्रुत्यपेक्षया कामादेरित्यादिपदमित्यर्थः । ननु 'वचिस्वपियजादीनां किती'त्यत्र किति परत एव वदतेः सम्प्रसारणमुक्तम् । उदित उदितवानित्येव वृत्तौ उदाहृतत्वात् । प्रकृते तुमुन्प्रत्ययस्याकित्त्वात् तस्मिन् परतः सम्प्रसारणाप्राप्तेरपवदितुमित्येव वक्तव्यम् । अपोदितुमिति कथमित्यत आह **अपोदितुमिति** । किति परतो विहितं सम्प्रसारणं छन्दस्तुल्यत्वादकित्युपपन्नमिति भावः ।

विट्ठल०— घट्टकुटीति । वणिग्भ्यो द्रव्यादानार्थं मार्गे कुत्रचित्स्थाने राजपुरुषैर्निर्मिता कुटी । तत्रैव राजभृत्यान्वञ्चयितुं रात्रावन्यपथागतानां वणिजामज्ञानाद्भ्रम्यमाणानां प्रभातसमये प्राप्तिन्यायमित्यर्थः । नन्विच्छारूपकामस्यैकस्यैवात्र प्रस्तुतत्वेनादिपदं व्यर्थमित्यत आह **श्रुत्यपेक्षयेति** । 'कामः सङ्कल्प' इत्यादिश्रुतौ कामसङ्कल्पादीनां अनेकेषां मनोधर्माणामुक्तत्वात् तेषां च वस्तुतो द्वैविध्यसद्भावात् तदपेक्षयैवेदमादिपदं न तु प्रकृतोपयोगापेक्षयेति भावः । नन्वयं वाद वदितुमिति वक्तव्यम् । अकित्त्वेन सम्प्रसारणस्योङ्कारस्य प्राप्त्यसम्भवादित्यत आह **सम्प्रसारणमिति** । न चात्मनो निर्विकारत्वेन मुक्तावुच्छिद्यमानजन्यकामस्वामित्वेन पादा उपादानत्वापत्त्या कौटस्थ्यं भज्येतेत्यत आह **न च कौटस्थ्यमिति** । तर्हि स्वामित्वमपि कुतः कल्प्यमित्यत आह **अन्यथेति** । स्वामित्वाभावे लोभिधनवदात्मनो किञ्चित्परतया व्यर्थत्वेनेच्छासिद्ध्यर्थमात्मकल्पना न स्यादिति भावः । **तदिदमुक्तमिति** । क्वचित्कामादौ कुत्रचिदपि स्वामित्वं न त्यक्तुं शक्यते । त्यागवैय्यर्थ्यापत्तेरित्युक्तमित्यर्थः ।

चषकः— तुमुनोऽकित्त्वात् संप्रसारणं निर्बीजमित्याशङ्कायामाह **सम्प्रसारणमिति** । **कौटस्थ्यम्** अव्याकृताकाशवन्निर्विकारतयाऽवस्थितत्वम् । 'कूटं खं विदलं व्योम सन्धिराकाश उच्यत' इति स्मृतेः ।

॥ इति कामादेः द्वैविध्येऽपि आत्मस्वामित्वमपोदितुं न शक्यम् ॥

* * *

॥ अथ तत्र इच्छावत्त्वस्य इच्छास्वामित्वार्थकत्वम् ॥

७४ सु०— नन्वस्तु कामस्वामित्वमात्मन एव, मा भूच्च मनसः; तथाऽपि पूर्वोत्तरविरोधस्तदवस्थ एव; इच्छास्वामित्वाभावेऽपि यादृशतादृशस्येच्छावत्त्वस्य मनस्यङ्गीकृतत्वादित्यत आह इच्छेति ।

अनु०— इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं न चापरम् ।

'अचेतनेच्छापगते'त्यादौ इच्छास्वामित्वमेवेच्छावत्त्वमुक्तम्, न च अपरम् इच्छोपादानत्वलक्षणम् ।

एतदुक्तं भवति । स्यादत्र पूर्वापरविरोधः, यदि यदेवेच्छावत्त्वं प्राङ्मनसो निषिद्धं तदेवात्र पुनरङ्गीक्रियेत । न चैतदस्ति । पूर्वं हीच्छास्वामित्वलक्षणमिच्छावत्त्वमात्मन एव न त्वचेतनस्येत्युक्तम्, तस्यैव कर्तृत्वोपयोगात्; श्रुत्यर्थतया त्विच्छोपादानत्वलक्षणमिच्छावत्त्वमिदानीं मनसोऽभ्युपगम्यत; इति कुतो विरोध इति ।

परि०— श्रुत्यर्थतयेति । कामः सङ्कल्प इत्यादिश्रुत्यर्थतयेत्यर्थः ।

वं०प०— अङ्गीकृतत्वादिति । तथा च न जडस्यान्तःकरणस्येच्छावत्त्वमिति तु युक्तमेवेत्यर्थः । **तस्यैव** इच्छास्वामित्वस्यैव । **श्रुतीति** । 'कामः सङ्कल्प' इतीत्यन्वयः ।

कं०रा०— इच्छास्वामित्वाभावेऽपीति । मनस इच्छास्वामित्वाभावेऽपीच्छापादनत्वरूपस्येच्छावत्त्वस्य मनस्य अधुनाङ्गीकृतत्वादचेतनेच्छापगतेति मनस इच्छावत्वस्य प्राक् प्रतिषिद्धत्वाच्च पूर्वोत्तरविरोध इति भावः ।

शे०वा०— नन्विच्छावत्त्वस्येच्छास्वामित्वरूपत्ववर्णनमुत्तरत्र क्रियते तदनर्थकम् । न च अचेतनेच्छापगते'त्यादावन्तःकरणे निषिद्धमिच्छावत्त्वमिच्छास्वामित्वलक्षणमिति ज्ञापनार्थत्वान्न तदिति वाच्यम् । तज्ज्ञापनस्यापि निष्प्रयोजनत्वादित्यतः कामद्वैविध्यवर्णनपरस्य 'उभयात्मकता यतः' इत्यस्य ग्रन्थस्य 'अचेतनेच्छापगते'त्येतद्ग्रन्थेन विरोधपरिहारार्थत्वान्न तदिति भावेन विरोधशङ्कापरिहारकतया तद्योजयितुं तामुत्थापयति **नन्विति** । **यादृशतादृशस्येति** । इच्छोपादानत्वलक्षणस्येत्यर्थः । पूर्वं च तस्य निषिद्धत्वादिति भावः । ननु मनस इच्छावत्त्वस्येच्छोपादानरूपत्वेन इच्छास्वामित्वरूपत्वाभावात् कथं 'इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं न चापरम्' इत्यवधारणमित्यतोऽपेक्षिताध्याहारेण वाक्यं योजयति **अचेतनेति** । नन्वचेतनेच्छापगतेत्यादाविच्छास्वामित्वमेवेच्छावत्त्वमुक्तं न त्विच्छोपादानत्वमिति कुतो निश्चेतुं शक्यते नियामकाभावात् । कथं चैतावताऽपि विरोधपरिहार इत्यतो नियामकं वदन्विरोधपरिहारप्रकारमाह **इदमुक्तं भवतीति** । **प्रागिति** । अचेतनेच्छापगतेत्यादावित्यर्थः । **अत्रेति** । 'उभयात्मकता यतः' इत्यत्रेत्यर्थः । **तस्यैवेति** । इच्छास्वामित्वलक्षणस्येच्छावत्त्वस्यैवेत्यर्थः । य इच्छति स एव प्रवर्तत इति हि सर्वसम्मतम् ।

न तु यदिच्छा भवति तत्प्रवर्तत इति नेच्छोपादानत्वं कर्तृत्वोपयोगि, किन्तु तत्स्वामित्वमिति भावः । **श्रुत्यर्थतयेति** । 'कामः सङ्कल्प' इत्येतच्छ्रुत्यर्थतयेत्यर्थः ।

वा०र०— न तु यदीच्छा भवतीति मूलम् । यदीच्छाकारेण परिणतं भवतीत्यर्थः ।

विठ्ठल०— इच्छावत्त्वमुक्तमिति । इच्छावत्त्वमपगतमित्युक्तमित्यर्थः ।

॥ इति इच्छावत्त्वस्य इच्छास्वामित्वार्थकत्वम् ॥

* * *

॥ अथ तत्र कामद्वैविध्योक्त्या प्रसक्तस्य अचेतनकर्तृकत्वस्य निरासः, तत्राक्षेपपरिहारश्च ॥

७५ सु०— यद्वा कामस्य द्वैविध्येन मनसोऽपि कामवत्त्वात् कर्तृत्वमुपपत्स्यत इत्यत आह द्वैविध्येऽपीति । (अनु. ६७२० पृष्ठे द्रष्टव्यम्) । **द्वयोः कामवत्त्वेऽपि कामस्वामित्वमात्मन एव न तु मनसः, निरपवादसाक्ष्यनुभवसिद्धत्वात् । मनसस्तु कामोपादानत्वमेवेति । ततः किमित्यत आह इच्छेति** । (अनु. ६७२५ पृष्ठे द्रष्टव्यम्) । **इच्छास्वामित्वलक्षणमेवेच्छावत्त्वं प्राक् कर्तृत्वोपयुक्तमुक्तम्, न पुनरिच्छोपादानत्वलक्षणम् । यो हीच्छति स प्रयतते, न तु यदिच्छा भवति तदिति ।**

तस्मादिच्छास्वामित्वाच्चेतनस्यैव कर्तृत्वं नाचेतनस्य, तस्येच्छोपादानत्वेऽपीच्छास्वामित्वाभावादिति ।

परि०— अव्यवहितपूर्वग्रन्थसङ्गततयेदानीं योजयति **यद्वा कामस्येति** ।

गु०दी०— तस्येच्छोपादानत्वेऽपि इत्यत्र चित्संवलनान्मनोमात्रस्यैवेच्छोपादानता दृष्टा । न तु घटपटादौ केवलजडे । अतः चित्संवलनरहितायाः केवलजडायाः प्रकृतेः कर्तृत्वशङ्कैव । न हि भवति काकस्य काष्ण्यार्द्धवलः प्रासाद इत्यप्यूह्यम् ।

वं०प०— स्वामित्वं स्वामितया कर्तृत्वमित्यर्थः । **साक्ष्यनुभवेति** । कामये इत्येवंरूपेत्यर्थः । इच्छावत्त्वस्य कर्तृत्वोपयुक्ततामुपपादयति **यो हीति** । **इच्छति** इच्छावान् भवति । **यतते** । यत्नवत्त्वमेव कर्तृत्वमिति हृदयम् । न पुनरित्युक्तमुपपादयति **न त्विति** । **यदिति** । यदिच्छाऽभिन्नं भवति तन्न प्रयतते,

यन्नवत् कर्तृ न भवतीत्यर्थः । ततश्चान्तःकरणस्य तु इच्छोपादानत्वेनेच्छाऽभिन्नत्वाङ्गीकारान्न तद्वत्त्वेन कर्तृत्वमिति भावः ।

शे०वा०— एवमुभयात्मकता यत इति कामद्वैविध्यवर्णनस्याचेतनेत्यादिपूर्वग्रन्थेन विरोधशङ्का-निवर्तकतया द्वैविध्येऽपीति भाष्यं व्याख्यातम् । इदानीं द्वैविध्यवर्णनेन प्रसक्ताचेतनकर्तृकत्वनिरासाक्षेप-परिहारकतयाऽपि तद्व्याख्यातुं तदाक्षेपशङ्कामुत्थापयति **यद्वेति** । **साक्ष्यनुभवेति** । अहं कामय इति साक्ष्यनुभवेत्यर्थः । ननूक्तानुभवस्य भ्रमत्वाद्व्यवहारमात्रत्वाद्वा न साधकत्वमित्यतो बाधकाभावान्न भ्रम-त्वादीत्याशयेनोक्तं **निरपवादेति** । हेतुगर्भं चेदं विशेषणम् । न च कौटस्थ्यमेव बाधकमिति वाच्यम् । तद्विघातकस्येच्छोपादानत्वस्यानभ्युपगमात् । अभ्युपगतस्य च कामस्वामित्वस्य तदविघातकतायाः प्रागुप-पादितत्वेन तदप्रसङ्गादिति भावः । उपयोगमेवोपपादयति **यो हीति** । अनुपयोगमप्युपपादयति **नन्विति** ।

वा०र०— **तद्व्याख्यातुमिति** । उपलक्षणं चैतत् । अचेतनेच्छापगतेत्यादौ इच्छावत्वं निषिद्धमिति वाच्ये निषेध्यत्वेनोक्तं इति उक्तपदं किमर्थमिति उक्तपदास्वारस्यं च पूर्वपक्षे भवतीत्यतोऽपीत्यपि द्रष्टव्यम् ।

विट्ठल०— **ततः किमिति** । अस्तु मनसः कामोपादानत्वं तथापि कामवत्वात् कर्तृत्वमुपपद्यत इत्यस्य किं दूषणमायातमित्यर्थः ।

॥ इति कामद्वैविध्योक्त्या प्रसक्तस्य अचेतनकर्तृकत्वस्य निरासः, तत्राक्षेपपरिहारश्च ॥

* * *

॥ अथ तत्र इच्छास्वामित्वासम्भवशङ्का तन्निरासश्च ॥

७६ सु०— 'स्यादेतत् । स्वं नाम तद्भवति, यद्यथेष्टविनियोगयोग्यम्, यथा गवादि । स्वामी च स उच्यते यो यथेष्टविनियोक्ता । न चेच्छात्मनोरेतदस्ति; यस्मादास्तिक-कामुकस्य निषिद्धेच्छां नियच्छतोऽपि (इच्छ) सा आविर्भवति, प्रयतमानस्यापि विहितेच्छा नोदेति; तत्कथमिच्छास्वामित्वमात्मनः स्यादि'ति चेत्; किमिच्छा आत्मनः सर्वथापि वशा न भवति इत्युच्यते, उत किञ्चिद्वशत्वमङ्गीक्रियते । नाद्यः; अनुभव-विरोधात्, इच्छति देवदत्त इत्यादिव्यवहारविरहप्रसङ्गाच्च । द्वितीये तु सिद्धं स्वामित्व-मित्याह किञ्चिदिति ।

अनु०— किञ्चित्तद्वशगत्वेऽपि स्वामित्वं लोकवद्भवेत् ।

प्रबलविरोधिवशादत्यन्तवशत्वाभावेऽपीच्छायाः किञ्चित् आत्मवशत्वमात्रेण अपि तां प्रत्यात्मनः स्वामित्वं भवेदे(वत्ये)व । कथम् । यथाऽत्यन्तमवशायामपि गवि किञ्चिद्वशत्वमात्रेण देवदत्तस्वामित्वं लोके दृष्टं तथैव, अन्यथा तदपि न स्यादिति ।

परि०— इच्छास्वामित्वानुभवे विवदमानं प्रत्याह **इच्छति देवदत्त इत्यादीति** । इच्छतीत्यत्र स्वतन्त्रः कर्तेत्युक्तलकारव्यवहारस्य स्वामित्वव्यवहाररूपत्वादिति भावः । लोकवदित्येतत्प्रश्नपूर्वं व्यनक्ति **कथमित्यादिना** । **अन्यथेति** । किञ्चिद्वशत्वमात्रेण स्वामित्वाभावे गोः स्वामित्वमपि न स्यादित्यर्थः ।

वं०प०— **एतत्** विनियोज्यत्वं विनियोगयोग्यत्वं विनियोक्तृत्वं चेत्यर्थः ।

शे०वा०— ननु किञ्चित्तद्वशगत्वेऽपीत्युत्तरभाष्यमनर्थकम् । न चेच्छायाः किञ्चिदात्माधीनत्वमात्रेणात्मवशत्वोपपादनार्थं तदिति वाच्यम् । आत्मन इच्छास्वामित्वेन मुख्यस्यैव तद्वशत्वस्य सम्भवेन किञ्चित्तद्वशत्वपर्यन्तधावनानर्थक्यादित्यतः पूर्वोक्तेच्छास्वामित्वासम्भवशङ्कानिरासार्थत्वान्न तदिति भावेन तच्छङ्कानिरासकतयोत्तरभाष्यं योजयितुमात्मेच्छयोः स्वस्वामिभावानुपपत्तिशङ्कामुत्थापयति **स्यादेतदिति** । तत्कुत इत्यतः तथा लोके दर्शनादित्याह **यथेति** । **य इति** । तथा देवदत्तादौ दृष्टत्वादिति भावः । **एतत्** यथेष्टविनियोगयोग्यत्वं यथेष्टविनियोक्तृत्वं चेत्येतदित्यर्थः । उभयत्रापि क्रमेण हेतुमाह **यस्मादिति । सेति** । निषिद्धेच्छेत्यर्थः । **प्रयतमानस्यापीति** । विहितेच्छायामिति शेषः । नन्वात्मेच्छयोः स्वस्वामिभावानुपपत्तिशङ्कायाः सर्वथेच्छाया आत्मानधीनत्वे तात्पर्यं, न तु किञ्चित्तद्वशत्वाङ्गीकार इति कथमुत्तरग्रन्थसङ्गतिरित्यतो नेदं तत्पक्षदूषणं, किन्तु किञ्चित्तद्वशत्वाङ्गीकारपक्षदूषणमेवेति नोत्तरग्रन्थासङ्गतिरित्यभिप्रेत्य सम्भावितविकल्पद्वयं प्रदर्श्य आद्यपक्षं बहिरेव प्रदूष्य द्वितीयपक्षदूषणपरतया मूलं योजयितुं तावद्विकल्पयति **किमित्यादिना** । अनुभवे विवदमानं प्रति दोषान्तरमप्याह **इच्छतीति** । **अन्यथेति** । इच्छायाः किञ्चिदात्मवशत्वमात्रेण तां प्रत्यात्मनः स्वामित्वानभ्युपगम इत्यर्थः । **तदपि** गोस्वामित्वमपि । देवदत्तं प्रति गोरप्यत्यन्तवशत्वाभावादिति भावः ।

वा०र०— सर्वथा यदि इच्छायाः आत्माधीनत्वमित्यनेन किञ्चिद्वशत्वविपरीतं सर्वप्रकारेणात्मवशत्वमुच्यते । तदभावे तात्पर्यमित्यर्थः । **तत्पक्षेति** । सर्वप्रकारेण आत्माधीनत्वं इच्छायाः इत्येतत्पक्षे इत्यर्थः । **प्रबलविरोधीति** मूलम् । कामाकामादिप्रबलविरोधीत्यर्थः ।

॥ इति इच्छास्वामित्वासम्भवशङ्का तन्निरासश्च ॥

* * *

॥ अथ तत्र 'इतरव्यपदेशात्' इत्यधिकरणविरोधशङ्का तन्निरासश्च ॥

७७ **सु०—** नन्वेवं सत्येकं सन्धि(दि)त्सतो(परं प्रच्य)न्यच्चयवत इत्यापन्नम् । अचेतनस्य कर्तृत्वं निराकर्तुमात्मन एवेच्छास्वामित्वं न तु मनस इति समर्थितम्, तर्हीश्वरस्यापि कुलालादिमनोवृत्तीच्छां प्रति स्वामित्वं नास्तीति घटादिकर्तृत्वं न स्यात्, तथा 'चेतरव्यपदेशादि'त्यधिकरणविरोध इत्यत आह **सर्वात्मेति** ।

अनु०— सर्वात्मतन्त्रकामादेः किमुतैव परेशितुः ।

यदा जीवस्यापि कामादिस्वाम्यं तदा **सर्वात्मना तन्त्रमधीनं कामादि** यस्यासौ तथोक्तः । सर्वेषामात्मनां तन्त्रं साधनं यः कामः तस्यादिः कारणं तस्य **परेशितुः** कामस्वामित्वं **किमुतैव** वक्तव्यम् ।

एतदुक्तं भवति । जीवेश्वरौ द्वावपि शरीरमधितिष्ठतः । तत्रेश्वरोऽन्तःकरणं स्पष्टं दृष्ट्वा तत्र ज्ञानेच्छाप्रयत्नरूपा वृत्तीः स्वेच्छाज्ञानप्रयत्नैरुत्पाद्य बाह्यकरणानि चाधिष्ठाय घटाद्युत्पादयति । जीवस्तु तदत्तस्वाम्योऽवतिष्ठते, यथोक्तं 'बुद्धिर्ज्ञानमि'त्यादि । तस्मादीश्वरस्यैव मुख्यं स्वाम्यं कर्तृत्वं च, जीवस्य त्वमुख्यमेवेति । तथा चोक्तम् 'स्वस्वामिभावो ध्रुव एष यत्र तर्ह्यच्युतेऽसाविति कृत्ययोग' इति ।

परि०— सं(दि)धित्सत इति । सं(दा)धातुमिच्छत इत्यर्थः । **घटादिकर्तृत्वं न स्यादिति** । घटादिकृतीच्छास्वामित्वस्यैव घटादिकर्तृत्वोपयोगित्वात् तस्य च कुलालादिमात्रनिष्ठत्वप्राप्तेरिति भावः । **इत्यधिकरणेति** । जन्माधिकरणोक्तमीशस्य सर्वकर्तृत्वं युक्तं उतायुक्तमितिविषय जीवस्य महदादावपि कर्तृत्वेऽनुभवविरोधेन तत्रेशस्य कर्तृत्वेऽपि न घटादौ । तत्र कुलालादेरेव कर्तृत्वेऽनुभवसिद्धे सति ईशस्यापि कर्तृत्वोपगमे गौरवान्न युक्तमिति प्राप्ते जीवस्यैव स्वतन्त्रकर्तृत्वे हिताकरणाहितकरणकृत्स्नप्रसक्त्यादिदोषप्राप्तेः अचिन्त्यशक्त्युपेतो भगवानेव घटादिकार्येऽप्यनन्याधीनकर्ता न जीवः इति युक्तं विष्णोः सर्वकर्तृत्वमिति प्रागुक्तत्वादिति भावः । **सर्वात्मनेति** । अनन्यापेक्षयेत्यर्थः । प्रकृतत्वाज्जीवाधीनकार्यमात्रहेतुत्वपरतयाऽपि व्याचष्टे **सर्वेषामिति** । यद्वा कामादेर्जीवानुबन्धित्वाप्रतीतेः योजनान्तरमाह **सर्वेषामिति** । **साधनमिति** । घटादिकार्यसाधनमित्यर्थः । अस्मिन्नर्थे सम्मतिमाह **यथोक्तमिति** । 'बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः

शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इति दशमगीतायां कामादिवृत्त्यादीनामपीशकारणकत्वमुक्तमित्यर्थः । इच्छाकृत्योरपि अत्रोपलक्षणादिति वा, भावा इत्यत्र ग्रहणादिति वाऽभिप्रायः । **अमुख्यमिति** । इच्छास्वामित्वं कर्तृत्वं चेत्यनुषङ्गः । **तथा चोक्तमिति** । पञ्चमस्कन्धे दशमेऽध्याये रहूगणं प्रति ब्रह्मकुलोत्पन्नेन जडभरतेन ईशस्य मुख्यकर्तृत्वं जीवस्यामुख्यकर्तृत्वमुक्तमित्यर्थः । एषः स्वामिनः मे शासनं किमिति त्वं नानुवर्तस इति मां प्रति त्वयोक्तः स्वस्वामिभावः भृत्यस्वामिसम्बन्धः, ध्रुवः स्थिरः कदाऽप्यनिवर्त्यः अत एव मुख्योऽत्र यद्यभिमतः तर्ह्यसौ स्वामिभावः अच्युते हरौ वर्तते । मुख्यस्वामित्वं हरौ, अन्यत्र त्वदादिजीवेषु भृत्यत्वमेवेत्यर्थः । येन त्वयि स्वामित्वभ्रमेण भर्तुर्ममाज्ञामतिवर्तस इति मामब्रवीरिति भावः । उक्तं हि । 'स्वामित्वं तु हरावेव मुख्यमन्यत्र भृत्यते'ति । कुत एवं हरावेव मुख्यस्वामित्वमित्यतो मुक्तिहेतुध्यानविषयत्वादिति भावेनोक्तम् **इतिकृत्ययोग इति** । **इतिकृत्यः** = इतिकर्तव्यभूतः । साधनभूत इति यावत् । **मोक्षेति** योग्यतयान्वेति । **योगः** ध्यानम् । विषयविषयिणोरभेदोपचारेणायं निर्देशः । हेतुगर्भमिदम् । 'मम स्वामी हरिर्नित्यमि'त्येवंरूपमुक्तिहेतूपासनाविषयत्वाद्धरौ स्वामिभावो मुख्यः, अन्यत्र भृत्यभाव एवेति तात्पर्यार्थः ।

यादु०— तथा चेतरेति । तत्र घटादावपि जीवानां न मुख्यकर्तृत्वं किन्त्वीश्वरस्यैवेति समर्थितत्वादिति भावः । **सर्वात्मनेति** । स्रष्टृत्वादिसर्वप्रकारेणेत्यर्थः । इदमपि नैकस्मिन् जीवे किन्तु सर्वेष्वपीत्यर्थपरतयाऽपि मूलं योजयति **सर्वेषामात्मनामिति** । साधनमित्यतः पूर्वं घटाद्युत्पत्ताविति शेषः । ईश्वरस्यैव सर्वात्मना ज्ञानादिस्रष्टृत्वमित्यत्र भगवद्गीतासम्मतिमाह **यथोक्तमिति** । 'बुद्धिर्ज्ञानम्' इत्यादीत्यादिपदेन 'भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इत्यन्तस्य ग्रहणम् । अत्रेच्छाप्रयत्नावप्युपलक्षणया विवक्षितौ । अन्यथा 'भावा' इति सर्वसङ्ग्राहकपदास्वारस्यात् । अतः प्रकृतसङ्गतिरिति ध्येयम् । जीवस्य त्वमुख्यमेवेत्यत्र भागवतसम्मतिमाह **तथा चोक्तमिति । स्वस्वामिभाव इति** । रहूगणं प्रति भरतवाक्यमिदम् । 'स्वस्वामिभावोऽच्युते हरावेव ध्रुवो मुख्यः । अन्यत्र तु भृत्यतैव । नन्वेवं देवेषु श्रुत्यादिप्रसिद्धः स्वस्वामिभावः कथमित्यत उक्तं **यत्रेति** । यत्र देवेष्वेषः श्रुत्याद्युदितः स्वस्वामिभावस्तर्हि तत्र असौ अच्युते सत्येव तत्प्रेरणयैवेति यावत् । यस्मादेवं तर्हि तस्मादेष त्वदादौ मानुषे दृश्यमानः स्वस्वामिभावोऽध्रुवोऽमुख्यो व्यावहारिक इति तस्मात् ईश्वरादन्यत्र कृत्ययोगः कृतेः कर्तृत्वस्यायोगो मुख्यतो घटना नेत्यर्थः । यथोक्तम् । 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यता । देवेषु तन्नियत्या च त्वदादौ व्यावहारिकमि'ति ।

वं०प०— नास्तीति । कुलालादेरेव तत्स्वामित्वादिति भावः । **प्रयत्नैरिति** । निमित्तकारणभूतैरित्यर्थः । **यथोक्तमिति** । तत्र 'भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इत्युक्तेरिति भावः ।

कं०रा०— तथा चोक्तमिति । 'स्वस्वामिभावो ध्रुव एष यत्र तर्ह्यच्युतेऽसाविति कृत्ययोग' इतीश्वरस्यैव स्वाम्यं मुख्यमित्युक्तमित्यन्वयः । **स्वस्वामिभाव** इति वाक्यं भागवते पञ्चमस्कन्धे मां कदर्थीकृत्य भर्तुः शासनमतिचरसीत्युक्तवन्तं रहूगणं प्रति ब्राह्मणेनोक्तम् । तस्यायमर्थः । यत्र यदि एषः स्वस्वामिभावः ध्रुवः सत्य इति त्वयोच्यते तर्ह्यसावच्युते हरौ मुख्य इत्युच्यताम् । एषः सर्वेश्वर इति श्रुतेः । न तु त्वयि तवास्मदादिकोटिनिक्षिप्तत्वेन भृत्यत्वस्यैव मुख्यत्वात् । तदुक्तम् । 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यते'ति । अच्युते मुख्यत्वं कथमित्यत्राह **इतीति** । 'मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव चे'ति स्मृतेः । मम स्वामीति नित्यं कर्तव्यं योग उपासनं हरावेव विहितो यस्मात्तस्मादिति स्वभावोऽयमिति आत्ममोक्षार्थं प्रधानस्य प्रवृत्तिरित्येषोऽर्थः स्वभाव इत्यर्थः ।

श्रीनिधि०— सर्वात्मना तन्त्रमधीनमिति । स्वसत्तादिभिः सहेत्यर्थः । **साधनमिति** । सुखदुःखादेरिति भावः । एवं तर्हि एकस्यां क्रियायां कर्तृद्वयं विरुद्धमित्यत आह **एतदुक्तं भवतीति** । **बुद्धिर्ज्ञानमित्यादीति** । 'बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमश्शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपोदानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इति गीतायाम् । **कर्तृत्वं स्वाम्यं चेति** । **कर्तृत्वं** क्रियानुकूलकृतिमत्वम् । यथेष्टविनियोक्तृत्वं स्वाम्यमिति विवेकः । **स्वस्वामिभाव इति** । स्वस्वामिभावः यदि ध्रुवः मुख्यो विवक्षितः तर्हि अच्युत एव एषोऽसौ यदि त्वमुख्यो विवक्षितः **तर्हि** ब्रह्मादौ । त्वयि तु नास्त्येव इति हेतोः । कृत्ययोगः क्रियाया अघटना सर्वत्रारब्धान्तगामित्वाभाव इति यावत् ।

शे०वा०— नन्विच्छायाः किञ्चिदात्मवशत्वमात्रेणात्मन इच्छास्वामित्वसिद्ध्या प्रकृताक्षेपपरिहारादीश्वरस्य सर्वात्मना कामादिनियामकत्ववर्णनमनर्थकमित्यतोऽस्येश्वरस्य घटादिकर्तृतासमर्थनार्थत्वान्न तदिति भावेन तदुपपादकतया तद्योजयितुं तस्य कर्तृत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । **स्वामित्वं नास्तीति** । कुलालादीनामेव तदीयमनोवृत्तीच्छां प्रति स्वामित्वेनेश्वरस्य कुलालादिमनोवृत्तीच्छां प्रति स्वामित्वाभावादित्यर्थः । कर्तृत्वं न स्यादित्युपलक्षणम् । कुलालादीनामेव कर्तृत्वं स्यादित्यपि द्रष्टव्यम् । उभयत्रापीष्टापत्तिं निरस्यति **तथा चेति** । तत्र घटादावपि जीवानां न मुख्यकर्तृत्वं किन्तु ईश्वरस्यैवेति समर्थितत्वादिति भावः । नन्वीश्वरस्य कुलालादिमनोवृत्तिरूपकामं प्रति कथं कैमुत्येन स्वामित्वसिद्धिः । तत्सूचकाभावात् इत्यतः कुलालादिमनोवृत्तिकामं प्रति कुलालादीनां स्वामित्वस्यैव तत्सूचकत्वान्नानुपपत्तिरिति भावेनापेक्षितकैमुत्यसूचकप्रदर्शनपूर्वकं कैमुत्यसमर्पकतया योजयति **यदेति** । **सर्वात्मनेति** । सृज्यत्वादिसर्वप्रकारेणेत्यर्थः । सर्वप्रकारेण स्वामित्वमपीश्वरस्य न यत्किञ्चिन्मनोवृत्तीच्छां प्रत्येवेति मन्तव्यम् । किन्तु सर्वात्ममनोवृत्तिरूप-

कामं प्रत्यपीत्यर्थविशेषणसमर्पकतयाऽपि तदेव योजयति **सर्वेषामिति** । साधनमित्यतःपूर्वं घटादिप्रवृत्ताविति शेषः । ननु कुलालादिशरीरेऽसत ईश्वरस्य कथं तदीयमनोवृत्तिरूपकामस्वामित्वं येन घटादीन्प्रति तस्य कर्तृत्वं स्यात् । तत्र सत्त्वेन तत्स्वामितयेश्वरस्य तत्कर्तृत्वेऽपि वा कथं तस्यैव घटादीन्प्रति मुख्यं कर्तृत्वमुभयोरपि कामस्वामितया स्वामित्वे विशेषाभावेन तत्प्रयुक्तकर्तृताया अप्येकरूपत्वस्यैव न्याय्यत्वात् । तथा च नेतर-व्यपदेशादित्यधिकरणविरोधपरिहार इत्यत आह **एतदुक्तं भवतीति** । **शरीरं** कुलालादिशरीरमित्यर्थः । स्यादेवं यदीश्वरस्येच्छाज्ञानप्रयत्नैर्जीवशरीरे ज्ञानेच्छाप्रयत्नोत्पादकत्वं सिद्धं स्यात् तदेव कुत इत्यत आह **यथोक्त-मिति** । आदिपदेनासम्मोह इत्यादिकस्य 'भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इत्यन्तस्य वाक्यस्य सङ्ग्रहः । अत्रेच्छाप्रयत्नयोरुपलक्षणया बुद्ध्यादिग्रहणम् । अन्यथा भावा इति सर्वसङ्ग्राहकपदास्वारस्यप्रसङ्गा-दतोऽस्य प्रकृतसङ्गतिरिति ध्येयम् । जीवस्यामुख्यकर्तृत्वमीश्वरस्यैव च मुख्यकर्तृत्वमित्यत्र भागवतसम्मति-माह **तथा चोक्तमिति** । तद्वाक्यं पठति **स्वस्वामिभाव इति** । रहूगणं प्रति भरतवाक्यमिदम् । स्वस्वामि-भावोऽच्युते हरावेव ध्रुवो मुख्योऽन्यत्र तु भृत्यतैव । नन्वेवं तर्हि देवेषु श्रुत्यादिप्रसिद्धः स्वस्वामिभावः कथमित्यत उक्तं **यत्रेति** । यत्र देवेष्वेषः श्रुत्याद्युदितः स्वस्वामिभावः तर्हि तत्रासावच्युते सत्येव, तत्प्रेरणयैवेति यावत् । यत्र यस्मादेवं तर्हि तस्मादेषः त्वदादौ मानुषे दृश्यमानः स्वस्वामिभावोऽध्रुवोऽमुख्यो व्यावहारिक इति तस्मादीश्वरादन्यत्र कृत्ययोगः कृतेः कर्तृत्वस्य अयोगो मुख्यतो घटना नेत्यर्थः । यथोक्तम् । 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यता । देवेषु तन्नियत्या च त्वदादौ व्यावहारिकमि'ति । यद्वा यत्र यद्येष स्वस्वामिभावो ध्रुवः सत्य इति त्वयोच्यते तर्ह्यसावच्युते हरावेव मुख्य इत्युच्यताम् । 'एष सर्वेश्वर' इति श्रुतेः । न त्वयि तवास्मास्वेकत्वाद् भृत्यत्वमेव मुख्यम् । तदप्युक्तं 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यते'ति । एष राजा दण्डनायेति वचनादच्युते मुख्यत्वं कथमत्राह **इतीति** । 'मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च' इति स्मृतेः । सन्ध्योपासनादिवन्मम स्वामी हरिरितीतिकर्तव्यतालक्षणो योग उपासनं हरावेव विहितमिति यस्मात्तस्मादिति शेषः । ध्रुव इति विशेषणात् ध्रुवत्वस्यैव न्याय्यत्वाच्चेति ।

वा०र०— वक्ष्यमाणत्वदादावित्यत्र त्यत्वशब्दार्थज्ञानार्थं ययोः संवादोऽयं तौ व्यनक्ति **राहूगणं प्रतीति** । तन्नामकराजानं प्रतीत्यर्थः । भरतो जडः । स्वस्वामिभावो ध्रुव इति भागवतवाक्यव्याख्यानं शोध्यमस्ति । .....न्याय्यत्वाच्चेतीति पाठः ।

विट्ठल०— तथा चेतरेति । अस्मिन्नधिकरणे जीवानां न मुख्यं कर्तृत्वं किन्त्वीश्वरस्यैवेति समर्थितत्वादिति भावः । **सर्वात्मनेति** । सत्ताप्रतीतिप्रवृत्त्यादिप्रदत्वकारणेनेत्यर्थः । इदमपि नैकस्मिञ्जीवे किन्तु सर्वेष्वपीत्यर्थपरतयापि मूलं योजयति **सर्वेषामात्मनामिति** । **साधनम्** इत्यतःपूर्वं घटाद्युत्पत्ताविति शेषः । उभयोः स्वामित्वं कर्तृत्वं विरुद्धमित्याशङ्कां परिहरन्नुपपादयति **इदमुक्तमिति** । ईश्वरस्यैव सर्वात्मनां ज्ञानेच्छाप्रयत्नस्रष्टृत्वमित्यत्र गीतासम्मतिमाह **यथोक्तमिति** । 'भवन्ति भावा भूतानां मत्त एव पृथग्विधा'

इत्यन्तस्य ग्रहणायादिपदम् । अत्रेच्छाप्रयत्नावपि ग्राह्यौ । भावपदेन धर्ममात्रस्यान्ते गृहीतत्वात् । **स्वस्वामिभाव इति** । अध्रुवो ध्रुव इति द्वेधा पदच्छेदः । भर्तृशासनमतिरसीतिरनुगणेन यत्स्वात्मनः स्वामित्वमभिप्रेतं तस्येदमुत्तरम् । स स्वामिभावस्त्वादौ अध्रुवो अनियतः तात्कालिकव्यवहारमात्रविषयः अमुख्य इति यावत् । वैपरीत्यस्यापि सम्भवात् । कुत्रासौ ध्रुव इत्यत उक्तं **ध्रुव इत्यादि** । यत्र यस्माद्भगवतोऽन्यत्राध्रुवः तर्हि तस्मादेषः स्वस्वामिभावः स्वस्य स्वीयस्य स्वामिभाव अच्युते ध्रुवो मुख्यः 'सर्वस्याधिपतिः', 'सर्वस्येशानः', 'स हि सर्वकर्ते'ति इत्यादिश्रुतेः । तर्हि 'प्राणस्येदं वशे सर्वं', 'त्वमस्माकं तव स्मसी'त्यादि श्रुतिसद्भावात् प्राणादिष्वप्यस्य ध्रुवत्वमङ्गीकार्यमित्यत एतदेवोत्तरं **ध्रुव इत्यादि** । यत्र यदि एषोऽन्यत्रापि ध्रुव इत्यङ्गीकार्यमित्युच्यते तर्हि स्वौ स्वस्वामिभाव उच्यते नारायणे नियामके सत्येवेत्यङ्गीकार्यम् । अतो अमुख्याः 'स हि सर्वस्य कर्ता, नान्यः कर्ते'ति मुख्यताप्रतिषेधात् । इति यस्माद्भगवतोऽन्यत्र स्वामित्वममुख्यं तस्मादन्यत्र कृत्ययोगः कृतेः कर्तृत्वस्य मुख्यतो योगः । उक्तं चैतत् तात्पर्यनिर्णये 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यता । वेदेषु तन्नियत्यैव त्वदादेर्व्यावहारिकमि'ति ।

चषकः— यथोक्तमिति । गीतायामित्यर्थः ।

॥ इति 'इतरव्यपदेशात्' इत्यधिकरणविरोधशङ्का तन्निरासश्च ॥

* * *

॥ अथ च तत्र 'आत्मनः कामस्वामित्वा'नुभवस्य अपवादशङ्का, तत्समाधानं, तत्समर्थनञ्च ॥
॥ अथ तत्रापि 'श्रुतेः अनुभवापवादकत्व'स्य अयुक्तत्वम् ॥

७८ **सु०— "यदुक्तं निरपवादानुभवबलादात्मन एवेच्छास्वामित्वमिति । तदयुक्तम् । 'कामः सङ्कल्प' इति मनसः कामस्वामित्वाभिधात्र्याऽपौरुषेयत्वेन बलवत्या वेदवाचैवापोदितत्वादि"त्यत आह न चेति ।**

अनु०— न चानुभवगं कामस्वामित्वं वेदवागपि । शक्ताऽपवदितुं

कामस्वामित्वम् आत्मन इति शेषः ।

कामाद्यनुवादेन खल्वियं वेदवाक् आत्मोपादानत्वं वैशेषिकादिमतप्राप्तं वारयितुं तेषां मनोरूपत्वमाचष्टे । कामादिस्वरूपं च साक्ष्यनुभवेनैव सिद्धमिति तस्योपजीव्यत्वम् ।

स च तानात्मस्वामिकानेव विषयीकरोति । न चोपजीवकमुपजीव्यमपवदितुं शक्नोति । वेदस्योत्सर्गतो बलवत्त्वेऽप्युपजीव्यापेक्षया दौर्बल्यमेव । यथा आहुः, 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् । उपजीव्यविरोधे तु न प्रामाण्यममुष्य च' इति । अतो न श्रुतेरनुभवापवादकत्वं युक्तमिति ।

परि०— कामस्वामित्वाभिधात्र्येति । 'कामः सङ्कल्प' इत्यारभ्य 'एतत्सर्वं मन एवे'ति तादात्म्योक्तिः उपादानत्व इव 'राजा राष्ट्रमि'त्यादिवत् स्वस्वामिभावेनाप्युपपद्यते । तत्रोपादानत्वार्थकत्वे प्रयोजनाभावात् स्वस्वामिभाव एव श्रुत्यर्थ इति शङ्कितुरभिप्रायः । **यथाऽऽहुरिति** । तत्त्वनिर्णयोक्त-ब्रह्मतर्कस्मृतिकर्तार इत्यर्थः । **जात्येति** । उत्सर्गत इत्यर्थः । **तेषु त्रिष** प्रागुक्त-प्रत्यक्षानुमानागमेषु । **अमुष्य इति** । जात्या प्रबलस्यागमस्येत्यर्थः ।

यादु०— कामस्वामित्वाभिधात्र्येति । 'एतत्सर्वं मन एवे'ति कामादेर्मनोरूपत्वं ह्यत्रोच्यते । न च तन्मुख्यं सम्भवति । अतो 'यदधीना यस्य सत्ता तत्तदित्येव भण्यत' इति वचनात् कामादेर्मनोऽधीनत्वेनैव मनोरूपत्वमत्रोच्यत इति वाच्यम् । ततश्चेयं श्रुतिर्मनसः कामादिस्वामित्वाभिधात्रीत्यर्थः ।

वं०प०— आत्मोपादानत्वम् आत्मसमवायिकारणकत्वम् । **तस्य** साक्षिणः, 'कामः सङ्कल्प' इति वेदवाक्यस्य । **स च** साक्षी । **तान्** इच्छादीन् ।

श्रीनिधि०— कामस्वामित्वाभिधात्र्येति । ननु सर्वं मन एवेति उपादानत्वमेवोच्यत इत्यन्यथासिद्धिरिति चेत् राजा राष्ट्रमितिवत् स्वामित्वस्यैव बोधनादन्यथा तत्रापि स्वामित्वबोधो न स्यात् । न चानुभवविरोधः । तथापि साम्येन निर्णय एवेत्याशयः । अत एवानुभवस्य उपजीव्यत्वेन प्राबल्यं व्युत्पाद्यत इति द्रष्टव्यम् । **प्राबल्यमिति** । **तेषु** प्रत्यक्षादिषु मध्ये । **जात्या** प्रत्यक्षत्वानुमानत्वागमत्वजात्यपेक्षया प्राबल्यमागमस्यैव स्मृतमिति सम्बन्धः ।

शे०वा०— ननु 'न चानुभवगं कामस्वामित्वं वेदवागपि । शक्तापवदितुमि'त्यहं कामय इत्यात्मस्वामित्वानुभवस्य श्रुतिबाधितत्वाभाववर्णनमनर्थकमित्याशङ्क्य 'साक्षादनुभवारूढं शक्यतेऽपोदितुं क्वचिदि'ति पूर्वोक्तस्य निरपवादसाक्ष्यनुभवसिद्धत्वस्य श्रुतिबाधितत्वेनासिद्धिशङ्कापरिहारार्थत्वान्न तदिति भावेन तदसिद्धिशङ्कापरिहारकतया तद्योजयितुमात्मनः कामस्वामित्वानुभवस्यापवादशङ्कामुत्थापयति **यदुक्तमिति** । श्रुतेरनुभवबाधकत्वोपयोगिनीं तद्विरुद्धविषयतामुपदर्शयितुमुक्तं **मनसः कामस्वामित्वाभिधात्र्येति** । एतत्सर्वं मन एवेति श्रुताववधारणेन मनसः कारकान्तराप्रयोज्यत्वरूपस्वातन्त्र्योक्तिमभिप्रेत्येदमुक्तमिति ध्येयम् । विपरीत एव बाध्यबाधकभावः किन्न स्यादित्यतः श्रुतेरपौरुषेयतया निर्दोषत्वेन बलवत्त्वात् प्रत्यक्षस्य च पौरुषेयतया

सम्भावितदोषत्वेन दुर्बलत्वान्नैवमिति भावेनोक्तम् **अपौरुषेयत्वेन बलवत्येति** । उक्ताक्षेपस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **आत्मन इति शेष इति** । कुतो न शक्तेत्यतः श्रुतेः कामादिस्वरूपग्राहकानुभवोपजीवनेन प्रवृत्तत्वेनानुभवोपजीवकत्वान्न तद्बाधकत्वमित्यभिप्रेत्य कामादिरूपस्यापि श्रुत्यैव सिद्धत्वेन तत्स्वरूपग्राहकप्रत्यक्षोपजीवकत्वमेवासिद्धमित्यतो भवेदेवं यदि श्रुतेः कामादिस्वरूपबोधकत्वमपि स्यात् । न चैवम् । तथा सति श्रुतेरुभयत्र व्यापारापत्त्या गौरवप्रसङ्गात् । किन्तु लाघवात् तेषां मनोरूपत्वाभिधायकत्वमेवेत्यभिप्रेत्य किं तदुक्त्याऽपीत्यतस्तदुक्तेः प्रयोजनं तावद्दर्शयति **कामाद्यनुवादेनेति** । **वारयितुमिति** । मनसोऽचेतनतयां तदुपादानत्वसम्भवेऽप्यात्मनश्चेतनत्वेन ईश्वरवत् कामाद्युपादानत्वायोगादिति भावः । अस्तु श्रुतेः कामादिस्वरूपानुवादेन तेषां मनोरूपत्वाभिधायकत्वं किमेतावतेत्यत आह **कामादिस्वरूपं चेति** । **साक्ष्यनुभवेनैवेति** । 'न कश्चिद्धि तत्र संशयवान् क्वचित्' इति वक्ष्यमाणन्यायादिति भावः । अस्तु कामादिस्वरूपग्राहकस्यानुभवस्य श्रुतिं प्रत्युपजीव्यत्वं, तथाऽपि कुतो न श्रुतेस्तद्बाधकत्वमित्यत उपजीव्यविरुद्धत्वादित्यभिप्रेत्य तद्विरोधमुपपादयति **स चेति** । अस्त्वेवमुपजीवकभावो विरुद्धत्वं च । श्रुत्याऽनुभवबाधोऽस्त्वित्यत आह **न चेति** । तस्य तदपेक्षया दुर्बलत्वादिति भावः । न चागमस्य प्रत्यक्षापेक्षया प्राबल्यस्य 'प्राबल्यमागमस्यैव' इत्यादिना सिद्धत्वादनुभवबाधकत्वमस्त्वित्यत आह **वेदस्येति** । अयमर्थः । येन विना यस्यानुत्थानं तत्तस्योपजीव्यम् । यथा जीवादिरूपग्राहकमभेदागमं प्रति । तथा चोपजीवकविरोधेनोपजीव्यस्याप्यप्रामाण्ये सत्युपजीव्यस्य विषयो न सिद्ध्येत् । विषयाभावे चोदयाभावेनाबोधकत्वलक्षणमप्रामाण्यं प्राप्नोति । यद्धि स्वयं नोदेतुमलं नापि बोधयितुं कथं तदुपजीव्यमप्रमाणीकुर्यादित्यतोऽनपेक्षतया प्रबलस्योपजीव्यस्य विरोधेन सापेक्षतया दुर्बलस्योपजीवकस्य वेदस्यैवाप्रामाण्यमिति । जात्या प्रबलस्याप्युपजीव्यप्रत्यक्षापेक्षया दौर्बल्यमित्यत्र सम्मतिमाह **यथा आहुरिति** । यद्यप्युपजीव्यविरोधे त्वित्येतदेव विवक्षितार्थसाधकं तथाऽपि तत्रत्यामुष्येति पदार्थप्रतिपत्त्यर्थं पूर्ववाक्योदाहरणमिति द्रष्टव्यम् । **अत इति** । आगमस्यानुभवोपजीवकतया तदपेक्षया दुर्बलत्वादित्यर्थः ।

वा०र०— साक्षादनुभवारूढं शक्यते इत्येव प्राचीनानुव्याख्यानानुवादरूपः पाठः । अनुभवासिद्धमिति पाठेऽपि सिद्धमित्यारूढपदं अर्थतोऽनुदितं इति प्राहुः । वेदवाचः इति षठ्यनुसारेण धात्र्याः इतिवत्या इतीत्येवमसंहितप्रतीकोपादानपाठः । **वेदवाचेति** तृतीयापाठे तु धात्र्येति आदिरूपेण तदुपादानं च युक्तम् । **प्रत्यक्षस्य चापौरुषेयतयेति** । यद्यपि सर्वपुरुषाभ्यां णठञाविति एंतत्सूत्रीयपुरुषात् वधविकारसमूहतेन कृतेषु इति वक्तव्यं इति वक्तव्यात् तत्कृतवाक्यादिष्वेव पुरुषशब्दात् ठञि ञित्वात् आदिवृद्धौ तस्यायनीयः इत्येयादेशे यस्येति चेति अलोपे पौरुषेयशब्दनिष्पत्तेः । प्रत्यक्षस्य च तत्कृतवाक्यादिरूपत्वाभावात् न पौरुषेयशब्दमुख्यार्थत्वमिति प्रत्यक्षस्य पौरुषेयत्वोक्तिः कथमित्याभाति । तथापि प्रत्यक्षस्य पौरुषेयत्वोक्तिरौपचारिके वाक्येवाभिमतेति न दोषः । अत एव न हि अपौरुषेये पौरुषेयाः ज्ञानादयः कल्पयितुं क्याः इत्येतत् गीताभाष्यव्याख्यानावसरे अत्राज्ञानादीनां पौरुषेयत्वोक्तिरुपचारात् । पुरुषशब्दात् तत्कृतवाक्यादिष्वेव ठञः स्मरणादिति बोध्यम् । एवमन्यत्रापि वधविकारसमूहतेन कृतेत्येतत् अर्थाभावे उपचारेण प्रयोगो व्याख्येयः ।

प्रत्यक्षादेरागमस्य प्राबल्येऽपि नोपजीव्यप्रमाणविरोधे प्रामाण्यम् । विषयाभावे स्वस्यैवाप्रामाण्यप्राप्तेः इत्येतत् तत्त्वनिर्णयटीकानुसारेणाह **अयमर्थः येन विना यस्यानुत्थानमित्यादि । जात्या प्रबलस्यापीति** । उत्सर्गेण प्रबलस्यापीत्यर्थः । अत एव **उत्सर्गतो बलवत्त्वेऽपीति** मूलम् । जातेरुत्सर्गविषयत्वात् जातिपदेनोत्सर्ग उच्यत इति तत्त्वनिर्णयटीकां मनसि निधाय प्रमाणस्थजातिपदस्य मूलस्थोत्सर्गपदस्य च व्याख्यानव्याख्येयभावप्रदर्शनाय उत्सर्गतः इत्यस्य जातेत्यनुवादः कृत इत्यवधेयम् । **एतदेवेति** । यद्यपि जात्येत्युक्तोत्सर्गेण प्राबल्यं इत्येतत्प्रतिपादकपूर्वार्धस्यापि विवक्षितार्थसाधकता शक्यते वक्तुम् । उत्सर्गेणेत्युक्त्या बलवद्बाधकेन विरोधे तदप्रामाण्यस्यापि प्राप्तेः । तथापि उत्सर्गेण इत्येतद्विवरणार्थमेवोपजीव्यविरोधे तु इत्यस्य प्रवृत्त्योत्सर्गपदबलादेव विशिष्टार्थसमर्पणस्योत्तरवाक्यसापेक्षत्वमेवेति भावेन उत्तरवाक्यमेव विवक्षितार्थसाधकतयोक्तमित्यवधेयम् ।

विठ्ठल०— कामस्वामित्वाभिधात्र्येति । कामः सङ्कल्प इत्युक्त्वा एतत्सर्वं मन एवेत्युच्यते । मनसोऽनेकरूपत्वायोगात् 'यदधीना यस्य सत्ता तत्तदित्येव भण्यत' इति वचनात् कामादेर्मनोधीनत्वमेव श्रुत्यर्थ इति भावः । **आत्मोपादानत्वमिति** । इच्छादीनामनित्यानां गुणानामात्मैव समवायिकारणमिति वैशेषिकादिभिरङ्गीकारादिति भावः । **तस्योपजीव्यत्वमिति** । तस्य साक्षिणः श्रुतिं प्रत्युपजीव्यमित्यर्थः । अन्यथा कामादेः पूर्वमसिद्धत्वेनानुवादायोगादिति भावः ।

चषकः— यथाहुरिति । तत्त्वनिर्णयोदाहृतब्रह्मतर्कस्मृतिप्रणेतार इत्यर्थः । **जात्या** उत्सर्गतः ।

* * *

॥ अथ तत्रादौ उपजीव्यविरोधे वेदस्य तदन्याभिधायित्वम् ॥

७९ **सु०— तर्हि श्रुतेः का गतिरित्यत आह तस्मादिति ।**

अनु०— तस्मात्सा तदन्याभिधायिनी ।

उपजीव्यत्वेन बलवताऽनुभवेन बाधितत्वादित्यर्थः । तदन्याभिधायिनी स्वामित्वादन्यस्योपादानत्वस्याभिधायिनी ।

शे०वा०— तर्हीति । अपौरुषेयतयाऽनाशङ्कितदोषस्य वेदस्य सर्वथा निर्विषयत्वरूपाप्रामाण्यायोगादिति भावः ।

॥ इति उपजीव्यविरोधे वेदस्य तदन्याभिधायित्वम् ॥

* * *

॥ अथ तत्र उपपत्तिविरोधाच्चायुक्तत्वम् ॥
॥ अथ च तत्रादौ आपादकम्-(भविष्यन्मुक्तपुरुषान्मोक्षकामस्यान्यत्वे) ॥

८० **सु०— न केवलमुपजीव्यबाधात् किन्तूपपत्तिविरोधाच्चेत्याह मोक्षकाम इति ।**

अनु०— मोक्षकामो भवेदन्यो यदि मुक्ताद्भविष्यतः ।

यदि कामोऽन्तःकरणकर्तृकः स्यात् तदा मोक्षकामोऽप्यन्तःकरणस्यैव स्यात् । मोक्षस्तु आत्मन इति च प्रसिद्धम् । तथा च यो मुक्तो भविष्यति तस्मादन्य एव मोक्षकाम इत्युक्तं स्यात् । कामस्यान्यगतत्वे साधनानुष्ठाताऽप्यन्य एवेत्यङ्गीकर्तव्यम्, फलकामनासाधनानुष्ठानयोरेकनिष्ठत्वदृष्टेः । तथा च अकृताभ्यागमकृतविप्रणाशप्रसङ्गः ।

परि०— पूर्वार्धं योजयति **तथा च यो मुक्त इत्यादिना** । 'मोक्षकामो भवेदन्य' इत्युक्तयैव साधनानुष्ठाताप्यन्य इति प्राप्तमेवेति भावेनाह **कामस्येति** । **अन्येति** । मुक्तादिति योज्यम् । **एकनिष्ठत्वदृष्टेरिति** । 'योऽहं कामये सोऽहं साधनमनुतिष्ठामी'त्येकनिष्ठत्वानुभवादित्यर्थः । **अकृतेति** । आत्मनः स्वेनाननुष्ठितस्य साधनस्य प्राप्तिः स्यात् । अन्यथा मोक्षभाक्त्वायोगात् । साधनाभावे साध्यप्राप्तेरसम्भवात् । येनात्माऽन्येन साधनं कृतं तस्य विप्रणाशः स्यात् । तत्साध्यफलस्य तस्मिन्ननुष्ठातरि कदाप्यभावादित्यर्थः ।

वं०प०— **बाधात्** सा तदन्याभिधायिनीत्यर्थः । **मोक्षकाम इति** । मोक्षकामनावानित्यर्थः । कुत इत्यत आह **फलेति** । ततोऽपि किमित्यत आह **तथा चेति** । मोक्षसाधनं किमप्यात्मना न सम्पादितं तथाऽप्यात्मनो भवति मोक्ष इत्यकृतस्यासम्पादितसाधनस्य मोक्षस्यागम आत्मनः स्यात् । तथा अन्तःकरणेन कृतस्य मोक्षकामनया साधनानुष्ठानस्य विनाशः स्यात् । फलाभावेन व्यर्थतैव स्यादिति यावदिति भावः ।

श्रीनिधि०— मोक्षकाम इति । मोक्षेच्छेत्यर्थः ।

शे०वा०— ननु मोक्षकाम इत्युत्तरभाष्यमनर्थकम् । न च कामः सङ्कल्प इति श्रुतेर्मनसः कामस्वामित्वाभिधायित्वाभावोपपादनार्थं तदिति वाच्यम् । उपजीव्यानुभवबाधितत्वेनैव तत्सिद्ध्या तस्य वैयर्थ्यादित्यतस्तत्राकृताभ्यागमकृतविप्रणाशप्रसङ्गरूपयुक्त्यन्तरसूचकत्वान्न वैयर्थ्यमित्यभिप्रेत्य तत्सूचकतयोत्तरग्रन्थं योजयति **न केवलमिति** । नन्वत्र वाक्ये भविष्यतो मुक्तादन्यस्यान्तःकरणस्य मोक्षकामपक्षे तस्यापि प्रयोजनं स्यात् । तच्च नास्त्यतो न तस्य मोक्षकाम इत्युच्यते । तदयुक्तम् । अन्तःकरणस्य

कामाभ्युपगमेऽपि मोक्षकामस्यानभ्युपगमेन मोक्षस्याप्यात्मगतत्वासिद्धया च भविष्यतो मुक्तान् मोक्षकामो यद्यन्यः स्यादित्यापादकस्यासिद्धत्वात् । अस्तु वा कथञ्चित् तत्सिद्धिः । तथाऽपि साधनानुष्ठानस्य मनोगतत्वप्रापकाभावेनात्मगतत्वसम्भवात् अकृताभ्यागमकृतविप्रणाशाप्रसङ्गात् तद्रूपयुक्तेर्मूलादलाभ एवेति नोक्तयुक्त्यभिधायकत्वमस्य ग्रन्थस्येत्यतः तद्युक्तिसमर्पकतासिद्धयर्थमपेक्षिताध्याहारेणापादकसमर्पकतया तावद्वाक्यं योजयति **यदीत्यादीना** । **मोक्षकामोऽपीति** । तस्यापि कामत्वादिति भावः । एवमन्तःकरणस्य मोक्षकाममुपपाद्य तस्य मुक्तादन्यत्वमुपपादयितुं मोक्षस्यात्मगततामुपपादयति **मोक्षस्त्विति** । मूले व्याप्योक्त्या तद्व्यापकस्य साधनानुष्ठातुरन्यत्वस्यापि सूचितत्वात् तत्सिद्धिरित्यभिप्रेत्य मनसः साधनानुष्ठातृतामुपपादयति **कामस्येति** । किमेतावता सिद्धयतीत्यतो मूलग्रन्थस्यापेक्षितयुक्तिसमर्पकतेत्यभिप्रेत्य अभिप्रेतां युक्तिमुपन्यस्यति **तथा चेति** ।

वा०र०— मोक्षकामस्यानभ्युपगमेनेति । आपादकस्यासिद्धत्वात् इत्युत्तरेण सम्बन्धः । न केवलं मोक्षकामोऽन्यस्य वाऽङ्गीकृत इति मुक्तात् मोक्षकामोऽन्यः इत्यापादकासिद्धिरपि तर्हि आत्मनो मोक्षाभावेन मुक्तादन्यः इत्यस्यासिद्धिरित्याह **मोक्षस्यात्मगतत्वासिद्धया चेति** । तद्रूपयुक्तेति पाठः । **साधनानुष्ठातुः अन्यत्वस्येति** । युक्तादन्यत्वस्येत्यर्थः ।

विष्टल०— मूलं व्याख्यातुं तदाक्षिप्योपपत्तिमाह **यदीति** । **तथा चाकृताभ्यागमेति** । फलकामनावतो मनस एव साधनानुष्ठातृत्वप्राप्त्या मोक्षसाधनस्याकृतत्वेऽप्यात्मनो मोक्षाभ्यागमः मनसस्तु कृतसाधनं विप्रणादा इत्यर्थः ।

॥ इति आपादकम्-(भविष्यन्मुक्तपुरुषान्मोक्षकामस्यान्यत्वे) ॥

* * *

॥ अथ ततः आपाद्यप्रदर्शनम् ॥
॥ अथ तत्रादौ मोक्षकामस्य स्वप्रयोजनाभावः ॥

८१ **सु०— ननु नायं दोषः, पुरुषविमोक्षार्थं प्रकृतिप्रवृत्त्यभ्युपगमात् । दृश्यते हि परप्रयोजनार्थं जनानां प्रवृत्तिरिति । अत्रेदमुपतिष्ठते मोक्षकामस्येति ।**

अनु०— मोक्षकामस्य किं तेन

उपलक्षणमेतत् । साधनानुष्ठातेत्यपि द्रष्टव्यम् ।

परप्रयोजनार्थं प्रवर्तमानाः खलु लोके दृष्टमदृष्टं वा किमपि प्रयोजनमनुसन्दधानाः प्रायेणोपलब्धाः । तथाऽत्रापि प्रकृतेः प्रयोजनेन भाव्यम् । न च तदस्तीत्यर्थः ।

परि०— त्रिपादीमेकवाक्यतया योजयितुं चोदयति **नन्विति** । दयालुव्यावृत्त्यर्थं **प्रायेणेति** । मोक्षकामस्य किं तेनेत्याक्षेपार्थककिंशब्दलब्धार्थमाह **न च तदस्तीत्यर्थ इति** ।

यादु०— एवं मूलाक्षिप्तोपपत्तिमभिधाय मूलमुत्थापयति **ननु नायमिति** । ईश्वरे स्वप्रयोजनानुसन्धानाभावेऽपि प्रवृत्तेर्दर्शनादाह **प्रायेणेति** । **न च तदस्तीति** । प्रमाणाभावादिति भावः ।

वं०प०— 'मोक्षकामस्य किं तेने'त्यस्याभिप्रायमाह **न च तदस्तीति** । मोक्षकामस्यान्तःकरणस्य तेन कामेन किं प्रयोजनं न किमपीति मूलार्थो द्रष्टव्यः ।

श्रीनिधि०— अत्रेदमुपतिष्ठत इति । एतच्छङ्कानिरासार्थत्वेनापीति भावः । पशूनां पशुप्रायाणां चापत्यापालनादौ प्रवृत्तिदर्शनेन **प्रायेण** इत्युक्तम् ।

शे०वा०— एवमापादकसमर्पकतया मूलं योजयित्वा तर्हि तावतैवोक्तयुक्तिविरोधसूचनसिद्धेः पुनस्तेन मनसः प्रयोजनापादनानर्थक्यमित्यतः शङ्कान्तरनिवर्तकत्वान्न तदितिभावेन शङ्कान्तरनिवर्तकतया तत्सार्थक्यमुपदर्शयितुं तां शङ्कामुत्थापयति **नन्विति** । **अत्रेदमिति** । अत्रापीदमित्यर्थः । विशिष्टस्यापादकस्य मूले साक्षादनुक्तेस्तल्लाभायापेक्षितमुपलक्षणतया पूरयति **उपलक्षणमिति** । परप्रयोजनार्थकजनप्रवृत्तौ व्यभिचारान्न प्रयोजनापादनमुपपन्नमित्यतः तत्राप्यापाद्यस्य सत्त्वान्न व्यभिचार इत्यभिप्रेत्य व्याप्त्युपपादनपूर्वं मोक्षकामस्य किं तेनेत्यापाद्यप्रदर्शनपरं मूलं व्याचष्टे **परप्रयोजनार्थमित्यादिना** । **प्रयोजनमिति** । स्वसम्बन्धिप्रयोजनमित्यर्थः । ईश्वरे स्वप्रयोजनानुसन्धानाभावेऽपि प्रवृत्तेर्दर्शनादाह **प्रायेणेति** । **न च तदस्तीति** । प्रमाणाभावादिति भावः ।

विट्ठल०— एवं मूलाक्षिप्योपपत्तिमभिधाय मूलमुत्थापयति **ननु नायमिति** । ईश्वरस्य स्वप्रयोजनाभावेऽपि प्रवृत्तेर्दर्शनादाह **प्रायेणेति** । **न च तदस्तीति** । एतेन मोक्षकामस्य मनस्तेन मोक्षकामनेन किं प्रयोजनं न किञ्चिदस्ति सद्भावे प्रमाणाभावादिति तृतीयपदार्थः सूचितो भवतीति ज्ञेयम् ।

॥ इति मोक्षकामस्य स्वप्रयोजनाभावः ॥

* * *

॥ अथ तत्र स्वनाशार्थश्च प्रयत्नानुपपत्तिः ॥

८२ **सु०— 'स्यादेतत् । स्वप्रयोजनमननुसन्धायैव जीवमोक्षार्थं प्रकृतेः प्रवृत्तिः, यथा कृपालुत्वेन भवतामीश्वरस्ये'त्यत आह स्वनाशार्थं चेति ।**

अनु०— स्वनाशार्थं च को यतेत् ।

न केवलं परप्रयोजनार्था प्रकृतेः प्रवृत्तिर्युज्यते । प्रकृतिलयो हि मोक्षो नाम । न हि कोऽपि कृपालुरात्मनाशार्थं यतमानो दृष्ट इति ।

यद्यप्यत्रानाधेयातिशयस्य निष्क्रियस्योपकार्यत्वमपि क्वचिन्न दृष्टमित्येव वक्तव्यम्, तथाऽपि तच्छिष्यैरेवोह्यतामिति तदभ्युपगमेन दूषणान्तरमिदमुक्तम् ।

यादु०— केवलमिति । स्वप्रयोजनाभावेऽपीत्यर्थः । **निष्क्रियस्येति** । पुरुषस्तु तादृश इति भावः । **तदभ्युपगमेनेति** । उपकार्यत्वाभ्युपगमेनेत्यर्थः ।

वं०प०— अनाधेयेति । आत्मन इति शेषः । तथा चान्तःकरणेनात्मनः करणीयोऽतिशयः पूर्वमप्राप्तः को वाऽस्तीति भावः । **तदभ्युपगमेनेति** । उपकार्यत्वाभ्युपगमेनेत्यर्थः ।

श्रीनिधि०— न केवलं परप्रयोजनार्थेति । केवलमित्यस्य परप्रयोजनार्थेत्यनेनान्वयः । न तु युज्यत इत्यनेनेति द्रष्टव्यम् ।

शे०वा०— ननु 'स्वनाशार्थं च को यतेदि'ति प्रकृतेः स्वनाशार्थं प्रवृत्त्यसम्भववर्णनमनर्थकम् । न च प्रकृतिप्रवृत्तेः परप्रयोजनार्थत्वासम्भवप्रदर्शनार्थं तदिति वाच्यम् । परप्रयोजनार्थं प्रवृत्तेः स्वसम्बन्ध्युक्तद्विविध-प्रयोजनपूर्वकत्वनियत्या तदभावादेव तदभावसिद्ध्या तदर्थमस्यानपेक्षितत्वादित्यतस्तस्य नियमस्य भगवत्प्रवृत्तौ व्यभिचारेण प्रायिकत्वावश्यम्भावेन तदभावेन प्रकृतेः परप्रयोजनार्थं प्रवृत्त्यभावस्यासिद्ध्या तत्सिद्ध्यर्थ-त्वात् नानुपपत्तिरित्यभिप्रेत्य उक्तनियमाभावशङ्कामुत्थापयति **स्यादेतदिति** । **न केवलं परप्रयोजनार्थेति** । स्वप्रयोजनाभावे सति परप्रयोजनार्थेत्यर्थः । ननु च कथं पुरुषमोक्षार्थप्रकृतिप्रवृत्तेः स्वनाशार्थत्वमित्यत-स्तद्दर्शयति **प्रकृतिलयो हीति** । ननु च कृपालुत्वेन परप्रयोजनार्थं प्रवृत्तिवत् तत एव स्वनाशार्थोऽपि प्रकृतेः प्रवृत्तिर्भविष्यतीत्याशङ्क्य परप्रयोजनार्थं प्रवृत्तेरन्यत्र दृष्टतया सम्भावितत्वेन शङ्कास्पदतायामपि स्वनाशार्थं प्रवृत्तेरदृष्टत्वेनासम्भावितत्वान्न शङ्कास्पदत्वमपीति न तच्छङ्कानिरासोऽपि भाष्येऽभिहित इति

भावः । अल्पप्रयत्ननिरसनीयशङ्कानिरासाय बहुप्रयत्नानुष्ठानेन प्रसक्तां भाष्यकाराणामचातुरीमाशङ्क्य परिहरति **यद्यपीति** । अनाधेयातिशयत्वमेव कुत इत्यत उक्तं **निष्क्रियस्येति** । पुरुषस्तादृश इति भावः । **तदभ्युपगमेनेति** । उपकार्यत्वाभ्युपगमेनेत्यर्थः । **इदमुक्तमिति** । परप्रयोजनार्थं प्रकृतेः प्रवृत्तिरिति परकीयशङ्काया निष्क्रियतया अनाधेयातिशयस्योपकार्यत्वानुपपत्तेर्न परप्रयोजनार्थं प्रकृतेः प्रवृत्तिरित्येतावतैव परिहारसम्भवात् मोक्षकाम इत्यादिकं यद्यपि व्यर्थमेव, तथापि स्पष्टत्वात् तच्छिष्यैरेवोह्यतामिति भावेन तदनुक्त्वा तादृशस्याप्युपकार्यत्वं चाभ्युपेत्य मोक्षकाम इत्यादिना दूषणान्तरमेवोक्तमित्यर्थः ।

वा०र०— उक्तद्विविधेति । दृष्टादृष्टरूपद्विविधेत्यर्थः । **तदभावेनेति** । दृष्टादृष्टप्रयोजनाभावेनेत्यर्थः । **तत्सिद्ध्यर्थत्वादिति** । परप्रयोजनार्थं प्रवृत्त्यभावस्य सिद्ध्यर्थत्वादित्यर्थः । प्रकारान्तरेणेति शेषः । केवलं यत् परप्रयोजनं तदर्थेति मूलार्थलाभाय केवलमित्येतद्योजयति **स्वप्रयोजनाभावे सतीति** । इत्याशङ्क्येत्यनन्तरं निराकरोति । न हि कोऽपीतीति प्रतीकोपादानानन्तरं परमप्रयोजनार्थं इत्यादि भावः इत्यन्तो ग्रन्थपाठः । अभिहितः इति भावेनाह न हि कोऽपीतीति पाठो वा टीकायामवधेयः । अन्यादृशो लेखकागतः । उभयत्रापि प्रतीकोपादानशून्यत्वात् । **निष्क्रियस्येति** मूलम् । आत्मन इति शेषः । पूर्वोत्तरदलार्थं मिलित्वा आह **परप्रयोजनार्थं प्रकृतेरित्यादिना** ।

विट्ठल०— न केवलमित्यत्र नेत्यस्य युज्यत इत्यनेन सम्बन्धः । केवलमित्यस्य स्वप्रयोजनाभावेऽपीत्यर्थः । **अनाधेयातिशयस्येति** । पुरुषो हि निर्विकार इति परेणाभ्युपगतं न च तादृशस्य मनसा कृतेनोपकारेण । मोक्षरूपातिशयोऽपि युज्यत इति भावः । **तदभ्युपगमेनेति** । उपकार्यत्वाभ्युपगमेनेत्यर्थः ।

* * *

॥ अथ तत्रादौ अभ्यधिकाशङ्कानिरासः ॥

८३ सु०— नन्विदमयुक्तम् । चेतनो हि स्वप्रयोजनमनुसन्दध्यात्, स्वनाशाच्च बिभ्यत् परावर्तेत; प्रकृतिस्त्वचेतना कथमेवं पर्यनुयोगमर्हतीति । एवं तर्हि कथमात्ममोक्षमप्यनुसन्धाय प्रवर्तेत ॥ स्वभावोऽयं प्रधानस्येति चेत् । तर्हि कदाऽपि संसारोऽस्य न स्यात् ॥ भोगार्था प्रवृत्तिः प्रकृतेः स्वभाव इति चेत्, तर्हि मोक्षाभावः ॥ उभयस्वभावत्वे तूभयं न स्यात्, विरोधात् । अविरोधे वा युगपदुभयं स्यात्, व्यवस्थापकाभावात् ॥ भोगेषूपभुक्तेषु मोक्षार्थेति चेन्न, भोगानामानन्त्येनापरिसमाप्तेरिति ।

परि०— कदापि संसारोऽस्य न स्यादिति । मोक्षार्थं प्रवृत्तिस्वभावस्य प्रधानस्य संसारापादकत्वायोगादिति भावः । **उभयं न स्यादिति** । मोक्षः संसारश्चेत्युभयमित्यर्थः (विरोधादिति भावः) । **अविरोधे वेति** । उभयस्वभावस्येति योज्यम् ।

वं०प०— एवं स्वनाशार्थमित्यनेन क्रियमाणम् । **आत्मेति** । जीवेत्यर्थः । अयं आत्ममोक्षानुसन्धानेन प्रकृतिप्रयत्न इत्यर्थः । **तर्हीति** । उक्तस्वभावोपेतप्रकृतेः सर्वदा सत्त्वादित्यर्थः । **तर्हीति** । भोगार्थप्रवृत्तेः स्वभावत्वादिति भावः । **विरोधादिति** । मोक्षार्थं भोगार्थं च प्रवृत्तिरिति परस्परविरुद्धोभयस्वभावकल्पने परस्परविरोधेनैकमपि कार्यं न स्यात् । तथा च भोगमोक्षावुभावपि न स्यातामित्यर्थः । **अविरोधे** उभयस्वभावयोः प्रकृताविति शेषः । **व्यवस्थापकेति** । एतादृशकाले भोगार्था, एतादृशकाले मोक्षार्थेति व्यवस्थापकाभावेन युगपद्भोगमोक्षौ स्यातामित्यर्थः । व्यवस्थापकमाशङ्कते **भोगेष्विति** । **उपभुक्तेषु** तदुपभोगानन्तरमित्यर्थः ।

कं०रा०— भोगार्थेति । आत्मभोगार्थेत्यर्थः । **तर्हीति** । आत्मभोगार्थप्रवृत्तेः । प्रकृतिस्वभावत्वे प्रकृतिरात्मनो भोगार्थमेव सदा प्रवर्तेतेति तस्य मोक्षाभावः स्यादित्यर्थः । ननु प्रकृतेरात्मभोगार्थप्रवृत्तितन्मोक्षार्थप्रवृत्त्योः स्वभावत्वमङ्गीक्रियते त उभयार्थप्रवृत्तिसम्भवेनोभयं युक्तमित्यत आह **उभयेति** । प्रकृतेरुभयस्वभावत्वेऽङ्गीक्रियमाणे आत्मनो भोगरूपसंसारो मोक्षश्चेत्युभयं न स्याद्विरोधेनोभयस्वभावत्वस्यैवानुपपत्त्योभयार्थप्रवृत्तेरयोगादित्यर्थः । **अविरोध इति** । प्रकृतेरुभयस्वभावत्वस्याविरोधे वा संसारो मोक्षश्चेत्युभयमात्मनो युगपत्स्याद्व्यवस्थापकाभावेनोभयार्थप्रवृत्तियौगपद्यावश्यंभावादिति भावः ।

शे०वा०— तर्हीति । स्वभावस्यानपायादिति भावः । ननु चोभयस्वभावत्वेनान्यतरमात्रस्वभावत्वाभावात् संसारमोक्षौ सम्भवत इत्यत आह **उभयस्वभावत्व इति** । तत्कुत इत्यतः किं तौ विरुद्धावुताविरुद्धाविति विकल्प्य आद्यं दूषयति **विरोधादिति** । परस्परप्रतिबन्धादिति भावः । द्वितीयं दूषयति **अविरोधे वेति** । **व्यवस्थापकेति** । अविरोधेऽप्येकदैकमेव भवति नापरम् । तत्राप्यादौ संसार एव अनन्तरमेव मोक्ष इत्यत्र नियामकाभावादित्यर्थः । ननु भोगप्रदानपूर्वं मोक्षप्रदानप्रवृत्तेरेव स्वभावत्वमिति तादृशस्वभाव एव व्यवस्थापको भविष्यतीति न तदभावः । न च वैपरीत्यमपि शङ्क्यम्, मोक्षस्य भोगनिवृत्तिरूपत्वेनादौ भोगस्यापेक्षिततया तदसम्भवादिति शङ्कते **भोगेष्विति** ।

स०व्र०— व्यवस्थापकेति । अविरोधेऽपि एकदैकमेव भवति नापरम् । तत्राप्यादौ संसार एव, अनन्तरमेव मोक्ष इत्यत्र नियामकाभावादित्यर्थः । ननु भोगप्रदानपूर्वं मोक्षप्रदानप्रवृत्तेरेव स्वभावत्वमिति तादृशस्वभाव एव व्यवस्थापको भविष्यतीति न तदभावः । न च वैपरीत्येन प्रवृत्तिः किं न स्यादिति

वाच्यम् । मोक्षस्य भोगनिवृत्तिरूपत्वेनादौ भोगस्यावश्यकत्वात् । केचित्तु व्यवस्थापककथनार्थमिदं नोच्यते । किं तु विशिष्टस्वभाव एवेत्युपपादयितुमित्याहुः ।

विट्ठल०— तर्हीति । पुरुषमोक्षार्थप्रवृत्तेः प्रधानस्वभावत्वे सदातनत्वात् स्वभावस्य कदापि पुरुषस्य संसारो न स्यादित्यर्थः । स्वभोगार्थं प्रवृत्तेरपि स्वभावत्वेन संसारोपपत्तिरित्याशङ्क्य स्वभावस्यानपायान्मोक्षाभाव एव स्यादित्याह **स्वभोगार्थ इति** । प्रसङ्गपरमूलवाक्येनाक्षिप्यार्थ इत्यर्थः ।

* * *

॥ इति अभ्यधिकाशङ्कानिरासः ॥

* * *

॥ अथ तत्रान्ते प्रसङ्गस्य स्पष्टीकरणञ्च ॥

८४ सु०— अयं प्रसङ्गार्थः । यद्यात्मा न कामकर्ता स्यात् तदा मुमुक्षुरपि न स्यात्, ततश्च न तदर्थं प्रयतेत, तथा च न मुच्येत; परप्रवृत्तेः स्वप्रयोजनभावाभावयोरयुक्तत्वादिति ।

'बहुलमेतन्निदर्शनमि'ति स्मरणात् यतेदिति परस्मैपदम् । तथा चाह 'चन्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदमि'ति ।

परि०— अस्फुटत्वादाह **अयं प्रसङ्गार्थ इति** । **अयुक्तत्वादिति** । प्रयोजनभावपक्षे प्रमाणाभावरूपदोषस्याभावपक्षे च प्रवृत्त्ययोगरूपदोषस्योक्तत्वादित्यर्थः । ननु यती प्रयत्न इति धातोः 'अनुदात्तङित आत्मनेपदमि'त्यात्मनेपदे सति यतेतेति स्यात् । कथं यतेदिति परस्मैपदमित्यत आह **बहुलमिति** । पाणिनिना हि स्वकृतधातुगणपाठे परस्मैपद्यात्मनेपद्युभयपदिनो धातूनुक्त्वा 'बहुलमेतन्निदर्शनं' धातुषु परस्मैपदित्वादिनिदर्शनं बहुलं ज्ञेयम् । अन्यपदित्वमप्युपलभ्यते प्रौढप्रयोगेष्वित्युक्तत्वादित्यर्थः । 'इन्द्रश्चन्द्रःकाशकृत्स्नापिशलीः शाकटायनः । पाणिन्यमरजैनेन्द्रा एतेष्टावादिशाब्दिका' इत्युक्तव्याकरणान्तरकृतामपि सम्मतत्वादित्याह **चन्द्रादयस्त्विति** । धातुवृत्तौ तु चक्षिङ्व्यक्तायां वाचीत्यस्य धातोरनुदात्तत्वेनैवात्मनेपदसिद्धौ ङित्करणं व्यर्थं सत् एवमादिधातोः परस्मैपदित्वमप्यस्तीति ज्ञापयतीत्युक्तम् ।

यादु०— नन्वनेनान्तःकरणस्य कामकर्तृताप्रतिषेध एव सिद्ध्यति न प्रकृतमात्मनस्तत्कर्तृत्वमत आह **अयं प्रसङ्गार्थ इति** । प्रसङ्गपरमूलवाक्येनाक्षिप्तोऽर्थ इत्यर्थः । ननु पुरुषे मुमुक्षाप्रयत्नयोरभावादापादनमिष्टमेव । तन्मोक्षार्थं प्रकृतेरेवेच्छाप्रयत्नरूपप्रवृत्तेरभ्युपगमादित्याशङ्कानिरासाय मोक्षकाम इति मूलं प्रवृत्तमित्याशयेन तत्तात्पर्यमाह **परप्रवृत्तेरिति** । प्रकृतिप्रवृत्तेरित्यर्थः । **स्वप्रयोजनभावाभावयोरिति** । स्वप्रयोजनभावपक्षे प्रमाणाभावेन तदभावपक्षे स्वनाशार्थं यत्नादर्शनेनायुक्तत्वादित्यर्थः । यद्यप्येषात्मनः कामकर्तृत्वसाधकोपपत्तिरादावेव व्याख्यातुं शक्या तथाऽप्यन्तःकरणस्य कामकर्तृताप्रतिषेधकोपपत्तिरप्यनेन मूलेनोक्तरीत्याऽऽक्षिप्तेति दर्शयितुमित्थं व्याख्यातमिति ध्येयम् । ननु यततेरात्मनेपदित्वात् यतेदिति परस्मैपदप्रयोगः कथमुपपद्यत इत्यत आह **बहुलमेतदिति** । पाणिनीयधातुपाठे परस्मैपद्यात्मनेपद्युभयपदिनो धातून् प्रदर्श्य 'बहुलमेतन्निदर्शनमि'त्युक्तम् । तस्य चायमर्थः । एतन्निदर्शनं धातुषु परस्मैपदादिप्रदर्शनं बहुलं ज्ञातव्यम् । अन्यपदित्वेनोक्तधातोरन्यपदप्रयोगोऽप्यभियुक्तप्रयोगानुसारेण युज्यत इत्यर्थ इति । तथा च भगवतो भाष्यकारस्याभियुक्ततमत्वादेतद्वचनबलेन तदीयो यतेदिति प्रयोगो युक्त एवेत्यर्थः । समाधानान्तरमाह **तथा चाहेति** । चन्द्रादिकृतव्याकरणान्तरे सर्वधातूनामुभयपदितया उक्तत्वादयं परस्मैपदिप्रयोगो युक्त एवेत्यर्थः ।

वं०प०— **तदर्थे** मोक्षार्थे । ननु मुमुक्षुर्न स्यात् तथा च न प्रयतेतेत्यापादनमयुक्तम् । अन्तःकरणस्यैव जीवमोक्षार्थं मोक्षकामनायाः प्रयत्नस्य चाङ्गीकारेणेष्टापत्तेरिति चेत् तत्राह **परप्रवृत्तेरिति** । परार्थं प्रवृत्तेरित्यर्थः । स्वप्रयोजनभावाभावयोः पक्षयोरुक्तदूषणाभ्यामिति शेषः । तथा हि । परार्थं प्रवृत्तिर्दृष्टमदृष्टं वा किञ्चित्स्वप्रयोजनमुद्दिश्य वा स्यात् । केवलं कृपालुत्वेन परप्रयोजनोद्देशेन वा । नाद्यः । अदर्शनात् । न द्वितीयः । स्वनाशार्थं च को यतेदित्युक्तत्वादित्येवं स्वप्रयोजनभावाभावपक्षयोरुक्ताभ्यां दूषणाभ्यां परार्थप्रवृत्तेरयुक्तत्वादित्यर्थः । ननु यती प्रयत्न इति धातोर्विधिलिङात्मनेपदत्वाद्भवेतेतिवत् यतेतेति स्यान्न यतेदिति परस्मैपदमिति तत्राह **बहुलमेतदिति** । **एतत्** अयं धातुरात्मनेपदी अयं धातुः परस्मैपदीत्येवं प्रदर्शनम् । **बहुलं** प्रायिकम् । अभियुक्तव्यवहारश्चेदन्यथाऽपि ज्ञेयमित्यर्थः ।

कं०रा०— ननु यती प्रयत्न इति पठितस्य यततेरनुदानत्वेन नित्यात्मनेपदित्वात् स्वनाशार्थं च को यतेदिति परस्मैपदं कथं प्रयोजीत्यत आह **बहुलमेतदिति** । यद्यपि बहुलमेतन्निदर्शनमित्येतद्धातुवृत्तौ चुरादौ वदन्तधातुनिदर्शनं बहुलं वेदितव्यम् । अतोऽनुक्ता अपि धातवो वेदितव्या इति व्याख्यातम् । तथापि चुरादिष्वनुक्तानामप्यदन्तधातूनां प्रयोगदर्शनेन तस्य तथा व्याख्यानवत् क्वचिदात्मनेपदिनां परस्मैपदित्वेन परस्मैपदिनां चात्मनेपदित्वेन प्रयोगस्य दर्शनेन एतदात्मनेपदादिनिदर्शनं बहुलं वेदितव्यमित्यपि व्याख्यानस्य कर्तव्यात् बहुलमेतन्निदर्शनमिति स्मरणाद्यतेदिति परस्मैपदं युक्तमिति भावः । एतच्चोपलक्षणं च क्षिटो टकारोऽनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः । तेन तालैः सिञ्चद्वलयसुभगैः तृष्णे जृम्भसि प्रार्थयन्ति शयनोत्थितं पयि इत्यादयः प्रयोगा उपपद्यन्त इत्युत्तरधातुवृत्तावुक्तत्वेनानुदात्तेत्वप्रयुक्तस्यात्मनेपदस्यानित्यत्वात् यतेदिति परस्मैपदं युक्तमित्यपि द्रष्टव्यम् ।

श्रीनिधि०— बहुलमेतन्निदर्शनमिति । एतन्निदर्शनम् । एतदात्मनेपदज्ञापनं बहुलं क्वचित् स्यात् क्वचिन्न स्यात् क्वचिद्वा स्यात् क्वचिदन्यथैव स्यादित्यर्थः । धातुवृत्तिवाक्यमिदम् । **चन्द्रादय इति** । अष्टादशव्याकरणकर्तारश्चन्द्रादय इत्यर्थः ।

शे०वा०— नन्वनेनान्तःकरणस्य कामं प्रति स्वामित्वाभावमात्रं सिद्धं, न त्वात्मनस्तत्स्वामित्वमपीति कथमस्य प्रकृतोपयोग इत्यत आह **अयमिति** । प्रसङ्गपरमूलवाक्येनाक्षिप्तोऽर्थ इत्यर्थः । ननु पुरुषे मुमुक्षाप्रयत्नयोरभावापादनमिष्टमेव । तन्मोक्षार्थं प्रकृतेरेवेच्छाप्रयत्नरूपप्रवृत्तेरभ्युपगमादित्यत आह **परप्रवृत्तेरिति** । परस्य प्रधानस्य या प्रवृत्तिस्तस्या इत्यर्थः । **स्वेति** । स्वप्रयोजनपूर्वकत्वतदपूर्वकत्वपक्षयोर्दोषाणामुक्तत्वादित्यर्थः । इतीत्यस्येत्ययं प्रसङ्गार्थ इति पूर्वेण सम्बन्धः । ननु च यततेरनुदात्तत्वेनात्मनेपदित्वात् यतेतेति आत्मनेपदेन भवितव्यम् । तत्कथं मूले यतेदिति परस्मैपदप्रयोग इत्यत आह **बहुलमेतदिति** । यद्यपीदमेतच्चुरादावदन्तधातुदर्शनं बहुलं वेदितव्यम्, अतोऽनुक्ता अपि इह धातवो वेदितव्या इति **भुवादिष्वदन्तेषु** दशगणेषु धातूनां निदर्शनं बहुलं वेदितव्यं तेनात्र अपठिता अपि सौत्रा लौकिका वैदिका वा ग्राह्या इति नवगणीपठितेभ्योऽपि क्वचित्स्वार्थे णिच् रामो राज्यमचीकरदिति यथेति चुरादिभ्य एव बहुलं णिजिति च पैर्व्याख्यातम् । तथाऽप्येतदात्मनेपदपरस्मैपदनिदर्शनं बहुलं ज्ञेयमित्येतद्वचनार्थं मनसि निधायास्यात्रोपन्यासः । एतच्छब्देन प्रकृतात्मनेपदनियमनस्यापि परामर्शसम्भवात् । ततश्च युक्तमेव नियतात्मनेपदस्याप्यस्यैतद्वचनबलेन परस्मैपदित्वमिति भावः । प्रकारान्तरेण समाधत्ते **तथा चाहेति** । चान्द्रादिव्याकरणान्तरे धातुमात्रस्योभयपदिताया उक्तत्वात् तदनुसारेण यतेदिति परस्मैपदप्रयोग उपपन्नतर इति भावः ।

वा०र०— यद्यपीदमिति । आद्यं व्याख्यानद्वयम् । धातुवृत्त्यादौ । तृतीयं प्रसादशेषी सिद्धान्तकौमुदीषु । चतुर्थं सिद्धान्तकौमुद्यां अन्यदीयत्वेनानूदितमिति विवेकः । उपलक्षणं चैतत् । धातूनामर्थनिर्देशो निदर्शनार्थः । किन्तु अर्थान्तरमपि ग्राह्यम् । प्रयोगतोऽनुगन्तव्याः अनेकार्था हि धातवः इत्युक्तेः इति व्याख्यानान्तरमपि द्रष्टव्यम् । चूरादौ इत्याद्युक्त्वा पर्णहरितभावे पर्णयति । विष्कयतीत्यादिकं अवधीरयति इत्यादयो यथाभिधानमिति मैत्रेयादयः इत्युक्त्वा अन्ये तु भुवादिषु एतदन्तेषु दशगणेषु इत्यादेः धातुवृत्तौ उक्तेरिति ज्ञेयम् । **सौत्रा इति** । स्तुभुञ् प्रभृतयः । **लौकिका वैदिकाश्चेति** । धातुवृत्तौ तु चुलुपादयो वाच्यकारीयाः प्रयोगसिद्धावित्यादयश्च गृह्यन्ते । मित्वंत्याशासु जीयुतावित्तवन्तेदिवि विग्रहाः । 'क्षयन्ति विद्युतः प्रावृट् क्षीयन्ते कामविग्रहाः' इत्यादयः प्रयोगाः उपपद्यन्ते इत्युक्तम् । सर्वेऽप्येते पक्षाः प्रामाणिकाः इत्यादिकं च तत्र तत्रैवोक्तम् । **इत्येतद्वचनार्थं मनसि निधायेति** । अयं चार्थः । .....वृत्तावुक्त इति ज्ञेयम् । प्रकृतोपयोगमाह **ततश्चेति** । तथा चाहेत्यस्य पूर्वोक्तार्थसम्मतिकथनताप्रतीतिनिरासाय तथोभयपदित्वं अन्यश्चाहेति योजनां सूचयन्नवतारयति **प्रकारान्तरेणेति** । यद्वैतदस्वरसादेव प्रकारान्तरेणेति इति पाठः । अत एवोपपन्नतर इति वक्ष्यति । पाणिनिव्याकरणोक्तप्रकारेणेत्यर्थः । चान्द्रादयः इत्येतद्वाक्यं चान्द्रादिव्याकरण-

स्यैव साधकत्वे पर्यवसायीत्याशयेनाह **चान्द्रादीति** । **उपपन्नतर इति** । बहुलग्रहणस्यार्थान्तराश्रयणक्लेशाभावादिति भावः ।

स०व्र०— ननु मोक्षार्थमात्मनः प्रवृत्त्यभावेऽपि प्रधानस्यैव तदर्थं सा भविष्यतीत्यत आह **परप्रवृत्तेरिति** । परस्य प्रधानस्य प्रवृत्तेरित्यर्थः । किं स्वप्रयोजनमुद्दिश्य प्रवृत्तिः, उत परप्रयोजनमुद्दिश्य । आद्ये स्वप्रयोजनस्यानुपलम्भः । द्वितीये स्वप्रयोजनाभावे केवलं परप्रयोजनोद्देशेन प्रवृत्तेरदृष्टत्वादिति भावः । **बहुलमेतन्निदर्शनमिति** । पाणिनीयधातुपाठे धातुषु परस्मैपदात्मनेपदोभयपदादिकं विविच्य प्रदर्श्य अन्ते 'बहुलमेतन्निदर्शनमि'त्युक्तत्वात् तदनुसारेण आचार्यस्याप्यभियुक्ततरत्वात् तत्कृत 'यतेदि'ति परस्मैपदप्रयोगसम्भवात् न तस्यापशब्दत्वमिति भावः । प्रकारान्तरेण समाधत्ते **तथा चाहेति** । चान्द्रादिव्याकरणान्तरे धातुमात्रस्योभयपदित्वेन सम्मतत्वात् तदनुसारेण परस्मैपदप्रयोगसम्भवात् न तस्य अपशब्दत्वमिति भावः ।

विठ्ठल०— ननु स्वमोक्षार्थमात्मनः प्रवृत्त्यभावेऽपि कृतेः प्रवृत्त्या मोक्षोपपत्तिरित्यङ्गीकारादात्मनः प्रवृत्त्यभावापादनमिष्टापादनरूपमेवेत्यत आह **परप्रवृत्तेरिति** । प्रकृतेः प्रवृत्त्या पुरुषस्य मोक्ष इत्युपपन्नप्रकृतेः स्वप्रवृत्त्या स्वस्य प्रयोजनमस्ति न वा । नाद्यः तत्र प्रमाणाभावेनायुक्तत्वात् । प्रयोजनाभावपक्षोऽपि स्वनाशार्थं यत्नादर्शनिनायुक्त इत्यर्थः । ननु यततेरात्मनेपदित्वात् यतेदिति परस्मैपदि प्रयोगोऽनुपपन्न इत्यत आह **बहुलमिति** । पाणिनिपरस्मैपदिन आत्मनेपदिनो धातून् पृथक् पृथक् प्रदर्श्य बहुलमेतन्निदर्शनमित्युक्तम् । तस्यायमर्थः । एतद्धातुषु परस्मैपदादि निदर्शनं बहुलं ज्ञातव्यम् । अन्यपदित्वेनोक्तधातोरप्यन्यपदित्वेन प्रयोगो युज्यत इति । तथा च परस्मैपदित्वेन प्रयोगो युज्यत इति भावः । समाधानान्तरमाह **तथा चाहेति** । सर्वस्मात् धातुसमुदायादपि **उभयं पदं मन्यत** इत्यर्थः । तथा च चन्द्रादिकृतव्याकरणान्तरे उभयपदित्वेनोक्तत्वादशेष इति भावः ।

चषकः— ननु यततेरनुदात्तत्वेन आत्मनेपदितया यतेतेति न्यासेन भवितव्यतया कथमयं न्यासः सङ्गच्छत इत्यत आह **बहुलमेतदिति** । यद्यप्येतच्चुरादावदन्तधातुदर्शनं बहुलं वेदितव्यम्, अतोऽनुक्ता अपि वेदितव्या इति भुवादिषु अदन्तेषु दशगणेषु धातूनां निदर्शनं बहुलं वेदितव्यम् । तेनात्रापठिता अपि सौत्राः लौकिकाः वैदिका वा धातवो ग्राह्या इति नवगणीपठितेभ्योऽपि क्वचित्स्वार्थे णिच् । रामो राज्यमचीकरदिति यथेति । चुरादिभ्य एव बहुलं णिजिति पाणिनीयैर्व्याख्यातं तथाप्येतदात्मनेपदपरस्मैपदनिदर्शनं बहुलं ज्ञेयमित्येतद्वचनार्थं मनसि निधायात्रोपन्यासः । एतच्छब्देन प्रकृतात्मनेपदादिनियमस्यापि सम्भवाद्युक्तमेव नियमितात्मनेपदस्याप्यस्यैतद्वचनबलेन परस्मैपदमित्यर्थापयन्ति । चक्षिङ् व्यक्तायां वाचीति धातुसूत्रव्याख्यायामिकारोऽनुदात्तो युजर्थः । विचक्षणः प्रमयन् । नुम् तु न । अन्तेदित इति व्याख्यानात् । ङकारस्तु अनुदात्तप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः । तेन स्फायन्निर्मोकसन्धीत्यादि सिद्ध्यतीति पाणिनीयैरभिहिता समाहितिरप्यवसेया । भङ्ग्यन्तरेणापि समाधत्ते **तथा चाहेति** ।

॥ इति प्रसङ्गस्य स्पष्टीकरणञ्च ॥
॥ इति स्वनाशार्थञ्च प्रयत्नानुपपत्तिः ॥
॥ इति आपाद्यप्रदर्शनम् ॥
॥ इति उपपत्तिविरोधाच्चायुक्तत्वम् ॥
॥ इति 'श्रुतेः अनुभवापवादकत्व'स्य अयुक्तत्वम् ॥
॥ इति 'आत्मनः कामस्वामित्वा'नुभवस्य अपवादशङ्का, तत्समाधानं, तत्समर्थनञ्च ॥
॥ इति 'आत्मन एवेच्छावत्त्वं न त्वचेतनस्य' इत्युक्तार्थभङ्गशङ्का तन्निरसनञ्च ॥
॥ इति साङ्ख्योक्तार्थे तैः प्रमाणत्वेनोदाहृतानुमानानाम् असाधारणदोषैर्निराकरणम् ॥

* * *

॥ अथ उपन्यस्तमतैकदेशस्य (ये कर्तृत्वं प्रकृतेरेव भोक्तृत्वं तु
आत्मन इति मन्यन्ते तेषां मतस्य) निरासः ॥

८५ **सु०**— एवमनीश्वरसाङ्ख्यमतं साधारणदूषणैरपाकृत्य, ये कर्तृत्वं प्रकृतेरेव भोक्तृत्वं त्वात्मन इति मन्यन्ते, तन्मतं दूषयति **कर्तृत्वमिति** ।

अनु०— कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यते ।

यद्वैवमात्मनः कर्तृत्वमुपपाद्य भोक्तृत्वमप्यनेनैवोपपादयति । येन मयेदं कृतं स एवाहं तत्फलं भुञ्ज इति कर्तृत्वभोक्तृत्वयोः सामानाधिकरण्यानुभवात् तद्वैयधिकरण्याङ्गीकारेऽनुभवविरोध इत्यर्थः ।

भ्रान्तोऽयमनुभव इति चेन्न, बाधकाभावादित्याह **विभागे चेति** ।

विभागे च तयोर्मानं नैव किञ्चित्क्वचिद्भवेत् ।

तयोः कर्तृत्वभोक्तृत्वयोः । **विभागे** व्यधिकरणत्वे । अकृताभ्यागमकृतविनाशौ चैवं सति स्यातामिति ।

परि०— एवं सति स्यातामिति । कर्तृत्वभोक्तृत्वयोर्वैयधिकरणत्वे सति कर्तुः फलाभावात् कृतस्य पुण्यस्य विनाशः अकर्तुश्च फलप्राप्त्या अकृतस्य पुण्यस्य अभ्यागमः स्यादित्यर्थः ।

शे०वा०— न केवलं कर्तृत्वभोक्तृत्वयोर्वैयधिकरण्ये साधकाभावः, किन्तु बाधकसद्भावोऽप्यस्तीत्याह **अकृतेति** ।

वा०र०— **अयमनुभव इति** मूलम् । सामानाधिकरण्यानुभव इत्यर्थः । **बाधकेति** मूलम् । अनेन यदेतयोः व्यधिकरणत्वं प्रमाणं तदेव भ्रान्तित्वसाधकं बाधकं वाच्यम् । न च तत्र प्रमाणमस्तीति भाष्यार्थः उक्तो भवति । अत एव वक्ष्यति । साधकाभाव इति टीकायाम् । **अकृतेति** मूलम् । स्थलचशब्द-समुच्चयस्याप्रतीतेः भाष्योक्तः साधकाभावः । समुच्चय इति दर्शयति **न केवलमिति** । साधकाभावः । ततश्च नास्मत्पक्षे बाधकं किन्त्विति योज्यम् ।

विठ्ठल०— साक्षात्प्रकृतेन सङ्गत्यभावात् प्रकारान्तरेणावतारयति **यद्वेति** । **एवं सति स्याता-मिति** । क्रियाकर्तृत्वमेकस्य तत्फलभोक्तृत्वमन्यस्येत्यभ्युपगम इत्यर्थः ।

चषकः— **भ्रान्तोऽयमिति** । भ्रमरूप इत्यर्थः ।

॥ इति उपन्यस्तमतैकदेशस्य (ये कर्तृत्वं प्रकृतेरेव भोक्तृत्वं तु आत्मन इति मन्यन्ते तेषां मतस्य) निरासः ॥

* * *

॥ अथ साङ्ख्यस्य मायावाद्युपमात्वापत्तिः ॥
॥ अथ तत्रादौ मायिसाङ्ख्ययोरुभयोरपि सर्वप्रमाणविरुद्धार्थाङ्गीकारित्वम् ॥

८६ **सु०**— **'यदुक्तमात्मनो मोक्षो न स्यादिति, तदिष्टापादनम्, प्रकृतेरेव मोक्षा-भ्युपगमात् । न च बन्धमोक्षयोर्वैयधिकरण्यानुपपत्तिः बन्धस्यापि प्रकृतिगतत्वादि'ति चेन्न, सकलश्रुतिस्मृतीतिहासपुराणानुभवैर्बन्धमोक्षयोः आत्मगतत्वावगमेन तद्विरोधा-दित्याशयवानुपसंहरति सर्वेति ।**

अनु०— सर्वमानविरोधैकदुर्दीक्षादीक्षितस्त्वयम् । मायावाद्युपमां यायात्

सर्वमानविरोध एव या प्रधानदुर्दीक्षा दुष्टोऽनुष्ठानसङ्कल्पः, तया **दीक्षितोऽयं तु** साङ्ख्यो **मायावादिनामुपमात्वं** प्राप्नुयात् । तेऽपि हि कर्तृत्वभोक्तृत्वादिसकलधर्मविकल-

मसत्कल्पं चैतन्यमात्रमङ्गीकृत्याविद्याया एवाचेतनायाः सर्वकारणत्वं बन्धमोक्षाधिकरणत्वं चाभ्युपगच्छन्ति । तदेतेषां सर्वप्रमाणविरुद्धार्थाङ्गीकारित्वे साङ्ख्योऽयं दृष्टान्तभावमापद्यत इति ।

परि०— 'तस्मान्न बध्यते न मुच्यते नापि संसरति कश्चित् । बध्यते संसरति मुच्यते च नानाश्रया प्रकृतिरि'ति तदीयवाक्यं हृदि कृत्वाह **प्रकृतेरेव मोक्षाभ्युपगमादित्यादि** । **अनुभवः** अहं सुखी दुःखीत्यात्मगतत्वेनानुभवः । एकपदार्थः **प्रधानेति** । सुखदुःखादिरूपबन्धपरिणामत्वात् तद्विलयाधिकरणत्वाच्चाविद्याया इत्येवमुक्तम् ।

यादु०— **प्रकृतेरेव मोक्ष्याभ्युपगमादित्यादि** । यथाऽऽहुः । 'तस्मान्न बध्यते न मुच्यते नापि संसरति कश्चित् । बध्यते संसरति मुच्यते न नानाश्रया प्रकृतिरि'ति । **बन्धमोक्षाधिकरणत्वं चेति** । बन्धवत् तदध्वंसस्याप्यविद्याकल्पितत्वेन तन्निष्ठत्वादविद्याया मोक्षाधिकरणत्वम् । बन्धध्वंसरूपमोक्षस्यानाविद्यकत्वे च द्वैतापत्तिः । ब्रह्मस्वरूपत्वे च श्रवणादिवैयर्थ्यमिति भावः ।

वं०प०— **यदुक्तमिति** । तथा च न मुच्येतेत्यनेनेत्यर्थः । **तेऽपि** मायिनः । **असत्कल्पं** शून्यतुल्यम् । **अङ्गीकारित्वे** तद्विषये ।

श्रीनिधि०— सर्वमान इत्यत्र सर्वपदगृहीतमाह **सकलश्रुतीत्यादिना** । **दुष्टाऽनुष्ठानसङ्कल्प इति** । सर्वमानविरुद्धार्थप्रतिपादनविषयकदुष्टानुष्ठानसङ्कल्प इत्यर्थः । यो दीक्षितः स सत्कृत इत्यर्थः । अविद्याया एवाचेतनया इति यद्यपि बन्धमोक्षा वा आत्मन इत्यभ्युपगच्छन्ति मायिनः तथापि स्वनिविशेषासङ्गाखण्डैकरसताङ्गीकारेण वाङ्मात्रमेव किन्तु अविद्याया एवेति भावेन वक्तव्यमित्यापादनमपि प्रत्येवमुक्तम् । ननु साङ्ख्येन द्वैतमङ्गीकृतं चेतनाचेतनविभागेनेति चेत् किमेतावतोपमात्वहानिः । न हि गोसदृशो गवय इत्युक्ते सास्नाद्यभावेन सादृश्याभाव इत्यस्ति ।

शे०वा०— **प्रकृतेरेव मोक्षाभ्युपगमादिति** । 'यस्मान्न बद्ध्यते न मुच्यते नापि संसरति कश्चित् । बद्ध्यते मुच्यते संसरति च नानाश्रया प्रकृतिरि'ति तद्वचनादिति भावः । बन्धस्यात्मनिष्ठत्वं मन्यमानः शङ्कते **न चेति** । **बन्धस्यापीति** । उदाहृतवचनादेवेति भावः । **सर्वमानविरोध एवेति** । सर्वमानविरुद्धार्थाङ्गीकारलक्षणा या दुर्दीक्षा तया दीक्षित इत्यर्थः । यथा कश्चिद्वस्मादिधारणलक्षणदुर्दीक्षादीक्षितः तथा अयमपि सर्वप्रमाणविरुद्धार्थाङ्गीकारलक्षणदुर्दीक्षादीक्षित इति रूपकमेतदिति भावः । उपमाशब्दस्य सादृश्यविशिष्टार्थत्वेऽप्ययं सादृश्यविशिष्टं यायादित्यन्वयप्रसक्त्या प्रकृते तदयोगात् प्रवृत्तिनिमित्तभूतं सादृश्यमात्रमाश्रित्योक्तमुपपादयति **अविद्याया एव सर्वकारणत्वमिति** । यद्यपि मायावच्छिन्नं ब्रह्म जगदुपादानमिति

पक्षे, रज्ज्वोः सूत्रद्वयमिव मायाब्रह्मणी जगदुपादाने इति च पक्षे नाचेतनाया एवाविद्याया जगत्कारणत्वमस्ति । तथाऽपि मायैव जगदुपादानं, ब्रह्म तु जगदुपादानमायाधिष्ठानमात्रमिति पक्षमवलम्ब्येदमुक्तम् । अयं च पक्षो, 'यत्र घोषः सा गङ्गे'तिवत् 'जन्माद्यस्य यतः तद्ब्रह्मे'ति लक्षणया प्रयोगः यतोऽस्य जन्मादि सा माया, तदाश्रयो ब्रह्मेत्येव निर्देष्टव्यमिति जन्मादिसूत्रव्याख्यानात्, 'अजामेकामि'त्यादिकारणवाक्यानां साङ्ख्याभिमतप्रधान-परत्वनिरासेनाविद्यापरताया एव प्रथमस्य चतुर्थे समर्थितत्वाच्च मुख्यतया स्पष्टमवगम्यत इति ध्येयम् । **बन्धमोक्षाधिकरणत्वं चेति** । यद्यप्यविद्यानिवृत्तिरूपमोक्षस्यात्मरूपत्वान्नाविद्याधिकरणत्वं मायावादिमते-ऽस्तीत्यसदनुवादोऽयमित्याभाति तथाऽपि 'अविद्याकर्मपूर्वप्रज्ञासंस्कारचित्रभित्तिः अनादिरनिर्वाच्याऽविद्या' इति वदता पञ्चपादीकारेण 'भ्रान्तिकर्मसम्यगनुभवसंस्काराख्यानर्थरूपबन्धस्याविद्याश्रितत्वाभ्युपगमादुक्तबन्धनिवृत्ति-रूपमोक्षस्याप्यविद्याश्रितत्वं तस्य सम्मतमेव । बन्धमोक्षयोः सामानाधिकरण्यनियमादित्याशयेनेदमभिधानम् । अत एव सुषुप्त्याद्यनुवृत्तस्याविद्यारूपस्य वाऽविद्यावच्छिन्नत्वरूपस्य वा तत्प्रतिबिम्बितत्वरूपस्य वा सुषुप्त्या-द्यननुवृत्तस्य कर्तृत्वप्रमातृत्वादिरूपस्य वा संसारस्याज्ञाननिष्ठत्वाभावेऽपि ज्ञानक्रियासंस्काराणामज्ञानस्थत्वात्' इत्यादिना बन्धस्याज्ञानाश्रितत्ववर्णनमन्यत्र कृतमित्यवधेयम् ।

वा०२०— न च बन्धमोक्षयोरिति शङ्कानवकाशः । शङ्कानिरासाय तत्प्रसक्तिं दर्शयति **बन्ध-स्यात्मनिष्ठत्वमिति** । **विरुद्धार्थेति** । अनेन विरोधपदं विरुद्धार्थाङ्गीकारपरं इति सूचितं भवति । रूपक-मेतदितीति उपमारूपो रूपकालङ्कारः इत्यर्थः । **सादृश्यविशिष्टार्थत्वेऽपीति** । यो हि यस्योपमा स तन्निष्ठ-सादृश्यप्रतियोगि इति सादृश्यप्रतियोगित्वविशिष्टार्थत्वेऽपीत्यर्थः । मायावादिनो हि साङ्ख्योपमा । तस्य प्रति-योगितासम्बन्धेन मायावादिनिष्ठसादृश्यविशिष्टत्वेन सादृश्यविशिष्टत्वं यायादित्येव वक्तव्यतया सादृश्यविशिष्टं यायात् इत्युक्त्ययोगः । न हि स्वस्य स्वविशिष्टत्वं अत्रापाद्यमिति शक्यते वक्तुम् इति भावः । यद्यपि च मायावच्छिन्नं ब्रह्मेत्यादि । विवरणे त्रैविध्यं अत्र सम्भवति । रज्वाः सूत्रद्वयवत् मायाविशिष्टं इत्यादिना एतत्पक्षत्रयमुक्तम् । तत्र तृतीयपक्षस्वीकारे निमित्तद्वयापेक्षया तृतीयस्य तदभिमतत्वोपपादकं जन्मादि-सूत्रार्थत्वादिकं आह **अयं च पक्ष इत्यादि** । विवरणानुसारेण लेख्यम् । **स्पष्टमवगम्यत इतीति** । अनेन विशेषतः तदङ्गीकारानुसारेण मूलं प्रवृत्तमिति अविद्याया एव कारणत्वमिति नासदनुवाद इति प्रतिपादितं भवति । **आत्मस्वरूपत्वादिति** । आत्मैवाज्ञानहानिरिति परोक्तेरिति भावः । पञ्चमप्रकारत्वेऽपि आत्मगता-भावरूपधर्मतया नाविद्याधर्मत्वं सम्भवतीति भावः । अविद्याधिकरणं यस्येति विग्रहः । **अनादिरनिर्वाच्या अविद्येति** । यद्यपि पञ्चपादिकायां अनादिरविद्येत्येवोक्तं, तथापि वस्तुतः तन्मते अविद्यायाः तथात्वाशयेन अहङ्कारस्य सत्यतापत्तिशङ्कावारणाय चाविद्यानिर्वाच्यत्वेन विशेषिता । अत एवाविद्याकर्मपूर्वेत्युक्ताहङ्कार-स्थलीयपञ्चपादिकाविवरणोपन्यासे अहङ्कारस्यानाद्यनिर्वचनीयाविद्योपादानमिति अनिर्वचनीयत्वेनाविद्याविशे-षितेति ज्ञेयम् । अविद्याकर्मादिपदार्थाप्रतीतेः अविद्यायाः अविद्याभिन्नत्वानुपपत्तेश्च । विद्यादिशब्दार्थान् विवरणोक्तान् आह **भ्रान्तिकर्मेति** । भ्रान्तिश्च कर्म च पूर्वानुभवश्च इति तथोक्ताः । तेषां संस्कार एव चित्रं,

तस्य भित्तिः इति विग्रहः । भ्रान्तिः सम्यगनुभवभेदमाश्रित्य पृथक् निर्देश इति तत्त्वदीपनानुसारेण भ्रान्तिकर्मसम्यगनुभवानां संस्कारः इत्यर्थः । षष्ठ्यर्थसम्बन्धश्चानुकूलत्वं ततश्च भ्रान्त्यादेरध्यस्तत्वेन संस्कारादि त्रितयजन्यत्वात् भ्रान्त्यादीनां अनुकूलाः संस्काराः इति गुरुचरणैः न्यायामृतविचारे उक्तेः तद्रीत्याऽत्रार्थो विज्ञेयः । **अविद्याश्रितत्वेति** । उपादानभूतायाः अविद्यायाः आश्रयत्वस्यावर्जनीयत्वादिति भावः । तावता मोक्षस्याविद्याश्रयत्वं कथमङ्गीकृतं तेन इति ज्ञेयमित्यत आह **उक्तरूपबन्धेति** । युक्तिमाह **बन्धमोक्षयोरिति** । बन्धस्याविद्याश्रयत्वं परसम्मतं इत्यत्रोपष्टम्भकमाह **अत एवेति** । अज्ञानस्य विवरणोक्त-चिन्मात्राश्रयत्वभङ्गीयन्यायामृते उपाधेः प्रतिबिम्बपक्षपातित्वं किं तत्र स्वधर्मप्रतिभासकत्वं इत्यादि विकल्पितपक्षेषु आद्यनिरासाय मालिन्यादेः दर्पणादिनिष्ठत्ववत् सुषुप्त्याद्यनुवृत्तस्येत्यादि अज्ञानस्थलेऽपि इत्यन्तमुक्तम् । तथा चाविद्यादिरूपस्य संसारस्याविद्यानिष्ठत्वं नास्त्येव । ज्ञानक्रियासंस्काराणां त्वन्मते अज्ञानस्थलेऽपि नित्यातीन्द्रियाणां तेषामात्मनि कदाप्यप्रतीतेः इति प्रतिपादनात् तदनुसारेण तथैव वक्तव्ये प्रकृतप्रसङ्गानुसारेण संसारान्तराभावेऽपि ज्ञानक्रियासंस्काराणां अज्ञानस्थितत्वात् इत्यपि शब्दादिव्यत्यासेन अनुवाद इति ज्ञेयम् । **ज्ञानक्रिया** इत्यत्र ज्ञानपदं भ्रान्तिसम्यगनुभवपरं क्रियेति कर्म । तथा च भ्रान्तिकर्मसम्यगनुभवसंस्काराणां इत्यर्थः । अत एव प्रागुदाहृताहङ्कारवादीयपञ्चपादिकायां तद्विवरणे च तथैव प्रतिपादितम् । भ्रान्तिसम्यगनुभवभेदं अनुसृत्य पञ्चपादिका प्रवृत्ता । न्यायामृते तु तद्भेदमनुसृत्य ज्ञानेति सामान्येनोक्तम् । अत्र च ज्ञानक्रियानुकूलाः संस्काराः इति पूर्वोक्तरीत्यार्थः । भ्रान्त्यादेरध्यस्ततया संस्कार-दोषसम्प्रयोगरूपकारणत्रितयजन्यतया भ्रान्त्याद्यनुकूलसंस्कारस्यैवार्थतया प्राप्तेः । ज्ञानजन्यसंस्काराः इत्यर्थ-कथनपर-तरङ्गिणीदूषणप्रकारस्तु गुरुराजकृदुक्तरीत्या द्रष्टव्यः ।

स०व्र०— सर्वमानेति । रूपकमेतत् । सर्वप्रमाणविरोधाङ्गीकारलक्षणा या दुर्दीक्षा तया दीक्षित इत्यर्थः । यथा मायाभस्मादिधारणलक्षणदुर्दीक्षादीक्षितः तथा अयमपि सर्वप्रमाणविरोधाङ्गीकारलक्षणदुर्दीक्षादीक्षित इति भावः । उपमाशब्दस्य सदृशार्थकत्वेन मायावाद्येकदेशिभिः तदुभयाधिकरणत्वस्य अविद्याया एवाङ्गीकृतत्वेन तदनुवाद इति न विरोधः ।

विट्ठल०— प्रकृतेरेव मोक्षाभ्युपगम इति । **बध्यते** संसरति मुच्यते । नानाश्रया प्रकृतेरिति साङ्ख्योक्तेरिति भावः । **बन्धमोक्षाधिकरणत्वं चेति** । बन्धस्याविद्यकत्वे तन्निवृत्तरूपमोक्षस्यापि आविद्यकत्वं वाच्यम् । मोक्षस्यानाविद्यकत्वे सत्यत्वप्राप्त्या अद्वैतभङ्गप्रसङ्गात् । ब्रह्मतन्मात्रत्वे च श्रवणादिवैय्यर्थ्यापत्तेरिति ज्ञातव्यम् ।

॥ इति मायिसाङ्ख्ययोरुभयोरपि सर्वप्रमाणविरुद्धार्थाङ्गीकारित्वम् ॥

* * *

॥ अथ तत्र पुरुषबहुत्वमपि उभाभ्यामङ्गीकृतम् ॥

८७ सु०— यत्पुरुषबहुत्वं साङ्ख्येनाङ्गीकृतं तदपि मायावादिभिरभ्युपगतमेव । जननादिप्रकृतिधर्मैरेव हि तद्बहुत्वम्, न तु स्वरूपे कश्चिदस्ति परस्परतो विशेषः । मायावादिनोऽपि उपाधिनिबन्धनं भेदमङ्गीकुर्वन्त्येव । न च प्रपञ्चसत्यत्वं विशेषः, कारणमात्रत्वाभ्युपगमेन कार्यप्रपञ्चस्य साङ्ख्येन निरस्तत्वादिति ।

परि०— जीवनानात्वं साङ्ख्यानां मते विशेष इत्यत आह **यत्पुरुषेति** ।

यादु०— ननु साङ्ख्येनात्मबहुत्वमङ्गीकृतं न मायिनेत्यतो वैषम्यमित्यत आह **यत्पुरुषबहुत्वमिति** । ननु मायावादिभिरभ्युपेतं पुरुषबहुत्वं न साङ्ख्यमत इव स्वाभाविकमित्यत आह **जननादीति** । तथा च साङ्ख्यमतेऽपि निर्विशेषतयाऽङ्गीकृते पुरुषस्वरूपे बहुत्वं जायमानम्रियमाणदेहादिव्यवस्थानिबन्धनमेव न स्वाभाविकमिति भावः । ननु साङ्ख्यैः पुरुषे बहुत्वव्यवस्थापकविशेषाभावेऽपि पुरुषान्तरभेद एव तद्व्यवस्थापकोऽङ्गीकृतो न मायिभिरित्यत आह **मायावादिन इति** । साङ्ख्यैरपि परस्परव्यावर्तकविशेषशून्ये पुरुषे यो भेदोऽङ्गीकृतः स न स्वाभाविको वक्तुं शक्यः । निर्निबन्धनत्वापत्तेः । किन्तूपाधिनिबन्धन एव वाच्य इति भावः ।

वं०प०— **अङ्गीकृतं** बहुजीववादाङ्गीकारादित्यर्थः । **तदिति** । तेषां जीवानां परस्परत एकस्य जीवस्यापरजीवापेक्षयैक्यमेवाङ्गीकृतप्रायमित्यर्थः । मायिनाऽप्येवमेवाङ्गीकृतमिति हृदयम् । ननु स्वरूपे विशेषाभावेऽपि जननाद्युपाधिभेदेन भेदोऽस्त्येवेत्यत आह **मायावादिन इति** । **विशेषो** मायिभ्यः साङ्ख्यस्य ।

शे०वा०— ननु पुरुषबहुत्वाङ्गीकारानङ्गीकाराभ्यां साङ्ख्यमायावादिनोर्वैलक्षण्यस्य सत्त्वान्नोपमानोपमेयभाव इत्यत आह **यत्पुरुषबहुत्वमिति** । **अङ्गीकृतमिति** । 'पुरुषबहुत्वं सिद्धमि'त्यादितदुक्तेरिति भावः । **मायावादिभिरभ्युपगतमेवेति** । यद्यप्येकजीववादिभिस्तैः पुरुषबहुत्वं नाङ्गीकृतं तथाऽपि बहुजीववादिभिर्मायावादिभिः पुरुषबहुत्वाङ्गीकाराभिप्रायेणाभ्युपगतत्वोक्तिरियमिति ज्ञातव्यम् । ननु साङ्ख्यमते पुरुषबहुत्वोपपादकस्य पुरुषभेदस्य सत्त्वात् पुरुषबहुत्वस्य तेनाङ्गीकर्तुं शक्यत्वेऽपि मायावादिमते पुरुषबहुत्वोपपादकस्य तद्भेदस्यासत्त्वादभ्युपगमे चापसिद्धान्तान्न मायावादिना पुरुषबहुत्वमङ्गीकर्तुं शक्यमित्यस्त्येव मतयोर्वैलक्षण्यमित्यतः किमत्र स्वाभाविकपुरुषभेदस्यैव तद्बहुत्वोपपादकत्वात् तस्य च मायावादिनाऽनङ्गीकृतत्वान्न पुरुषबहुत्वं तेनाङ्गीकर्तुं शक्यमित्यभिप्रायः । किंवा यादृशतादृशभेदस्यापि पुरुषबहुत्वोपपादकत्वेऽपि मायावादिना तस्यानङ्गीकृतत्वान्न पुरुषबहुत्वं तेनाङ्गीकर्तुं शक्यमिति विकल्पद्वयं मनसि निधाय, नाद्यो मायावादिमत इव साङ्ख्यमतेऽपि पुरुषभेदस्यौपाधिकत्वेनास्वाभाविकत्वात् पुरुषबहुत्वानुपपादकत्वापत्त्या तं प्रत्यपि

पुरुषबहुत्वस्याङ्गीकर्तव्यतानुपपत्तेः तुल्यतयाऽविशेषतादवस्थ्यादिति भावेन साङ्ख्यादिमते पुरुषभेदस्यौपाधिकतामुपपादयति **जननादीति** । न द्वितीयः । साङ्ख्यमत इव मायावादिमतेऽप्यौपाधिकस्य पुरुषभेदस्य सत्त्वात् तेनैव पुरुषबहुत्वनिर्वाहान्न तन्मतेऽपि पुरुषबहुत्वानुपपत्तिशङ्कावकाश इत्यभिप्रेत्याह **मायावादिनोऽपीति** । 'बिम्बप्रतिबिम्बयोः प्रतिबिम्बानां च सत्यपि वास्तवाभेदे यथोपाधिनिबन्धनो भेदः, तथा जीवब्रह्मणोर्जीवानां च सत्यपि वास्तवाभेदे उपाधिनिबन्धनो भेदोऽस्त्येव । तथा च भेदसद्भावात् सर्वव्यवस्थोपपत्तिः । तस्य चौपाधिकत्वेन स्वाभाविकत्वाभावान्नापसिद्धान्तोऽपी'त्यादिग्रन्थादिति भावः ।

यद्वा ननु साङ्ख्यमायावादिनोः पुरुषभेदाङ्गीकाराभ्यां वैलक्षण्यादविशेषासिद्धेः कथमुपमानोपमेयभाव इत्याशङ्क्य भवेदेवं कथञ्चित् यद्युक्तरीत्योभयोर्वैलक्षण्यमेव भवेत् । न चैतदस्ति । साङ्ख्येनेव मायावादिनाऽपि पुरुषभेदाङ्गीकारादित्याह **यत्पुरुषबहुत्वमिति** । ननु साङ्ख्यस्य भेदवादितया पुरुषभेदाभ्युपगमो युक्तः । मायावादिनस्तु अभेदवादित्वात् कथमपसिद्धान्तपराहतः भेदाभ्युपगमो युक्तः स्यादित्यतोऽभेदवादितया स्वाभाविकभेदाभ्युपगमस्यापसिद्धान्ततया अयोगेऽप्यौपाधिकभेदाभ्युपगमस्य तद्विरहान्नायोग इत्याशयेनाह **मायावादिनोऽपीति** ।

नन्वेवमपसिद्धान्तपरिहारेऽपि न पूर्वशङ्कितविशेषसिद्धिपरिहारः सम्भवति । साङ्ख्येनाङ्गीकृतस्य पुरुषभेदस्य स्वाभाविकतया मायावादिना चाभ्युपगतस्य तस्यौपाधिकतयोभयोरपि वैलक्षण्यापरिहारादित्यतः स्यादप्येवं कथञ्चिद्यदि साङ्ख्येनाङ्गीकृतो भेदः स्वाभाविकः स्यात् । न चैतदस्ति । किन्त्वौपाधिक एवेत्युभयोरप्यस्त्येवाविशेष इति युक्त एवोपमानोपमेयभाव इत्याशयेन साङ्ख्यमते तस्यौपाधिकतामुपपादयति **जननादीति** ।

यद्वा ननु मायावादिभिः पुरुषबहुत्वाङ्गीकारेऽपि स्वाभाविकस्य तस्यानभ्युपगमात् तदभ्युपगन्तृसाङ्ख्याद्वैलक्षण्यमस्त्येवेति कथमुभयोरविशेष इत्यतो निर्विशेषतया साङ्ख्येनाङ्गीकृतपुरुषस्वरूपे बहुत्वस्य जायमानम्रियमाणदेहादिव्यवस्थानिबन्धनत्वेनौपाधिकतया स्वाभाविकत्वविरहादवैलक्षण्यमेवेत्याशयेनाह **जननादीति** । ननु च साङ्ख्यमते पुरुषबहुत्वव्यवस्थापकविशेषाभावेऽपि तैः पुरुषान्तरभेदस्य बहुत्वव्यवस्थापकस्याङ्गीकृतत्वात् तेनैव च तन्निर्वाहसम्भवात् कथमविशेष इत्यतः परस्परव्यावर्तकशून्ये पुरुषेऽङ्गीकृतो भेदो न स्वाभाविको वक्तुं शक्यते निर्निबन्धनत्वापातात् । किन्तूपाधिनिबन्धन एवेति पक्षद्वयस्याविशेषसिद्धिरेवेत्याह **मायावादिनोऽपीति** । तथाऽपि प्रपञ्चसत्यत्वासत्यत्वाभ्यां पक्षद्वयवैलक्षण्यादविशेषासिद्धिरित्याशङ्क्य निषेधति **न चेति** । किमत्र मूलकारणरूपप्रपञ्चसत्यत्वासत्यत्वाभ्यां पक्षद्वयवैलक्षण्यमभिमतं किंवा कार्यप्रपञ्चस्य । नाद्यः । साङ्ख्येनेव मायावादिनाऽपि मूलकारणस्य ब्रह्मणः सत्यत्वाभ्युपगमेन तद्वैलक्षण्यासिद्धेरित्याशयेन द्वितीयं दूषयति **कारणेति** । तथा च कार्यप्रपञ्चसत्यतायाः पक्षद्वयेऽप्यभावान्न वैलक्षण्यं तयोरिति भावः ।

वा०र०— अङ्गीकर्तुं शक्यम् इत्यनन्तरं अभिप्रायः इतीति वर्तते । **यद्वेति विकल्पद्वयमिति** । यथास्थित एवेति शब्दः । **शक्यम्** इत्यनन्तरं इत्यभिप्रायः इत्येतावत् अनुवर्तते इति ज्ञेयम् । **तद्व्रन्था-दिति भाव इति** । अयं च ग्रन्थो बहुजीववादपक्षेऽपि भेदस्य मिथ्यात्वाङ्गीकारे एते दोषाः भवन्त्येव इत्येतत् तत्त्वनिर्णयटीकायां यथा बिम्बप्रतिबिम्बयोः प्रतिबिम्बानां चेत्यादिनाऽनूदित इति ज्ञेयम् । अनुवाद्य-ग्रन्थस्तु .....गतः । यद्वेत्यादिपक्षेषु स्वारस्यविचारः कार्योऽस्ति । परोक्तप्रमेयनिराकरणलाभरूपप्रयोजनं च शोध्यमस्ति ।

स०व्र०— जननादिप्रकृतिधर्मैरिति । अनेन औपाधिकधर्मैरेव तद्बहुत्वं न तु स्वभावधर्मैरित्युक्तं भवति ।

विट्ठल०— ननु साङ्ख्येन पुरुषबहुत्वाङ्गीकारान्मायावादिभिस्तदनङ्गीकारात् कथं साम्यमित्यत आह **यत्पुरुषबहुत्वमिति** । मायावादिभिः सोपाधिकभेदस्यैवाङ्गीकारात् साम्यानुपपत्तिरित्यतः साङ्ख्यैरपि जननमरणादिधर्मयुक्तदेहाद्युपाधिभिरेव आत्मभेदोऽङ्गीकृतः । स्वतो निर्विशेषत्वेनात्मनि भेदबहुत्वाद्ययोगादतः साम्यमेवेत्याह **जननादीति** । **कारणमात्रेति** । कारणव्यतिरेकेण सत्कार्यवादिना कार्यस्यान्यस्यानङ्गीकारा-द्विशेषस्याप्यनङ्गीकारादिति भावः ।

॥ इति पुरुषबहुत्वमपि उभाभ्यामङ्गीकृतम् ॥

* * *

॥ अथ साङ्ख्यपरिकल्पितप्रक्रियान्तरस्यापि प्रमाणविरुद्धत्वम् ॥

८८ सु०— याऽपि साङ्ख्यपरिकल्पिता सृष्टिप्रलयबन्धमोक्षतत्साधनप्रक्रिया साऽपि सर्वप्रमाणविरुद्धेत्युक्तं भवति ।

यादु०— 'सर्वमानविरोधैकदुर्दीक्षादीक्षितस्त्वयमि'ति सामान्योक्त्या लब्धमर्थं दर्शयति **याऽपि साङ्ख्येति** ।

शे०वा०— मूले 'सर्वमानविरोधैके'त्यादिसामान्योक्तेर्वैयर्थ्यमाशङ्क्य साङ्ख्यपरिकल्पितप्रक्रियान्तरस्य प्रमाणविरुद्धत्वसूचनेनाश्रद्धेयत्वसमर्थनार्थत्वान्न तदिति भावेनाह **याऽपीति** । प्रकृत्यादिकारणेषु सत एव महदादिकार्यस्य ततो निस्सरतः आविर्भावलक्षणो विभाग एव च तन्मते सृष्टिर्न पुनरसत उत्पादः । तस्याः क्रमश्च प्रकृतेर्महान्महतोऽहङ्कार इत्यादिः । इदमुभयमपि सृष्टिप्रक्रियेति विवक्षितम् । एतच्च 'कारणकार्य-विभागाद्वैश्वरूप्यस्ये'ति कारिकाव्याख्यावसरे 'प्रकृतेर्महान्महतोऽहङ्कारस्तस्माद्गणः षोडशकः । तस्मादपि

षोडशकात्पञ्चभ्यः पञ्चभूतानि' इत्येतत्कारिकाव्याख्यावसरे तत्त्वकौमुद्यां स्पष्टम् । प्रलयश्चात्र महदादेः कार्यस्य कारणे प्रकृत्यादौ तिरोभावलक्षणोऽविभाग एवाभिमतो न पुनः सतः कार्यस्य स्वरूपध्वंसः । एतदपि 'कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य' इति कारिकाव्याख्यावसरे स्वपरग्रन्थयोः स्पष्टम् । बन्धश्च प्राकृतिक-वैकृतिकभेदाद्बहुविधः । तत्र प्रकृतावात्मज्ञानात् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः । यः पुराणेषु प्रकृतिलयान्प्रत्युच्यते । 'पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तका' इति । वैकारिकबन्धस्तेषामेव ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीनुपासते यान्प्रति चेदमुच्यते, यथा 'मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः । बौद्धाः शतसहस्राणि तिष्ठन्ति विगतज्वराः । ते खल्वमी विदेहा ये तेषां वैकृतिको बन्ध' इत्यादि । एतदपि च 'विपर्ययादिष्यते बन्ध' इत्येतत्कारिकाखण्डव्याख्यावसरे तत्त्वकौमुद्यां स्पष्टम् । मोक्षश्च प्रकृतिनिवृत्तिः । आत्यन्तिकदुःखोपशमो वा । एतदपि 'ज्ञानेनापवर्ग' इत्येतत्कारिकाखण्डव्याख्यानावसरे 'कैवल्यार्थं प्रवृत्तेश्चे'त्येतत्कारिकाखण्डव्याख्यानावसरे च यथाक्रमं तत्त्वकौमुद्यां स्पष्टम् । प्रकृतिपुरुषयोरविवेकादि बन्धसाधनमेतच्च 'विपर्ययादिष्यते बन्धः । वैराग्यात्प्रकृतिलयात्संसारो भवति राजसाद्रागात्', 'रूपैः सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिरि'त्याद्यनेककारिकाखण्डव्याख्यावसरे तत्रैव स्पष्टम् । मोक्षसाधनं च प्रकृति-पुरुषविवेकज्ञानम् । एतदपि 'ज्ञानेनापवर्गः । पुरुषार्थं विमोचयत्येकरूपेणे'त्यादिकारिकाखण्डव्याख्यावसरे तत्रैव स्पष्टम् । तत्र सदसत्कार्यवादस्य प्रामाणिकत्वसमर्थनेनाविर्भावतिरोभावलक्षणविभागाविभागयोः सृष्टिप्रलय-प्रक्रियायाश्च तद्विरुद्धतया प्रमाणविरुद्धत्वसिद्धिः । तृतीयचतुर्थोक्तरीत्या बन्धमोक्षतत्साधनप्रक्रियायाश्च तत्सिद्धि-रित्यवधातव्यम् ।

वा०र०— तत्त्वकौमुद्यामिति । वाचस्पतिमिश्रकृतसाङ्ख्यपरीक्षाव्याख्याने इत्यर्थः । सैव भामतीति प्राक् बहुधा व्यवहृतेति ज्ञेयम् । **स्वपरग्रन्थयोरिति** । साङ्ख्यकारिकायाः स्वग्रन्थेऽपि प्राक् व्याख्यातत्वात्, तदनुसारेणास्य ग्रन्थग्रहणमिति ज्ञेयम् । सृष्टिप्रलयबन्धादिषु सर्वप्रमाणविरुद्धत्वं सकलश्रुतिस्मृत्यादिपूर्वमूलोक्त-रीत्येवेति प्रतीयते । तथा न भ्रमितव्यं इत्याशयेन विवेकेन तदाह **तत्र सदसदिति** । **तृतीयचतुर्थेति** । तृतीयाध्यायचतुर्थपादोक्तरीत्येत्यर्थः ।

विट्ठल०— सर्वमानविरोधैकदुर्दीक्षादीक्षितस्त्वयमित्यनेन लब्धमर्थान्तरं दर्शयति **याऽपीति** ।

॥ इति साङ्ख्यपरिकल्पितप्रक्रियान्तरस्यापि प्रमाणविरुद्धत्वम् ॥

* * *

॥ अथ साङ्ख्यस्य मायावादिसदृशत्वं सूत्रकृताऽपि सूचितम् ॥

८९ सु०— न केवलं साङ्ख्यस्य मायावादिसदृशत्वमस्माभिरेवोच्यते, किन्तु सूत्रकृताऽपि सूचितमित्याह तदिति ।

अनु०— तत् चशब्दान्निराकृतः ॥

तस्मान्मायावादिसदृशत्वादेव हि साङ्ख्यो 'भोक्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इति प्राक् पराकृतेन मायावादिना 'रचनानुपपत्तेश्च नानुमानम्' इति चशब्देन समुच्चित्य निराकृतः ।

यद्वा प्रमाणविरोधोऽपि नोत्सूत्रित इत्यनेनाह ।

तस्मात् सर्वमानविरोधित्वादेव । चशब्दात् सर्वमानविरोधसमुच्चयार्थं चशब्दं प्रक्षिप्येत्यर्थः ॥

परि०— चशब्दादित्यस्यार्थः **चशब्दं प्रक्षिप्येति** । ल्यब्लोपे पञ्चमीति भावः ।

यादु०— ल्यब्लोपनिमित्ता पञ्चमीत्याशयेनाह **चशब्दं प्रक्षिप्येति** ।

वं०प०— प्रक्षिप्येत्यनन्तरं साङ्ख्यो निराकृत इति वर्तते ।

कं०रा०— चशब्दं प्रक्षिप्येति । अनेन चशब्दादिति पञ्चमी ल्यब्लोपे कर्मणीत्युक्तम् ।

शे०वा०— ननु तच्चेत्युत्तरभाष्यमनर्थकम् । न च साङ्ख्यमायावादिनोः सादृश्यस्य सूत्रसूचितत्वोपदर्शनार्थं तदिति वाच्यम् । तदुपदर्शनस्याप्यप्रयोजनत्वादित्यतः 'सर्वमानविरोधेति' पूर्ववाक्योक्तस्य तत्सादृश्यस्य समर्थनार्थत्वान्नानुपपत्तिरित्यभिप्रेत्य तत्समर्थनपरतया तद्योजयति **न केवलमिति** । ननु 'तच्चशब्दान्निराकृत' इति मूलेन कथं तत्सादृश्यस्यात्र सूत्रकृत्सूचितत्वसिद्धिरित्यतोऽपेक्षिताध्याहारेणोक्तार्थसूचकतया भाष्यं योजयति **तस्मादिति** । तस्मादित्यस्यैव विवरणं **मायावादिसादृश्यादेवेति** । **प्रमाणविरोधोऽपीति** । सर्वमानविरोधेत्यादिनोक्तः प्रमाणविरोधोऽपीत्यर्थः । ततश्च न तस्याभाष्यत्वमिति भावः । अनेन तच्चेत्यादिग्रन्थेनात्र पक्षे पूर्वोक्तरीत्या तस्मादित्यस्य व्याख्यानायोगादेतत्पक्षोपयोगितया तदर्थमाह **तस्मात्सर्वमानविरोधित्वादेवेति** । **चशब्दादिति** । ल्यब्लोपनिमित्ता पञ्चमीत्याशयेनाह **चशब्दादित्यादिना** ।

वा०र०— तच्चेति भाष्ये मायावादिसादृश्याच्चशब्देन समुच्चित्य साङ्ख्यो निराकृत इति प्रतीयते । तत्र चासिद्धेन सिद्धसाधनमिति प्राप्नोतीत्यतो वह्निमान् एव धूमत्वात् इत्यादौ एवकारसमभिव्याहृतव्यापकस्य प्रथमप्रयोगस्य व्यभिचाराभावसूचनार्थतायाः दृष्टत्वात् सोपस्काराणि इति न्यायेन च प्रकृतेऽवधारणप्राप्तेः युक्तं अवधारणसहितव्यापकस्यासिद्धस्यापि प्रथमतः कीर्तनं इत्याशयेनावधारणं पूरयन् योजयति **सदृशत्वादेवेति**

मूलम् । अयमित्यनुवृत्तस्य व्याख्यानं **साङ्ख्य इति** । अनेन साङ्ख्यो मायावादिना सह समुच्चित्य निराकृतत्वात् मायावादिसदृशत्वेन सूत्रकृत्सूचितप्रयोगे यदि तत्सदृशत्वं न स्यात् तर्हि तन्निराकरणं न स्यात् निमित्तान्तराभावात् इति हेतूच्छित्तिरूपविपक्षे बाधकं ज्ञातव्यं इत्युक्तं भवति । **चशब्दादिति** । ल्यब्लोपनिमित्ता पञ्चमीत्याशयेनोक्तं **चशब्देन समुच्चित्येति** । उत्तरयोजनायामयमाशयः टीकायां वक्ष्यते तत्र व्याख्यास्यामः । सर्वमानविरोधित्वस्यापि सिद्धत्वादनुवादायोगादि प्रागुक्तदोषादवधारणमाश्रित्य प्रथमप्रयोगः इत्याशयेनाह **सर्वमानविरोधित्वादेवेति** मूलम् । अत्रापि अयमित्यनुवृत्तस्य साङ्ख्यसमर्पकस्य सत्त्वात् । सर्वमानविरोधित्वादेव साङ्ख्यः सर्वमानविरोधार्थकचशब्दं प्रक्षिप्य निराकृत इति उक्ते साङ्ख्यः सर्वमानविरोधीति सूत्रकृत्सूचितः । सर्वमानविरोधार्थकचशब्दं प्रक्षिप्य निराकृतत्वात् इति प्रयोगसूचनात् तत्र साध्याभावे हेतुरपि न स्यात् । सर्वमानविरोधित्वाभावेऽपि तदर्थकशब्दनिक्षेपेण निराकृतत्वमस्तु इति शङ्कायाः व्याघातेनायोगात् इति विपक्षे बाधकस्यापि प्रतिपादनात् विवक्षितार्थलाभः इति ज्ञेयम् । ल्यब्लोपनिमित्ता पञ्चमीति टीका प्रासादात् प्रतीक्षते इत्यादौ प्रासादमारुह्येतिवत् ल्यबन्तस्य निक्षिप्येत्यस्य लोपनिमित्ता पञ्चमीत्यर्थः । **ल्यब्लोपे कर्मण्यधिकरणे चेति** । वक्तव्येनेति शेषः । उपासनापादे टीकोदाहृतैतद्वक्तव्यस्य तदर्थस्य चोपपादनं तत्रैव करिष्यामः ।

विठ्ठल०— **चशब्दात्** इत्यस्य चशब्दं प्रक्षिप्येत्यर्थः । पञ्चम्यां ल्यब्लोपनिमित्तत्वादित्याशयेनाह **चशब्दं प्रक्षिप्येति** ।

॥ इति साङ्ख्यस्य मायावादिसदृशत्वं सूत्रकृताऽपि सूचितम् ॥
॥ इति साङ्ख्यस्य मायावाद्युपमात्वापत्तिः ॥
॥ इति उपन्यस्तमतस्य (साधारणदूषणैः) निरासः ॥

॥ इति रचनानुपपत्त्यधिकरणम् ॥
॥ २-२-१ ॥

* * *

॥ अथ अन्यत्राभावाधिकरणम् ॥

॥ २-२-२ ॥

॥ अथ सेश्वरसाङ्ख्य(पातञ्जल)मतनिराकरणम् ॥

॥ अथ तत्र सेश्वरसाङ्ख्य(पातञ्जल)मतनिरूपणम् ॥

॥ अथ तत्रादौ ईश्वरस्वरूपम् ॥

ब्र०सू०— ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ ॥

९० **सु०**— इदं सूत्रं केचिदित्थं व्याचक्षते " 'यथा तृणपल्लवादिकं गवादिनोपभुक्तं स्वयमेव क्षीरीभवति, एवं प्रधानं स्वयमेव महदादिरूपेण परिणमत' इत्याशङ्क्य किलात्र निरस्यते । न तृणादिवत् स्वयमेव प्रधानस्य परिणामो वक्तव्यः, यतस्तृणादीनामपि स्वयमेव परिणामो नास्ति । कुतः । अन्यत्रानडुहोपभुक्ते तदभावादि"ति । अत्राशङ्क्यैव तावदनुपपन्ना; पयोऽम्बुवच्चेत्तत्रापीत्यनेनैव परिहृतत्वात्, प्रत्युदाहरणं च सूत्रप्रणयनायोगात् । परिहारोऽप्ययमनुपपन्नः; गवाद्युपभुक्तस्यैव क्षीरत्वं नान्यत्रेति हि वदता प्रकृतेः सहकारिसन्द्भावमात्रमुपपादितं स्यात्, न पुनरीश्वरापेक्षत्वम् । अतो नायं सूत्रार्थः, किन्तु पातञ्जलमतमत्राधिकरणे निराक्रियत इत्याशयवांस्तदुपन्यस्यति **साङ्ख्यस्त्विति** ।

अनु०— साङ्ख्यस्तु सेश्वरो ब्रूते क्षेत्रानुग्रहशक्तिमान् ।
अस्तीश्वरः स्वयम्भातः क्लेशकर्मादिवर्जितः ॥

साङ्ख्यमतस्य निरस्तत्वात् किं पुनरुपन्यासेनेत्यतः अस्य मतस्य ततो विशेषं तुशब्देन सूचयति । तमेव विशेषं व्यनक्ति **सेश्वर इति** । सेश्वरश्चेन्न निराकार्यो विरोधाभावादित्यत उक्तं **क्षेत्रेति** । तुशब्दोऽवधारणार्थोऽत्राप्यन्वीयते ।

यद्यपि सेश्वर इत्यनेनैव ईश्वरोऽस्तीति ब्रूत इति सिद्धम्, तथाऽपि तदनुवादेन विशेषणविधानमेवैतत् 'य **ईश्वरोऽस्ति** स **क्षेत्रानुग्रहशक्तिमानेवेति ब्रूत**' इति ।

क्षियन्त्यस्मिन्कार्याण्यव्यक्ततयेति क्षेत्रमुपादानं प्रकृतिः । तदनुग्रहशक्तिरेवेश्वरस्य तेनाभ्युपगम्यते । अतो निराकरणीय एवासाविति ।

सर्वशक्तित्वाभावे किं तस्येश्वरत्वमित्यत उक्तं स्वयम्भात इति । स्वयमिन्द्रियाद्यनपेक्षमेव, **भातः** कर्तरि क्तः । ततश्च सर्वज्ञ इति लभ्यते ॥

ईश्वरत्वोपपादकं विशेषणान्तरमाह क्लेशेति । क्लेशकर्मविपाकाशयवर्जित इत्यर्थः । तथा चाह पतञ्जलिः, 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति, तथा 'निर्माणकायमधिष्ठाय सम्प्रदायप्रवर्तकोऽनुग्राहकश्चे'ति ।

तत्र अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः । अनात्मन्यात्मबुद्धिः अविद्या । इदं मदीयमित्यभिमानः अस्मिता । विषयेष्वासक्ती रागः । कोपो द्वेषः । भयम् अभिनिवेशः । एत एव पञ्च क्लेशास्तन्त्रान्तरे तमो मोहो महामोहः तामिस्रोऽन्धतामिस्र इति व्यवहियन्ते । वार्षगण्यस्त्वेतानविद्येत्येवाह ।

कर्म इति विधिनिषेधावुच्येते । आशयशब्देन धर्माधर्मौ । विपाक इति तत्फलं सुखदुःखे तदुपायश्चेति ।

इतिशब्दस्य आगामिनः प्रतिवाक्यं सम्बन्धः ।

परि०— अत्र पादे परकृतसूत्रव्याख्यानस्य भाष्यकृता क्वाप्यनिरासात्, तदप्यनुमतमिति मन्दानां भ्रमनिरासाय तदनूद्य स्वयं निरस्यन्नवतारयति **इदं सूत्रं केचिदित्यादिना । अत्राशङ्क्यैव इति** । परकृतव्याख्याने सूत्रावतारिकारूपा शङ्क्यैव न युक्तेत्यर्थः । सूत्रार्थं च निराह **परिहारोऽपीति । अत्रापीति** । क्षेत्रानुग्रहशक्तिमानेवेत्यन्वीयत इत्यर्थः । अस्तीश्वर इत्यस्य पौनरुक्त्यमाशङ्क्यानुवादपरत्वेन सार्थक्यमाह **यद्यपीति । क्षियन्त्यस्मिन्निति** । क्षि निवासगत्योरिति धातोः । अधिकरणे औणादिके 'त्र'प्रत्यये गुणे च रूपमिति भावः । **कर्तरि क्त इति** । भातेरकर्मकत्वाद्गत्यर्थाकर्मकेत्यादिना क्तप्रत्यय इति भावः । निर्माणकायमित्यस्य तत्तन्निर्माणानुकूललीलाविग्रहमित्यर्थः । **तन्त्रान्तरे** तदीयग्रन्थान्तरे । **वार्षगण्यस्त्विति** । साङ्ख्यैकदेशी कश्चित् । **आगामिन इति** । बीजावपनकर्तैवेतीत्यत्रस्थेतिशब्दस्य क्षेत्रानुग्रहशक्तिमानेवेति स्वयं भात इति क्लेशकर्मादिवर्जित इत्यादिरूपेण सम्बध्य ब्रूत इत्यनेनान्वय इत्यर्थः ।

यादु०— स्वयमेवेति । न चेतनव्यापारमपेक्षत इत्यर्थः । एवमग्रेऽपि । **पयोऽम्बुवदिति** । तत्र यथा पयोऽम्बुनोश्चेतनानधिष्ठितयोः स्वत एव प्रवृत्तिरेवं प्रधानस्यापीति शङ्कार्थ इत्युक्तत्वेनास्याः शङ्कायास्तेनैव परिहृतत्वादित्यर्थः । **इति वदतेति** । सूत्रकृतेति शेषः । **प्रकृतेरिति** । गवाद्युपभुक्ततृणादिदृष्टान्तेनेति भावः । **न पुनरीश्वरेति** । न च बुद्धिपूर्वकारी तत्रापीश्वर एव सर्वज्ञः सम्भवतीति शङ्कानिराकरणस्यार्थ इति भामत्यामुक्तत्वात् कथमेतदिति वाच्यम् । ईश्वरापेक्षायाः सूत्रार्थतया लाभो नेत्याशयात् । तथा हि अन्यत्रानड्डहोपभुक्ते तदभावादिति वदता हि सूत्रकारेण गवादिष्वेव सहकारिविशेषसद्भावमात्रमुक्तं न पुनश्चेतनरूप एकसहकारीति, येनेश्वरकल्पना तत्र स्यात् । न च परिशेषात् तत्र तत्कल्पनाऽभिप्रेता । औदर्यवह्निरूपविशेषस्य वा, अदृष्टादिविशेषरूपस्य वा, सहकारिविशेषस्य सम्भवेन परिशेषस्यासम्भवादिति । **अत्रापीति** । सेश्वरः साङ्ख्यस्त्वित्थं ब्रूते इत्यत्र अन्वयस्य सिद्धत्वादत्रापीत्युक्तम् । समुच्चयार्थस्यात्रायोगादवधारणार्थ इत्युक्तम् ।

वं०प०— इति सिद्धमिति । तथा चास्तीश्वर इत्येतद्वचर्थमिति भावः । **क्षियन्तीति** । निवसन्तीत्यर्थः । क्षि निवासगत्योरिति धातुः । **निर्माणकायं** जगन्निर्माणोपयुक्तं लीलाविग्रहम् । **एतान्** तमआदीन् । अत एव पञ्चपर्वाऽविद्येति प्रसिद्धिः ।

कं०रा०— क्षियन्तीति । क्षियन्ति निवसन्त्यस्मिन् कार्याणि सूक्ष्मतयेति क्षेत्रशब्देनोपादानभूतप्रकृतिरुच्यते । क्षेत्रशब्दश्च क्षिति निवासगत्योरित्यस्मादधिकरणे त्वप्रत्यये गुणे च कृते निष्पन्न इति भावः । **कर्तरीति** । भादीप्तावित्यस्मात् गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति कर्तरि क्तप्रत्यय इत्यर्थः । **ततश्चेति** । स्वयंभात इत्यस्येन्द्रियाद्यनपेक्षमेव ज्ञातेत्यर्थकत्वादिन्द्रियाद्यनपेक्षज्ञाने च कारणायत्तनियतविषयत्वस्यासम्भवात् स्वयम्भात इत्यनेन सर्वज्ञ इति लभ्यत इत्यर्थः । **ईश्वरत्वेति** । स्वयंभातपदेनेश्वरत्वोपपादकं सर्वज्ञत्वमुक्त्वा तस्यैवोपपादकं विशेषणान्तरमाहेत्यर्थः । **अनात्मनीति** । देहादावहमिति **बुद्धिः** अविद्येत्यर्थः । **इदमिति** । गेहादिकं मदीय्यमित्यभिमानः अस्मितेत्यर्थः । **विपाक इतीति** । **तत्फलं** धर्माधर्मफलं सुखदुःखे सुखोपायः स्रक्चन्दनादिकं दुःखोपायो हि कण्टकादिकं चेत्येतत्सर्वं विपाक इत्युच्यत इत्यर्थः । विपाकशब्दितसुखादेर्धर्मादिफलत्वेन फलप्राधान्यविवक्षया प्राक् प्रथमं निर्देशेऽपीदानीमाशयशब्दितधर्मादिस्तत्कारणत्वेन कारणप्राधान्यविवक्षया प्रथमं निरूपणमिति द्रष्टव्यम् ।

श्रीनिधि०— क्षीयन्त्यस्मिन्निति कथं कार्यविनाश्यानङ्गीकारादित्यत उक्तम् **अव्यक्ततयेति** । क्षयपदेनाव्यक्ततैवोच्यत इति भावः । **कर्तरि क्त इति** । कर्मार्थत्वे ज्ञानविषयत्वमेव स्यान्न तु सर्वज्ञत्वमिति भावः । एवं च सर्वज्ञत्वेनैव सर्वेश्वरत्वमिति भावः । क्षेत्रानुग्रहशक्तिमानीश्वर इत्यत्र तत्सम्मतिमाह **तथा निर्माणकायमिति** । लीलाविग्रहमित्यर्थः । **वार्षगण्यः** साङ्ख्यैकदेशी ।

शे०वा०— ननु 'साङ्ख्यस्तु सेश्वर' इत्याद्युत्तरभाष्यमनर्थकम् । न च पातञ्जलमतोपन्यासपरं तदिति वाच्यम् । तस्याप्यनर्थकत्वात् । न च पातञ्जलमतनिरासस्य सूत्रार्थतां दर्शयितुं तदिति वाच्यम् ।

परोक्तसूत्रार्थसम्भवे तत्परित्यागेन पातञ्जलमतनिरासस्य सूत्रार्थत्वाश्रयणस्य निर्निबन्धनत्वादित्यतः परोक्त-सूत्रार्थस्यानुपपन्नत्वाद्युक्तं तदनादरेण पातञ्जलमतनिरासस्य सूत्रार्थत्वाश्रयणमित्याशयेन तन्मतोपन्यासतयोत्तर-भाष्यं सङ्गमयितुं परकीयं सूत्रार्थमनूद्य दूषयति **इदं सूत्रमित्यादिना** । **स्वयमेवेति** । चेतनव्यापारमनपेक्ष्य स्वभावत एव क्षीराकारेण परिणमत इत्यर्थः । **स्वयमेवेति** । स्वभावत एवेत्यर्थः । न तत्र चेतनापेक्षे-त्याशयः । एवमेवाग्रेऽपि तात्पर्यं बोध्यम् । **परिहृतत्वादिति** । तत्र यथा पयोऽम्बुनोश्चेतनानधिष्ठितयोः स्वभावत एव प्रवृत्तिरेवं प्रधानस्यापीति शङ्कार्थस्य त्वया वर्णितत्वेन यथा तृणादिकं स्वत एव क्षीरीभवति, एवं प्रधानमपि स्वभावत एव परिणंस्यतीत्येतत्सूत्रनिवर्तनीयशङ्काया अपि तच्छङ्कानिवर्तकेन 'पयोऽम्बुव-च्चेत्तत्रापी'त्यनेनैव परिहृतत्वात् सूत्रान्तरानारम्भकत्वादित्यर्थः । **प्रत्युदाहरणं चेति** । तथा सत्युदाहरणाना-मानन्त्येन शास्त्रापर्यवसानप्रसङ्गादिति भावः । **इति वदतेति** । सूत्रकृतेति शेषः । **प्रकृतेरिति** । गवाद्युपभुक्त-तृणादिदृष्टान्तेनेति शेषः । **न पुनरीश्वरेति** । न च बुद्धिपूर्वकारी तत्रापीश्वर एव सर्वज्ञः सम्भवतीति शङ्कानिराकरणस्यार्थः तथा चेश्वरापेक्षत्वसिद्धिः स्यादिति भामत्यामुक्तत्वात् कथमेतदिति वाच्यम् । ईश्वरा-पेक्षायाः सूत्रार्थतया लाभो नेत्याशयात् । तथा हि । अन्यत्रानड्वहोपभुक्ते तदभावादिति वदता सूत्रकृता गवादिष्वेव सहकारिविशेषसद्भावमात्रमुक्तं, न पुनश्चेतनरूप एव सहकारीति । येनेश्वरकल्पना तत्र स्यात् । न च परिशेषात्तत्र तत्कल्पनाऽभिप्रेता । औदर्यवह्निविशेषरूपस्य वा अदृष्टादिविशेषरूपस्य वा सहकारि-विशेषस्य सुवचत्वेन परिशेषस्यासम्भवादिति ।

मूले तुशब्दानर्थक्यमाशङ्क्य निरस्तसाङ्ख्यमतापेक्षया निरसिष्यमाणसाङ्ख्यमतस्य वैलक्षण्योपदर्श-नार्थत्वान्न वैयर्थ्यमित्यभिप्रेत्य किं वैलक्षण्योपदर्शनेनापीत्यतः पुनरुपन्यासवैयर्थ्यशङ्कानिरासस्तत्प्रयोजनमिति भावेनोक्तशङ्कानिरासकतया तं योजयितुं तां शङ्कामुत्थापयति **साङ्ख्यमतस्येति** । तर्हि वैलक्षण्योपदर्शक-तुशब्देनैवोक्तशङ्कानिरासान्मूले सेश्वरपदानर्थक्यमित्याशङ्क्य तुशब्दोपदर्शितविशेषव्यञ्जकत्वान्न वैयर्थ्यमिति भावेन तत्परतया योजयति **तमेवेति** । नन्वीश्वरस्य क्षेत्रानुग्रहशक्तिमत्त्वस्य सिद्धान्तेऽप्यभिमतत्वात् कथमियं वैषम्योक्तिरित्यतो यथेयं वैषम्योक्तिः स्यात् तथा योजयति **तुशब्द इति** । मूले क्षेत्रानुग्रहशक्तिमानित्यादेरिव अस्तीश्वर इत्यस्यापि विधायकताभ्रान्तिं सयुक्तिकं परिहरति **यद्यपीति** । तर्हि तद्वैयर्थ्यमित्यतोऽनुवादत्वान्न तदिति भावेनानुवादस्यापि किं प्रयोजनमित्यतस्तद्दर्शयति **तथाऽपीति** । तदनुवादेन विशेषणविधानप्रकारमेव दर्शयति **ईश्वरोऽस्तीत्यादिना** । **इन्द्रियाद्यनपेक्षमेवेति** । अत्र तुशब्दोऽवधारणार्थोऽव्याप्यन्वीयत इत्युक्तं भवति । **कर्तरि क्त इति** । 'मतिबुद्धिपूजार्थेभ्यश्चे'त्यत्र 'कर्तरि च ऋषिदेवतयोरि'त्यतः कर्तरीत्यनुवृत्तेः भातीति भातः इति भातेः कर्तरि क्तप्रत्यये निष्पन्नभातशब्देन भानकर्तृत्वलाभात् । भाशब्देन च ज्ञानस्य विवक्षितत्वात् सर्वज्ञत्वस्य लाभ इति भावः । ईश्वरस्य क्लेशकर्मादिवर्जितत्वं परस्य सम्मतमित्यत्र ज्ञापकमाह **तथा चेति** । सर्वज्ञत्वानुग्राहकत्वयोस्तत्सम्मतत्वेऽपि तद्वाक्यं पठति **तथेति** । **निर्माणकायं** लीलाविग्रहमित्यर्थः । **तत्रेत्यादिना** ।

निर्देशक्रमेण तेषां लक्षणान्याह **अनात्मनीत्यादिना** । अत्रानात्मशब्देन अव्यक्तमहदहङ्कारपञ्च-तन्मात्राख्यमष्टकं विवक्षितम् । ततश्चाष्टकविषयत्वादष्टविधत्वं तमोऽपरपर्यायाया अविद्यायाः 'भेदस्तमसोऽष्टविध' इत्यादिनोक्तमुपसङ्गृहीतमिति द्रष्टव्यम् । **इदं मदीयमित्यभिमान इति** । अणिमाद्यष्टविधमैश्वर्यं मदीयमित्यभिमान इत्यर्थः । ततश्चाष्टविधैश्वर्यविषयत्वादष्टविध इत्यस्मिताऽपरपर्यायमोहस्य 'मोहस्य भेदोऽष्टविध' इति तन्त्रान्तरोक्ताष्टविधत्वमुपसङ्गृहीतं भवति । **विषयेष्विति** । शब्दादिषु विषयेष्वित्यर्थः । तेषां च दिव्यादिव्यभेदेन दशविधत्वात् तद्विषयत्वेन रागापरपर्यायमहामोहस्य दशविधत्वसिद्धेः 'दशविधो महामोह' इति तन्त्रान्तरोक्तदशविधत्वं सङ्गृहीतं भवति । **कोपो द्वेष इति** । शब्दादयो दश विषया रञ्जनीयाः स्वरूपतः । ऐश्वर्यं त्वणिमादिकं न स्वरूपतो रञ्जनीयं किन्तु रञ्जनीयशब्दाद्युपायः ते च शब्दादय उपस्थिताः परेणापहन्यमानाः तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्ति । शब्दादिभिर्दशभिः सहाणिमाद्यष्टकमष्टादशविधमिह कोपत्वेन विवक्षितम् । तद्विषयत्वाद् द्वेषापरपर्यायतामिस्रस्य 'तामिस्रो द्वेषोऽष्टादशधे'ति तन्त्रान्तरोक्ताष्टदशविधत्वमुपसङ्गृहीतं भवति । **भयमभिनिवेश इति** । देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य शब्दादीन्भुञ्जानाः, शब्दादयो भोगास्तदुपायाश्चाणिमादयोऽस्माकमसुरादिभिर्नापहियन्तामिति बिभ्यति । तदिदं भयमष्टादशविधं तद्विषयत्वादभिनिवेशापरपर्यायान्धतामिस्रस्य 'अभिनिवेशोऽन्धतामिस्रं तथा' इति तन्त्रान्तरोक्ताष्टादशविधत्वमुपसङ्गृहीतं भवति । **एत एवेति** । अविद्यादयोऽभिनिवेशान्ताः क्लेशा एवेत्यर्थः । यथासङ्ख्यमि[illegible] शेषः । एते च पञ्चविपर्ययविशेषा इति पूरणीयम् । यद्यप्यस्मितादयो विपर्ययप्रभवा न तु विपर्ययरूपाः तथाऽपि यदविद्यया विपर्ययेण कार्यते वस्त्वस्मितादयस्तत्स्वभावाः सन्तस्तदभिनिविशन्त इति विपर्ययस्वभावत्वाद्विपर्ययप्रभेदत्वोक्तिरिति ध्येयम् । एवमविद्यादीनामभिनिवेशान्तानां यथासङ्ख्यं तमआदित्वमित्युक्तम् । अत्रैवैकदेशिमतमाह **वार्षगण्यास्त्विति** । **एतान्** तमआदीन् । **अविद्यैवेति** । न त्वविद्याऽस्मिताद्वेषाभिनिवेशानिति न पूर्वोक्तदोषावकाश इति भावः ।

वा०र०— उपन्यासपरमिति । उपन्यासरूपप्रयोजनवत्त्वात् नानर्थकं भाष्यं इत्यर्थः । **तस्यापीति** । बुद्ध्या विविच्य उपन्यासस्यापि इत्यर्थः । ततश्चोपन्यासपरं भाष्यमनर्थकमित्यर्थः(मिति भावः) । **तदितीति** । उपन्यासपरभाष्यमित्यर्थः । यद्वोपन्यासस्य पर्यायशब्दप्रकृतस्य तच्छब्देन नपुंसकेन परामर्श इत्यव्यवहितापेक्षोऽयम् । सत्येव तन्मतोपन्यासे तन्निरासस्य सूत्रार्थतया प्रदर्शनसम्भवादिति भावः । शिष्टं उत्तराधिकरणे उपपादयिष्यामः । **तन्मतेति** । पातञ्जलमतेत्यर्थः । निरासतयेत्यस्य निरासपरतयेत्यर्थः । उत्तराधिकरणे निरासपरतयेत्येव वक्ष्यति । शाङ्करभाष्याद्यनुसारेण तात्पर्यमाह **चेतनव्यापारमिति** । क्षीरीभवतीत्यस्य व्याख्यानं **क्षीराकारेणेत्यादि** । **अग्रेऽपीति** । 'न तृणादिवत् स्वयमेवे'त्यादि उत्तरवाक्येऽपीत्यर्थः । मूले आशङ्का किलेत्यत्र किलेतिशब्दो वाक्यालङ्कारे । न त्विदं किमु परस्येवेत्यादाविव निश्चयार्थः । यथा क्षीरं अचेतनमित्यादि भाष्यं अर्थतोऽनुवदति **यथा पयोम्बुनोरित्यादि** । चेतनाधिष्ठितयोरिति परिहारभाष्यानुसारेण स्वभावतः इत्येतदेव विवृतं **चेतनाधिष्ठितयोरिति** । **शङ्कार्थस्येति** । पयोम्बुवच्चेति शङ्काभागार्थस्येत्यर्थः ।

इति एतत्सूत्रेति । एवंरूपाया शङ्केत्युत्तरेण सम्बन्धः । **तच्छङ्केति** । यथा पयोम्बुनोरित्यादिशङ्केत्यर्थः । अत्र वर्णितत्वेनेति इत्थम्भूतलक्षणे तृतीया । तच्छङ्कानिवर्तकत्वप्रकारप्राप्तस्योक्तं वर्णनं लक्षणम् । उक्तशङ्कार्थवर्णनं दृष्ट्वा पयोम्बुवच्चेत्यत्रापि इत्यस्मिन् तच्छङ्कानिवर्तकत्वस्य ज्ञायमानत्वात् । ततश्च वर्णनप्रयुक्ततच्छङ्कानिवर्तकत्वेनेति सम्पूर्णसूत्रविशेषणं युक्तमिति तच्छङ्कानिवर्तकेन तत्रापीत्यनेन इति वक्तव्यमिति शङ्कानवकाश इति ज्ञेयम् । तथाविधसूत्रेणैव यथा तृणादिकं इत्यादिशङ्कायाः अपि परिहृतत्वादिति योजना । प्रत्युदाहरणं च इत्युत्तरवाक्यानुसारेण तात्पर्यमाह **सूत्रावारम्भकत्वादित्यर्थ इति** । तत्रारम्भप्रयोजनत्वानुपपत्तेरित्यर्थः । अयोगमुपपादयति **तथा सतीति** । अन्यत्राभावात् इत्येतद्व्याख्यानानुवादेऽपि सूत्रानुवादाभावेन सूत्रकारीयत्वं वदनस्य प्रतीयते इत्यतः परेण व्याख्यातसूत्रखण्डस्य तदुक्तरीत्या अर्थानुवादोऽयमिति दर्शयन्नाह **सूत्रकृतेति शेष इति** । **शङ्कानिराकरणस्यार्थ इति** । निराकरणपरसूत्रखण्डस्यार्थ इत्यर्थः । **सूत्रार्थतयेति** । सूत्राक्षरपर्यालोचनायां तु नेश्वरापेक्षालाभः इत्यर्थः । सूत्राक्षरमर्यादया तल्लाभाभावमेव दर्शयति **तथा हि अत्र अनुडुहेत्यादिना** । **औदर्येति** । जाठर्येत्यर्थः । अदृष्टादि **इत्यादि**पदेन संस्थानपरिग्रहपक्षः । असम्भवादिति अत्रेतिशब्दः ईश्वरापेक्षाभावप्रदर्शनपरिसमाप्तौ । **विधायकतेति** । ईश्वरसद्भावविधायकतेत्यर्थः । **मतिबधिपूजार्थेभ्यश्च इति** । बुद्धेः पृथगुपादानात् मन् ज्ञाने इति धातोः अनेकार्थत्वात् । मतिरिच्छाबुद्धिः ज्ञानं पूजा अर्चनम् । एतदर्थकेभ्यो वर्तमाने क्तप्रत्ययो भवतीति सूत्रार्थः । राज्ञां मतः । इष्टः इत्यर्थम् । बुद्धः विदितः इत्यर्थः । इत्याद्युदाहरणम् । **कर्तरि च ऋषिदेवतयोः इति** । पुवः संज्ञायां इति पूर्वसूत्रात् पुवः इति वर्तते । पुङ्धातो पूञ्धातोर्वा करणे कर्तरि च कारके इत्रप्रत्ययो भवति इति सूत्रार्थः । ऋचौ वाच्ये पूयतेऽनेनेति । पवित्रम् । देवतायां अग्निः पवित्रं स पुमान् । सोमः पवित्रं इत्येवं कर्तरि चोदाहरणम् । **कर्तरीत्यनुवृत्तेरिति** । यद्यपि वृत्त्यादौ कर्तरि चेति पूर्वसूत्रात् कर्तरीत्यस्य मतिबुद्धीति सूत्रेऽनुवृत्तमाश्रित्य क्तप्रत्ययः कर्तरि न व्याख्यातः । तथा चानुवृत्तेः इति निर्मूल इत्याभाति । तथापि इहानुवृत्तेः इत्यस्याभियुक्तप्रयोगे संरक्षणायानुवृत्तेः व्याख्यातुं शक्यत्वात् इत्यर्थः । तया स्वयं भातः इत्येतत् प्रयोगस्याप्यभियुक्तप्रयोगतया तत्संरक्षाणायानुवृत्तिर्व्याख्येया इत्यत्र तात्पर्यात् न दोषः इति द्रष्टव्यम् । स्वयंभात इति परोक्तिः तट्टीकाकारैः कर्तरि क्तप्रत्ययाश्रयणेन व्याख्याता तदनुवादश्च टीकायां इति न दोषः इत्यप्याहुः । दीप्त्यर्थकत्वात् भाधातोः प्रकृतोपयोगायानेकार्थतां धातूनामाश्रित्याह **भाशब्देन चेति** । साङ्गचपरीक्षानुसारेणाह **अत्रानात्मशब्देनाव्यक्तेत्यादि** । ... । **तमोऽपरपर्यायाया इति** । तमोऽपरपर्यायायाः अविद्याया भेदः तमसा इष्टविधः इत्यादिनोक्तमिष्टविधत्वमिति सम्बन्धः । **तन्त्रान्तरोक्तेति** । एतत्प्रकरणं निष्कास्यमस्ति । **द्वेषाभिनिवेशनीति** । अत्र च न त्वित्यादिः मूले शेषः पूरणीयः इत्याशयेन प्रवृत्तेः मूलोक्तमाहेति संयोज्यमिति सिद्धमिति अभिनिवेशान् इत्याहेति अर्थलाभः इति ज्ञेयम् ।

स०व्र०— विशेषणविधानमेवैतदिति । ईश्वरोऽस्तीत्येतदित्यर्थः । तदेव दर्शयति **य ईश्वर इति** । **कर्तरि क्त इति** । 'मतिबुद्धिपूजार्थेभ्यश्चे'त्यत्र 'कर्तरि चर्षिदेवतयोरि'त्यतः कर्तरीत्यस्यानुवृत्त्या

'मतिबुद्धी'ति सूत्रेण कर्तरि क्त इत्यर्थः । भाति प्रकाशते इत्युक्त्या जानातीति लभ्यत इत्यर्थः । तस्यानुग्राहकत्वे सम्मतिमाह **तथेति** । **निर्माणकायं** लीलाविग्रहमित्यर्थः । **अस्मितेति** पदविभागः ।

विट्ठल०— स्वयमेवेति । चेतनव्यापारमनपेक्ष्येत्यर्थः । **पयोऽम्बुवदिति** । चेतनानधिष्ठितयोः पयोम्बुनोः स्वत एव प्रवृत्तिः एवं प्रधानस्यापीति शङ्कायाः परिहृतत्वादित्यर्थः । अत्र तृणादेरुदाहृतत्वाद्भेद इत्यत आह **प्रत्युदाहरणमिति** । **नान्यत्रेति हि वदतेति** । अन्यत्रानड्वाह्युपभक्तस्य तृणादेः क्षीरत्वं नेति सूत्रखण्डेन वदता सूत्रकृता तृणादेः क्षीरीभावे गवाद्युपभोगः सहकारीत्येतावन्मात्रमुपपादितं स्यात् । न त्वीश्वरनियतत्वं सूत्रार्थतया लभ्यत इति भावः । अस्तीश्वर इति मूलांशस्य वैय्यर्थ्यमाशङ्क्य परिहरति **यद्यपीति** । **क्षियन्ति** नश्यन्ति । न च सत्कार्यवादे मुख्यतो नाशः सम्भवति । अत उक्तम् **अव्यक्ततयेति** । **तदनुग्रहशक्तिरेवेति** । न तूपादानत्वादिप्रेरकत्वरूपा शक्तिरित्यर्थः । **कर्तरि क्त इति** । भानकर्तेत्यर्थे क्तप्रत्यय इत्यर्थः । स्वयम्भात इत्यादावपि तदीयवाक्यं पठति **तथेति** । जगन्निर्माणोपयुक्तं शरीरमधिष्ठाय सम्प्रदायप्रवर्तकः प्रकृत्याद्यनुग्राहकश्चेत्यनेन सार्वज्ञक्षेत्रानुग्रहशक्तिमत्वं ज्ञायत इति भावः । **तत्रान्तरे** तदेकदेशिमते । **वार्षगण्यो** नाम कश्चिन्मतप्रवर्तकः तदुपायः सुखादिसाधनभूतो विषयभोगादिः ।

चषकः— प्रकृतचरणेऽन्यदीयसौत्रापव्याख्यां भाष्यकृतः क्वापि न प्रत्याचख्युरिति तामपि तेऽनुमन्यन्त इति मन्दाः प्रतिपद्येरन्निति तामनूद्य दुदूषयिषुरवतारयतीदं सूत्रं **केचिदित्यादिना** । **अनड्वहा** अनःकर्मकवहनक्रियाकर्ता बलीवर्देन । **पातञ्जलं** पतञ्जलिप्रवर्तितम् । **कर्तरि क्त इति** । गत्यर्थाकर्मकेति स्मृतेः कर्तृसाधनः क्तप्रत्यय इति भावः ।

॥ इति ईश्वरस्वरूपम् ॥

* * *

॥ अथ तत्रान्ते वेदवादविरोध्यंशः ॥

९१ **सु०— वेदवादविरोधं स्फुटीकर्तुमवधारणव्यावर्त्यमाह क्षेत्रेति ।**

अनु०— क्षेत्रशक्तिमती सैव प्रकृतिः

या जगदुपादानं सा प्रकृतिरेव उपादानत्वशक्तिमतीति ब्रूते । न पुनर्वेदवादिन इव तामपि शक्तिमीश्वरायत्ताम् ।

व्यावर्त्यान्तरमाह बीजेति ।

बीजशक्तिमान् ।

जीवः, पर्जन्यवत्

अत्रापि **एव** इति सम्बध्यते । शरीरेन्द्रियादिसम्बन्धेनोत्पत्तौ या शक्तिः सा **बीजशक्तिः** । **जीव एव तद्वानिति ब्रूते** । न तु तदीयां बीजशक्तिं तत्त्व(वादिन)विद इव भगवदधीनाम् ।

यद्युपादानत्वोत्पत्तिशक्तिमत्त्वं प्रकृतिपुरुषयोरेव तदा किमीश्वरेणानुग्राहकेणेत्यत आह **पर्जन्यवदिति** । यथा हि पृथिव्याः कमलादिबीजानां चोपादानत्वबीजत्वशक्ती यद्यपि स्वायत्ते तथाऽप्यङ्कुरोत्पत्तौ पर्जन्यस्यास्ति पृथिव्यनु(ग्रहकारक)ग्राहकत्वम्, तथा प्रकृति-पुरुषयोः स्वायत्तशक्तित्वेऽपीश्वरः प्रकृत्यनुग्रहशक्तिमानङ्गीकरणीयः ।

तत्किं पर्जन्यवदन्वयव्यतिरेकाभ्यामीश्वरस्य प्रकृत्यनुग्राहकत्वमवसेयं नेत्याह **दैवेति** ।

दैवशक्तिमानीश्वरः स्मृतः ।

दैवशब्दोऽदृष्टस्वरूपत्वमाह । तेनान्वयव्यतिरेकाविषयत्वं लक्षयति ।

तत्किं निष्प्रमाणक एवेश्वरः प्रकृत्यनुग्राहकोऽङ्गीकरणीय इत्यत उक्तं **स्मृत इति** । 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरमि'त्यादाविति शेषः । **स्मृत** इत्युपलक्षणम्, श्रुत इत्यपि ग्राह्यम् ।

प्रकृतिपुरुषयोः स्वायत्तशक्तित्वं कुत इत्यत आह **पृथिवीवदिति** ।

पृथिवीवत्प्रधानं तत्

यथा पृथिव्याः स्वायत्तोपादानत्वशक्तिः तथा, **तत्** तस्मात् उपादानत्वात्, **प्रधानम्** अपि स्वायत्तोपादानत्वशक्तिमदनुमेयमित्यर्थः । उपलक्षणं चैतत् । कमलादिबीजवत् बीजत्वाज्जीवोऽपि स्वायत्तबीजशक्तिमाननुमातव्य इत्यपि द्रष्टव्यम् ।

परि०— अवधारणेति । क्षेत्रानुग्रहशक्तिमानित्यत्र अवधारणार्थतयान्वितेतुशब्द-व्यावर्त्यमित्यर्थः । मयाध्यक्षेणेति गीतावाक्यम् । **श्रुत इत्यपीति** । यो योनिमधितिष्ठतीत्यादाविति भावः ।

यादु०— अवधारणव्यावर्त्यमाहेति । क्षेत्रानुग्रहशक्तिमानेवेत्यवधारणव्यावर्त्यमाहेत्यर्थः । **अत्रापि** बीजभूतबीजावपनेऽपि ।

कं०रा०— वेदवादेति । सेश्वरसाङ्ख्यमतस्य वेदवादविरोधं स्फुटीकर्तुं क्षेत्रानुग्रहशक्तिमानेवेत्यव-धारणस्य व्यावर्त्यमाहेत्यर्थः । **श्रुत इत्यपीति** । 'यतः प्रसूता जगतः प्रसूती'त्यादावीश्वरः प्रकृत्यनुग्राहकत्वेन श्रुत इत्यपि ग्राह्यमित्यर्थः ।

शे०वा०— ननु क्षेत्रशक्तिमतीत्युत्तरभाष्यमनर्थकम् । न च प्रकृत्यादेरुपादानत्वादिशक्तिमत्ता-प्रदर्शनार्थं तदिति वाच्यम् । तस्याप्यनर्थकत्वात् । न च क्षेत्रानुग्रहशक्तिमानेवेत्यवधारणव्यावर्त्यप्रदर्शनार्थं तदिति वाच्यम् । तत्प्रदर्शनस्यापि प्रयोजनानुपलम्भादित्यतः तत्प्रदर्शनपूर्वकमवधारणव्यावर्त्यप्रतिपादक-तयोत्तरवाक्यं योजयति **वेदवादेति** । **व्यावर्त्यान्तरमाहेति** । अत्रापि वेदवादं स्फुटीकर्तुमवधारणस्येति शेषः । क्षेत्रानुग्रहशक्तिमानित्यनुग्राह्यत्वोक्तेः पर्जन्यवदिति पुनरनुग्राहकत्ववर्णनमनर्थकमित्याशङ्क्योपादान-त्वादिशक्तेः प्रकृत्यादिमात्रनिष्ठत्वेनेश्वरस्य प्रागुक्तप्रकृत्यनुग्राहकत्वासम्भवशङ्काया दृष्टान्तोक्त्या तत्समर्थनेन निरासार्थत्वान्न तदिति भावेन तच्छङ्कानिवर्तकतया तद्योजयितुं तां शङ्कामुत्थापयति **यदीति** । शक्तेरदृष्टत्व-वर्णनानर्थक्यमाशङ्क्येश्वरस्य प्रकृत्यनुग्राहकताया अन्वयव्यतिरेकसमधिगम्यत्वाभावसमर्थनार्थत्वान्न तदिति भावेन तत्तात्पर्यमाह **तत्किमिति** । तथाऽपि स्मृत इति तस्य स्मृतिसिद्धत्ववर्णनमनर्थकमित्यतः तस्य अप्रामाणिकत्व-शङ्कानिरासार्थत्वान्न तदिति भावेन तच्छङ्कानिरासकतया तत्तात्पर्यमाह **तत्किमिति** । **श्रुत इत्यपि ग्राह्य-मिति** । 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्' इति श्रुत इत्यपि ग्राह्यमित्यर्थः । तथाऽपि पृथिवीवदिति भाष्यखण्डवैयर्थ्यम् । न च पृथिवीदृष्टान्तेन स्वायत्तशक्तित्वोपपादनार्थमेतदिति वाच्यम् । तस्याप्यनर्थकत्वादित्यतः 'क्षेत्रशक्तिमती सैव प्रकृतिर्बीजशक्तिमानि'त्युक्तप्रकृतिपुरुषस्वायत्त-शक्तित्वस्य प्रामाणिकत्वेनोपपादनार्थत्वान्न तदिति भावेन तदप्रामाणिकत्वशङ्कानिरासकतया तद्योजयितुं तां शङ्कामुत्थापयति **प्रकृतिपुरुषयोरिति** । तावता प्रकृतेरुपादानत्वशक्तेः स्वायत्तत्वसमर्थनेऽपि जीवस्य बीजशक्तेः स्वायत्तत्वस्य मूलेऽसमर्थनात्, नोक्ताक्षेपपरिहारकत्वमस्य मूलस्येत्यतस्तत्सिद्ध्यर्थमपेक्षितं पूरयति **उपलक्षणं चैतदिति** ।

वा०र०— असम्भवशङ्कायाः इति । निरासार्थत्वात् इत्यनेन सम्बन्धः । तत्समर्थनेन प्रकृत्यनु-ग्राहकत्वमिति तच्छब्दार्थः । तत्त्वनिर्णयतत्त्वप्रकाशिकयोः विससर्जेति व्याख्यातम् । तट्टीकायां च उपपादनं

अत्र ज्ञेयम् । 'व्यससर्ज भूम्यां' इति श्रुतिपाठो नारायणोपनिषद्भाष्यानुसारेण व्याख्येयमस्ति । 'क्षेत्रशक्तिमती सैवे'त्यनुव्याख्यानेति शेषः । जीव इति स्पष्टत्वात् जीव इत्यंशाननुवादः । बीजशक्तिमान् जीव इत्युक्तेति पाठस्तु स्वरस एव ।

विठ्ठल०— अवधारणव्यावर्त्यमिति । अवधारणार्थतुशब्दस्य क्षेत्रानुग्रहशक्तिमानित्यनेन सम्बन्धस्योक्तत्वात् लघ्वावर्त्यमाहेत्यर्थः । **उपादानत्वोत्पत्तिशक्तिमत्वमिति** । प्रकृतेरुपादानत्वं पुरुषत्वं पुरुषस्य कलमादिबीजवदुत्पत्तिमत्त्वमित्यर्थः । **लक्षयतीति** । ततश्च दैवशक्तिमानित्यस्य लक्षणायान्वयव्यतिरेकाविषयशक्तिमानित्यर्थ इत्युक्तं भवति । **मयाध्यक्षेणेति** गीतावाक्यम् । **श्रुत इत्यपीति** । यो योनिं योनिमधितिष्ठतीत्यादाविति शेषः । **तस्मादिति** । तथा च जीवस्य बीजशक्तिमत्त्वेऽप्यावापनकर्ताऽन्यो जीवो यस्मात्तस्मादित्यर्थः ।

९२ सु०— ननु यथा लोके कमलादिबीजानां कश्चिदावपनकर्ताऽस्ति तथाऽत्रापि तत्स्थानीयेन केनापि भाव्यम्, न चासावन्योऽस्ति परमेश्वरात्; तत्कथं क्षेत्रानुग्रहशक्तिमानेवेश्वर इत्यत आह जीव इति ।

अनु०— जीवः सन्निधिमात्रतः ।
बीजावपनकर्तेवेति

दृश्यते खल्वपत्यजीवो बीजभूतः, पितृजीवश्चावपनकर्तृस्थानीयः । तस्मात् किमीश्वरस्य तच्छक्तिकल्पनया । विषयोत्पत्तौ तु तदपेक्षैव नास्तीति भावः ।

नन्वेवं पितृजीवस्यापत्योत्पादकत्वाङ्गीकारेऽपसिद्धान्तः स्यात्, साङ्ख्यैर्जीवस्य कर्तृत्वानभ्युपगमात्; इत्यत उक्तं सन्निधिमात्रत इति । शरीरादिरूपा प्रकृतिरेवापत्यो(त्पत्ति)त्पादकर्त्री, तत्सन्निधिनिमित्ताद्विवेकाग्रहाज्जीवे तत्कर्तृत्वव्यवहार एवेति ब्रूत इति ।

परि०— किं जीवोत्पत्तौ आवपनकर्तापेक्षित इत्युच्यते अथ तद्भोग्यशब्दादिविषयोत्पत्तौ । आद्ये आह **दृश्यते खल्विति** । अन्त्य आह **विषयेति** । बीजशक्तिमत एव आवपनकर्तृसापेक्षत्वात् इति भावः ।

गु०दी०— विषयोत्पत्तौ इत्यत्र विषयपदमुपलक्षणम् । रूपरसादि पञ्चतन्मात्रकदेहेन्द्रियाद्युत्पत्ता-वित्यर्थः ।

यादु०— नन्वस्त्वेवं बीजभूतापत्यजीवोत्पत्तौ पितृजीव आवपनकर्ता । शब्दादिविषयोत्पत्तौ तु ईश्वर एवावपनकर्ताऽङ्गीकार्यः । तथा चावधारणविरोध इत्यत आह **विषयोत्पत्ताविति** । **तदपेक्षा** आवपन-कर्त्रपेक्षा । यद्बीजशक्तिमत् तदेवावपनकर्तृसापेक्षम् । विषयास्तु न बीजशक्तिमन्तोऽतस्तत्र न तदपेक्षेति भावः । मूले कर्तेवेति प्रकृतिसन्निधानेनैव बीजावपनकर्तृत्वं न स्वत इत्यङ्गीकारात् इवेत्युक्तमिति भावः ।

कं०रा०— अपत्यजीव इति । बीजस्याङ्कुररूपेणेवापत्यजीवस्य शरीरेन्द्रियादिसम्बन्धित्वेनोत्पद्यमान-त्वादपत्यजीवो बीजभूत इति भावः ।

श्रीनिधि०— विषयोत्पत्तौ त्विति । अङ्कुरादिकार्योत्पत्ताविवित्यर्थः । ज्ञात्रपेक्षया विषयत्वादेव-मुक्तम् ।

शे०वा०— ननु 'जीवः सन्निधिमात्रतः । बीजावपनकर्ते'ति जीवस्य बीजावपनकर्तृत्वनिरूपण-मनर्थकम् । न चेश्वरस्य तदभावोपपादनार्थमेतदिति वाच्यम् । ईश्वरस्य तदावपनकर्तृत्वाश्रयणे बाधकाभावेन तन्निवारणस्यापि निर्निबन्धत्वादित्यतः पूर्वोक्तस्य क्षेत्रानुग्रहशक्तिमत्त्वावधारणस्य समर्थनार्थत्वान्न तदिति भावेन तत्समर्थनपरतया तद्योजयितुं बीजावपनकर्तुरावश्यकत्वोपपादनपूर्वकं तदाक्षेपशङ्कामुत्थापयति **नन्विति** । ननु जीवस्य बीजभूतस्य कथं तदावपनकर्तृत्वमित्यतो बीजभूतस्य जीवस्यावपनकर्तृत्वासम्भवेऽपि तदन्यस्य जीवस्य तत्कर्तृत्वाश्रयणान्नानुपपत्तिरित्यभिप्रेत्य तदुभयमुपपादयति **दृश्यते खल्विति** । नन्वावपनकर्तृ-त्वेनेश्वरस्यानपेक्षायामपि शरीरादिविषयोत्पादकत्वेन तदपेक्षाया आवश्यकत्वादवधारणानुपपत्तिरेवेत्यत आह **विषयोत्पत्ताविति** । **तदपेक्षा** ईश्वरापेक्षा । बीजतदावपनकर्तृत्वाभ्यामेव तदुत्पत्त्युपपत्तेरिति भावः । ननु तथाऽपि जीवस्य शरीरादिरूपप्रवृत्त्या सन्निधिमात्रत इति सन्निधिव्युत्पादनमनर्थकम् । न च सन्निधिनिमित्त-विवेकाग्रहोपदर्शनार्थमेतदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वादित्यतो जीवे कर्तृत्वव्यवहारे निमित्तोप-दर्शनार्थत्वान्न तदिति भावेन मुख्यस्यैव कर्तृत्वव्यवहारस्य सम्भवे किमौपचारिकत्वाश्रयणेन येन निमित्तोप-दर्शनार्थतया सन्निधिकथनमर्थवत्स्यादित्यतो मुख्यकर्तृत्वासम्भवप्रदर्शनपूर्वकं तदौपचारिकत्वसमर्थनपरतया तद्योजयति **नन्वेवमित्यादिना** ।

वा०र०— शरीरादिरूपप्रवृत्त्या इति । सन्निधिव्युत्पादनमित्यनेन सम्बन्धः ।

विट्ठल०— नन्वस्त्वेवेवमन्यो जीव आवापनकर्ता तथापि शब्दविषयोत्पत्तावीश्वर एवावपनकर्ता अङ्गीकार्यः तत्र जीवप्रवृत्तेरदर्शनात् । तथा चावधारणविरोध इत्यत आह **विषयोत्पत्ताविति** । बीजशक्तिमत एव वपनकर्तृसापेक्षत्वेन विषयाणां बीजशक्तिभावान्नावपनकर्तृसापेक्षतेति भावः ।

॥ इति वेदवादविरोध्यंशः ॥
॥ इति सेश्वरसाङ्ख्य(पातञ्जल)मतनिरूपणम् ॥

* * *

॥ अथ उपन्यस्तमतनिरासः ॥
॥ अथ तत्र सेश्वरसाङ्ख्य(पातञ्जल)मतनिरासः ॥
॥ अथ तत्रादौ सूत्राक्षरैस्तन्मतनिरासः ॥
॥ अथ तत्राप्यादौ चकारेतराक्षराणां व्याख्यानम् ॥

९३ **सु०**— एवमुपन्यस्तमतनिरासार्थं सूत्रमवतारयति **अत्रेति** ।

अनु०— **अत्र प्राह स्वयं प्रभुः ।**

अत्र एतन्मतविषये दूषणं **प्राह** इत्यर्थः । **स्वयं** साक्षात् नोपचारेण । **प्रभुः** इति सूत्रकृतो दूषणसामर्थ्यमाचष्टे ।

सूत्रं व्याचष्टे **अन्यत्रेति** ।

अन्यत्र काऽपि शक्तिर्न स्वातन्त्र्येण

अन्यत्र प्रकृतौ, पुरुषे, तथा पृथिव्यां कमलादिबीजे च । **काऽपीति** क्षेत्रशक्तिर्बीजशक्तिर्बीजावपनशक्तिश्च इत्यर्थः । कथं तर्ह्युपादानत्वादिकमित्यत उक्तं **स्वातन्त्र्येणेति** ।

कुतो नास्तीत्यत आह **ईशेति** ।

ईश एव हि ।

शक्तीस्ताः प्रेरयत्यज्ञः

यस्मात् ईश एव ताः प्रधानादिशक्तीः प्रेरयति इति श्रुत्यादिप्रसिद्धम्, तस्मात् अन्यत्र काऽपि शक्तिः स्वातन्त्र्येण नास्ति इति ।

न च प्रधानादिवदीश्वरस्यापि प्रेरणाशक्तिः परायत्ता इत्युक्तम् अज्ञ इति । क्रियाविशेषणमेतत् । तदनेन परकीयानुमानस्य बाधितविषयत्वं, दृष्टान्तस्य च साध्यविकलत्वमुक्तं भवति ।

परि०— परकीयानुमानस्येति । प्रधानं स्वाधीनशक्तिमत्, उपादानत्वात्, पृथिवीवदिति अनुमानस्य श्रुत्यादिबाधितविषयत्वमित्यर्थः ।

यादु०— परकीयानुमानस्येति । प्रधानं स्वायत्तशक्तिमत्, उपादानत्वात् पृथिवीवदित्याद्यनुमानस्येत्यर्थः ।

कं०रा०— तदनेनेति । 'अन्यत्र काऽपि शक्तिर्न स्वातन्त्र्येणेश एव हि । शक्तीस्ताः प्रेरयन्त्यज्ञ' इत्यनेन प्रधानं स्वायत्तोपादानत्वशक्तिमत् उपादानत्वात् जीवः स्वायत्तबीजशक्तिमान् बीजत्वादित्यनुमानयोर्बाधितविषयत्वं पृथिवीकलमबीजरूपदृष्टान्तयोः साध्यविकलत्वं चोक्तं भवतीत्यर्थः ।

श्रीनिधि०— परकीयानुमानस्येति । अनेन सर्वशक्तीनामपि तत्स्वामिकत्वेनेत्यर्थः । प्रकृतिपुरुषौ स्वायत्तोपादानोत्पत्तिशक्त्युपादानबीजत्वात् । पृथिवीकलमबीजवत् इति परकीयानुमानस्येत्यर्थः । **दृष्टान्तस्य च साध्यविकलत्वमुक्तं भवतीति** । पृथिवीकलमबीजदृष्टान्तस्येत्यर्थः ।

शे०वा०— अत्रेति परामृष्टव्यं दर्शयन्नेव विषयत्वं सप्तम्यर्थ इत्याशयेनाह **एतन्मतविषय इति** । प्रकृत्यादाविति पृथिव्यादाविति वा वक्तव्ये तथाऽनुक्त्वाऽन्यत्रेति सौत्रा सामान्योक्तिः किमर्थेत्यतस्तथोक्तौ प्रतिज्ञामात्रदूषणस्य दृष्टान्तमात्रदूषणस्यैव च प्राप्योभयदूषणालाभात् तल्लाभाय सामान्योक्तिरित्यभिप्रेत्य पक्षदृष्टान्तसमर्पकतया तद्वचाचष्टे **अन्यत्र प्रकृतावित्यादि** ।; अत्र प्रकृतौ पुरुष इति दार्ष्टान्तिकाभिप्रायेण पृथिव्यां कलमादिबीजे चेति दृष्टान्ताभिप्रायेणोक्तमिति द्रष्टव्यम् । उपादानशक्तिरिति वा बीजशक्तिरिति वा आवर्पनशक्तिरिति वाऽनुक्त्वा काऽपीति सामान्योक्तिरपि उक्तसर्वशक्तिसङ्ग्रहार्थेति भावेन तत्परतया तत्तात्पर्यमाह **काऽपीति** । भिन्नलिङ्गवचनत्वेन शक्त्यादिविशेषणत्वानुपपत्तेरीश्वरनिष्ठप्रेरणाशक्तेरपरायत्तत्वासिद्धया प्रकृतानुपयोगाच्चाह **क्रियाविशेषणमिति** । साधनं परित्यज्य धात्वर्थमात्रविशेषणमित्यर्थः । ततश्च क्रियाद्वारा

प्राप्तस्त्रीलिङ्गत्वबोधेन 'क्रियाव्ययविशेषणानामि'त्यनेन क्लीबत्वादिविधानान्नानुपपत्तिरिति भावः । **अनेनेति** । अन्यत्राभावादिति सूत्रखण्डेनेत्यर्थः । **परकीयानुमानस्येति** । प्रधानं स्वायत्तोपादानत्वशक्तिमत् उपादानत्वात् । जीवः स्वायत्तबीजत्वशक्तिमान् बीजत्वादित्येवंरूपस्येत्यर्थः । **दृष्टान्तस्य चेति** । पृथिवीकलमादिबीजरूपस्येत्यर्थः ।

वा०र०— भिन्नलिङ्गवचनत्वेनेति । **शक्त्यादीत्यादि**पदेन प्रेरकेशसङ्ग्रहः । यद्यपि अञ्जः इत्येतत् अव्ययमेव । तथा चास्य शक्त्यादिविशेषणत्वेनानुपपत्तिः । अञ्जशब्दस्य त्रिलिङ्गत्वात् । सर्ववचनवत्त्वाच्च । अत एव अहन्नहिं पर्वते शिश्रियाणं इत्येतद्व्याख्यानावसरे अजः आर्जवेनेत्यनूद्य व्याख्यातम् । रमाकृता स्वरादेराकृतिगणत्वं विवृण्वानो अनेनाञ्जसेति तत्त्वशाघ्र्यायोः इत्यञ्जसेति इत्येतत् अव्ययत्वेनोक्तम् । ओजः-सहोभस्तमसः तृतीयायाः । इत्येतत्सूत्रीयवृत्त्यादावञ्जसः उपसङ्ख्यानं अञ्जसा कृतमित्युक्तम् । मञ्जर्यादौ चाञ्जसेत्यस्या आर्जवेनेति व्याख्यानं कृतम् । तथा चाञ्जसा अञ्जः इत्युभयमपि अव्ययमेवेति ज्ञायते । न चैवं अञ्जसः उपसङ्ख्यानेन तृतीयायाः अलुगुत्त्ययोगः । अञ्जशब्दात् अव्ययात् तृतीयायाः अव्ययत्वादेव लोपेन समासप्रयुक्तलोपाप्रसक्त्या तदपवादेन तृतीयायाः अलुगर्थं उपसङ्ख्यानानर्थक्यादिति वाच्यम् । समासे सति समासप्रसक्तस्यापि लोपस्य वक्तुं शक्यतया तदपवादतया उपसङ्ख्यानस्यावश्यकत्वात् । तस्मात् अञ्जसेतिवत् अञ्जः इत्यस्यापि अव्ययत्वमेवेति स्त्रीलिङ्गशक्त्यादिविशेषणत्वेऽपि अनुपपत्तिर्नास्तीति प्रतिभाति । तथापि अजःशब्दस्याव्ययत्वाभावपक्षमाश्रित्याञ्जूलव्यक्तिलक्षणकां गतिष्विति व्यक्त्यार्थात् अञ्जेः 'सर्वधातुभ्योऽसुन्' इति औणादिकसूत्रेण । सुनि चेतः पयः सुन् इत्यादिवत् अञ्जःशब्दोऽपि निष्पादयितुं शक्यः इत्याशयेन नपुंसकाञ्जःशब्दमाश्रित्य भिन्नलिङ्गवचनत्वेन इत्युक्तिरिति न दोषः । यद्वा एतदस्वरसादेवाह **ईश्वरनिष्ठा प्रेरणशक्तिरिति** । अञ्जःशब्दस्य शक्तितत्प्रेरकविशेषणत्वेन तयोरेवाञ्जःशब्देन परानपेक्षत्वरूपाञ्जस्य त्वप्राप्त्या प्रेरणाशक्तेः उक्तरूपाञ्जस्यासिद्ध्या प्रकृतानुपयोग इत्यर्थः । उपलक्षणं चैतत् । प्रधानादिनिष्ठोपादानत्वादिशक्तीनामञ्जशब्दोक्तं परानपेक्षत्वं प्रेरयतीत्युक्तपरापेक्षत्वविरुद्धं चेत्यपि ज्ञेयम् । प्रेरणाशक्तेः परायत्तत्वासिद्ध्येति पाठः । परायत्तत्वासिद्ध्येति तु लेखकागतः । प्रेरणक्रियायाः आञ्जस्ये उक्ते परानपेक्षो यथा स्यात् तथा प्रेरयतीति उक्तेः प्रेरणाशक्तेः परानपेक्षत्वं उक्तं भवतीति हृदयम् । अत्राञ्जःशब्दलिङ्गविचारः कार्योऽस्ति । स्थलान्तरे चाञ्जःशब्दीयविचारो बोध्यः । 'दैवमेवापरे यज्ञं' इति गीताभाष्ये यज्ञमिति क्रियाविशेषणं इत्युक्तस्य टीकायां व्याख्यानमस्ति । तदनुसारेणाह **साधनमिति** । एतत्स्थलीयमानन्दमयनये **'येऽन्नं ब्रह्मोपासां' इत्यनुव्याख्यानमूलटीकाप्रपञ्चावसरे प्राक् व्याख्यातं विस्तरेण उत्तरत्र च व्याकरिष्यते । सन्तीति त्रिविधमपि सत्त्वं विवक्षितं इत्युत्तरमूलानुसारेण सत्ताया स्वरूपादिभेदेन त्रैविध्यसिद्ध्या भाष्ये सत्ता-**पदेन एव स्वरूपस्येव प्रतीतिप्रवृत्त्योरपि प्राप्तेः **ष्टयक् उभयोपपादनवैय्यर्थ्यमित्याशङ्कापरिहाराय सत्तापदेन** तदर्धैकदेशपरतया योजयति **सत्तास्वरूपमिति** मूलम् । अनेन सत्तायाः अपि इत्यादिरूपभाष्येऽन्यत्रापि तत्त्वसङ्ख्यानटीकादौ सत्तादिप्रयोगस्थले सत्तापदं एकदेशपरं अन्यथा पदान्तरवैय्यर्थ्यप्रसङ्ग इत्यपि सूचितम् ।

केचित् इत्युत्तरग्रन्थे सत्तायाः त्रिरूपत्वमुच्यते, तदनर्थकम् । न चोत्तरभाष्यगतसन्तीत्यस्य स्वरूपमात्रार्थत्वप्रतीतिनिरासाय तत् ।

विट्ठल०— परकीयानुमानस्येति । प्रधानं स्वायत्तशक्तिमत् उपादानत्वात् पृथिवीवदित्याद्यनुमानस्येत्यर्थः ।

॥ इति चकारेतराक्षराणां व्याख्यानम् ॥

* * *

॥ अथ तत्रान्ते चकारव्याख्यानम् ॥

९४ **सु०— न केवलं प्रकृतिपुरुषयोः स्वातन्त्र्येण शक्त्यभावः, परमेश्वरायत्तशक्तित्वं च; किं तर्हीत्यतः 'च'शब्दसमुच्चितमर्थमाह तदधीनाश्चेति** ।

अनु०— तदधीनाश्च सर्वदा ।
सत्ता प्रधानपुरुषशक्तीनां च प्रतीतयः ।
प्रवृत्तयश्च तास्सर्वाः

आद्यश्चशब्दः शक्तिप्रेरकत्वस्य सत्तादिप्रदत्वेन सह समुच्चयार्थः, उत्तरावन्योन्यसमुच्चये ।

प्रधानपुरुषयोः तदीयानां शक्तीनां च, सत्ता स्वरूपं, **प्रतीतयश्च** प्रमाविषयत्वं चेति यावत्; **ताः** ताः **सर्वाः प्रवृत्तयश्च सर्वदा तदधीना** इति योजना । केचिन्मन्यन्ते स्वरूपमेव वस्तुनः सत्त्वमिति, अपरे तु प्रमाणयोग्यत्वम्, अन्ये पुनरर्थक्रियावत्त्वम्; तदिदं त्रयमपि प्रकृत्यादीनां भगवदधीनमेवेति ।

परि०— सत्तेतिमूलपदमनूद्यार्थमाह **सत्ता स्वरूपमिति । प्रवृत्तय इति** । तत्तदुचिता(र्थ) क्रिया इत्यर्थः । सत्ताशब्दितस्वरूपप्रतीतिप्रवृत्तीनां तिसृणामुक्तिः किमर्थेत्यत आह **केचिदित्यादिना** ।

यादु०— प्रमाविषयत्वं तद्विषयत्वयोग्यत्वम् ।

वं०प०— सर्वाः प्रवृत्तय इति । अर्थक्रिया इत्यर्थः ।

श्रीनिधि०— तास्तास्सर्वा प्रवृत्तय इति । तत्तनिष्ठार्थक्रियाकारित्वमित्यर्थः ।

शे०वा०— 'अन्यत्र कापि शक्तिर्ने'त्यादिनैव सूत्रव्याख्यानसिद्धेः 'तदधीनाश्च सर्वदे'त्युत्तरभाष्यमनर्थकमित्यतोऽन्यत्राभावाच्चेति सौत्र'च'शब्दसमुच्चितार्थप्रदर्शकत्वेन तद्व्याख्यानरूपत्वान्नानर्थक्यमिति भावेन तद्व्याख्यानपरतयोत्तरभाष्यं योजयति **न केवलमिति** । 'यत्प्रसादादिमे सन्ति' इत्युदाहरिष्यमाणप्रमाणस्य प्रकृत्यादिसत्तामात्रस्य भगवदधीनताप्रतिपादकत्वेऽपि सत्ताप्रतीतिप्रवृत्तीनां तदधीनत्वाप्रतिपादकत्वात् कथं तस्योक्तार्थे प्रमाणतयोपन्यास इति भाष्ये प्राप्तां प्रमाणतयोपन्यासस्यानौचित्यशङ्कां त्रिविधस्यापि सत्त्वरूपतोपपादनेन परिहर्तुं मतभेदेन तामुपपादयति **केचिदिति** ।

वा०र०— अत एव तदनुसारेण एव सत्त इत्येतत् एकदेशपरतया प्राक् व्याख्यातमिति वाच्यम् । सन्तीतिपदोक्तसत्तायाः स्वरूपमात्ररूपत्वेऽपि बाधकाभावेन तन्मात्रेणैव पूर्वव्याख्यानोपष्टम्भकत्वस्याप्युपपत्त्या च तस्य त्रितयार्थकतायाः अप्यवक्तव्यत्वात् इत्याशङ्कां परिहर्तुं सन्तीतिपदस्य त्रितयार्थतावचनप्रयोजनं तदवचने बाधकोपदर्शनेन प्रतिपादयन्नुत्तरग्रन्थमवतारयति **यत्प्रसादादिमेत्यादिना** । **कथं तस्य उक्तार्थ इति** । अयमर्थः । प्रधानपुरुषयोः तच्छक्तीनां च सत्ताप्रतीतिप्रवृत्तयो भगवदधीनाः इत्युक्तम् । तावत् तदधीनाश्च इत्यादिभाष्येण । तत्र प्रमाणाकाङ्क्षायां स्वभावेत्यादिना उत्तरत्र प्रमाणं कथ्यते । तत् यदि सत्त्वं स्वरूपमात्ररूपं स्यात् तर्हि तन्मात्रस्यैव भगवदधीनताप्रतिपादकप्रमाणं स्यात् । ततश्च न सम्पूर्णसत्तादेर्भगवदधीनत्वरूपेऽर्थे प्रमाणता तस्य स्यात् इति तदुदाहरणं न विवक्षितार्थसाधकं भवेत् । न चेदमिष्टम् । तत्प्रमाणस्य सम्पूर्णार्थसाधकतया उपन्यस्यमानतायाः भाष्येऽभिप्रेतत्वात् । तथा च तस्य तावदर्थसाधकतया उपन्यासान्यथानुपपत्त्या सन्तीत्यस्य त्रिविधसत्ताप्रतिपादकत्वमेष्टव्यम् । तच्च तदा युज्यते यदि स्वरूपस्येव प्रतीतिप्रवृत्त्योरपि सत्तारूपत्वं स्यात् । न च तदस्ति । **नियामकाभावादिति** । यद्यपि उक्तशङ्कानिरासकः केचिदित्यादिग्रन्थस्य प्रमाणोपन्यासावसर एव निवेशनं उचितं तथापि सत्ताप्रधानेत्युक्तसत्तादेरुदाहरिष्यमाणप्रमाणानुगुणत्वं अस्तीति शिष्यसमाधानाय प्रतिपादयितुं विलम्बमसहमानेनात्र तन्निवेशः कृतः मूले इति सिद्धवत्कृत्य उत्तरग्रन्थोपयोगमात्रमुक्तम् । उत्तरत्र उपयोगानभिप्राये तु सत्तापदस्यापि यथाश्रुतार्थकत्वे बाधकाभावेन सत्तादित्रयस्य भगवदधीनत्वे प्रतिपादिते अनुपपत्त्यप्रतिभासेन च यथाश्रुतभाष्यार्थोपपत्त्या स्वरूपादित्रयस्य सत्तारूपत्वाभिधानं असङ्गतं स्यात् इत्याशयान्न कश्चित् दोषः इति ।

एवं तद्ग्रन्थवृत्तिप्रकारस्य तु वर्णनात् ।
बुधास्तोषं समायान्तु तत्प्रीतोऽस्तु गुरुर्मम ॥

त्रिविधस्यापीति । स्वरूपाख्यसत्ताप्रतीतिप्रवृत्तिरूपेण त्रिविधस्यापीत्यर्थः । तत्त्वसङ्ख्यानटीकायाः टीकाकारीयव्याख्याने सत्तात्रैविध्य इत्येतत् सत्तादित्रैविध्य इति व्याख्यातमपि सत्ताशब्दस्य स्वरूपतार्थतां अभिप्रेत्यैव । अत एव तत्पक्षे सत्ताशब्दस्य एकदेशार्थताश्रयणीया भवतीत्यपरितोषात् वस्तुतोऽत्रादिपदाभावेऽपि न दोषः इत्यादिग्रन्थेन एतन्मूलग्रन्थानुसारेण स्वरूपादिरूपत्रिविधसत्तायाः सत्तापदेन ग्रहणं टीकाकृता वर्णितम् । त्रैविध्यपदेन त्रिविधत्वं सत्तायाः यथा लभ्यते । तथा तत्प्रपञ्चे अस्माभिर्निरूपितं ज्ञेयम् । एवं तत्त्वविवेक-तत्त्वनिर्णयटीकयोरपि सत्तादावित्येतदुपपादनीयम् ।

विट्ठल०— सत्तादिशब्दं वदन् पदानां व्यवहृतत्वात् योजनामाह **प्रधानपुरुषयोरिति** । **तास्ता इति** । तत्तद्गताः अर्थक्रियारूपाः प्रवृत्तय इत्यर्थः । सत्तादिशब्दितस्वरूपप्रतीत्रिप्रवृत्तीनां तिसृणामत्रोक्तेः प्रयोजनमाह **केचिदिति** ।

॥ इति चकारव्याख्यानम् ॥
॥ इति सूत्राक्षरैस्तन्मतनिरासः ॥

* * *

॥ अथ तन्मतनिरासे उक्तार्थानुपपत्तिशङ्कानिरासः ॥

९५ **सु०**— नन्वेतदयुक्तम्; प्रधानादिसत्तादेर्नित्यत्वात्, नित्यस्य पराधीनताऽसम्भवात्; इत्यत आह **नित्यमिति** ।

अनु०— **नित्यं नित्यात्मना यतः ।**
यथाऽनित्यतयाऽनित्यं नित्यशक्त्या स्वयेश्वरः ।
नियामयति नित्यं च

यथा अनित्यं घटादिकम् **अनित्यतया** नियम्यते, तथा **नित्यम्** अपि **नित्यात्मना नित्यं च** सर्वदा **एव ईश्वरो नियामयति** । यत एवं तस्मादुक्तमुपपन्नमिति योजना ।

एतदुक्तं भवति । यथा हि घटादयोऽनित्य(त्व)स्वभावा अपि नाकस्मादनित्या भवन्ति, तथात्वे चोत्पत्त्युत्तरक्षण एव विनाशप्रसङ्गात्; एवं नित्यस्यापि नित्यता यदि पराधीना तदा को दोषः । न चानित्यता पराधीनेति कदाचिद्घटादेर्नित्यता प्राप्ता,

विनाशकारणोपनिपातध्रौव्यात् । तथा नित्यस्य नित्यतायाः पराधीनत्वेऽपि न जात्व-नित्यताप्रसक्तिः, तन्नियमननियमादिति । तदिदमुक्तं नित्यं चेति ।

न चैतदलौकिकम्, नित्यकर्मभिर्दुरितप्रागभावानुवृत्तेः साध्यत्वेन वादिभिरभ्युप-गतत्वात्, अनुवृत्तेर्नित्यतापादनानतिरेकात् । भवेदेतद(देवम)स्वरसनित्यस्य, न स्वरस-नित्यस्येति चेन्न; ईश्वरातिरिक्तस्य तद्भावासम्मतेः ॥ इयांस्तु विशेषः । किञ्चिदस्म-दायत्तनित्यत्वम्, किञ्चिच्चेश्वरायत्तनित्यत्वमिति । तदप्यस्मासु कस्मान्नायतते, तथाभूतं च कथमीश्वराधीनम्; इत्यत उक्तं नित्यशक्त्येति ।

प्रधानादिशक्तेः प्रकृतत्वात् तद्ग्रहणमिदमिति मन्दाशङ्कां वारयितुं स्वया इत्युक्तम् ।

परि०— मूले यथा नित्यतयेति दृष्टान्तोक्तिः किमर्थेत्यतो नित्यस्येशाधीनत्वे कदा-चिदनित्यं स्यादिति शङ्कानिरासायेति भावेनाह **एतदुक्तमिति** । को दोष इत्ययुक्तं अनित्यताप्राप्तेरेव दोषत्वादित्यत आह **न चानित्यतेति** । कुतो न प्राप्तेत्यत आह **विनाशेति** । **तन्नियमनेति** । भगवन्नियमननियमादिति वा नित्यत्वनियमननियमादिति वार्थः । **न चैतदिति** । नित्यस्यान्याधीन-त्वमित्यर्थः । **अस्वरसनित्यस्येति** । पुरुषप्रयत्नाधीननित्यताकस्येत्यर्थः । **तद्भावेति** । परानधीन-नित्यताकत्वस्येत्यर्थः । **किञ्चिदिति** । दुरितप्रागभावादिनित्यत्वम् । **तदपीति** । ईश्वरायत्तवेदादि-नित्यत्वमपीत्यर्थः । **नायतते** । नाधीनतया वर्तत इत्यर्थः । **प्रकृतत्वादिति** । 'सत्ता प्रधान-पुरुषशक्तीनामि'त्यनेनेति भावः ।

गु०दी०— **अनित्यं घटादिकमनित्यतया नियम्यत** इत्यत्र स्वकल्पितप्रध्वंसकालपर्यन्तं परोप-द्रवादिना यथा मध्ये नाशो न भवति तथा पालयतीत्यर्थः । अन्यथाऽविशेषात् बुद्ध्युद्भवदुत्पत्त्यनन्तरमेव नाशः स्यात् । इदमेवानित्यस्य पालनं नाम । अचेतनशिलापिण्डं स्वपादस्पर्शमात्रेण चेतनपिण्डीकुर्वन् सदा प्रवहनशीलं यमुनाजलप्रवाहं स्वाज्ञामात्रेण द्वेधा संस्तभ्य मध्येमार्गं स्वपितरं नयन्नगाधगम्भीरोदधिजलोपरि स्वसेतुकरणाय गुरुत्वादधःपतनशीलशिलोच्चयमेव प्लावयन्नत एव कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽपि वेदप्रामाण्य-रक्षणाय गगनादिकं न नाशयति । इदमेव नित्यस्य पालनं नामेति युक्तिरप्यनुगन्तव्या ।

यादु०— **नियामयतीति** । मितां ह्रस्व इत्येतत्सूत्रव्याख्यानावसरे केचिदत्र वेत्यनुवर्तयन्ति सा च व्यवस्थितविभाषा । तेनान्यत्र सङ्क्रामयति उपक्रामयतीत्येवमादि सिद्धं भवतीति वृत्तावुक्तत्वान्नियामयतीत्यस्य

साधुत्वमिति ज्ञातव्यम् । **तन्नियमेनेति** । नित्यतानियमेनेत्यर्थः । **एतदिति** । नित्यत्वस्य पराधीनत्वम् । **अस्वरसनित्यस्येति** । अन्याधीननित्यताकस्येत्यर्थः ।

वं०प०— प्रागभावानुवृत्तेरिति । प्रागभावपरिपालनरूपाया इत्यर्थः । तथाऽपि नित्यतायाः कथं पराधीनत्वं प्राप्तमित्यत आह **अनुवृत्तेरिति** । **अनतिरेकादिति** । तादृशानुवृत्तेरत्यन्ताभावपर्यवसन्नत्वेन नित्यत्वादिति भावः । **अस्वरसनित्यस्येति** । अस्वाभाविकनित्यस्येत्यर्थः । दुरितप्रागभावपरिपालनरूप-नित्यताया नित्यकर्माधीनत्वेन तन्नित्यताया अस्वरसत्वादिति भावः । **किञ्चिदिति** । दुरितप्रागभावरूपं वस्तु । **अस्मदिति** । अस्मत्कृतं नित्यकर्मेत्यर्थः । **नित्यत्वं** नित्यत्वोपेतम् । एवमुत्तरत्रापि नित्यत्वपदं व्याख्येयम् । **किञ्चित्** गगनादिकम् । **तदपीति** । गगनादिनित्यत्वमप्यस्मदधीनं कुतो नेत्यर्थः । ईश्वराधीनतामप्यङ्गी-कृत्याह **तथाभूतमिति** । नित्ये विद्यमानमपि । तत्रेश्वरकृत्याभावादित्यर्थः । प्रधाननिष्ठया शक्त्या ईश्वरो नियामयतीत्यस्याः शङ्काया व्यधिकरणत्वेनायोगान्मन्देत्युक्तम् ।

कं०रा०— नन्वस्मदादिभिर्दुरितकरणेन दुरितप्रागभावानुवृत्तिः सम्पाद्यत इति दुरितप्रागभावस्या-स्वरसनित्यत्वाद्भवेत्तस्य पराधीनता न तु स्वरसनित्यस्यान्यानापादितानुवृत्तिकस्य प्रधानादेरिति शङ्कते **भवेदेवमिति** । प्रधानादेरपीश्वरापादितसकलकालानुवृत्तिरूपस्वरसनित्यस्यैवाभावात् स्वरसनित्यत्वेन प्रधानादेः पराधीनता न सम्भवतीत्येतदयुक्तमित्याशयेन परिहरति **नेति** । तर्हि प्रधानादेर्दुरितप्रागभावस्य च किं सर्वात्मना साम्यमित्यत आह **इयांस्त्विति** ।

श्रीनिधि०— तन्नियमननियमादिति । नित्यतानियमनस्य कदाचिदप्यभावाभावादित्यर्थः । **कर्मभि-र्दुरितप्रागभावानुवृत्तेरिति** । नित्यकर्मानुष्ठाने यत् दुरितं तत्प्रागभावो न वा । नेति पक्षे कर्मानुष्ठानं व्यर्थं प्रागभावेन दुरितोत्पत्त्यभावात् । अस्तीति पक्षेऽपि कर्मानुष्ठानं व्यर्थम् । प्रागभावस्य कार्यविनाश्यत्वात् । अविनाश्यत्वे च प्रागभावत्वायोग इत्याशङ्क्य अस्त्येव दुरितप्रागभावः । न चोक्तदोषः । नित्यकर्मभि-स्तस्योत्तरोत्तरसमयबन्धपरिपालनादिति न्यायविभागः समाहितः । अत्र यथा नित्यताया अन्यनियम्यत्वेऽपि न जात्वनित्यत्वं तथा सर्वत्रापीति भावः । ननु नित्यकर्मभिर्दुरितप्रागभावस्य उत्तरोत्तरसमयपरिपालनं भवति न तु नित्यत्वापत्तिः । तत्कथमयं दृष्टान्त इत्यत आह **अनुवृत्तेरिति** । नित्यतापादनं नित्यत्वापत्तिः ।

शे०वा०— नित्यमित्याद्युत्तरभाष्यानर्थक्यमाशङ्क्य नित्यस्य पराधीनत्वसम्भावनाप्रदर्शनार्थत्वान्न तदिति भावेन किं सम्भावनाप्रदर्शनेनापीत्यतः पूर्वोक्तस्य प्रकृत्यादिसत्तादेः भगवदधीनत्वस्यासम्भावना-शङ्कापरिहारार्थत्वादित्याशयवान् तदसम्भावनापरिहारकतया तद्योजयितुं तच्छङ्कामुत्थापयति **नन्विति** । **असम्भवादिति** । अन्यथा नित्यत्वव्याघातादिति भावः । नित्यस्य नित्यात्मना भगवदधीनत्वस्य साध्यस्य यथाऽनित्यतयाऽनित्यमिति दृष्टान्तीकरणानुपपत्तिः तथेत्यनुक्तेः साकाङ्क्षत्वं; यत इत्यस्यानन्वितत्वसाकाङ्क्षत्वे,

नित्यमित्यस्य पुनरुक्तत्वं च भवतीत्यतो वाक्यं यथावद्योजयति **यथेत्यादिना** । **नियामयतीति** । न च 'मितां ह्रस्व' इति ह्रस्वत्वविधानान्नियमयतीत्येव भवितव्यं नियामयतीति तु कथमिति वाच्यम् । केचिदत्र 'वा चित्तविराग' इत्यतो वेत्यनुवर्तयन्ति । सा च व्यवस्थितविभाषा । तेनान्यत्र सङ्क्रामयेदित्यादि सिद्धं भवतीति वृत्तावुक्तत्वात् तद्विकल्पसिद्धया ह्रस्वत्वपक्षे नियमयतीत्यस्येव तदभावपक्षे नियामयतीत्यस्याप्युपपन्नत्वात् । अत एव 'भ्रामयन् सर्वभूतानि इति' 'भ्रामयितुमीश्वरस्ये'त्यादिर्वा शास्त्रीयप्रयोगोऽप्युपपन्न इति ध्येयम् । नन्वनित्यस्वभावस्य घटादेरनित्यताया निर्निबन्धनत्वेन भगवदधीनत्वासिद्धेर्दृष्टान्तासिद्धिः । नित्यस्य नित्यताया अन्याधीनत्वे कदाचित् तस्यानित्यत्वापत्तिश्च । नित्यताया लोकेऽन्याधीनत्वादृष्ट्या तदभ्युपगमे लोकदर्शन-विरोधश्चेत्यतो दृष्टान्तोपदर्शनपूर्वकं दार्ष्टान्तिकमुपपादयति **एतदिति** । तत्र दृष्टान्तोपपादनं **यथेति** । द्वितीयं दोषं परिहरति **न चेति** । तृतीयं परिहरति **न चेति** । नित्यकर्मभिर्दुरितप्रागभावानुवृत्तिसम्पादनेऽपि तन्नित्य-त्वासम्पादनाल्लोकदर्शनविरोधस्तदवस्थ एवेत्यत आह **अनुवृत्तेरिति** । **अस्वरसनित्यस्येति** । अन्याधीन-नित्यताकस्येत्यर्थः । **तद्भावासम्मतेरिति** । स्वरसनित्यत्वासम्मतेरित्यर्थः । नन्वेवमन्यसम्पादितनित्यत्वा-विशेषात्प्रागभ'वादिकमनित्यमेव प्रकृत्यादिकं नित्यमेवेति विभागो न स्यादित्यत आह **इयांस्त्विति** । अतः स व्यवहार उपपन्न इति शेषः ।

वा०र०— परिहारार्थत्वादिति । सम्भावनाप्रदर्शनस्येति विभक्तिविपरिणामेनानुवर्तते । **दृष्टान्ती-करणानुपपत्तिः** इत्यादिना भवतीत्युत्तरेण सम्बन्धः । **साकाङ्क्षत्व इति** । द्विवचनानुसारेण भवतीत्येतत् भवतः इत्यपि योज्यम् । **दृष्टान्तीकरणेति** । यथेति वाक्ये नञ्प्रश्लेषस्य व्याख्यानगम्यत्वेऽपि स्वरसतोऽप्यप्रतीतेः नित्यानित्यात्मनेति पूर्वसमभिव्याहाराच्च नित्यमित्यादिरूपेणैव पदच्छेदप्राप्तेः इति भावः । **अनुक्तेरिति** । यथेत्यस्य तथेत्येतदपेक्षितत्वात् इति भावः । **अनन्वितत्वेति** । नित्यमित्यादिवाक्ययोः दृष्टान्तदार्ष्टान्तिकयोः प्रतिपादनेन पर्यवसानात् यतः इत्यपेक्षाभावात् अनन्वितत्वम् । यच्छब्दस्य तच्छब्दापेक्षत्वात् तस्मात् इति लाभे तस्मात् किं इत्याकाङ्क्षायाः उदयात् साध्यस्य चात्र प्रतीतेः साकाङ्क्षत्वं चेत्यर्थः । **नित्यमित्यस्येति** । नित्यं चेत्यत्र नित्यमित्यस्येत्यर्थः । **यथावदिति** । यथेति दृष्टान्तवाक्ये नञ्प्रश्लेषेण नित्यतयेत्यादिपदच्छेदेन दार्ष्टान्तिके च तथेति पूरणेन यत इत्येतदपेक्षितम् । तस्मादित्यस्य च उक्तमनुपपन्नमिति पूरितेनान्वयस्वीकारेण नित्यं चेत्यत्र नित्यस्य सर्वदेत्यर्थाङ्गीकारेण च योजयतीत्यर्थः । **मितां ह्रस्व इतीति** । घटादयो मिताः इति धातुसूत्रेण घटादीनामितः इति संज्ञा कृता । तथा च तत्सूत्रेण कृतमित्संज्ञकानां उपधायाः ह्रस्वः स्यात् णौ परतः इति सूत्रार्थः । **घटयति** व्यथयति इत्याद्युदाहरणम् । कर्णान्तसप्तपञ्चशतामपि द्रष्टव्यम् । तथा च निपूर्वात् पमेः स्वार्थे चुरादि णिचि सति नियमः इत्यस्यात्तदुपधाया इति वृद्धौ नियाम् इत्येव प्राप्तौ मितां ह्रस्वः इत्यनेन ह्रस्वत्वे नियमीत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां तिपः शबादिके सति सार्वधातुकार्धधातुकयोः इति गुणे नियमयतीतिरूपप्रसङ्ग इति भावः । **केचिदत्रेत्यादि** । केचित् अत्र वेति अनुवर्तयन्ति इत्यादेरेव वृत्तावुक्तत्वेऽपि व्याख्यानाया अधिकांशोक्तिः अर्थानुवादश्चेति न दोषः । एष एव प्रकारोऽन्यत्रापि ज्ञेयः

इत्याशयेनाह **अत एवेति** । आद्यः प्रयोगो गीताचार्यस्य । द्वितीयस्तु .....स्येति ज्ञेयम् । **स्वभावस्येति** । अन्यथा स्वभावत्वव्याघातादिति भावः । **कदाचिदिति** । नित्यं कदाचित् अनित्यं भवितुमर्हति । अन्याधीननित्यतोपेतत्वात् । यत् अन्याधीन यद्धर्मकं तत् कदाचित् तद्धर्मशून्ये । यथा हेमपिण्डादिकं अन्याधीनकटकत्वादिमत् कदाचित् तच्छून्यमपि भवतीति प्रयोगोऽभिप्रेतः इति ज्ञेयम् । उपलक्षणे चेदम् । अनित्यस्यानित्यतायाः अन्याधीनत्वे कदाचित्तस्य नित्यत्वापत्तिः इत्यपि ज्ञेयम् । दृष्टान्तोपपादनपूर्वकमिति पाठः । उपदर्शनेति पाठेऽप्युपदर्शनपदं उपपादनार्थकं इति ज्ञेयम् । **तत्रेति** । दृष्टान्तासिद्ध्यादिदोषत्रय-निरासरूपार्थत्रय इत्यर्थः । **दृष्टान्तोपपादनम्** । दृष्टान्तासिद्धिपरिहाराय इति शेषः । उपपादनपूर्वकं दृष्टान्तिके तत्सम्भावनाप्रदर्शनार्थमित्यर्थः । एवं नित्यस्यापीत्यनेन दार्ष्टान्तिके तत्प्रदर्शनात् । **द्वितीयमिति** । तत्रेति वर्तते । दृष्टान्तदार्ष्टान्तिकयोः अनित्यत्वनित्यत्वे अन्याधीने इत्यङ्गीकारे कदाचित् नित्यत्वानित्यत्वापत्तिरिति दोषमित्यर्थः । **परिहरतीति** । दृष्टान्तेऽनित्यतायाः पराधीनत्वेऽपि नित्यतानापत्तिवत् दार्ष्टान्तिकेऽपि नित्यतायाः पराधीनत्वेऽपि नानित्यतापत्तिरिति परिहरतीत्यर्थः । मूले **विनाशकरणेति** । नियामकभगवत्प्रेरित इति शेषः । एतेन नित्यानित्योभयनियामकत्वस्य भगवति प्रतिपादकतया नित्यं नित्यात्मनेत्यादि भाष्यं योजयित्वा उपपादनावसरे मुद्गरप्रहरादिरूपदेवदत्तव्यापारकथने पूर्वविरोधः । विनाशकारणप्रहरादेः देवदत्ताधीनतया घटा-द्यनित्यतायाः तदधीनत्वप्राप्तेरिति निरस्तम् । देवदत्तव्यापारस्यापि भगवत्कारितत्वात् । अत एव नित्यत्वेऽपि इयांस्त्वित्यादिना विशेषं वक्ष्यति **तन्नियमेनेति** मूलम् । नित्यतया नियमनस्य नियतत्वादित्यर्थः । **तृतीय-मिति** । टीका नित्यतामात्राश्रितलोकदर्शनविरोधरूपं दोषमित्यर्थः ।

स०व्र०— यदनुग्रहतः सन्तीत्यत्र सत्त्वं त्रिविधमपि विवक्षितमिति व्याख्यायते । तत्कथं त्रिविधस्यापि सत्त्वशब्दार्थत्वं रूढ्यादेरभावादित्यतः तत्तद्वादिप्रसिद्ध्या त्रिविधस्यापि सत्त्वशब्दार्थत्वमुपपन्न-मित्यभिप्रेत्याह **केचिदित्यादिना** । **नियामयतीति** । 'मितां ह्रस्व' इत्यत्र केचिदत्र 'वा चित्तविराग' इत्यतो 'वे'त्यनुवर्तते । सा च व्यवस्थितविभाषा । तेनान्यत्र 'सङ्क्रामयती'त्यादिसिद्धं भवतीति वृत्तौ उक्त्वा-न्नियामयतीति साधु ।

न चैतदिति । नित्यत्वस्य परायत्तत्वमित्यर्थः । **अस्वरसनित्यस्येति** अन्यसम्पादितनित्यत्वो-पेतस्येत्यर्थः । **स्वरसेति** । स्वतस्सिद्धनित्यत्वोपेतस्येत्यर्थः । **इयांस्तु विशेष इति** । अतः स व्यवहार उपपन्न इति शेषः ।

विट्ठल०— नित्यस्य पराधीनत्वासम्भवे चोदिते अनित्यस्यापि पराधीनत्वोक्तिर्व्यर्थेत्यतो दृष्टान्त-तया तदुपादानादशेष इति सूचयन् योजनामाह **यथेति** । नित्यस्यानाधेयातिशयस्य पराधीनत्वासम्भवे चोदितदृष्टान्तोक्त्या कथं परिहारः, नित्यतायाः पराधीनत्वे पुरुषेच्छाया व्यवस्थितत्वेन कदाचिदनित्यता प्रसज्येतेत्यत आह **एतदुक्तं भवतीति** । **नित्यकर्मभिरिति** । सन्ध्यावन्दनादि नित्यकर्मभिः पण्डापूर्वलक्षणैः

नित्यकर्माकरणप्रयुक्तप्रत्यवायरूपदुरितप्रागभावपरिपालनस्यैव साध्यत्वेन वादिभिरङ्गीकृतत्वेन नित्यं प्रागभावानुवृत्तेरेव प्रागभावनित्यतास्वरूपत्वान्नित्यस्यापि परायत्तत्वं नालौकिकमिति भावः । **अस्वरसनित्यस्येति** । पुरुषाधीननित्यताकस्य प्रागभावादेः स्वरसनित्यस्य प्रकृत्यादेर्नैवमित्यर्थः । **तद्भावेति** । अन्याधीननित्यतासम्मतेरित्यर्थः । ईश्वरातिरिक्ते नित्यतायाः पराधीनत्वे नित्यत्वाविशेषादाकाशादिव्यावृत्त्या दुरितप्रागभावनित्यस्य कर्मसाध्यत्वोक्तिः किं निमित्तेत्यत आह **इयांस्त्विति** । **नायतते** नाधीना वर्तत इत्यर्थः ।

॥ इति तन्मतनिरासे उक्तार्थानुपपत्तिशङ्कानिरासः ॥

* * *

॥ अथ तत्र उक्तार्थे प्रमाणप्रदर्शनम् ॥

९६ **सु०**— यदुक्तं 'प्रधानादेरुपादानत्वादिशक्तिर्न स्वाधीना किन्त्वीश्वरप्रेरितैवे'ति, तत्कुत इत्यत आह **नेति** ।

अनु०— न ऋते त्वदिति श्रुतेः ।

'न ऋते त्वत्क्रियते किञ्चनारे' इति श्रुतेः । 'प्रागुक्तं प्रतिपत्तव्यमि'ति शेषः । शक्तिरेव हि क्रियोच्यते ।

यत्प्रधानादिसत्तादेर्भगवदधीनत्वमुक्तं तस्य सम्भावनैवोक्ता, प्रमाणं तु तत्र किम्; इत्यत आह **स्वभावेति** ।

अनु०— स्वभावजीवकर्माणि द्रव्यं कालः श्रुतिः क्रियाः ।
यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ।
इति श्रुतेर्न सत्ताद्या अपि नारायणं विना ।

कर्मशब्देन धर्माधर्मव्यक्तयो गृह्यन्ते । **क्रियाः** परिस्पन्दाः । **श्रुतिः** वेदः । **सन्तीति** त्रिविधमपि सत्त्वं विवक्षितम् । **सत्ताद्याः** प्रधानादेः । **नारायणं विना** तत्प्रेरणां विना ।

परि०— श्रुतौ क्रियाया एव श्रवणेन शक्तेरश्रवणादाह **शक्तिरेव हीति** । 'सविशेषोऽपि क्रियाशक्त्यात्मना स्थिर' इत्यादिलिङ्गपादोक्तेरिति भावः । यद्वा क्रियत इत्यत्र क्रियानुकूलशक्तिरेव विवक्षितेति भावः । **सत्तादेरिति** । स्वरूपप्रतीतिप्रवृत्तीनामित्यर्थः । **सम्भावनैवेति** । नित्यशक्त्या स्वयेत्यनेनेति भावः । अपौनरुक्त्याय कर्मक्रियाशब्दयोरर्थभेदमाह **कर्मशब्देनेति** । प्रवाहस्याधीनतोक्त्यैव प्रवाहिणां कर्मस्वरूपाणां सा न प्राप्नोतीति व्यक्तय इत्युक्तम् । सत्ताद्या इत्यग्रेऽभिधानादाह **सन्तीति त्रिविधमपीति** ।

यादु०— ननु श्रुतौ त्वदृते किञ्चन न क्रियत इत्युक्त्या क्रियाया एव भगवदधीनत्वं प्रतीयते न शक्तेरित्यत आह **शक्तिरेव हीति** । तत्तत्कार्यकरणशक्तिरेव तत्तत्कार्यक्रियोच्यत इत्यर्थः । तथा च क्रियत इत्यस्य कर्तुं शक्यत इत्यर्थो विवक्षितः, अतो न प्रकृतासङ्गतिरिति भावः । **सम्भावनैवोक्तेति** । 'नित्यं नित्यात्मना यतः । नियामयति नित्यं चे'त्यत्रेति शेषः । कर्मक्रियाशब्दयोरपौनरुक्त्यायाह **कर्मशब्देनेत्यादि** । धर्माधर्मव्यक्तय इति वचनं कर्माणीति बहुवचनोपपत्त्यर्थमिति ज्ञातव्यम् ।

वं०प०— ननु सर्वपदार्थनिष्ठशक्तेरीश्वराधीनत्वप्रतिपादनाय 'नर्त' इति श्रुत्युदाहरणमसङ्गतम् । तत्र 'त्वदृते न क्रियत' इति सर्वपदार्थक्रियाया एवेश्वराधीनत्वमुच्यते न शक्तेरत आह **शक्तिरेव हीति** । **उच्यत** 'नर्त' इति श्रुतौ । त्वदृते केनापि कर्म न क्रियते कर्तुं शक्तिर्नास्तीत्यर्थः । **सन्ति** सत्त्ववन्ति । **सन्तीति** । सत्त्वोपेतानीत्यर्थः ।

कं०रा०— **त्रिविधमिति** । स्वरूपप्रमाणविषयतायोग्यत्वार्थक्रियावत्वभेदेन त्रिविधमित्यर्थः ।

श्रीनिधि०— ननु 'न ऋते' इति श्रुतौ किञ्चन = घटानयनादिकं न क्रियते । घटानयनादिक्रियायोगः क्वचिन्न भवतीति क्रिया भगवदधीनत्वमुच्यते न तु शक्तेरित्यत आह **शक्तिरेव हीति** । धात्वर्थरूपक्रियैवात्र विवक्षिता न परिस्पन्द इत्यर्थः । तथा च त्वदृते = त्वत्प्रेरणामृते बीजादिना पृथिव्यादिना वा अङ्कुरादिकं न क्रियते = तज्जननशक्त्युपेतं न भवतीत्यर्थः । **सम्भावनैवोक्तेति** । नित्यशक्त्येत्यनेनेति भावः ।

शे०वा०— ननु प्रधानादिशक्तेरीश्वराधीनत्वे कथं 'न ऋते' इति श्रुतेः प्रमाणतयोदाहरणं, क्रियाया भगवदधीनत्वस्य तया प्रतिपादनेऽपि शक्तेस्तदधीनत्वस्य तया अप्रतिपादनादित्यत आह **शक्तिरेवेति** । **तत्तत्कार्यकरणशक्तिरेव तत्तत्कार्यक्रियेत्यर्थः । उक्तेति । 'यथा नित्यतया नित्यमि'त्यादिनेति शेषः । प्रमाणं तु किमिति । सम्भावना तूत्कटैककोटिकसंशयरूपत्वान्न प्रमाणमिति भावः । कर्मक्रियाशब्दयोरपौनरुक्त्याय अर्थभेदमाह कर्मशब्देनेति । बहुवचनान्तानामेव पदानामत्र विग्रह इति भावेनाह धर्माधर्मव्यक्तय इति । त्रिविधं सत्त्वमिति** । स्वरूपप्रमाणयोग्यत्वार्थक्रियाकारित्वरूपं त्रिविधं सत्त्वमित्यर्थः । सत्ताद्या इत्यादिशब्देन प्रतीतिप्रवृत्त्योः परिग्रहः । प्रधानादेरित्यादिपदेन पुरुषादिपरिग्रहः ।

वा०र०— अर्थभेदमाहेति । भिन्नावर्थावाहेत्यर्थः । अर्थभेदाय धर्माधर्मावित्येव वक्तव्यत्वात् व्यक्तयः इति व्यक्तिपदोपादानं व्यर्थमिति चेत् । स्वभावश्च जीवाश्च कर्माणि च स्वभावजीवकर्माणि इति बहुवचनान्तानां एव विग्रहोऽभिप्रेतः । तत्र धर्माधर्मरूपकर्मद्वैविध्यात् बहुवचनानुपपत्तिरिति शङ्कानिरासाय व्यक्तिबाहुल्यात् युक्तं बहुवचनं इत्याशयेन मूले व्यक्तिपदोपादानात् इत्यभिप्रेत्य धर्माधर्मव्यक्तयः इत्येतदवतारयति **बहुवचनान्तानामेवेति** । यत्तु अन्यथाख्यातौ धर्माधर्मव्यक्तयः इति वचनं तु कर्माणीति बहुवचनोपपादनायेति व्युत्पादितम् । तदसत् । स्वभावश्च जीवश्च कर्म चेति स्वभावजीवकर्माणीति द्वन्द्वान्ते बहुवचनस्य कर्मबहुत्वानभिधायकतया तदनुपपत्तेरभावेन तत्परिहाराय तदुपपादनस्याकर्तव्यत्वात् । तस्मात् टीकाकृदुक्तरीत्याऽभिप्रेतविग्रहे बहुवचनानुपपत्तिपरिहारायैव व्यक्तिपर्यन्तानुधावनं मूलकारस्य इत्याश्रयणीयमिति ज्ञातव्यम् । **स्वरूपप्रमाणेति** । स्वरूपं च प्रमाणयोग्यत्वं चार्थक्रियाकारित्वं चेत्येवंरूपमित्यर्थः ।

स०त्र०— ननु प्रधानादिशक्तेः ईश्वराधीनत्वे 'न ऋते त्वत्क्रियते' इति वाक्योदाहरणमयुक्तम् । तस्य क्रियाया ईश्वराधीनत्वप्रतिपादकत्वेन शक्तेः ईश्वराधीनत्वाप्रतिपादकत्वेन प्रकृतासङ्गतत्वादित्यत आह **शक्तिरेवेति** । क्रिया इत्यनेन पौनरुक्त्यप्रतीतिवारणायाह **कर्मशब्देनेति** । ननु क्रिया इत्यस्य धर्माधर्मलक्षणकर्मार्थकत्वे खलु पौनरुक्त्यम् । तदेव न सम्भवति । क्रिया इत्यस्य बहुवचनान्तस्य धर्माधर्मोभयार्थकत्वासम्भवेन तत्प्रतीतेरेवासम्भवादित्यत उक्तम् **व्यक्तय इति** । एवं च क्रिया इत्युक्ते धर्माधर्मव्यक्तयर्थकत्वप्रतीतिसम्भवेन पौनरुक्त्यं स्यादेवेति भावः । **त्रिविधमपि सत्त्वम्**, स्वरूपं प्रमाणयोग्यत्वम्, अर्थक्रियाकारित्वं चेति त्रिविधं सत्त्वमित्यर्थः ।

वि०ल०— ननु श्रुतौ त्वदृते किञ्चन क्रियते इति क्रियाया एव भगवदधीनत्वमुच्यते । तत्कथं शक्तेर्भगवत्प्रेरितत्वे प्रमाणमित्यत आह **शक्तिरेव हीति** । हिशब्देन 'परास्य शक्तिरि'ति श्रुतिरत्र प्रमाणमिति सूचयति । **सम्भावनैवोक्तेति** । नित्यशक्त्या स्वयेश्वर इत्यत्रानित्यदृष्टान्तोपदर्शनेनेत्यर्थः । कर्मक्रियाशब्दयोरर्थभेदमाह **कर्मशब्देनेति** । कर्माणीति बहुवचनोपपत्तये धर्माधर्मव्यक्तय इत्युक्तं **सत्ताद्या इति** । स्वरूपप्रतीतिप्रवृत्तीनामुक्तत्वेन तदनुरोधात् सन्तीत्यस्याभिप्रेतमाह **सन्तीति** । **त्रिविधमपि सत्त्वं विवक्षितमिति** । अस्त्वेवमुदाहृतश्रुतित्वं येन प्राधानादेरुपादानत्वादिशक्तेः स्वाधीनत्वाभाव ईश्वरप्रेरितत्वं तत्सत्तादेरपि भगवदधीनत्वं च प्रमितम् ।

॥ इति उक्तार्थे प्रमाणप्रदर्शनम् ॥
॥ इति सेश्वरसाङ्ख्य(पातञ्जल)मतनिरासः ॥

* * *

॥ अथ 'निरीश्वरसाङ्ख्यमतेन सहास्य सेश्वरसाङ्ख्यमतस्य हेयत्वो'पसंहारः ॥

९७ **सु०—** तस्मात् **अन्यत्र** उपादानत्वादिशक्तेः **अभावात्,** तत्सत्तादेरपीश्वरायत्तत्वात् **च, न, तृणादीनामुत्पत्तौ** पर्जन्यस्य **एव** पृथिव्यनुग्राहकत्वम्, ईश्वरस्य महदाद्युत्पत्तौ क्षेत्रानुग्राहकत्वमात्रम्; किन्तु सर्वस्वातन्त्र्यमेव; **इति,** यदन्यदभ्युपगतं पातञ्जलैर्वैदिकमतविरुद्धं, तत्सर्वं प्रथमाधिकरण एव निरस्तम् । किं पुनः प्रयत्नेनेत्याशयवान् पूर्वमतेन सहैतस्य हेयतामुपसंहरति **तदिति** ।

अनु०— तत्पतञ्जलिविन्ध्यादिमतं न पुरुषार्थदम् ॥

विन्ध्यः अनीश्वरः साङ्ख्यः । **आदि**पदेन तदेकदेशिनां पञ्चशिखेश्वरकृष्णादीनां ग्रहणम्, तदवान्तरमतयोरपि निरस्तत्वात् ।

यद्वा पतञ्जलिविन्ध्यावादी यस्य तत्तथोक्तम् । पतञ्जलिनाऽङ्गीकृतोऽपीश्वरो अनी(निरी)श्वरकल्प एव । अतः पूर्वस्यास्य च साम्याभिप्रायेण वा सहोपसंहार इति ॥

परि०— तत्पतञ्जलीतिमूलस्थतत्पदं प्रागुक्तस्यान्यत्राभावाच्चेति सूत्रखण्डार्थस्य सङ्गहरूपमित्युपेत्य तच्छब्दार्थमाह **तस्मादिति** । तस्मादित्येतद्विवृणोति **अन्यत्रेत्यादिना** । (पृथिव्यादा)-प्रधानादावित्यर्थः । सौत्रचशब्दार्थमाह **तत्सत्तादेरिति** । प्रधानस्वभावप्रतीतिप्रवृत्तीनामित्यर्थः । मतमित्येतत् 'न तृणादिवदि'ति सूत्रखण्डार्थोक्तिपरमिति भावेन तद्विवृणोति **न तृणेति** । तृणाद्युत्पत्तौ पृथिव्यनुग्राहकत्वं पर्जन्यस्य यथा, तथा क्षेत्रानुग्राहकत्वमात्रमीश्वरस्य नेत्यर्थः । फलितार्थमाह **सर्वस्वातन्त्र्यमेवेतीति** । उपसंहरतीत्यन्वयोऽत्रेतिशब्दस्य । ननु शरीरस्यैवापत्योत्पादनादिकर्तृत्वं जीवस्य तद्विवेकाग्रहनिमित्तमित्यादिपरोक्तस्य दूष्यांशस्य सत्त्वात् कथमुपसंहार इत्यत उक्तम् **यदन्यदिति** । पञ्चशिखेत्यादिनामकानामित्यर्थः । **तदवान्तरेति** । पुरुषभोक्तृत्वाभोक्तृत्वमतयोरित्यर्थः । 'कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यते' इति निरस्तत्वादित्यर्थः । **आदी यस्येति** । कारणभूतौ प्रवर्तकाविति यावत् ।

यादु०— यदन्यदिति । शरीरादिरूपा प्रकृतिरेवापत्योत्पादकर्त्री तत्सन्निधिनिमित्ताद्विवेकाग्रहाज्जीवे तत्कर्तृत्वव्यवहार एव इत्याद्यन्यदित्यर्थः । **ननूक्तस्यैवोपसंहार उचितः** । साङ्ख्यैकदेशिमतहेयता च न पूर्वमुक्ता, अतः कथमत्रोपसंहार इत्यत आह **तदवान्तरमतयोरिति** । चेतनस्य भोक्तृत्वतदभावरूपसाङ्ख्यावान्तरमतयोरित्यर्थः ।

वं०प०— तत्सत्तादेरपीति सौत्रचशब्दार्थकथनम् । **तदेकदेशिनां** विन्ध्यमतैकदेशिनाम् । **आदी** प्रवर्तकौ । **यस्य** मतस्य ।

कं०रा०— यदन्यदिति । शरीरादिरूपा प्रकृतिरेवापत्योत्पत्तिरूपकर्त्री तत्सन्निधिनिमित्ताद्विवेकाग्रहाज्जीवे तत्कर्तृत्वव्यवहार एवेति **यदन्यत्** वैदिकमतविरुद्धं पातञ्जलैरभ्युपगतं तत्सर्वं प्रथमाधिकरण एव निरस्तम् । अतः किं पुनस्तन्निरासप्रयत्नेनेत्याशयवान्निरीश्वरसाङ्ख्यमतेन सहैतस्य सेश्वरसाङ्ख्यमतस्य हेयतामुपसंहरतीत्यर्थः । **तदेकदेशिनामिति** । निरीश्वरसाङ्ख्यैकदेशिनामित्यर्थः । प्राक्पञ्चशिखेश्वरकृष्णादिमतभेदनिरासस्याकृतत्वात् कथं तन्निरासोपसंहार इत्यत आह **तदवान्तरेति** । पञ्चशिखेश्वरकृष्णाद्यवान्तरमतयोरपि भोक्तृतां चेतनस्याहुः । **केचित्** इत्यादिना अनूद्य **कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यत** इत्यादिना निरस्तत्वाद्युक्तस्तदुपसंहार इति भावः । ईश्वरस्यानुग्राहकमात्रत्वादन्यस्य पातञ्जलाभिमतप्रमेयस्य पूर्वाधिकरण एव निरस्तत्वात् पुनस्तन्निरासप्रयत्नो नेत्याशयेन पूर्वमतेन सहैतस्य हेयतोपसंहार इत्युक्त्वा इदानीं प्रकारान्तरेण तस्याभिप्रायमाह **पतञ्जलिनेति** । पतञ्जलिनाङ्गीकृतस्यापीश्वरस्य परमस्वातन्त्र्याभावेनानीश्वरकल्पत्वादनीश्वरसेश्वरसाङ्ख्यमतयोः साम्यमेवेत्यभिप्रायेण वा तयोः सह हेयत्वोपसंहार इत्यर्थः ।

श्रीनिधि०— पूर्वमतेन सह अस्य मतस्य हेयता किमर्थमुपसंहियत इत्यत आशयमाह **यदन्यदभ्युपगतमिति** । चेतनस्य कर्तृत्वभोक्तृत्वाभावादिकमित्यर्थः । **पञ्चशिखेश्वरकृष्णादीनामिति** । पञ्चशिख इति कस्यचिन्नाम । कस्यचिदीश्वर इति । कस्यचित्कृष्ण इति । **तदवान्तरमतयोरपीति** । पञ्चशिखादिकैरङ्गीकृतं मतद्वयमित्यर्थः । तत्र द्वयोरेव तत्तदवान्तरमतप्रवर्तकत्वम् । अन्येषां तु तत्तत्सम्प्रदायप्रवर्तकत्वमिति बहूनां नामग्रहणम् । चेतनस्य भोक्तृत्वतदभावाभ्युपगमरूपयोरित्यर्थः । यद्वा स्वशास्त्रे प्रतीयमाने ये अवान्तरमते तयोरपि न्यायसाम्येन निरस्तत्वादित्यर्थः । सहोपसंहारे नियामकान्तरं चाह **पतञ्जलिनाङ्गीकृतोऽपीति** ।

शे०वा०— यदन्यदिति । शरीरादिरूपा प्रकृतिरेवापत्त्योत्पत्तिकर्त्री तत्सन्निधिनिमित्ताद्विवेकाग्रहाज्जीवे कर्तृत्वव्यवहार इत्यादिकमित्यर्थः । **प्रथमाधिकरण एवेति** । एतत्पादीयप्रथमाधिकरण इत्यर्थः । **निरस्तमिति** । 'यदि भेदाग्रहोऽत्र चे'त्यादिनेति शेषः । **तदेकदेशिनां** निरीश्वरसाङ्ख्यैकदेशिनाम् । **पञ्चशिखः** आसुरिशिष्यः । **ईश्वरकृष्णः** कारिकासम्मतिकर्ता । आदिपदेन भिन्नकसंसारमोचकादीनां परिग्रहः । ननूक्त-

स्यैवोपसंहार उचितः, साङ्ख्यैकदेशिमतहेयता च न पूर्वमुक्ता अतः कथमत्रोपसंहार इत्यत आह **तदवान्तरमतयोरिति** । चेतनस्य भोक्तृत्वतदभावरूपावान्तरमतयोरित्यर्थः । **अनीश्वरकल्प एवेति** । चेतनरूपविशेष्यमात्रस्य पतञ्जलिनाऽभ्युपगमेऽपि तत्स्वातन्त्र्यानभ्युपगमात् फलतोऽनीश्वरवादान्तर्भाव एतन्मतस्येति भावः । **वा सहोपसंहार इतीति** । अवश्यनिरसनीयेतन्मतैकदेशप्रमेयजातस्य पूर्वाधिकरण एव निरस्तत्वेन तन्मतयोः साम्यं सहोपसंहारे निमित्तमिति पूर्वप्रकारः । निरीश्वरत्वेन तयोः साम्यं सहोपसंहारे निमित्तमित्यपरः प्रकार इति पक्षयोर्भेदः ।

वा०र०— पञ्चशिख आसुरि शिष्यः । इत्यादि ।

स०व्र०— यदन्यदभ्युपगतमिति । शरीरादिरूपा प्रकृतिः अपत्योत्पत्तिकर्त्री । तत्सन्निधिनिमित्तत्वात् विवेकाग्रहात् जीवे तत्कृतत्वव्यवहार एवेत्याद्यपि पातञ्जलैरुक्तमित्यर्थः । **प्रथमाधिकरण एवेति** । 'रचनानुपपत्तेश्च' इत्यत्रेत्यर्थः । **तदवान्तरमतयोरिति** । चेतनस्य भोक्तृत्वतदभावरूपावान्तरमतयोरित्यर्थः ।

विठ्ठल०— ततः किमित्यत उत्तरमूलं सङ्गमयितुमाह **तस्मादन्यत्रेति** । ननु शरीरादिरूपप्रकृतेरेवोत्पादनादिकर्तृत्वं जीवस्य तु तत्सम्बन्धनिमित्तकाद्विवेकाग्रहात् कर्तृत्वं व्यवहारमात्रमित्यादिकमनिरस्य कथमुपसंहार इत्यत आह **यदन्यदिति** । **पूर्वमतेन सहेति** । प्रथमाधिकरणे निरस्तविन्ध्यमतन सहेत्यर्थः । साङ्ख्यैकदेशिमतहेयता न पूर्वमुक्ता अतः कथमत्रोपसंहार इत्यत आह **तदवान्तरमतयोरिति** । पुरुषस्य भोक्तृत्वाभिमतयोरित्यर्थः । 'कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यत' इत्युक्तत्वादित्यर्थः । मतमित्येकवचननिर्वाहाय समासमाह **पतञ्जलीति** । अन्यपदार्थस्यैकत्वविवक्षया पतञ्जलिविध्यादीत्यस्येकवचनत्वेन तदनुरोधादेकवचनमिति भावः । निरीश्वरस्येश्वरत्वरूपविरोधयुक्तमतयोः कथं सहोपसंहार इत्यत आह **पतञ्जलिनेति** ।

चषकः— अनीश्वरकल्प एवेति । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयर' इति योगादीषदूनोऽनीश्वर इत्यर्थः ।

॥ इति 'निरीश्वरसाङ्ख्यमतेन सहास्य सेश्वरसाङ्ख्यमतस्य हेयत्वो'पसंहारः ॥
॥ इति उपन्यस्तमतनिरासः ॥
॥ इति सेश्वरसाङ्ख्य(पातञ्जल)मतनिराकरणम् ॥

॥ इति अन्यत्राभावाधिकरणम् ॥
॥ २-२-२ ॥

* * *

॥ अथ अभ्युपगमाधिकरणम् ॥

॥ २-२-३ ॥

ब्र०सू०— ॐ अभ्युपगमेऽप्यर्थाभावात् ॐ ॥

॥ अथ एतत्सूत्रीयस्य परकीयव्याख्यानस्य अयुक्तता ॥

९८ **सु०—** केचिदिदं सूत्रमेवं व्याचक्षते 'प्राक् प्रधानस्य प्रवृत्तिर्नोपपद्यत इत्युक्तम्, अथेदानीं प्रवृत्तेरभ्युपगमेऽपि तस्याः प्रयोजनाभावादि'ति । तदयुक्तम् 'अभ्युपगमेऽपी'-त्येतावतो वैयर्थ्यात्, 'अर्थाभावाच्चे'त्येतावतैव पूर्णत्वात् ।

किञ्च अर्थाभावेन किं साध्यम्; साङ्ख्यमतस्यासामञ्जस्यं वा, प्रकृतेः प्रवृत्त्यनु-पपत्तिर्वा । नाद्यः; व्यधिकरणत्वात्, कथञ्चिदेकाधिकरणतापादनेऽपि स्वमतेनानैकान्त्यात् । न द्वितीयः, अभ्युपगम(वाद)विरोधात्, न ह्यभ्युपगमवादेऽपि यदेवाभ्युपगम्यते तदेव निराक्रियते । अनास्थां खलु तात्कालिकीमभ्युपगमेन द्योतयन्ति, यथाऽस्तु शब्दो नित्योऽनित्यो वा, अनुशासनं तावत् कर्तव्यमिति ।

तस्मान्नायं सूत्रार्थः ।

परि०— अभ्युपगमेति । परैः साङ्ख्यापाकृतिपरत्वेन व्याख्यानेऽप्यन्यथा व्याख्याने किम्बीजमित्यतः तदनूद्य निराह **केचिदित्यादिना** । अर्थाभावादिति हेतोरन्तिमसूत्रे वक्ष्यमाणा-सामञ्जस्यरूपसाध्येनान्वयः, अथ प्रवृत्तेश्चेत्यत्र त्वदुक्तप्रवृत्त्यनुपपत्तिरूपसाध्येनेति भावेन विकल्प्य निराह **किञ्चेति** । **एकाधिकरणतेति** । प्रयोजनहीनप्रधानप्रवृत्त्युपपादकत्वात् तन्मतमयुक्तमित्येवं-रूपेणेति भावः । **स्वमतेनेति** । 'न प्रयोजनवत्त्वादि'ति प्रयोजनहीनेश्वर-प्रवृत्त्युपपादकस्यापि स्वमतस्य सूत्रकृता सामञ्जस्याङ्गीकारादिति भावः ।

यादु०— कथञ्चिदेकेति । प्रयोजनशून्यप्रवृत्तिमत्प्रतिपादकत्वादित्येकाधिकरणतापादनेऽपीत्यर्थः । सौत्रपदादस्य हेतोरलाभमभिप्रेत्य कथञ्चिदित्युक्तम् । **स्वमतेनेति** । अस्मन्मते प्रयोजनशून्यप्रवृत्तिमद्भगव-त्प्रतिपादकतासत्त्वेऽपि सामञ्जस्यस्यैव सत्त्वादिति भावः । **अभ्युपगमेति** । अभ्युपगमेऽपीति सूत्रांशेन

प्रकृतिप्रवृत्त्यभ्युपगमविरोधादित्यर्थः । एतेन यदुक्तं भामत्यां स्वाभाविकत्वात्प्रधानप्रवृत्तेः सहकार्यन्तरापेक्षाभाववत्प्रयोजनापेक्षाभावप्रसङ्गादिति सूत्रार्थ इति, तदपि निरस्तं ज्ञातव्यम् । एवं हि परेण प्रसङ्गो वक्तव्यः । यदि प्रधानं स्वभावादेव प्रवृत्तिमत् तर्हि न किञ्चित्प्रयोजनमपेक्षेत ततश्च प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्तत इतीयं प्रतिज्ञा हीयेतेति । न चासौ युज्यते । प्रधानं स्वभावादेव साधयितुं प्रवर्तत इत्यंशमभ्युपगम्यैवास्य प्रसङ्गस्योक्तत्वेनात्राप्यभ्युपगमविरोधात् । अर्थाभावादित्यनेनार्थापेक्षाभावप्रसङ्गस्य लक्षणीयत्वाच्चेति । अभ्युपगमवाद एवायं नाभ्युपगम इत्यत आह **न ह्यभ्युपगमवाद इति** ।

वं०प०— नन्वभ्युपगमवादत्वादेव तन्निराकरणं क्रियत इति चेत् तत्राह **न हीति** ।

कं०रा०— **व्यधिकरणत्वादिति** । प्रधानप्रवृत्तेः प्रयोजनाभावरूपहेतोः साङ्ख्यमतासामञ्जस्यरूपसाध्येन सामानाधिकरण्याभावादित्यर्थः । ननु प्रमाणप्रवृत्तेः प्रयोजनाभावेन साङ्ख्यमतासामञ्जस्यं न साध्यते येन वैय्यधिकरण्यं स्यात् किन्तु प्रयोजनरहितप्रवृत्त्यभ्युपगन्तृमतत्वेन तत्साध्यते अतो नोक्तदोष इत्यत आह **कथञ्चिदिति** । उक्तरीत्या सामानाधिकरण्यसम्पादनेऽपि ब्रह्मप्रवृत्तेरपि प्रयोजनरहिततया प्रयोजनरहितप्रवृत्त्यभ्युपगन्तृमतत्वस्य स्वमते व्यभिचारात् तेन साङ्ख्यमता सामञ्जस्यं साधनं न सम्भवतीति भावः । नन्वभ्युपगमवादत्वात् प्रधानस्य प्रवृत्तिमभ्युपगम्य प्रयोजनाभावेन प्रवृत्त्यनुपपत्तिकरणं न विरुद्धमित्यत आह **न हीति** ।

श्रीनिधि०— **केचित्** मायिनः । **कथञ्चिदेकाधिकरणतापादनेऽपीति** । निष्प्रयोजनप्रवृत्तिमत् प्रधानप्रतिपादकत्वादित्येकाधिकरणवता सम्पादनेऽपीत्यर्थः । **स्वमतेनेति** । यत्र निष्प्रयोजनप्रवृत्तिमत्प्रतिपादकत्वं तत्रासामञ्जस्यमिति व्याप्तेः स्वमते व्यभिचारात् । तन्मते निष्प्रयोजनप्रवृत्तिं मायाप्रतिपादनात् (?) साध्यस्यापि सत्त्वाङ्गीकारे सिद्धं नस्समीहितम् । **अनास्थां खल्विति** । तदेव कुतो न निराक्रियत इत्यत आह **अनास्थां खल्विति** ।

शे०वा०— ननु चार्वाकैरुच्यते मानमित्युत्तरग्रन्थे चार्वाकमतोपन्यासोऽनर्थकः । न च तन्मतनिरासस्य सूत्रार्थत्वज्ञापनार्थः स इति वाच्यम् । परोक्तरीत्या साङ्ख्यमतनिरासस्यैव तदर्थत्वसम्भवे पूर्वोत्तरसाङ्ख्यमतसन्दष्टस्यास्य सूत्रस्य तत्परित्यागेन चार्वाकमतनिरासार्थत्वकल्पनस्य निर्निबन्धनत्वादित्यतः तस्यानुपपन्नत्वाद्युक्तं तत्परित्यागेन चार्वाकमतनिरासस्य तदर्थत्वाश्रयणमित्यभिप्रेत्य, तन्मतोपन्यासपरतयोत्तरभाष्यं योजयितुं कथं साङ्ख्यमतनिरासस्य तदर्थत्वायोग, इत्यतस्तं दर्शयितुं परकीयं सूत्रार्थं तावदनुवदति **केचिदिदमिति** । **प्रवृत्तिरिति** । स्वाभाविकीति शेषः । **प्रवृत्तेरिति** । स्वाभाविकप्रवृत्तेरित्यर्थः । **प्रयोजनाभावादिति** । भोगापवर्गादिरूपप्रयोजनाभावादित्यर्थः । **व्यधिकरणत्वादिति** । साङ्ख्यमतमसमञ्जसं प्रकृतिप्रवृत्तेर्निष्प्रयोजनत्वादित्यस्य व्यधिकरणत्वादित्यर्थः । ननु साङ्ख्यमतमसमञ्जसं निष्प्रयोजनप्रवृत्तिमत्प्रकृतिप्रतिपादकत्वादिति विवक्षणान्न वैयधिकरण्यमित्यत आह **कथञ्चिदेकाधिकरणतेति** । सौत्रपदादेतावतोऽर्थस्यालाभ-

मभिप्रेत्य कथञ्चिदित्युक्तम् । **स्वमतेनेति** । स्वेन 'अभ्युपगमेऽपी'त्यनेन, त्वन्मतेऽपि निष्प्रयोजनप्रवृत्ति-मत्प्रकृतिप्रतिपादकता(सत्त्वे)भ्युपगमेऽप्यसामञ्जस्याभावादिति भावः । **अभ्युपगमेति** । अभ्युपगमेऽपीति सूत्रांशेन प्रकृतिप्रवृत्त्यभ्युपगमविरोधादित्यर्थः । अभ्युपगमवाद एवायं नाभ्युपगम इत्यत आह **न ह्यभ्युप-गमवादेऽपीति** । कुतो न निराक्रियत इत्यत आह **अनास्थामिति** । प्रेक्षावन्तो यत इति शेषः । यत्प्रमेय-मभ्युपगतं तद्दूषणे तात्कालिकीमनास्थामप्रवृत्तिमित्यर्थः । **नायं सूत्रार्थ इति** । यद्यपि प्रधानस्योक्तरीत्या प्रवृत्तिरेव न युक्ता तदभ्युपगमेऽपि स्वाभाविकत्वात् प्रवृत्तेः सहकार्यपेक्षाभाववत् प्रयोजनापेक्षाभाव-प्रसङ्गादिति सूत्रस्यार्थान्तरमपि परेण वर्णितमिति तदप्यनूद्य दूषणीयम् । तथाऽपि पूर्वदूषणेनैव दूषितत्वान्न पृथगनूद्य दूषितम् । अत्राप्यभ्युपगमवादविरोधानिस्तारात् । तथा हि एवं हि परेणात्र तत्प्रसङ्गो वाच्यः । यदि प्रधानं स्वभावादेव प्रवृत्तिमत् न किञ्चिदन्यदपेक्षत इत्युच्येत ततो यथैव सहकारि किञ्चिन्नापेक्षते एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यते इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्तत इति प्रतिज्ञा हीयेतीति । न चासौ युज्यते । प्रधानं स्वभावादेव प्रवर्तत इत्यंशमभ्युपगम्यैवास्य प्रसङ्गस्य प्रवृत्तत्वात् तत्कथं नाभ्युपगमविरोधः स्यात् । अर्थाभावादित्यनेनार्थापेक्षाभावप्रसङ्गस्य लक्षणीयत्वाच्चेति । चन्द्रिकायां तु पूर्वसूत्रार्थनिरासस्य टीकायामेव स्पष्टत्वात् तन्निरासमकृत्वा तत्र स्पष्टतोऽनिरस्तैतदर्थमात्रमनूद्य दूषितमिति द्रष्टव्यम् ।

वा०र०— उत्तरग्रन्थ इति । क्रियमाण इति शेषः । **सूत्रार्थत्वज्ञापनार्थ इति** । तन्मतनिरासस्य यत्सूत्रार्थत्वप्रदर्शनं च सूत्रार्थभूततन्मतनिरासस्य सुबोधत्वमेव । अत एव स्थानेत्यधिकरणे साङ्ख्यमतं निराक्रियते । न च तत्स्वरूपाज्ञाने दूषणं सुबोधं भवति इत्यतः **तन्मतस्थितिं तावत् दर्शयतीति** मूलं उक्तम् । उक्तं च टीकाकृता । सामयिकानेकपदार्थाश्रितन्यायाभाससंशब्दे मते सत्येव तद्दूषणज्ञानसम्भवात् इति भावः । वक्ष्यति च पुरुषाश्मवत् इत्युत्तराधिकरणे । एतन्मतस्वरूपाज्ञाने दूषणस्य दुर्बोधत्वात् तत्सुबोध-त्वाय तन्मते स्थितिरादौ दर्शनीयेति । तथा च चार्वाकमतोपन्यासे सत्येव तन्निरासस्य सूत्रार्थभूतस्य सुबोधता भवति । तदभावे तु न भवति इत्येतत् सूत्रार्थभूतत्वं तन्मतनिरासस्य ज्ञापनाय मन्दानामपि तद्बोधाय तन्मतोपन्यासः इत्युक्तं भवति । एवमेव सूत्रार्थत्वं दर्शयितुमिति पूर्वाधिकरणस्थवाक्यमपि व्याख्येयम् । न त्वत्र साङ्ख्यमतनिरासो सूत्रार्थः अपि तु चार्वाकमतनिरास एव सूत्रार्थः इत्येवं चार्वाकमतनिरासस्य यत् सूत्रार्थत्वज्ञापनं तत् प्रयोजनकत्वं तन्मतोपन्यासस्य इत्यर्थो विवक्षितः । तन्मतनिरासस्य सूत्रार्थताया एवाभावेन तत्सुबोधाय तदुपन्यासानर्थक्य एवेत्यर्थप्रतिपादकपरोक्तरीत्या इत्याद्युत्तरवाक्ये चार्वाकमतनिरासस्य सूत्रार्थत्वे किल तत्सुबोधत्वाय मतोपन्यासः सार्थकः स्यात् । 'न च तदस्ति' इत्यादिरूपेण सूत्रार्थत्वाभावस्यैव प्रतिपादनेन तदुत्तरवाक्यं च 'युक्तं तत्परित्यागेन चार्वाकमतनिरासाय तदर्थत्वाश्रयणं' इत्येवोक्तत्वेन तन्मतोपन्यासस्य तन्मतनिरास एव सूत्रार्थः इत्येतत् ज्ञापकत्वं इत्येतत् प्रमेयविषयत्वाभावात् इत्यभिप्रेत्य इत्यादेरपीत्येवं तन्मतनिरासस्य सूत्रार्थत्वे सिद्धे प्रागुक्तरीत्या तत्सुबोधत्वाय तन्मतोपन्यासस्यावश्यकत्वात् तदुपन्यासपरतया इत्येव स्पष्टं योजनायाः प्रतीत्याऽर्थान्तरानवकाशात् । किं चार्थान्तरभ्रान्तिमूलं हि

एतट्टीकाग्रन्थस्योत्तरवाक्यमूलानुसारेण तद्व्यावृत्त्यशङ्काप्रदर्शकतया प्रवर्तमानत्वेनेति भावेन तन्मतमिति मूलवाक्यानुसारेण तन्मतोपन्यासप्रयोजनं तन्मतनिरासस्य एव सूत्रार्थत्वं इत्येतदिति प्रतिपादितमित्येवं टीकाकृतः तन्मूलार्थावगमो वाच्यः । न च एतत् सम्भवति । इति भावेनेत्यस्य न साक्षात् तन्मतोपन्यासे हेतुतयाऽन्वयः । अपि तु तन्मतनिरासस्य सूत्रार्थत्वे सिद्धे मतोपन्यासस्य निराससुबोधतार्थतायाः प्रागुक्तया पुनरवक्तव्यत्वात् तत्सिद्धवत्कृत्य मूले तन्मतमुपन्यस्यतीत्येवोक्ततया टीकाकृता यथाश्रुतमूलानुसारेण प्रवृत्तिमता प्राचीनमूलोक्तं स्वयं चोपपादितं सुबोधार्थत्वमतोपन्यासस्य सिद्धवत्कृत्यैव सूत्रार्थत्वज्ञापनार्थः इत्येव साम्मुग्धेनोक्तौ तट्टीकाकृतोऽपि मूलस्वार्थान्तरप्रतिभासाभावात् । तस्मात् तदर्थावगमानुसारेणापि एतट्टीकार्थान्तरप्रतिभासो भ्रान्तिरेव । एवं च चार्वाकमतनिरासस्वरूपं स्वाभिमतं सूत्रार्थं समर्थयितुं पराभिमतसूत्रार्थनिराकरणमित्यस्य पूर्वमूले तत्र तत्र प्रतिपादनानुसारेण प्राप्तत्वात् तन्मतोपन्यासस्य च तन्निरासबोधार्थत्वात् तस्य प्रागुक्तमूलाद्यनुसारेण सिद्धत्वादेतट्टीकावाक्यस्यास्मदुक्तार्थकतया नार्थान्तरभ्रान्त्यवकाशः । एतेनैव मतोपन्यासस्य मतज्ञानार्थतया मतनिरासस्य यत्सूत्रार्थत्वं तज्ज्ञानार्थत्वोक्त्ययोगः । यत्र किञ्चिन्मतनिरासस्य सूत्रार्थत्वेऽपि तस्य वास्तवसूत्रार्थतायाः सूत्रार्थमात्रकथनमात्रज्ञाप्यतयोपन्यासानपेक्षत्वाभिप्रायेण तन्मतोपन्यासाभावः तत्रेवात्रापि सूत्रार्थतया तन्मतनिरासज्ञानसम्भवेन तदर्थतया उपन्यासानपेक्षणाच्चेति दूषणं गर्भस्रावेणैव गतमिति सूरिभिरालोचनीयम् । **पूर्वोत्तरसाङ्ख्यमतेति** । अनेन परपक्षे स्वारस्यं भवत्पक्षे तु तदभावः इति सूचितं भवति । एतच्छङ्कानिरासं तूत्तराधिकरणे मूलकृदेवाधिकशङ्काक्रमेणाधिकरणक्रमं प्रतिपादयन् करिष्यतीति ज्ञेयम् । **भोगापवर्गादीति** । अत्र भोगापवर्गयोः प्रत्येकमिव मिलितयोरपि प्रयोजनत्वासम्भवोऽभिप्रेतः । उभयं वेत्यादि भाष्ये उक्तत्वात् । **आदिपदेन** औत्सुक्यनिवृत्तिपरिग्रहः । पुरुषस्यानाधेयातिशयत्वादिना भोगादिप्रयोजनासम्भवो भाष्योक्तरीत्या ज्ञेयः । स्वभावेनेत्यत्र स्वशब्दार्थकथनपूर्वके तृतीयार्थो व्यभिचारस्थलत्वमिति दर्शयन् हेतुसद्भावादि प्रतिपादयति **त्वन्मतेऽपीति** । त्वन्मतरूपस्थलेत्यर्थः । त्वन्मते प्रकृतेः अशाब्दत्वादिना प्रतिपादनादिति भावः । **स्वमतेनानैकान्त्यात्** इत्यत्र स्वमतेनेत्येतत् मायिमतेनेति व्याकर्तुं त्वन्मतेऽपीति व्याख्यातम् । एवं व्याकुर्वतैव स्वमते प्रयोजनशून्यप्रवृत्तिमत् भगवत्प्रतिपादकतासत्त्वेऽपि सामञ्जस्यस्यैव सत्त्वात् इत्यन्यथाख्यातिकारीयं व्याख्यानं असदिति सूचितं भवति । प्रयोजनशून्यप्रवृत्तिमत् प्रकृतिप्रतिपादकत्वरूपहेतोरेव व्यभिचारप्रतिपादनाय प्रवृत्तेऽत्रग्रन्थे भगवत्प्रवृत्तिमादाय व्यभिचारप्रतिपादनायोगात् इत्यादिकं वाक्यविनोदे गुरुपादैरेव निरूपितम् । न च यत् निष्प्रयोजनप्रवृत्तिमत् किञ्चित् प्रतिपादकं तत् असमञ्जस इति सामान्यव्याप्तिमालम्ब्य प्रवृत्त्याश्रयणात् एतद्ग्रन्थे भगवत्प्रवृत्तिमादायापि तदुपपादनं युक्तमिति वाच्यम् । विशेषव्याप्तावेव व्यभिचारप्रतिपादनसम्भवे सति तत्परित्यागेन सामान्यव्याप्त्याश्रयणादेः अयोगादित्याशयात् । किं च नप्रयोजनत्वाधिकरणीयात्मप्रयोजनार्थाय स्पृहां श्रुतिः अवारयत् इत्येतद्भाष्यमूलयोः भगवतः स्वप्रयोजनोद्देश्यत्वाभावेऽपि परप्रयोजनोद्देश्यता अस्तीति सम्यगुपपादिततया सर्वथा प्रयोजनोद्देशशून्यत्वस्य तत्राभावेन व्यभिचारवर्णनायोगः । साङ्ख्याभिमतप्रकृतेः सर्वथा प्रयोजनोद्देशित्वाभावस्यैवार्थाभावपदेन

मायिनाऽभिधानादित्यलम् । प्रकृतिप्रवृत्त्यभ्युपगमेन तद्विरोधादिति पाठस्तु स्वरस एव । अभ्युपगमविरोधात् समस्तपादेऽपि सूत्रांशेन योऽभ्युपगमः तद्विरोधात् इत्यर्थो ज्ञेयः । यथा तुशब्दो नित्योऽनित्यो वाऽनुशासनं इत्येतद्वाक्यं वैय्याकरणाभिमतस्य भाष्यकारादेरपीति ज्ञेयम् । यदि तावत् स्वाभाविकी प्रवृत्तिः इत्यादि भाष्यादिगतं व्याख्यानम् । यच्चोक्तं प्रधानस्योक्तरीत्येत्यादिना चन्द्रिकायां अनूद्य निराकृतं, तदनुसारेणाह । यद्यपि प्रधानस्येत्यादि दूषितत्वात् तत्प्रायत्वात् मूलोक्तदूषणेनैव दूषितत्वं दर्शयति **न चासौ युज्यते इत्यादिना** । चन्द्रिकोक्तं दूषणं तु दूषणान्तरतयाह **अर्थाभावादित्यनेनेति** । **पूर्वसूत्रेति** । अत्र च सूत्रार्थस्य पूर्वता न शाङ्करभाष्यविवक्षया । तत्रास्यार्थस्य पश्चादुक्तत्वात् । किन्तु एतट्टीकायामर्थान्तरस्य शङ्कनात् तदपेक्षया मूलोक्तसूत्रार्थ एव पूर्वोऽर्थः इति मूलविवक्षया एवेति बोध्यम् ।

स०व्र०— तस्याः प्रयोजनाभावादिति । इदमसमञ्जसमिति शेषः । **व्यधिकरणत्वादिति** । साङ्ख्यमतमसमञ्जसम्, प्रयोजनाभावादिति प्रयोक्तव्यम् । न च प्रयोजनाभावः साङ्ख्यमतनिष्ठ इति व्यधिकरणत्वमिति भावः ।

ननु प्रयोजनशून्यप्रधानप्रवृत्त्यभ्युपगमवत्त्वमेव हेतुत्वेनाभिप्रेतम् । न चाभ्युपगमस्यापि पुरुषनिष्ठत्वेन वैयधिकरण्यतादवस्थ्यमिति वाच्यम् । पुरुषद्वारा पक्षेऽपि सम्बन्धसद्भावात् । तादृशाभ्युपगमवत्पुरुषप्रणीतत्वमिति यावत् । तथा च न दोष इत्यत आह **कथञ्चिदिति** । तादृशाभ्युपगमवत्त्वस्यापि पुरुषद्वारा सम्बन्धसत्त्वेऽपि साक्षात्सम्बन्धाभावात् कथञ्चिदित्युक्तम् । **स्वमतेनेति** । मायावादिमतेन । निमित्ते तृतीया । अभ्युपगमेऽपीत्यनेन प्रयोजनशून्यप्रधानप्रवृत्त्यभ्युपगमेऽपि सामञ्जस्यस्यैवाङ्गीकृतत्वेनानैकान्त्यमिति भावः । 'कुतो न निराक्रियत' इत्यत आह **अनास्थामिति** । प्रेक्षावन्त इति शेषः । **अनास्थां** यत्प्रमेयमभ्युपगतं तद्दूषणे तात्कालिकीमनास्थाम् अप्रवृत्तिमित्यर्थः ।

विठ्ठल०— अत्र परकीयव्याख्याने सङ्गत्याभासः प्रतीयत इति न तदुपादेयम् । तस्यां प्रामाणिकत्वादिति दर्शयन् साङ्ख्यमतनिराकरणाधिकरणानां मध्येऽस्याधिकरणस्य प्राप्तिसिद्ध्यर्थं पूर्वाधिकरणसङ्गतिप्रदर्शनपूर्वकमूलमवतारयति **केचिदित्यादिना** । **एतावतैव पूर्णत्वादिति** । 'अन्यत्राभावाच्च न तृणादिवदि'ति पूर्वसूत्रेण न तृणादिवत् प्रधानं स्वयमेव महदादिरूपेण परिणमते अन्यत्रानडुहोपभुक्ते तदभावादर्थाभावाच्चेत्यस्य सम्बन्धस्य स्फुटत्वेन सूत्रेऽभ्युपगमवादस्याप्रदर्शनीयत्वाच्चेति भावः । **व्यधिकरणत्वादिति** । साङ्ख्यमतमसमञ्जसं प्रधानप्रवृत्तेः प्रयोजनाभावादित्यनयोर्व्यधिकरणत्वादित्यर्थः । **कथञ्चिदेकेति** । योजनशून्यप्रधानप्रवृत्तिप्रतिपादकत्वादित्येवंरूपेणेत्यर्थः । **स्वमतेनेति** । न प्रयोजनवत्वादिति प्रयोजनशून्यभगवत्प्रतिपादकसूत्रकारे सामञ्जस्याभावादिति भावः । यद्वा प्रयोजनशून्याविद्याप्रवृत्त्युपपादकमायिस्वमते असामञ्जस्यरूपसाध्यानङ्गीकारादिति भावः । **अभ्युपगमविरोधादिति** । अर्थाभावात् प्रकृतेः प्रवृत्तिरनुपपन्नेति साधने

अभ्युपगमेऽपीत्युक्तिविरोध इत्यर्थः । वस्तुतो न प्रकृतेः प्रवृत्तिरभ्युपगम्यते किं नामाभ्युपगमवाद एवायमतो न विरोध इत्यत आह **न हीति** । **अनास्थामिति** । दूषणान्तरं वक्तुं पूर्वगृहीतपक्षानाग्रहमित्यर्थः । अत्र महाभाष्यवाक्यं संवादयति **यथेति** । **अनुशासनमिति** । प्रकृतिप्रत्ययादिना साधुत्वमित्यर्थः ।

॥ इति एतत्सूत्रीयस्य परकोयव्याख्यानस्य अयुक्तता ॥

* * *

॥ अथ एतत्सूत्रनिरसिष्यमाणचार्वाकमतस्योपन्यासः ॥
॥ अथ तत्र चार्वाकोक्तप्रमाणम् ॥

९९ **सु०— किन्नाम 'मा भूदचेतनस्य कर्तृत्वं, शरीरस्यैव चेतनावत्त्वेन कर्तृत्वोपपत्तेः; किमीश्वरादिने'त्यधिकाशङ्क्या प्रत्यवतिष्ठमानस्य चार्वाकस्य मतमत्राधिकरणे निरस्यत इति भावेन तन्मतमुपन्यस्यति चार्वाकैरिति ।**

अनु०— चार्वाकैरुच्यते मानमक्षजं नापरं क्वचित् ।

चार्वी बुद्धिः । तत्सम्बन्धादाचार्योऽपि चार्वी । तस्येमे छात्राश्चार्वाकाः । तैः **अक्षजं मानमुच्यते** ॥ नन्वेतदस्माकमपि सम्मतमित्यतः सावधारणमिदमुक्तमित्याशयेनोक्तं विवृणोति **नापरमिति** । अनुमानमागमश्च मानं नोच्यत इत्यर्थः । एतदप्यस्माकमनुमतमेव ॥ प्रमेयविशेषे प्रत्यक्षस्यैव मानताऽभ्युपगमादित्यत आह **क्वचिदिति** ।

एतदुक्तं भवति । प्रमाणाधीना हि प्रमेयसिद्धिः । प्रमाणं च प्रत्यक्षमेव, नातोऽन्यदस्ति । न च प्रत्यक्षेणेश्वरं प्रतीमः । तस्मात्प्रमाणाभावान्नास्तीश्वर इति ।

परि०— साङ्ख्यनिरासपरपूर्वोत्तराधिकरणेषु मध्ये चार्वाकस्य कुतः प्रसक्तिरिति पृच्छति **किं नामेति** । अवान्तरसङ्गतिबलादिति भावेनाह **मा भूदिति** । **चार्वीति** । समीचीनेत्यर्थः । वोतो गुणवचनादिति ङीष्प्रत्ययः । **तत्सम्बन्धादिति** । लक्षणयाऽऽचार्यश्चार्वीशब्देन गृह्यत इत्यर्थः । आचार्यस्य बृहस्पतेश्चारुबुद्धिमत्वं चैवंरूपमतनिर्माणेन अयोग्यजनव्यामोहकचातुर्याद्धेयम् । **तस्येम इति** । चार्वीशब्दात्तद्धिते आक(च्)प्रत्यये यस्येति ईकारलोपे चार्वाक इति सिद्धिः । आक(च्)इति तद्धितप्रत्ययश्च तद्धिता इति सूत्रे बहुवचननिर्देशज्ञापकात् 'विचित्रा हि तद्धितगतिरि'त्युक्तत्वाद्धेय

इति भावः । संज्ञापूर्वकविधेरनित्यत्वात् वृद्धच्छ इति छप्रत्ययो न कृतः । **प्रमेयविशेष इति** । स्वात्मीयसुखदुःखादिविषये घटादिगतरेखोपरेखादिविषये चेति भावः । **क्वचिदितीति** । कस्मिन्नपि वस्तुन्यक्षजादन्यन्मानं नेत्यर्थः । तर्हीश्वराद्यतीन्द्रियसिद्धिः कथमित्यतः, ब्रह्मणो जगत्कारणत्वाद्यविरोधादेतन्मतोपन्यासो व्यर्थ इत्यतो वाह **एतदुक्तमिति** ।

यादु०— चेतनावत्त्वेनेति । ज्ञानवत्त्वेनेत्यर्थः । शरीरस्यैवात्मत्वादिति भावः । **चार्वी बुद्धिरिति** । चारुशब्दाद्वोतो गुणवचनादिति ङीषि चार्वीति रूपसिद्धिरिति द्रष्टव्यम् । **तत्सम्बन्धादिति** । तथा च यथा यष्टीः प्रवेशयेत्यादौ यष्टिशब्दोऽजहत्स्वार्थलिङ्ग एव तद्वत्पुरुषलक्षकस्तथा चार्वीशब्दोऽप्यजहत्स्वार्थलिङ्ग एव तादृशबुद्धिमदाचार्यलक्षक इति भावः । **तस्येम इति** । चार्वीशब्दात्तस्येम इत्यर्थेऽनुक्तप्रत्ययज्ञापकतद्धिता इति बहुवचनेन आकच्प्रत्यये टिलोपे चावकिति रूपमिति द्रष्टव्यम् । चार्वीशब्दात्तस्येम इत्यर्थे विचित्रा हि तद्धितगतिरिति वचनादाकच्प्रत्यये यस्येति चेतीकारलोपे चावकिति रूपमित्यप्याहुः । **प्रमेयविशेष इति** । उत्पत्त्यनन्तरमेव विनष्टे विद्युदादावित्यर्थः ।

कं०रा०— प्रमेयविशेष इति । देशकालादावित्यर्थः । न च वाच्यं देशशब्दिताकाशस्य कालस्य चानुमानवेद्यत्वसम्भवान्न प्रत्यक्षस्यैव तत्र मानतेति, देशकालौ विना कस्यापि वस्तुनो बुध्यनारोपेण पक्षादि ज्ञानकाल एव तयोः सिद्धतया तत्रानुमानावसराभावात् । ऐक्य इति (?) शरीररूपेण परिणतेभ्यः पृथिव्यादिभ्य इत्यर्थः ।

श्रीनिधि०— चेतनं ज्ञानम् । **तत्सम्बन्धादाचार्योऽपि चार्वीति** । सम्बन्धार्थे अण् तस्य लुगिति द्रष्टव्यम् । **तस्येमे छात्रा इति** । विचित्रा हि तद्धितगतिरिति वचनादाकच्प्रत्यये यस्येति चेतीकारलोपे इको यणचीति यणि चार्वाक इति रूपसिद्धिरिति ज्ञेयम् । **प्रमेयविशेष इति** । इक्षु क्षीरादिमाधुर्यादाविति भावः ।

शे०वा०— चेतनावत्त्वेनेति । ज्ञानवत्त्वेनेत्यर्थः । शरीरस्यैवात्मत्वादिति भावः । **चार्वी बुद्धिरित्यादि** । अत्र बुद्धिवाचिनश्चारुशब्दात् वोतो गुणवचनादिति ङीष्प्रत्यये चार्वीति रूपसिद्धौ यष्टीः प्रवेशयेतिवदजहत्स्वलिङ्गादेव चार्वीशब्दात् बुद्धिमति लोकायतिकाचार्य(र्ये)पुरुषविशेषे लाक्षणिकात् तस्येम इत्यर्थे आकच्प्रत्यये तद्धिता इति बहुवचनसामर्थ्यलब्धतद्धितगतिवैचित्र्येणोत्पादिते यस्येति चेतीकारलोपे चार्वाकशब्दनिष्पत्तिरिति द्रष्टव्यम् । **सम्मतमिति** । तथा च नेयं वैषम्योक्तिरिति भावः । **प्रमेयविशेष इति** । यत्र चक्षुराद्यतिरिक्तं प्रमापकं प्रमाणं न प्रवृत्तं तत्रेत्यर्थः । न तु तदतिरिक्तप्रमाणान्तरगोचर इत्यर्थः । तस्यासम्भवादिति भावः । ननु प्रत्यक्षातिरिक्ताप्रामाण्यव्युत्पादनस्योक्तार्थविरोधित्वाभावान्न निरसनीयत्वमित्यतस्तद्दर्शयति **एतदुक्तं भवतीति** । **प्रमाणाधीनेति** । 'मानाधीना मेयसिद्धिर्मानसिद्धिस्तु लक्षणात्' इति न्यायादिति भावः । **न च प्रत्यक्षेणेति** । तस्यापाततस्तदभावावेदकत्वादिति भावः ।

वा०२०— चेतनाशब्दस्य मनोवृत्तिरूपज्ञानपर्यायतया अर्थमाह **ज्ञानवत्त्वेनेत्यर्थ इति** । 'सम्माननोत्सञ्जनाचार्यरकरणज्ञानभृतिविगणनव्येषु नियः' इति सूत्रस्याकर्त्रभिप्राये क्रियामूले णीञ् प्रापण इत्येतद्धातोः सम्माननादिषु विशेषणेषु सत्सु आत्मनेपदं भवतीत्यर्थः । सम्माननं पूजनम् । तस्मिन् विशेषणे सति नयतेः आत्मनेपदोदाहरणम् । नयतेः चार्विलोकायत इति । तदुपपादनं काशिकायाम् । चार्वी बुद्धिः तत्सम्बन्धात् आचार्योऽपि चार्वी । सः लोकायते शास्त्रे पदार्थान्नयति उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति । ते युक्तिभिः स्वाप्यमानाः सम्मानिताः पूजिताः भवन्तीति । तत्रत्यमञ्जर्यां चारुशब्दात् नोतो गुणवचनादिति ङीष् यष्टीः प्रवेशयेति पुरुषेषु अजहत् स्वलिङ्ग एव यष्टिशब्दः तथा चार्वीशब्दः इति व्युत्पादितम् । तदनुसृत्यापेक्षितं पूरयन् तत्साधुतां दर्शयति **अत्र बुद्धीत्यादिना** । चार्वीति रूपेत्यतः प्राक् यणीति शेषः । यद्यपि पुरुषे लक्षणया चारुशब्द एव फलति । पुरुषशब्दलिङ्गप्राप्ते चारुशब्दादपि पुरुषविशेषे प्रवर्तमानादाकच्प्रत्यये चार्वाक इति भवत्येव । तथापि तीरे लाक्षणिकगङ्गादिशब्दस्येव स्वलिङ्गहानेनेत्याशयेन यष्टीः प्रवेशयेत्यादि दृष्टान्तकीर्तनम् । **बुद्धिमतीति** । अनेन लक्षणामूलं मत्वर्थसम्बन्धेन बुद्धिवाची चार्वीशब्दो बुद्धिमत्याचार्ये लक्षणया वर्तते इत्युक्तं भवति । तर्हि बुद्धेः साधारण्यात् विशेषसिद्धिर्न स्यात् इत्यतः उक्तं **पुरुषविशेष इति** । अनेन बुद्धिवाचिनः चारुशब्दस्यापि बुद्धिविशेषार्थत्वमिति सूचितं भवति । तमेव पुरुषविशेषं अभिमानीय दर्शयति **लोकायतिकाचार्य इति** । लोकायतशास्त्रे प्रवर्तमाने इत्यर्थे विचित्रतद्धितगत्या ठकि लोकायतिकेति प्रातिपदिकम् । **इमेऽर्थ इति** । छात्राः इत्यर्थः । **आकच्प्रत्ययः** इत्यस्य उपपादित इति वक्ष्यमाणेनान्वयः । **बहुवचनसामर्थ्येति** । प्रत्ययपरश्च इत्यादिवत् तद्धित इति एकवचने प्रयोक्तव्ये बहुवचन-वैय्यर्थ्यं इत्याशङ्कापरिहाराय बहुवचने । अनुक्ततद्धितपरिहारार्थं तेन पृथिव्याञाञौ । अग्रादिपश्घाढञिमज्मन् इत्येवमादिसिद्धं भवति इति काशिकायामुक्तेः इति भावः । बहुवचनेन संज्ञिनां बहुत्वसूचनात् इत्यादि-मञ्जर्यनुसारेण उपपादनं पूर्णगुणार्णवमित्येतत् ऋग्भाष्यटीकाव्याख्यानावसरे गुरुपादैः कृतमस्ति । तदुपपादनं च तत्प्रपञ्चेऽस्माभिः कृतं तत्रैव ज्ञेयम् । **यस्येति** । **इकार इति चेति** आकच्प्रत्ययस्याजादितया यकारादिषु अजादिषु स्वादिषु असर्वनामस्थानेषु परेषु भसंज्ञाया विधानानुसारेण संज्ञायाः प्राप्तेः तादृशा आकचि परतः ईकाररूपे वर्णस्य लोप इत्यर्थः । अनेनात्र हि इकारलोपप्रापकापरिस्फूर्त्या अजादितद्धितेऽपि परतः टिलोपो वक्तव्यः । तत्र च टेरिति विधायकं सूत्रं वाच्यम् । तत्र च डितीत्यनुवृत्तेः प्रकृते च डित्परत्वाभावात् तदयोग इति टिलोपोपपत्तये एकच्प्रत्यय इति विकल्पयित्वा डित्वात् टिलोप इति व्युत्पादयन्तोऽन्यथाख्यातिकाराः निरस्ताः वेदितव्याः इति च सूचितम् । विस्तृतं चैतत् वाक्यार्थविनोदे । यस्येति चेति इति ईकारलोपः इत्येतत् पूर्वटीकागते आहुरित्यस्वरससूचनं च भ्रान्तिमूलम् । तस्मात् एतत् टिलोपाश्रयणं यस्येति चेत्यस्यापरिस्फूर्या वा परिस्फूर्यात्तावपि मत्वा सम्भवे भ्रान्त्या वा डित्वपक्षे तु डित्वसामर्थ्यादपि अभस्यापि इत्यादि प्रक्रियावाक्यसंस्कारेण वेति ज्ञेयम् । कुतोऽयं अर्थो न इत्यत आह **तस्य इति** । कदाचित् प्रत्यक्षगम्यस्य एव घटादेः कालान्तरादावनुमानादिना प्रतीयमानतया प्रत्यक्षातिरिक्तप्रमाणान्तरगोचरत्वस्य प्रमाणसम्प्लववादि-

मतेऽसंवादादित्यर्थः । असम्भवादिति ज्ञेयमिति पाठः । भावपदं लेखकागतम् । **प्रत्यक्षातिरिक्तेति** । अतिरिक्तानुमानादेः यदप्रामाण्यव्युत्पादनं यस्येति योज्यम् । **उक्तार्थेति** । सर्ववैशिष्ट्यरूपोक्तार्थेत्यर्थः । परमचेतनस्य भगवत एव कर्तृत्वमित्युक्तार्थेति यावत् । उत्तराधिकरणमूले तथैव प्रागुक्तप्रमेयवर्णनात् । ईश्वरादिसिद्धिविधानाप्रतीतेरिति भावः । **तद्दर्शयतीति** । उक्तार्थविरोधित्वं ईश्वरसिद्ध्यसम्भवमुखेन दर्शयतीत्यर्थः । **न्यायादिति** । अभियुक्तोक्तप्रकारादित्यर्थः ।

स०व्र०— चार्वीत्यादि । बुद्धिवाचिनः चारुशब्दात् 'वोतो गुणवचनात्' इति ङीष्प्रत्यये चार्वीति रूपसिद्धौ 'यष्टीः प्रवेशय' इत्यादिवत् अजहत्स्वार्थलिङ्गादेव चार्वीशब्दात् बुद्धिमति लोकायतिकाचार्यपुरुषविशेषो लाक्षणिकात् 'तस्येम' इत्यर्थे आकच्प्रत्यये 'तद्धिता' इति बहुवचनज्ञापिततद्धितगतिवैचित्र्येणोत्पादिते 'यस्येति चे'ति तद्धितपरत्वात् इकारलोपे चार्वाक इति रूपसिद्धिः । तथा चोक्तं 'सम्माननोत्सञ्जनाचार्यकरण' इति सूत्रव्याख्यायां काशिकावृत्तौ 'चारु नयने चार्वी लोकायते पदार्थान् इति चार्वी बुद्धिः । तत्सम्बन्धात् आचार्योऽपि चार्वी । स लोकायते शास्त्रे पदार्थान् नयते उपपत्तिभिः स्थाप्यमानाः सम्मानिताः पूजिता भवन्ती'ति । पदमञ्जर्यां च चारुशब्दात् 'वोतो गुणवचनवदि'ति ङीपि यष्टीः प्रवेशयेति पुरुषेऽपि अजहत्स्वार्थलिङ्ग एव यष्टिशब्दो यथा, तथा चार्वीशब्दः' इति ।

विठ्ठल०— शरीरस्याप्यचेतनत्वात् कथं कर्तृत्वमित्यत आह **चेतनावत्त्वेनेति** । शरीरस्यैव ज्ञानवत्वरूपात्मत्वेनेत्यर्थः । **अधिकाशङ्क्येति** । ज्ञानादिशून्यस्य प्रधानादेः कर्तृत्वायोग इत्यचेतनकर्तृत्वमते निरस्ते जडस्यापि देहस्येन्द्रियविषयादि सहकारिवशाज्ज्ञानाद्युत्पादेन कर्तृत्वं युज्यत इत्यभिधेऽभ्यधिकाशङ्क्येत्यर्थः । अतः साङ्ख्यमतनिरासपराधिकरणमध्ये अस्याधिकरणस्य निवेशो युज्यत इति सूचितं भवति । **चार्वी बुद्धिरिति** । चारुशब्दादोते गुणवचनादिति षीङ्प्रत्यये चार्वी समीचीना बुद्धिः तादृग्बुद्धिसम्बन्धादजहत्स्वार्थलक्षणया यष्टीः प्रवेशयेत्यादाविव चार्वी आचार्यः दुर्जनव्यामोहकमतनिर्माणोपयुक्तबुद्धिमत्त्वात् बृहस्पत्यादेश्चार्वीत्युच्यत इति यावत् । तस्येमे इत्यर्थे अनुक्तप्रत्यया अपि यथायोग्यं ग्राह्या इत्यर्थस्य बहुवचननिर्देशादज्ञापकेन 'तद्धिता' इति सूत्रेण एकच्प्रत्यये टिलोपे चार्वाक इति रूपसिद्धिरिति भावः । संज्ञापूर्वविधेरनित्यत्वात् वृद्धाच्छ इति छप्रत्ययो न कृत इति ध्येयम् । **प्रमेयविशेष इति** । सुखदुःखादावान्तरे उत्पत्त्यनन्तरमेव विनष्टे विद्युदादौ ग्राह्ये चेत्यर्थः । **क्वचिदितीति** । कस्मिन्नपि वस्तुनि अक्षजादन्यन्मानं नेत्यर्थः । नन्वीश्वरसिद्धिविरोधिमतदूषणं प्रस्तुतम् । अतः प्रत्यक्षैकप्रामाण्यवादकथनमसङ्गतमित्यत आह **एतदुक्तं भवतीति** । शरीरेति द्वन्द्वान्ते श्रूयमाणः संज्ञाशब्दः प्रत्येकं सम्बध्यत इति ज्ञेयम् ।

॥ इति चार्वाकोक्तप्रमाणम् ॥

* * *

॥ अथ तत्र चार्वाकोक्तो देहात्मसम्बन्धः पुमर्थश्च ॥

१०० सु०— ननु यदि प्रत्यक्षातिरिक्तं न प्रमाणं तदा धर्ममोक्षयोस्तत्साधनानां च प्रत्यक्षाविषयाणामसिद्धिः स्यादित्यत आह देह इति ।

अनु०— देह आत्मा पुमर्थश्च कामार्थाभ्यां विना न हि ।

ज्ञानवान् खल्वात्मा, ज्ञानं च देहधर्मः; यथोक्तम् 'पृथिव्यापस्तेजोवायुरिति तत्त्वानि । तत्समुदाये शरीरेन्द्रियविषयसंज्ञा । तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानमि'ति । तस्मात् देह एव आत्मा, स च विनाशी; इत्यतः कालान्तरभाविनः पुंस एवाभावाद्धर्ममोक्षाख्यपुरुषार्थाभावो नानिष्टः ।

पुरुषार्थौ तु कामार्थावेव, पुरुषान्वयसम्भवादिति । तत्रापि काम एव मुख्योऽर्थस्तु तत्साधनतयैव पुमर्थ इति ज्ञापयितुं कामस्यादौ सङ्कीर्तनम् । इति चोच्यत इति सम्बन्धः ।

परि०— शरीरेति । शरीरसंज्ञा इन्द्रियसंज्ञा विषयसंज्ञेत्यर्थः । तेभ्यो देहरूपेण परिणतेभ्यो भूतेभ्यश्चैतन्यं तस्य च विज्ञानं जायते मदिरायां मदशक्तिर्यथा जायते तथा जडपरिणामेऽपि देहे चैतन्यमिति योजना । **पुरुषान्वयेति** । यस्य पुरुषेण सह भोग्यभोक्तृतया सम्बन्धः स हि पुरुषार्थः । पुरुषश्चेह ज्ञानवान् देह एवेति तेन भोग्यतयाऽन्वीयमानौ कामार्थावेवेति तावेव पुरुषार्थावित्यर्थः । **कामः** स्रक्चन्दनवनितादिः । **अर्थः** सुवर्णादिः । 'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभे'ति भारतोक्तेः 'अजाद्यदन्तमि'ति सूत्रकृन्मतानुसाराद्वाऽर्थकामाविति कुतो नोक्तम् । धर्मादिषूभयमिति वार्तिकोक्त्याऽर्थकामाविति वक्तुं शक्यत्वेऽपि एवमुक्तेः किं कृत्यमित्यत आह **तत्रापीति** ।

यादु०— तेभ्यश्चैतन्यमिति । शरीराद्याकारेण परिणतेभ्यो भूतेभ्य इत्यर्थः । ननु समस्तेषु व्यस्तेषु वा भूतेषु न चैतन्यं दृष्टं तत्कथं तत्कार्ये शरीरे चैतन्यस्य विज्ञानमित्यत आह **मदशक्तिवदिति** । तस्येति शेषः । तथा च तस्य चैतन्यस्य भूतपरिणामे शरीरे विज्ञानं मदशक्तिवत् । यथा मदिरोपादानेष्वदृष्टाऽपि मदशक्तिर्मदिरायां विज्ञायते । एवं भूतेष्वदृष्टमपि चैतन्यं तत्कार्ये शरीरे विज्ञायत इत्यर्थः । अत एव

'तेभ्यश्चैतन्यं मदशक्तिवत् तस्य विज्ञानमि'ति शाङ्करभाष्ये पाठः । **पुरुषान्वयेति** । देहस्यैव पुरुषत्वादिति भावः । **कामस्यादाविति** । तथा च प्रमाणप्रमेयेत्यादाविव प्रथमोद्देशेन मुख्यता ज्ञायत इति भावः । केचित्त्वन्यथाऽजाद्यदन्तमित्यनेनार्थशब्दस्यैव पूर्वनिपातप्रसङ्गेनार्थकामाभ्यामिति स्यादिति भावमाहुः । तच्चिन्त्यम् । धर्मादिषूभयमिति वार्तिकबलेनानियमश्चात्रेष्यत इति वृत्तावुक्तत्वेनार्थकामावितिवत् कामार्थावित्यस्याप्युपपन्नत्वेन कामस्यादौ सङ्कीर्तनेन वोक्तार्थाज्ञापनात् । सूत्रस्य वार्तिकापेक्षया प्रबलत्वात् तदनुसारेणार्थशब्दस्यैव प्रथमप्रयोगप्राप्तिरिति तु न वैयाकरणानां सम्मतम् । तैरुत्तरोत्तरमुनिवचनप्रामाण्याभ्युपगमादिति ।

कं०रा०— ननु पृथिव्यादिभूतात्मकत्वस्य शरीर इव वस्त्वन्तरेऽपि सत्त्वात् ततोऽपि चैतन्यं कस्मान्न भवतीत्यत आह **मदशक्तिवदिति** । यथा मदिरायाः पदार्थान्तराणां च भूतात्मकत्वाविशेषेऽपि मदशक्तिः मदिरागतैव तथा विज्ञानमपि शरीरगतमेवेत्यर्थः । नन्वर्थशब्दस्याजाद्यदन्तत्वेन अजाद्यदन्तमित्यादौ सङ्कीर्तने कर्तव्ये कामार्थाभ्यामिति कामशब्दस्यादौ सङ्कीर्तनं कथमित्याशङ्कायां कामस्य मुख्यपुरुषार्थत्वेनाभ्यर्हितत्वमर्थस्य तु तत्साधनतया पुरुषार्थत्वादभ्यर्हितत्वं नेति ज्ञापयितुमभ्यर्हितं चेति कामशब्दस्यादौ सङ्कीर्तनमित्याह **तत्रापीति** ।

श्रीनिधि०— तेभ्यश्चैतन्यमिति । शरीरेन्द्रियविषयेभ्य इत्यर्थः । **मदशक्तिवत्** । करणादिभ्यो मदशक्तिरिवेत्यर्थः । चैतन्यमित्यस्य व्याख्यानं **विज्ञानमिति** । **पुरुषान्वयसम्भवादिति** । पुरुषसम्बन्धसम्भवादित्यर्थः ।

शे०वा०— ननु देह आत्मेति देहस्यात्मत्ववर्णनमनर्थकम् । न च देहविनाशेनात्मनो नाशवत्ताप्रतिपादनार्थमेतदिति वाच्यम् । तत्प्रतिपादनस्याप्युपयोगाप्रतिभासात् । न च कालान्तरे तदभावसिद्ध्यर्थमेतदिति वाच्यम् । तस्या अपि निष्प्रयोजनत्वात् । न च धर्ममोक्षाद्यभावसमर्थनं तत्प्रयोजनमिति वाच्यम् । तत्सद्भावेऽप्यनिष्टाभावेन तत्समर्थनस्याप्यनर्थकत्वादित्याशङ्क्य पूर्वोक्तस्यानुमानाद्यप्रामाण्यस्य समर्थनार्थत्वान्नानुपपत्तिरित्यभिप्रेत्य तत्समर्थनपरतया तद्योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **ननु यदीति** । कुतो देहस्यात्मत्वमित्यतस्तल्लक्षणयोगित्वादिति भावेन, किं तल्लक्षणं कथं च तद्योगो येनात्मता देहस्य स्यादित्यतस्तदुभयमप्युपदर्शयति **ज्ञानवानित्यादिना** । ज्ञानं देहस्य धर्म इत्यत्र परस्य सम्मतिमाह **यथोक्तमिति** । **तत्समुदाये** तत्सङ्घाते । **तेभ्य इति** । शरीराद्याकारेण परिणतेभ्यः पृथिव्यादिभ्यो भूतेभ्यः । **चैतन्यं** देहस्य भवतीति शेषः । ननु न भूतानामेकैकस्य चैतन्यमुपलभ्यते घटादेरदर्शनात् । नापि मिलितानाम् । वह्नितप्तेऽयसि दमितवायुसमाध्माते सलिलकणाभ्युक्षिते भूतचतुष्टयमेलनेऽपि चैतन्यानुपलम्भात्, तत्कथं भूतसङ्घाते शरीरचैतन्यस्य विज्ञानमित्यत आह **मदशक्तिवदिति** । तस्येति शेषः । तथा च तस्य चैतन्यस्य भूतपरिणामे शरीरे विज्ञानं मदशक्तिवदुपपद्यते । यथा हि मदिरोपादानेषु किण्वादिष्वदृष्टाऽपि मदशक्तिर्मदिरायां विज्ञायते । तथा भूतेष्वदृष्टमपि चैतन्यं तत्कार्ये शरीरे विज्ञायत इति भावः । यदि समस्तव्यस्तविकल्पेन देहस्य चैतन्यं

निराक्रियेत तर्हि मदिरायां मदशक्तिरप्यपाक्रियेताविशेषादित्यतिप्रसङ्गसूचनाय मदशक्तिवदिति दृष्टान्तीकरणम् । **पुरुषान्वयेति** । देहसम्बन्धेत्यर्थः । देहस्यैव पुरुषत्वादिति भावः । मुख्यः पुमर्थ इति सम्बन्धः । **कामस्यादौ सङ्कीर्तनमिति** । अन्यथा 'अजाद्यदन्तमि'त्यनेनार्थशब्दस्यैव पूर्वनिपातप्राप्त्याऽर्थकामाभ्यामित्येव स्यात् । न च राजदन्तादिषु परमिति शास्त्रेणाजाद्यदन्तशास्त्रस्यापवादात् कामार्थाभ्यामित्यस्योपपत्तेर्नेदं ज्ञापकमिति वाच्यम् । तस्यापि शास्त्रस्य धर्मादिषूभयमिति वचनेनापवादात् । अर्थकामौ कामार्थावित्युभयथाऽपि प्रयोगस्य साधुतयाऽऽश्रयणीयत्वेऽपवादाभावे पुनरुत्सर्गस्य स्थितिरिति न्यायेन प्रथमप्राप्ताजाद्यदन्तशास्त्रस्याप्यानुगुण्यात् प्राथमिकप्रयोगस्यार्थकामाभ्यामित्यस्येव कर्तव्यत्वादिति भावः । अन्ये त्वर्थकामावित्यस्यासाधुत्वे हि नियमेन कामार्थावित्येव वक्तव्यतया कामस्यादौ सङ्कीर्तनस्यासाधुतादोषपरिहारार्थत्वेनान्यथासिद्धत्वादर्थापेक्षया कामस्य प्राधान्यद्योतकत्वासम्भवेऽपि धर्मादिषूभयमिति वचनानुसारेणोभयथाऽपि प्रयोगस्य साधुतायां नियमेन कामस्यादौ सङ्कीर्तनस्यान्यथासिद्धत्वासम्भवादर्थापेक्षया कामस्य प्राधान्यद्योतकत्वं तस्योपपन्नमित्याशय इत्याहुः ।

वा०र०— परस्य सम्मतिमिति । चार्वाकस्येत्यर्थः । आत्मतत्त्वविवेककिरणावल्याद्यनुसारेणाह **शरीराद्याकारेणेत्यादिना** । प्रत्यक्षं प्रमाणमित्यादि भाष्यवार्तिकादिति च ज्ञेयम् । **राजदन्तादिष्विति** । दन्तानां राजा राजदन्त इति पूर्वप्रयोगार्हस्यापि परनिपातप्रतिपादनात् धर्मार्थाविति उदाहरणाच्चेति पाठः । अनियमश्चात्र दूष्यत इति काशिकायां उक्त्वा वर्धमानादिषु उभयमपीति कथन्तापरिहारात् काशिकोक्तमपवादमाह **धर्मादिषु उभयमिति वचनेनेति** । उदाहृतं च काशिकादौ धमार्थौ कामार्थौ । **कामशब्दौ** अर्थधर्मौ अर्थकामाविवीति भावः । तर्हि अविशेषात् उभयथापि प्रयोगस्य साधुत्वात् अर्थकामाभ्यां इति प्रयोगापादनं निर्निबन्धनं इत्यतः तत्र शास्त्रान्तरानुसारोऽपि अस्तीत्याह प्रथमप्राप्ता **अजाद्यदन्तेति** ।

स०व्र०— ननु 'धर्मादिषु उभयमि'ति वार्तिकस्य सत्त्वेन उभयथा प्रयोगसम्भवे किमेवमेव प्रयोगे नियामकमित्यत आह **तत्रापीति** । केचित् 'अजाद्यदन्तमि'त्यनेनार्थशब्दस्यैव पूर्वनिपातप्राप्त्या अर्थकामाभ्यामिति स्यात् । न च 'अजाद्यदन्तादिषु परम्' इत्यत्र 'धर्मादिषूभयमि'ति वार्तिककारेणोक्तत्वात् अर्थकामावितिवत् कामार्थावित्यस्याप्युपपन्नत्वेन कामस्यादौ सङ्कीर्तनं नोक्तार्थज्ञापकमिति वाच्यम् । सूत्रस्य स्वतः सम्प्राप्तत्वात् वार्तिकस्य प्रयोगान्तरदर्शनमूलकस्यास्वरसप्राप्तत्वात् तयोः स्वरसस्यैव प्राबल्येन अजाद्यदन्तत्वस्यैव प्राप्त्या अर्थकामावित्येव वक्तव्ये कामस्यादौ सङ्कीर्तनेनार्थस्य कामार्थत्वज्ञापनोपपत्तेरिति भावः इत्याहुः ।

विट्ठल०— तेभ्य इति । शरीरादिरूपेण स्थितेभ्यो भूतेभ्य इत्यर्थः । भूतेष्वविद्यमानं चैतन्यं तत्समुदाये शरीरे भवतीत्यत आह **मदशक्तिवदिति** । यथा मदिरोपादानेषु किण्वादिषु प्रत्येकमदृष्टापि मदशक्तिर्मदिरायां दृश्यते । तथाभूतेष्वदृष्टं चैतन्यं देहे दृश्यत इत्यर्थः । **पुरुषान्वयेति** । यो हि पुरुषेण

भोग्यतयाऽन्वीयते स हि पुरुषार्थः । न च देहादतिरिक्तः पुरुषोऽस्त्यतः तेनान्वीयमानौ कामार्थाविव पुरुषार्थावित्यर्थः । अर्थकामावित्यपि वक्तुं शक्य आदौ ग्रहणेन ज्ञापितः कामस्य प्राधान्यं दर्शयति **तत्रापीति** ।

॥ इति चार्वाकोक्तो देहात्मसम्बन्धः पुमर्थश्च ॥
॥ इति एतत्सूत्रनिरसिष्यमाणचार्वाकमतस्योपन्यासः ॥

* * *

॥ अथ उपन्यस्तस्य चार्वाकमतस्य निरासः ॥
॥ अथ तत्रादौ अतीन्द्रियवस्त्वभावात् विषयप्रयोजनशून्यतया तच्छास्त्रस्यानारम्भणीयता ॥

१०१ **सु०—** एतन्मतनिरासार्थं सूत्रं व्याख्यातुमुपोद्घातं तावदाह **यदेवमिति** ।

अनु०— यदेवं

यद्येवमतीन्द्रियं वस्तु न स्यात्, 'तदा तदीयं शास्त्रं विषयप्रयोजनशून्यमापद्येते'ति शेषः ।

तत्कथमिति चेत् । किमनेन शास्त्रेण तत्प्रणेता विषयं प्रतिपद्यते प्रयोजनं च लभते, उत विनेया नराः ।

आद्यं दूषयति **दर्शनेनेति** ।

दर्शनेनास्य कोऽर्थः प्रत्यक्षगोचरः ।
लब्धस्तेनैव हि

किम् आक्षेपे । **अर्थः** विषयः प्रयोजनं च । **लब्ध** उपलब्धः प्राप्तश्च । **प्रत्यक्षगोचरो हि** इति तत्र हेतुः ।

ततश्चायमर्थः । न तावदनेन शास्त्रेण शास्त्रप्रणेत्राऽतीन्द्रियोऽर्थः उपलभ्यते, तदभावात्; नाप्यैन्द्रियकः, तस्य प्रत्यक्षगोचरत्वेन विषयत्वानुपपत्तेः । अप्राप्ते हि

शास्त्रमर्थवत् ॥ किञ्च प्रत्यक्षेण तमर्थमुपलभ्य खल्वसौ शास्त्रं प्रणीतवान्, अन्यथा (तत्प्र)प्रणयनानुपपत्तेः । तथा च तं प्रति तमेवार्थमुपदर्शयत् कथं सविषयं स्यात् ॥ एवं प्रयोजनमपि न तावदतीन्द्रियम्, तदभावात् । नाप्यैन्द्रियकम्, तस्य योग्यानुप-ल(ब्धि)म्भबाधितत्वात् ।

ननु हितोपदेष्टरि जनोऽनुरज्यते, 'जनानुरागप्रभवाश्च सम्पद' इति चेत् । कृतघ्नतानिमित्तप्रत्यवायानुसन्धाने सत्येवमेतत्, तत्तु परेण त्याजितमिति ।

द्वितीयं दूषयति **नरैरिति** ।

नरैः शास्त्रात् किं मोहनं विना ।

'लब्धमि'त्यनुवर्तते । अत्रापि पूर्ववदुत्तरम् ।

स्यादेतत् । धर्माद्यतीन्द्रियाभिमतार्थाभावः शास्त्रस्य विषयः, तस्य प्रत्यक्षत्वेऽपि वैदिकवासनानिमित्तशङ्काकलङ्कितत्वेन विषयत्वमुपपद्यते । प्रयोजनं च धर्माधर्मशङ्कोप-रुद्धार्थकामोपभोगः । तत्कथं 'नरैः शास्त्रात् किं लब्धमि'त्युच्यते । मैवम् । विषय-प्रतिपत्तौ हि प्रयोजनावाप्तिः । विषयं च किं शास्त्रमाप्तवाक्यतया प्रतिपादयेत्, उतोपपत्ति-व्युत्पादनेन । नाद्यः, आगमप्रामाण्याभ्युपगमप्रसङ्गात्, 'नास्ति अतीन्द्रियं किमपी'त्येतावतैव पूर्णत्वे(नैव)न वाक्यविस्तरवैयर्थ्याच्च । न द्वितीयः, उपपत्तिप्रामाण्याभ्युपगमप्रसङ्गात् ।

शास्त्रं शङ्कामेव निवारयति, विषयप्रतिपत्तिस्तु प्रत्यक्षेणैवेति चेन्न; स्वयं वोप-पत्तिव्युत्पादनेन वा कमप्यर्थमनुपदर्शयतः शङ्कानिवारणासामर्थ्यात् ॥ शङ्का हि संशयो वा स्याद्विपर्ययो वा । द्वावपि विपरीतार्थगोचरबलवत्प्रत्ययनिरसनीयौ, नाज्ञामात्रेण । तर्कव्युत्पादनं शास्त्रेण क्रियत इति चेत् (न), तस्यापि प्रमाणत्वात् । तदिदं 'दर्शनिने'ति प्रकृतानुवृत्तौ सत्यां **'शास्त्रात्किम्'** इति वदता सूचितम् । अन्यथा 'नरैश्चे'त्यवक्ष्यत् ।

मोहनं विना इत्युभयवाक्यशेषः परिहासः । शास्त्रप्रणेत्रा सुरगुरुणाऽयोग्यजन-व्यामोहनं प्रयोजनं लब्धम् । अन्यैश्च मिथ्याज्ञानम् । नातोऽधिकमिति ।

परि०— किमिति सामान्ये नपुंसकम् । 'शक्यं हि श्व(स्व)मांसादिनापि क्षुत्प्रतिहन्तुमि'ति महाभाष्यप्रयोगवदयं ध्येयः । **विनेया नरा इति** । शिष्यभूताः जनाः प्रतिपद्यन्ते लभन्ते चेति विपरिणामेनान्वयः । **किमाक्षेप इति** । किंशब्दादेशः क इति शब्दः । लब्धपदस्यापि विषयप्रयोजनरूपार्थद्वयान्वयाय क्रमेणार्थद्वयमाह **लब्ध इति** । तेनेत्यस्यार्थः **शास्त्रप्रणेत्रेति** । **शास्त्रमर्थवदिति** । सविषयं भवतीत्यर्थः । तेनैवेत्येवकारसार्थक्याय युक्त्यन्तरपरत्वेन व्याचष्टे **किञ्चेति** । योग्यानुपलम्भबाधितत्वमसिद्धमिति शङ्कते **ननु हितेति** । **अनुरज्यते** अनुरागयुक्तो भवति । **कृतघ्नतेति** । कृतोपकारस्यानुरागादिरूपप्रत्युपकाराकरणं कृतघ्नता, तन्निमित्तो यः प्रत्यवायः पापं, तदनुसन्धाने सति हितोपदेष्टरि अनुरज्यते जन इत्यादिकं त्वदुक्तं प्रयोजनं स्यात्, न च तदस्ति । त्वयैव धर्माधर्मौ न स्त इत्युक्त्या तदनुसन्धानस्य त्याजितत्वादित्यर्थः । **अत्रापीति** । द्वितीयपक्षेऽपि । **पूर्ववदुत्तरमिति** । प्रणेतृपक्ष इव उत्तरम् । शिष्यजनैर्न तावच्छास्त्रेणातीन्द्रियोऽर्थ उपलभ्यते । तदभावात् । नाप्यैन्द्रियकः प्रत्यक्षगोचरत्वेन विषयत्वानुपपत्तेः । अप्राप्ते हि शास्त्रमर्थवत् । नापि तैः प्रयोजनं लब्धम् । अतीन्द्रियस्याभावात् । ऐन्द्रियकस्य योग्यत्वे सत्यनुपलम्भबाधितत्वादिति ध्येयमित्यर्थः । अनुशासनार्थकशास्त्रपदप्रयोगसूचितां युक्तिं वक्तुमाह **स्यादेतदित्यादिना** । **तस्य प्रत्यक्षत्वेऽपीति** । प्रतियोग्यनुपलब्धिरेव अभावप्रत्यक्षत्वे हेतुरिति मन्वानस्या(यम)नुवादः । **वैदिकेति** । यजेतेत्यादिवेदार्थानुसन्धानजन्यसंस्कारनिमित्ता या धर्माद्यभावनास्तित्वशङ्का तद्विषयत्वेनेत्यर्थः । **शङ्कामेवेति** । धर्माद्यस्तित्वशङ्कामेवेत्यर्थः । **स्वयं वेति** । आप्त(त्म)वाक्यात्मना वेत्यर्थः । असामर्थ्यमेव व्यनक्ति **शङ्का हीति** । **विपरीतेति** । शङ्काविषयविरोध्यर्थेत्यर्थः । प्रसङ्गरूपतर्कव्युत्पादनेनार्थमुपदर्शयच्छास्त्रं शङ्कां च वारयिष्यतीति आशङ्कामनूद्य निराह **तर्केति** । **प्रमाणत्वादिति** । तच्च व्युत्पादयिष्यति भक्तिपादे इति भावः । **शास्त्रात्किमिति वदता सूचितमिति** । किं स्वयमेवार्थं शास्त्युत तर्कादिव्युत्पादनेनैवेत्यर्थस्य ध्वनितत्वादिति भावः । **उभयवाक्यशेष इति** । तेन कोऽर्थो लब्धः । नरैश्च कोऽर्थो लब्ध इति वाक्यद्वयशेषतां व्यनक्ति **शास्त्रप्रणेत्रेति** ।

गु०दी०— **दर्शनेनास्य कोऽर्थः प्रत्यक्षगोचर** इति श्लोकस्यास्य शास्त्रप्रणेतुर्गुरोर्मोहनं विना तेन स्वकृतेन दर्शनेनैव कोऽर्थो विषयो लब्ध उपलब्धः । प्रयोजनाख्योऽर्थश्च लब्धः प्राप्तः न कोऽपि । यतस्तन्मते सर्वोऽप्यर्थः प्रत्यक्षगोचरो हि । प्रत्यक्षगोचरस्यैवार्थस्य शास्त्रं प्रतिपादकं चेत् ज्ञातज्ञापकतया व्यर्थं स्यात् । अपूर्वस्तु दर्शनस्य विषयो नास्तीति सूचनाय **दर्शनेनैव** इत्युक्तम् । **नरैश्च** विनेयैश्च मोहनं विना शास्त्रादेव किं

विषयात्मकं प्रयोजनात्मकं च वस्तु **लब्धम्** उपलब्धं प्राप्तं च न किञ्चिदपि । यतस्सर्वोऽप्यर्थः प्रत्यक्षगोचरो हीति योजना । स्वसम्मत्या वा वस्तुस्थित्या वा यथावस्थितापूर्वार्थप्रतिपादकवाक्यसमूहो हि शास्त्रम् । तदिदं शास्त्रत्वं तस्याप्रमाणत्वे तद्व्युत्पादनपरे शास्त्रे न स्यात् । अतस्तर्कस्यापि प्रामाण्यं शास्त्रपदेन सूचितमिति भावेनाह **शास्त्रात् किमिति वदता सूचितमिति** । दर्शनपदं तु दृश्यते स्वतपोबलादिति व्युत्पत्त्या तैस्तैर्वादिभिः दृष्टसिद्धान्तमात्रे योगरूढं नैतावन्तमर्थमाहेति भावः ।

यादु०— विनेयाः शिष्याः । **कृतघ्नतानिमित्तेति** । अनेन तावदस्माकं हितोपदेशेनोपकारः कृतः । अस्माभिश्चास्य प्रत्युपकारः कर्तव्यः । अन्यथाऽस्माकं कृतघ्नतानिमित्तप्रत्यवायः स्यादित्यनुसन्धाने सतीत्यर्थः । **वैदिकवासनेति** । धर्मादिसद्भावविषयकवासनेत्यर्थः । **शास्त्रात्किमिति वदतेति** । शिष्यते यथावस्थितमेव प्रतिपाद्यते वस्त्वनेनेति व्युत्पत्त्या शास्त्रशब्देन प्रमाणत्वस्य सूचनादिति भावः ।

वं०प्र०— ननु शास्त्रप्रणेत्रा सम्पद्रूपं प्रयोजनं लब्धमित्याशङ्कते **नन्विति** । **अत्रापि पूर्ववदिति** । न तावदनेन शास्त्रेण विनेयेनातीन्द्रियार्थ उपलभ्यते तदभावात् । नाप्यैन्द्रियकः । तस्य प्रत्यक्षगोचरत्वेन शास्त्राविषयत्वात् । एवं प्रयोजनमपि न तावदतीन्द्रियं तदभावात् । नाप्यैन्द्रियकम् । अनुपलम्भबाधितत्वादित्युक्तरीत्योत्तरं वक्तव्यमित्यर्थः । **शङ्कां** वैदिकवासनानिमित्तधर्माधर्म(ादि)शङ्काम् । **विषयेति** । धर्माद्यभावरूपेत्यर्थः । **स्वयं** आगमत्वेन । असामर्थ्यादित्यनन्तरमागमत्वादिनोपदर्शने चागमोपपत्त्योः प्रामाण्यापत्तिरिति वाक्यशेषः । **अन्यथा** एतत्सूचनाभावे । **इत्यवक्ष्यदिति** । दर्शनेनेत्यनुवृत्तिसम्भवाच्छास्त्रादिति व्यर्थमित्यर्थः ।

कं०रा०— विनेया इति । शिष्या इत्यर्थः । **तत्त्विति** । कृतघ्नतानिमित्तकप्रत्यवायानुसन्धानं त्विन्द्रियं किमपि नास्तीति वदता परेण त्याजितमित्यर्थः । **द्वितीयमिति** । अनेन शास्त्रेण विनेया विषयं **प्रतिपद्यन्ते** प्रयोजनं च लभन्त इति द्वितीयं दूषयतीत्यर्थः । **अन्यथेति** । शास्त्रात् किं लब्धमिति वदतः शास्त्रं किमाप्तवाक्यतया विषयं प्रतिपादयेत् उतोपपत्तिव्युत्पादनेन । नाद्यः । आगमप्रामाण्याभ्युपगमप्रसङ्गादित्यादि प्रमेयसूचने तात्पर्याभावे नरैश्च किमित्येवावक्ष्यत् तावन्मात्रोक्तावपि प्रकृतस्य दर्शनेनेत्यस्य लब्धमित्यस्य चानुवृत्त्या शिष्यैश्च दर्शनेन किं लब्धमिति योजनायाः सम्भवादतः शास्त्रात् किमिति वदत उक्तप्रमेयसूचने तात्पर्यमस्तीति ज्ञायत इति भावः ।

श्रीनिधि०— उपोद्घातमिति । सूत्रं व्याप्य निवृत्तिप्रतिपादकतया व्याख्यातुं व्यापकनिवृत्तिं दृढयतीत्यर्थः । **विनेयाः** शिष्याः । 'सत्यं अप्राप्ते शास्त्रमर्थवदि'ति शास्त्रस्य प्रत्यक्षयोग्यार्थप्रतिपादकत्वेऽपि शास्त्ररचनातःपूर्वं प्रत्यक्षप्रवृत्तौ नियामकाभावात् । अनन्तरं प्रवृत्तस्य च संवादित्वमात्रं न विषयताविघातकत्वमित्यत आह **किञ्चेति** । अन्यस्याप्रमाणत्वादिति भावः । **तत्तु परेणेति** । प्रत्यवायानुसन्धान-

मित्यर्थः । अप्रत्यक्षत्वयुक्तेति भावः । **शङ्कोपरोधार्थकामोपभोग इति** । अर्थश्च कामोपभोगश्चेति विग्रहः । **कामः** कामितम् । **स्वयं वेति** । असङ्गत इत्युत्तरम् । तत्र ननु तर्कः स्वरूपेण न प्रमाणम् । तथा च कथं तत्प्रामाण्याभ्युपगमप्रसङ्ग इत्युच्यते । यत एव न प्रमाणं अत एवेदमनिष्टमापद्यत इति चेन्न । यदा तर्कव्युत्पादकत्वाङ्गीकारः तदा तत्प्रामाण्याङ्गीकारोऽपि स्यादित्यत्र व्यात्यभावात् । न्यायमते स्वशास्त्रस्य तर्कव्युत्पादकत्वाभ्युपगमे प्रामाण्यानभ्युपगमादित्यत आह **तस्यापीति** । यथानुमानं प्रमाणं तथा तर्कोऽपि प्रमाणम् । तदन्तर्भावात् तस्येति भावः ।

शे०वा०— व्याख्यातुमिति । स्वमतेनैव निष्फलमित्यादिनेति शेषः । **विनेयाः** शिष्याः । **आक्षेप इति** । परिहाराभावेन प्रश्नार्थत्वासम्भवादिति भावः । **विषयः प्रयोजनं चेति** । अर्यते ज्ञायत इति व्युत्पत्त्या विषयस्य, अर्थ्यते प्रार्थ्यत इति व्युत्पत्त्या प्रयोजनस्य च तेन लाभादिति भावः । **तदभावादिति** । अतीन्द्रियार्थसाधकप्रमाणाभावादिति भावः । लोकोपकार एव शास्त्रप्रणेतुः प्रयोजनमित्यभिप्रेत्य तस्य प्रयोजनतामुपपादयति **नन्विति** । **कृतघ्नतानिमित्तेति** । अनेन तावदस्माकं हितोपदेशेनोपकारः कृतः । अतः अस्माभिरप्ययं प्रत्युपकर्तव्यः अन्यथा कृतघ्नतानिमित्तप्रत्यवायः स्यादित्यनुसन्धाने सतीत्यर्थः । **अत्रापि पूर्ववदिति** । न तावदनेन शास्त्रेण नरैरतीन्द्रियार्थ उपलभ्यते प्रमाणाभावेन तदभावात् । नाप्यैन्द्रियकः, तस्य प्रत्यक्षगोचरत्वेन विषयत्वानुपपत्तेः । प्रयोजनमपि, न तावदतीन्द्रियं प्रमाणाभावेन तदभावात् । नाप्यैन्द्रियकं तस्य योग्यानुपलम्भबाधितत्वादिति पूर्ववदुत्तरमित्यर्थः । ननु धर्माद्यभावस्य प्रत्यक्षगोचरत्वात् कथं विषयत्वमित्यतः प्रत्यक्षत्वेऽपि तस्य वेदादिवाक्यजनितधर्मादिसद्भावभ्रान्त्या कलङ्कितत्वाद्विषयत्वमुपपन्नमित्याह **तस्येति** । **प्रयोजनं चेति** । नराणामिति शेषः । धर्मादिसद्भावभ्रान्त्या कामभोगादुपरुद्धानां धर्माद्यभावप्रतिपादनेन भ्रान्तौ निवृत्तायां यथेष्टकामोपभोग इत्यर्थः । **वैयर्थ्याच्चेति** । आप्तोक्तौ हेत्वाद्याकाङ्क्षानुदयादुदये वाऽऽप्तत्वव्याघातादिति भावः । कृतस्य चर्चस्योद्ग्राह्यत्वं परिहरति **तदिदमिति** । कथमेतावतोऽर्थस्य शास्त्रशब्देन सूचनमित्यतस्तद्ग्रहणसामर्थ्यादिति भावेन तदुपपादयति **अन्यथेति** । परिहासप्रकारमेवोपदर्शयति **शास्त्रप्रणेत्रेति** ।

वा०र०— शास्त्रीयविषयप्रयोजनज्ञानलाभौ हि शास्त्रसम्बन्धिन एव वाच्यावित्यतः तत्सम्बन्धिविनेयेषु इव प्रणेतर्यपि तत्सम्बन्धात् विकल्पप्रवृत्तिरिति भावेन विकल्पयति मूले **किमनेनेति** । **अर्यते ज्ञायते इति** । अत्र गत्यर्थात् अर्यतेः 'उषि कुषि गर्तिभ्यः स्थन्' इति उणादिसूत्रेण थन्प्रत्ययेऽर्थ इति भवति । अर्थत्वं अर्यता एव स्यात् इति युक्तिपादीयमूलटीकयोः स्पष्टमेतत् । **अर्थ्यते प्रार्थ्यते इति** । अत्र चार्थ उपयाञ्चायां इति प्रार्थनार्थात् अर्थधातोः कर्मणि पचाद्यचि प्रत्ययेऽर्थ इति रूपं ज्ञेयम् । प्रकृत लब्धं इत्येतत् लिङ्गविपरिणामानुसारेणानुवर्तते इत्याशयेनाह **लब्धमित्यनुवर्तते** इति मूलम् । किं च प्रत्यक्षेणेत्यादिदूषणस्यात्राप्रसक्तेः उपयुक्तातिदेशपरतया तत्त्वनिर्णयटीकाग्रन्थानुसारेण व्याचष्टे **न तावदिति** । **प्रत्यक्षगोचरत्वादिति** । चार्वाकिण

तथाभ्युपगतत्वात् इति भावः । तत्त्वनिर्णयटीकायां धर्मादिकपश्चादिभिरिव स्वभावत एव अप्रतिपन्नमिति किं तदभावप्रतिपादनेन इत्युक्तत्वेऽपि धर्माद्यभावस्य प्रत्यक्षगोचरताया एव फलतः प्राप्तेरिति ज्ञेयम् । निर्विषयत्वनिष्प्रयोजनत्वोभयपरतायाः इत्यस्य समाश्रयणीयत्वात् इत्युत्तरेणान्वयः । एवं तदुभयपरतायाः इत्यस्यापि । मूले **परिहार इति** । उपसर्गस्य घञ्मनुष्येषु बहुलं इति दीर्घविकल्पात् परीत्युपसर्गस्य घञि परतः ह्रस्वेन दीर्घेण च प्रयोगः साधुः । अत एव टीकायां ह्रस्वप्रयोगः ।

स०व्र०— उतेति । विषयं प्रतिपद्यते प्रयोजनं च लभते इत्यर्थः । **विषयप्रयोजने** शास्त्रसम्बन्धिन एव दृष्टे । स च (शास्त्रसम्बन्धी) द्विविधः । प्रणेता श्रोता चेति । तदभिप्रायेण विकल्पावकाशः । हितोपदेशेन जनानुराग एव प्रयोजनं भविष्यतीत्यभिप्रेत्य शङ्कत **नन्विति** । तस्य प्रयोजनत्वोपपादनाय 'जनानुरागप्रभवा' इत्यादि । निराकरोति **कृतघ्नतेति** । **परेणेति** । धर्माधर्मौ न स्त इति बोधितत्वादिति भावः । **पूर्ववदिति** । न तावदनेन नरैः शास्त्रेणातीन्द्रियार्थ उपलभ्यते तदभावात् । नाप्यैन्द्रियकः । तस्य प्रत्यक्षगोचरत्वेन विषयत्वानुपपत्तेः । नापि प्रयोजनमतीन्द्रियम् । तदभावात् । नाप्यैन्द्रियकम् । तस्य योग्यानुपलम्भबाधितत्वादिति पूर्ववदुत्तरमित्यर्थः । **शङ्का हीति** । शङ्काशब्देन विपरीतज्ञानमुच्यते । तद् द्विविधमित्यभिप्रायेणैवमुक्तम् । **तर्कव्युत्पादनमिति** । प्रमाणानुग्राहकप्रमाणतर्कव्युत्पादनं क्रियत इत्यर्थः । **तस्यापीति** । प्रमाणत्वमङ्गीकरणीयम् । अन्यथा शङ्कानिवर्तकत्वमेव न स्यात् । तथा च अपसिद्धान्त इति भावः । **शास्त्रादिति** । वक्तृश्रोतृप्रयोजनमुद्दिश्य प्रमाणान्तराप्राप्तमर्थं प्रतिपादयतां वाक्यानां समूहस्यैव शास्त्रशब्दार्थत्वेन वाक्यानां समूह इत्युक्त्या आप्तवाक्यतया, प्रतिपादयतामित्युक्त्या उपपत्तिव्याप्त्यादिनेत्यादि सूचितमिति भावः ।

विठ्ठल०— हीति तत्र हेतुरिति । ततश्च हि यस्मादर्थः विषयप्रयोजनरूपोऽर्थोऽस्य प्रणेतुः प्रत्यक्षगोचरः तेन कारणेन तेन प्रणेत्रा दर्शनिन शास्त्रेण कोऽर्थो लब्ध इति मूलयोजना । शास्त्रप्रणेता विषयं प्रतिपद्यते प्रयोजनं च लभते किमित्यन्वयः । विनेयाः शिष्याः प्रतिपद्यन्ते लभन्ते च । किमिति विपरिणामेनान्वयः । **उपदर्शयदिति** । शास्त्रमिति शेषः । योग्यानुपलम्भबाधो सिद्ध इति शङ्कते **ननु हितेति** । **कृतघ्नतानिमित्तेति** । परेणोपकारे कृते तदनुकूलानुरागपूर्वकप्रत्युपकाराकरणं कृतघ्नता तन्निमित्तः प्रत्यवायः स्यादित्यनुसन्धाने सति हितोपदेष्टरि जनानुरज्यन्ते । न चास्ति प्रत्यनुसन्धानं धर्माधर्माभावोक्त्या प्रत्यवायानुसन्धानस्य त्याजितत्वादिति भावः । **अत्रापीति** । विनेयनरैरपि न तावदतीन्द्रियोऽर्थ उपलभ्यते तदभावात् । नाप्यैन्द्रियकः प्रत्यक्षसिद्धत्वेन विषयत्वानुपपत्तेः प्रयोजनस्य चातीन्द्रियस्याभावात् । ऐन्द्रियकस्य योगानुपलब्धिबाधितत्वादित्युत्तरं ध्येयमित्यर्थः । शास्त्रपदसूचितां युक्तिं वक्तुमाह **स्यादेतदित्यादिना** । **वैदिकवासनेति** । धर्मादिसद्भावविषयकवेदज्ञानजनितवासनेत्यर्थः । धर्माद्यभावरूपविषयप्रतिपत्तिरेव न शास्त्राद्युज्यते प्रयोजनवशात्तु दूरनिरस्तेत्याशयेन परिहरति **मैवमिति** । **स्वयं वा** इत्यस्याप्तवाक्यत्वरूपेण वेत्यर्थः । शास्त्रस्यागमतयोपपत्तिरूपेण च शङ्कानिवारकत्वासम्भवेऽपि आहार्यारोपरूपतर्कव्युत्पादनेन सम्भवतीति शङ्कते

तर्केति । आहार्यारोपरूपत्वेऽपि तर्कस्य नाप्रामाण्यं दूषणानुमानत्वादित्याशयेन परिहरति **नेति** । **शास्त्रात्किमितीति** । **शिष्यते** यथावस्थितमेव प्रतिपाद्यते वस्तु अनेनेति व्युत्पत्त्या शास्त्रशब्देन प्रमाणत्वस्यैव सूचितत्वात् शास्त्रादित्यतिविस्तृतत्वस्यासूचितत्वात् उपपत्तिगर्भितत्वस्य सूचितत्वाच्चेति भावः । **उभयवाक्यशेष इति** । कोऽर्थ इत्यादिवाक्यस्य नरैः शास्त्रात् किमिति वाक्यस्य चेत्युभयवाक्यशेष इत्यर्थः । तद्व्यनक्ति **शास्त्रप्रणेत्रेति** ।

१०२ **सु०— किमतो यद्येवमित्यत आह स्वेति ।**

अनु०— स्वपरार्थविहीनत्वात्

'निष्फलं शास्त्रम्' इति वक्ष्यमाणं सिंहावलो(कनन्याये)कितेनानुवर्तते । तच्चोपलक्षणम्, निर्विषयं चेत्यपि द्रष्टव्यम् ॥ विषयप्रयोजनवत्त्वं हि स्वपरविषयप्रयोजनवत्तया व्याप्तम्, तृतीयप्रकाराभावात्, सर्वप्रकारपरित्यागेन सामान्यानवस्थानात् । ततश्च व्यापिकायाः स्वपरविषयप्रयोजनवत्ताया अभावात् तद्व्याप्तं विषयप्रयोजनवत्त्वमपि नास्तीत्यर्थः ।

अस्त्वेवं विषयप्रयोजनशून्यमस्मदीयं शास्त्रम् । ततः किमित्यतः सूत्रं व्याख्याति **स्वमतेनैवेति** ।

स्वमतेनैव निष्फलम् ।
किमित्युन्मत्तवच्छास्त्रं वृथा प्रलपति स्वयम् ।

यत एवं **स्वमतेनैव निष्फलं** निर्विषयं च । न केवलं परोपपादनेन । तस्माद् **वृथा** विषयप्रयोजनशून्यम् । यस्माद्वादिना चार्वाकेण प्रतिवादिभिश्च तदितरैः सर्वैर्विषयप्रयोजनशून्यतयाऽभ्युपगतम्, तस्माद्विषयप्रयोजनशून्ये(मेवे)त्यर्थः । यस्माद् **वृथा** तस्मात् तत् **शास्त्रं किमिति स्वयं** प्रेक्षावान् **प्रलपति** । प्रेक्षावता नारम्भणीयमिति यावत् । विषयप्रयोजनशून्यं चारभमाणो न लौकिको नापि परीक्षक इति **उन्मत्तवत्** उपेक्षणीयः स्यादिति ।

यद्वा निष्फलमिति प्रयोजनाभावाभिधानम्, वृथेति विषयाभाववचनम् । तथा चैवं सूत्रयोजना । न केवलं परोपपादनेन किन्तु स्वाभ्युपगमेऽप्यर्थाभावात् अनारम्भणीयं शास्त्रमि'ति शेष इति । अर्थाभावहेतोरसिद्धिपरिहाराय 'अभ्युपगमेऽपी'त्युक्तम् ।

परि०— निष्फलमित्यस्य विशेष्याकाक्षां पूरयति **निष्फलमिति** । स्वपरार्थविहीनत्वा-दित्यत्रार्थपदस्य विषयप्रयोजनरूपार्थद्वयमुपेत्य निष्फलं निर्विषयं च शास्त्रमित्यत्र हेतुं व्यनक्ति **विषयप्रयोजनवत्त्वं हीत्यादिना** । **सर्वप्रकारेति** । स्वपरविषयप्रयोजनवत्त्वरूपप्रागुक्तप्रकारद्वये-त्यर्थः । **सूत्रं व्याख्यातीति** । व्याख्याप्रकारश्चाग्रे व्यक्तः । यत्तच्छब्दाध्याहारेण मूलं योजयति **यत एवमिति** । एवकाराभिप्रायो **न केवलमिति** । स्वमतेनैव निष्फलमित्यस्य वृथेत्यस्य च हेतुहेतुमद्भावस्यास्फुटत्वाद्व्यनक्ति **यस्माद्वादिनेत्यादिना** । 'किमित्युन्मत्तवच्छास्त्रं वृथा प्रलपति स्वयमि'त्येतदपि यत्तच्छब्दप्रयोगेन योजयति **यस्माद्वृथेति** । निष्फलमित्येतन्निर्विषयमित्यस्य नोपलक्षकमिति भावेनाह **यद्वेति** । योजना तु प्राग्वदेवेति भावः । **अर्थाभावादिति** । विषय-प्रयोजनयोरभावादित्यर्थः ।

यादु०— एतदेव स्पष्टयति **यस्माद्वादिनेत्यादिना** । **स्वाभ्युपगमेऽपीति** । स्वाभ्युपगमेनापीत्यर्थः ।

वं०प०— तच्चेति निष्फलपदम् । **अभ्युपगमेऽपि** अभ्युपगमेनापीति यावत् । **इत्युक्तमिति** । स्वाभ्युपगमेनापीत्युक्त्या हेतोरङ्गीकृतत्वादित्यर्थः ।

श्रीनिधि०— स्वमतेनैव न केवलं परोपपादनेनेति । अतीन्द्रियस्य स्वरसत एवानभ्युपगमात् । ऐन्द्रियकस्य च बाधकेनानभ्युपगमादिति द्रष्टव्यम् । एवं सम्बन्धमुक्त्वा वाक्यार्थमाह । **यस्माद्वादिना चावकिण प्रतिवादिभिश्च तदितरैरिति** । ततः किमित्यस्य इदमित्याह **यस्माद्वृथा तस्माच्छास्त्रमिति** । स्वाभ्युपगमेऽप्यर्थाभावादनारम्भणीयमिति निमित्तसप्तमीयम् । अभ्युपगमेनापीत्यर्थः ।

शे०वा०— ननु स्वपरार्थविहीनत्वेऽपि विषयप्रयोजनवत्त्वसम्भवादप्रयोजकमेतदित्यतो व्यापकाभावेन व्याप्याभावस्य साधनादापादनाद्वाऽत्र व्याप्यव्यापकाभावानुपपत्तेरेव बाधकत्वान्न तदिति भावेन विषय-प्रयोजनवत्त्वस्य स्वपरविषयप्रयोजनवत्त्वेन व्याप्यव्यापकभावमुपपादयति **विषयप्रयोजनवत्त्वं हीति । निर्विषयं चेति** । अनेन मूले निष्फलमित्येतन्निर्विषयत्वोपलक्षणमित्युक्तं भवति । स्वमतेनैवेत्येवकारोऽप्यर्थ इति भावेन तदर्थमाह **न केवलमिति** । यत एवमित्यादिनोक्तमेव विशदयति **यस्माद्वादिनेत्यादिना** । उक्तयोजनायां निष्फलमित्यस्य निर्विषयत्वनिष्प्रयोजनत्वोभयपरतायाः, वृथेत्यस्य च तदुभयपरतायाः, निर्विषयत्वाद्यभ्युपगमेन

साक्षादेवानारम्भणीयत्वसाधनसम्भवे मध्ये निर्विषयत्वाद्यापादनस्य च समाश्रयणीयत्वात् स्पष्टं भाष्य-स्यास्वारस्यम् । उक्तप्रकारेणैव सूत्रयोजनाप्रसक्त्या तदस्वारस्यं च भवतीत्यतस्तदुभयस्वारस्यानुरोधेन प्रकारान्तरेण भाष्यं योजयति **यद्वेति** । तथाऽपि भाष्योक्तो हेतुहेतुमद्भावः कथमित्यतः सूत्रयोजनाप्रदर्शनेनैव तस्यापि सूचिततां मन्वानः सूत्रयोजनामेवाह **तथा चेति** । **स्वाभ्युपगमेऽपीति** । स्वाभ्युपगमेनापी-त्यर्थः । **अनारम्भणीयं शास्त्रमिति शेष इति** । इति शेषो भाष्यकारैः सूत्रे पूरित इत्यर्थः । अर्थाभाव-मात्रेण शास्त्रानारम्भणीयतासिद्धेः सूत्रेऽभ्युपगमेऽपीत्यनर्थकमित्यतोऽर्थाभावहेतोरसिद्धिपरिहारार्थत्वान्न तदित्याह **अर्थेति** ।

वा०र०— सर्वप्रकारेति मूलम् । परित्यागेन यत्सामान्यावस्थानं तदभावात् । यावत् विशेषं विना कृतं सामान्यं नाङ्गीकर्तुं शक्यमित्यर्थः । **किमित्यतःसूत्रमिति** । एतन्मतनिरासार्थं सूत्रमिति मूले उक्तेरतः इत्यस्येत्याशङ्कानिरासार्थं प्रवृत्तं यत्सूत्रं इति योज्यम् । **निर्विषयत्वमिति** । पूर्वमुपलक्षणस्योक्तत्वात् इहानुवादोपपत्तिः । अनादरणीयं शास्त्रमिति शेष इति पाठः । पूर्वप्रकृतानारम्भणीयत्वस्यैवानुपादेयत्वार्थक-स्यानुवादोऽयम् । अनारम्भणीय इति पाठस्तु पूर्वप्रकृतानुसारी । तदनुसारेण टीकायां अनारम्भणीयमित्येवा-नुवादः कृतः । यद्यपि भाष्येऽनारम्भणीयमित्युक्तिर्नास्ति तथापि किमिति प्रलपतीत्येतत्पूर्वं मूलोक्तरीत्यार्थतः तस्य लाभमाश्रित्य विशिष्टशेषोक्तिरिति ध्येयम् ।

विठ्ठल०— स्वपरेति । प्रणेतृशिष्याणां चेत्यर्थः । अत्र हेतुसाध्ययोरैक्यप्रतीतेर्हेतुहेतुमद्भावं स्पष्टयति **यस्माद्वादिनेति** । विषयादिशून्यत्वं साध्यम् । तथा उभयवाद्यभ्युपगमो हेतुरित्युक्तं भवति । यस्माद्वृथा तस्मात्तच्छास्त्रं किमिति स्वयमुन्मत्तवत्प्रलयतीति यत्तच्छब्दाध्याहारेणोत्तरार्धं योजयति **यस्माद्वृथेति** । **यद्वेति** । तथा चैवं योजना । स्वपरार्थविहीनत्वात् स्वमतेनैव निष्फलं निष्प्रयोजनं वृथा निर्विषयं च यतोऽतः उन्मत्तवत् स्वयं स्वशास्त्रं प्रणयतीति । न मायावादिव्याख्यान इवाभ्युपगमेऽपीत्यस्य वैय्यर्थ्यमित्याशयेन तत्सार्थक्यं दर्शयति **अर्थाभावहेतोरिति** ।

॥ इति अतीन्द्रियवस्त्वभावात् विषयप्रयोजनशून्यतया तच्छास्त्रस्यानारम्भणीयता ॥

* * *

॥ अथ देहभिन्नस्यात्मनोऽनुभवसिद्धत्वम् ॥
॥ अथ 'मम देह' इति प्रतीतेः भेदप्रतीतिपूर्वकत्वम् ॥

१०३ सु०— ननु च प्रमाणानुरोधि प्रयोजनम्; न पुनः प्रयोजनमनुरुध्य अप्रामा-णिकोऽप्यर्थोऽङ्गीकर्तुमुचितः, अतिप्रसङ्गात् । प्रमाणं च प्रत्यक्षमेव नान्यत् । न चैवं

लोकव्यवहारोच्छेदः, सम्भावनयैव तदुपपत्तेः; संवादेन च प्रामाण्याभिमानात् । प्रत्यक्षेण च देह एवात्मोपलभ्यते, 'गौरोऽहं जानामी'ति । तथा च कालान्तरभाविप्रयोजनान्वयिनः पुरुषस्य अभावात् कथं धर्ममोक्षाख्यं प्रयोजनमतीन्द्रियश्च विषयोऽङ्गीकर्तुं शक्यत इत्यत आह देहादिति ।

अनु०— देहादन्योऽनुभवत आत्मा भाति शरीरिणाम् ।
मम देह इति व्यक्तं ममार्थ इतिवत् सदा ॥

अनुभवतः पराभ्युपगतप्रामाण्येन प्रत्यक्षेणैव । 'मम देह' इति ह्यहङ्कारास्पदात्मसम्बन्धी देहः प्रतीयते । न चान्यताऽप्रतीतौ सम्बन्धप्रतीतिरुपपद्यते । यथा 'ममार्थ' इति प्रतीतौ भेदप्रतीतिपूर्वक एव सम्बन्धावभास इति ।

परि०— अतिप्रसङ्गादिति । तृषार्तस्य चैत्रस्य मरुदेशे पानीयसिद्ध्युपगमप्रसङ्गादित्यर्थः । **न चैवं लोकेति** । प्रत्यक्षादन्यस्याप्रामाण्ये घनगर्जितादिना वृष्ट्यादेः (व्यवहारः) शब्दप्रयोगानन्तरं प्रवृत्तिनिवृत्त्यादिव्यवहारो लोकसिद्धो न स्यादित्यर्थः । **संवादेनेति** । अर्थदृष्टिरूपसंवादेनेत्यर्थः । न चान्यताप्रतीताविति अन्यतायाः अप्रतीताविति पदच्छेदः । **सम्बन्धेति** । षष्ठी शेष इति सूत्रे स्वस्वामिभावादिरूपसम्बन्धे षष्ठ्याः विधानेन ममेति षष्ठ्या सम्बन्धप्रतीतिरिति भावः ।

यादु०— अतिप्रसङ्गादिति । देवदत्तपिपासानिवृत्त्यनुरोधेन मरावपि वारिसिद्धिप्रसङ्गादित्यर्थः । **न चैवं लोकेति** । प्रत्यक्षस्यैव प्रामाण्ये धूमदर्शनानन्तरं वह्न्यादिव्यवहारः, प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य तदर्थव्यवहारश्च लोके न स्यादित्यर्थः । **सम्भावनयेति** । सा च न प्रमाऽतस्तत्करणं न प्रमाणमिति भावः । **संवादेन चेति** । प्रवृत्तिसंवादेनेत्यर्थः ।

कं०रा०— न चैवमिति । प्रत्यक्षातिरिक्तस्याप्रमाणत्वे धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारो न स्यादिति । न च धूमदर्शनानन्तरमुत्पन्नया त्रयेणात्र वह्निना भवितव्यमित्युत्कटकोटिकसंशयरूपया सम्भावनयैव तदुपपत्तेरित्यर्थः । सम्भावनाया अप्रमाणत्वात् कथं तत्र प्रामाण्यबुद्धिरित्यत आह **संवादेनेति** ।

श्रीनिधि०— एवं सति विषयप्रयोजनत्वान्यथानुपपत्त्या धर्ममोक्षाख्यविषयप्रयोजने अङ्गीकर्तव्ये इत्युक्तम् । तत्र बाधकं परिहर्तुं उत्तरो ग्रन्थः प्रवृत्त इत्याह **ननु च प्रमाणानुरोधि प्रयोजनमिति** ।

शे०वा०— अतिप्रसङ्गादिति । देवदत्तपिपासानिवृत्त्यनुरोधेन मरावपि वारिसिद्धिप्रसङ्गादित्यर्थः । नन्वस्ति तावद्धूमदर्शनानन्तरं वह्निव्यवहारः प्रत्यक्षसिद्धस्यापह्नवायोगात् । तथा चास्ति वह्निज्ञानम् । तच्चानुमितिरेवेत्यनुमानप्रामाण्यमावश्यकम् । तथा प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य तदर्थव्यवहारोऽपि । तथा चास्ति संसर्गज्ञानम् । तच्च शाब्दमेवेति शब्दप्रामाण्यमपीति कथं प्रत्यक्षादन्यत्र प्रमाणमित्याशयेन शङ्कते **न च लोकेति** । **सम्भावनयेति** । तथा च सम्भावनाया उत्कटैककोटिकसंशयरूपत्वेनाप्रमाणत्वान्न तत्करणप्रामाण्यमित्यर्थः । ननु वह्न्यादिप्राप्त्यनन्तरं प्रमाणेनाहं प्रवृत्त इति व्यवहारोऽनुमानाद्यप्रामाण्ये न स्यादित्यत आह **संवादेन चेति** । प्रवृत्तिसंवादेनेत्यर्थः । मणिप्रभागोचरमणिज्ञानस्याप्रामाण्येऽपि संवादेन प्रामाण्याभिमानवदत्रापि तत्संवादेनैव प्रामाण्याभिमानः न तु प्रामाण्यात्, अन्यथाऽतिप्रसङ्गादिति भावः । **अनुभवत इति** । आद्यादित्वात्तृतीयान्तात्तसिरिति भावेनाह **प्रत्यक्षेणैवेति** ।

वा०र०— आद्यादित्वादिति । तस्यादितः उदात्तमिति सूत्रीयादितः इति तसि ज्ञापितं प्रति योगे पञ्चम्यास्तसिः इत्येतत्सूत्रीयाद्यादिभ्यः उपसङ्ख्यानं इति वार्तिकबलात् तसिरित्यर्थः । विशेषस्तु तत्र तत्र टीकाव्याख्यावसरेऽस्माभिर्निरूपितोऽवधेयः ।

स०व्र०— न पुनः प्रयोजनमनुरुद्ध्येति । उपलक्षणमेतत् अतीन्द्रियं विषयं चेत्यपि द्रष्टव्यम् । धर्ममोक्षाख्यं प्रयोजनम् । **अप्रामाणिकः** कालान्तरभाविप्रयोजनान्वयिपुरुषलक्षण इत्यर्थः । **न चैवमिति** । अनुमानं प्रमाणम्, आगमः प्रमाणमित्यादिलोकव्यवहारोच्छेद इति न चेत्यर्थः ।

विट्ठल०— अतिप्रसङ्गादिति । न हि देवदत्तस्य प्रयोजनमस्तीत्येतावता मरौ वारि सिद्ध्यतीति भावः । **न चैवं लोकेति** । प्रत्यक्षादन्यस्याप्रामाण्ये धूमदर्शनादिना अग्न्यादिव्यवहारस्य वाक्यश्रवणानन्तरमादानादिव्यवहारस्य चोच्छेदः स्यादित्यर्थः । **सम्भावनेति** । सम्भावनायाश्चाप्रमात्वान्न तत्करणं प्रमाणमिति भावः । **संवादेनेति** । प्रत्यक्षसंवादेनेत्यर्थः ।

॥ इति 'मम देह' इति प्रतीतेः भेदप्रतीतिपूर्वकत्वम् ॥

* * *

॥ अथ तत्र अस्याः प्रतीतेः व्यवहारमात्रत्वे कल्पकाभावः ॥
॥ अथ तत्रादौ सत्प्रतिपक्षत्वमभ्युपेत्य बाधकाभावापादनम् ॥

१०४ सु०— नन्वेवं प्रतिभास एव नास्ति, अपि तर्हि 'घटस्य स्वरूपमि'तिवद्व्यवहारमात्रम्; इति चेन्न कल्पकाभावात् । विपरीतप्रती(मि)तौ खल्वेवं कल्प्यते, न चैवं

प्रकृते ॥ कस्यचित्कदाचिदपि 'देहोऽहमि'ति प्रमाभावात् । तदिदमुक्तं शरीरिणां सदेति ॥ अत एव प्रतिभासोऽपि भ्रमोऽस्त्विति निरस्तम् ।

अस्ति 'गौरोऽहमि'ति प्रमेति चेन्न, प्रतिपक्षतया बाधकत्वानुपपत्तेः ।

परि०— प्रतिभासत्वेऽपि भ्रमत्वं किन्नेत्यत आह **अत एवेति** । विपरीतप्रमित्यभावादेवेत्यर्थः । विपरीतप्रमां शङ्कते **अस्ति गौरोऽहमिति** । **प्रतिपक्षतयेति** । मम देह इति प्रतिभासेनेति योज्यम् ।

यादु०— **बाधकत्वानुपपत्तेरिति** । परस्परं समबलत्वेन अधिकबलत्वेन अधिकबलत्वाभावादिति भावः ।

वं०प०— नन्वस्ति प्रतिभासस्तथाऽपि स भ्रम इति चेत् तत्राह **अत एवेति** । देहोऽहमिति बाधकप्रमाणाभावादेवेत्यर्थः । **अस्तीति** । मम देह इति प्रतीतिर्बाधिका विपरीतप्रमेत्यर्थः ।

कं०रा०— **अत एवेति** । विपरीतप्रमाविरहादेव मम देह इति भेदावभासोऽप्ययथार्थोऽस्त्वित्येतन्निरस्तमित्यर्थः । गौरोऽहमित्यात्मनि गौरवाश्रयदेहभेदप्रमितिसत्त्वान्न मद्देह इति भेदावभासस्य भ्रमत्वं कल्प्यत इति शङ्कते **अस्तीति** ।

शे०वा०— कथं तर्हि मम देह इति व्यवहार इति पृच्छति **अपि तर्हीति** । **व्यवहारमात्रमिति** । औपचारिको व्यवहार इत्यर्थः । कल्पकसद्भावाद्घटस्य स्वरूपमित्यस्य व्यवहारमात्रत्वेऽपि प्रकृते तदभावान्न व्यवहारमात्रत्वमाश्रयितुं शक्यमिति समाधत्ते **न कल्पकाभावादिति** । किं तत्कल्पकं यद्भावाभाभ्यामौपचारिकत्वतदभावव्यवस्थोच्यत इत्यतस्तदाह **विपरीतेति** । कथं प्रकृते तदभावो येनोक्तव्यवहारस्य व्यवहारमात्रत्वानुपपत्तिः स्यादित्यतः किमत्र देहोऽहमित्याकारा विपरीतप्रमितिरभिमता, किं वा गौरोऽहमित्याकारेति विकल्पद्वयं मनसि निधायाद्यमसिद्ध्या दूषयति **कस्यचिदिति** । **तदिदमुक्तं शरीरिणां सदेतीति** । सदेत्यनेन कदाचिदित्यर्थस्य, शरीरिणामिति बहुवचनेन कस्यचिदित्यर्थस्य, शरीरिणां शरीरसम्बन्धिनामिति शरीरसम्बन्धप्रतीतिसद्भावोपपादनेन देहोऽहमित्यभेदप्रमाऽभावस्य च सूचितत्वादित्यर्थः । **अत एवेति** । देहोऽहमिति विपरीतप्रमाभावादेव मम देह इति प्रत्ययो भ्रान्तिरित्यपि प्रत्युक्तमित्यर्थः । द्वितीयं शङ्कते **अस्तीति** । **सत्प्रतिपक्षतयेति** । मम देह इति गौरोऽहमिति च प्रतीतिद्वयस्य प्रत्यक्षत्वाविशेषेण समानबलत्वाद्बाधकत्वोपयोगिन्या अधिकबलताया गौरोऽहमित्यस्यां प्रमायामनिरूपणादिति भावः ।

वा०र०— व्यपदेशमात्रमिति मूलस्यार्थानुवादो **व्यवहारमात्रमिति** प्रतीकोपादानम् । क्वचित् मूले व्यवहारमात्रमित्यपि पाठः तदा यथाश्रुतानुवाद एवेति ज्ञेयम् । सदेतीत्येवशब्दद्वययुक्तं प्रतीकोपादानम् । **कदाचिदित्यर्थस्येति** सूचितत्वादिति वक्ष्यमाणेनान्वयः । एवमुत्तरत्रापि । उपलक्षणं चेदम् । अपीत्यपि सोपस्काराणीति न्यायेन लभ्यत इत्यपि ज्ञेयम् । तदनेन कदाचित् कस्यचित् देहोऽहं इति प्रमा नास्तीत्युक्तं भवतीति दर्शितं भवति ।

स०व्र०— **तदिदमुक्तमिति** । शरीरिणां शरीरसम्बन्धिज्ञानवतामित्यनेन अहङ्कारास्पदात्मसम्बन्धिदेहः प्रतीयते इत्येतत्सूचितम् । शरीरिणामिति बहुवचनेन च कस्यचिदपि, सदेत्यनेन कदाचिदपीत्येतत्सूचितमिति भावः । **अत एवेति** । देहोऽहमितिविपरीतप्रमाऽभावादेवेत्यर्थः ।

विट्ठल०— प्रतिबन्दीं मोचयति **विपरीतेति** । एतत्स्वरूपं घट एवेति भेदविपरीतैक्यप्रतिपत्ता-वित्यर्थः । सम्बन्धावभासो भ्रमोऽस्त्वित्यत आह **अत एवेति** । विपरीतप्रमितिरूपबाधकाभावादेवेत्यर्थः । बाधकप्रत्ययमाशङ्कते **अस्तीति** ।

॥ इति सत्प्रतिपक्षत्वमभ्युपेत्य बाधकाभावापादनम् ॥

* * *

॥ अथ तत्रान्ते सत्प्रतिपक्षत्वाभावस्यापि दर्शनम् ॥

१०५ सु०— किञ्च नायं देहात्मतावभासः, किन्तु देहधर्मस्यात्मधर्मतावभासः, न च व्यधिकरणयोर्विरोधोऽस्ति; तदभावे कथमसाविति चेत् । किमेतदनुमानमर्थापत्तिर्वा प्रश्नमात्रं वा । न प्रथमद्वितीयौ, अपसिद्धान्तात्, स्फटिकजपाकुसुमयोरभेदाप्रतिभासेऽपि तद्धर्मस्य तत्र प्रतीतिदर्शनाच्च । तृतीये तु वक्ष्यते ।

परि०— तावता न देहा(न्यात्मत्व)दनन्यत्वसिद्धिरित्यनुशयादाह **किञ्चेति** । **देहात्मतेति** । देहस्यात्मतावभास इत्यर्थः । **देहधर्मस्येति** । गौररूपस्येत्यर्थः । तावता कथं न प्रतिपक्षतेत्यत आह **न च व्यधिकरणयोरिति** । भिन्नविषययोर्मम देह इति गौरोऽहमिति च प्रतिभासयो-रित्यर्थः । मम देह इत्यस्य देहात्मरूपधर्मिभेदग्राहित्वात् । गौरोऽहमित्यस्य चान्यधर्मस्यान्य-धर्मतावगाहित्वादिति भावः । **तदभाव इति** । देहात्मरूपधर्मिणोरैक्यावभासाभावेऽन्यधर्मस्यान्य-धर्मतावभासो वा कथमिति शङ्कार्थः । **स्फटिकेति** । जपाकुसुमनिष्ठलौहित्यरूपधर्मवत्तया स्फटिक-

स्यावभासमानत्वेऽपि तदभिन्नत्वावभासाभावादित्यर्थः । **तृतीये वक्ष्यत इति** । 'उपचारश्च कृष्णोऽहमिति कर्दमलेपन' इत्यदिना तृतीयाध्याये भक्तिपादे वक्ष्यत इत्यर्थः ।

गु०दी०— तदभावे कथमसौ इत्यत्र धर्म्यैक्यारोपाभावे । **असौ** धर्मारोप इत्यर्थः ॥

यादु०— व्यधिकरणयोरिति । भिन्नधर्मिकयोरित्यर्थः । मम देह इत्यत्र हि धर्मिणोर्देहात्मनो-र्भेदः प्रतीयते । गौरोऽहमित्यत्र च तद्धर्मैक्यमतो भिन्नधर्मिकत्वमिति भावः । ननु गौरोऽहमित्यत्र धर्मिणोरैक्यमपि प्रतीयत इत्यवश्यमङ्गीकार्यं तदभावे धर्मैक्यावभासस्याप्यसम्भवादित्याशङ्कते **तदभाव इति** । देहस्यात्मतावभासाभाव इत्यर्थः । **वक्ष्यत इति** । गौरोऽहमिति व्यवहारमात्रं न देहधर्मस्यात्मधर्मता-भासो येन तदर्थं धर्म्यैक्यावभासापेक्षा स्यादित्युत्तरम् 'उपचारश्च कृष्णोऽहमिति कर्दमलेपन' इत्यादिना तृतीयाध्याये वक्ष्यत इत्यर्थः ।

वं०प०— अनुमानमिति । आत्मदेहावभिन्नावेकधर्मवत्त्वेन प्रतीयमानत्वात् । यत्रैकधर्मत्वप्रतीति-स्तत्र धर्मिणोरैक्यमित्यनुमानमित्यर्थः । आत्मनि देहधर्मप्रतिभासान्यथाऽनुपपत्त्या देहात्मैक्यं स्वीकार्यमित्यर्था-पत्तिः । अनुभवाच्चेत्यनन्तरं मम देह इत्यस्याः प्रतीतेः प्रत्यक्षरूपतासिद्धिरिति शेषः ।

कं०रा०— ननु गौरोऽहमिति देहधर्मस्यात्मधर्मतावभास एव मम देह इति भेदज्ञानस्य बाधकोऽस्त्वित्यत आह **न चेति** । भिन्नविषययोरात्मनि देहभेदतद्धर्मावभासयोर्विरोधाभावान्न बाध्यबाधक-तेति भावः । देहात्मनोरभेदावभासाभावे देहं धर्मस्यात्मधर्मत्वावभासत्वानुपपत्तेः सोऽङ्गीकार्य इति शङ्कते **तदभाव इति** ।

श्रीनिधि०— न च व्यधिकरणयोरिति । भिन्नविषयकयोरित्यर्थः । प्रतियोगितदभावाविषयकयो-रिति यावत् । **तदभावे** देहात्मावभासाभावे । **असौ** देहधर्मस्यात्मधर्मतावभासः । न हि शुक्तिरजतयोरभेदेन भासमाने रजतत्वस्य शुक्तावारोपस्सम्भवतीत्यत्रेति भावः । **तृतीये तु वक्ष्यत इति** । व्याप्तत्वादात्मनो देहे व्यवहारेष्वपाटवात् । भेदज्ञानेऽपि चाङ्गारवह्निवत् स्वाविविक्तवद्भवन्ति व्यवहाराश्चेत्यत्रेति भावः ।

शे०वा०— अङ्गीकृत्यैव सत्प्रतिपक्षत्वं बाधकत्वं न सम्भवतीत्युक्तम् । वस्तुतस्तु सत्प्रतिपक्षत्व-मपि न तस्य सम्भवतीत्याह **किञ्चेति** । **व्यधिकरणयोरिति** । भिन्नविषयकयोरित्यर्थः । मम देह इत्यत्र धर्मिणोर्देहात्मनोर्भेदावभासाद्गौरोऽहमित्यत्र चात्मनि देहधर्मवत्त्व(स्य)प्रतिभासात् तयोर्भिन्नविषयत्वमिति भावः । ननु देहात्मनोरैक्यानवभासे देहधर्मस्यात्मनि प्रतिभासासम्भवाद्गौरोऽहमित्यस्यां प्रतीतौ देहात्मनोरभेदस्यापि भानसिद्धेरस्त्येव समानविषयत्वमिति कथं न विरोध इति शङ्कते **तदभाव इति** । **किमेतदिति** । यत

यन्निष्ठधर्मवत्तयाऽवभासते तत्तदभिन्नमित्येतदित्यर्थः । **अपसिद्धान्तादिति** । तथा सत्यनुमानार्थापत्तिप्रामाण्य-प्रसक्तेरिति भावः । ननु च सम्भावनयैवायमपि व्यवहारः, संवादेन च प्रामाण्याभिमान इति नापसिद्धान्त इत्यरुचेराह **स्फटिकेति** । **वक्ष्यत इति** । गौरोऽहमिति व्यवहारमात्रं, न तु देहधर्मस्यात्मधर्मतावभासः, ततो न तस्य देहात्मनोरैक्यावभासत्वं कल्प्यमित्युत्तरम् 'उपचारश्च कृष्णोऽहमिति कर्दमलेपन' इत्यादिना तृतीयस्य द्वितीये वक्ष्यत इत्यर्थः ।

वा०र०— अङ्गीकृत्यैव सत्प्रतिपक्षत्वमिति । मम देहः इत्येवंरूपप्रतिपक्षयुक्तत्वं गौरोऽहं इति प्रत्ययस्याङ्गीकृत्येवेत्यर्थः । तयोर्भिन्नविषयत्वे प्रतिपक्षतद्भावायोगः इति भावः । **वक्ष्यत इतीति** प्रतीकोपादानानन्तरं अङ्गीकृत्येदम् । किन्तु देहधर्मस्यात्मधर्मतावभासः इत्युक्तम् । वस्तुतस्तु गौरोहं इतीत्यादि पाठः स्वरस एव । पाठाभावे वा गौरोहं इति इत्यतःप्राक् प्रागुक्तविधया शेषः पूरणीयः । तेन मूले देहधर्मस्य आत्मधर्मतावभासः इत्यङ्गीकृत्य आत्मदेहैक्यावभासाभावे स कथं इत्येव प्रश्नेऽङ्गीकृततदवभासत्यागेनोप-चारित्वोक्तिः युक्तेति शङ्काऽपहस्तिता भवतीति ज्ञेयम् ।

स०व्र०— तदभावे कथमिति । देहात्मनोरैक्याभावे देहधर्मस्यात्मधर्मतावभासः कथमित्यर्थः । **किमेतदिति** । यत् यन्निष्ठधर्मवत्तया अवभासते तत् तदभिन्नमित्येतदित्यर्थः । **अपसिद्धान्तादिति** । तयोः प्रामाण्यानभ्युपगमादित्यर्थः । **स्फटिकेति** । जपाकुसुमनिष्ठलौहित्यलक्षणधर्मवत्तया अवभासमानत्वेऽपि तदभिन्नत्वाभावादित्यर्थः । मम देह इत्यस्य व्यवहारमात्रत्वानुपपत्त्या प्रतीतित्वसिद्धावपि प्रत्यक्षत्वं कुत इत्यर्थः ।

विठ्ठल०— तथापि संशयेन न देहातिरिक्तात्मसिद्धिरित्यत आह **किञ्चेति** । तावता कथं न प्रतिपक्षेत्यत आह **न च व्यधिकरणयोरिति** । भिन्नविषयकयोरित्यर्थः । मम देह इत्यत्र धर्मिणोर्देहात्मनोर्भेदः प्रतीयते गौरोऽहमित्यत्र तु देहधर्मस्यात्मधर्मतावभासते अतो भिन्नविषयकत्वमिति भावः । ननु धर्मिणोरैक्यावभासाभावे धर्मैक्यावभासोऽपि न युज्यते । तयोस्समानसंवित्संवेद्यत्वादिति शङ्कते **तदभाव इति** । **वक्ष्यत इति** । 'उपचारश्च कृष्णोऽहमिति कर्दमलेपन' इति भक्तिपादे ।

॥ इति सत्प्रतिपक्षत्वाभावस्यापि दर्शनम् ॥

॥ इति अस्याः प्रतीतेः व्यवहारमात्रत्वे कल्पकाभावः ॥

* * *

॥ अथ तत्र अस्याप्रतीतेः प्रत्यक्षत्वसमर्थनम् ॥

१०६ सु०— अस्तु प्रतीतिः, प्रत्यक्षमिति तु कुतः । अबाधप्रतिभासस्य प्रत्यक्षादन्यस्य परेणानभ्युपगमात् । अभ्युपगमे वा प्रामाण्यापरिहारात्, अपरोक्षतयाऽनुभवाच्च । तदिदमुक्तं व्यक्तमिति ।

न च तदेवासिद्धम्, लिङ्गाद्यनुसन्धानाभावेऽपि भावात् । अन्यथा देहप्रतिभासस्यापि तन्न स्यात् । एतदप्युक्तं सदेति ।

केचिदाहुः 'देहात्मभेदज्ञानं समाधिपरिपाकवतामेवे'ति । तदसत्, आऽविपालगोपालं 'मम देह' इति प्रतिभासस्यानपलपनीयत्वात् । अत एवाह शरीरिणां अ(शरीरा)भिमानिनामिति ।

परि०— अस्तु प्रतीतिरिति । मम देह इत्यस्याः प्रतीतित्वेऽतिप्रत्यक्षप्रतीतित्वं कुत इत्यर्थः । **प्रामाण्यापरिहारादिति** । अबा(धादे)ध्यत्वादेवेति भावः । **तदेवेति** । अपरोक्षानुभवत्वमेवासिद्धमित्यर्थः । **तन्न स्यादिति** । प्रत्यक्षत्वं न स्यादित्यर्थः । **सदेतीति** । लिङ्गाद्यननुसन्धानदशायामपीति तस्यार्थ इति भावः ।

यादु०— व्यक्तमित्यस्याशयं वक्तुं शङ्कते **अस्तु प्रतीतिरिति** । मम देह इति प्रतीतिरेवास्तु न व्यवहारमात्रमित्यर्थः । उत्तरमाह **अबाधेति** । **प्रामाण्यापरिहारादिति** । अबाधितत्वादेवेति भावः । **तदेवेति** । अपरोक्षत्वापरपर्यायं व्यक्तत्वमित्यर्थः । **सदेतीति** । सदेत्यनेन लिङ्गाद्यनुसन्धानाभावकालस्याप्युक्तत्वादिति भावः ।

वं०प०— तदेव । अपरोक्षतयाऽनुभूयमानत्वमेव । **अन्यथा** लिङ्गाद्यनुसन्धानाभावेऽपि जायमानायाः प्रतीतेर्यदि प्रत्यक्षरूपत्वं नेत्यर्थः । **केचित्** तार्किकाः । **आ अविपालेति** पदच्छेदः, अविपालगोपालमारभ्येत्यर्थः । **शरीराभिमानिनां** मूर्खाणामविपालादीनामपीत्यर्थः ।

कं०रा०— अस्तु मम देह इति देहात्मनोर्भेदप्रतीतिः सा प्रत्यक्षरूपेति तु कुत इति शङ्कते **अस्त्विति** । **अन्यथेति** । लिङ्गाद्यनुसन्धानाभावेऽपि जायमानस्य मम देह इति भेदज्ञानस्यापरोक्षत्वाभावे देहप्रतिभासस्याप्यपरोक्षत्वं न स्यादित्यर्थः ।

श्रीनिधि०— प्रामाण्यापरिहारादिति । अबाधप्रतिभासत्वादिति भावः । **न च तदेवेति** । अपरोक्षतयानुभूयमानत्वमेवेत्यर्थः । **समाधिपरिपाकवताम्** ध्यानपरिपाकवताम् ।

शे०वा०— मम देह इति प्रत्ययस्य व्यक्तत्ववर्णनानर्थक्यमाशङ्क्य, उक्तप्रत्ययस्य प्रामाण्योपपादक-प्रत्यक्षत्वसमर्थनार्थत्वान्न तदिति भावेन तस्याप्रत्यक्षत्वशङ्कामुत्थापयति **अस्तु प्रतीतिरिति** । कल्पकाभावेन व्यवहारमात्रत्वानुपपत्तेर्मम देह इत्यस्तु प्रतीतिरित्यर्थः । **कुत इति** । न कुतोऽपीत्यर्थः । तथा च प्रत्यक्ष-त्वासिद्ध्या तत्प्रामाण्यासिद्धेर्न तेन देहात्मभेदसिद्धिरिति भावः । परिहरति **अबाधेति** । अस्य चोक्तरीत्या-ऽबाधप्रतिभासत्वादिति भावः । **अभ्युपगमे चेति** । अबाधप्रतिभासस्य प्रत्यक्षादन्यस्याप्यभ्युपगमादित्यर्थः । **प्रामाण्यापरिहारादिति** । प्रामाण्यं विनाऽबाधप्रतिभासस्यासम्भवादित्यर्थः । तथा च प्रत्यक्षातिरिक्तस्यापि प्रामाण्यापातात् प्रत्यक्षमेकमेव प्रमाणमिति सिद्धान्तभङ्गः परस्य । तेनैव च प्रमाणेन देहात्मभेदसिद्ध्युप-पत्तेरिष्टसिद्धिश्चास्माकमिति भावः । अस्त्वेवमङ्गीकारे परस्यापसिद्धान्तः, तथाऽपि त्वदभिमतस्य देहात्मभेद-प्रत्यक्षत्वस्यासिद्धिरेवेति कथमिष्टसिद्धिरित्यत आह **अपरोक्षतयेति** । मूले सदापदस्य प्रकारान्तरेण सार्थक्यं तद्ध्यावर्त्यशङ्काप्रदर्शनेन दर्शयति **न चेति** । **तदेवेति** । अपरोक्षत्वरूपं व्यक्तत्वमित्यर्थः । **तत्** अपरोक्षत्वम् । **सदेतीति** । सदेत्यनेन लिङ्गाद्यनुसन्धानाभावकालस्याप्युक्तत्वादिति भावः । शरीरिणामिति विशेषणस्य मता-न्तरनिरासोऽपि प्रयोजनमिति भावेन तदुपन्यस्यति **केचिदिति** । **आऽविपालगोपालमिति** । आ अविपाल-गोपालेभ्य इति आविपालगोपालमित्यभिविध्यर्थकस्याङः 'आङ्मर्यादाभिविध्योरि'त्यव्ययीभावसमास इति भावः ।

वा०र०— **अव्ययीभावसमास इति** । आबालेभ्यो हरिभक्तिः इत्यत्रैवेति भावः । अत्र प्रकरणे देहात्मैक्यनिराकरणपरमात्मतत्त्वविवेकग्रन्थोऽपि निष्कास्योऽस्ति ।

स०व्र०— **अभ्युपगमे वेति** । अबाधप्रतिभासस्य प्रत्यक्षादन्यस्याभ्युपगमे तस्य प्रामाण्य-स्यावश्यकत्वादित्यर्थः । **न च तदेवेति** । अव्यक्तत्वमेवेत्यर्थः । **अन्यथेति** । देहात्मनोरैक्यप्रतिभासः गौरोऽहमिति प्रतिभासः तस्येत्यर्थः । **एतदप्युक्तं सदेति** । **सदा** लिङ्गानुसन्धानाभावेऽपीत्यर्थः । प्रसङ्गात् तार्किकाणां समाधानप्रकारं निराकरोति **केचिदिति** ।

विट्ठल०— मम देह इति प्रतीतेरेवास्तु सा च प्रतीतिः प्रत्यक्षरूपं प्रमाणमित्येतत्कुत इति शङ्कते **अस्त्विति** । तदुत्तरतया व्यक्तमित्येतत्सङ्गमयितुमाह **अबाधेति** । **प्रामाण्यापरिहारादिति** । अबाधित-प्रतिभासस्य प्रामाण्यध्रौव्यादित्यर्थः । **तदेव** इत्यपरोक्षानुभवत्वमेवेत्यर्थः । **सदेतीति** । लिङ्गाद्यनुसन्धानभाव-दशायामपीत्यर्थ इति भावः ।

॥ इति अस्याप्रतीतेः प्रत्यक्षत्वसमर्थनम् ॥
॥ इति देहभिन्नस्यात्मनोऽनुभवसिद्धत्वम् ॥

* * *

॥ अथ चार्वाकमतनिरासे अर्थकामातिरिक्तपुरुषार्थतत्साधकवेदानुमानयोः प्रामाण्यसाधनम् ॥
॥ अथ तत्रादौ प्रत्यक्षप्रामाण्यसाधकप्रमाणेनैव वेदादीनामपि प्रामाण्यसिद्धिः ॥

१०७ **सु०**— नन्वस्त्वात्मा देहातिरिक्तस्तथाऽप्यर्थकामातिरिक्ते पुरुषार्थे तत्साधनादौ च किं मानम् । वेदादिरागमोऽनुमानं चेति वदामः । तस्य प्रामाण्यमेव कुत इति चेत्, तत्राह **प्रत्यक्षस्यैवेति** ।

अनु०— प्रत्यक्षस्यैव मानत्वमिति केनावसीयते ।

यत्परेणाभ्युपगतमर्थादि तत्कुतः सिद्धमिति वक्तव्यम् । प्रत्यक्षेणेति चेत्, **प्रत्यक्षस्य मानत्वमित्येव केनावसीयते** । तथा च पुरुषार्थतत्साधनमात्रासिद्धौ जगदनीहमापद्येतेति ।

'प्रत्यक्षज्ञानं तावत् प्रतीयते, प्रामाण्यं च ज्ञानग्राहकमात्रग्राह्यम्; अतः कथमुक्तो दोषः । प्रामाण्यपरतस्त्ववादेऽपि बाधकाभावादिना प्रत्यक्षप्रामाण्यसिद्धिरि'त्यत आह **यदीति** ।

यदि तत्साधकं वेदप्रामाण्ये न कथं भवेत् ।

यदि प्रत्यक्षज्ञानप्रामाण्यस्य ज्ञानग्राहकं वा बाधकाभावादिकं वा **साधकम्** उच्यते । तर्हि **तत् एव वेदप्रामाण्यविषये कथं साधकं न भवेत्** । न हि वेदवाक्याज्ज्ञानं नोत्पद्यते, न च न प्रतीयते ।

अत्र वेदग्रहणमुपलक्षणम् । अत एव 'अन्या' इति सामान्येन वक्ष्यति ।

परि०— मूलं सङ्गमयितुमाह **यत्परेणेति** । **अर्थादीति** । अर्थकामौ । एवकारं भिन्नक्रमं मत्वा योजयति **इत्येवेति** । **अनीहम्** प्रवृत्तिरूपचेष्टाहीनमित्यर्थः । **बाधकाभावादिनेति** । संवाद आदिपदार्थः । **उपलक्षणमिति** । अनुमानस्येति भावः ।

वं०प०— **उक्तो दोष इति** । तथा च तेनैव पुरुषार्थादिसिद्धिसम्भवाज्जगदनीहमापद्येत इत्युक्तदोषः कथं इत्यर्थः ।

कं०रा०— वेदप्रामाण्यविषय इति । वेदजन्यज्ञानप्रामाण्यविषय इत्यर्थः ।

श्रीनिधि०— तथा चेति । न हि प्रत्यक्षस्यैव मानत्वमित्येतत् प्रत्यक्षविषय इति भावः । **अनीहम्** इच्छारहितम् । **उपलक्षणमिति** । अनुमानस्यापीति भावः ।

शे०वा०— ननु 'प्रत्यक्षस्यैव मानत्वमि'ति प्रत्यक्षाप्रामाण्यव्युत्पादनमनर्थकम् । न चानुमानागमयोरप्रामाण्ये प्रत्यक्षस्याप्यप्रामाण्यं स्यादिति प्रतिबन्दीग्रहणरूपत्वेनास्यानुमानागमप्रामाण्यसमर्थनार्थत्वान्नानर्थक्यमिति वाच्यम् । 'देहादन्योऽनुभवत आत्मा भाति शरीरिणामि'त्यादिना प्रत्यक्षबलेनैव देहात्मभेदस्य समर्थनेनानुमानाद्यवष्टम्भेन तदसाधनान्निर्बीजतयाऽनुमानागमाप्रामाण्यशङ्काया एवानुत्थानेन प्रतिबन्दीग्रहणत्वायोगादित्यतो 'देह आत्मा पुमर्थश्च कामार्थाभ्यां विना न ही'ति परोक्तनिरासाय देहात्मभेदस्येव स्वर्गापवर्गयोरपीह साध्यतया प्रस्तुतत्वात् तयोश्च प्रत्यक्षेण साधयितुमशक्यत्वादनुमानागमाभ्यामेव साधनीयत्वेन तदप्रामाण्यशङ्कोदयेन, उक्तरीत्या प्रतिबन्दीग्रहणस्योपपन्नत्वाददोष इति भावेनानुमानाद्यप्रामाण्यशङ्कानिरासपरतयोत्तरभाष्यं योजयितुं स्वर्गापवर्गयोरप्रामाणिकत्वशङ्कामुत्थापयति **नन्विति** । **किं मानमिति** । मोक्षो हि नाम परमानन्दावाप्तिविशिष्टात्यन्तिकी दुःखनिवृत्तिः । तत्र न तावत्प्रत्यक्षं प्रमाणम् । परपुरुषवर्तिनोः परमानन्ददुःखाभावयोः परप्रत्यक्षस्य सामर्थ्याभावात् । स्वनिष्ठस्तु तदभाव एव प्रत्यक्षेणेक्ष्यते । नापि प्रत्यक्षादन्यत् । तत्प्रामाण्यस्यासिद्धेः । एवं तत्साधनादावपीति शङ्कितुर्गूढोऽभिसन्धिः । गूढाभिसन्धिरेवोत्तरमाह **वेदादिरागम इति** । 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति', 'आत्मेत्येव परं देवमुपास्य हरिमव्यम् । केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन' इत्यादिश्रुतिस्मृत्यादिरूप इत्यर्थः । **अनुमानं चेति** । यागादिप्रवृत्तिः सफला प्रेक्षावत्प्रवृत्तित्वात्, कृष्यादिप्रवृत्तिवदिति स्वर्गे; अपवर्गे त्विहामुत्र फलभोगवैराग्यवतां योगिनां प्रवृत्तिः, सफला, प्रेक्षावत्प्रवृत्तित्वात् सम्मतवदित्यनुमानं चेत्यर्थः । यद्यपि प्राकृतानां प्रत्यक्षं न स्वर्गमोक्षादिकं गोचरयितुं क्षमते । तथाऽपि महत्तमपुरुषप्रत्यक्षेण मोक्षादिनिश्चयो युज्यत एवेति पराभ्युपगतप्रामाण्यं प्रत्यक्षमेवात्र साधकतया वक्तुं शक्यते । यद्वक्ष्यति 'घटते मुक्तिदृष्टिस्तु पुरुषेण महीयसा' इत्यादि । तथा च तत्परित्यागेन शब्दानुमानयोरुपन्यासो यद्यपि न युक्तः तथाऽपि तदीयप्रत्यक्षस्याप्यन्येषामसिद्ध्या तदवगमकतयापि तद्वाक्यादेरनुसरणीयत्वेन आवश्यकत्वात् लाघवाच्च प्रत्यक्षपरित्यागेनागमानुमाने एवोपन्यस्ते इति द्रष्टव्यम् । अर्थादीत्यादिपदेन कामस्यार्थकामसाधनस्य च परिग्रहः । अस्तु प्रत्यक्षस्यापि प्रामाण्यानिश्चयः किं तावताऽपीत्यत आह **तथा चेति** । **अनीहं** लौकिकालौकिकप्रवृत्तिशून्यं प्रवर्तकीभूतेष्टसाधनताज्ञानशून्यत्वादिति भावः । यदीत्युत्तरभाष्यानर्थक्यमाशङ्क्य वैषम्यशङ्कानिरासेनोक्तप्रतिबन्दीसमर्थनार्थत्वान्न तदिति भावेन तन्निरासपरतयोत्तरभाष्यं योजयितुं वैषम्यशङ्कामुत्थापयति **प्रत्यक्षज्ञानमिति** । **अतः कथमिति** । प्रत्यक्षेणैवार्थकामयोस्तत्साधनानां च सिद्धिसम्भवान्नानीहत्वप्रसङ्ग इत्यर्थः । न्यायमतमाश्रित्यापि प्रामाण्यनिश्चयमुपपादयति **प्रामाण्येति** । आदिपदेन दोषा-

भावपरिग्रहः । स्वतस्त्वपक्षमनुरुद्ध्याह **ज्ञानग्राहकमिति** । परतस्त्वपक्षमाश्रित्याह **बाधाभावादिकं चेति** । वेदप्रामाण्य इति विषयसप्तमीति भावेनाह **प्रामाण्यविषय इति** । **ज्ञानमिति** । वाक्यार्थज्ञानमित्यर्थः । न हि सत्यां सामग्र्यां कार्यानुदयः । अन्यथाऽतिप्रसङ्गादिति भावः । **न प्रतीयत इति** । प्रतीतिसामग्रीसत्त्वेन तदभावायोगादिति भावः । **उपलक्षणमिति** । पौरुषेयागमानुमानयोरिति शेषः । वेदग्रहणस्य वेदमात्रपरत्व-मेवास्तु किमितरोपलक्षणत्वाश्रयणेनेत्यत आह **अत एवेति** । **वक्ष्यतीति** । 'न चान्यामानते'त्युत्तरवाक्य इति शेषः ।

वा०र०— प्रतिबन्दीग्रहणत्वायोगात् इति । प्रत्यक्षस्यैवेति वाक्यस्य प्रतिबन्दीग्रहणरूपत्वा-योगाच्चेत्यर्थः । चशब्दयुक्तपाठस्तु स्वरस एव । प्रतिबन्दीग्रहणस्यैवायोगेन प्रतिबन्दीग्रहणरूपत्वायोगादिति भावः । वक्ष्यति च **प्रतिबन्दीग्रहणस्योपपन्नत्वात् अदोष इतीति** । **इति स्वर्ग इति** । अनुमानमिति वक्ष्यमाणमत्रापि सम्बध्यते । यद्यपि प्राकृतानां इत्यादि परग्रन्थः । **युज्यत एवेति इति** । इत्येवंप्रकारेणे-त्यर्थः । **प्रत्यक्षमेवात्रेति** । यद्यपीति वक्ष्यमाणं अत्रापि सम्बध्यते । **यद्यपि वक्तुं शक्यत इति** । यद्वक्ष्यतीति विद्यैवेत्यधिकरणीयानुभाष्ये इति शेषः । **तावत् प्रतीयते** इति मूलम् । अन्यथा जानामीत्यनुव्यवसायो विरुध्यते इति भावः ।

स०व्र०— अत्र वेदग्रहणमिति । अनुमानस्येति शेषः ।

विष्ठल०— प्रत्यक्षस्येत्युक्तप्रतिबन्दीं सङ्गमयितुमाह **यत्परेणेति** । **अर्थादी**त्यादिपदेन कामग्रहणम् । **अनीहं** निश्चेष्टम् । प्रतिबन्धो वेदादिप्रामाण्योपपादकोत्तरमूलं सङ्गमयितुं प्रत्यक्षप्रामाण्यसाधकमाशङ्कते **प्रत्यक्षज्ञानं तावदिति** । **बाधकाभावादिना** इत्यादिपदेन संवादग्रहणम् ।

॥ इति प्रत्यक्षप्रामाण्यसाधकप्रमाणेनैव वेदादीनामपि प्रामाण्यसिद्धिः ॥

* * *

॥ अथ तत्र वेदाद्यागमानुमानयोरप्रामाण्यसाधकप्रमाणाभावः ॥

१०८ सु०— 'ननु ज्ञानग्राहकस्य प्रामाण्यग्राहकत्वमित्युत्सर्गः, अपवादे(न त्व)सत्य-प्रामाण्यमपि गृह्यते, तत्कथं वेदादिप्रामाण्यसिद्धिः । परतस्त्वेऽपि बाधकाभावः कुत' इति चेत्, सममेतत् प्रत्यक्षेऽपि । अनुपलम्भादपवादाद्यभावः प्रत्यक्षसिद्ध इति चेत्, तुल्यमेतद्वेदादावित्याह न चेति ।

अनु०— न चान्यामानता क्वापि प्रमाणेनावसीयते ।

प्रत्यक्षात् अन्ययोरनुमानागमयोः अमानता । क्वापि विषये ।

परि०— न चेत्यादि मूलमवतारयति **नन्वित्यादिना** ।

शे०वा०— ननु न चान्यामानतेत्यपवादकस्यानुपलम्भबाधितत्ववर्णनमनर्थकम् । न चानुमानादेर्निरपवादत्वोपदर्शनाय तदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न चागमादिजनितविज्ञाने साक्षिणो अप्रामाण्यग्राहकत्वासम्भवप्रतिपादनार्थं तदिति वाच्यम् । प्रामाण्यग्रहणस्वभावस्य साक्षिणः अप्रामाण्यग्राहकत्वप्रसक्तेरेवाभावेन तदसम्भवप्रदर्शनाय अपवादाभावप्रदर्शनस्यानर्थकत्वादित्यतः साक्षिणः प्रामाण्यग्राहकत्ववत् अप्रामाण्यग्राहकत्वस्यापि सत्त्वेन वेदादिजनितविज्ञाने तदग्राहकत्वप्रतिपादनाय अपवादाभावप्रतिपादनस्यार्थवत्त्वादित्यभिप्रेत्य, कथमेवं सति प्रामाण्यस्य स्वतस्त्वसिद्धान्तः कथं चाप्रामाण्यग्राहकत्वं तस्येत्यतः तत्स्वतस्त्वनिर्वाहप्रदर्शनपूर्वकमप्रामाण्यग्राहकत्वसम्भवशङ्कामुत्थापयति **नन्विति** । **उत्सर्ग इति** । न तु ज्ञानं गृह्णन् साक्षी प्रमाणतयैव तद् गृह्णातीति नियमः । तथा सति बौद्धादिवाक्यजनितज्ञानग्राहकस्य साक्षिणस्तत्प्रामाण्यग्राहकत्वप्रसङ्गात् । न चेष्टापत्तिः । तस्य वेदविरोधित्वात् । वेदविरोधिनः प्रामाण्ये च पुनर्वेदप्रामाण्यं न स्यात् । वस्तुनो द्वैरूप्यापत्तिश्चेति भावः । अस्तु ज्ञानग्राहकस्य प्रामाण्यग्राहकत्वमित्युत्सर्गः, किं तावता प्रकृत इत्यत आह **अपवादेन त्विति** । प्रवृत्त्यसामर्थ्यादिरूपापवादसाहाय्येनेत्यर्थः । ज्ञानग्राहकेणेति विभक्तिविपरिणामेनानुवर्तते । अपवादग्राहकस्य साक्षिणोऽप्रामाण्यग्राहकत्वेऽपि प्रकृते तद्विरहान्न तद्ग्राहकत्वमित्यभिप्रेत्य कुतोऽत्रापवादाभाव इत्यतस्तन्नियामकोक्त्याऽपवादाभावं परमुखेनैव वाचयितुं गूढाभिसन्धिः । प्रतिबन्दीमुपादत्ते **सममेतत्प्रत्यक्षेऽपीति** । अभिसन्धिमजानतः प्रतिबन्दीमुद्धरति **अनुपलम्भादिति** । सिद्धान्ती स्वाशयोद्घाटनरूपतयोत्तरभाष्यं सङ्गमयति **तुल्यमिति** ।

॥ इति वेदाद्यागमानुमानयोरप्रामाण्यसाधकप्रमाणाभावः ॥

* * *

॥ अथ तत्र 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां निराकरणम् ॥

॥ अथ तत्रादौ 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां साधकप्रमाणाभावः ॥

१०९ सु०— यद्वा प्रत्यक्षप्रामाण्यमभ्युपगच्छन् प्रष्टव्यः, किं त्वयाऽनुभूयमानस्यैकस्यैव प्रत्यक्षस्य मानत्वम् उत सर्वस्यापि प्रत्यक्षस्य । आद्ये दोषमाह प्रत्यक्षस्यैवेति । इतरेषामपि प्रत्यक्षाणां तत्तुल्यसामग्रीजन्यत्वे सत्येकस्य एव प्रत्यक्षस्य मानत्वमिति केनावसीयते ।

द्वितीये दोषमाह प्रत्यक्षस्यैवेति । प्रत्यक्षस्य मानत्वमेव सर्वमपि प्रत्यक्षं प्रमाणम् इति केनावसीयते । अनुभूयमानप्रत्यक्षादन्यस्य प्रत्यक्षस्य तत्प्रामाण्यस्य (वा) चावसायकं न किमपीत्यर्थः ।

परकीयवचनेन चेष्टया वा प्रत्यक्षमवगम्य प्रत्यक्षत्वेन तस्य प्रामाण्यमवगम्यत इत्यत आह यदीति । प्रत्यक्षस्य तत्प्रामाण्यस्य च साधकं वचनमनुमानं च यदि प्रमाणमिष्यते तर्हि वेदादिप्रामाण्ये कथं न भवेत् । अभ्युपगम इति शेषः ।

एवमनुमानागमाप्रामाण्यं प्रत्यपि विकल्पः । आद्यस्तु पूर्ववन्निरस्तः, अपसिद्धान्तश्च अधिकः । द्वितीयं दूषयति न चेति । अन्ययोः परपुरुषादिवर्तिनोरनुमानागमयोः अमानता । पूर्ववदाश्रयाद्यसिद्धेः, तत्साधकाङ्गीकारे च व्याघातादिति भावः ।

परि०— सार्धश्लोकं प्रकारान्तरेण योजयितुमाह **यद्वेति** । एवकारस्य यथान्यासान्वयमुपेत्यैकवचनार्थमाह **एकस्यैव प्रत्यक्षस्येति** । एवकारं भिन्नक्रममुपेत्याह **मानत्वमेवेति** । तद्भावमाह **सर्वमपीति** । **एवमनुमानागमेति** । अनुमानादेरप्रामाण्यं वदन् प्रष्टव्यः । किं त्वदीययोरेवानुमानागमयोरप्रामाण्यमुच्यते अथ सर्वेषामपीति विकल्प्य इत्यर्थः । **आद्यस्त्विति** । इतरेषामप्यनुमानागमानां तत्तुल्यसामग्रीजन्यत्वे सति त्वदीयस्यैवानुमानादेरमानत्वं केनावसीयते, न केनापीति निरस्त इत्यर्थः । **पुरुषादीति** । पशुपक्ष्यादिरादिपदार्थः । **आश्रयाद्यसिद्धेरिति** । परकीयानुमानागमजन्यज्ञानयोः अप्रत्यक्षत्वेन तज्ज्ञानोपायाभावाद् आश्रयहेत्वोरसिद्धेरिति भावः । **तत्साधकेति** । परकीयवचनेन तच्चेष्टया च तदीयमनुमानादिकमवगम्य अनुमानत्वादिना हेतुना तदप्रामाण्यमवगम्यत इत्यङ्गीकारे च व्याघातादित्यर्थः ।

यादु०— **एवमनुमानागमेति** । किं त्वयाऽनुभूयमानयोरेवानुमानागमयोरप्रामाण्यमुच्यते किं वा सर्वेषामनुमानागमानामिति विकल्पः कर्तव्य इत्यर्थः । **पूर्ववदिति** । इतरेषामप्यनुमानागमानां तत्तुल्यसामग्रीजन्यत्वे सत्यनयोरेवानुमानागमयोरप्रामाण्यमिति केनावसीयत इति पूर्वन्यायेन निरस्तप्राय इत्यर्थः । **परपुरुषादिवर्तिनोरिति** । अत्रादिपदेन पश्वादिग्रहणम् । तत्रापीष्टसाधनतानुमानस्याह्वानादिवाक्यजन्यज्ञानस्य च सत्त्वादिति ध्येयम् । **आश्रयाद्यसिद्धेरिति** । परकीययोः करणफलरूपयोरनुमानागमयोरुभयोरपि ज्ञानरूपत्वेनाप्रत्यक्षत्वादिति भावः । आदिपदेन तदप्रामाण्यसाधकसङ्ग्रहः । **व्याघातादिति** । परकीयवचनं चेष्टादिकं वा तदीयानुमानादिसाधकमनुमानत्वादिकमेव तदीयाप्रामाण्यसाधकमित्यङ्गीकारे चास्यैवानुमानादित्वात् सर्वमनुमानादिकमप्रमाणमिति प्रतिज्ञया व्याघातादित्यर्थः ।

वं०प०— अपसिद्धान्त इति । अनुभूयमाननुभूयमानसर्वानुमानागमाप्रामाण्यस्य त्वत्सिद्धान्तत्वात् तत्त्यत्तत्वाऽनुभूयमानयोरेव तयोरप्रामाण्यम् अन्येषां प्रामाण्यमिति स्वीकारेऽपसिद्धान्त इत्यर्थः । **पूर्ववदाश्रयाद्यसिद्धेरित्यादि** । यदि सर्वानुमानागमाप्रामाण्यं तर्ह्यनुभूयमानानुमानागमव्यतिरिक्तानुमानागमाप्रामाण्यस्यावसायकं न किञ्चिदस्तीत्याश्रयासिद्धिः । अथ तदनुमानागमाप्रामाण्यसाधकावनुमानागमौ यद्यङ्गीक्रियेते तर्हि साधकावनुमानागमौ प्रमाणे न वा । आद्ये सर्वानुमानागमाप्रामाण्यमिति व्याहतिः । अनयोरेव प्रमाणत्वात् । द्वितीये साधकाभावात् सर्वानुमानागमाप्रामाण्यमिति व्याहतमयुक्तमिति भावः ।

कं०रा०— एवमिति । किं त्वयाऽनुभूयमानयोरनुमानागमयोरेवाप्रामाण्यमभ्युपगम्यते । उत परपुरुषसम्बन्धिनोरपीत्येवमनुमानागमाप्रामाण्यविषयेऽपि विकल्पः कार्य इत्यर्थः । **आद्यस्त्विति** । परपुरुषादिसम्बन्धिनोरनुमानागमयोः स्वेनानुभूयमानाभ्यां अनुमानागमाभ्यां तुल्यत्वात् स्वसम्बन्धिनोरेवानुमानागमयोरप्रामाण्यमिति केनावसीयत इत्युक्तन्यायेनाद्यपक्षो निरस्त इत्यर्थः । **अपसिद्धान्त इति** । चार्वाकैः सर्वानुमानागमाप्रामाण्यस्य स्वीकृतत्वात् स्वसम्बन्धिनोरेवाप्रामाण्यमित्याद्यपक्षेऽपसिद्धान्तश्चाधिक इत्यर्थः । **आश्रयाद्यसिद्धेरिति** । परपुरुषादिसम्बन्धिनोरनुमानागमयोराश्रययोस्तदप्रामाण्यसाधकस्य चासिद्धेरित्यर्थः । अनुमानादिकमेव तत्साधकं भविष्यतीत्यत आह **तत्साधकेति** । परपुरुषादिसम्बन्धिन्यनुमानागमरूपाश्रयसाधकत्वेन तदप्रामाण्यसाधकत्वेन चानुमानादेरङ्गीकारे प्रत्यक्षमेव प्रमाणमिति स्वसिद्धान्तव्याघातादित्यर्थः ।

श्रीनिधि०— अवसायकं न किमपीति । अनुभूयमानप्रत्यक्षस्य तदविषयत्वादिति भावः । **एवमनुमानागमप्रामाण्यं प्रत्यपीति** । त्वयाऽनुभूयमानस्यैकस्यैवानुमानादेरप्रामाण्यमुत सर्वस्यापीति विकल्प इत्यर्थः । **अपसिद्धान्तश्चाधिक इति** । सर्वस्याप्यनुमानादेरप्रामाण्यमिति तत्सिद्धान्त इति भावः । **पूर्ववदाश्रयाद्यसिद्धेरिति** । द्वितीयपक्षवत् आश्रयासिद्धिः । **आदि**पदेन सर्वस्याप्रामाण्यमित्यस्यावसायकासिद्धिरिति गृह्यते । **व्याघातादिति** । प्रत्यक्षं न तत्र प्रवर्तते अनुमानाद्यङ्गीकारे चानुमानादिकमप्रमाणमित्यनेन व्याघात इति भावः ।

शे०वा०— सर्वस्यापीति । अननुभूयमानस्यापीत्यर्थः । **एवमनुमानागमेति** । किं त्वयाऽनुभूयमानयोरेवानुमानागमयोरप्रामाण्यमुच्यते किं वा सर्वेषामनुमानागमानामिति विकल्प इत्यर्थः । **पूर्ववदिति** । इतरेषामनुमानागमानां तत्तुल्यसामग्रीजन्यत्वे सति अनयोरेवानुमानागमयोरप्रामाण्यमिति केनावसीयत इति पूर्ववदित्यर्थः । **अपसिद्धान्तश्चेति** । त्वयाऽनुभूयमानानुमानागमयोरेवाप्रामाण्येऽपसिद्धान्तश्च सर्वानुमानागमाप्रामाण्यस्यैव त्वत्सिद्धान्तत्वादिति भावः । **परपुरुषवर्तिनोरिति** । अत्रादिपदेन पश्वादिग्रहणम् । तत्रापि प्रवृत्त्यन्यथाऽनुपपत्त्येष्टसाधनतानुमानस्याह्वानादिवाक्यजन्यज्ञानस्य च सत्त्वादिति ध्येयम् । **आश्रयासिद्धे-**

रिति । परकीययोः करणफलरूपयोरनुमानागमयोरुभयोरपि ज्ञानरूपत्वेनाप्रत्यक्षत्वादिति भावः । आदिपदेन तदप्रामाण्यसाधकसङ्ग्रहः । परकीयवचनेन चेष्टया वा तदीयमनुमानादिकमवगम्यानुमानादित्वेन तदप्रामाण्यावगमे को दोष इत्यत आह **तत्साधकेति** । **व्याघातादिति** । परकीयवचनचेष्टादिकमेव परकीयानुमानादिसाधकमनुमानत्वादिकमेव तदीयाप्रामाण्यसाधकमित्यङ्गीकारे चास्यैवानुमानादेः प्रमाणत्वात् सर्वानुमानादिकमप्रमाणमिति प्रतिज्ञया व्याघातादित्यर्थः ।

वा०र०— परपुरुषवर्तिनोरितीत्यस्य प्रतीकोपादानाय इतिशब्दद्वययुक्तः पाठः ।

स०व्र०— अवसायकं न किमपीत्यर्थ इति । तथा च आश्रयासिद्धिरित्यर्थः । **एवमिति** । किं त्वया अनुभूयमानस्यैवानुमानस्य आगमस्य वा अप्रामाण्यम्, उत सर्वस्याप्यनुमानादेरिति विकल्प इत्यर्थः । **पूर्ववन्निरस्त इति** । इतरस्याप्यनुमानादेः त्वया अनुभूयमानानुमानादितुल्यसामग्रीजन्यत्वे सति एकस्यैवानुमानस्य आगमस्य वाऽमानत्वमिति केनावसीयते इति निरस्त इत्यर्थः । **अपसिद्धान्तश्चेति** । सर्वानुमानागमयोरप्रामाण्यस्य त्वत्सिद्धान्तत्वात् तदनभ्युपगमे त्वया अनुभूयमानानुमानागमयोरेवाप्रामाण्याभ्युपगमे अपसिद्धान्त इत्यर्थः । न च प्रामाण्यविकल्पेऽपि आद्यविकल्पे प्रत्यक्षमात्रस्य प्रामाण्यस्याङ्गीकृतत्वेन त्वया अनुभूयमानप्रत्यक्षस्यैव प्रामाण्याङ्गीकारे अपसिद्धान्तः कुतो नोक्त इति वाच्यम् । तथा सति साधके एव प्रत्यक्षस्य प्रामाण्यस्याङ्गीकृतत्वेन स्वेनानुभूयमानप्रत्यक्षे च स्वानुभवलक्षणसाधकस्य सत्त्वात् प्रामाण्यम्, अन्यत्र तदभावान्न प्रत्यक्षमात्रस्य प्रामाण्याङ्गीकार इत्यर्थः ।

विठ्ठल०— प्रत्यक्षस्यैवेति सार्धं श्लोकं प्रकारान्तरेण योजयितुमाह **यद्वेति** । **एवमनुमानागमेति** । किं त्वदनुभवापन्नयोरेव अनुमानागमयोरप्रामाण्यमुच्यते । किं परपुरुषसम्बन्धिनोरपीति विकल्पः । कर्तव्यं **पूर्ववदिति** । स्वपरवर्तिनोरनुमानागमयोस्तुल्ययोगक्षेमत्वे सति स्वीययोरेवाप्रामाण्यमिति केनावसीयत इति पूर्वन्यायेन निरस्तप्राय इत्यर्थः । **अपसिद्धान्तश्चेति** । अनुमानागममात्रस्याप्रामाण्यं तत्सिद्धान्त इति स्वीयानुमानादिमात्रप्रामाण्याङ्गीकारेऽपसिद्धान्त इत्यर्थः । **परपुरुषादि** इत्यादिपदेन पशुपक्ष्यादि ग्रहणम् । तत्रापीष्टसाधनतानुमानस्य पशुपालकाह्वानादिवाक्यज्ञानस्यापि सत्त्वादिति ज्ञेयम् । **आश्रयाद्यसिद्धेरिति** । परपुरुषसम्बन्धिनोरनुमानजन्यज्ञानयोरपि पूर्ववदप्रतिपक्षत्वेनाश्रयाहेत्वोरसिद्धेरित्यर्थः । **व्याघातादिति** । परकीयं वचनं चेष्टादिकं न तदीयानुमानादिसाधकमित्यङ्गीकारे आनुमानत्वादिनैतत्तदप्रामाण्यमवगम्यत इति चाङ्गीकारे व्याघात इत्यर्थः ।

॥ इति 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां साधकप्रमाणाभावः ॥

* * *

॥ अथ तत्र आगमानुमानयोः अर्थसन्निकृष्टकरणजन्यत्वरूप-प्रत्यक्षत्वाभावप्रयुक्तप्रामाण्याभावशङ्कानिरासः ॥

११० **सु०—** नन्वर्थसन्निकृष्टकरणजन्यत्वात् प्रत्यक्षं प्रमाणम्, अनुमानागमयोः अतीतादिकमपि विषयीकुर्वतोस्तदभावात् कथं प्रामाण्यमिति । किं 'याथार्थ्यमेव प्रामाण्यं, तन्नियामकश्च सन्निकर्षः, अन्यथाऽतिप्रसङ्गादि'त्यभिप्रायः, उत 'विषय-सन्निकृष्टकरणजन्यत्वं प्रामाण्यमि'ति ।

आद्येऽपि किं यथाकथञ्चित्सन्निकर्षो नियामकः उत संयोग एव । आद्यं दूषयति **न चेति** । एवं तर्हि **अन्ययोरनुमानागमयोः अमानता न** अस्ति, अविनाभावादि-सन्निकर्षस्य तत्रापि सत्त्वादिति भावः । द्वितीये दोषमाह **कापीति** । **कापि** प्रमाणे चाक्षुषे श्रावणे च, **नावसीयते** नाभ्युपगम्यतेऽर्थसंयुक्तकरणजन्यता, परेण गोलका-(द्य)तिरिक्तस्य चक्षुरादेरनभ्युपगमात्, तदात्मकस्य चार्थसंयोगाभावात् । ततः प्रत्यक्ष-स्यापि कस्यचित् प्रामाण्यं न स्यादिति ।

द्वितीयं दूषयति **न चेति** । याथार्थ्यात् **अन्या** अर्थसन्निकृष्टकरणजन्यतालक्षणा **मानता** न वक्तव्या । कुत इत्यत आह **कापीति** । पूर्ववच्चाक्षुषादावव्याप्तेरिति भावः । उपलक्षणं चैतत् । विपर्ययादावतिव्याप्तिश्चेत्यपि द्रष्टव्यम् ।

परि०— 'न चान्ये'त्यर्धं प्रकारान्तरेण योजयति **नन्वित्यादिना** । **अन्यथेति** । सन्नि-कर्षाभावे निमीलितनेत्रस्यापि घटधीप्रसङ्गादित्यर्थः । नावसीयत इत्यत्र किमित्याकाङ्क्षां शेषेण पूरयति **अर्थसंयुक्तकरणजन्यतेति** ।

वं०प०— **अविनाभावेति** । तद्व्याप्तलिङ्गविषयकत्वं सन्निकर्ष इत्यर्थः । आदिपदेनार्थप्रतिपादन-रूपाभिधैव वा शक्तिस्मृतिर्वा आगमे सन्निकर्षः । **चाक्षुषे श्रावणे चेति** । रसनघ्राणत्वचां गोलकानामेव साक्षादर्थसम्बन्धसद्भावादुभयोरेव ग्रहणमिति मन्तव्यम् । कुत इत्यत आह **गोलकेति** । अतीन्द्रियस्य चक्षुषोऽभावादिति भावः । **तदिति** । गोलकात्मकस्य चक्षुषोऽर्थसन्निकर्षस्यादर्शनादित्यर्थः । **पूर्ववदिति** । गोलकाद्यतिरिक्तस्येत्याद्युक्तरीत्या ।

कं०रा०— तदभावादिति । अतीतादिरूपार्थसन्निकर्षाभावादित्यर्थः । **तन्नियामक इति** । यथावस्थितज्ञेयविषयीकारित्वनियामक इत्यर्थः । **अन्यथेति** । सन्निकर्षस्य यथावस्थितज्ञेयविषयीकारित्वनियामकत्वानङ्गीकारे असन्निकृष्टस्यापि विषयीकरणप्रसङ्गादित्यर्थः । **अविनाभावादि** इत्यादिपदेन शक्तिर्गृह्यते । चाक्षुषे श्रावणे चार्थसंयुक्तकरणजन्यतापरेण नाभ्युपगम्यत इत्येतत्कुत इत्यत आह **गोलकेति** । प्रत्यक्षमेव प्रमाणमिति वदता परेण प्रत्यक्षसिद्धगोलकादेरतिरिक्तस्य चक्षुरादेरनभ्युपगतत्वादगोलकाद्यात्मकस्य च चक्षुरादेरर्थेन संयोगाभावादित्यर्थः ।

श्रीनिधि०— तदात्मकस्य गोलकात्मकस्य । अत्र गोलकात्मकमेव चक्षुरुत तदतिरिक्तमतिविकल्पं मनसि निधायाद्य आह **पूर्ववच्चाक्षुषादाविति** । द्वितीय आह **उपलक्षणं चैतदिति** ।

शे०वा०— अविनाभावादीत्यादिपदेनागमस्य स्वार्थेन शक्तिरूपसन्निकर्षपरिग्रहः । **तदात्मकस्य** गोलकात्मकस्य । अर्थस्य देशान्तरे सत्त्वाद्गोलकस्य च देहदेशे सत्त्वान्नार्थसंयोगश्चक्षुरादेरिति भावः ।

याथार्थ्यात् अन्येति । अनेनान्या मानतेति द्वे एते पदे इत्युक्तं भवति । **पूर्ववदिति** । परेण गोलकातिरिक्तस्य चक्षुरादेरनभ्युपगमादित्यादि पूर्ववदित्यर्थः । **विपर्ययादाविति** । तत्रापि शुक्तिसन्निकृष्टकरणजन्यत्वस्य सत्त्वादिति भावः ।

वा०र०— द्वे एते पदे इति । पूर्वयोजनासु अन्ययोरमानता इति समस्तपदत्वमिति भावः । उपलक्षणं चैतत् । पूर्वत्र नञः मानपदपूर्वता । एतद्योजनायां तु केवलमेव मानपदं इत्यपि सूचितमिति ज्ञेयम् । यद्यपि अन्या चासौ मानता चेति समस्तैकपदत्वेऽपि विवक्षितार्थसिद्धिः तथापि याथार्थ्यादन्येति याथार्थ्यसापेक्षस्यान्येत्यस्य मानतापदेन समासायोग इत्याशयेन द्वे पदे इति मूलाशयो वर्णितः । तदनुसारेणाह **अयमर्थः इति** ।

स०व्र०— पूर्ववदिति । परेण गोलकातिरिक्तस्येत्यादिपूर्ववदित्यर्थः ।

विट्ठल०— न चेति मूलं प्रकारान्तरेण योजयितुमाह **नन्वर्थसन्निकृष्टेत्यादिना** । **अन्यथेति** । सन्निकर्षस्य याथार्थ्यनियामकत्वानङ्गीकारे असन्निकृष्टेनापि करणेन यथार्थज्ञानोत्पादप्रसङ्गेन सर्वार्थज्ञानं सर्वेषां स्यादिति भावः । **चक्षुरादेरिति** । गोलकातिरिक्तेन्द्रियस्याप्रत्यक्षत्वादित्यर्थः ।

॥ इति आगमानुमानयोः अर्थसन्निकृष्टकरणजन्यत्वरूप-
प्रत्यक्षत्वाभावप्रयुक्तप्रामाण्याभावशङ्कानिरासः ॥

* * *

॥ अथ तत्र तल्लक्षणे याथार्थ्ये विशेषिते विशेष्यवैयर्थ्यम् ॥

१११ सु०— याथार्थ्ये सतीदं लक्षणमिति चेत्, तर्हि तदेवास्तु किं विशेष्येण । अनुमानादिव्यावृत्त्यर्थमिति चेन्न, तदप्रामाण्यस्याद्याप्यसिद्धेरित्याह न चेति ।

परि०— विषयसन्निकृष्टकरणजन्यत्वमेव प्रामाण्यमिति पक्षनिरासकतयापि 'न चे'ति मूलं योजयति **याथार्थे सतीति** ।

वं०प०— **इदम्** अर्थसन्निकृष्टकरणजन्यत्वम् । तथा च याथार्थ्याभावान्न विपर्ययसंशययोरतिव्याप्तिरिति भावः । **अनुमानादीति** याथार्थ्योपेतेत्यर्थः । विशेष्यभाग इति शेषः । **अद्यापीति** । तथा च सिद्धेऽनुमानाद्यप्रामाण्ये तद्व्यावर्तनाय विशिष्टलक्षणकरणमस्य प्रमाणलक्षणत्वे सिद्धे एतदनाक्रान्ततयाऽप्रामाण्यसिद्धिरित्यन्योन्याश्रय इति ।

कं०रा०— क्वचिद्गोलकसंयोगस्य सत्त्वेन न सर्वप्रत्यक्षाप्रामाण्यमापादयितुं शक्यमित्यतः **कस्यचित्** इत्युक्तं विपर्ययादावतिव्याप्तिपरिहारं शङ्कते **याथार्थ्ये सतीति** । **इदं** अर्थसन्निकृष्टकरणजन्यत्वम् ।

शे०वा०— **तदप्रामाण्यस्येति** । अनेनान्या मानतेति समस्तं पदमित्युक्तं भवति । **अद्याप्यसिद्धेरिति** । अनुमानादेरप्रामाण्यसिद्धौ व्यावर्तनीयत्वसिद्धिः, तत्सिद्धौ च व्यर्थविशेष्यत्वाभावेन विशिष्टलक्षणत्वसिद्ध्या तदभावादनुमानादेरप्रामाण्यसिद्धिरित्यन्योन्याश्रयापत्तेरिति भावः ।

॥ इति तल्लक्षणे याथार्थ्ये विशेषिते विशेष्यवैयर्थ्यम् ॥

* * *

॥ अथ तत्रान्ते वेदादीनां अर्थानुपलम्भबाधप्रयुक्ताप्रामाण्यशङ्का तन्निरासश्च ॥

११२ सु०— ननु वेदाद्यर्थस्यानुपलम्भबाधितत्वात् कथं तत्प्रामाण्यमिति चेन्न, वेदादिनैवोपलब्धेः । तदन्येन नोपलभ्यत इति चेत्, तत्किं प्रमाणान्तरसंवादित्वं प्रामाण्यम् । अद्धेति चेत् तत्राह न चेति । प्रमाणान्तरसंवादलक्षणा मानता न इत्यर्थः । कुतो नेत्यत आह कापीति । अनवस्थाप्रसङ्गात् कापि प्रमाणे नावसीयते यतः ।

यद्वा कापि स्वसुखादिज्ञाने प्रमा(ण)णे संवाद एव नावसीयते इति योज्यमित्यलम् ।

परि०— अद्धेति द्वितीयं दूषयति **न चेतीति** ।

वं०प०— **अनवस्थेति** । संवादकप्रमाणेऽपि प्रामाण्यं पुनः संवादान्तरेणैव ज्ञेयम् । तत्राप्येवमित्यनवस्थेत्यर्थः ।

कं०रा०— **अनवस्थेति** । प्रमाणान्तरसंवादस्य प्रामाण्यरूपत्वे प्रमाणान्तरस्यापि प्रमाणान्तरसंवादोऽपेक्षणीयः । एवं तस्य तस्यापीत्यनवस्थाप्रसङ्गादित्यर्थः ।

शे०वा०— किमत्र वेदाद्यर्थस्य सर्वथाऽनुपलम्भो विवक्षितः किं वा वेदाद्यन्येनेति विकल्पं मनसि निधाय आद्यमसिद्ध्या निराचष्टे **न वेदादिनैवेति** । द्वितीयं कल्पमुत्थापयति **तदन्येनेति** । एतत्कल्पदूषणपरतया मूलं योजयितुं तत्पक्षपर्यवसानं परमुखेनैव वाचयितुं पृच्छति **तत्किमित्यादिना** । **तत्** तत्र प्रमाणे । **प्रमाणान्तरसंवादलक्षणेति** । अनेन द्वे एते पदे इत्युक्तं भवति । अत्र पक्षेऽनवस्थाप्रसङ्गादिति हेतुः पूरणीयो भवतीत्यपरितोषादाह **यद्धेति** । यद्यप्यत्रापि स्वमात्रवेद्यत्वलक्षणो हेतुरपेक्षित एव तथाऽपि मूले क्वापीत्यनेनैव तत्सूचनान्न पूर्ववत्पूरणीयत्वं तस्येति पूर्वपक्षाद्विशेषः । **स्वसुखादिज्ञान इति** । अयमर्थः । किं सर्वस्य वेदादेः संवादो नास्तीति मतं किं वा तदेकदेशस्येति वक्तव्यम् । नाद्यः । ऐश्वर्यादिसाधनतया योगादिकमुपदिशतो वेदभागस्य संवाददर्शनेन तदसिद्धेः । नान्त्यः । भागविशेषस्य संवादाभावेन कृत्स्नस्याप्यागमस्याप्रामाण्याभिधानेऽस्मत्सुखादिविषयकस्य प्रत्यक्षस्य संवादाभावेन प्रत्यक्षमात्रस्याप्यप्रामाण्यापातात् । यदि च संवादरहितस्यैव वेदभागस्याप्रामाण्यमभिधीयते तदा त्वस्मत्सुखादिविषयकस्य प्रत्यक्षस्याप्रामाण्यं प्रसज्यत इति । यद्यप्यत्र योगिप्रत्यक्षसंवादोऽस्त्येव तथाऽपि तदितरप्रमाणापेक्षयेदमुक्तमिति ध्येयम् । ननु तथाऽपि न वेदस्य प्रामाण्यं वाक्यत्वादुन्मत्तवाक्यवत् । यद्वोन्मत्तवाक्यादनिश्चितविशेषत्वाद्बाधितत्वाद्वा तदप्रामाण्यमस्त्वित्यत आह **इत्यलमिति** । अयमर्थः । न वाक्यत्वमात्रेणोन्मत्तवाक्यवदागमस्याप्रामाण्यं वक्तुं युक्तम् । तथा सत्यक्षजत्वेन शुक्तिरजतादिविषयाक्षजवत् स्तम्भाद्यक्षजस्याप्यप्रामाण्यप्रसङ्गात् । यदि च सदोषत्वाच्छुक्तिरजतादिविषयस्य अक्षजस्याप्रामाण्येऽपि निर्दोषत्वात् स्तम्भादिविषयाक्षजस्य प्रामाण्यमेवेति मन्यसे, तर्ह्युन्मत्तवाक्यस्य सदोषत्वेनाप्रामाण्येऽपि वेदादेरपौरुषेयत्वादिना निर्दोषत्वान्नाप्रामाण्यमिति समम् । नाप्युन्मत्तवाक्यादनिश्चितविशेषत्वाद्बाधितत्वाद्वेति द्वितीयतृतीयौ । वैदिकस्यार्थस्याप्रत्यक्षसिद्धतया प्रत्यक्षस्य तत्र बाधकत्वायोगेन वेदादेर्बाधराहित्येनोन्मत्तवाक्याद्विशेषनिश्चयादिति ।

॥ इति वेदादीनां अर्थानुपलम्भबाधप्रयुक्ताप्रामाण्यशङ्का तन्निरासश्च ॥

॥ इति 'प्रत्यक्षस्यैव मानत्वमि'तिपक्षाणां निराकरणम् ॥

॥ इति अर्थकामातिरिक्तपुरुषार्थतत्साधकवेदानुमानयोः प्रामाण्यसाधनम् ॥

* * *

॥ अथ सूत्रार्थोपसंहारः ॥

११३ **सु०—** सूत्रार्थमुपसंहरति **स्वमतेनेति** ।

अनु०— स्वमतेनार्थरहित उपेक्ष्यः पक्ष ईदृशः ॥

स्वसम्मत्यैव अर्थरहितः विषयप्रयोजनरहितः । **ईदृशः** ईश्वराद्यतीन्द्रियानभ्युपगमलक्षणः ॥

परि०— 'स्वमतेनैव निष्फलमि'त्यनेनापौनरुक्त्यायाह **सूत्रार्थमुपसंहरतीति** ।

शे०वा०— 'स्वमतेनैव निष्फलमि'ति पूर्वग्रन्थं मनसि निधायाह **स्वसम्मत्यैवेति** । विषयप्रयोजनराहित्यस्य प्रागुपपादितत्वेनात्रार्थशब्दस्य अर्यत इति व्युत्पत्त्या विषयमात्रपरत्वस्य वाऽर्थ्यते प्रार्थ्यत इति व्युत्पत्त्या प्रयोजनमात्रपरत्वस्य चायोगादुभयपरत्वमित्यभिप्रेत्यार्थरहित इत्येतदनूद्य व्याख्याति **अर्थरहितो विषयप्रयोजनरहित इति** । ईश्वरादीत्यादिपदेन धर्माधर्मस्वर्गापवर्गादिः परिग्रहः । आदिपदसङ्गृह्यतावच्छेदकधर्मकथनम् **अतीन्द्रियेति** ।

वा०र०— प्रयोजनमात्रपरत्वस्य वेति वाशब्दयुक्तः पाठः ।

॥ इति सूत्रार्थोपसंहारः ॥
॥ इति उपन्यस्तस्य चार्वाकमतस्य निरासः ॥

॥ इति अभ्युपगमाधिकरणम् ॥
॥ २-२-३ ॥

* * *

॥ अथ पुरुषाश्माधिकरणम् ॥

॥ २-२-४ ॥

ब्र०सू०— ॐ पुरुषाश्मवदिति चेत्तथापि ॐ ॥

॥ अथ निरीश्वरसाङ्ख्यैकदेशिनां पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादिनां मतस्यापाकरणम् ॥
॥ अथ तत्रादौ एतदधिकरणीयानन्तर्यक्रमानुपपत्तिशङ्का तन्निरसनञ्च ॥

११४ **सु०**— अ(त्रानीश्व)त्र निरीश्वरसाङ्ख्यैकदेशिनां पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादिनां मतमपाक्रियते ।

नन्वेवं तर्हि तदनन्तरमेवेदमारम्भणीयम् । सत्यम्, तथाऽप्यभ्यधिकाशङ्कानुसारेण इयमुक्तिः ।

तथा हि । परमचेतनस्य भगवत एव सर्वकर्तृत्वं प्रागुक्तम् । तस्य केवल-प्रकृतिकर्तृकत्ववादः साक्षाद्विरोधीति प्रथममपाकृतः । तत्र मा भूत् केवलस्याचेतनस्य प्रधानस्य जगत्कर्तृत्वम्, ईश्वरानुगृहीतस्य तु भविष्यतीत्याशङ्का द्वितीयाधिकरणे (निरस्ता) निराकृता । मा भूदचेतनस्य कर्तृत्वं किन्तु शरीरस्यैव चैतन्याश्रयस्य कर्तृत्व-मस्त्वित्याशङ्क्य शरीरस्य चैतन्याश्रयताऽयोगात् पुनस्तदवस्थः कर्तृत्वायोग इति तृतीयेऽभिहितम् । इदानीं तु केवलस्याचेतनस्य कर्तृत्वायोगेऽपि चेतनसन्निधानेन तदुप-पत्तेः किमीश्वरे(णेत्या)णेत्येषा शङ्का निराक्रियते ।

परि०— शङ्कोत्थापनायापौनरुक्त्याय च प्रतिपाद्यमाह **अ(त्र निरीश्व)त्रानीश्वरेति** । **पुरुषेति** । जीवोपसर्जनेत्यर्थः । **तदनन्तरमिति** । अन्यत्राभावाच्चेत्यतः प्रागित्यर्थः । **प्रागुक्त-मिति** । पूर्वाध्याये जन्माद्यस्येत्यत्रोक्तमित्यर्थः । **प्रथममिति** । रचनेत्यत्रेत्यर्थः । **तृतीय इति** । अधिकरण इत्यनुवृत्तिः ।

कं०रा०— **तदनन्तरमिति** । निरीश्वरसाङ्ख्यमतनिरासकाधिकरणानन्तरमित्यर्थः ।

श्रीनिधि०— इयमुक्तिरिति । पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादं निराकरोतीति भाष्योक्तिरित्यर्थः । यद्वेयमुक्तिः एवं क्रमोपेता पुरुषाश्मवदिति चेदिति सूत्रोक्तिरित्यर्थः ।

शे०वा०— ननु सन्निधानादित्युत्तरभाष्यमनर्थकम् । न चेदं पुरुषाश्मवदिति सूत्रव्याख्यानमिति वाच्यम् । अधिकरणारम्भसमर्थनाय तत्प्रतिपाद्यस्य तदानन्तर्यक्रमनिमित्तस्य चावश्यकतया तदुभयमनभिधाय प्रथमत एव सूत्रव्याख्यानमात्रस्यासङ्गतत्वादित्यतः तत्प्रतिपाद्यस्य भाष्य एवोक्तेः क्रमनिमित्तस्य च स्पष्टत्वेन शिष्यैरेवोहितुं शक्यत्वाद्युक्तं तदुभयमनभिधायैव भाष्यकारीयं सूत्रव्याख्यानकरणमित्यभिप्रेत्य भाष्यानुरोधेन स्वयं प्रतिपाद्यमर्थं तावद्दर्शयति **अत्रेति** । इदानीमानन्तर्यक्रमे निमित्तं वक्तुं तदनुपपत्तिशङ्कामुत्थापयति **नन्विति** । एवं तर्हि निरीश्वरसाङ्ख्यैकदेशमतनिराकरणे । **तदनन्तरमेव** निरीश्वरसाङ्ख्यमतनिराकरणानन्तरमेव । गुणभूतेश्वरानुगृहीतप्रधानकर्तृत्वापेक्षया निरीश्वरस्यास्य मतस्यातिविरोधित्वादिति भावः । **साक्षाद्विरोधीति** । स्वतन्त्रचेतनरूपविशेष्यस्यैवानङ्गीकारेणात्यन्तविरोधित्वादित्यर्थः । **ईश्वरानुगृहीतस्य तु भविष्यति इति** । अत्रैव पक्षे 'न ऋत' इत्यादिश्रुतेर्गुणभूतेश्वरविषयत्वसम्भवेन व्यतिरेकानवस्थितेरिति प्रथमाधिकरणोक्तदोषो नेत्याक्षेपेण पूर्वपक्षप्रवृत्तिसम्भवादिति भावः । **अचेतनस्येति** । केवलस्येश्वरगुणकस्य चेति शेषः । **शरीरस्यैवेति** । ईश्वरश्च न शरीरमिति भावः । उपलक्षणमेतत् । श्रुत्यनुमानाभ्यां केवलस्येश्वरगुणकस्य वा जडस्य न कर्तृत्वनिरासो युक्तः । तयोरप्रमाणत्वादिति पूर्वाक्षेपेण प्रवृत्तेश्चेत्यपि द्रष्टव्यम् । केवलस्याचेतनस्येत्युपलक्षणम् । ईश्वरगुणकस्य तस्य, चैतन्याश्रयस्य शरीरस्येत्यपि द्रष्टव्यम् । **चेतनसन्निधानेनेति** । जीवसन्निधानेनेत्यर्थः । तदधिष्ठितत्वेनेति यावत् । जीवसहितस्य प्रधानस्य कर्तृत्वमपि जीवस्योपसर्जनत्वप्राधान्याभ्यां द्वेधा भवति । तत्र चेतनस्याचेतनं प्रत्युपसर्जनत्वरूपस्याद्यस्य द्वितीयापेक्षयाऽतिविरुद्धत्वादत्र निरास इति भावः ।

वा०र०— तदानन्तर्यक्रमेति । एतदधिकरणस्य पदानन्तर्यं पूर्वाधिकरणापेक्षया तत्क्रमेत्यर्थः । **एकदेशिमतनिराकरण इति** । निराकरणार्थत्व इत्यर्थः । निरीश्वरसाङ्ख्यमतेति पाठः । तदनन्तरमेवारम्भणीयत्वे मूलसूचितहेतुमाह **गुणभूतेति** । यदा सेश्वरसाङ्ख्यमतापेक्षया स्वाधिकरणस्य पूर्वत्वं तदा वक्ष्यमाणप्रकारेण बद्धक्रमचार्वाकाधिकरणापेक्षयापि पूर्वत्वं किमु इत्याशयः । प्रधानकर्तृत्वपक्षापेक्षया इति पक्षशब्दयुक्तः पाठः । पक्षपदाभावो लेखकागतः । मूलकोशे पक्षापेक्षयेत्युक्तेः । **स्वतन्त्रचेतनेति** । स्वतन्त्रचेतनस्य सर्ववैशिष्ट्यरूपविशिष्टान्तर्गतविशेष्यस्येति योजना । अत्रैव **पक्षे न ऋत इत्यादि** । अनेनान्यत्रेत्यस्यैवाधिकरणस्य प्रथमाधिकरणानन्तर्यं युक्तमित्युक्तं भवति । ईश्वरश्च नेति पाठः । **श्रुत्यनुमानाभ्यामिति** । अनेन पूर्वाधिकरणद्वयानन्तर्यं युक्तं अस्येत्युक्तं भवति । एवमुत्तरत्रापि । सन्निधानं न नानुग्रहः इति प्रतीतिनिरासायाह **यदधिष्ठितत्वेनेति** । **जीवसहितस्येति** । अनेन चेतनसन्निधानं पदार्थः उक्तो भवति । अचेतनं च प्रधानरूपमिति चोक्तं भवति । प्राधान्याभ्यामिति पाठः । द्वेधेत्याद्युक्त्योत्तराधिकरणस्यापि जीवसहितप्रधानकर्तृता-

निरासकत्वात् साङ्कर्यमिति शङ्का निराकृता भवति । मूले शङ्का निराक्रियते इत्यनन्तरं इतिशब्दः पूरणीयः । उक्तिरिति पूर्वेणान्वयः ।

चषकः— प्रागुक्तमिति । जन्मादिनयेऽभिहितमित्यर्थः ।

॥ इति एतदधिकरणीयानन्तर्यक्रमानुपपत्तिशङ्का तन्निरसनञ्च ॥

* * *

॥ अथ तत्र निरसिष्यमाणमतरीतिप्रदर्शनम् ॥

११५ **सु०— तन्मतरीतिः सूत्र एवोक्तेति तदेव व्याचष्टे सन्निधानादिति ।**

अनु०— सन्निधानाच्चेतनस्य वर्तते यद्यचेतनम् ।

यथा खल्वचेतनमेव शरीरं चेतनस्य आत्मनः सन्निधानमात्रेण अश्मानयनादिकं करोति, एवमचेतनाऽपि प्रकृतिः पुरुषसन्निधानान्महदादिकार्यं करिष्यति । तथा च प्रयोगः 'महदादिकं पुरुषोपसर्जनप्रकृतिकर्तृकम् कार्यत्वादश्मानयनादिवदि'ति । एवञ्च किमीश्वरेणेति शङ्कार्थः ।

परि०— यथैवं शब्दावध्याहृत्य पूर्वार्धं दृष्टान्तदार्ष्टान्तिकोभयपरत्वेनावृत्त्या योजयति **यथा स्वल्विति** ।

शे०वा०— ननु तथाऽप्येतन्मतस्वरूपाज्ञाने दूषणस्य दुर्बोधत्वात् तत्सुबोधत्वाय तन्मतस्थितिरादौ दर्शनीया, तत्कथं तामदर्शयित्वैव सूत्रमात्रव्याख्यानं भाष्यकाराणामित्यत आह **तन्मतरीतिरिति** । **एवञ्चेति** । तथा च तस्य सर्वकारणत्वं दूरोत्सारितमिति भावः ।

वा०र०— सर्ववैशिष्ट्यविरोधपरिहाराय प्रवृत्तत्वात् द्वितीयाध्यायस्य तदनुसारेण फलमाह **तथा चेति** । षष्ठस्य तृतीये आत्मनश्च इति सूत्रे पूरण इति वक्तव्यमस्ति । तथा तद्बलात् पूरणप्रत्ययान्ते उत्तरपदे आत्मनः उत्तरस्याः तृतीयायाः अलुक् इत्यर्थकतत्सूत्रे आत्मना पञ्चमः आत्मना षष्ठः इत्यादौ तृतीयायाः अलुकि तथारूपं सम्भवतीति प्रतिपाद्य कथं तर्हि आत्मा चतुर्थः इत्यत्रात्मनेति तृतीयायाः अलुक् इत्याशङ्कापरिहाराय जनार्दनः स्वात्मचतुर्थः एवेत्यत्र बहुव्रीहिरेवाङ्गीक्रियत इति तृतीयायाः तत्पुरुषानाश्रयणात् न दोषः इत्याद्युक्तं काशिकादौ तदनुसारेणाह आत्मनो चतुर्थ इत्यादि । उक्तं च रमायाम् । एकस्यापि वस्तुनो

भेदं परिकल्प्य वृत्तिपदार्थत्वं अन्यपदार्थत्वं च विवक्षणीयमिति भाव इति । अत्र चात्मा चतुर्थो यस्येत्येवं काशिकायां उक्तावपि तृतीयाया लुगभावस्फोरणाय तृतीयान्ततया विग्रहो दर्शितः । आत्मचतुर्थो यस्येति बहुव्रीहिपाठस्तु स्पष्ट एव काशिकानुसारी ।

॥ इति निरसिष्यमाणमतरीतिप्रदर्शनम् ॥

* * *

॥ अथ तन्मतनिरासः ॥

॥ अथ तत्रादौ उक्तदोषसाम्यम् (उक्तदोषापरिहारः) ॥

११६ सु०—

अनु०— तथाऽप्यबुद्धिपूर्वत्वादुक्तदोषः समो भवेत् ॥

यद्यप्येवमभ्यधिकमाशङ्कितं तथाऽपि रचनानुपपत्तेरिति उक्तदोषः समो भवेत् न परिहृतो भवेत् ॥ कुतः । अबुद्धिपूर्वत्वात् प्रकृतेरिति शेषः । बुद्धिः पूर्वा यस्य तत् बुद्धिपूर्वम्, ज्ञानेच्छाप्रयत्ना इत्यर्थः । न विद्यते बुद्धिपूर्वं यस्य तत् तथोक्तं, तस्य भावः तत्वम्, तस्मात् ।

एतदुक्तं भवति । ज्ञानेच्छाप्रयत्नवत्वं हि कर्तृत्वम् । न च पुरुषसन्निधाने(ऽपि)न प्रकृतेर्बुद्धिमत्वं सम्भवति, अचेतनत्वाङ्गीकारविरोधात् । न च बुद्ध्यभावे तत्कार्ययोरिच्छाप्रयत्नयोरपि सम्भवः, तथा चाचेतनस्य कर्तृत्वप्रतिज्ञा व्याहतैवेति ।

परि०— अपीत्यस्य यदीत्यत्राप्यन्वयमुपेत्य तदनूद्यार्थमाह **यद्यपीति** ।

वं०प०— यस्येति । इच्छासहितप्रयत्नस्येत्यर्थः । फलितमाह **ज्ञानेच्छाप्रयत्ना इति** ।

कं०रा०— ज्ञानेच्छाप्रयत्नवत्त्वमिति । अत्र इच्छाप्रयत्नवत्त्वं कर्तृत्वमित्यभिप्रेतं ज्ञानग्रहणं तूक्तरूपं कर्तृत्वं ज्ञानव्याप्तमचेतने च व्यापकस्य ज्ञानस्याभावात् तद्व्याप्यस्य कर्तृत्वस्याप्यभाव इत्यभिप्रायेण अन्यथा 'असदिति चेन्न प्रतिषेधमात्रत्वादि'त्यधिकरणस्थेन अपि तर्हीच्छाप्रयत्नादिरूपा प्रवृत्तिरेव कर्तृत्वमित्यादिग्रन्थेन विरोधापत्तेरिति ध्येयम् ।

श्रीनिधि०— अचेतनत्वाङ्गीकारविरोधेन बुद्ध्यभावेऽपि इच्छाप्रयत्नौ कुतो न भवत प्रतियोगितदभावरूपत्वाभावेनाविरोधादित्यत आह **न च बुद्ध्यभाव इति** ।

शे०वा०— अभ्युपगमेऽप्यर्थाभावादित्यव्यवहितोक्तदोषस्यात्राप्रसराद्योग्यव्यवहितदोषपरतयोक्तदोषपदस्य तात्पर्यमाह **रचनेति** । **बुद्धिः पूर्वा यस्येति** । अत्र यस्येति समुदायापेक्षमेकवचनम् । तथा च बुद्धिः पूर्वा यस्य बुद्धीच्छाप्रयत्नसमुदायस्येत्यर्थः सिद्ध्यति । ततश्च 'ज्ञानेच्छाप्रयत्ना इत्यर्थः' इत्युत्तरग्रन्थोपपत्तिः । अन्यथा तदनुपपत्तेः । आत्मना चतुर्थो यस्येत्येकस्यापि वस्तुनो बुद्धिपरिकल्पितविभागस्य वृत्तिपदार्थत्वान्यपदार्थत्ववत् वृत्तिपदार्थभूताया अपि बुद्धेरन्यपदार्थत्वमविरुद्धमित्यवधेयम् । **ज्ञानेच्छाप्रयत्नवत्त्वं हीति** । ज्ञानेच्छाप्रयत्नवत्त्वमित्यर्थः । 'बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वं' इति इच्छाप्रयत्नरूपप्रवृत्तेरेव कर्तृत्वरूपतायाः प्राक् समर्थनादिति ध्येयम् ।

स०व्र०— बुद्धिः पूर्वा यस्येति । यस्येति समुदायापेक्षमेकवचनम् । तथा च बुद्धीच्छाप्रयत्नसमुदायस्येत्यर्थः । तेन ज्ञानेच्छाप्रयत्ना इत्यर्थः इत्युपपन्नम् । 'आत्मना चतुर्थो यस्ये'त्येकस्यापि वस्तुनो बुद्धिपरिकल्पितविभागस्य वृत्तिपदार्थत्वान्यत्वयोरविरोधात् प्रकृतेऽपि तद्वत् बुद्धिवृत्तिपदार्थभूताया अपि अन्यपदार्थत्वमुपपद्यत इति ध्येयम् । **ज्ञानेच्छाप्रयत्नवत्त्वं हीति** । ज्ञानपूर्वकेच्छाप्रयत्नवत्त्वमित्यर्थः ।

विट्ठल०— अबुद्धिपूर्वत्वादित्यस्य ज्ञानेच्छाप्रयत्नरहितत्वादित्यर्थलाभायाह **बुद्धिः पूर्वेति** । **यस्य** ज्ञानेच्छारूपस्य । ननु रचनानुपपत्तेरित्यत्र केवलाचेतनस्याकर्तृत्वे दूषणमुक्तं तत्कथं पुरुषसन्निधानेनाचेतनस्य कर्तृत्वमिति मते स्यात् । न च बुद्धिपूर्वत्वसाम्यादिति वाच्यम् । बुद्धिमत्पुरुषसन्निधानेन कर्तृत्वसम्भवात् । तथा चोक्तदोषसाम्यं कथमित्यतस्तदुपपादयितुमाह **एतदुक्तं भवतीति** ।

* * *

॥ अथ तत्र साध्यवैकल्यरूपदृष्टान्तदोषः ॥

११७ सु०— नन्वात्मोपसर्जनस्य शरीरस्याश्मानयनादिकर्तृत्वं निदर्शितम्, तत्कथ-(मेतदि)मिति चेन्न; शरीरस्याप्युक्तरीत्या कर्तृत्वासम्मतेः ।

परि०— उत्तरार्धं दृष्टान्तदूषणपरतयाऽपि योजयति **शरीरस्यापीति** । **उक्तरीत्येति** । ज्ञानेच्छाप्रयत्नवत्त्वं हीत्यादिनोक्तरीत्येत्यर्थः ।

शे०वा०— शरीरस्यापीति । अचेतनत्वेन शरीरस्य बुद्ध्यभावात् तदभावे च तत्कार्ययोरिच्छाप्रयत्नयोरप्यसम्भवात् ज्ञानपूर्वकेच्छाप्रयत्नवत्त्वरूपकर्तृत्वस्यासम्मतेर्दृष्टान्तस्य साध्यविकलतेति भावः ।

॥ इति साध्यवैकल्यरूपदृष्टान्तदोषः ॥

* * *

॥ अथ तत्रान्ते अङ्गित्व(प्रधानत्व)ानुभवविरोधः ॥

११८ सु०— दूषणान्तरं च दृष्टान्ते दर्शयितुं सूत्रम्—

ब्र०सू०— ॐ अङ्गित्वानुपपत्तेः ॐ ॥

तद्व्याचष्टे अङ्गित्वमिति ।

अनु०— अङ्गित्वं पुरुषस्यैव सर्वैरेवानुभूयते ।
तदङ्गत्वोक्तितश्चैव स्यात्सर्वस्यापलापकः ॥

चशब्दो दूषणान्तरसमुच्चयार्थः । एवशब्दो वक्ष्यमाणकैमुत्यस्फुटीकरणार्थः । अङ्गित्वं प्रधानत्वं, शरीरं प्रतीति शेषः । तदङ्गत्वोक्तितः तस्योपसर्जनत्वाङ्गीकारात् । स्यात् साङ्ख्य इति शेषः ।

परि०— दूषणान्तरेति । पूर्वसूत्रोक्तसाध्यवैकल्यरूपदृष्टान्तदोषेणाङ्गित्वानुभवविरोधरूप-दूषणान्तरेत्यर्थः । सूत्रे चोत्तरसूत्राच्चशब्दाकर्षो वा पूर्वसूत्रात् अपिपदानुवृत्तिर्वेति भावः । **एवशब्द इति** । चशब्दात्पर इति भावः । तदङ्गत्वोक्तित इत्यनुवादः । तस्योपसर्जनस्येत्यादि व्याख्या ।

शे०वा०— दूषणान्तरमिति । प्रमाणविरोधरूपमित्यर्थः । **दूषणसमुच्चयार्थ इति** । उच्यमानस्य प्रमाणविरोधस्योक्तेन साध्यवैकल्येन सह समुच्चयार्थ इत्यर्थः । **वक्ष्यमाणेति** । किमु सर्वेश्वरस्येत्यादिनाऽनुपदमेव वक्ष्यमाणेत्यर्थः ।

स०व्र०— चशब्द इति । 'तदङ्गित्वोक्तितश्चैव' इत्यत्र चशब्द इत्यर्थः ।

विठ्ठल०— दूषणान्तरं चेति । पूर्वसूत्रे साध्यवैकल्यं दृष्टान्तदूषणमुक्तम् । अनुभवविरोधं रूपं च दूषणान्तरमाहमित्यर्थः । तदङ्गत्वोक्तितद्गतानूद्य उक्तित इत्यस्याङ्गीकारादित्यर्थमभिप्रेत्याह **तदङ्गत्वेति** ।

॥ इति अङ्गित्व(प्रधानत्व)ानुभवविरोधः ॥
॥ इति उक्तदोषसाम्यम् (उक्तदोषापरिहारः) ॥

* * *

॥ अथ तत्र सिद्धान्ते प्रकरणविरोधस्य शङ्का तत्परिहारश्च ॥

११९ **सु०— 'नन्वेतत्प्रकृतविरुद्धम् । परमेश्वरस्य हि सर्वकर्तृत्वमुपपादयितुमयमारम्भः । तथा च अश्मानयनादिकार्ये जीवस्य प्राधान्योपपादनं कथं न प्रकरणविरुद्धमि'ति चेन्न, 'जीवगतस्य अमुख्यस्य कर्तृत्वस्य निरास एव यदा प्रमाणविरोधः तदा किमु वक्तव्यं सर्वकर्तुरीश्वरस्यापलापे, इत्येतत्प्रदर्शनायैव सूत्रकृता जीवस्याङ्गित्वोपपादनादि'त्याशयवानाह किम्विति ।**

अनु०— किमु सर्वेश्वरस्यास्य ह्यपलापाद्यतोऽखिलम् ॥

अस्य सर्वकर्तृत्वेन प्रतिपिपादयिषितस्य । उत्तरसूत्रे चास्याङ्गीकारवादत्वं स्फुटीभविष्यतीति हिशब्देन सूचयति ।

परि०— अमुख्यस्य कर्तृत्वस्येति । शरीरादिकं किञ्चित् प्रत्येव स्वातन्त्र्यरूपस्यैव कर्तृत्वस्येत्यर्थः । नन्वत्र जीवस्य शरीरादिकं प्रत्यङ्गित्वोपपादनं सूत्रकारस्य कैमुत्यद्योतनायाभ्युपगमवादेनैव, न तु वस्तुत इति कुतो ज्ञायत इत्यत आह **उत्तरसूत्रे चेति** । 'ज्ञशक्तिवियोगादि'त्यंशेन ज्ञस्य जीवस्य क्वापि शक्तिर्नेति, 'विप्रतिषेधाच्चे'ति सूत्रे जीवस्वातन्त्र्यस्य प्रत्यक्षादिविरुद्धत्वाद्धिताकरणादिविरुद्धत्वाच्च इति (वा) वक्ष्यमाणत्वात् तेनात्र सूत्रकारोक्तिरङ्गीकारवादेनेति ज्ञायते । अन्यथा तद्विरोधापत्तेरिति भावः ।

यादु०— अमुख्यस्य कर्तृत्वस्येति । असर्वकर्तृत्वस्येत्यर्थः । कतिपयकार्यप्राधान्यस्येति यावत् । न तु भगवदपेक्षयाऽमुख्यकर्तृत्वस्येत्यर्थः । तस्य जीवे वास्तवत्वेन वक्ष्यमाणाङ्गीकारवादविरोधप्रसङ्गात् । नन्वेवमपीश्वरस्यैव सर्वकर्तृत्वं तत्प्रतिपिपादयिषितं तद्भग्नं जीवस्यापि कतिपयकार्ये स्वातन्त्र्येण कर्तृत्वरूपाङ्गित्वस्यात्रोक्तत्वादित्यत आह **उत्तरसूत्रे चेति** । अस्याङ्गित्ववचनस्योत्तरसूत्रे हि 'ज्ञशक्तिवियोगादि'त्यनेन ज्ञस्य जीवस्य कुत्रापि कार्ये स्वातन्त्र्येण शक्तिवियोगादिति जीवस्य प्राधान्याभावोऽभिधीयते । ततश्च तदविरोधायात्रोच्यमानमङ्गित्वमङ्गीकारवादेनैवेति स्फुटमवगम्यते । तदीश्वरस्यैव सर्वकर्तृत्वमुपपन्नमिति प्रसिद्ध्यर्थकेन हिशब्देन सूचयतीत्यर्थः ।

कं०रा०— अस्येति । जीवप्राधान्यवादस्येत्यर्थः ।

श्रीनिधि०— ननु कैमुत्यप्रदर्शनायैव जीवस्याङ्गित्वोपपादनादिति किमर्थमुच्यते । वस्तुवृत्तं सर्वाङ्गित्वं जीवस्येवेत्याशयेनेव किं न स्यादिति चेन्न । प्रकरणविरोधस्तावत् ज्ञापकान्तरं चास्तीति भावेन **हि**शब्दः । प्रयुक्तो मूल इत्याह **उत्तरसूत्रे चेति** । उत्तराधिकरण इत्यर्थः । **अस्य** जीवाङ्गीकारस्य ।

शे०वा०— **अमुख्यस्य कर्तृत्वस्येति** । कतिपयकार्यकर्तृत्वस्येत्यर्थः । कतिपयकायपिक्षया प्राधान्यस्येति यावत् । न तु भगवदपेक्षयाऽमुख्यकर्तृत्वस्येत्यर्थः । तस्य जीवे वास्तवत्वेन वक्ष्यमाणाङ्गी-कारवादविरोधप्रसङ्गादित्यवधेयम् । नन्वीश्वरस्यैव कार्यमात्रं प्रति कारकान्तराप्रयोज्यत्वरूपं कर्तृत्वमिति सिद्धान्तः । तथा च न जीवस्य कतिपयकार्येऽप्युक्तरूपं कर्तृत्वमस्तीति कथं तदनङ्गीकारेऽनुभवविरोधाभि-धानमित्यतो वस्तुगत्या जीवस्योक्तरूपकर्तृत्वाभावेऽप्यङ्गीकृत्य तत्तदनङ्गीकारेऽनुभवविरोधाभिधानमिति भावेना-स्याङ्गीकारवादत्वे नियामकमाह **उत्तरसूत्रे चेति** । **अस्य** अङ्गित्वाभिधानस्य । उत्तरसूत्रे ईशशक्ति-वियोगादित्यनेनाज्ञस्य जीवस्य कुत्रापि कार्ये स्वातन्त्र्येण शक्तिवियोगादिति जीवस्य स्वातन्त्र्याभावसमर्थनात् स्वातन्त्र्याभिधानस्य वास्तवत्वे तद्विरोधप्रसङ्गादङ्गीकारवादत्वमेवेति निश्चीयत इति भावः ।

स०व्र०— **अमुख्यस्य कर्तृत्वस्येति** । उपचरितकर्तृत्वस्येत्यर्थः । ननु 'जीवस्य उपचरित-कर्तृत्वानङ्गीकार एव यदा प्रमाणविरोधः, तदा किमु वक्तव्यं सर्वकर्तुरीश्वरस्यापलाप' इत्येतत्प्रदर्शनायैव सूत्रकृता जीवस्याङ्गित्वोपपादनमित्युक्तम् । कुत एव तत् । जीवस्य मुख्यकर्तृत्वमेवाङ्गीकृत्य तस्मादङ्गित्वोपपादनमिति किं न स्यात् । तदीयज्ञापकाभावादित्यत आह **उत्तरसूत्रेति** । उत्तरसूत्रे जीवस्य एकदेशेऽपि सामर्थ्याभावस्य स्पष्टं प्रतिपादितत्वेन मुख्यकर्तृत्वस्यानङ्गीकृतत्वात् । तेनैव ज्ञायते मुख्यकर्तृत्वमङ्गीकृत्यैव तत्र प्रमाणविरोधः । वस्तुतस्तु मुख्यकर्तृत्वमीश्वरस्यैवेति ।

विठ्ठल०— **अमुख्यकर्तृत्वस्येति** । कतिपयकार्यविषयकस्वातन्त्र्यरूपकर्तृत्वस्येत्यर्थः । न तु पराधीनकर्तृत्वस्येति तथात्वे वक्ष्यमाणाङ्गीकारवादविरोधप्रसङ्गात् । नन्वेवं जीवस्यापि कतिपयकार्ये स्वातन्त्र्येण कर्तृत्वे यज्जन्मादिसूत्रोक्तमीश्वरस्यैव स्वातन्त्र्येण कृत्स्नप्रपञ्चकर्तृत्वमिह सिषाधयिषितं तदनुप-पन्नं स्यादित्यत आह **उत्तरसूत्रे चेति** । अस्य जीवविषयकं अङ्गित्ववचनस्योत्तरसूत्रे शक्तिवियोगा-दित्यनेन ज्ञस्य जीवस्य कुत्रापि कार्ये स्वातन्त्र्येण शक्तिवियोगादिति जीवस्य प्राधान्याभावोऽभिधीयते अतस्तदन्यथानुपपत्त्या चोच्यमानमङ्गित्वमङ्गीकारवादेनैवेति स्फुटमवगम्यते तदीश्वरस्यैव सर्वकर्तृत्वमिति प्रसिद्ध्यर्थकेन हिशब्देन सूचयतीत्यर्थः ।

॥ इति सिद्धान्ते प्रकरणविरोधस्य शङ्का तत्परिहारश्च ॥

* * *

॥ अथ तत्रान्ते तच्छङ्कापरिहारस्योपपादनम् ॥

१२० **सु०—** कथं जीवस्य प्राधान्यनिरासादप्यतिशयेनेश्वरनिरासः प्रमाणविरुद्ध इत्यत आह **यत इति** ।

यतः कारणात् **अखिलं** प्रमाणं योगिप्रत्यक्षानुमानागमात्मकं सर्वकर्तारमीश्वरं प्रतिपादयति, तस्मादिति पूर्वेण सम्बन्धः ॥

परि०— **पूर्वेणेति** । किमु सर्वापलापकः स्यादिति सम्बन्ध इत्यर्थः ।

विठ्ठल०— **सर्वकर्तारम्** इत्यत्र स्वातन्त्र्येणेति ग्राह्यम् ।

॥ इति तच्छङ्कापरिहारस्योपपादनम् ॥
॥ इति तन्मतनिरासः ॥
॥ इति निरीश्वरसाङ्ख्यैकदेशिनां पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादिनां मतस्यापाकरणम् ॥

॥ इति पुरुषाश्माधिकरणम् ॥
॥ २-२-४ ॥

* * *

॥ अथ अन्यथानुमित्यधिकरणम् ॥

॥ २-२-५ ॥

ब्र०सू०— ॐ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॐ ॥

॥ अथ निरीश्वरसाङ्ख्यैकदेशिनां प्रकृत्युपसर्जनपुरुषकर्तृत्ववादिनां मतस्य अपाकरणम् ॥
॥ अथ तत्रादौ अपाकरणीयमतनामसङ्केतदर्शनम् ॥
॥ अथ अपाकरणीयमतस्थितिदर्शनम् ॥

१२१ **सु०—** प्रकृत्युपसर्जनपुरुषकर्तृत्ववादिनां निरीश्वरसाङ्ख्यैकदेशिनां मतम् अत्र निराक्रियते ।

तथा हि अश्मानय(नप्र)नादिप्रवृत्तौ तावत्पुरुषस्य प्राधान्यं शरीरस्य च उपसर्जनत्वमनुभवसिद्धमित्युक्तम् । तथा च तद्दृष्टान्तेन महदादिकार्यमपि प्रकृत्युपसर्जनपुरुषकर्तृकमनुमीयते । पुरुषस्य च चेतनत्वेन न कर्तृत्वानुपपत्तिः । सुषुप्त्यादौ च कर्तृत्वानुपलम्भात् प्रकृतिरुपसर्जनभूताऽङ्गीकरणीया । एवञ्च किमीश्वरेणेति ।

परि०— अपौनरुक्त्याय सङ्गतिसूचनाय चास्यार्थमाह **प्रकृतीति** । **अनुमीयत इति** । महदादिकं जडोपसर्जनकपुरुषकर्तृकं कार्यत्वादश्मानयनादिवत् इत्यनुमीयत इत्यर्थः । न केवलं पूर्वत्रेव साध्यवैकल्यादिदृष्टान्तदोषोऽत्र नेति; प्रतिज्ञाव्याहतिरूपदोषोऽपि नेत्याह **पुरुषस्य चेति** । हेतोरप्रयोजकत्वं निराह **सुषुप्त्यादाविति** । मोहादिरादिपदार्थः । तदानीं प्रकृतेरुदासीनत्वादिति भावः । **कर्तृत्वेति** । ज्ञानेच्छाप्रयत्नरूपकर्तृत्वेत्यर्थः ।

गु०दी०— **प्रकृत्युपसर्जनपुरुषकर्तृकम्** इत्यत्र **पुरुषः** चतुर्मुखादिः । **सुषुप्त्यादौ च** इत्यत्र प्रकृतिरूपदेहस्य कर्तृत्वानुपलम्भादित्यर्थः ॥

यादु०— प्रकृतिरुपसर्जनेति । इन्द्रियरूपा प्रकृतिरुपसर्जनभूतेत्यर्थः । सुषुप्त्यादौ च सोपरतेति न कर्तृत्वापादिकेति भावः ।

कं०रा०— प्रकृतिरुपसर्जनभूतेति । यद्यपि सुप्त्यादावुपसर्जनभूतप्रकृतेरपि सत्त्वात् कर्तृत्वापत्तिः तथापि तदा प्रकृतेः पुरुषानधिष्ठानत्वेन करणत्वाद्यभावात् करणत्वादिरूपेणैव च तस्याः पुरुषं प्रत्युपसर्जनत्वाङ्गीकारान्न सुप्त्यादौ पुरुषस्य कर्तृत्वापत्तिरिति ध्येयम् ।

श्रीनिधि०— ज्ञशक्तिवियोगादिति । **ज्ञस्य** जीवस्य प्रकृतिप्रेरणशक्त्यभावप्रतिपादनात् तत्प्रेरणाशक्तस्य च सर्वप्राधान्यासम्भवादिति भावः ।

शे०वा०— 'अङ्गित्वं यदी'त्युत्तरभाष्यस्यान्यथाऽनुमितावित्यधिकरणव्याख्यानार्थत्वान्नानर्थक्यमित्यभिप्रेत्य तथाऽपि प्रतिपाद्यानुक्तिदोष इत्यतो भाष्य एव स्पष्टं तदुक्तेरत्रानुक्तिर्न दोषायेत्याशयवान् प्रकृत्युपसर्जनपुरुषकर्तृत्ववादमपाकरोतीति भाष्यं मनसि निधायैतदधिकरणप्रतिपाद्यमाह **प्रकृतीति** । ननु पूर्वन्यायेनैतदपि निराकृतमिति नार्थोऽधिकरणेनेत्यतः पूर्वोक्तस्याङ्गित्वानुपपत्तिदोषोद्धारेण पूर्वपक्षप्रवृत्तेर्न गतार्थत्वमिति भावेनाभ्यधिकाशङ्क्या पूर्वपक्षमाह **तथा हीति** । **चेतनत्वेन न कर्तृत्वानुपपत्तिरिति** । जीवस्य चेतनत्वेन बुद्धिमतस्तत्कार्यप्रयत्नरूपप्रवृत्तिसम्भवादिति भावः । ननु च पुरुषमात्रस्यैव कर्तृत्वोपपत्तौ किं प्रकृत्युपसर्जनस्य पुरुषस्य कर्तृत्वकल्पनयेत्यत आह **सुषुप्त्यादौ चेति** । आदिपदेन प्रलयादिपरिग्रहः । **प्रकृतिरुपसर्जनभूतेति** । इन्द्रियादिरूपा प्रकृतिरुपसर्जनभूतेत्यर्थः । सुषुप्त्यादौ च सोपरतेति न कर्तृत्वापादिकेति भावः ।

वा०र०— व्याख्यानार्थत्वादिति । अनेनाधिकरणान्तर इव परापव्याख्याननिरासार्थानुवादित्वं वा पूर्वपक्षानुवादित्वं वा न मन्तव्यं इति मन्दान् शिक्षयति **प्रतिपाद्येति** । उक्ताधिकरणस्येति बुद्ध्या विविच्य संयोजनीयम् । **वक्ष्यति च एतदधिकरणस्येति** । तर्हि सुषुप्त्यादावपि उपसर्जनीभूतप्रकृतिसद्भावात् कर्तृत्वापत्तिरित्यतो मूलाभिप्रायमाह **सुषुप्त्यादौ चेति** ।

विट्ठल०— प्रकृत्युपसर्जनभूतेति । सुप्ताविन्द्रियादिरूपप्रकृतिरुपरता तदा च न जीवस्य कर्तृत्वं विद्यते । अतो हेतोः प्रकृतिरुपसर्जनभूताङ्गीकार्येति भावः ।

॥ इति अपाकरणीयमतस्थितिदर्शनम् ॥

॥ इति अपाकरणीयमतनामसङ्केतदर्शनम् ॥

* * *

॥ अथ तन्मतापाकरणम् ॥

॥ अथ तत्रादौ पुरुषस्यैकाकिनः कुत्रापि स्वातन्त्र्यं नास्तीति पक्षस्य दूषणम् ॥

१२२ **सु०**— अत्र वक्तव्यं किं पुरुषस्यैकाकिनः कुत्रापि स्वातन्त्र्यं नास्ति उत अस्तीति । आद्यं दूषयितुं सूत्रं व्याचष्टे **अङ्गित्वमिति** ।

अनु०— अङ्गित्वं यदि तस्यैव स्वातन्त्र्यं चेन्न चाखिलम् ।
तत्प्रेरणेऽप्यशक्तत्वात्स्वतन्त्रोऽन्यो ह्यपेक्षितः ॥

यदि पुरुष(स्यैवाङ्गि)स्य **अङ्गित्वं** प्राधान्यं, कर्तृत्वमिति यावत् । प्रकृतेस्तूपसर्जनत्वमेवेति पूर्वमतादन्यथाऽनुमीयते । तत्रापि च पुरुषस्य **अखिलं स्वातन्त्र्यं न** अस्तीति पक्षो यद्यङ्गीक्रियते, तदा **स्वतन्त्रोऽन्यः** परमेश्वरोऽङ्गीकरणीय एव स्यात् । कुतः । प्रकृति**प्रेरणे** पुरुषस्य **अशक्तत्वात्** । मा भूत्तावत्कार्यान्तरार्थमीश्वरापेक्षा, । तथाऽपि प्रकृतिप्रेरणार्थमपेक्षणीय एवासाविति **अपे**रर्थः ।

एतदुक्तं भवति । न तावत् सत्तामात्रेण संयोगमात्रेण वा प्रधानस्य कर्तारं पुरुषं प्रत्युपसर्जनत्वम्, सुप्तिप्रलयादावपि प्रसङ्गात्; किन्तु करणत्वादिना । न च कर्त्राऽप्रयुज्यमानस्य करणत्वादिकं दृष्टम् । न च तदेव तत्प्रेरणे करणादि, स्ववृत्तिविरोधात् । तथा च प्रकृतिनिरपेक्षस्य पुरुषस्य क्वापि व्यापारासामर्थ्येऽवश्यमन्येन सहकारिणा भाव्यम् । न चासावप्येवंविध एव, तस्यापि सहकार्यन्तरापेक्षायामनवस्थाप्रसङ्गात् । अतः स्वतन्त्र एवासावङ्गीकरणीयः । स एव चेश्वर इति कथमसौ नाभ्युपगम्यत इति ।

परि०— तस्यैवेति मूलपदस्यार्थः **पुरुषस्यैवेति** । 'अङ्गित्वमि'त्यनुवादः । 'प्राधान्यमि'ति व्याख्या । तस्यैवेत्येवकारतात्पर्यं **प्रकृतेस्त्वित्यादि** । भाष्यार्थं सूत्रारूढं दर्शयति **इति पूर्वमतादिति** । द्वितीयपादार्थमाह **तत्रापि चेत्यादिना** । चतुर्थपादं योजयति **तदेति** । तृतीयपादार्थः **प्रकृतिप्रेरण इत्यादि** । **करणत्वादिनेति** । इन्द्रियतद्विषयात्मिकायाः प्रकृतेः, करणत्वकर्मत्वाधिष्ठानत्वादिना कारकरूपेण सहकारितयोपसर्जनत्वमित्यर्थः । अप्रयुज्यमानस्येति

पदच्छेदः । नन्विन्द्रियादिरूपप्रकृतिप्रेरणे स्वतो शक्तस्यापि पुरुषस्य तदेव करणादितयोपादाय तत्प्रेरयतीत्यस्तु किं स्वतन्त्रेश्वरेणेत्याशङ्क्य निराह **न च तदेवेति** । **स्ववृत्तीति** । एकस्यां प्रेरणक्रियायां तस्यैव करणत्वे कर्मत्वे अङ्गीकृते सति स्वस्य स्व(पूर्व)वृत्तिर्विरुध्यते । प्रेरणेन हि करणत्वम् । करणत्वेन च प्रेरणमिति प्रेरणे प्रेरणक्रियायाः अपेक्षितत्वादिति भावः । **एवंविध एवेति** । स्वातन्त्र्यहीन एव (न) भवितुमर्हतीत्यर्थः । कुत इत्यत आह **तस्यापीति** ।

यादु०— किन्तु करणत्वादिनेति । इन्द्रियरूपायाः प्रकृतेः करणत्वं, विषयरूपायाः कर्मत्वं शरीरादिरूपाया अधिकरणत्वमित्यादि द्रष्टव्यम् । करणत्वादिकं दृष्टमित्यनन्तरमन्तःकरणादिरूपस्य प्रधानस्यापि कर्तृप्रयोज्यत्वमवश्यं वाच्यमिति शेषः । कर्तुश्च पुरुषस्यैकाकिनः क्वाप्यसामर्थ्यात् प्रधानप्रेरणार्थमपि तस्य सहकारिकारणादिरूपं किञ्चिद्वाच्यम् । तच्च न तावत् प्रधानमेवेत्याह **न च तदेवेति** । **स्ववृत्तीति** । स्वापेक्षया स्वस्य पूर्ववृत्तित्वविरोधादित्यर्थः । आत्माश्रयत्वप्रसङ्गादिति यावत् । प्रधानप्रेरणे पुरुषस्य यदि प्रधानमेव करणादिरूपं तर्हि तस्यापि करणादिरूपतया पुरुषप्रयोज्यत्वस्यावश्यकत्वे प्रधानविषयकप्रेरणापेक्षया प्रधानविषयकप्रेरणायाः पूर्ववर्तित्वं प्राप्तं, ततश्चात्माश्रय इति । **एवंविध एवेति** । प्रकृतिसहकारिभूतान्योऽपि सहकार्यन्तरसापेक्ष एवेत्यर्थः ।

वं०प०— अखिलं स्वातन्त्र्यं नास्तीति । उपसर्जनीभूतप्रकृत्यपेक्षाऽङ्गीकारादित्यर्थः । कुतो न चेत्यत आह **तस्यापीति** ।

श्रीनिधि०— ननु प्रकृतेः प्रेरणमेव मास्तु । एवं च प्रेरणानपेक्षयैव उपसर्जनभूतत्वे सम्भवति न स्वतन्त्रान्तरमङ्गीकरणीयमित्यत आह **एतदुक्तं भवतीति** । **करणत्वादिनेति** । **आदि**पदेनाधिकरणत्वादिकम् ।

शे०वा०— ननु प्रकृत्युपसर्जनपुरुषकर्तृत्ववादिना पुरुषस्य स्वातन्त्र्याङ्गीकारात् 'तत्प्रेरणेऽप्यशक्तत्वादि'ति दूषणानुपपत्तिः । 'स्वातन्त्र्यं चेन्न चाखिलमि'त्यसदनुवादप्रसङ्गश्चेत्यतो नेदं स्वातन्त्र्यपक्षे दूषणं किन्त्वस्वातन्त्र्यपक्ष एवेति नानुपपत्तिरिति भावेनास्वातन्त्र्यपक्षदूषणपरतयोत्तरग्रन्थं योजयितुं सम्भावितं पक्षद्वयं तावद्विकल्पयति **अत्र वक्तव्यमित्यादिना** । **प्रसङ्गादिति** । सत्तासंयोगयोस्तदाऽपि सत्त्वादिति भावः । कथं तर्हि प्रधानस्य पुरुषं प्रत्युपसर्जनत्वमिति पृच्छति **किन्त्विति** । उत्तरमाह **करणत्वादिनेति** । आदिपदेन कर्मत्वाधिकरणत्वयोः परिग्रहः । तत्रेन्द्रियरूपायाः प्रकृतेः करणत्वेन, विषयरूपायाश्च तस्याः कर्मत्वेन, शरीररूपायाश्च तस्या अधिकरणत्वेन, पुरुषं प्रत्युपसर्जनत्वमिति बोध्यम् । अस्त्वेवं करणत्वादिनैव प्रधानस्य पुरुषं प्रत्युपसर्जनत्वं किं तावताऽपीत्यत आह **न चेति** । ततश्च करणादित्वात् प्रधानस्य

कर्तृप्रयोज्यत्वमवश्यं वाच्यमिति शेषः । कर्तुश्च पुरुषस्यैकाकिनः क्वाप्यसामर्थ्यात्प्रधानप्रेरणार्थमपि तस्य सहकारिकारणादिरूपं किञ्चिद्वाच्यम् । तच्च किं प्रधानमेव किं वाऽन्यश्चेतत इति विकल्पं मनसि निधायाद्यं दूषयति **न च तदेवेति** । **तत्प्रेरणे** प्रधानप्रेरणे । **स्ववृत्तीति** । स्वापेक्षया स्वस्य पूर्ववृत्तित्वविरोधादित्यर्थः । आत्माश्रयप्रसङ्गादिति यावत् । प्रधानप्रेरणे पुरुषस्य यदि प्रधानमेव करणादिरूपं तर्हि तस्यापि करणादित्वेन पुरुषप्रयोज्यत्वस्यावश्यकत्वात् प्रधानविषयकप्रेरणापेक्षया प्रधानविषयकप्रेरणायाः पूर्ववृत्तित्वप्राप्तेरिति भावः । अन्यश्चेतन एव सहकारीति पक्षेऽपि स किमस्वतन्त्रः स्वतन्त्रो वेति विकल्पं मनसि निधायाद्यमनूद्य दूषयति **न चेति** । **एवंविधः** सहकार्यन्तरसापेक्ष एवेत्यर्थः ।

वा०र०— इति दूषणेति । इत्येवंव्याख्यात 'ज्ञशक्तिवियोगात्' इति सूत्रोक्ते दूषणस्येत्यर्थः । प्रसङ्गश्चेत्यत्रापि अङ्गीकारादिति पूर्व एव हेतुः । **तावद्विकल्पयतीति** । विकल्पपूर्वक तत्तत्पक्षनिरासकतया भाष्यं योजयतीत्यर्थः । **तत्रेन्द्रियरूपाया इति** । पुरुषो हि शरीरं अधिष्ठाय इन्द्रियैः विषयं ज्ञात्वा इच्छति प्रयतते चेति त्रिरूपप्रकृतरूपयोग इति भावः । तस्य सहकारि वाच्यम् । तच्च किं कारणादिरूपं प्रधानमेवेति किं वेति पाठः । सहकारिकारणादिरूपमिति पाठेऽपि सहकारि किञ्चित् वाच्यं तच्च करणादिरूपं प्रधानमेवेति योजनाश्रयणात् अन्यचेतनस्य करणादिरूपत्वाभावेऽपि न क्षतिः । वक्ष्यति च । अन्यश्चेतन एव सहकारीति ज्ञेयम् । मूलाभिप्रेतं दूषणं स्पष्टमाह **आत्माश्रय इति** ।

स०व्र०— स्ववृत्तिविरोधादिति । देवदत्तः कुठारेण काष्ठं छिनत्तीत्यादौ ऊर्ध्वाधोदेशसंयोग-विभागलक्षणस्वव्यापारेण साक्षात्कर्मणि काष्ठादौ द्वैधीभावलक्षणफलाधायकस्यैव कुठारादेः कारणत्वस्यैव दर्शनात् अव्यवधानेन कर्मसमवेतफलाधायकक्रियाश्रयत्वस्यैव कारणलक्षणत्वात् परसमवेतक्रियाजन्यफलाधारत्वस्यैव कर्मलक्षणत्वात् प्रकृतिकर्मकप्रेरणं प्रति प्रकृतेरेव कारणत्वे कार्यानुगुणप्रयत्नलक्षणस्वव्यापारजन्यकार्यानुगुण-त्वावस्थाविशेषरूपफलस्य स्वस्मिन् वृत्तेर्विरोधात् लक्षणविरुद्धत्वात् प्रकृतिः न प्रेरणकरणं तत्कर्मत्वात् । यत् यत्कर्म तत् तत्करणं न यथा कुठारादीत्यनुमानविरुद्धत्वादित्यर्थः । यद्वा प्रकृतेः प्रेरणाकर्मत्वे तज्जन्यातिशयाधारत्वं स्यात् । तस्यैव कर्मलक्षणत्वात् । यदि च करणत्वं तर्हि कर्मनिष्ठातिशया-धायकव्यापारवत्वं स्यात् । न चेष्टापत्तिः । उक्तलक्षणविरोधात् । प्रकृतिः अतिशयाधायकव्यापारवती न, अतिशयाश्रयत्वात् सम्प्रतिपन्नवत् । प्रकृतिः अतिशयाश्रयो न, तदाधायकव्यापारवत्त्वात् सम्मतवदि-त्यनुमानेन स्वव्यापारजन्यातिशयस्य, स्वस्मिन् स्वनिष्ठफलाधायकव्यापारस्य च स्वस्मिन् वृत्तेर्विरुद्धत्वा-दित्यर्थः ।

विठ्ठल०— पुरुषस्य प्रकृतिप्रेरणे असक्तत्वेऽपीश्वराङ्गीकारः कुतः । स्वत एव प्रकृतेः पुरुषं प्रत्युपसर्जनत्वोपपत्तेः प्रकृतिप्रेरकस्यावश्यकत्वेऽपि यस्य कस्यचित्प्रेरकस्योपपत्तेरीश्वराङ्गीकारवैय्यर्थ्यमित्यत आह **एतदुक्तं भवतीति** । **करणत्वादिनेति** । इन्द्रियविषयशरीरादिरूपायाः प्रकृतेः क्रमेण करणवत्त्व-

कर्तृत्वाधिकरणत्वादिकं द्रष्टव्यम् । **अप्रयुज्यमानस्येति** । कर्ता अप्रयुज्यमानस्य कुठारादेः करणत्वादर्शनात् करणादिरूपस्य प्रधानस्य कर्तृप्रयोज्यत्वमवश्यमङ्गीकरणीयमिति भावः । नन्विन्द्रादिरूपप्रकृतिप्रेरणे केवलस्य पुरुषस्याशक्तत्वेऽपि तदेवेन्द्रियादिकं सहकारिकारणतयोपादायेन्द्रियादिप्रेरकत्वं सम्भवतीत्याशङ्क्य निषेधति **न चेति** । **स्ववृत्तीति** । पुरुषकर्तृककरणत्वापादकस्वप्रेरणार्थं स्वयमेव करणादितयोपेक्ष्यत इत्युक्ते स्वापेक्षतया स्वस्य पूर्ववृत्तित्वविरोधादित्यर्थः । आत्माश्रय इति यावत् । **एवंविध एवेति** । सहकार्यन्तरसापेक्षतया अस्वतन्त्र इत्यर्थः ।

॥ इति पुरुषस्यैकाकिनः कुत्रापि स्वातन्त्र्यं नास्तीति पक्षस्य दूषणम् ॥

* * *

॥ अथ पुरुषस्यैकाकिनः क्वचित् स्वातन्त्र्यमस्तीति पक्षस्य दूषणम् ॥

१२३ **सु०— द्वितीयं निषेधति न चेति ।**

अनु०— न च स्वातन्त्र्यमस्यैव

तथा सति प्रकृत्यनपेक्षत्वप्रसङ्गेन (अस्य) स्वसिद्धान्तविरोधापत्तेरिति भावः ।

अनेन विप्रतिषेधाच्चेति सूत्रं व्याख्यातं भवति ।

सूत्रस्यार्थान्तरमाह प्रत्यक्षादीति ।

प्रत्यक्षादिविरोधतः ।

प्रत्यक्षादिप्रमाणैर्हि पुरुषस्यास्वातन्त्र्यं सर्वदा उ(सर्वत्रो)पलभ्यते ।

प्रकारान्तरेण व्याचष्टे हितेति ।

हिताक्रियादिदोषाच्च

आदिपदेनाहितक्रियोपादीयते ।

परि०— द्वितीयमिति । क्वचित्स्वातन्त्र्यमस्तीति पक्षमित्यर्थः । एवकारसूचितं दोषं स्वयमाह **तथा सतीति** । **इति सूत्रं व्याख्यातमिति** । स्वसिद्धान्तविरोधाच्चेत्येवंरूपेण व्याख्यात-

मित्यर्थः । **प्रत्यक्षादिप्रमाणैरिति** । तत्तदनुभवरूपप्रत्यक्षेणापूर्णत्वाल्पशक्तित्वाद्यनुमानैः 'अपूर्णोऽयं जीवसङ्घोऽस्वतन्त्र' इत्यादि श्रुत्यादिप्रमाणैरित्यर्थः । **प्रकारान्तरेणेति** ।

वं०प०— तथा सति अस्यैव स्वातन्त्र्ये । **स्वसिद्धान्तेति** । उपसर्जनीभूतप्रकृत्यपेक्षाङ्गीकारादित्यर्थः । **विप्रतिषेधाच्चेति** । स्वसिद्धान्तविरोधादित्यर्थः ।

कं०रा०— पुरुषस्यैव स्वातन्त्र्याङ्गीकारे प्रत्यक्षादिविरोधः कथमित्यत आह **प्रत्यक्षादिप्रमाणैरिति** । **प्रकारान्तरेणेति** । 'विप्रतिषेधाच्चे'ति सूत्रं प्रकारान्तरेण व्याचष्ट इत्यर्थः । **हिताक्रियादिदोषाच्चेति** । मूलवाक्येन 'विप्रतिषेधाच्चे'ति सूत्रं जीवस्यैव स्वातन्त्र्ये हि हिताकरणाहितकरणविरोधापत्तेरिति व्याख्यानं भवतीति भावः ।

श्रीनिधि०— स्वसिद्धान्तविरोधापत्तेरिति । तेन प्रकृत्यनपेक्षत्वप्रसङ्गेन कुत्रापि स्वातन्त्र्यानङ्गीकारादिति भावः । **अनेनेति** । विप्रतिषेधात् स्वसिद्धान्तेन विरोधादित्यर्थः । **प्रकारान्तरेण व्याचष्ट इति** । एवं च हिताक्रियादिदोषेण विरोधादिति सूत्रार्थः ।

शे०वा०— द्वितीयम् एकाकिनः कुत्रापि स्वातन्त्र्यमस्तीति द्वितीयम् । **तथा सति** एकाकिनः स्वातन्त्र्याभ्युपगमे । **प्रकृत्यनपेक्षत्वेति** । केवलस्यैव पुरुषस्य कर्तृत्वोपपत्तेरिति भावः । न च स्वातन्त्र्यमित्यादेरुत्सूत्रत्वादभाष्यत्वं परिहरति **अनेनेति** । तर्हि स्वातन्त्र्यमित्युक्तरीत्यैव विप्रतिषेधाच्चेति सूत्रव्याख्यानसिद्धेः प्रत्यक्षादिविरोधत इत्याद्युत्तरभाष्यमनर्थकमित्यतो विप्रतिषेधाच्चेति सूत्रस्यार्थान्तरकथनपरत्वात् तस्य न तदित्याशयेन तत्परतयोत्तरभाष्यं योजयति **सूत्रस्येति** ।

वा०र०— उत्सूत्रत्वादिति । उत्सूत्रत्वादभाष्यत्वमिति प्राप्तां शङ्कां परिहरतीत्यर्थः । **तस्येति** । उत्तरभाष्यस्येत्यर्थः । **न तदिति** । नानर्थक्यमित्यर्थः ।

विट्ठल०— द्वितीयमिति । क्वचित्स्वातन्त्र्यमस्तीति द्वितीयमित्यर्थः । **स्वसिद्धान्तविरोध इति** । सर्वत्रापि प्रधानस्य सापेक्षस्यैव पुरुषस्य प्रवृत्तेः तत्सिद्धान्तेनाश्रितत्वादिति भावः । **व्याख्यातं भवतीति** । स्वसिद्धान्तविप्रतिषेधाद्विरोधादिति व्याख्यातमित्यर्थः । **प्रत्यक्षादीति** । अनुभवरूपप्रत्यक्षेण जिघृक्षोर्ग्रहणाभावाद्यनुमानेन 'अल्पशक्तिरसार्वज्ञं पारतन्त्र्यं च सर्वदे'त्यागमेन चेत्यर्थः । **प्रकारान्तरेणेति** । हिताकरणादिदोषेण विप्रतिषिद्धत्वादित्यर्थः ।

॥ इति पुरुषस्यैकाकिनः क्वचित् स्वातन्त्र्यमस्तीति पक्षस्य दूषणम् ॥

॥ इति तन्मतापाकरणम् ॥

॥ इति निरीश्वरसाङ्ख्यैकदेशिनां प्रकृत्युपसर्जनपुरुषकर्तृत्ववादिनां मतस्य अपाकरणम् ॥

* * *

॥ अथ अनीश्वरमतपञ्चकनिरासस्योपसंहारः ॥
॥ अथ तत्रादौ अनीश्वरमतस्याभद्रत्वम् ॥

१२४ **सु०—** एवं पञ्च मतानि निराकृत्योपसंहरति **भद्रमिति** ।

भद्रं नानीश्वरं मतम् ।

शे०वा०— अनीश्वरमतासामञ्जस्यस्य पूर्वमेवोक्तत्वात् किं पुनस्तदुक्त्येत्यतस्तदुपसंहाररूपत्वान्न पुनरुक्तिरिति भावेनोपसंहाररूपतयोत्तरभाष्यं योजयति **एवमिति** ।

॥ इति अनीश्वरमतस्याभद्रत्वम् ॥

* * *

॥ अथ तत्रान्ते द्वितीय-सेश्वर(पातञ्जल)साङ्ख्यमतस्य निरीश्वरमतत्वे कारणकथनम् ॥

१२५ **सु०—** पातञ्जलाभिमतस्येश्वरस्येश्वरलक्षणाभावात् तदप्यनीश्वरमेव मतमिति ।

शे०वा०— ननु च पातञ्जलैरीश्वरस्याङ्गीकारात् कथं तन्मतस्यानीश्वरमतत्वमित्यत आह **पातञ्जलाभिमतस्येति** । **ईश्वरलक्षणेति** । स्वातन्त्र्यादिरूपेश्वरलक्षणवत्त्वानभ्युपगमात् फलतोऽनीश्वरवादान्तर्भावादान्तर्भावात् तन्मतमप्यनीश्वरमतमेवेति भावः ।

॥ इति द्वितीय-सेश्वर(पातञ्जल)साङ्ख्यमतस्य निरीश्वरमतत्वे कारणकथनम् ॥
॥ इति अनीश्वरमतपञ्चकनिरासस्योपसंहारः ॥

* * *

॥ अथ एतदन्यानां निरीश्वरमतानां विशेषतो निराकरणाभावे कारणकथनम् ॥

१२६ **सु०—** 'नन्वन्यान्यपि भिन्नकसंसारमोचकादीन्यनीश्वराणि मतानि सन्ति, तानि कुतो न निराक्रियन्ते । उक्तदोषैरेव निरस्तत्वात्, अभ्यधिकाशङ्काऽभावाच्च' इत्याह **संसारिण इति** ।

संसारिणोऽन्यं सर्वेशं सर्वशक्तिमनौपमम् ।

चेतनाचेतनस्यास्य सत्त्वादेस्तदधीनताम् ।
नाङ्गीकुर्वन्ति ये तेषां सर्वेषां च समा इमे ॥

संसारिपदमीश्वरातिरिक्तोपलक्षणम् । **सर्वेशम्** इति विशेष्यपदम् । तेन न पौनरुक्त्यम् । **उपमैवौपमम्, स्वार्थिकोऽण्; नास्त्यौपमं यस्यासौ अनौपमः** । यद्वोपमाया अयमौपमः, सोपम इति यावत्, ततो नञ्समासः । **अस्य** प्रपञ्चस्य । **इमे** कथिता दोषा इति शेषः । न केवलं सर्वेशं स्वरूपेणानङ्गीकुर्वतामिमे दोषाः, किन्तु तमङ्गीकृत्यापि जीवा(द्य)न्यत्वादिविशेषणानि तस्यानङ्गीकुर्वतामपि; तथात्वे फलतस्तस्यानीश्वरत्वादिति ।

परि०— हिताकरणाहितकरणविरोधाच्चेत्येवंरूपेणेत्यर्थः । मुक्तानां जडस्य च सङ्ग्रहायाह **संसारिपदमिति** । **विशेष्यपदमिति** । रूढ्या विष्णुपरं न यौगिकत्वेन, **तेन** रूढत्वेन हेतुना चेतनाचेतनस्येत्यादिना न पौनरुक्त्यमित्यर्थः । सर्वेषां चेत्युक्तितात्पर्यमाह **न केवलमिति** । **तथात्व इति** । उक्तविशेषणहीनत्व इत्यर्थः ।

यादु०— **ईश्वरातिरिक्तेति** । तेन मुक्तजडयोरपि सङ्ग्रह इति भावः । **विशेष्यपदमिति** । रूढमेवेदं पदमिति भावः । **तेन न पौनरुक्त्यमिति** । 'चेतनाचेतनस्यास्य सत्त्वादेस्तदधीनतामि'त्यनेनैव सर्वेशत्वस्योक्तत्वात् पुनर्यौगिकेन सर्वेशपदेन तदुक्तौ पौनरुक्त्यमित्यर्थः ।

वं०प०— **अणिति** । अणित्वादादिभूतस्योकारस्यौकाररूपवृद्धौ औपममिति भवति । **नञ्समास इति** । नं औपमोऽनौपम इति नञ्समास इत्यर्थः । **तथात्वे** जीवान्यत्वादिविशेषणानङ्गीकारे । **फलत इति** । जीवाभेदादिप्राप्त्येत्यर्थः ।

कं०रा०— **सर्वेशमितीति** । सर्वेशमिति पदं विशेष्यार्थकमेव न तु सर्वस्येष्ट इति व्युत्पत्त्या सर्वशक्तित्वरूपविशेषणार्पकं तेन सर्वेशमित्यनेन सर्वशक्तिमित्यस्य न पौनरुक्त्यमिति भावः । नन्वनुपममिति वक्तव्येऽनौपममिति कथं प्रयोजीत्यत आह **उपमैवेति** ।

श्रीनिधि०— रमाऽसङ्ग्रहायाह **संसारिपदमिति** । उपमासम्बन्धी औपमः । ततः बहुव्रीहौ उपमासम्बन्धवद्रहित इति प्रतीयते न तदुपमाराहित्यमतो व्याख्याति **उपमैवेति** ।

शे०वा०— ननु च 'संसारिणोऽन्यमि'त्याद्युत्तरभाष्यमनर्थकम् । न चोक्तदोषाणां सर्वसाङ्ख्यमतसमानताप्रतिपादनार्थमेतदिति वाच्यम् । रचनानुपपत्तेरित्यादिना चतुर्विधसाङ्ख्यमतानां विशिष्य विशिष्यैव निरस्तत्वेन पुनस्तेषूक्तदोषसाम्यप्रतिपादनस्यानर्थक्यात् । न चोक्तचतुर्विधसाङ्ख्यमतव्यतिरिक्तसाङ्ख्यमताना-मुक्तदोषसाम्यप्रतिपादनार्थत्वान्नानर्थक्यमिति वाच्यम् । निरस्तसाङ्ख्यमतव्यतिरिक्ततन्मतानामेवाभावात् । भावे वा तेषामपि विशिष्यैवोपन्यस्य निरसनीयतया पृथगनिरासे निमित्ताभावाच्चेत्यतस्तत्सद्भावप्रदर्शनपूर्वकं तेषां पृथगनिरसनीयतासमर्थनार्थत्वादुक्तदोषसाम्यनिरूपणस्य नानर्थक्यमित्याशयेन तत्परतयोत्तरभाष्यं योजयितुमति-रिक्तसाङ्ख्यमतसद्भावं शङ्कामुखेन दर्शयति **नन्विति** । ननु केवलाचेतनकर्तृत्वपक्षनिरासेन निरस्तस्यापि तदेक-देशिनिरीश्वरमतस्य यथा पुनर्निरासस्तथाऽत्राप्युक्तदोषनिरस्तस्य भिन्नकादिमतस्य पुनर्निरासो भविष्यतीत्यतो युक्तं केवलाचेतनकर्तृत्वपक्षनिरासेन निरस्तस्यापि तदेकदेशिमतस्य पुनरत्र निराकरणं, सन्निधानाच्चेतनस्येत्याद्युक्त-रीत्याऽभ्यधिकाशङ्कासद्भावान्न तु भिन्नकादिमतस्य तदभावादित्याह **अभ्यधिकेति** । ननु संसारिणोऽन्यमि-त्ययुक्तम् । अत्र संसारिपदस्य संसारिमात्रपरत्वे मुक्तप्रतियोगिकभेदालाभाल्लक्षणया मुक्तपरत्वे च संसार्यादि-भेदालाभान्मुक्तोपलक्षणत्वे च संसारिमुक्तभेदलाभेऽपि जडभेदालाभात् त्रितयोपलक्षणत्वेऽपि त्रितयमात्रभेद-लाभेऽपि लक्ष्मीभेदस्यालाभाच्चेतनाचेतनात्मकसर्वोपलक्षणत्वे चेश्वरभेदस्यापि लाभप्रसङ्गसम्भवादित्यत ईश्वरा-तिरिक्तमात्रोपलक्षणत्वादपेक्षितभेदलाभस्येश्वरभेदालाभस्य च सम्भवान्नानुपपत्तिरिति भावेन व्याख्याति **संसारि-पदमिति** । **ईश्वरातिरिक्तोपलक्षणं** ईश्वरातिरिक्तसर्वोपलक्षणमित्यर्थः । **विशेष्यपदमिति** । संज्ञापद-मित्यर्थः । **न पौनरुक्त्यमिति** । सर्वेशमित्यस्य 'चेतनाचेतनस्यास्य सत्त्वादेस्तदधीनतामि'त्यनेनेति शेषः । सर्वेशमित्यस्यापि विवक्षितावयवार्थत्वे उभयोरेकार्थत्वप्राप्त्या पौनरुक्त्यं स्यान्न चैवमिति भावः । ननु न विद्यते उपमा यस्येति विग्रहेऽनुपममिति भवितव्यमनौपममिति तु कथमित्यत आह **उपमैवेत्यादिना** । **स्वार्थिक इति** । प्रज्ञादित्वादिति भावः । स्वार्थिकत्वेऽणो वैयर्थ्यमापद्यत इत्यपरितोषादाह **यद्वेति** । सर्वेषां चेति चशब्दद्योतितं समुच्चयं दर्शयति **न केवलमिति** ।

वा०र०— निमित्ताभावाच्च इति । निरसनीयतयेत्युक्तसमुच्चयार्थश्चशब्दः । मुक्तादिसंसार्यादि इत्यादिपदाभ्यां जडपरिग्रहः । **मुक्तोपलक्षणत्वे चेति** । अजहत्स्वार्थलक्षणायां संसारिणोऽपि ग्रहणात् तद्भेदप्राप्तिरिति भावः । **ईश्वरातिरिक्तेति** । संसारिपदस्येत्यनुवर्तते । **संज्ञापदमिति** । अवयवार्थं विवक्षा-मपुरस्कृत्य अखण्डवृत्त्या प्रवर्तमानं रूढं पदं इत्यर्थः । वक्ष्यति च । **विवक्षितावयवार्थत्वेति** । **प्रज्ञा-दित्वादिति** । प्रज्ञादेराकृतिगणत्वादिति भावः । स्वपक्षसिद्धिरूपं यत्फलमिति सम्बन्धः ।

स०व्र०— तेन न पौनरुक्त्यमिति । 'सर्वेशमि'त्यस्य 'चेतनाचेतनस्यास्य सत्तादेस्तदधीनतामि'-त्यनेन पौनरुक्त्यमित्यर्थः । वस्तुतस्तु 'सर्वशक्तिं' इत्यनेन न पौनरुक्त्यमित्यर्थः । 'सर्वेशमि'त्यस्य विशेष्यपरत्वाभावे सर्वस्य ईष्टे असाविति सर्वविषयकशक्तिमत्त्वप्राप्तौ तेन न पौनरुक्त्यमिति भावः ।

विठ्ठल०— चित्प्रकृतिमुक्तजडस्वीकारायाह **संसारिपदमिति** । सर्वशक्तिमित्यनेन चेतनाचेतनस्येत्यर्धेन च सर्वेशमिति पुनरुक्तं उभयत्राप्यर्थात्सर्वेशतालाभादित्यत आह **सर्वेशमितीति** । **तथात्वे फलत इति** । संसार्यन्यत्वसर्वेशत्वाभावे दुःखित्वाल्पशक्तित्वादिप्रसक्त्या ईश्वरत्वबाधादिति भावः ।

॥ इति एतदन्यानां निरीश्वरमतानां विशेषतो निराकरणाभावे कारणकथनम् ॥

* * *

॥ अथ अनीश्वरमतासामञ्जस्यप्रदर्शनस्य फलम् ॥

१२७ **सु०—** किमतो यद्येवमनीश्वरमतमसमञ्जसमित्यत आह **तस्मादिति** ।

अनु०— तस्माच्छ्रुतिप्रमाणेन युक्तिभिश्च परो हरिः ।
अङ्गीकार्यतमो नित्यः सर्वैरपि सुनिश्चितम् ॥

न परपक्षनिरासमात्रेण स्वपक्षसिद्धिरित्यतः श्रुतिप्रमाणेन इत्याद्युक्तम् । पर उत्कृष्ट उक्तविशेषणोपपन्नः । नित्य इति सामर्थ्यादङ्गीकारस्य विशेषणम्, सर्वदेति यावत् । निश्चयस्य स्वपरपक्षसाधनोपालम्भातिरिक्तानपेक्षत्वात् प्रामाणिकनिश्चयस्य चासमीचीनत्वायोगात् सुनिश्चितम् इत्युक्तम् । प्रथमाध्यायव्युत्पादितेन स्वपक्षसाधनेनात्र व्युत्पादितेन परपक्षोपालम्भेन च यथालक्षितं ब्रह्म सिद्धमित्याशयः ।

परि०— श्रुतिप्रमाणेनेत्याद्युक्तमिति । पूर्वाध्यायोक्तश्रुतियुक्तिभिरित्यग्रे व्यक्तम् । पर इत्यस्यार्थान्तरं **उक्तविशेषणोपपन्न इति** । विलक्षणार्थत्वात् तस्येति भावः । **सामर्थ्यादिति** । तद्विशेषणत्वयोग्यतावशादित्यर्थः । **सुनिश्चितमिति** क्रियाविशेषणम् । तत्र निश्चयस्य सुष्ठुत्वं व्यनक्ति **निश्चयस्येति** । **यथालक्षितमिति** । जगज्जन्मादिकारणत्वादिलक्षणवत्तयोक्तमित्यर्थः ।

यादु०— सामर्थ्यादिति । अर्थाबाधरूपयोग्यताबलादित्यर्थः । नित्यत्वस्याङ्गीकारविषयविशेषणत्वं वैयर्थ्यप्रसङ्गेन बाधितमिति भावः ।

कं०रा०— उक्तविशेषणेति । जीवाद्यन्यत्वादिविशेषणोपपन्न इत्यर्थः । 'अङ्गीकार्यतमो नित्य' इत्यत्र नित्य इत्यस्य परशब्देनैव हरेर्नित्यत्वस्य लब्धतया तद्विशेषणत्वायोगादसामर्थ्यं, न चाङ्गीकार्यविशेषणत्वायोगादङ्गीकारविशेषणत्वमाह **नित्य इतीति** । नित्य इत्यस्याङ्गीकारविशेषणत्वे तस्य फलितमर्थमाह **सर्वदेतीति** ।

श्रीनिधि०— सामर्थ्यादिति । अवैय्यर्थ्यादित्यर्थः । **यथालक्षितं** लक्षितमनतिक्रम्य ।

शे०वा०— तस्मादित्युत्तरभाष्यानर्थक्यमाशङ्क्य स्वपक्षसिद्धिरूपपरपक्षोपालम्भफलप्रदर्शनार्थत्वान्न तदिति भावेन तत्फलोपदर्शकतया तद्योजयितुं परपक्षोपालम्भफलाकाङ्क्षामुत्थापयति **किमत इति** । ननु तत्स्मात् परपक्षस्य निरस्तत्वात् परो हरिरङ्गीकार्यतम इत्येतावतैव परपक्षनिरासस्य स्वपक्षसिद्धिरूपफलोक्तेः 'श्रुति-प्रमाणेने'त्यादेरानर्थक्यमित्यतः स्वपक्षसाधकप्रमाणोपन्यासार्थत्वात् तस्य न तदिति भावेन स्वपक्षसाधकोप-न्यासस्यावश्यकतामुपदर्शयति **न परपक्षेति** । **सामर्थ्यादिति** । योग्यत्वादित्यर्थः । नित्यत्वस्याङ्गीकार-विषयविशेषणताया वैयर्थ्यप्रसङ्गेनायोग्यत्वादिति भावः ।

वा०र०— अङ्गीकारस्य विशेषणमिति मूलम् । अङ्गीकाररूपक्रियाविशेषणमित्यर्थः । 'त्वमग्रे प्रथमो मातरिश्वन' इत्यत्र प्रथम इति प्रथमान्तस्य भाष्यटीकोक्ताविर्भावरूपक्रियाविशेषणत्ववदिदं व्युत्पाद्यम् । इत्यशेषमिति मङ्गलम् ।

विठ्ठल०— उत्कृष्ट इत्यनेन लब्धमर्थमाह **उक्तविशेषणेति** । **सामर्थ्यादिति** । अबाधितत्वेन सर्वदाङ्गीकार्यत्वयोग्यतावशात् सर्वदेत्यर्थकं नित्यपदमङ्गीकार्यमित्यत्र प्रकृत्यर्थविशेषणमित्यर्थः । सुनिश्चित-मित्येतदङ्गीकारं क्रियाविशेषणमिति मत्वा तदभिप्रायमाह **निश्चयस्येति** ।

चषकः— सामर्थ्यादिति । तद्विशेषणत्वयोग्यत्वादित्यर्थः । अर्थाबाधरूपयोग्यताबलादित्यर्थः । नित्यत्वस्याङ्गीकारविषयविशेषणत्वं वैयर्थ्यप्रसङ्गेन बाधितमिति भाव इत्याप्याशयमाविर्भावयन्ति ।

॥ इति अनीश्वरमतासामञ्जस्यप्रदर्शनस्य फलम् ॥

* * *

॥ अथ उत्तराधिकरणानामनारम्भणीयत्वनिरसनम् ॥

१२८ सु०— नन्वेवं तर्हि उत्तराधिकरणानामनारम्भ एव, निराकरिष्यमाणै(रु)रप्युक्त-विशेषणस्येश्वरस्यानभ्युपगतत्वादिति चेत् । सत्यम् । तथाऽपि तन्मतानामत्यन्त-हेयताप्रदर्शनाय दूषणान्तराणि व्युत्पादयितुमुत्तरो ग्रन्थः ॥

॥ इति उत्तराधिकरणानामनारम्भणीयत्वनिरसनम् ॥

॥ इति अन्यथानुमित्यधिकरणम् ॥

॥ २-२-५ ॥

* * *

॥ अथ वैशेषिकाधिकरणम् ॥

॥ २-२-६ ॥

ब्र०सू०— ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥

॥ अथ परमाण्वारम्भवाद-वैशेषिकमत-निराकरणम् ॥

॥ अथ तत्रादौ वैशेषिकमतोपन्यासः ॥

॥ अथ तत्राप्यादौ ईश्वरविषया विप्रतिपत्तिः ॥

॥ अथ च तत्र ईश्वराङ्गीकारेऽपि तद्धर्मेषु सृष्टिप्रलयादिविधिषु च विप्रतिपत्तिः ॥

॥ अथ ततश्च तत्र ईश्वरीयज्ञानप्रयत्नेच्छानां नित्यत्वम् ॥

॥ अथ ततश्च तत्र ईश्वरस्याष्टमात्रगुणकत्वम् ॥

॥ अथ ततश्च तत्र सङ्ख्या(दि)गतनित्यानित्यत्वविभागाकथने कारणम् ॥

॥ अथ ततश्च तत्र ज्ञानादिगतनित्यत्वकथने कारणम् ॥

१ **सु०**— अत्र परमाण्वारम्भवादिनां वैशेषिकादीनां मतमपाक्रियते ।

'ननु वैशेषिकादयः परमेश्वरमङ्गीकुर्वन्त्येव, तत्कथं तन्निरासायाधिकरणारम्भः' इत्याशङ्क्य 'यद्यपीश्वरं स्वरूपेणाङ्गीकुर्वन्ति तथाऽपि तद्धर्मेषु सुखादिषु विप्रतिपद्यन्त एव, तथा सृष्टिप्रलयादिविधिं चान्यथा मन्यन्ते, इत्यतो युक्तस्तन्निरासायाधिकरणारम्भः' इत्याशयवांस्तन्मतमुपन्यस्यति **नित्येति** ।

अनु०— नित्यज्ञानप्रयत्नेच्छं सङ्ख्याद्यैरपि पञ्चभिः ।
युक्तमीशं वदन्तोऽन्ये

ईशं वदन्तोऽन्ये 'इत्याहुरि'ति वक्ष्यमाणेनान्वयः । नित्या ज्ञानप्रयत्नेच्छा यस्यासौ तथोक्तः । **सङ्ख्याद्यैः** सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागैः । सावधारणं चैतत् । एवम् अष्टगुणकमेव वदन्त इति ।

नित्यद्रव्याश्रितान्येकत्वैकपृथक्त्वपरिमाणानि नित्यान्येव, द्वित्वद्विपृथक्त्वादीनि संयोगविभागौ च सर्वत्रानित्या एवेति सिद्धत्वात् सङ्ख्यादौ विद्यमानोऽपि नित्यानित्यत्वविभागो नाभिहितः ।

ज्ञानादीनां तु जीवाश्रितानामनित्यत्वादत्र नित्यत्वसङ्कीर्तनम् ।

परि०— परमाण्वारम्भवादिनाम् परमाणुसमवायिकारणकार्यवादिनां वैशेषिकनैयायिकानामित्यर्थः । एतच्च 'ईशं वदन्तोऽन्ये' इति मूलोक्त्युपयोग्यपि शङ्कोत्थापनाद्यर्थमुक्तम् । ननु नित्यज्ञानेति ज्ञानादिगतनित्यत्वोक्तिवत् सङ्ख्यादिगतनित्यत्वाद्युक्तिः कुतो नेत्यत आह **नित्यद्रव्येति** । **एकपृथक्त्वेति** । अयमस्मात्पृथगित्येवंरूपं एकपृथक्त्वमित्यर्थः । ईशघटौ पृथगिति द्वित्वसमानाधिकरणं द्विपृथक्त्वं, **आदि**पदेनेशघटपटाः पृथगिति त्रित्वसमानाधिकरणत्रिपृथक्त्वग्रहः । **सर्वत्रेति** । नित्यद्रव्येऽनित्यद्रव्ये चेत्यर्थः । ईशादौ नित्येऽपि घटादिनिरूपितद्वित्वादेरनित्यत्वात् । **नाभिहित इति** । किन्तु सङ्ख्याद्यैरित्येवोक्तमित्यर्थः । तर्हि ज्ञानादौ नित्यत्वोक्तिः कुत इत्यत आह **ज्ञानादीनां त्विति** ।

यादु०— सङ्ख्यादाविति । ईश्वरगतसङ्ख्यादावित्यर्थः ।

कं०रा०— सृष्टीति । परमाणुसंयोगे सति द्व्यणुकाद्युत्पत्तिक्रमेण जगत्सृष्टिः परमाणुविभागे च द्व्यणुकादिनाशक्रमेण जगतो नाश इति सृष्टिप्रलयविधिं चान्यथा मन्यन्त इत्यर्थः । **आदि**शब्देन पदार्थविधिः गृह्यते । **द्वित्त्वेति** । द्वित्त्वद्विपृथक्त्वादीनामपेक्षो बुद्धिजन्यत्वात् संयोगविभागयोश्चान्यतरकर्मादिजन्यत्वात् तेषां सर्वत्रानित्यत्वमेवेति भावः ।

श्रीनिधि०— परमाण्वारम्भवादिनामिति । परमाणुभिर्द्व्यणुकादिप्रक्रमेण जगत आरम्भः असत उत्पत्तिरिति वादिनामित्यर्थः । **स्वरूपेणेति** । धर्म्यात्मनेत्यर्थः । **विधिं** प्रकारम् । ननु अनन्तगुणेषु अष्टगुणानामन्तर्भावात् । एवमष्टगुणवत्त्वाभ्युपगमः आनन्दाद्यनन्तगुणाभ्युपगमं न निरुणद्धीत्यत आह **सावधारणं चेति** । ज्ञानादौ विद्यमाननित्यत्वानुवादवत् साङ्ख्यादौ विद्यमानो नित्यत्वानित्यत्वविभागः किमिति नानूदितः इत्यत आह **नित्यद्रव्याश्रितानीत्यादिना** । **सर्वत्रेत्यनेन** क्वचिन्नित्यद्रव्येष्वेतेषां व्यत्यासो नास्ति तेन तद्दर्शनेनान्यत्र न सन्देहो बीजाभावादित्युक्तं भवति । ज्ञानादौ तु नैवमित्याह **ज्ञानादीनां त्विति** । अन्यथा नित्यद्रव्याश्रितज्ञानत्वाद्यविशेषेणात्राप्यनित्यतासन्देहः स्यादिति भावः ।

शे०वा०— अधिकरणप्रतिपाद्यानुक्त्या मूले न्यूनतामाशङ्क्य भाष्य एवोक्तत्वात् पृथक् तदनुक्तिर्न दोषायेत्यभिप्रेत्य परमाण्वारम्भवादमपाकरोतीति भाष्यं मनसि निधायैतदधिकरणप्रतिपाद्यमाह **अत्रेति** । ननु 'नित्यज्ञानप्रयत्नेच्छमि'ति वैशेषिकमतोपन्यासोऽनर्थकः । न च निराकर्तव्यताप्रयोजक-विप्रतिपत्तिविषयार्थ-प्रदर्शनिनानिराकर्तव्यताशङ्कानिरासार्थत्वान्न तदानर्थक्यमिति वाच्यम् । प्रसञ्जकाभावेनानिराकर्तव्यताशङ्काया एवानुत्थानात् तन्निरासार्थक-विप्रतिपत्तिविषयार्थ-प्रदर्शनस्याप्यनर्थकत्वादित्यतः प्रसञ्जकसद्भावेनानिराकर्तव्यता-शङ्कायाः सुलभत्वात् तन्निरासाय विप्रतिपत्तिविषयार्थप्रदर्शनपरपरमतोपन्यासस्य नानर्थक्यमिति भावेन तत्पर-तयोत्तरग्रन्थं योजयितुं प्रसञ्जककथनपूर्वकमनिराकर्तव्यताशङ्कां तावदुत्थापयति **नन्विति** । **सुखादिष्विति** । आदिपदेन रूपरसगन्धस्पर्शानां सङ्ग्रहः । सृष्टिप्रलयादिविधिमित्यत्रादिपदेनात्यन्तासत एव जनिरिति जनिविधेः सर्वस्य भावकार्यस्य कारणत्रितयजन्यत्वविधेश्च परिग्रहः । **अन्यथेति** । 'प्रकृतेर्महान्महतोऽहङ्कारात्क्रमेणा-काशादीनि महाभूतानी'त्यादिश्रुत्यादिसिद्धप्रक्रियापेक्षयाऽन्यथेत्यर्थः । नित्यत्वस्य ज्ञानादिवत् पृथगीश्वरविशेषण-त्वस्य सन्निधानात् ज्ञानमात्रविशेषणत्वस्य च भ्रान्तिं निवारयति **नित्या इत्यादिना** । ज्ञानप्रयत्नेच्छासङ्ख्या-परिमाणपृथक्त्वसंयोगविभागवत्ताया ईश्वरस्य वेदवादेऽपि सत्त्वान्नेदं वैषम्यकथनं युक्तमित्यत आह **सावधारणं चैतदिति** । तदेव स्पष्टयति **एवमिति** । ननु चेश्वरज्ञानादीनामिव ईश्वरैकत्वादीनामपि नित्यत्वात् तद्गतद्वित्वा-दीनां चानित्यत्वात् सङ्ख्यादिषु विद्यमानं नित्यत्वानित्यत्वविभागमनभिधाय ज्ञानादीनामेव नित्यत्वाभिधानं निर्निबन्धनमित्यतस्तदनभिधाने निमित्तं वदन्नेव ज्ञानादिषु नित्यत्वाभिधाने निमित्तमाह **नित्यद्रव्येति** । सिद्धत्वादीश्वरादन्यत्रापीति शेषः । **सङ्ख्यादाविति** । ईश्वरगतसङ्ख्यादावित्यर्थः । **अत्रेति** । ईश्वरगतज्ञानादि-ष्वित्यर्थः ।

वा०र०— **भाष्य एवेति** । **अधिकरणप्रतिपाद्यस्येति** बुद्ध्या विवेकेन वर्तते । **आहे**त्यत्र स्वयमिति शेषः । **तन्निरासायेति** । तन्निरासाय यः परमतोपन्यासः तस्य इति योजना । **ज्ञानप्रयत्नेति** । ईश्वरस्य ज्ञानेति योज्यम् । **आदि**पदेन रूपरसगन्धस्पर्शानां सङ्ग्रहः इति । यद्यपि संस्कारादिगुणा अपि अन्यैरनङ्गीकृताः तथापि तेषां सिद्धान्तेऽप्यनङ्गीकारेण विप्रतिपत्त्यविषयतया तत्सङ्ग्रहानुक्तिरिति ज्ञेयम् । **विधेश्च परिग्रह इति** । तत्परिकल्पितविध्यन्तरं तु सृष्टिप्रलयविध्योरन्तर्भवतीति हृदयम् । अपाकजक्रियां च प्रामाणिकीं अङ्गीकुर्वन्तीति वक्ष्यमाणमूलोक्तस्य विधेरुपलक्षणं चैतत् ज्ञेयम् । षड्गुणत्वमतं पूर्वपादेन प्रयोजनत्वाधिकरणे उपपादितम् । ज्ञानानित्यत्वमतं .... ।

विठ्ठल०— **परमाण्वारम्भवादिनामिति** । परमाणुद्व्यणुकादिभिः कार्यमत्यन्तभिन्नमेवारभ्यत इति वादिनामित्यर्थः । 'नित्यज्ञाने'ति ज्ञानादित्रितयस्यैव नित्यत्वमुक्तं सङ्ख्यादिगतनित्यत्वं किमिति नोक्तमित्यत आह **नित्यद्रव्येति** । अयमस्मात्पृथगित्येव प्रतीतिविषयमेकपृथक्त्वं इमौ पृथगिति प्रतीयमानं द्वित्वसमाना-धिकरणद्विपृथक्त्वं **आदि**पदेन इमे त्रयः पृथगित्यादि ग्रहणम् । **सर्वत्र** नित्यद्रव्ये अनित्यद्रव्ये च । **सिद्ध-त्वादिति** । तन्मतप्रसिद्धत्वात् स्पष्टत्वादिति यावत् ।

चषक— परमाण्वारम्भेति । परमाणोरारम्भो यस्येति व्यधिकरणबहुव्रीहिः । परमाणुसमवायिकारणकं कार्यमभिदधानानां वैशेषिकाणां नैयायिकानां चेत्यर्थः । ज्ञानादितुल्यकक्ष्यापन्नसङ्ख्यादीनां ज्ञानादिवन्नित्यत्वेऽभिधातव्ये तदनभिहितौ बीजं प्रकाशयति **नित्यद्रव्येति** । एकपृथक्त्वमेकव्यक्तिमात्राश्रितं पृथक्त्वम् । द्विपृथक्त्वं व्यक्तिद्वयाश्रितपृथक्त्वम् । सर्वत्र नित्येऽनित्ये च द्रव्ये वर्तमानाः । **सङ्ख्यादा** ईश्वराश्रितसङ्ख्यादौ ।

॥ इति ज्ञानादिगतनित्यत्वकथने कारणम् ॥
॥ इति सङ्ख्या(दि)गतनित्यानित्यत्वविभागाकथने कारणम् ॥
॥ इति ईश्वरस्याष्टमात्रगुणकत्वम् ॥
॥ इति ईश्वरीयज्ञानप्रयत्नेच्छानां नित्यत्वम् ॥
॥ इति ईश्वराङ्गीकारेऽपि तद्धर्मेषु सृष्टिप्रलयादिविधिषु च विप्रतिपत्तिः ॥

* * *

॥ अथ वैशेषिकमतोपन्यासे ईश्वरविषयविप्रतिपत्तौ ईश्वरषाड्गुण्यमतस्य परमत्वाभावः ॥
॥ अथ ततश्च तत्र आत्रेयज्ञानानित्यत्वाकथने कारणम् ॥
॥ अथ ततश्च तत्र नित्यत्वसङ्कीर्तने वैकल्पिकप्रयोजनम् ॥
॥ अथ तत्रादौ गुणान्तराभावे युक्तित्वम् ॥
॥ अथ ततश्च तत्र ज्ञानादीनामखण्डत्वसूचनम् ॥

२ **सु०—** यद्यपि केचिदीश्वरं षड्गुणमाचक्षते तथाऽपि न तत्परमं मतमित्यष्टगुणत्वमेवोपन्यस्तम् ।

एवमात्रेयस्य ज्ञानानित्यत्वमपि नोपन्यस्तम् ।

यद्वा नित्यत्वसङ्कीर्तनं गुणान्तराभावे युक्तित्वेन कृतम् । तथा हि । जीवात्माना बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाभिर्नवभिर्विशेषगुणैर्युक्ताः । तत्र नित्ययथार्थज्ञानस्य मोहाभावात् तत्प्रभवस्य द्वेषस्याभावः, तदभावे तन्मूलयोर्धर्माधर्मयोरभावः । इच्छाया अपि मोहाभावेनारागरूपत्वान्न धर्मादिकारणत्वम्, धर्माद्यभावे च तत्कार्ययोः सुखदुःखयोरभाव एव । नित्यज्ञानत्वादेव स्मृत्यसम्भवेन कल्पकाभावात् भावनाया अप्यभाव इति ।

अथवा नित्यत्वेन ज्ञानादीनामखण्डत्वं सूचयति ।

परि०— षड्गुणमिति । ज्ञानेच्छे विना तदन्यषड्गुणमित्यर्थः । **आत्रेयस्येति** । आत्रेयनामकेनाङ्गीकृतमीशज्ञानानित्यत्वमपि अमुख्यमतत्वान्नोपन्यस्तमित्यर्थः । **यथार्थज्ञानेति** । दोषाजन्यत्वादिति भावः । **ज्ञानादीनामखण्डत्वमिति** । तद्गुणसंविज्ञाने सति ज्ञानेच्छाप्रयत्नानां त्रित्वाज्ज्ञानादीनामिति बहुवचनोपपत्तिः । देशकालव्यवहितनानाविषयभेदेऽपि तत्तद्विषयकज्ञानादेर्जीवात्मज्ञानादेरिव भिन्नत्वाभावोऽखण्डत्वमित्यर्थः, यद्वा अस्मन्मते यथा ज्ञानेऽभूत्वाभावित्वादिविशेषः । इच्छायां सिसृक्षुत्वादिविशेषः, कृतौ शक्तिव्यक्त्यादिविशेषः, न तथा तन्मते विशेष इति निर्विशेषत्वमखण्डत्वमित्यर्थः ।

गु०दी०— एवमात्रेयस्य मतम् इत्यत्र आत्रेयस्तेष्वेकदेशी ।

यादु०— षड्गुणमिति । सङ्ख्यादिपञ्चकं प्रयत्नं चेश्वरस्याचक्षत इत्यर्थः । प्रयत्नस्य नित्यत्वेन तदुत्पत्त्यर्थं ज्ञानेच्छयोरनपेक्षणात् । ज्ञानवत्कृतेरपि स्वत एव विषयप्रत्यासत्तिसम्भवेन कृतेर्विषयप्रत्यासत्त्यर्थमपि तदनपेक्षणादिति तेषां भावः । **नित्यत्वेनेति** । पूर्वं विद्यमानस्य ज्ञानस्य नाश एव ज्ञानान्तरं कल्पनीयं न तु तदनाशे । अतो नित्यत्वमखण्डत्वसूचकमिति ध्येयम् । **अखण्डत्वमिति** । निर्भेदत्वमित्यर्थः । एकत्वमिति यावत् । अनीश्वरात्मज्ञानादीनामिव नानेकत्वमिति ज्ञातव्यम् ।

वं०प०— एवमात्रेयस्येति । परममतत्वाभावादित्यर्थः । **तन्मूलयोः** द्वेषमूलयोः । धर्मे द्वेषेणाधर्मकरणादधर्मे द्वेषेण धर्मकरणाद्धर्माधर्मयोर्द्वेषमूलकत्वम् । नन्वथाऽपीच्छाया रागरूपायाः सत्त्वात् तन्मूलकौ धर्माधर्मौ स्यातामेवेत्यत आह **इच्छाया अपीति** । ईश्वरे विद्यमानाया अपीति शेषः ।

कं०रा०— षड्गुणमिति । कर्तृत्वनिर्वाहकप्रयत्नेन सङ्ख्यादिपञ्चकेन च युक्तमित्यर्थः । यद्वा कार्यानुकूलज्ञानेन सङ्ख्यादिपञ्चकेन च युक्तमित्यर्थः । **एवमिति** । यथेश्वरः षड्गुण इति मतं न परमं मतमिति नोपन्यस्तं तथेश्वरज्ञानमनित्यमित्यात्रेयमिति न परमं मतमिति नोपन्यस्तमित्यर्थः । **नित्ययथार्थज्ञानस्येति** । यद्यपि 'नित्यज्ञानप्रयत्नेच्छमि'ति नित्यत्वमेव सङ्कीर्तितं तथाप्ययाथार्थ्यस्य दोषजन्यत्वप्रयुक्तत्वान्नित्यज्ञाने च दोषजन्यत्वाभावेनायथार्थ्याभावात् तद्याथार्थ्यमपि नित्यत्वोक्त्या लब्धमित्याशयेनैवमुक्तमिति ध्येयम् । **नित्यज्ञानत्वादेवेति** । ईश्वरस्य सदा सर्वपदार्थगोचरानुभवत्वात् स्मृत्यसम्भवेन भावनाख्यसंस्कारकल्पकाभावाद्भावनाया अप्यभाव इत्यर्थः । **अथवा नित्यत्वेनेति** । अनित्यज्ञानादीनां परिमितविषयत्वस्य सामग्रीप्रयुक्तत्वात् सामग्र्यजन्यत्वेश्वरज्ञाने तत्प्रयुक्तपरिमितविषयत्वासम्भवान्नित्यत्वकीर्तने नेश्वरज्ञानादीनां सर्वविषयत्वं सूचयतीत्यर्थः । यद्वा अनित्यं हि ज्ञानादिकर्मकारकतया विषयसहितत्वमपेक्षते नित्यस्य तु किं विषयेणेति न तद्विषयकत्वविशेषराहित्यरूपाखण्डत्वं ज्ञानादीनां नित्यत्वेन सूचयतीत्यर्थः ।

श्रीनिधि०— आत्रेयस्येत्यनन्तरं मतमिति शेषः । **मोहाभावादिति** । मिथ्याज्ञानाभावादित्यर्थः । **तन्मूलयोरिति** । अत्र द्वेषस्याधर्ममूलत्वं प्रसिद्धम् । धर्ममूलत्वं तु रागजादिद्वेषेण ब्राह्मणेभ्यो हिरण्यदानादिकम् । द्वेषश्च तत्र तदपहर्तृतानिमित्त इति द्रष्टव्यम् । ननु द्वेषेण धर्माद्यभावेऽपि रागेण भवतु न ह्येकं प्रति एकजातीयमेव कारणमिति नियम इत्यत आह **इच्छाया अपीति** । अतस्मिन् तद्बुद्धे हि मोह इति भावः । **अखण्डत्वमिति** । निर्विशेषत्वमित्यर्थः । न हि नित्यस्य सविशेषत्वं युक्तम् । घटविषयत्वादिर्विशेषो न स्वरूपभूतः । स्वरूपस्यानादित्वात् । तदभावे च तद्विषयत्वायोगात् । आगन्तुकस्य च स्वरूपत्वाङ्गीकारे अनियतत्वप्राप्तेरत औपाधिक एव स इति भावः ।

शे०वा०— अष्टगुणत्वस्येव षड्गुणत्वस्यापि वैशेषिकादिभिरभ्युपगमादष्टगुणत्वमात्रोपन्यासो निर्निबन्धन इत्यतस्तदनुपन्यासं समर्थयते **यद्यपीति** । **षड्गुणमिति** । सङ्ख्यादयः पञ्च प्रयत्नश्चेत्येवं षड्गुणमित्यर्थः । प्रयत्नस्य नित्यत्वेनोत्पत्त्यर्थं ज्ञानाद्यनपेक्षणात् ज्ञानवत्कृतेरपि स्वत एव विषयप्रवणत्वेन विषयप्रत्यासत्त्यर्थमपि तदनपेक्षणान्न ज्ञानेच्छाभ्यां कृत्यमिति भावः । **एवमिति** । षड्गुणत्ववत् ज्ञानानित्यत्वस्यापि परमतत्वाभावादित्यर्थः । **नित्यज्ञानत्वादेवेति** । स्मरणस्यानुभवनाशे सति तज्जन्यसंस्कारमात्रेणोत्पत्तेर्नित्यज्ञानस्य स्मृत्यसम्भव इति भावः । **अखण्डत्वमिति** । निर्विशेषत्वमित्यर्थः । तथा च 'यद्यनन्तविशेषाश्च तज्ज्ञानादेर्निवारिता' इत्यादिनोत्तरत्र विप्रतिपन्नतया निरसनीयस्य वैशेषिकाद्यभ्युपगतर्निर्विशेषत्वरूपतज्ज्ञानाद्यखण्डत्वस्योपन्यासार्थं भाष्ये नित्यग्रहणमिति भावः । **नित्यत्वेनेति** । पूर्वं विद्यमानस्य ज्ञानस्य नाश एव ज्ञानान्तरं कल्प्यं न तु तदनाशे । अतो नित्यत्वमखण्डत्वसूचकमिति भावः । **अखण्डत्वमिति** । निर्भेदत्वमित्यर्थः । एकत्वमिति यावत् । अनीश्वरात्मज्ञानादीनामिव नानेकत्वमिति ज्ञातव्यमित्यप्याहुः ।

वा०र०— संस्कारमात्रेण उत्पत्तिरिति । उक्तविधसंस्कारैककारणकत्वादित्यर्थः । तस्य च ईश्वरेऽभावादिति शेषः ।

विठ्ठल०— षड्गुणमिति । ज्ञानेच्छे विना तदन्यषड्गुणमित्यर्थः । प्रयत्नस्य नित्यत्वेन तदुत्पत्त्यर्थं वा विषयप्रत्यासत्तेः स्वत एव सम्भवेन विषयप्रत्यासत्त्यर्थं वा ज्ञानाद्यनपेक्षणादिति तेषामाशयः । **आत्रेयस्येति** । आत्रेयाभिधेन केनचिदङ्गीकृतमीश्वरज्ञानादिनित्यत्वं अप्रयोजकत्वान्नोपन्यस्तमित्यर्थः । प्राङ्नित्यत्वकथनं स्वरूपकथनार्थमिति सूचितम् । प्रयोजनविशेषानाह **यद्वेति** । **तदभावे** द्वेषाभावे उपलक्षणमेतद् रागाभावे च । **तन्मूलयो**: अरागमूलत्वादित्युपलक्षणम् । अद्वेषरूपत्वादित्यपि ग्राह्यम् । प्रयोजनान्तरसूचकतयापि व्याचष्टे **अथवेति** । **नित्यत्वेन ज्ञानादीनामिति** । अनीश्वरात्मज्ञानादीनामनित्यत्वाद्विषयादिभेदेन भिन्नत्वं ईश्वरज्ञानादीनां नित्यत्वेन निर्भेदत्वरूपाखण्डत्वमिति भावः ।

चषक— षड्गुणं ज्ञानेच्छाव्यतिरेकेण सङ्ख्यादिपञ्चकप्रयत्नरूपगुणषट्कविशेषितम् । **आत्रेयस्य** तन्नाम्नो वादिनोऽनुमतम् । नित्ययथार्थज्ञानस्येति बहुव्रीहिः । दोषाजन्यत्वादिति हृदयम् । ज्ञानादीनामिति तद्गुणसंविज्ञानः । ज्ञानेच्छाप्रयत्नानामित्यर्थः । **अखण्डत्वम्** स्ववृत्तितद्व्यक्तित्वव्याप्यस्वाश्रयवृत्तिज्ञानत्वादिकत्वमिति फलितम् ।

॥ इति ज्ञानादीनामखण्डत्वसूचनम् ॥
॥ इति गुणान्तराभावे युक्तित्वम् ॥
॥ इति नित्यत्वसङ्कीर्तने वैकल्पिकप्रयोजनम् ॥
॥ इति आत्रेयज्ञानानित्यत्वाकथने कारणम् ॥
॥ इति ईश्वरषाड्गुण्यमतस्य परमत्वाभावः ॥
॥ इति वैशेषिकमतोपन्यासे ईश्वरविषया विप्रतिपत्तिः ॥

* * *

॥ अथ वैशेषिकमतोपन्यासे सृष्टिविषया अन्यथामतिः ॥
॥ अथ ईशेच्छादृष्टचोदितानां चतुर्वर्गीयपरमाणूनां द्विशः संयोगात्सृष्टिप्रारम्भः ॥

३ **सु०—** एवमीश्वरविषयां विप्रतिपत्तिम् उपन्यस्य सृष्टिविषयाम् उपन्यस्यति **तदिच्छेति** ।

अनु०— तदिच्छादृष्टचोदिताः ।
परमाणवश्चतुर्वर्गाः संयुज्यन्ते द्विशोऽखिलाः ॥

महाप्रलये हि वक्ष्यमाणो नित्यवर्गोऽनित्याश्च धर्माधर्मसंस्कारादयोऽवतिष्ठन्ते । ततो ब्रह्मवर्षशतान्ते प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षा सञ्जायते । तया च सर्वात्मगता धर्माधर्मलक्षणादृष्टादयो लब्धवृत्तयो भवन्ति । ततस्तदिच्छया = सिसृक्षालक्षणेश्वरेच्छया अदृष्टैः = अदृष्टवदात्मसंयोगैश्चेति यावत् । **चोदिताः** प्रेरिताः, क्रियावन्त इति यावत् ।

प्राक् प्रविभक्ततयाऽवस्थिताः **परमाणवश्चतुर्वर्गाः** पार्थिवाः पाथसीयास्तैजसा वायवीयाश्च **द्विशः संयुज्यन्ते** ।

अत्र परमाणव इत्येवोक्ते मनसामपि ग्रहणं स्यात् । तेषां संयोगसद्भावेऽपि वक्ष्यमाणं द्रव्यारम्भकत्वं गगनवदस्पर्शवत्त्वादयुक्तम्, अतस्तद्व्यावृत्तये 'चतुर्वर्गाः' इत्युक्तम् । यद्वा सजातीयसंयोग एव द्रव्यारम्भको न त्वन्य इति अनेन सूचयति ।

अखिला इति । द्विशः संयोगे नियमवचनम् । ये परमाणवो द्रव्यारम्भाय संयुज्यन्ते तेऽखिला द्विशो द्वौ द्वावेवेति ।

परि०— वक्ष्यमाण इति । 'सामान्यान्त्यविशेषौ च समवायश्च तत्त्रयम् । नित्यमि'-त्येतद्व्याख्यानावसरे वक्ष्यमाण इत्यर्थः । **संस्कारादय इति** । आदिपदेन पाकजपार्थिवपरमाणु-रूपादयो ग्राह्याः । ननु न्यायमते सर्वमुत्त्यङ्गीकारेण महाप्रलयानन्तरं सृष्टिरेव नेत्यतो विवक्षित-महाप्रलयशब्दार्थं व्यनक्ति **ब्रह्मवर्षशतान्त इति** । न तु गन्धानाधारकाल इति भावः । **मनसा-मपीति** । तेषां तन्मतेऽणुत्वात् । मुक्तजीवमनसां भूयसां संसारिजीवदेहेभ्यो बहिरपि सत्त्वेन नोद-नादिना क्रियावतां संयोगसम्भवादिति भावः । **सजातीयेति** । सजातीययोः संयोगः सजातीयसंयोग इत्यर्थः ।

यादु०— महाप्रलय इति । अत्र महाप्रलयशब्दो ब्रह्मप्रलयपर एव न गन्धानाधारपरः । तेनानित्याश्च धर्माधर्मेत्यादिवक्ष्यमाणविरोधो नेति ज्ञातव्यम् । संस्कारादय इत्यत्रादिपदेन पाकजाः पार्थिवपरमाणुरूपादयो ग्राह्याः । **सिसृक्षेति** । यद्यपीश्वरेच्छा न जन्या तथाऽपि तस्याः सर्गासाधारणकारणसमयविशेषसम्बन्धवत्त्वं सिसृक्षात्वं, तज्जायत इत्यर्थः ।

वं०प०— पाथसीया इति । 'पाथसं सलिलं जलमि'त्यमरः । **चतुर्वर्गा इत्युक्तमिति** । तथा च चतुर्णां पार्थिवानां पाथसीयानां तैजसानां वायवीयानां च परमाणूनां वर्गा इत्यर्थः । ततश्च न मनसो ग्रहणप्रसक्तिरिति भावः । **सजातीयेति** । पार्थिवानामेव परस्परं संयोग आप्यानामेव परस्परं संयोग इत्यादिरूपेण सजातीयसंयोग एवेत्यर्थः ।

कं०रा०— अदृष्टवदात्मसंयोगैश्चेति । या क्रिया यदीयव्यधिकरणगुणजन्या सा तत्संयोगासमवायि-कारणिकेति नियमाददृष्टजन्यायाः परमाणुक्रियाया अदृष्टवदात्मसंयोगजन्यत्वं चास्तीति भावः । नियममेव दर्शयति **परमाणव इति** ।

श्रीनिधि०— वक्ष्यमाण इति । सामान्यान्त्याविशेषौ चेत्यनेनेत्यर्थः । **संस्कारादय** इत्यादिपदेन पार्थिवपरमाणुरूपादिकं गृह्यते । तस्याप्यसमवायिकारणत्वात् **लब्धवृत्तयो** लब्धात् बोधाः । **अदृष्टवदात्म-**

संयोगैश्चेति । अन्यथा मथुरास्थदेवदत्तादृष्टेन काश्यां भोगोत्पत्तिर्न स्यात् । तस्यादृष्टस्य च सम्बन्धाभावादिति भावः । **पाथसीयाः** । **पाथो** जलम् । **वक्ष्यमाणमिति** । समवायिकारणत्वरूपमित्यर्थः । स्पर्शरहितस्यापि कालादेर्निमित्तत्वरूपद्रव्यारम्भकत्वदर्शनात् । **चतुर्वर्गा इत्युक्तमिति** । चतुर्विधा वर्गाः समूहा येषां ते तथोक्ताः । चतुर्विधा इति यावत् । **न त्वन्यैरिति सूचयति** । अन्यथा परमाणव इत्येवावक्ष्यदिति भावः । **नियमवचनम्** । तत्कथनम् । तदेवोपपादयति **ये परमाणव इति** । नन्वेवमपि न नियमो लभ्यते । त्रिशः संयोगेऽपि द्विशः संयोगसम्भवादित्यतः सावधारणमेतदित्याह **द्वौ द्वाविति** ।

शे०वा०— महाप्रलय इति । अत्र महाप्रलयशब्देन ब्रह्मप्रलय एव विवक्षितः । न तु गन्धानाधारसमयः । तथा सति 'अनित्याश्च धर्माधर्मे'ति वक्ष्यमाणविरोधप्रसङ्गादित्यवधेयम् । **वक्ष्यमाण इति** । 'सामान्यान्त्यविशेषौ चे'त्यादिनेति शेषः । संस्कारादय इत्यादिपदेनानित्यानां पाकजरूपादिगुणानां कालावच्छेदोपाधितया वर्तमानानां महाभूतसंक्षोभप्रभववेगजानां सन्तन्यमानानां कर्मणां च परिग्रहः । अन्यथा कालावच्छेदानुपपत्तौ पुनः सर्गानुपपत्तेरिति बोध्यम् । ननु भगवान् पुनः किमर्थं सिसृक्षतीत्यत उक्तं **प्राणिनामिति** । प्राणसम्बन्धयोग्यानां संसारिणामिति यावत् । भोगश्च यद्यपि न स्वसमवेतसुखदुःखसाक्षात्कारः सम्भवति । प्रत्येकसमुदायविकल्पेन अननुगमादव्यापकत्वप्रसङ्गात् । योगिनामतीतसुखदुःखसाक्षात्कारे चातिव्याप्तेश्च । तथाऽपि स्वसमानकालीन-स्वसमानाधिकरण-साक्षात्कारविषयताव्याप्यजातिमत्साक्षात्कारो वेश्वरविशेषगुणवृत्ति-गुणत्वव्याप्यजातिशून्यो द्वेषान्ययोग्यात्मविशेषगुणजन्यः साक्षात्कारो वा भोगोऽत्र विवक्षितः । तस्य **भूतये** निष्पत्तये । **सिसृक्षेति** । यद्यपि भगवत इच्छा, अस्त्वेवं इत्याकारा एकैव तथाऽप्युपाधिभेदात् सिसृक्षासञ्जिहीर्षादिशब्दैर्व्यपदिश्यते । उत्पत्तिरपि च तस्या उपाध्युत्पत्तिरेव नान्या । उपाधिश्च कालविशेषो वर्षशतादिशब्दवाच्यो बोद्धव्यः । **सर्वेष्वात्मसु** संसारिषु, गताः समवेताश्च ते धर्माधर्मलक्षणादृष्टाश्चेति विग्रहः । **लब्धवृत्तय**ः प्रलये सर्वादृष्टानां वृत्तिलाभहेतोरन्यस्याभावाद्वृत्तिनिरोधः । सिसृक्षायां च सत्यां तयैव लब्धवृत्तयो भवन्तीत्यर्थः । वृत्तिलाभश्च सहकारिसम्पत्तिरेव । ततश्च सिसृक्षालक्षणसहकारिसम्पत्तिमन्तो भवन्तीत्याशयः । अनेन तदिच्छादृष्टेत्येतन्मूलं तदिच्छयाऽदृष्टाः तदिच्छादृष्टा इति योजितं भवति ।

अदृष्टवदात्मसंयोगैरिति । यद्यप्यात्मसंयोगस्य क्रियाहेतुत्वं नान्वयव्यतिरेकगम्यं परमाणुसंयोगैरेवाऽन्यथासिद्धत्वात् । तथाऽप्यदृष्टस्य तत्कारणत्वे तत्प्रत्यासत्तेरावश्यकत्वादात्मसंयोगघटितैव प्रत्यासत्तिरिति भावेनैवमुक्तम् । या मूर्तक्रिया यदीययद्व्यधिकरणगुणजन्या सा तत्समानाधिकरणगुणजन्या, स्पर्शवद्वेगवदभिघातजक्रियावदिति व्याप्तिबलेनैव तत्सिद्धिरिति भावः ।

नन्वत्र क्रियापदं कार्यपरं कर्मपरं वा । नाद्यः । तथा सति घटरूपे व्यभिचारापातात् । घटरूपलक्षणकार्यस्य घटरूपव्यधिकरणं यत्कपालरूपं तज्जन्यत्वेऽपि कपालघटसंयोगकारणकत्वाभावात् । न चात्र यद्व्यधिकरणगुणजन्यत्वं यद्व्यधिकरणगुणनिमित्तकारणकत्वं विवक्षितम् । कपालरूपस्य च घटरूपं

प्रत्यसमवायि-कारणत्वान्न निमित्तत्वमिति न तत्र व्यभिचार इति वाच्यम् । तथा सति गुणपदवैयर्थ्या-*पातात् । तद्धि घटजन्ये पतने व्यभिचारवारणार्थम्* । तस्य च पतनसमवायिकारणतया निमित्तपदेनैव तद्वारणसम्भवात् किं तेन । न च घटजन्ये पतने व्यभिचाराप्रसङ्गेऽपि घटव्यधिकरणदण्डनिमित्तकारणके दण्डावयवकपालसंयोगाजन्ये घटे व्यभिचारवारकत्वात् तत्सार्थक्यमिति वाच्यम् । एवमपि व्यधिकरणपद-वैयर्थ्यप्रसङ्गात् । पतनं प्रति गुरुत्वस्यासमवायिकारणतया निमित्तत्वविवक्षयैव तद्वारणसम्भवात् । नापि क्रियापदं कर्मपरमित्यन्त्यः । यत्र मान्त्रिकाः शाखादिचालनं कुर्वन्ति तत्र शाखादिकर्मण्याकाशगुणस्य व्यधि-करणस्य मन्त्रस्य कारणत्वेऽप्याकाशसंयोगस्य कारणत्वाभावेन व्यभिचारप्रसङ्गात् । किञ्चेश्वरज्ञानस्य कार्यमात्रकारणत्वेऽपीश्वरसंयोगस्याकारणत्वाद्व्यभिचारश्चेति चेत् ।

अत्र ब्रूमः । यत्कर्मादृष्टाद्वारकयद्व्यधिकरणगुणजन्यं तत्तत्समानाधिकरणगुणजन्यमित्येव व्याप्ति-शरीरमभिमतम् । ततश्च कपालरूपगुणजन्ये घटरूपे न व्यभिचारः । तस्य कार्यत्वेऽपि कर्मत्वाभावात् । गुरुत्वजन्याऽऽग्पतनक्रियाया वेगजन्यद्वितीयपतनक्रियायां च गुरुत्ववेगपतनसमानाधिकरणरूपाद्यजन्यत्वा-द्व्यभिचारनिरासार्थं व्यधिकरणपदम् । गुरुत्ववेगौ च पतनसमानाधिकरणावेवेति न तत्र व्यभिचारः । स्वव्यधिकरणस्वाश्रयावयविघटादिजन्ये कपालघटवृत्तिद्वित्वाद्यजन्ये घटादिपतने व्यभिचारं वारयितुमुक्तं **गुणेति** । मन्त्रेश्वरज्ञानयोरपि न व्यभिचारः । मन्त्रस्याशुविनाशित्वेनादृष्टद्वारकत्वात् । ईश्वरज्ञानस्य चोत्पत्तिमन्मात्रहेतुत्वेन कर्मकारणीभूतादृष्टकारणत्वेनादृष्टद्वारकत्वात् ॥ इयांस्तु विशेषः । यत्, मन्त्रेणेदानीमेवादृष्टं जन्यते ईश्वरज्ञानेन तु पूर्वमपीति । न च तुलायामेकदिगवस्थिताधिकगुरुत्वजन्यापरदिगवस्थितोन्नमनक्रियायां व्यभिचार इति वाच्यम् । तत्राधिकगुरुत्वाश्रयद्रव्यसंयुक्तसंयोगस्योन्नमनहेतुत्वात् । पङ्क्तादौ तस्यैव तद्धेतुत्वकल्पनात् । गुरुत्वे चोन्नमनहेतुत्वाकल्पनात् । यत्तु तस्य तत्कारणत्वाभ्युपगमेऽपि प्रत्यक्षत्वेन गुणविशेषणादव्यभिचार इति । तन्न । तथा सति व्यधिकरणपदवैयर्थ्यप्रसङ्गात् । गुरुत्वस्याप्यप्रत्यक्षत्वेन प्रत्यक्षविशेषणादेव गुरुत्वजन्या-द्यपतनक्रियायामव्यभिचारात् । न च वेगादिजन्यक्रियायां व्यभिचारवारणार्थं तदिति वाच्यम् । तथा सत्येत-द्व्याप्तिबलेनादृष्टवदात्मसंयोगस्य कारणत्वासिद्धिप्रसङ्गादिति दिक् ।

प्राक् प्रलये । **अयुक्तमिति** । स्पर्शवदनन्त्यावयवित्वस्यैव सामान्यतो द्रव्यारम्भकत्वे प्रयोजकत्वादिति भावः । **सजातीयसंयोग एवेति** । पार्थिवपरमाणुद्वयसंयोग एव वा आप्यपरमाणुद्वयसंयोग एव वेत्यर्थः । **न त्वन्य इति** । पार्थिवादिपरमाणोराप्यादिपरमाणुना संयोगो न द्रव्यारम्भक इत्यर्थः । अन्यथा पार्थिवा-प्यपरमाणुकार्यस्यागन्धत्वाप्नेहत्वयोरापातादिति भावः । **अनेन** चतुर्वर्गा इत्यनेन । द्विशः संयोगे नियमवचन-मेवाभिनयेन दर्शयति **य इत्यादिना** ।

वा०र०— तथा सतीति । तदाधारसमयस्य सर्वानित्यत्वशून्यत्वादिति भावः । **संस्कारादयः** इत्यत्र संस्कारपदं भावनापरं मूलम् । तावन्तमेव कालं इति प्रशस्तपादभाष्योक्तव्युत्पादनपरा नित्येष्वपि पाकजादयो

गुणाः इत्यादि किरणावल्यनुसारेणाह **संस्कारादय इत्यत्रेति** । **स्वसमवेतेति** । घटादिसाक्षात्कारादिव्यावृत्त्यै **सुखदुःखेति** । ईश्वरसाक्षात्कारव्यावर्तयितुं **स्वमते वेति** विशेषणम् । **प्रत्येकेति** । सुखदुःखसाक्षात्कारो दुःखसाक्षात्कारो चेति प्रत्येकं वा सुखदुःखोभयसाक्षात्कारो वेति समुदायस्य वा विकल्पेनेत्यर्थः । **अननुगमेति** । एकैव साक्षात्कारो भोगः इत्युक्ते एकैकसाक्षात्कारत्वस्य तत्तदन्यसाक्षात्कारेऽभावात् अननुगमः । अव्याप्तिरिति यावत् । सुखसाक्षात्कारस्य दुःखसाक्षात्कारत्वाभावात् । दुःखसाक्षात्कारस्य च सुखसाक्षात्कारत्वाभावात् । युगपदुभयसाक्षात्कारत्वविवक्षायां तु अव्यापकत्वं असम्भव इति यावत् । सुखसाक्षात्कारे वा दुःखसाक्षात्कारे वा उभयसाक्षात्कारत्वाभावात् । **पूर्वत्राव्याप्तिरिति** । अत्र चासम्भव इति स्पष्टमेव वक्तव्येऽननुगमाव्यापकत्वेति वचनं किरणावलिवर्धमानानुसारेण । यद्यपि सुखदुःखान्यतरेति शिवादित्याद्युक्त्यनुसारेणान्यतरविवक्षायां नासम्भवप्रसङ्ग इति भाति तथापि दृग्दृश्यसम्बन्धानुपपत्तिभङ्गन्यायामृतोक्तरीत्या यत्वतत्वजात्योरभाववत् अन्यतरत्वजातेरप्यभावात् अन्यतरपदस्यानिर्धारित एकपरत्वेऽव्याप्तिस्तादवस्थ्यमेव उभयपरत्वे तु असम्भव एवेति तात्पर्यात् । अत एवान्यतरेति मूलोपरि उक्तरीत्या अस्वारस्यमभिप्रेत्य अनन्तपण्डितेन सुखान्यत्वे सतीत्यादि विवक्षा कृता । मल्हारिभट्ट्यां च वक्ष्यमाणटीकाकृदुक्तरीत्यैव भोगलक्षणं अभिधाय तेनान्यतरत्वस्याननुगतत्वात् तद्घटितमिदं कथं लक्षणमिति परास्तमित्युक्तमिति ज्ञेयम् ।

योगिनामतीतेति । योगप्रभावजन्यस्वीयातीतसुखादिसाक्षात्कार इत्यर्थः । अत्र भावनाजन्यस्वीयातीतसुखादिसाक्षात्कार इति वर्धमानपुस्तकान्तरानुसारेण योगिनामित्यतः प्राक् भावनाजन्यस्वीयातीतसुखादिसाक्षात्कार इति पठनीयम् । तेन योगिनामिति वाक्ये चशब्दोपपत्तिः । अन्यथा स्थलान्तरेऽतिव्याप्तेरनुक्त्या तत्तत्समुच्चयासम्भवेनातिव्याप्तेश्चेति भिन्नक्रमेण योजनाप्रयासप्रसङ्गात् । **स्वसमानकालीनेति** । स्वपदं तादृशजातिमत्परम् । तथा च यज्जातिमता समानाधिकरणासमानकालीनश्च यः साक्षात्कारः तद्विषयताव्याप्या या जातिः तादृशजातिमतो यः साक्षात्कारः सः भोग इत्यर्थः । सुखसाक्षात्कारभोगे वर्तते चेदम् । सुखत्वजातिमत्सुखं तत्समानाधिकरणः तत्समानकालीनश्च यः साक्षात्कारः वर्तमानस्वनिष्ठसुखसाक्षात्कारः तद्विषयताव्याप्यजातिः सुखत्वम् । यत्र सुखत्वं तत्र सुखत्वसमानाधिकरणतत्समानकालीनसाक्षात्कारविषयतेति व्याप्तिसद्भावात् तादृशजातिमत्वं तु सुखे । अतो भवति तत्साक्षात्कारो भोगः । एवं दुःखसाक्षात्कारेऽपि योज्यम् । स्वाश्रयसमानाधिकरणेत्यादि मल्हारिभट्ट्यां तु स्वपदं जातिपरमाश्रित्य स्वाश्रयेत्येव सामानाधिकरणे समानकालीनत्वे चोक्तमिति विशेषः । शिष्टं लक्षणं तु समानमेव । ननु एतावता तादृशजातिमत्त्वेन सुखदुःखयोरननुगमात् अननुगमाव्यापकत्वदोषनिरासेऽपि भावनाजन्यस्वीयातीतसुखादिसाक्षात्कारे योगीनामतीतसुखदुःखसाक्षात्कारे चातिव्याप्तिरिति दोषस्तु अनुवर्तत एवेति चेत् न । अतीताविषयत्वस्य साक्षात्कारविशेषणत्वाभ्युपगमात् । योगिसाक्षात्कारस्वीयातीतसाक्षात्कारयोः अतीतविषयतया तद्वारणसम्भवात् । यदि च सामान्यलक्षणादिजन्यो भाविसुखादिगोचरः साक्षात्कारः यः इत्यर्थः । **इत्यर्थ इति** । स्वसमानाधिकरणस्वसमानकालीन तदाऽनागतविषयत्वेनापि साक्षात्कारो विशेषणीयः । यत्तु रुचिदत्तेनोक्तम् ।

तथापि तज्जन्यसाक्षात्कारयोः व्यर्थताप्रसङ्गात् । पुरुषान्तरीयसुखादिसाक्षात्कारस्य भिन्नकालीनस्वीयसाक्षात्कारस्य च सुखादिविषयाजन्यत्वेन तावतैव तद्व्यावृत्तिसिद्धेः । शिष्टं वर्धमानीयरुचिदत्ते द्रष्टव्यम् ।

वस्तुतस्तु विषयजन्यत्वविवक्षयैवातीतानागतगोचरसाक्षात्कारव्यावृत्तिसिद्धेः सुखदुःखयोरनुगमार्थं सुखान्यत्वे सति यत् दुःखान्यत्तदन्यत्वं रूपं स्वीकृत्य गुणत्वप्रकारकसुखदुःखसाक्षात्कारे दुःखाभावत्वादिप्रकारकतत्साक्षात्कारे सुखत्वप्रकारकदुःखभ्रमादौ चातिव्याप्तिवारणाय सुखप्रकारकयथार्थसाक्षात्कारान्यत्वे सति यदुःखत्वप्रकारकसाक्षात्कारान्यत् तदन्यो यो विषयजन्यः साक्षात्कारो भोगः इति द्रष्टव्यम् । यत्तु उक्तरूपं लक्षणं स्वीकृत्य भाविसुखादिसाक्षात्कारव्यावृत्तये योगिसाक्षात्कारव्यावृत्तये चानागताविषयेति साक्षात्कारविशेषणं पटवर्धनेन कृतम् । तत्तु स्वीयभिन्नकालेति पदार्थचन्द्रिकावाक्यस्यानागतेत्यर्थमात्रपरत्वं भ्रान्तिमूलम् । पदार्थचन्द्रिकायामपि भाविसुखादीति पूर्ववाक्यानुसारेण भिन्नकालेत्यनेन भाविसुखादेरेव प्रतीतेः । वस्तुतः सामान्यलक्षणादिजन्येत्यनेनातीतसुखादिसाक्षात्कारोपलक्षणायाः आवश्यकत्वेनाभिन्नकालेत्यत्रापि अनागतविषयस्येवातीतविषयस्यापि साक्षात्कारस्य प्राप्त्या तदुभयव्यावृत्तेः अवश्यकर्तव्यतया अनागतेतिपदवत् अतीतस्येत्वस्यापि ग्राह्यतया आवश्यकत्वमिति तदपेक्षया विषयजन्यत्वस्यैव लघुत्वेन सामञ्जस्यात् तत्परित्यागायोगः इति ज्ञेयम् । यद्यपि उक्तालौकिकप्रत्यक्षातिव्याप्तिवारणं लौकिकत्वेनैव साक्षात्कारो विशेषितेति कर्तुं शक्यते तथापि तथात्वे बहिर्विशेषणान्तरोपादानं संसज्यत । विषयजन्येति विशेषणं तु सुखदुःखाभ्यां साक्षात्कार इति 'कर्तृकरणे कृते'ति सूत्रे तृतीयातत्पुरुषस्याङ्गीकारेण लक्षणवाक्यादेव लब्धमिति विशेष इत्यलम् ।

अत्र पक्षे सुखदुःखाद्यलौकिकसाक्षात्कारव्यवच्छेदाय प्रयत्नो भवतीति अपरितोषात् पक्षान्तरमाह **ईश्वरविशेषगुणेति** । **ईश्वरविशेषगुणाः** ज्ञानेच्छाप्रयत्नाः तद्वर्तिन्याः गुणविशेषगुणः तज्जन्यो यः साक्षात्कारः इत्यर्थः । अत्र जातिशून्यद्वेषाजन्येति पाठः । शून्य इति विभक्त्या च निर्देशो लेखकागतः । आत्मविशेषगुणविशेषणतया समस्तपदत्वात् । ज्ञानादिसाक्षात्कारातिव्याप्तिपरिहाराय शून्यान्तम् । ईश्वरविशेषगुणवृत्तिगुणत्वादिजातिशून्यत्वाभावादसम्भवः इति तद्वारणार्थं उक्तं **गुणत्वव्याप्येति** । ज्ञानसुखान्यतरत्वरूपोपाधेरपि ईश्वरविशेषगुणवृत्तित्वेन भोग्यत्वेनामितसुखादिसाक्षात्कारस्योक्तधर्मशून्यत्वाभावात् असम्भव इति तद्व्यावृत्तये **जातीति** । द्वेषसाक्षात्कारातिव्याप्तिवारणाय **द्वेषाजन्येति** । अदृष्टजन्यसाक्षात्कारातिव्याप्तिव्यावृत्त्यर्थमुक्तं **योग्येति** । रूपादिजन्यसाक्षात्कारेऽतिव्याप्तिवारणाय **आत्मेति** ।

ननु प्रथमविशेषपदं व्यर्थम्, तद्व्यर्थत्वे चेश्वरगुणवृत्तिगुणत्वव्याप्यजातिशून्यत्वोक्त्यैवात्मैकत्वादिव्यावृत्त्या तत्साक्षात्काःव्यावृत्तिः सिद्धेवेति । तद्व्यावर्तकद्वितीयविशेषपदमपि व्यर्थमेवेति चेत् न । प्रथमस्य विशिष्टाभावसम्पादकतया विशिष्टाभावे वैय्यर्थ्याभावेन तस्य सार्थक्ये आत्मैकत्वादि व्यावृत्त्यर्थं द्वितीयस्यापि सार्थक्यादिति ज्ञेयम् । सञ्जिहीर्षासमकालमित्येतत् संहारविधिस्थभाष्यव्याख्यानरूपकिरणावल्यनुसारेणाह **यद्यपि**

भगवत इत्यादि । सृष्टिस्थलीये किरणावल्यनुसारेणैवाह **सर्वेष्वित्यादि** । वर्धमानानुसारेणाह **यद्यपि आत्मसंयोगस्येति** । **परमाण्विति** । परमाण्वन्तरसंयोगादेव परमाणौ क्रियेत्यर्थः । **तत्कारणत्वेति** । क्रियाकारणत्वेत्यर्थः । वर्धमानत्वाद्यनुसारेणोत्तरो विचारः । पटवर्धन्यनुसारेणाधिकमाह **न चात्र व्यधिकरणेत्यादिनापि** इति । द्वितीयपक्षानुवादिपर्यन्तग्रन्थेन स्वव्यधिकरणस्वाश्रयेति वक्ष्यमाणरीत्येयं अतिव्याप्तिर्बोध्या । इन्द्रनुसारेण **नापीत्यादि** । **शाखादी**त्यादिपदेन विषयपरिग्रहः । प्रागुक्तदोषपरिहारं स्वयं दर्शयति **ततश्चेति** । पटवर्धन्यनुसारेण **गुरुत्वजन्येति** । **स्वव्यधिकरणेति** । स्वपदं घटादिपतनपरम् । स्वव्यधिकरणत्वोपपादनायोक्तं **स्वाश्रयेत्यादि** । **मन्त्रेश्वरज्ञानयोरपीति** । तयोरपि सकाशात् इत्यर्थः । मन्त्रेश्वरज्ञाने उपादाय इति यावत् । व्यभिचारशाखादिचालने कार्यमात्रे चेति शेषः ।

मन्त्रादेः शाखादिचालनार्थतायाः स्पष्टत्वात् प्रागुक्तेः चात्राकीर्तनं न दोषाय । **ईश्वरज्ञानस्येति** । अनेन ईश्वरज्ञानवारणाय असाधारणपदोपादानं केषाञ्चित् अयुक्तम् । अदृष्टाद्वारकपदेनैव तद्वारणादित्यपि सूचितम् । अनुमानखण्डीय-आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकासिद्धेः नात्मसंयोगः कारणमिति चेत् न । या क्रिया व्यधिकरणपदीयगुणजन्या सा तत्संयोगासमवायिकारणिक इत्यादि मणिव्याख्यानरूपरुचिदत्तमाधवमिश्रकण्टकोद्धाराद्यनुसारेणाह **न च तुलायामिति** । **पङ्कादौ तस्यैवेति** । पङ्काख्यायां भूमावधिकगुरुत्वाश्रयद्रव्यसंयुक्ते संयोगस्य उन्नमनहेतुत्वदर्शनादित्यर्थः । अत्र पङ्कादाविति पाठः । कम्पादाविति लेखकदोषात् । पङ्कादावित्येव माधवमिश्राद्युक्तेः । पङ्काख्यायामिव भूमाविति स्पष्टं कण्टकोद्धारे उक्तेश्च । कथमत्र गुरुत्वाश्रयेत्युक्तसम्बन्ध इति चेत् । इत्थम् । तुलायाः एकस्मिन् फलके गुरुत्वाश्रयद्रव्यसंयोगेनावमने सति तत्संयोगेन सूत्रस्य नमनं भवति । एवं तुलादण्डसूत्रान्तरफलकान्तरलघुद्रव्यान्तराणां पूर्वपूर्वसंयोगेनोत्तरोत्तरेषां नमनोपपत्तेः पङ्काख्यायामिव भूमाविति अनुमानखण्डकण्टकोद्धारे प्रतिपादनेन तद्रीत्या गुरुत्वाश्रयद्रव्यसंयुक्तसंयोग इति । पङ्काख्यभूमौ पादेन **नोदनं** अभिघातो वा यत्र जातः तत्र पङ्के कर्म । तत् पङ्कात्स्थिते घटादावपि तत्समकालमेव यत्कर्म तत्पादसंयुक्तपङ्ककर्मवत् संयोगादेः समवायिकारणात् । एवं घटोत्तरशरावतन्निष्ठबिल्वादिकर्माकपिसंयुक्तसंयोगाश्रयादिना भवतीत्यादिकं संयुक्तसंयोगादिति सप्तमस्याद्वितीयाह्निके सूत्रे वैशेषिकसूत्रोपस्कारे च ज्ञेयम् । अथ माधवमिश्रादिभिः व्यास्यन्तरानुसरणमूलतया गुरुत्वकारणताभ्युपगमेन प्रत्यक्षत्वेन गुणविशेषणं कृत्वा तत्र पक्षे व्यधिकरणपदवैय्यर्थ्याद्यशङ्क्योक्तम् । तदेव तत्रत्यशङ्काग्रन्थेनैव दूषयति **यत्तु तस्येत्यादि** । तदुक्तव्याप्त्यन्तरस्यैव प्रागभिधानात् अधिकं दूषणतया उक्तम् । न तु तदुक्तरीत्या व्याप्त्यन्तराश्रयणेन समाहितम् । तद्व्याप्तावेव उक्तरीत्या दोषाभिधानेन तदाश्रयणस्य व्यर्थत्वमित्यभिप्रायो बोध्यः । **स्पर्शवदिति** । गगनादिव्यावृत्यै **स्पर्शवदिति** । घटादिव्यावृत्त्यर्थं **अन्त्यावयवीति** । तथा च विशिष्टस्य घटादौ गगनादौ चाभावात् न द्रव्यान्तरारम्भकत्व तद्वन्मानसं परमाणूनामपि द्रव्यान्तरारम्भकप्रयोजकशून्यत्वमित्यर्थः । अत्र विशेषविचारो अन्त्यावयवीलक्षणपदार्थचन्द्रिकायां तत्पटवर्धनादौ च विद्यमानो अत्रापि द्रष्टव्यः ।

तत्र यदि विजातीयविजातीयपरमाणुभ्यां एकमित्यादिकिरणावल्यनुसारेणाह **अगन्धत्वास्नेहत्वयोरिति** । **अङ्गीकारादिति** । द्वयोर्मध्ये पार्थिवपरमाणुगतगन्धस्याप्यपरमाणुगतस्नेहेन कार्ये द्व्यणुके स्नेहस्य वोत्पत्तिर्न सम्भवति । एकैकस्यारम्भकत्वानङ्गीकारात् तदेतत् उत्तराधिकरणे स्फुटीभविष्यति । मूले द्विश इत्यनूद्य द्वौ द्वाविति व्याख्याय एवशब्देन नियमप्रदर्शनं इति भावेनाह **द्विशः संयोग इति** । 'सङ्ख्यैकवचनाच्च वीप्सायां' इति सूत्रेण द्वि इति सङ्ख्याशब्दात् वीप्सार्थे शस्प्रत्यये द्विश इति भवति । एतेनैवाखिलानां एकस्मिन्नेव काले कार्यारम्भकत्वाभावात् कथमेतदिति शङ्का निराकृता भवति । ये द्रव्यारम्भाय संयुज्यन्त इत्यादिरूपेणोद्देश्यविधेयभावप्रदर्शनेनैव तत्तत्कालीनकार्यानुसारेण सर्वत्र जायमानः संयोगो द्वयोरेवेति प्रमेयस्य स्पष्टं प्रतीतेरिति ज्ञेयम् ।

विठ्ठल०— वक्ष्यमाण इति । 'सामान्यान्त्यविशेषौ चे'ति वाक्यव्याख्यानावसर इति शेषः । **संस्कारादय** इत्यादिपदेन पाकजपार्थिवपरमाणुरूपादयो ग्राह्याः । नात्र महाप्रलयपदेन नैय्यायिकाङ्गीकृतसर्वमुक्तिरूपगन्धानाधारकालोऽत्र विवक्षितः । तदनन्तरं श्रेष्ठैरनङ्गीकारात् । अतो विवक्षितमहाप्रलयं व्यञ्जयन्नन्तरभाविसृष्टिमाह **ततो ब्रह्मवर्षेति** । सिसृक्षति यद्यपीश्वरेच्छा न जन्या तथापि सृष्टिसमयविशेषसम्बन्धमभिप्रेत्य सिसृक्षा जायत इत्युक्तमिति ज्ञेयम् । **मनसामपीति** । तेषां तन्मते अणुत्वाङ्गीकारादिति भावः । लब्धवृत्तयः उद्बुधाः ततस्तदिच्छयेति अनेनेश्वरेच्छया दृष्टोद्बोधद्वारा साक्षात्परमाणुक्रियाया हेतुत्वमित्युक्तं भवति । **मनसामपीति** । तेषां तन्मते अणुत्वाङ्गीकारादिति भावः । **सजातीयेति** । पार्थिवपरमाणोः पार्थिवपरमाण्वन्तरेणैव संयोगो द्रव्यारम्भकः न त्वाप्यपरमाणुसंयोग इत्यर्थः ।

चषक— वक्ष्यमाण इति । 'सामान्यान्त्यविशेषौ च समवायश्च तत्त्रयमि'त्येतत्प्रतीकव्याख्यावसरेऽभिधास्यमान इत्यर्थः । **संस्कारादय इति** । आदिशब्दः पाकजपार्थिवपरमाणुरूपादिपरिग्राहकः । ननु न्यायमते सर्वमुक्त्यङ्गीकारेण महाप्रलयानन्तरं सृष्टिरेव नेत्यतोऽत्र विवक्षितमहाप्रलयशब्दार्थं व्यनक्ति **ब्रह्मवर्षशतान्त इति** । न तु गन्धानाधारसमयः । तथा सति अनित्याश्च धर्माधर्मेति वक्ष्यमाणविरोधप्रसङ्गादिति भावः । **सिसृक्षेति** । सन्नन्तोपस्थाप्यपारमेश्वरेच्छायाः नित्यत्वेऽपि प्रत्ययबोध्यायां तस्यां प्रकृत्युपस्थाप्यसर्गाधारकालविशेषसम्बन्धो जायत इत्यर्थः । **सजातीयेति** । तदेकतरसजातीयप्रतियोगिकस्तादृशापरानुयोगिकः संयोग इत्यर्थः ।

॥ इति ईशेच्छादृष्टचोदितानां चतुर्वर्गीयपरमाणूनां द्विशः संयोगात्सृष्टिप्रारम्भः ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये परमाणूनां द्विशः संयोगतः
सर्वावयविसम्भवान्तः उत्पत्तिक्रमः ॥

४ **सु०—** ततः किमित्यत आह **परमाण्विति** ।

अनु०— परमाणुद्वयेनैव द्व्यणुकं नाम जायते ।
द्व्यणुकत्रयेण त्र्यणुकं तैश्चतुर्भिस्तदात्मकम् ।
ततस्त्वनियमेनैव खण्डावयविनां भवः ।
ततश्चानियमेनैव सर्वावयविसम्भवः ॥

परमाणुपुञ्जवादं परिणामवादमनियमवादं च **एव**शब्देन व्यावर्तयति । **परमाणु-द्वयेनैव,** न तु निरन्तरतयोत्पन्नपरमाणुद्वयं, नापि परमाणुद्वयमेव संयुक्तमासादितपरिणाम-विशेषं, न च त्रयादिनेति । **जायते** इत्यसत्कार्यवादं सूचयति । जात्यपेक्षयैकवचनम् । ततश्च संयुक्तसजातीयपरमाणुद्वयैः ततोऽत्यन्तभिन्नानि तत्समवेतानि प्रागसन्त्येव द्व्यणुकनामकानि द्रव्याण्युत्पद्यन्त इत्यर्थः ।

द्व्यण्युकत्रयेण त्र्यणुकं, जायते इत्यनुवर्तते, एवेति च । अत्रापि पूर्ववद् व्याख्यानम् । अणुत्वपरिमाणस्य परमाणौ द्व्यणुके च साम्याद् द्व्यणुकसंज्ञावत् त्र्यणुकसंज्ञाऽप्युपपद्यत एव ।

तैः सजातीयैः संयुक्तैः **चतुर्भिः** त्र्यणुकैः **तदात्मकं** चतुरणुकात्मकं, द्रव्यं जायते त्र्यणुकेष्वणुसंज्ञोपचारात् । केचित् द्व्यणुकैरेव चतुरणुकारम्भमभ्युपयन्ति । तन्मतानुसारेण तैद्व्यर्णुकैरिति व्याख्येयम् ।

द्व्यणुकानि त्रीणि (द्रव्यं) यत्कार्यमारभन्ते तत् त्र्यणुकम् । चतुर्भिरारब्धं चतुरणुकमिति । अत्र च संज्ञा मुख्यैव । **ततः** त्र्यणुकेभ्यश्चतुरणुकेभ्यो वा । तुशब्दो विशेषार्थः । तमेवाह **अनियमेनैव** एतावद्भिरेवेति सङ्ख्यानियमं विनेत्यर्थः । द्रव्य-समवायिकारणानि कार्यद्रव्याणि **खण्डावयविनः** । त्र्यणुकादेरन्त्यावयविनश्च मध्ये नैकमेव खण्डावयवि किन्तु अनियमेनानेकान्यपि भवन्तीति सूचयितुं बहुवचनम् ।

ततः तैः खण्डावयविभिश्च अनियमेनैव सङ्ख्यानियमं विनैव सर्वावयविनामन्त्यावयविनां शरीरेन्द्रियविषयाणां सम्भवः ।

तदनेन द्रव्योत्पत्तिरभिहिता । गुणानां कर्मणां च स्वाश्रयद्रव्येषूत्पादो द्रष्टव्यः ।

परि०— 'व्यावर्तयती'त्युक्तं व्यावर्त्यत्रयं व्यनक्ति **परमाणुद्वयेनेत्यादिना** । **निरन्तरतयेति** । विरलपरमाणुद्वयेनाव्यवहिततया संश्लिष्टतयोत्पन्नपरमाणुद्वयं नेत्यर्थः । **पूर्ववद् व्याख्यानमिति** । संयुक्तसजातीयद्व्यणुकत्रयैरेव तेभ्योऽत्यन्तभिन्नानि तत्समवेतानि प्रागविद्यमानान्येव त्र्यणुकनामकानि पार्थिवानि आप्यतैजसवायवीयसंज्ञकद्रव्याणि उत्पद्यन्ते जायन्त इत्यसत्कार्यसूचनात् । एवशब्देन च निरन्तरोत्पन्नपरमाणुत्रयमेव त्र्यणुकमिति परमाणुपुञ्जवादस्य द्व्यणुकत्रयपरिणामवादस्य द्व्यणुकत्रयादाधिक्यस्य च व्यावर्तनादिति व्याख्येयमित्यर्थः । परमाण्वादिभिन्नकार्ये कथं तर्ह्यणुसंज्ञेत्यत आह **अणुत्वेति** । द्वावणू हेतू यस्य इत्यादिविग्रहसम्भवात् द्व्यणुकादिसंज्ञेति भावः । 'तदात्मकमि'त्यनुवादः । 'चतुरणुकात्मकमि'ति व्याख्या । **उपचारादिति** । त्र्यणुके चतुरणुके च परिमाणस्य महत्त्वादिति भावः । 'तत' इत्यस्य मतभेदेन अर्थद्वयमाह **तत इति** ।

यादु०— **निरन्तरतयोत्पन्नमिति** । मिलिततयोत्पन्नमित्यर्थः । विरलपरमाणुद्वयेनादृष्टादिवशान्मिलितपरमाणुद्वयं जायते तदेव द्व्यणुकलक्षणं कार्यं, न त्वन्योऽवयवीति परमाणुपुञ्जवादिभिरङ्गीकारात् । **सूचयतीति** । असतः सत्तासम्बन्धस्यैव जनित्वादिति भावः । **अत्रापीति** । परमाणुपुञ्जवादं परिणामवादमनियमवादं च व्यावर्तयितुमवधारणमिति पूर्ववद्व्याख्येयमित्यर्थः । **त्र्यणुकसंज्ञाऽपीति** । त्रयोऽणवो द्व्यणुकलक्षणाः कारणभूता यस्य तत्त्र्यणुकमिति योगसम्भवादिति भावः । ननु स्यादिदं निर्वचनं यदि द्व्यणुकेऽणुत्वपरिमाणं स्यात् तदेव कुत इत्याशङ्कां परिहर्तुमणुत्वपरिमाणस्येत्यादि पूर्ववाक्यमिति ज्ञातव्यम् । ननु त्र्यणुकेष्वणुत्वपरिमाणाभावात् कथं चत्वारोऽणवो यस्य तच्चतुरणुकमिति योगसम्भव इत्यत आह **त्र्यणुकेष्विति** । तथा चौपचारिकमणुत्वं त्र्यणुकेष्वस्तीति तदादायैव योगसम्भव इति भावः । **द्रव्यसमवायिकारणानीति** । अत्रान्त्यावयविपरमाणुव्युदासाय क्रमेण विशेषणे ।

वं०प०— व्यावर्तनप्रकारं दर्शयति **परमाणुद्वयेनैवेत्यादिना** । **निरन्तरतयेति** । विरलपरमाणुभ्यो जातं मिलितपरमाणुद्वयमेव द्व्यणुकमित्यर्थः । **परिणामविशेषमेवेति** । परिणामविशेषोपेतमेव द्व्यणुकमित्यर्थः । **असत्कार्यवादमिति** । असतः सत्तासमवायस्यैव तन्मते जनिशब्दार्थत्वादिति भावः । **पूर्ववद् व्याख्येयमिति** । परमाणुपुञ्जवादमित्याद्युक्तरीत्यैवकारार्थो ज्ञातव्य इत्यर्थः । **चतुर्भिः** द्व्यणुकैः । **अत्र चेति** ।

द्व्यणुकेभ्य एव चतुरणुकमुत्पद्यत इति पक्षे द्व्यणुकेष्वणुत्वपरिमाणस्य सत्त्वात् । चत्वारोऽणवो यस्यारम्भकास्तच्चतुरणुकमिति योगसम्भवेन चतुरणुकसंज्ञा मुख्यैवेत्यर्थः ।

कं०रा०— निरन्तरतयेति । मिलिततयेत्यर्थः । **जायत इतीति** । प्रागसतः सत्तासमवायरूपजनिवाचिना जायत इत्यनेनासत्कार्यवादं सूचयतीत्यर्थः । ननु परमाणुद्वयैद्व्यणुकानि जायन्त इति वक्तव्ये 'परमाणुद्वयेनैव द्व्यणुकं नाम जायत' इत्येकवचनं कथं प्रयोजीत्यत आह **जात्यपेक्षयेति** । एकवचनस्य जात्यपेक्षत्वे लब्धमर्थमाह **ततश्चेति** । ननु द्व्यणुकप्रत्यारब्धस्य कार्यस्य त्रिद्व्यणुकमिति संज्ञया भाव्यं त्र्यणुकमिति संज्ञात् कथमित्यत आह **अणुत्वपरिमाणस्येति** । यथाऽणुत्वपरिमाणस्य परमाणौ सत्त्वेन परमाणुद्वयारब्धस्य कार्यस्य द्व्यणुकमिति संज्ञा द्वावणुकारणे यस्येति व्युत्पत्तेः सम्भवात् तथाऽणुत्वपरिमाणस्य द्व्यणुके च सत्त्वेन द्व्यणुकत्रयारब्धस्य कार्यस्य त्र्यणुकमिति संज्ञाप्युपपद्यत एव । त्रीण्यणूनि कारणानि यस्येति व्युत्पत्तेः सम्भवादिति भावः । ननु त्र्यणुकचतुष्टयारब्धस्य कार्यस्य चतुरणुकमिति संज्ञा नोपपद्यते अणुकस्याणुत्वाभावेन चत्वार्यणूनि कारणानि यस्येति व्युत्पत्तेरसम्भवादित्यत आह **त्र्यणुकेष्विति** । त्र्यणुकेष्वणुत्वाभावेऽप्यौपचारिकमणुत्वमादाय तदारब्धकार्यं चतुरणुकमिति संज्ञोपपद्यत इति भावः । **अत्र चेति** । चतुर्भिर्द्व्यणुकैरारब्धं चतुरणुकमिति पक्षे चतुरणुकारम्भकद्व्यणुकानामणुत्वाच्चतुरणुकमिति संज्ञा मुख्यैव नौपचारिकीत्यर्थः ।

श्रीनिधि०— निरन्तरतयोत्पन्नमिति । अव्यवहितत्वमापन्नमित्यर्थः । न तु तद्भिन्नं द्व्यणुकाख्यं पदार्थान्तरमित्यर्थः । **आसादितपरिणामविशेषं** प्राप्तपरिणामविशेषम् । **असत्कार्यवादमिति** । अन्यथा परमाणुद्वयं द्व्यणुकीं भवतीत्यवक्ष्यत् इति भावः । एवं पदार्थमुक्त्वा वाक्यार्थमाह **तत इति** । एवं व्याख्यानेनेत्यर्थः । **इत्यर्थ इति** । सम्बध्यत इत्यर्थ इति शेषः । **पूर्ववद्द्व्याख्यानमिति** । धर्मापेक्षया पूर्ववदिति । तथा च सजातीयद्व्यणुकद्वयैः ततोऽत्यन्तभिन्नानि तत्समवेतानि प्रागसन्त्येव त्र्यणुकनामकानि द्रव्याण्युत्पद्यन्त इत्यर्थः । **त्र्यणुकसंज्ञाप्युपपद्यत इति** । त्रयः अणवः कारणत्वेन यस्य तत् त्र्यणुकमित्येवं त्र्यणुकसंज्ञाप्युपपद्यत इत्यर्थः । कारणानामणुत्वाभावे इयं संज्ञा न भवेदिति भावः । ननु चतुरणुकमिति न सम्भवति । तत्कारणे द्व्यणुकवदणुत्वाभावादित्यत आह **त्र्यणुकेष्विति** । अतिसौक्ष्म्यलक्षणगुणयोगेन उपचार इति भावः । अत एवास्वरसात् पक्षान्तरमाह **केचिदिति** । त्र्यणुकचतुरणुकयोरुभयोरपि द्व्यणुकोत्पन्नत्वे संज्ञाभेद एव स्यान्न तु संज्ञिभेद इत्यत आह **द्व्यणुकानि त्रीणीति** ।

शे०वा०— निरन्तरतयोत्पन्नमिति । मिलिततयोत्पन्नमित्यर्थः । विरलपरमाणुद्वयेनादृष्टादिसहकारिवशान्मिलितपरमाणुद्वयं जायते । तदेव द्व्यणुकलक्षणं कार्यं न त्वन्योऽवयवी नाम कश्चिदस्तीति परमाणुपुञ्जवादिभिरङ्गीकारादिति भावः । एवं परमाणुपुञ्जवादव्यावृत्तिप्रकारमुपदर्श्य परिणामवादप्रकारप्रकटीकरणपूर्वकं तद्व्यावृत्तिप्रकारमुपदर्शयति **नापीति** । अनियमवादव्यावृत्तिमुपदर्शयति **नेति** । **असत्कार्यवादमिति** ।

अत्यन्तासत्कार्यवादमित्यर्थः । असत्कार्यवादस्य सदसत्कार्यवादिना स्वेनाभ्युपगमादिति भावः । **जात्यपेक्षमिति** । जातिरूपार्थैक्यविवक्षानिमित्तकमित्यर्थः । **एवेति च** इत्यतःपरमनुवर्तत इति शेषः । **अत्रापीति** । परमाणुपुञ्जवादं परिमाणवादमनियमवादं च व्यावर्तयितुमवधारणमित्यादि पूर्ववदित्यर्थः । नन्वणुत्वपरिमाणाधिकरणत्वेन परमाणूनामेवाणुत्वात् तदारब्धद्व्यणुकस्य द्वाभ्यामणुभ्यामारब्धं द्व्यणुकमिति यौगिकद्व्यणुकशब्दार्थोपपन्नत्वेन परमाणुद्व्यकार्ये द्व्यणुकसंज्ञासम्भवेऽपि त्र्यणुकारम्भकद्व्यणुकानामणुत्वपरिमाणानधिकरणत्वेनानणुत्वात् तदारब्धत्र्यणुकस्य त्रिभिरणुभिरारब्धं त्र्यणुकमिति त्र्यणुकशब्दार्थवत्त्वाभावात् कथं तत्र त्र्यणुकसंज्ञेत्यतो, भवेदेतदेवं यदि परमाणोरेवाणुत्वपरिमाणाधिकरणत्वं न तु द्व्यणुकस्येति स्यात् । न चैतदस्तीत्याह **अणुत्वपरिमाणस्येति** । तथा च द्वावणू कारणभूतौ यस्य तद्द्व्यणुकमिति द्व्यणुकशब्दयौगिकार्थोपपन्नतया परमाणुद्व्यकार्ये द्व्यणुकसंज्ञावत् त्रयोऽणवः कारणभूता यस्येत्येवं त्र्यणुकशब्दयौगिकार्थोपपन्नत्वात् द्व्यणुकत्रयारब्धकार्ये त्र्यणुकसंज्ञाऽप्युपपद्यत इत्यर्थः । ननु चाणुत्वस्य परमाणुद्व्यणुकयोरेव सत्त्वेन द्व्यणुकत्र्यणुकयोरणुत्वपरिमाणाधिकरणद्रव्यारब्धत्वाद् द्व्यणुकत्र्यणुकसंज्ञयोरुपपत्तावपि त्र्यणुकारब्धचतुरणुकस्याणुत्वाधिकरणद्रव्यारब्धत्वाभावात् कथं चतुरणुकमिति संज्ञा स्यात् । तदारभ्यकत्र्यणुकेष्वणुत्वाभावादित्यत आह **त्र्यणुकेष्विति** । अण्वारब्धत्वादणुत्वोपचार इत्यर्थः । ततश्च तदारब्धकार्ये चतुरणुकसंज्ञोपपत्तिरिति शेषः । क्वचित् चतुरणुकेष्वणुसंज्ञोपचारादिति पाठः । तत्र चतुरणुकेषु चतुरणुकसंज्ञोपपद्यते । कथम् । तदारम्भकेषु त्र्यणुकेष्वणुसंज्ञोपचारादिति योज्यम् । चतुर्भिरित्यतःपरं द्व्यणुकैरिति पूरणीयम् । **अत्र चेति** । द्व्यणुकानामेव चतुरणुकारम्भकत्वपक्ष इत्यर्थः । चतुरणुकेष्विति संज्ञेत्यतःपूर्वं पूरणीयम् । त्र्यणुकानां चतुरणुकारम्भत्वपक्षे तेषां अणुत्वाभावेन चतुरणुकारम्भकेष्वणुसंज्ञाया औपचारिकत्वात् । तदारब्धचतुरणुके चतुरणुकसंज्ञाया औपचारिकत्वप्राप्तावपि द्व्यणुकानां तदारम्भकत्वपक्षे चतुरणुकारम्भकेषु द्व्यणुकेषूक्तरीत्याऽणुत्वपरिमाणसिद्धेरणुसंज्ञाया मुख्यत्वात् तदारब्धचतुरणुके चतुरणुकसंज्ञा मुख्यैवेति प्राचीनपक्षादस्य पक्षस्य भेद इति भावः । **तत इति** । उत्तरग्रन्थे चतुरणुकस्य द्व्यणुकारब्धत्वपक्षमाश्रित्य तत इत्येतत्परामृष्टव्यमाह **ततस्त्र्यणुकेभ्य इति** । त्र्यणुकस्य चतुरणुकारम्भकत्वपक्षमाश्रित्य तत्परामृष्टव्यमाह **चतुरणुकेभ्यो वेति** ।

केचित्त्वत्र परमाणुद्व्येनैवेति द्व्यणुकोत्पत्तावधारणाद् द्व्यणुकत्रयेण त्र्यणुकमिति त्र्यणुकोत्पत्तावप्यत्रापि पूर्ववद्व्याख्यानमित्यवधारणस्य व्याख्यातत्वाच्चतुरणुके च तदभावात् 'ततस्त्वनियमेनैवे'त्यत्र तत इत्यनेन चतुरणुकमात्रपरिग्रहे चतुरणुककार्यमारभ्यैवानियमः प्रतीयेत । तन्निरासाय ततस्त्र्यणुकेभ्य इति व्याख्यातम् । तथा च चतुरणुकोत्पत्तावप्यनियम एवेति भाव इत्याहुः । खण्डावयविनो लक्षणमाह **द्रव्यसमवायिकारणानीति** । अत्रान्त्यावयविव्यावृत्त्यै पूर्वभागः, परमाणुव्यावृत्त्यै चोत्तरभागः, निमित्तकारणदण्डादिव्यावृत्त्यै समवायिपदम् । कारणपदं कार्यद्रव्याणीति द्रव्यपदं च स्पष्टार्थम् । **बहुवचनमिति** । खण्डावयविनामिति बहुवचनमित्यर्थः । मूले तत इति 'आद्यादित्वात्तृतीयार्थात्ततसिरि'ति भावेनाह **ततस्तैरिति** ।

सङ्ख्यानियमं विनेति । एतावद्भिरेवेति सङ्ख्यानियमं विनेत्यर्थः । खण्डावयविभिः खण्डावयविनामारम्भायोगेन सर्वावयविपदेन खण्डावयविसङ्ग्रहानुपपत्त्या सर्वावयविपदमन्त्यावयविमात्रपरमित्याशयेनाह **सर्वावयविनामन्त्यावयविनामिति** । तानेव विशिष्य निर्दिशति **शरीरेन्द्रियविषयाणामिति** । द्रव्यानारम्भकं कार्यद्रव्यमन्त्यावयवीति तल्लक्षणयोगादिति भावः । मूले द्रव्योत्पत्तिवद्गुणकर्मणोरुत्पत्तेरनुपन्यासान्न्यूनत्वमाशङ्क्य स्पष्टत्वेन शिष्यैरेव ज्ञातुं शक्यत्वात् तदनुपन्यासो न दोषायेत्याशयवान् 'तदिच्छादृष्टचोदिता' इति पूर्वग्रन्थतात्पर्यप्रदर्शनपूर्वकं स्वयं गुणकर्मणोरुत्पादं सूचयति **तदनेनेत्यादि** ।

वा०र०— पुञ्जवादिभिरपि द्वाभ्यामेव परमाणुभ्यां मिलितपरमाणुद्वयोत्पत्त्यङ्गीकारात् कथं द्वयोरेवेत्यनेन तन्मतवैलक्षण्यप्राप्तिरित्यतः तन्मतस्थितिप्रदर्शनेन निरस्यतामुपपादयति **विरलपरमाण्विति** । एतदुत्तराधिकरणे स्पष्टम् । परमाणुद्वयमित्यनन्तरं जायते तदेवेत्याद्युक्त्या मूले परमाणुद्वयमित्यनन्तरं द्व्यणुकाख्यं जायत इतीति पूरणीयमिति सूचयति । एतेनैव मूले परिणामविशेषमित्यनन्तरं द्व्यणुकाख्यं जायत इतीति योज्यमिति सूचयता परमाणुद्वयमित्यादौ क्रियापदाश्रवणादन्वय इति शङ्कानवकाश इति ज्ञापितमिति ज्ञेयम् । अत्यन्तासदिति व्याख्याने निमित्तमाह **असत्कार्येति** । स्वाभ्युपगतस्य च दूषणाय परमतत्वेनानुवादायोगादिति भावः । **अनुवर्तत इति शेष इति** । अनुवर्तत इत्येतदनुवर्तत इत्यर्थः । शेषपदस्थाने अनुवर्तत इति पाठस्तु स्वरस एव । **इत्यादि पूर्ववदिति** । द्व्यणुकत्रयेणैव त्र्यणुकं जायते न तु निरन्तरोत्पन्नं द्व्यणुकत्रयमेव त्र्यणुकं नावयवी त्र्यणुकाख्य इत्यादेः आदिपदेन सङ्ग्रहः ।

अभ्युपगमादिति । एतच्चोत्तराधिकरणे स्फुटीभविष्यति । कथं द्व्यणुकानामेव विजातीयत्र्यणुकचतुरणुकोभयजनकता इत्यतो 'द्व्यणुकत्रयेणैवे'त्यनुव्याख्यानोक्तत्रित्वचतुष्ट्वाभ्यां विजातीयोभयकार्यजनकता युक्ता इत्याशयेन व्याख्यानप्रकारं दर्शयति **द्व्यणुकानि त्रीणि** इत्यादि मूलम् । **पूरणीयमिति** । यद्यपि तत्रेत्यस्यावृत्तिमाश्रित्य चतुरणुकेषु इत्यर्थलाभो भवतीति शेषपूरणं आवश्यकम् । तथापि पूरणीयमिति सामान्योक्तेः उक्तार्थ एव तात्पर्यमिति बोध्यम् । **ततः** इत्युत्तरग्रन्थ इत्यादि । अयमत्र सङ्ग्रहः । यत्सदा परमाणुद्वयेनेत्यादि प्राक्तनमतानुसारेण चतुरणुकस्य त्र्यणुकचतुष्टयारब्धता तदा चतुरणुकमारभ्यैव उत्तरकार्योत्पत्तावनियमः । यदा चतुरणुकमपि द्व्यणुकारम्भमेवेति मतम् । तदा क्वचित् त्रिभिर्द्व्यणुकैः यथा त्र्यणुकं उत्पन्नम्, तथा चतुर्भिः द्व्यणुकैश्चतुरणुकमुत्पद्यते । एवं च द्व्यणुकैः त्र्यणुके चतुरणुकोत्पत्तावेव नियमः । न तु त्र्यणुकचतुरणुकाभ्यां उत्तरकार्योत्पत्तौ । एवं च द्व्यणुकोत्पन्नं यत्र त्र्यणुकं तत्र तस्मात् खण्डावयवव्युत्पादननियमेन । यत्र चतुरणुकं तत्र ततः आभ्यां नियमेन खण्डावयवव्युत्पादनमिति । एवं च मूले चतुरणुकेभ्यो वेति पक्षद्वयाभिप्रायेणोक्तमिति विज्ञायते । स्पष्टत्वात्तट्टीकाकृता नोक्तमिति द्रष्टव्यम् । एतत्स्थलं शोध्यमस्ति । **द्रव्यपदं चेति** । न च शब्दमात्रायाः आकाशसमवायिकारणतया कार्यतया च तत्रातिव्याप्तिरिति वाच्यम् । तन्मते तदसिद्धेः । तत्त्वनिर्णयटीकाव्याख्यातुः कस्यचित् तथोक्तिरप्ययुक्ता । स्वमतसाङ्ख्यमतरीतिभ्यां तस्य द्रव्यसमवायिकारणत्ववत् शब्दस्य द्रव्यत्वसिद्धान्तानुसारेण द्रव्यपदेन

व्यावृत्त्ययोगात् । **न्यूनत्वमाशङ्क्येति** । न्यूनत्वमाशङ्क्येत्यर्थः । तेन न्यूनत्वमित्यस्य परिहरतीत्यादि सम्बन्धसापेक्षत्वशङ्कानवकाशः ।

स०व्र०— अत्रापीति । परमाणुपुञ्जवादं परिमाणवादम् अनियमवादं च व्यावर्तयितुमवधारणमिति पूर्ववत् व्याख्येयमित्यर्थः ।

विष्ठल०— ननु निरन्तरतयेति । विरलपरमाणुद्वयेनादृष्टादिवशान्निरन्तरतया अव्यवहिततया मिलिततयेति यावत् । उत्पन्नं परमाणुद्वयं द्व्यणुकं नैवेत्यर्थः । विरलपरमाणुद्वयेन मिलितपरमाणुद्वयं भवति । तदेव द्व्यणुकमिति परमाणुपुञ्जवादिमतं तन्नेत्यर्थः । **नापीति** परिणामवादिनिरासः । **न चेति** अनियमवादिनिरास इति ज्ञेयम् । **अत्रापीति** । परमाणुपुञ्जवादं परिणामवादमनियमवादं च व्यावर्तयितुमेवेत्यवधारणं व्याख्येयमित्यर्थः । न चाणुद्वयारब्धद्व्यणुकमित्युपपद्यते । न चैवं त्र्यणुके नाम सम्भवति त्र्यणुकस्य द्व्यणुकत्रयारब्धत्वेनाणुत्रयारब्धत्वाभावादित्यतो द्व्यणुकस्याप्यणुपरिमाणत्वेनाणुसंज्ञकत्वात्तत्र प्रथमतयारब्धस्य त्र्यणुकसंज्ञा युज्यत इत्याह **अणुत्वपरिमाणस्येति** । तथापि त्र्यणुकचतुष्टयैरारब्धे च चतुरणुकसंज्ञा न युज्यते त्र्यणुकस्याणुपरिमाणत्वाभावादित्यत आह **त्र्यणुकेष्विति** । जालसूर्यमरीचिमध्य एव दृश्यत्वेनान्यत्राव्यक्ततयाणुत्वमुपचरितमिति भावः । **केचिदिति** । तथात्वे चतुरणुकसंज्ञाया अनौपचारिकत्वलाभादिति तेषां भावः । मतभेदतत्तत्स्वनियमेनेत्यस्यार्थद्वयमाह **तत इति** । द्रव्यसमवायिकारणानीत्येवोक्ते परमाणूनां खण्डावयविनं स्यादतः **कार्यद्रव्याणीति** । अन्त्यावयविव्यावृत्तये चाद्यं विशेषणमिति ज्ञेयम् । समवायिकारणतत्समवायिकारणयोरिति तन्तुसंयोगः पटं प्रति साक्षात्समवायिकारणप्रत्यासन्नतया असमवायिकारणम् । तन्तुरूपं पटरूपं प्रति समवायिप्रत्यासन्नतयैवेति ज्ञेयम् ।

चषक— निरन्तरतया मिलिततया ।

॥ इति वैशेषिकोक्तसृष्टिविषये परमाणूनां द्विशः संयोगतः सर्वावयविसम्भवान्तः उत्पत्तिक्रमः ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये भावरूपकार्यजनककारणत्रैविध्यम् ॥
॥ अथ तत्र समवायिकारणस्वरूपदर्शनम् ॥

५ **सु०— सर्वमपि कार्यं भावरूपं कारणत्रितयजन्यम् । कारणानि च समवाय्यसमवायिनिमित्तनामानि । तत्र य(त्सम)त्र समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । तत्स्वरूपेण दर्शयति कारणमिति ।**

अनु०— कारणं समवाय्याख्यं परमाण्वादिरत्र हि ।

अत्र द्व्यणुकादिकार्योत्पत्तौ परमाण्वादिद्रव्यपदार्थः समवायिकारणम् । कुतः । अत्र परमाण्वादौ द्रव्ये, हि यस्मात्, सर्वकार्यं समवेतमुत्पद्यते तस्मादिति शेषः ।

श्रीनिधि०— परमाण्वादिद्रव्यपदार्थ इति । आदिरिति पुल्लिङ्गनिर्देशात् द्रव्यमिति विशेष्यं न निर्देष्टुं शक्यं, अतः पदार्थ इत्युक्तम् ।

शे०वा०— कारणं समवाय्याख्यमित्याद्युत्तरग्रन्थानर्थक्यमाशङ्क्य च समवाय्यादिकारणस्य स्वरूपेण प्रदर्शनार्थत्वान्न तदिति भावेन किं तत्स्वरूपदर्शनेनापीत्यतः विप्रतिपत्तिविषयान्तरसूचनार्थं तदित्याशयवान् तत्प्रदर्शनपूर्वकं समवाय्यादिकारणस्वरूपोपदर्शनपरतयोत्तरवाक्यं योजयितुं विप्रतिपत्तिविषयान्तरं तावद्दर्शयति **सर्वमपीति** । अभावस्य निमित्तकारणमात्रजन्यत्वान्न सर्वस्य कार्यस्य कारणत्रितयजन्यत्वं युक्तमित्यत उक्तं **भावरूपमिति** । किन्नामकानि तानि त्रीणी कारणानीत्यतः प्राधान्यक्रमेण परप्रसिद्ध्यनुसारेण च तानि दर्शयति **कारणानि चेति** । तत्र तेषु कारणेषु मध्ये प्रथमनिर्दिष्टत्वात् प्रथमं समवायिकारणं लक्षयति **यत्समवेतमिति** । यत्र यत्समवेतं कार्यमुत्पद्यते तत्तस्य समवायिकारणमित्यर्थः । अत्र च यत्र यदुत्पद्यते तत्तस्य समवायिकारणमित्येव कृते भूतले घटध्वंसाद्युत्पत्तिमति अतिव्याप्तिः अतः समवेतपदम् । यत्र यत्समवेतमित्येव चोक्ते घटे घटत्वसमवायवति अतिप्रसङ्गस्तदर्थमुत्पद्यत इति । कार्यपदं च स्पष्टार्थम् । कार्यपदघटितमेकं, उत्पद्यत इत्येतद्घटितं चापरमिति लक्षणद्वयार्थं वा तदिति द्रष्टव्यम् । यद्वा नेदं विशेषलक्षणं किन्नाम सामान्यलक्षणमेव । अत्र च पक्षे स्वसमवेतजनकत्वमुक्तवाक्यार्थो द्रष्टव्य इति ध्येयम् । परमाण्वादिरित्यादिपदस्य सङ्कुचितासङ्कुचितवृत्तित्वविकल्पदोषनिरासाय तत्सङ्गाह्यतावच्छेदकमाह **द्रव्यपदार्थ इति** । मूले हिशब्दानर्थक्यमाशङ्क्य च हेतुसूचनार्थत्वान्न तदिति भावेन तदाकाङ्क्षामुत्थाप्यात्रेत्यस्यानुवृत्तिं मनसि निधाय अपेक्षितपूरणेन हेतुपरतया तं योजयितुमाह **कुत इत्यादिना** ।

वा०र०— विप्रतिपत्तिविषयान्तरेति । कारणत्रितयजन्यत्वरूपेत्यर्थः । **तत्प्रदर्शनेति** । विषयान्तरप्रदर्शनपूर्वकमित्यर्थः । मल्लारिभट्ट्यनुसारेणाह **यत्र यत्समवेतमित्यादि । यद्वा नेदं विशेषलक्षणमिति** । पूर्वत्र पक्षे यत्तच्छब्दयोरिवात्र पक्षे स्वशब्दस्याननुगमो नास्ति । तस्य समभिव्याहृतपरत्वात् । लक्षणं च स्वसमवेतकार्यजनकत्वमेवाभिप्रेतम् । नातः कार्याकार्यपदातिरिकेण लक्षणं मन्तव्यम् । कार्यपदं च तादृशसामान्यादिजनकत्वाभावेनासम्भवनिरासायेति ध्येयम् । वक्ष्यमाणरीत्या जनकतावच्छेदकजातिमत्वं विवक्षितम्, अतो न दोषः इति ज्ञेयम् । परमाण्वादिरित्यादिपदस्य इति मूलकोशानुसारेण प्रथमान्तः पाठः । परमाण्वादेरिति षष्ठ्यन्तपाठो लेखकागतः । **विकल्पदोषेति** । सङ्कुचितवृत्तित्वार्थं सङ्कोचिकोक्तिप्रसङ्गः । असङ्कुचितवृत्तौ तु गुणादेरपि ग्रहणप्रसङ्गः इति विकल्पद्वयदोषेत्यर्थः ।

चषक— तत्समवायिकारणमिति । समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताशालीत्यर्थः ।

॥ इति वैशेषिकोक्तसृष्टिविषये भावरूपकार्यजनककारणत्रैविध्ये समवायिकारणस्वरूपदर्शनम् ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये भावरूपकार्यजनककारणत्रैविध्ये निमित्तकारणोदाहरणम् ॥

६ **सु०— समवाय्यसमवायिव्यतिरिक्तं कारणं निमित्तम् । तदुदाहरति ईशेति ।**

अनु०— ईशेच्छादृष्टकालास्तु निमित्तं कारणं मतम् ।

निमित्तं तु इत्यन्वयः । इदं च सर्वकार्यसाधारणं निमित्तं दर्शितम् । एवमन्यदपि द्रष्टव्यम्, यथा तुरीवेमादिकं पटस्येत्यादि ।

कं०रा०— समवाय्यसमवायिव्यतिरिक्ते च रासभादावतिव्याप्तिनिरासाय **कारण**पदम् । **इदं चेति** । ईशेच्छादृष्टकालरूपमित्यर्थः । **अन्यदपीति** । ईशेच्छादृष्टकालादिरूपसाधारणनिमित्तादन्यदपि निमित्तमित्यर्थः । तदेव निमित्तमुदाहरति **यथेति** ।

श्रीनिधि०— अत्रेत्यस्यावृत्त्या द्रव्य इत्यादेरध्याहारेण च समवायिकारणस्य लक्षणं वक्तुमाकाङ्क्षामुत्थापयति **निमित्तं त्वित्यन्वय इति** । अन्यथा वैय्यधिकरण्यापत्तिः । समवायिकारणस्वरूपे परमाण्वादावभिहिते निमित्तकारणस्वरूप एव जिज्ञासा न तु ईशेच्छादौ स्वरूपे निमित्तत्वं कथमिति जिज्ञासेति द्रष्टव्यम् । एवमन्यदपीत्युक्तमेव दर्शयति **यथा तुरीवेमादीति** ।

शे०वा०— यद्यपि परप्रसिद्ध्याद्यनुसारिनिर्देशक्रमानुसारेणासमवायिकारणलक्षणकथनपूर्वकं स्वरूपेण तदुपदर्श्यानन्तरं निमित्तकारणं लक्षयित्वा स्वरूपेण तत्प्रदर्शयितुमुचितम् । तथाऽपि सूचीकटाहन्यायेनादौ निमित्तकारणमेवोदाहृतमिति भावेन तल्लक्षयति **समवाय्यसमवायिव्यतिरिक्तमिति** । नन्वत्र प्रकृतकार्यसमवायिकारणादिभिन्नत्वं विवक्षितमुत यत्किञ्चित्कार्यसमवायिकारणादिभिन्नत्वम् । नाद्यः । ध्वंसनिमित्तेऽव्याप्तेः । तत्र प्रकृतकार्यस्य ध्वंसस्य समवायिकारणाद्यप्रसिद्ध्या तद्भिन्नत्वस्य वक्तुमशक्यत्वात् । न च भावनिमित्तस्यैवात्र लक्षणलक्ष्यत्वाङ्गीकारान्न ध्वंसनिमित्ते अव्याप्तिरिति वाच्यम् । तथा सति सामान्यलक्षणानुयोगे मूकी-

भावप्रसङ्गात् । नान्त्यः । घटादिनिमित्ते दण्डादावव्याप्तेः । तस्य स्वगतरूपादिसमवायिकारणत्वेन यत्किञ्चित्समवायिकारणभिन्नत्वाभावात् । न च नेदं निमित्तसामान्यलक्षणं, किन्तु प्रागभावरूपस्य मुख्यस्य निमित्तस्यैवेति न घटादिनिमित्ते दण्डादावव्याप्तिरिति वाच्यम् । सामान्यलक्षणानुयोगे मूकीभावप्रसङ्गानुद्धारादिति चेत् । अत्र केचित् । प्रकृतकार्यनिष्ठप्रतियोग्यनुयोगिभावसम्बन्धाश्रयसमवायिकारणभिन्नत्वे सति तदसमवायिकारणभिन्नत्वे सति प्रकृतकार्यकारणत्वं निमित्तकारणत्वमिति सर्वसाधारणलक्षणमिति । तन्न । घटध्वंसनिमित्तकपालेऽव्याप्त्यापत्तेरिति । अत्र ब्रूमः । अपेक्षाबुद्धि(नाशान्यकार्य)नाशजनकनाशप्रतियोगिभिन्नत्वे सति कारणं निमित्तकारणमित्यत्र तात्पर्यात् । यद्वा यस्य यस्मिन्कार्ये समवायित्वाभावोऽसमवायित्वाभावः कारणत्वं च तत् तस्मिन् कार्ये निमित्तकारणमिति विवक्षितम् । अस्ति चेदं ध्वंसनिमित्तेऽपि । तस्यापि ध्वंसे कार्ये समवायित्वाभावात् असमवायित्वाभावात् कारणत्वाच्च । न च ध्वंसे कार्ये समवायित्वाप्रसिद्ध्या कथं तदभावस्तत्रेति वाच्यम् । एवं तर्हि वायौ हि घटरूपं नास्तीति प्रतीतिर्न स्यात् । वायौ घटरूपाप्रसिद्धेः । यदि च वायुमात्रस्य प्रसिद्धौ घटरूपस्य च प्रसिद्धौ वायौ घटरूपं नास्तीति प्रतीतौ न बाधकमिति मन्यसे, तदा ध्वंसस्य प्रसिद्धौ मुद्गरादेर्भावसमवायिकारणत्वस्य च प्रसिद्धौ ध्वंसे मुद्गरादीनां समवायिकारणत्वं नास्तीति प्रतीतौ न बाधकमिति समानमिति दिक् । **अन्यदिति** । असाधारणमित्यर्थः ।

वा०र०— भाष्यकाराचातुर्री परिहरन्नुत्तरग्रन्थमवतारयति **यद्यपि परेति** । निर्देशक्रमस्यानुसरणीयत्वे **हेतुपरेत्यादि** । अत्रासमवायिकारणवदिति शेषः । यथा समवायिकारणे उक्तक्रममनुसृत्य प्रथमतो लक्षणकथनं स्वरूपेण तन्निर्देशौ कृतौ तथेत्यर्थः । अत्र हीत्यनेन भाष्येण लक्षणस्याभिधानात् इतरयोरपि समवाय्यन्य इति निमित्तमिति चोक्त्या भाष्ये तल्लक्षणस्य सूचनादिति भावेन लक्षणकथनेत्याद्युक्तम् । अत्र लक्षणकथनसाहित्यमात्रे तात्पर्यं न तु तत्पूर्वभावित्वे । मूलकारेण तु विवेकेन प्रथमतो लक्षणकथनं योजितम् । **अतोऽत्र हीति** । समवायिकारणलक्षणस्य पश्चात् भाष्येऽनुक्तावपि न दोषः । **उदाहृतमिति** । प्रथमत इति शेषः । सलक्षणमिति वा लक्षयतीत्यस्य भाष्यं सूचितं लक्षणं दर्शयतीत्यर्थः । एवं चात्र भाष्यकारोक्तावेव भारसत्त्वात् भाष्यकारमूलकारव्यापारयोः साङ्कर्येण उक्तिरिति शङ्कानवकाशः इति सूरयः विदांकुर्वन्तु । मल्लारिभट्टचनुसारेणाह **न च प्रकृतेत्यादि प्रकृतकार्येति** । प्रकृतकार्यं समवायीत्युक्ते ध्वंसनिमित्तेऽव्याप्तिः । अतः सम्बन्धनिवेशः । तथा च ध्वंसनिमित्तविवक्षायां प्रकृतकार्यध्वंसः । तन्निष्ठोपसम्बन्धः । तदाश्रयो यः प्रतियोगिरूपो घटः तत्समवायीति योज्यम् । दण्डविवक्षायां प्रकृतकार्यं घटः तन्निष्ठसम्बन्धाश्रयश्च स एव विवक्षितः तत्समवायीति योज्यम् । **कपाल इति** । प्रकृतकार्ये ध्वंसः । तन्निष्ठेत्यादि पूर्ववत् । **अपेक्षाबुद्धिनाशान्येति** । अपेक्षाबुद्धिनाशान्यो यः कार्यनाशः तत्कृतनाशः तत्प्रतियोगीति योजना । अत्र कारणत्वमात्रसमवाय्यसमवायिकारणयोरिति व्याप्तिवारणाय कार्यनाशजनकनाशप्रतियोगिभिन्नेत्युक्तम् । अन्येत्यनुक्तौ अपेक्षाबुद्धिनाशेन यत्र कार्यनाशः तत्रापेक्षाबुद्धेः कार्यनाशजनकनाशप्रतियोगित्वेन तद्भिन्नत्वाभावात् अव्याप्तिरित्यतोऽन्येत्यन्तम् । तथा चापेक्षाबुद्धेः स्वनाशप्रतियोगित्वेऽपि स्वनाशातिरिक्तकार्यनाशजनकनाशप्रतियोगित्वाभावेन उक्तरूप-

भिन्नत्वान्नाव्याप्तिरिति । **तात्पर्यादिति** । अत्र तात्पर्यमितीति पाठः स्वरस एव । तात्पर्यात् इत्येवं पाठे तदनन्तरं इति शब्दो ज्ञेयः ।

॥ इति वैशेषिकोक्तसृष्टिविषये भावरूपकार्यजनककारणत्रैविध्ये निमित्तकारणोदाहरणम् ॥
॥ इति वैशेषिकोक्तसृष्टिविषये भावरूपकार्यजनककारणत्रैविध्यम् ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये कार्याकार्यविभागः ॥

७ **मु०— समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम् । समवायिकारणतत्समवायिकारणयोरन्यतरसमवेतत्वं समवायिकारणप्रत्यासन्नत्वम् । सामर्थ्यावधारणं चानन्यथासिद्धनियतपूर्वभावित्वेन भवति । तच्चासमवायिकारणं 'द्रव्यं समवायिकारणमि'तिवन्नैकोक्त्या वक्तुं शक्यम्, प्रतिकार्यं पृथक्त्वात् । अतस्तद्विवेकेन दर्शयितुं तज्ज्ञानस्य कार्यज्ञानसापेक्षत्वात् कार्याकार्यविभागं तावदाह **सामान्येति** ।**

अनु०— सामान्यान्त्यविशेषौ च समवायश्च तत्त्रयम् ।
नित्यं क्रिया अनित्याश्च गुणद्रव्ये द्विरूपके ॥

कार्यत्वानित्यत्वयोः समनियमान्नित्यानित्यविभागोक्त्या कार्याकार्यविभाग एव सिद्ध्यति ।

परि०— एवं तर्हि तत्त्रयमकार्यमिति वक्तव्ये नित्यमिति कथमुक्तमित्यत आह **कार्यत्वानित्यत्वयोरिति** ।

कं०रा०— पटरूपादिकं प्रत्यसमवायिकारणे तन्तुरूपादौ प्रकृतकार्यसमवायिकारणपटादिप्रत्यासन्नत्वाभावादसमवायिकारणत्वं न स्यादित्यतो विवक्षितं समवायिकारणप्रत्यासन्नत्वमाह **समवायिकारणतत्समवायिकारणयोरिति** । तथा च पटरूपादिकं प्रति यत्समवायिकारणं पटादितत्समवायिकारणे तन्त्वादौ तन्तुरूपादेः समवेतत्वेन समवायिकारणयोरन्यत्र समवेतत्वस्य सत्त्वादसमवायिकारणत्वं सम्भवतीति भावः ।

श्रीनिधि०— ननु पटगतरूपं प्रति असमवायिकारणे तन्तुरूपे अव्याप्तिः । तस्य समवायिकारणपटसमवेतत्वाभावात् इत्यत आह **समवायिकारणयोरिति** । प्रत्यासत्तिर्द्विविधा । कार्यैकार्थप्रत्यासत्तिः कारणै-

कार्यप्रत्यासत्तिरिति । तत्राद्यस्याभावेऽपि पटरूपकारणेन पटेन सह एकस्मिन् तन्तुलक्षणेऽर्थे समवेतत्वान्नाव्याप्तिरिति भावः । **प्रतिकार्यं पृथक्त्वादिति** । प्रतिकार्यमेकरूपत्वाभावादित्यर्थः । समवायिकारणं तु द्रव्यमेव । असमवायिकारणं तु क्वचिद्गुणः क्वचित् क्रियेति पृथक्त्वमिति भावः ।

शे०वा०— ननु 'सामान्ये'त्याद्युत्तरवाक्यमनर्थकम् । न च कार्याकार्यविभागप्रतिपादनार्थत्वान्न तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च 'कार्ये गुणक्रियाणामि'त्यादिना विविच्य वक्ष्यमाणासमवायिकारणोदाहरणज्ञानोपयोगित्वान्न तदानर्थक्यमिति वाच्यम् । समवायिकारणवत् एकोक्त्यैव तस्य वक्तुं शक्यत्वेन विविच्य तद्वचनस्याप्यनर्थकत्वादित्यतः समवायिकारणवत् साधारण्येन तस्योपदर्शयितुमशक्यत्वेन विविच्यैव तदुपदर्शनस्यावश्यकतया तदपेक्षितकार्याकार्यविभागज्ञानोपयोगित्वान्न तत्कथनस्य वैयर्थ्यमिति भावेन तत्परतयोत्तरवाक्यं योजयितुं तदुपयोगितयाऽसमवायिकारणलक्षणं तावदाह **समवायिकारणप्रत्यासन्नमिति** । अत्र विशेष्यमात्रं समवायिकारणे गतमिति विशेषणभागः । तन्मात्रं च तन्तुत्वादौ गतमिति विशेष्यभागः । तदर्थश्च कारणत्वमात्रं न तु निश्चितकारणत्वम् । तन्तुत्वादावपि भ्रमरूपकारणत्वनिश्चयसम्भवेनातिव्याप्त्यापातात् । न च निश्चयपदं प्रमापरम् । तस्यापि व्यर्थत्वात् । कारणत्वमात्रार्थत्वेऽप्यतिव्याप्त्यभावात् । यदत्राधिकं वक्तव्यं तदेतन्निराकरणावसर एव वक्ष्यते । ननु समवायिकारणप्रत्यासन्नत्वं न तावत्साक्षात्समवायिकारणप्रत्यासन्नत्वं युक्तम् । तन्तुसंयोगादौ तत्सत्त्वेऽपि तस्य तन्तुरूपादावभावेनाव्याप्तिप्रसङ्गात् । नापि समवायिकारणसमवायिकारणप्रत्यासन्नत्वम् । तन्तुरूपादौ तत्सत्त्वेऽपि तन्तुसंयोगादावसत्त्वेनोक्तदोषात् । नाप्युभयम् । कुत्राप्यसत्त्वेनासम्भवप्रसङ्गादित्यत आह **समवायिकारणेति** । एवमसमवायिकारणलक्षणमुक्त्वा तस्य विविच्योदाहर्तव्यतामुपपादयितुमेकोक्त्या तत्प्रदर्शनासम्भवमुपपादयति **तच्चेति** । तर्हि कार्याकार्यविभाग एव वक्तव्यो न तु नित्यानित्यविभाग इत्यतस्तदुक्त्या तस्यैव सिद्धेर्नानुपपत्तिरित्यभिप्रेत्य तदुक्त्या तल्लाभमुपपादयति **कार्यत्वेति** । **समनियमादिति** । यद्यपि कार्यत्ववति ध्वंसे अनित्यत्वविरहादनित्यत्ववति च प्रागभावे कार्यत्वविरहान्न कार्यत्वानित्यत्वयोः समनियमः तथाऽपि प्रागभावोपलक्षितसत्तायोगित्वं कार्यत्वं स्वप्रच्युत्युपलक्षितसत्तायोगित्वं विनाशित्वमित्यभिप्रेत्य समनियमकथनमित्यवधेयम् ।

वा०र०— **प्रतिपादनार्थत्वादिति** । उत्तरवाक्यस्येति विभक्तिविपरिणामेन वर्तते । मुरारिभट्टश्चनुसारेणासमवायिकारणलक्षणपदकृत्यकथनं ज्ञानादिनां इच्छादीन् प्रति असमवायित्वप्रसङ्गेन एतल्लक्षणदोषशङ्कायाः आत्मावृत्तित्वविशेषणादिना परिहारादिविचारो न प्रवर्तयितुं शक्यः । मूल एव तल्लक्षणस्य यथाश्रुतस्याग्रेऽपि दूषणाधिकविवक्षादेश्च मूले तट्टीकायां चोत्तरत्र स्पष्टत्वात् । ततो न तद्विचारोऽत्र क्रियते । किन्तु उत्तरत्रैव स द्रष्टव्यः इत्याह **यदत्राधिकमिति** । **सत्त्वेऽपि तस्य** इत्यत्र तस्य सत्त्वोऽपीति पूर्वेणापि सम्बन्धः । प्रागभावोपलक्षितेत्यादिध्वंसस्य प्रागभावप्रतियोगित्वेऽपि प्रागभावस्य च स्वप्रच्यतिमत्वेऽपि तत्तदुपलक्षितसत्तायाः तत्राभावात् । कृतकत्वानित्यत्वयोः सत्ताऽनुप्रवेशस्य परैरङ्गीकारादिति भावः । एतच्च जिज्ञासाधिकरणीयवाक्यार्थचन्द्रिकोक्तरीत्या तदुपपादनानुसारेण चोपपादनीयम् ।

विष्ठल०— कार्याकार्यविभागे वक्तव्ये नित्यमित्यादि किमर्थमुच्यत इत्यत आह **कार्यत्वानित्यत्वयोरिति** ।

चषक— **समवायिकारणप्रत्यासन्नं** समवायिकारणनिरूपितकार्यैकार्थप्रत्यासत्तिकारणैकार्थप्रत्यासत्त्यन्यतरविशेषितम् ।

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये कार्याकार्यविभागार्थं सप्तपदार्थप्रदर्शनम् ॥

८ **सु०— षडिमे द्रव्यगुणकर्मसामान्यविशेषसमवायाः भावरूपाः पदार्थाः । अभावः सप्तमः ।**

विधिरूपो भावः । निषेधरूपोऽभावः ।

गुणाश्रयो द्रव्यम्, समवायिकारणं वा । सामान्यवानसमवायिकारणमस्पन्दात्मा गुणः । चलनात्मकं कर्म । नित्यमेकमने(कानुगतं)कसमवेतं सामान्यम् । नित्येष्वेव द्रव्येष्वेव वर्तन्त एव ये ते (अन्त्य)विशेषाः, अत्यन्तव्यावृत्तिहेतवो वा । अयुतसिद्धयोः सम्बन्धः समवायः, अवश्यमाश्रयाश्रयिभावेनावस्थितावयुतसिद्धौ, नित्यः सम्बन्धो वा ।

परि०— सामान्यादिस्वरूपं व्यक्तीकर्तुं पदार्थानाह **षडिमे इति** । गुणाश्रयत्वमाद्यक्षणे नेत्यतो लक्षणान्तरमाह **समवायिकारणमिति** । यदा तु गुणाश्रयत्वं गुणात्यन्ताभावानधिकरणत्वं विवक्षितं तदा विषयव्यास्यर्थं लक्षणान्तरम् । **असमवायिकारणमिति** । समवायिकारणभिन्नमित्यर्थः । सामान्यादिचतुष्टये द्रव्ये कर्मणि चानतिव्याप्तये क्रमात् त्रीणि विशेषणानि । **नित्यमेकमनेकानुगतमिति** । अनेकानुगतत्वमनेकसमवेतत्वम् । क्वचिदनेकसमवेतमित्येव पठ्यते । तेनात्यन्ताभावादौ समवाये च नातिव्याप्तिः । अधिकरणभेदेनाभावभेदानभ्युपगमेन अनेकाधिकरणेष्वाकाशाद्यत्यन्ताभावान्योन्याभावयोः सत्त्वात् । संयोगादावनतिव्याप्तये नित्यमित्युक्तिः । गगनादावनतिव्याप्तये अनेकानुगतमित्युक्तिः । अत्र नित्यमनेकसमवेतमित्येतावतैव पूर्तौ एकमित्युक्तिः स्वरूपकथनायेत्याहुः । **नित्येष्वेवेत्यादि** । अत्र वर्तन्त इत्येवोक्तौ घटादावतिव्याप्तिः, अतो वर्तन्त एवेत्युक्तम् । घटादेराद्यन्तवत्त्वेन पूर्वोत्तरकालमवर्तनात् । तावत्युक्ते रूपत्वादौ, ततो द्रव्येष्विति । तावति सत्तायाम् । अतो द्रव्येष्वेवेति । तावत्युक्ते घटत्वादौ, अतो नित्येष्विति । तावत्युक्ते

द्रव्यत्वादौ, अतो नित्येष्वेवेति । नित्येषु वर्तन्ते विशेषा इत्युक्तौ पार्थिवपरमाणुरूपादौ, अतो वर्तन्त एवेति । तावत्युक्तौ सत्तादौ, अतो नित्येष्वेवेति । तावत्युक्तौ आप्यपरमाणुरूपत्वादौ, ततो द्रव्येष्विति । तावत्युक्ते परमाणुपारिमाण्डिल्यान्तरत्वादौ, अतो द्रव्येष्वेवेति । नित्येषु द्रव्येष्वेव वर्तन्त एव विशेषा इत्युक्तौ द्रव्यत्वगुणकर्मध्वंसादौ, अतो नित्येष्वेवेति । **अत्यन्तव्यावृत्तिहेतवो वेति** । व्यावृत्तिशब्दो व्यावृत्तिधीपरः । अत्यन्तं केवलं व्यावृत्तिधीहेतवः । अयमस्मादन्य इति भेदधीमात्रहेतवो न कदाचिदनुगतबुद्धिहेतव इत्यर्थः । व्यावृत्तिहेतव इत्येवोक्तौ व्यावृत्तेः प्रागेव सिद्धत्वेन व्यावृत्तिधीहेतव इति वक्तव्यम् । तावतो द्रव्यत्वादावतिव्याप्तत्वादत्यन्तेति । तस्याद्रव्यादितो व्यावृत्तिधीहेतुत्वेऽपि इदं द्रव्यमिदं द्रव्यमित्यनुगत(वृत्ति)बुद्धेरपि हेतुत्वेन केवलं व्यावृत्तिबुद्धिहेतुत्वाभावात् ।

गु०दी०— सामान्यवानसमवायिकारणमस्पन्दात्मा गुण इत्यत्र **असमवायिकारणं** समवायिकारणभिन्नम् । साक्षादसमवायिकारणत्वे तेनैव सामान्यादीनामपि व्यावृत्तेस्सामान्यवानिति पदं व्यर्थं स्यात् ।

यादु०— विधिरूप इति । नञर्थानुल्लिखितधीविषय इत्यर्थः । **निषेधरूप इति** । नञर्थोल्लिखितधीविषय इत्यर्थः । गुणाश्रयत्वं प्रथमक्षणावच्छिन्नघटेऽव्याप्तमतो लक्षणान्तरमाह **समवायिकारणमिति** । **सामान्यवानिति** । अत्रासमवायिकारणमित्यस्य समवायिकारणभिन्नमित्यर्थः । तथा च सामान्यादिचतुष्टये द्रव्ये कर्मणि चातिव्याप्तिवारणाय क्रमेण विशेषणानि । **नित्यमेवमिति** । अत्र नित्यत्वमात्रं गगनेऽतिव्याप्तं, समवेतत्वविशेषितं विशेषे, अनेकत्वविशेषितं समवेतत्वं विशेषेष्वेकत्वविशेषितमनेकसमवेतत्वं संयोगादावयविनि च । समवेतत्वपरित्यागेनानुगतत्वमात्रोक्तावनेकाधिकरणकान्योन्याभावात्यन्ताभावयोः समवाये च अतः सर्वं सार्थकमिति बहवः । तच्चिन्त्यमित्यपरे । अनेकसमवेतत्वं यद्यनेकत्वसङ्ख्यावत्समवेतत्वरूपं तदा रूपत्वादावव्याप्तिः । यदि च स्वाश्रयप्रतियोगिकान्योन्याभाववत्समवेतत्वरूपं तदैकपदं व्यर्थं, कुत्रापि विशेषे निरुक्तानेकसमवेतत्वाभावात् । समुदायस्य च समुदायिभिन्नस्याभावादिति । तस्मादत्रैकत्वं न लक्षणशरीरान्तर्गतं किन्तु सामान्यं सर्वत्रानुगतव्यवहारहेतुत्वादेकमेव न विशेषवत् प्रतिव्यक्तिभिन्नमिति स्वरूपकथनार्थमेवेति सम्प्रदायविदः । **नित्येष्वेवेति** । अत्र द्रव्येषु ये वर्तन्ते ते विशेषा इत्युक्ते सामान्यसमवायाभावेष्वतिव्याप्तिरतो द्रव्येष्वेवेत्युक्तम् । तथाऽपि गुणकर्मणोस्तत्प्रागभावप्रध्वंसयोश्चातिव्याप्तिः, तदर्थं **नित्येष्वेवेति** । तथाऽप्यात्मत्वमनस्त्वयोर्नित्यद्रव्यगतगुणविशेषेषु चातिव्याप्तिरतो वर्तन्त एवेति । अयोगव्यवच्छेदकेनानेन कादाचित्कवृत्तिः क्वाचित्कवृत्तिश्च व्यावर्त्येते । ततश्च नित्यद्रव्येष्वेव सदा सर्वत्रवर्तमाना इत्यर्थो लभ्यते । तेन नित्यद्रव्येष्वेव विद्यमानानां कादाचित्कानां ज्ञानादीनां क्वाचित्कानां मनस्त्वादीनां च व्यवच्छेदसिद्धिः । ननु वर्तन्त एवेत्यवधारणस्य क्वाचित्कवृत्तिव्यवच्छेदकत्वव्याख्यानेनैव मनस्त्वादिवत् कादाचित्कानां ज्ञानादीनामपि व्यवच्छेदसिद्धौ कादाचित्कवृत्तिव्यवच्छेदकत्वमपि किमर्थं व्याख्येयं प्रयोजनाभावादिति चेन्न ।

सर्वनित्यद्रव्येष्वेव विद्यमाने नित्यद्रव्यत्वादावतिव्याप्तिवारणस्यैव तत्प्रयोजनत्वात् । उपाधीनां च नानापदार्थघटितानां अनित्यत्वात् । नित्येष्वेवेत्यस्यानुक्तौ द्रव्यत्वेऽतिव्याप्तिः । द्रव्येष्वेवेत्यस्यानुपादाने विशेषस्य नित्यगुणादिष्ववृत्त्याऽसम्भवोऽतः सर्वं सार्थकमेवेति । **अत्यन्तव्यावृत्तिहेतव इति** । अत्यन्तव्यावृत्तिप्रत्ययहेतव इत्यर्थः । अत्र व्यावृत्तिप्रत्ययहेतुत्वमात्रं दण्डादिद्रव्ये गुणे रूपादौ कर्मणि द्रव्यत्वादिसामान्ये चातिव्याप्तमतोऽत्यन्तेत्युक्तम् । अत्यन्तं केवलं व्यावृत्तिहेतवो व्यावृत्तिहेतव एव न कदाऽप्यनुवृत्तिहेतव इति यावत् । दण्डादिकं तु न तथा । तस्य दण्ड्यन्तरादिभ्योऽव्यावर्तकत्वेनानुवृत्तिहेतुत्वस्यापि सत्त्वादित्यवधेयम् । अत एवाहुर्वैशेषिकाः 'ते हि विशेषा एव व्यावृत्तिबुद्धिमात्रहेतवो न तु सामान्यरूपा अपी'ति । **अवश्यमाश्रयेति** । कुण्डबदरादिव्युदासाय **अवश्यमिति** । नियमेनेत्यर्थः । नन्वेवं तन्त्वादिनाशक्षणे विनश्यदवस्थस्य पटादेस्तन्त्वाद्याश्रितत्वाभावादव्याप्तिः । न चाविनश्यन्तावित्यपि विशेषणं विवक्षितमिति वाच्यम् । आत्मात्मत्वादिरूपयोर्नित्ययोरयुतसिद्धयोर्विनाशाप्रसिद्ध्या अव्याप्त्यापत्तेरिति चेन्न । यावुभौ स्वस्थित्यवच्छिन्नकालावच्छेदेन नियमेनाश्रयाश्रयिभावेनावस्थितौ तौ अयुतसिद्धाविति विवक्षितत्वात् । आश्रयाश्रयिभावश्चातिरिक्तसम्बन्धेन विवक्षितोऽतो न कालघटत्वयोर्भूतलघटाद्यभावयोश्चातिव्याप्तिरिति द्रष्टव्यम् ।

कं०रा०— द्रव्यस्य लक्षणान्तरमाह **समवायिकारणं चेति** । **सामान्यवत्त्वमिति** । समवायिकारणाभिन्नत्वे सत्यस्मदात्मत्वस्य सामान्ये सत्त्वादतिव्याप्तिः स्यात् तन्निरासाय सामान्यवत्त्वविशेषणं सामान्यवत्त्वे सत्यस्मदात्मत्वस्य द्रव्ये सत्त्वादतिव्याप्तिः तन्निरासायासमवायिकारणपदं सामान्यवत्त्वे सति समवायिकारणभिन्नत्वस्य कर्मणि सत्त्वादतिव्याप्तिः तन्निरासाय अस्पन्दात्मेतिपदम् । **नित्यमिति** । न च वाच्यं नित्यत्वे सत्येकत्वे सत्यनेकानुगतत्वस्य समवाये सत्त्वादतिव्याप्तिरिति अनेकानुगतशब्देनानेकसमवेतत्वस्य विवक्षितत्वात्समवाये च तदभावात् । एवं चैकपदं स्वरूपकथनपरम् । नित्यं सामान्यमित्युक्ते परमाण्वादावतिव्याप्तिस्तन्निरासायानेकानुगतपदं तावत्युक्तेनेकं तन्त्वादिसमवेते पटादावतिव्याप्तिः तन्निरासाय नित्यपदम् । न च वाच्यमाकाशादिगतपरममहत्परिमाणादौ नित्यत्वे सत्यनेकानुगतत्वस्य सत्त्वादतिव्याप्तिरिति । परिमाणादेः तत्तद्व्यमात्रवृत्तित्वेनानेकानुगतत्वस्यैवाभावादिति । अवश्यमिति न च वाच्यम् । दिक्कालयोर्घटादीनां चावश्यमात्रयाऽऽश्रयिभावस्य सत्त्वेनायुतसिद्धत्वापत्त्या तत्सम्बन्धस्य समवायत्वापत्तिरिति जगदाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धप्रयोज्याश्रयाश्रयिभावस्य विवक्षितत्वात् तस्य चोक्तस्थले असत्त्वादिति । **नित्यसम्बन्धा वेति** । समवाय इति शेषः ।

श्रीनिधि०— विधिरूप इति । अस्तीति प्रत्ययगोचर इत्यर्थः । **निषेधरूप इति** । नास्तीति प्रत्ययगोचर इत्यर्थः । **सामान्यवानसमवायिकारणमिति** । समवायिकारणभिन्न इत्यर्थः । इदं च द्रव्यव्यावृत्त्यर्थम् । **अनेकानुगतमिति** । समवायसम्बन्धेनेति शेषः । अतो न समवायेऽतिव्याप्तिः । नित्येष्वेव द्रव्येष्वेव वर्तत एव ते विशेष इति । अत्राद्ययोरेवाकारयोः व्याख्यानव्याख्येयभावो द्रष्टव्यः । तद्ग्रन्थे

एकस्यादर्शनात् । तृतीयस्तु साकल्यार्थः । तथा च सकलनित्यद्रव्यवृत्तयो विशेषा इत्युक्तं भवति । नित्यद्रव्यमात्रवृत्तय इत्येवोक्ते अणुपरिमाणेऽतिव्याप्तिः । अतस्सकलेत्युक्तम् । नित्यपदं विहायोक्ते सकलनित्यद्रव्यवृत्तिद्रव्यत्वेऽतिव्याप्तिः । अतः नित्येति । द्रव्यं पदं विहायोक्ते सकलनित्यमात्रवृत्तिनित्यत्वेऽतिव्याप्तिः असम्भवश्च । अतः द्रव्येत्युक्तम् । सत्ताव्यावृत्त्यर्थं मात्रेत्युक्तम् । एवमपि नित्यद्रव्यमात्रवृत्तिसंयोगेऽतिव्याप्तिरिति चेत् न । नित्यद्रव्यमात्रवृत्तित्वं नाम स्वस्य वा स्वसमानजातीयस्य वा तदितरावृत्तित्वे सति तद्वृत्तित्वमिति विवक्षितत्वात् । अत एव न तन्मात्रवृत्ति बहुत्वसङ्ख्यायां अतिव्याप्तिः । एवमपि नित्यद्रव्यं विभागं कृत्वा तदन्यतरत्वेऽतिव्याप्तिरिति चेन्न । तदन्यान्यत्वं तच्च तदन्योन्याभाव एव । एवं चोक्तमेवोत्तरम् । भेदजातीयस्यानित्येऽपि वृत्तेः बहुवचनं तु प्रकृतापेक्षया न तु लक्षणेऽनुप्रवेशः । **अत्यन्तव्यावृत्तिहेतवो वेति** । स्वस्मिन् व्यावृत्तिप्रयोजकधर्माभावेऽपि स्वसमानजातीयवद्व्यावर्तकत्वमित्यर्थः । दण्डादिकं तु दण्ड्यन्तराद्व्यावृत्तौ स्वस्मिन् तत्प्रयोजकं नैल्यादिकमपि विशेषमपेक्षत इति भावः । एतच्च स्पष्टीभविष्यति ।

शे०वा०— विधिरूप इति । नञर्थानुल्लिखितधीविषय इत्यर्थः । **निषेधरूप इति** । नञर्थोल्लिखितधीविषय इत्यर्थः । **गुणाश्रय इति** । गुणवदन्यान्य इत्यर्थः । तेन नोत्पत्स्यमानगुणे द्रव्येऽव्याप्तिः । अन्योन्याभावस्य व्याप्यवृत्तितया कदाचिद् गुणवतो द्रव्यस्य गुणवदन्यत्वाभावात् गुणाश्रयत्वाभावेऽपि गुणवदन्यान्यत्वादिति भावः । न चैवमप्यनुत्पन्नगुणमेव प्रध्वस्तं यद्द्रव्यं तत्र कदाचिदपि गुणवत्त्वाभावेन गुणवदन्यत्वादव्याप्तिरिति वाच्यम् । गुणवद्वृत्तिपदार्थविभाजकोपाधिमदित्यत्र तात्पर्यात् । यद्वा एतदस्वरसादेव तल्लक्षणान्तरमाह **समवायिकारणं वेति** । स्वसमवेतकार्यजनकतावच्छेदकजातीयमित्यर्थः । अतो न प्राचीनदोषानुषङ्ग इति ध्येयम् । **सामान्यवानिति** । सामान्यादिचतुष्टयव्यावृत्त्यर्थं सामान्यवानिति विशेषणम् । तच्च जातिमत्परमिति न सामान्यादौ प्रसङ्गः । जातिमत्त्वं च साक्षात्सम्बन्धेन विवक्षितम् । अन्यथा तद्वृत्त्युपाधिशरीरप्रविष्टजातेः परम्परया तत्रावृत्तावनुगतव्यवहाराभावप्रसङ्गात् । द्रव्यव्यावृत्त्यै असमवायिकारणमिति । तदर्थश्च समवायिकारणभिन्नत्वमिति न कश्चित्क्षुद्रोपद्रवः । तदपि च स्वरूपायोग्यत्वं विवक्षितमतो नोत्पद्यमानद्रव्ये प्रसङ्गः । कर्मव्यावृत्त्यर्थमस्पन्दात्मेत्युक्तम् । कर्मभिन्न इत्यर्थः । **नित्यमेकमिति** । नित्यत्वमात्रं गगने । समवेतत्वविशिष्टमपि विशेषेष्वतोऽनेकेति । अनेकसमवेतत्वमात्रमपि संयोगादाववयविनि च गतमतो नित्यमित्युक्तम् । अनेकसमवेतत्वं च सर्वविशेषान्योन्याभाववत् समवेतत्वमिति न रूपत्वादावव्याप्तिः । एकपदं तु न लक्षणान्तर्गतं किन्तु विशेषवत् प्रतिव्यक्ति नानेकं सामान्यं किन्त्वेकमित्येकाकारप्रत्ययनिर्वाहक्षमत्वं तस्योपदर्शयितुमेव । समवेतपदं वृत्तिमन्मात्रपरमित्यङ्गीकृत्याभावसमवाययोरतिव्याप्तिनिरासाय तदित्यप्याहुः ।

कदलीकारोक्तं लक्षणमनुवदति **नित्येष्वेवेति** । वर्तमानत्वमात्रं घटादावतिप्रसक्तमतो वर्तन्त एवेत्यवधारणं गृहीतं, नित्या इत्यर्थः । तथाऽपि गुणत्वादौ प्रसङ्गस्तदर्थं **द्रव्येष्विति** । तथाऽपि घटत्वादौ प्रसङ्गस्तदर्थमवधारणं यावदर्थकम् । तथा च घटत्वादेर्नित्यत्वद्रव्यवृत्तित्वयोः सत्त्वेऽपि यावद्द्रव्यवृत्तित्वाभावान्नातिप्रसङ्गः । तथाऽपि सत्तायां प्रसङ्गस्तन्निवृत्त्यर्थं तृतीयमवधारणमन्ययोगव्यवच्छेदार्थम् । न च

द्रव्यमात्रवृत्तय इत्युक्ते घटत्वादौ प्रसङ्गाभावात् तद्वारकावधारणं व्यर्थमिति वाच्यम् । नित्यद्रव्यत्वरूपोपाधौ प्रसङ्गवारकत्वात् । आत्मत्वमनस्त्वादौ प्रसङ्गवारणार्थत्वाद्यावदर्थकमवधारणमपि सार्थकम् । यावन्नित्यमात्रवृत्तयो नित्या इत्युक्ते नित्यगुणमात्रवृत्तिगुणत्वादावप्रसङ्गाद्द्रव्यपदमनर्थकमिति चेन्न । विशेषाणां नित्यगुणाद्यवृत्तित्वेन यावन्नित्यवृत्तित्वाभावादसम्भववारकतया तत्सार्थक्यादिति सर्वं सार्थकम् ॥ (यद्वा) केचित्त्वत्र द्रव्येषु ये वर्तन्ते ते विशेषा इत्युक्तेऽभावसमवायसामान्येष्वतिव्याप्तिः, तदर्थं द्रव्येष्वेवेत्युक्तम् । तथाऽपि गुणकर्मणोः प्रागभाव-ध्वंसयोश्चातिव्याप्तिः, तदर्थं नित्येष्वेवेति । तथाऽप्यात्मत्वमनस्त्वयोर्नित्यद्रव्यगतगुणविशेषेषु चातिव्याप्तिः, अतो वर्तन्त एवेति । अनेन कदाचिद्वृत्तिः क्वचिद्वृत्तिश्च व्यावर्तते । तेन नित्यद्रव्ये कादाचित्ककाचित्कज्ञानादीनां अकादाचित्कानामपि क्वाचित्कानां मनस्त्वादीनां च व्यवच्छेदः । तेषां देशतः कालतश्चावृत्तेरपि वर्तमान-त्वाद्वर्तन्त एवेत्ययमंशो न सम्भवतीति भवत्यनेन तद्व्यावृत्तिः । नित्येष्वेवेत्यस्यानुक्तौ द्रव्यत्वेऽतिव्याप्ति-रतस्तद्विशेषणम् । नित्येष्वेव वर्तन्त एवेत्येवोक्ते नित्यगुणेष्ववृत्त्याऽसम्भवस्तदर्थं द्रव्येष्वेवेति । नन्ववधारणेन कदाचिद्वृत्तिव्यावर्तनमयुक्तम् । कादाचित्कानामपि ज्ञानादीनां क्वाचित्कत्वेन तद्व्यावर्तकैवकारेणैव तद्व्युदासेन प्रयोजनाभावादिति चेन्न । परमाणुत्वपरममहत्परिमाणान्यतरत्वोपाधौ नित्येष्वेव (द्रव्येष्वेव) वर्तमानत्वात् अक्वाचित्कत्वाच्चेति तत्रातिव्याप्तिवारकत्वेनार्थवत्त्वात् । उपाधेश्च नानापदार्थघटितत्वेनानित्यतया कादाचित्क-त्वेनाकादाचित्कत्वार्थकावधारणस्य तत्राभावेनातिव्याप्त्यनवकाशात् । अत एव न नित्यद्रव्यत्वरूपोपाधावपि प्रसङ्ग इति सर्वं सुस्थम् ॥ शङ्करभट्टास्तु । नित्येष्वेवेत्यन्ययोगव्यवच्छेदेन द्रव्यगुणकर्मणां व्यवच्छेदः । तेषामनित्येष्वपि वृत्तेः । द्रव्येष्वेवेत्य(न्य)योगव्यवच्छेदेन सामान्यानां व्यवच्छेदस्तेषामद्रव्येष्वपि वृत्तेः । वर्तन्त एवेत्ययोगव्यवच्छेदेन ज्ञानसुखादिशब्दानां व्यवच्छेदः । तेषां स्वासत्त्वकालेऽवृत्तेरयोगस्यापि सत्त्वात् । ननु च ज्ञानादीनां सामान्यानां च नित्येष्वेवेत्यनेनैव व्यवच्छेदात् किं पदान्तरेण । न हि गुणा नित्येष्वेव वर्तन्ते न वा सामान्यानि । तथा च गुणत्वेन सामान्यत्वेन च तादृप्येण सर्वगुणसामान्यव्यवच्छेदः सिद्ध एवेति चेन्न । नित्यत्वस्य धर्मस्य व्यवच्छेदार्थं द्रव्येष्वेवेति करणात् । तादृप्येण वृत्त्यविवक्षायां चात्मत्वादिनाऽतिव्याप्ति-निरासाय तृतीयावधारणमित्यभिप्राय इत्याहुः ॥ धुण्डिराजभट्टास्तु । नित्येष्वेवेति द्रव्यगुणकर्मसामान्यानां व्यावृत्तिः । वर्तन्त एवेति बुद्धिसुखादीनां व्यावृत्तिः । अवधारणेन नित्यद्रव्यवृत्तित्वस्य विवक्षितत्वात् । बुद्ध्यादीनां च परमाण्वादावभावात् । नित्येष्वेव वर्तन्त एवेत्युक्ते लक्षणस्यासम्भवः । विशेषाणां सर्वनित्य-वृत्तित्वाभावात् । अतो द्रव्येष्वेवेत्युक्तमित्यभिप्राय इत्याहुः । प्रशस्तपादाचार्योक्तलक्षणमनुवदति **अत्यन्तेति** । केवलमित्यर्थः । व्यावृत्तिहेतुत्वं च व्यावृत्तिबुद्धिहेतुत्वमिहाभिप्रेतम् । ततश्च व्यावृत्तिबुद्धिमात्रहेतवो न तु सामान्यादिवदनुवृत्तिप्रत्ययहेतवोऽपि ते विशेषा इत्यर्थः । अत्र व्यावृत्तिहेतुत्वमात्रं दण्डादिद्रव्ये रूपादिगुणे कर्मणि द्रव्यत्वादौ सामान्ये चातिव्याप्तमतोऽत्यन्तेत्युक्तम् । तथा च दण्डादिरूपस्य द्रव्यादेरदण्ड्यादिभ्यो व्यावर्तकत्वेऽपि दण्ड्यन्तरादिभ्योऽव्यावर्तकत्वेन अनुवृत्तिप्रत्ययहेतुत्वस्यापि सत्त्वेन व्यावृत्तिप्रत्ययमात्र-हेतुत्वाभावान्न अतिप्रसङ्गः । ते हि विशेषा एव व्यावृत्तिबुद्धिमात्रहेतवो न तु सामान्यरूपा इति तदुक्तेरिति भावः ।

अयुतसिद्धयोरिति । संयोगेऽतिव्याप्तिवारणायायुतसिद्धयोरित्युक्तम् । अयुतसिद्धयोर्घटकपालयोः सम्बन्धि यज्ज्ञानं तदप्ययुतसिद्धयोर्भवतीत्यतस्तत्रातिप्रसङ्गवारणाय सम्बन्धपदम् । घटकपालयोर्ज्ञानं च यद्यप्ययुतसिद्धयोर्भवति तथाऽपि न सम्बन्ध इति न तत्र प्रसङ्गः । अयुतसिद्धत्वं च परस्परापेक्षं विवक्षितम् । अतो न संयोगेऽतिव्याप्तिः । घटपटयोर्यत्किञ्चिदपेक्षयाऽयुतसिद्धत्वेऽपि घटापेक्षया पटस्य पटापेक्षया च घटस्योक्तरूपायुतसिद्धत्वाभावादिति ध्येयम् । **अवश्यमाश्रयेति** । कुण्डबदरनिरासायावश्यमित्युक्तं नियमेन इत्यर्थः । नन्वेवमवयव्यादीनामनित्यतया स्थित्यवश्यम्भावाभावेन ययोर्मध्ये एकस्यापरस्मिन्स्थितिरेवेति नियमाभावादव्याप्तिः । न चाविनश्यदिति विशेषणात् सर्वसामञ्जस्यम् । तदर्थो हि विनश्यतारहितत्वम् । तत्त्वं च यत्किञ्चिद्विनश्यतारहितत्वं वा सकलविनश्यतारहितत्वं वा । नाद्यः । उक्तदोषानिवृत्तेः । न द्वितीयः । आत्मात्मत्वादिरूपयोर्नित्ययोरयुतसिद्धयोर्विनाशाप्रसिद्ध्या तत्राव्याप्तेः । न तृतीयः । असम्भवादिति चेन्न । ययोर्भावयोर्विद्यमानयोर्मध्ये एकस्यापरस्मिन्स्थितिरेव तत्त्वमयुतसिद्धत्वम् । यावेकस्मिन्काले ऽसम्बद्धौ न स्तः तत्त्वं वा तदिति तात्पर्यात् । आश्रयाश्रयिभावश्चात्र जगदाधारतानियामकसम्बन्धसंयोगातिरिक्तसम्बन्धेन विवक्षितः अतो न सर्वभावपदार्थकालयोः कपालावयवघटयोश्च अतिव्याप्तिरिति ध्येयम् । **नित्यः सम्बन्ध इति** । गगनादिव्यावृत्त्यै परभागः । संयोगव्यावृत्त्यै पूर्वभागः । सद्भिन्नस्वभिन्नसम्बन्धाधेयभिन्नभावत्वं तत्त्वमिति तु परमार्थः । प्रलये जात्यादेः स्वरूपसम्बन्धेन काले वृत्तावपि प्राक् समवायेनाधेयस्य न स्वभिन्न-सम्बन्धाधेयभिन्नत्वमन्योन्याभावस्य व्याप्यवृत्तित्वात् । अवृत्तिव्यावृत्त्यै सद्भिन्नेति विशेषणम् ।

वा०२०— नञर्थानुल्लिखितेति । अत्र च प्रलयध्वंसादीनां नञर्थानुल्लिखितधीविषयत्वात् । भाव-रूपत्वप्रसङ्गस्तु न प्राप्नोति । नञर्थभानमात्रस्य विवक्षितत्वेन नञोऽप्यवच्छेदकतयानुप्रवेशस्यानङ्गीकारेण प्रलयादिशब्दैश्च निषेधरूपत्वस्य प्रतीत्या निषेधरूपोल्लेखितधीविषयत्वस्यैव प्राप्त्या निषेधानुलिखितधीविषय-त्वाभावात् इत्यादिकं योजनीयम् । **नञर्थोल्लिखितेति** । प्रथमप्रतीतावित्यादिकं योज्यम् । पदार्थचन्द्रिका-नुसारेणाह **गुणवदन्येति** । अत्र गुणवदन्यान्यदित्यर्थ इति इकारयुक्तपाठः । ननु प्रथमक्षणावच्छिन्नद्रव्यस्य गुणवदन्यतया तत्राव्याप्तिरवर्जनीया इत्यत आह **अन्योन्याभावस्येति** । **कदाचित् गुणवतः इति** । उत्प-त्त्यन्तरकाले गुणवत्त्वात् सामान्येन कदाचित् गुणवत्त्वं तस्येति बोध्यम् । अनुत्पन्नगुणवत्त्वमेव प्रध्वस्तमिति । अयमाशयः । पटाख्यद्रव्यजनको हि चरमतन्तुसंयोगः । तज्जनकं च तन्तुकर्म । तज्जन्यश्च तन्तोः पूर्वदेश-विभागः । तदुत्तरतन्तुसंयोगत्वात् तद्देशतल्लक्षणे प्रथमतन्तौ कर्मोत्पन्नम् । दैवादुत्पन्नेन तेन तन्त्वन्तरविभागः तत्समये चरमतन्तुसंयोगोत्पत्तिरिति चरमतन्तुसंयोगकालः प्रथमतन्तुकर्मोत्पन्नतन्त्वन्तरविभागकालश्चैकः तदुत्तरक्षणे प्रथमतन्तुकर्मजतन्त्वन्तरविभागेन पटासमवायिकारणतन्तुसंयोगो जातः तथा चरमतन्तुसंयोगात् पटश्च जातः इति पटासमवायिकारणं संयोगनाशकालः । पटकालश्च एकः तदुत्तरक्षणे च पटारम्भकसंयोग-नाशेन पटनाशो यत्र भवति तत्र कदापि गुणोत्पत्तिर्नास्तीति । एतद्दोषपरिहाराय एतद्विवक्षाकरणेनान्यदपि सूचितम् । गुणात्यन्ताभावविरोधिमत्त्वं मत्त्वविवक्षया गुणात्यन्ताभावानधिकरणत्वमात्रस्यात्यन्ताभावेऽति-

व्याप्तिपरिहारकारणमपि न सम्भवति । उक्तविधयोत्पन्नविनष्टद्रव्ये गुणतत्प्रागभावप्रध्वंसाभावेन तत्राव्याप्तेरपरिहार्यत्वात् । प्रागभावस्य तत्तत्प्रागभावत्वेन कारणतायाः आवश्यकत्वेन तादृशद्रव्ये प्रागभावसामान्याङ्गीकारायोगात् इति ।

न च तत्र यावदसमवायिकारणनाशाभावात् न द्रव्यनाश इति वाच्यम् । न्यायसिद्धान्ते खण्डपटोत्पत्तिरङ्गीकृतास्तीति यावत्त्वविशेषणे गौरवेन लाघवात् असमवायिकारणनाशादेव द्रव्यनाशस्याभ्युपगमत्वादिति द्रष्टव्यम् । समवायिनः कारणं इत्यर्थे तन्तुरूपस्य पटसमवेतरूपकारणत्वादव्याप्तिः । समवायिकारणं यस्येति बहुव्रीहिपक्षेऽपि न तत्रातिव्याप्तिः । तन्त्वाख्यसमवायिनः तत्र कारणत्वात् । नित्यद्रव्येऽव्याप्तिश्च । नापि समवायी च तत्कारणं चेति कर्मधारयः । तन्तुरूपादौ अतिव्याप्तेः नित्यद्रव्याप्तेश्च । स्वसमवेतकार्योत्पादकत्वे समवायिकारणपदस्य निरूढत्वाङ्गीकारेऽपि प्रागुक्तानुत्पन्नगुणेऽतिव्याप्तेरेवेत्यत आह **स्वसमवेतेति** । स्वसमानजातीयसमवेतेत्यर्थः । अतो नानुत्पन्नगुणे स्वसमवेतकार्याप्रसिद्ध्याऽव्याप्तिः । **प्राचीनेति** । अनुत्पन्नगुणद्रव्ये अव्याप्तिलक्षणेत्यर्थः । मुरारिभट्टव्यनुसारेणाह **तच्च जातिमत्परमिति** । तेनोपाधिरूपसामान्यस्य सामान्यादावपि सत्त्वेऽपि जातिरूपप्रमेयत्वाभिधेयत्वस्याभावात् नातिव्याप्तिरित्युक्तं भवति । ननु उपाधिरूपसामान्यस्य परम्परासम्बन्धजातिरूपत्वात् जातिमत्त्वमपि प्राप्तमेवेत्यत आह **जातिमत्त्वं च इति** । विशेषलक्षणीयपदार्थचन्द्रिकानुसारेणाह **अन्यथेति** । **तत्तद्वृत्त्युपाधिप्रविष्टजातेरिति** । अत्र विशेषत्वोपाधिप्रविष्टाकाजातिकस्य वा पुरुषाधाराख्यस्वविशेषानुगतव्यवहारः इत्यादि विचारणीयमिति पटवर्धनः । तथा च समवायेन जातिमत्त्वं सामान्यवत्त्वमित्युक्तं भवति । **क्षुद्रोपद्रव इति** । समवायिकारणप्रत्यासन्नत्वादिरूपेण लक्षणनिर्वचनज्ञानादीनां इच्छादीन् प्रति असमवायिकारणतापत्तिः इत्यादि दोषरूप इत्यर्थः । यद्यपि यत्किञ्चित्समवायिकारणव्यक्तिप्रतियोगिकान्योन्याभाववत्वं घटादेरपीति न तेनातिव्याप्तिपरिहारः तथापि समवायिकारणत्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्वमित्यत्र तात्पर्याददोषः । समवायिकारणत्वानधिकरणत्वं वा अर्थ इति न दोषः । अत एव पदार्थचन्द्रिकायां समवायिकारणत्वराहित्यं इत्येवोक्तम् । यद्वा एतदस्वरसादेवमप्याह **तदपि चेति** । स्वरूपयोग्यताविवक्षायाः वक्ष्यमाणदोषस्येव समवायिकारणान्तरभिन्नत्वेनातिव्याप्तिदोषस्यापि परिहारात् इति बोध्यम् । **कर्मभिन्न इति** । कर्मत्वावच्छिन्नप्रतियोगिकभेदवान् इत्यर्थात् कर्मत्वानधिकरण इत्यर्थाद्वा न कश्चिद्दोषः ।

अनेकसमवेतमित्यत्र एकत्वाभाववत् समवेतत्वोक्तौ एकत्ववति घटे विद्यमाने घटत्वेऽव्याप्तिः । अनेकत्वसङ्ख्यावत्समवेतत्वोक्तौ निर्गुणरूपादिनिष्ठरूपत्वादावव्याप्तिरित्यत आह **अनेकसमवेतत्वं चेति** । सर्वे ये विशेषान्योन्याभावः । तत्तद्घटादिप्रतियोगिकाः तद्वत्समवेतत्वमित्यर्थः । न तु सर्वपदमन्योन्याभाववतो विशेषणम् । तथा सति तत्तद्घटान्योन्याभावस्य घटान्तर इव पदावपि सत्त्वात् तत्र च घटत्वादेरभावादसम्भवापत्तेः विशेषान्योन्याभाववत्त्वसमवेतत्वमात्रोक्तौ जलपरमाणुगतरूपेऽतिव्याप्तिः । तस्य नित्यस्यैकस्य पार्थिवादिपरमाणुरूपविशेषान्योन्याभाववति जलपरमाणौ समवेतत्वात् । तत्परिहाराय **सर्वेति** । तथा च

तत्तद्घटान्योन्याभाववत्सु सर्वघटेषु घटत्ववत्सर्वपरमाणुजलपरमाणुरूपाया सत्त्वान्नातिव्याप्तिः । सर्वान्योन्याभाववत्समवेतत्वमात्रोक्तौ घटान्योन्याभाववति पटादावसमवेते घटत्वेऽव्याप्तिः । एवं पटत्वादावपि । **अतो विशेषेति** । तथा च सर्वेऽपि विशेषाः अन्योन्याभावाः इत्युक्तौ तत्तद्घटान्योन्याभावाः तेषां ग्रहणे घटेऽपि घटनिरासान्योन्याभावसत्त्वात् न घटत्वेऽव्याप्तिः नापि पटत्वादौ इत्यादि पटवर्धन्यादिषु ध्येयम् ।

समवेतपदमिति । अत्र च पक्षे एकत्वं असाहायत्वं विवक्षितम् । अभावसमवाययोश्च प्रतियोगिसम्बन्धिरूपसहायवत्त्वात् न प्रसङ्ग इति ध्येयम् । **कदलीकारेति** । तत्त्वप्रदीपिकाटीकाद्युक्तरीत्येदम् । गङ्गापुरीव्याख्यानरूपषट्सहस्र्यां तु श्रीधरोक्तं इत्युक्तम् । वर्तेते एवेत्यनेन प्राप्त 'कदाचित् न वर्तत इति ने'त्यनेन लब्धं दर्शयति **नित्या इत्यर्थ इति** । नित्याः इत्यस्य नित्यं वर्तते इत्यर्थस्य विवक्षितत्वात् द्रव्येषु नित्याः इत्यादेः नासङ्गतिरिति बोध्यम् । यद्वा द्रव्येष्विति सप्तम्यैव वर्तत इति लाभात् द्रव्यवर्तिनो नित्याः इति लाभः । वक्ष्यति च **द्रव्यवृत्तित्वयोरिति** । **अवधारणं यावदिति** । **द्रव्येष्वेवेति** अवधारणमित्यर्थः । **तथापि सत्तायामिति** । नित्यत्वयावद्द्रव्यवृत्तित्वयोः सत्तायां सत्त्वात् तत्रातिप्रसङ्गनिवृत्तये नित्येष्विति विशेषणोपादानेऽपि पुनः तत्रैव प्रसङ्गः । तन्निवृत्त्यर्थं उक्तं तृतीयावधारणं इति भावः । यद्यपि एतत् प्रथमं अवधारणं तथापि कृत्यकथनावसरे तृतीयत्वेनोर्वरितत्वात् तृतीयत्वोक्तिः । अन्तिमपक्षापेक्षयाऽद्यस्यापि तृतीयत्वमित्याहुः । यद्यपि चात्र नित्येष्वेवेति वक्तव्यं तथापि नित्यपदस्य सत्ताव्यावर्तकत्वं नास्तीति भावेनावधारणमात्रस्यैव ग्रहणं कृतम् । अत्रानेकपक्षेष्वपि नित्यग्रहणेन व्यावृत्त्यसम्भवः । यावद्द्रव्यमध्येऽनित्यस्यापि प्रवेशेन तत्र विशेषाभावेन यावद्द्रव्यमात्रवृत्तित्वाभावात् नित्यत्वविशेषणे तु नासम्भवः । अतो न नित्यत्वपदानर्थक्यप्रसङ्गः इति बोध्यम् । नित्येष्वेव द्रव्येषु वर्तत इत्येवास्तु उत्तरावधारणद्वयं व्यर्थमित्याशङ्कते **न च नित्येति** । घटादौ घटत्वादौ चातिव्याप्तिवारकत्वेनोक्तं अवधारणद्वयमित्यर्थः । घटादावित्यस्य घटत्वादावित्येतत् उपलक्षणत्वात् । घटादौ प्रसङ्गाभावेऽपि स्थलान्तरेऽतिव्याप्तिवारणाय वर्तेत एवेति अवधारणं भविष्यतीत्याह **नित्यद्रव्यत्वोपाधाविति** । तस्य वक्ष्यमाणरीत्या अनित्यत्वादिति भावः । यावदर्थकावधारणकृत्यमाह **आत्मत्वेति** । घटादौ प्रसङ्गाभावादिति पाठः स्वरसः । घटत्वादाविति पाठेऽपि क्रमाविवक्षया विशेषणप्रयोजनकीर्तनमिति ज्ञेयम् । यद्वेति पक्षस्तु तत्त्वप्रदीपिकाव्याख्यानानुसारेण तत्र पक्षे द्रव्येष्वेव इत्यनेन द्रव्येतरावृत्तित्वोक्त्याऽभावसमवायसामान्यव्यवच्छेदः । नित्येतरावृत्तित्वार्थकनित्येष्वेवेत्यनेन गुणकर्मप्रागभावप्रध्वंसव्यवच्छेदश्चाभिमतः । तत्र नित्यद्रव्येतरावृत्तित्वार्थकमवधारणमस्तु द्वितीयं व्यर्थमिति प्रतीयते । अत एव नित्यद्रव्येति सम्बन्धाश्रयणेन व्यवहार इत्यादि शोध्यम् । शङ्करभट्टीयपक्षे द्रव्येष्वेवेत्यत्रापि अन्ययोगव्यवच्छेदस्यैवार्थतायाः युक्तत्वात् । शङ्करभट्टीये च तथैवोक्तेश्चेति ज्ञेयम् ।

किं पदान्तरेणेति । द्रव्येष्वेवेति पदान्तरेण किमित्यर्थः । ननु ज्ञानादिगुणानां आत्मत्वादिसामान्यस्य च नित्यमात्रवृत्तित्वात् कथं तेन तद्व्यावृत्तिरित्यतो न ज्ञानत्वादिरूपेण ज्ञानादिना नित्यमात्रवृत्तित्वाभावं ब्रूमः किन्तु गुणत्वेन सामान्यत्वेन च गुणत्वादिना गुणसामान्ययोश्च नित्यमात्रवृत्तित्वाभावः सुलभ एवेत्याह **न हि**

गुणा नित्येष्वेवेत्यादि । **तादृप्येणेति** । तद्रूपमेव तादृप्यं गुणत्वसामान्यत्वलक्षणेन ज्ञानादिसामान्यगतरूपेणेति यावत् । ननु गुणत्वरूपेण ज्ञानादिना नित्यमात्रवृत्तित्वेऽपि सामान्यत्वेन च सामान्यस्य नित्यमात्रवृत्तित्वाभावेऽपि ज्ञानादित्वात्मत्वमनस्त्वरूपेण नित्यत्वमात्रवृत्तित्वसम्भवात् अतिव्याप्तिरेव । न च तत्परिहारो द्रव्येष्वेवेत्यनेन सम्भवति । अवधारणस्यान्ययोगव्यवच्छेदार्थकतया तत्प्राग्व्याख्यानात् । तेषां अद्रव्येष्वपि वृत्तेरिति परिहाराच्च । यदि चान्ययोगव्यवच्छेदार्थः स्यात् तदा यावद्द्रव्ये वृत्तित्वालाभेन ज्ञानादिव्यावृत्त्युपपत्तावपि निःसामान्यस्य द्रव्यस्याभावेन सामान्यस्यापि यावद्द्रव्यवृत्तितया प्रागुक्ततद्व्यावृत्त्यनुपपत्तिः स्यात् । न च प्राचीनसामान्यपदस्यात्मत्वमनस्त्वरूपसामान्यपरत्वमेव । तयोश्च यावद्द्रव्यवृत्तित्वाभावेन व्यावृत्त्युपपत्तिरिति वाच्यम् । तथा सति तृतीयावधारणस्य वैय्यर्थ्यापत्तेः । आत्मत्वमनस्त्वाभ्यां व्यभिचारस्य खण्डनोक्तस्य नित्यान्तरेऽसत्त्वात् इत्यनेनोपपादनं खण्डने कृतम् । तद्व्यावर्त्यशङ्काप्रदर्शनावसरे वर्तत एव इत्येवकारेणायोगव्यवच्छेदेन व्यावृत्तेरभिधानात् । तथा च द्रव्येष्वेवेत्येवकारार्थपरिगृहीतत्वमङ्गीकृत्यावधारणान्तरेण व्यावृत्त्यभिधानं विरुध्येत इत्यतः तद्रूपेण वृत्त्यविवक्षायां ज्ञानादित्वेनात्मत्वमनस्त्वरूपेण च वृत्तिविवक्षायां नित्येष्वेव द्रव्येष्वेव वर्तमानत्वसत्त्वेन द्रव्येष्वेवेत्यनेन तद्व्यावृत्त्यनुपपत्तावपि तृतीयावधारणेनैव तद्व्यावृत्तिसम्भवात् नानुपपत्तिरिति भावेनाह **तादृप्येण वृत्त्यविवक्षायां चेति** । अत्र च शङ्करभट्टेन तद्रूपेण वृत्तिविवक्षणेन च ज्ञानादीनां परिहारमाशङ्क्य नित्यत्वेऽतिव्याप्तिव्यावृत्त्यर्थं द्रव्येष्वेवेत्युक्तमिति प्रतिपादितेऽपि तद्रूपेण वृत्त्यविवक्षा प्रयुक्ता । ज्ञानादावतिव्याप्तिः स्यादेव इत्यतः तत्परिहाराय यत्ने कर्तव्ये तदकरणं तस्य दोषः इत्याशयेन तत्परिहाराय स्वयं यत्नः कृत इति सूरयो विदांकुर्वन्तु । **धुण्डीराजीयपक्षे द्रव्येष्वेवेत्युक्तमिति** । द्रव्य एवेत्येकवचनेन परिहारेऽपि विशेषाणां आनन्त्यसूचनाय बहुवचनमिति भावः । **तदुक्तेरिति भाव इति** । उपलक्षणं चैतत् । यद्यपि गङ्गापुर्यां अदृष्टादिव्यावृत्त्यर्थं निःसामान्याः इत्यपि विशेषणं गृहीतं ग्राह्यं च । विशेषजन्यात्यन्तव्यावृत्तिं प्रति कार्यमात्रहेतुत्वदृष्टस्यापि हेतुत्वात् । तथापि न तदुपपादनं आवश्यकम् । अन्त्यपदस्य कैवल्याद्यर्थकत्वाङ्गीकारेण अत्यन्तव्यावृत्तिहेतुत्वस्य केवलव्यावृत्तिहेतुत्वे पर्यवसानात् तस्य च व्यावृत्तिहेतुत्वे सति अनुवृत्तिहेतुत्वाभावे तात्पर्यात् अदृष्टस्य च व्यावृत्तिहेतुत्ववत् अनुवृत्तिहेतुतायाः अपि सत्त्वेन तदभावाभावात् नातिप्रसङ्ग इत्यपि बोध्यम् ।

न तु सामान्यरूपा इतीति । यद्यप्येवं तेन नोक्तं तथापि विशेषा एवेत्यवधारणप्रयोगलब्धत्वात् उक्तत्वोक्तिरिति केचित् । वस्तुतो वैशेषिकसूत्रोपस्कारे अन्यत्रान्तेभ्यो विशेषेभ्य इत्येतत्सूत्रव्याख्यानावसरे । अन्ते अवसाने भवन्ति इत्यन्त्याः इत्यादि । न तु सामान्यरूपा इत्यन्तमुक्तमिति तथोक्तमिति ज्ञेयम् । अवश्यं आश्रयाश्रयीभावेनावस्थितत्वं नाम नियमेनाश्रयाश्रयिभावावस्थितत्वम् । नियमश्च एकस्यापरस्मिन् अवस्थितत्वमेव न तु कदाचिदपि सत्त्वं इति सिद्धवत्कृत्याशङ्कते **नन्वेवमिति** । आकाशघटत्वात्यन्ताभावयोः अतिव्याप्तिपरिहाराय भावयोरिति विशेषणं सिद्धवत्कृत्याह **ययोरिति** । **दिगिति** विशिष्टं मुरारिभट्ट्याम् । **सद्भिन्नेति** । भावत्वमात्रं घटादौ अतः उक्तं **सम्बन्धाधेयभिन्नेति** । घटादेश्च संयोगादिसम्बन्धेन भूतलाद्याधेयतास्तीति तत्परिहारः । तावन्मात्रं चासम्भवि । समवायस्यापि स्वरूपसम्बन्धेनाधेयतायाः सत्त्वेन

सम्बन्धाभिधेयत्वात् उक्तं **स्वाभिन्नेति** । स्वरूपसम्बन्धस्य स्वात्मकतया स्वभिन्नत्वाभावात् नासम्भवः । तावन्मात्रं चावृत्तिर्गगनादौ अतिप्रसक्तम् । अत उक्तं **सद्भिन्नमिति** । सत्ताजातिमद्भिन्नमित्यर्थः । ततश्च गगनादेः सत्ताजात्याश्रयतया तद्भिन्नत्वाभावात् न प्रसङ्गः । सद्भिन्नत्वमात्रोक्तौ सामान्यादौ प्रसङ्गः । अतः स्वभिन्न-सम्बन्धाधेयभिन्नमिति । तस्य च स्वभिन्नसमवायरूपसम्बन्धेनाधेयतायाः सत्त्वात् नातिप्रसङ्गः । तावन्मात्रं अभावे अतो **अभावत्व इति** विशेषणम् । यद्यपि समवायेऽपि स्वभिन्नो वाच्यवाचकभावः सम्बन्धोऽस्ति तथापि तेन नाधेयत्वम् इत्युक्तं तद्भिन्नत्वं लक्ष्ये इति ध्येयम् । ननु कार्यमात्रवृत्तिघटत्वादिसामान्येऽतिव्याप्तिः । तस्य प्रलयसमये समवायेनाधेयत्वाभावात् । अतः **आप्रलये प्रलये चेति** । अत्र प्रलये चेति चशब्दयुक्त एव पाठः । तथैवान्यत्रोक्तेरिति ज्ञेयम् । **प्रागिति** । घटादाविति शेषः । शिष्टं पदार्थचन्द्रिकातद्व्याख्यानयोः ।

स०व्र०— गुणलक्षणे असमवायिकारणपदं समवायिकारणभिन्नत्वपरम् । कदलीकारोक्तं लक्षण-मनुवदति **नित्येष्वेवेति** । द्रव्येषु ये वर्तन्ते ते विशेषा इत्युक्ते अभावसमवायसामान्येष्वतिव्याप्तिः । तदर्थं द्रव्येष्वेवेत्युक्तम् । तथाऽपि गुणकर्मणोः प्रागभावप्रध्वंसयोश्चातिव्याप्तिः तदर्थं नित्येष्वेवेत्युक्तम् तथाऽप्यात्मत्व-मनस्त्वयोः, नित्यद्रव्यगतगुणविशेषेषु चातिव्याप्तिः । अत उक्तं **वर्तन्त एवेति** । अनेन कदाचित् वृत्तिः, कदाचिदवृत्तिश्च व्यावर्त्येते । तेन नित्ये द्रव्ये कादाचित्कक्काचित्कज्ञानादीनाम् अकादाचित्कानामपि क्काचि-त्कानां मनस्त्वादीनां व्यवच्छेदः । तेषां देशतः कालतश्चावृत्तेरपि वर्तमानत्वात् वर्तन्त एवेति अयमंशो न सम्भवतीति भावः । नित्येष्वेवेत्यस्यानुवृत्तौ द्रव्यत्वेऽतिव्याप्तिः । अतस्तदुपादानम् । द्रव्येष्वेवेत्यस्यानुपादाने नित्यगुणेष्ववृत्त्या असम्भवः । तत्परिहाराय **द्रव्येष्वेवेति** । ननु अवधारणेन कदाचिद्वृत्तिव्यावर्तनं न युक्तम् । कादाचित्कादीनामपि ज्ञानादीनां क्काचित्कत्वेन तद्व्यावृत्त्यर्थकैवकारेणैव तद्व्युदासादिति चेन्न । परमाणुत्व-महत्परिमाणान्यतरत्वरूपोपाधौ अतिव्याप्तिवारकत्वात् । उपाधेश्चानित्यत्वेन कादाचित्कत्वेन अकादाचि-त्कत्वार्थकावधारणेन तद्व्यावृत्त्युपपत्तेः । अत एव नित्यद्रव्यत्वरूपोपाधावपि नातिप्रसङ्ग इति ध्येयम् । खण्डनटीकायां तु नित्येष्वेवेति अन्ययोगव्यवच्छेदेन द्रव्यगुणकर्मणां व्यवच्छेदः । तेषामनित्येष्वपि वृत्तेः । द्रव्येष्वेवेति अयोगव्यवच्छेदेन सामान्यव्यवच्छेदः । तेषामद्रव्येष्वपि वृत्तेः । वर्तन्त एवेति अयोगव्यवच्छेदेन ज्ञानसुखादिशब्दानां व्यवच्छेदः । तेषां स्वासत्त्वकाले अवृत्तेरयोगोऽपीत्यर्थः । ननु ज्ञानादीनां च नित्येष्वेवेत्यनेन व्यवच्छेदात् किं पदान्तरेण । न हि गुणा नित्येष्वेव वर्तन्ते । न वा सामान्यानि । तथा च गुणत्वेन सामान्यत्वेन ताद्रूप्येण सर्वगुणसर्वसामान्यव्यवच्छेदः सिद्ध एवेति चेन्न । नित्यत्वस्य धर्मस्य व्यवच्छेदार्थं द्रव्येष्वेवेतिकरणादित्युक्तम् ।

स०ना०— मूले **नित्येष्वेव द्रव्येष्वेवेति** । अस्यार्थः । नित्यत्वादिना समेष्वेव द्रव्येष्वेव गुण-क्रियाद्यधिकरणत्वेन समेष्वेव ये परस्परव्यावृत्तिबुद्धिहेतुतया वर्तन्त एव । येषां दर्शने व्यावृत्तिबुद्धिर्भवत्येव । ते विशेषाः । इदमुक्तं भवति । बहुषु पार्थिवादिपरमाणुषु नित्यत्वेन तथा, शौक्ल्यादिगुणकर्मादिभिश्च अत्यन्त-सदृशेषु अत एव अवर्जनीयतया प्रसक्तादात्म्यबुद्धिषु ये नियमेन व्यावृत्तिबुद्धिहेतवस्ते विशेषाः । न च

सामान्यादयः सर्वप्रकारेण सदृशेषु परमाण्वादिषु व्यावृत्तिबुद्धिहेतवो भवन्ति । घटत्वादिजातिभिः व्यावृत्त्यस्य प्रतियोगिनश्च व्यावर्तकत्वाभिमतधर्मसदृशधर्माधिकरणत्वेन साजात्याभावात् । न तत्रातिव्याप्तिः । विशेष-व्यावृत्त्येषु परमाण्वादिषु व्यावृत्तिप्रतियोगिषु परमाणुषु च एकप्रकारविशेषसद्भावेन व्यावर्तकत्वाभिमतधर्म-सदृशधर्माधिकरणत्वेन सादृश्यसद्भावान्नासम्भवोऽपि । मूले **नित्येष्वेव द्रव्येष्वेवेति** विशेषणावधारणानि व्यावृत्यधिकरणप्रतियोगिनोः सर्वात्मना सादृश्यव्युत्पादनायेति बोध्यम् । अत एव न विशेषणकृत्यगवेषणाय मनःखेदः कार्यः । नापि द्रव्येष्वेवेत्यवधारणस्य यावदर्थकत्वमङ्गीकृत्य यावन्नित्यद्रव्यमात्रवृत्तयो नित्याः विशेषाः इति लक्षणस्य पर्यवसानमङ्गीकृत्य तस्य च क्वापि लक्ष्ये अभावेनासम्भवित्वचिन्ता कार्या ।

विठ्ठल०— उक्तविभागस्फुरणाय पदार्थविभागमाह **षडिम इति** । **विधिरूप इति** । नञर्था-नुल्लिखितधीविषयो भावः । तदुल्लिखिते धीविषयो अभाव इत्यर्थः । प्रथमक्षणावच्छिन्नघटादौ गुणाश्रयत्वा-भावव्याप्तेर्लक्षणान्तरमाह **समवायिकारणमिति** । **सामान्यवानिति** । अत्रासमवायिकारणमित्यस्य समवायि-कारणभिन्नमित्यर्थः । सामान्यादि चतुष्टये द्रव्ये कर्मणि चातिव्याप्तिवारणाय क्रमेण विशेषणत्रयम् । नित्य-मेकमनेकसमवेतमिति समवेतमित्येवोक्ते गगनसमवेते शब्देऽतिव्याप्तिः । अनेकसमवेतमित्युक्ते पटाद्यवयविनि संयोगादौ च । अतो नित्यमिति । एकमिति सलिलाद्यनेकपरमाणुगतानेकरूपेष्वतिव्याप्तिवादसत्त्वानुगत-व्यवहारहेतुतासूचनाय स्वरूपसङ्कीर्तनं वा विशेति व्याप्तिवारणायैकपदमिति केचित् । **नित्येष्वेवेति** । ये वर्तन्ते ते विशेषा इत्युक्ते कर्मादावतिव्याप्तिः । अत एवेति । वर्तत एवेति । सर्वदा वर्तमानस्य विवक्षित-त्वान्नातिव्याप्तिः वर्तत एवेत्युक्ते गुणत्वादावतिव्याप्तिः । अतो द्रव्येषु वर्तन्त एवेत्युक्तम् । तावत्युक्ते सता सामान्ये अतो द्रव्येष्विति । द्रव्येष्वेव वर्तन्त एवेत्युक्ते घटत्वादावतिव्याप्तिः । घटत्वजातेर्नित्यत्वेन वर्तन्त एवेत्युपपत्तेः । अतो नित्येष्वित्युक्तम् । नित्येषु द्रव्येष्वेव वर्तन्त एवेत्युक्ते द्रव्यत्वे । अतो **नित्येष्वेवेति** । नित्येषु वर्तन्ते ते विशेषा इत्युक्ते गुणकर्मसामान्येष्वतिव्याप्तिः तेन नित्येष्वेवेति तावत्युक्तजलादिपरमाणु-गतरूपादिषु विशेषाभावादसम्भवः । अतो **द्रव्येष्विति** । नित्यद्रव्यवृत्तित्वं लक्षणमिति नासम्भवः द्रव्येषु वर्तन्त इत्युक्ते सामान्यसमवायादिष्वतिव्याप्तिः । अतो **द्रव्येष्वेवेति** । द्रव्येष्वेवेत्येवोक्ते गुणेषु कर्मसु चातिव्याप्तिरतो **नित्येषु द्रव्येष्वेवेति** । तथाप्यात्मनिष्ठज्ञानादिषु आत्मत्वमनस्त्वयोश्चातिव्याप्तिः । अतो **वर्तन्त एवेति** । अयोगव्यवच्छेदकेन कदाचिदवृत्तिः नित्यद्रव्येषु केषुचिदवृत्तिश्च व्यावर्त्यते । तथा च ज्ञानादीनां सर्वदा-भावादात्मत्वादीनां सर्वनित्यद्रव्यवृत्तित्वाभावान्नातिव्याप्तिः । एतेन नित्यद्रव्यत्वरूपोपाधावतिव्याप्तिः । तत्र नित्यद्रव्ये वर्तन्त एवेति लक्षणस्य विद्यमानत्वादिति चोद्यं च निरस्तम् । सामान्यं द्विविधम् । जातिरुपाधि-श्चेत्युक्ते रूपादिधर्मस्य नानापदार्थघटितस्यानित्यत्वाङ्गीकारेण वर्तन्त एवेत्युक्तं सर्वदा विद्यमानत्वस्याभावात् । तथापि नित्यत्वद्रव्येष्वेव वर्तन्त एवेत्यलं प्रथमैवकारो व्यर्थ इति चेत् । सत्यम् । आद्यद्वितीयैवकारयो-र्व्याख्यानव्याख्येयभावापन्नत्वनादोषत्वात् । अत एव वैशेषिकग्रन्थे आद्यैवकारं विनैव पाठ इति साम्प्रदायिका मन्यन्त इत्यलम् । लक्षणान्तरमाह **अत्यन्तव्यावृत्तिहेतुत्वेति** । केवलं व्यावृत्तिप्रत्ययहेतव इत्यर्थः । न तु

क्वचिदप्यनुवृत्तिप्रत्ययहेतव इति यावत् । एतेन दण्डी कुण्डली शुक्लश्चलतीत्यादौ द्रव्यादीनां व्यावर्तकत्वेऽपि दण्डान्तरादिभ्यो व्यावृत्तिप्रत्ययहेतुत्वाभावेन ये ते दण्डिनः शुक्ला इत्यनुवृत्तिप्रत्ययहेतुत्वस्यापि भावाद्व्यावृत्तिमात्रप्रतीतिजनको विशेष इत्युक्तं भवति । अयुतसिद्धिलक्षणे कुण्डबदरादिव्यावृत्तये अवश्यमित्युक्तम् । नियमेनेत्यर्थः । ययोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धाविति भावः ।

चषक— निषेधरूपः तादृशविशेष्यतापन्नः । गुणं लक्षयति **सामान्यवानिति** । प्रकृतलक्षणघटकासमवायिकारणत्वं समवायिकारणभिन्नत्वरूपमेव न तु प्राक्दर्शितरूपं तदनात्मकगुणाव्यापनात् । तथा च सामान्यादिचतुष्टये द्रव्ये कर्मणि चातिप्रसङ्गमपहस्तयितुं विशेषणत्रयोपादानम् । सामान्यं लक्षयति **नित्यमिति** । अनेकसमवेतत्वं समवायावच्छिन्ननानाधिकरणतानिरूपकत्वं समवायावच्छिन्ननानाधेयताशालित्वं वा । संयोगादावनतिप्रसङ्गाय नित्यपदोपादानम् । अधिकरणभेदस्याभावभेदे निबन्धनत्वाभावेनात्यन्तान्योन्याभावयोरनतिप्रसक्त्यै समवायावच्छिन्नत्वमधिकरणतायामाधेयतायां वा निवेशितम् । एकपदं तु स्वरूपसङ्कीर्तनायैवेति स्थितम् । **नित्येष्वेवेत्यादि** । वर्तत इत्येव न्यासे घटादावतिप्रसङ्गः अतः एवेति न्यस्तम् । उत्पत्तिनाशवतो घटादेः पूर्वोत्तरकालमवर्तनात् । तावति कृते रूपत्वादावतो द्रव्येष्विति तावन्मात्रं घटत्वादावतो नित्येष्विति । तावन्मात्रं घटत्वादावतो नित्येष्वेवेति । नित्येषु एव वर्तन्ते ते विशेषा इत्युक्तौ पार्थिवपरमाणुरूपादावतो वर्तन्त एवेति । तावति कृते सत्तादावतो नित्येष्वेवेति । तावदुक्तावाप्यपरमाणुरूपत्वादावतो द्रव्येष्विति । तावदुक्तौ परमाणुपारिमाण्डल्यान्यतरत्वादावतो द्रव्येष्वेवेति व्याकर्तृणां दिशा समासः । प्रापञ्चिषतैतत्प्रपञ्चकाः । व्यावृत्तिशब्दस्तत्प्रतीतिपरः । अत्यन्तपदं केवलार्थकम् । तथा चानुवृत्तिप्रतीत्यहेतुत्वे सति व्यावृत्तिहेतुत्वे पर्यवसितम् । दण्डादिद्रव्ये गुणे रूपादौ कर्मणि चलनादौ द्रव्यत्वादिसामान्ये चानतिप्रसङ्गायात्यन्तेति पदमुपात्तम् । तत्रानुवृत्तिप्रतीतिहेतुत्वस्यापि सत्वान्न क्षतिरिति भावः ।

॥ इति वैशेषिकोक्तसृष्टिविषये कार्याकार्यविभागार्थं सप्तपदार्थप्रदर्शनम् ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये सप्तपदार्थेषु नित्यानित्य-कार्याकार्यविवेकः ॥

१ **सु०— तत्र सामान्यमन्त्यविशेषश्च समवायश्च इत्येतत् त्रयं नित्यम् अकार्यं च ।**

विशेष इत्येवोक्ते द्रव्यगुणकर्मसामान्यानामपि ग्रहणं स्यात् । विशिष्यतेऽनेनेति हि विशेषः । द्रव्यं च दण्डादिकमदण्ड्यादिभ्यो देवदत्तादिकं व्यावर्तयति । गुणश्च निर्गुणाद् द्रव्यम् । कर्मापि निष्क्रियान्मूर्तम् । सामान्यं द्विविधं परमपरं च । परं सत्ता प्रचुराश्रयत्वात् । अपरं द्रव्यत्वादि अल्पाश्रयत्वात् । तत्र परसामान्यस्यानुवृत्तिमात्र-

हेतुत्वेन सामान्यमात्रत्वेऽप्यपरसामान्यं व्यावृत्तेरपि हेतुत्वाद्विशेषोऽपि भवति । अतः तद्व्यावृत्त्यर्थमन्त्येत्युक्तम् । अन्त्ये द्रव्यादिव्यावर्तकानामभावेऽपि ये व्यावर्तका भवन्ति तेऽन्त्याः । अत्यन्तव्यावृत्तिहेतव इति यावत् । न हि दण्डादिकं तथा, दण्ड्यन्तरादिभ्योऽव्यावर्तकत्वात् ।

परि०— मूलं योजयति **तत्र सामान्यमिति** । उक्तपदार्थेषु मध्य इत्यर्थः । अर्थालुब्धमर्थमाह **अकार्यं चेति** । **विशिष्यत इति** । व्यावर्त्यत इत्यर्थः । विपूर्वात् 'शिष्' इति धातोः अकर्तरि च कारके सङ्ज्ञायामिति करणे घञ्प्रत्यये पुगन्तेति गुणे विशेष इति सिद्धेरिति भावः । द्रव्यादेर्विशेषत्वं व्यनक्ति **द्रव्यं च दण्डादिकमिति** । **अदण्ड्यादिभ्य इति** । दण्डहीनादिभ्य इत्यर्थः । **द्रव्यमिति** । व्यावर्तयतीत्यनुषङ्गः । **मूर्तमिति** । वृक्षादेर्मूर्तं व्यावर्तयतीत्यर्थः । सामान्य(स्य)विशेषत्वं विभागपूर्वं व्यनक्ति **सामान्यं द्विविधमिति** । **परमपरमिति** । मुख्यममुख्यमित्यर्थः । **अनुवृत्तीति** । घटः सन् पटः सन्निति अनुगतबुद्धिमात्रहेतुत्वेन सामान्यमात्रत्वेऽपीत्यर्थः । अपीत्यङ्गीकारवादः । सामान्यादित्रयव्यावृत्तिहेतुत्वस्यापि सत्त्वात् द्रव्यगुणकर्मसु व्यावृत्तिबुद्ध्यहेतुत्वात् सामान्यमात्रत्वेऽपीत्युक्तम् ।

यादु०— **अनुवृत्तिमात्रहेतुत्वेनेति** । यद्यपि सत्ताऽपि स्वाश्रये स्वानधिकरणसामान्यादिव्यावृत्तिहेतुरपि भवतीतीदमनुपपन्नं तथाऽपि अपरसामान्यवन्न सत्ताया जातिमद्व्यावृत्तिहेतुत्वमित्यभिप्रेत्येदमुक्तमित्याहुः । **तेऽन्त्या इति** । अनेनान्ते भवा अन्त्या इति निर्वचनं सूचितमिति ज्ञातव्यम् । ननु ये द्रव्यादिव्यावर्तकाभावेऽपि व्यावर्तका भवन्ति तेषामनुवृत्तिहेतुत्वे सामान्यरूपताऽपि स्यान्न केवलविशेषत्वमत आह **अत्यन्तेति** । **अव्यावर्तकत्वादिति** । तथा च दण्डादिकमनुवृत्तिहेतुरपि भवतीति भावः ।

कं०रा०— सम्बन्धपदस्य मुख्यसम्बन्धपरत्वादिति विशेष इत्येवोक्ते द्रव्यगुणकर्मसामान्यानामपि ग्रहणं कथं प्रसज्यते इत्याशङ्कायां विशिष्यते व्यावर्त्यतेऽनेनेति व्युत्पत्त्या विशेषशब्दस्य व्यावर्तकत्वार्थत्वात् व्यावर्तकत्वस्य च द्रव्यादिष्वपि सत्त्वात् तद्ग्रहणप्रसक्तिरित्युपपादयति **विशिष्यत इत्यादिना विशेषोऽपि भवतीत्यन्तेन** । **द्रव्यमिति** । व्यावर्तयतीति सम्बन्धः । एवं मूर्तमित्यत्रापि द्रष्टव्यम् । **न हीति** । दण्डादिकमत्यन्तव्यावृत्तिहेतुर्न हि दण्डादेः दण्ड्यन्तरादिभ्यो व्यावर्तकत्वाभावादित्यर्थः ।

श्रीनिधि०— **निर्गुणादिति** । गुणादेरिति शेषः । **निष्क्रियादिति** । गुणविभवादेरिति शेषः । **सामान्यमात्रत्वेऽपीति** । पदार्थमात्रवृत्तित्वेन व्यावर्तकत्वादिति भावः । **न हि दण्डादिकं तथेति** । स्वस्मिन्व्यावर्तकधर्माभावे दण्ड्याद्यन्तरव्यावर्तकं न भवतीत्यर्थः ।

शे०वा०— परमपरं चेति । **परं** व्यापकम्, **अपरं** व्याप्यमित्यर्थः । यत्सामान्यं यत्सामान्य-समानाधिकरणं सत् यदत्यन्ताभावसमानाधिकरणं तत्तस्य परमित्यर्थः । अत्र यदत्यन्ताभावसमानाधिकरणं यत्सामान्यमित्युक्तौ घटत्वमपि पटत्वापेक्षया परं स्यात् । घटत्वस्यापि पटत्वात्यन्ताभावसमानाधिकरणत्वात् तदर्थं यत्सामान्यसमानाधिकरणमित्युक्तम् । घटत्वं च न पटत्वसमानाधिकरणमित्युक्तम् । घटत्वं च न पटत्वसमानाधिकरणमिति नातिप्रसक्तिः । यत्सामान्यसमानाधिकरणं यत्सामान्यमित्युक्तौ पृथिवीत्वमपि द्रव्यत्वापेक्षया परं स्यात् । तस्यापि द्रव्यत्वसमानाधिकरणत्वात् । तदत्यन्ताभावसामानाधिकरण्यविवक्षायां च नातिप्रसङ्गः । पृथिवीत्वस्य द्रव्यत्वात्यन्ताभावासमानाधिकरणत्वात् । जातिपरसामान्यपदोपादानाज्जाति-व्यापकत्वनिर्वचनमेवेदं न तु व्यापकत्वमात्रलक्षणम् । प्रमेयत्वाभिधेयत्वादावतिव्याप्तिप्रसङ्गात् । द्रव्यत्व-वत्त्वस्य पृथिवीत्वव्यापकत्वप्रसङ्गाच्चेत्यवधेयम् । समानाधिकरणसामान्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वं चापरत्वम् । अत्र चात्यन्ताभावप्रतियोगित्वं सत्त्वादिसाधारणं अत उक्तं **सामान्यसमानाधिकरणेति** । एवं जलत्वाद्यपि पृथिवीत्वादिव्याप्यं स्यात् । अत उक्तं **समानाधिकरणेति** । व्याप्यत्वाभिमतस्य समानाधिकरणं सामान्यं सत्ता, तत्समानाधिकरणात्यन्ताभावप्रतियोगि, व्याप्यमित्यर्थः । यद्वाऽऽकाशादावतिव्याप्तिवारणाय **समानाधिकरणेति** । व्याप्यत्वाभिमतसमानाधिकरणेत्यर्थः । आकाशस्य चावृत्तेः समानाधिकरणं नास्त्येव सामान्यस्य । यत्सामान्यं यत्सामान्यसमानाधिकरणं सद्यदत्यन्ताभावसमानाधिकरणं तत्तस्यापरमिति वेति न किञ्चिदनुपपन्नम् । क्रमेणोभयमुदाहरति **तत्रेति** । सत्तासामान्यं परमिति व्यवहर्तव्यमित्यर्थः । अतो न व्यापकत्वे साध्ये प्रचुराश्रयत्वहेतुः साध्यविशिष्ट इति भावः । सत्तायाः परत्वे हेतुमाह **प्रचुरेति** । द्रव्यत्वापेक्षयाऽधिकाश्रयत्वादित्यर्थः । अपरं द्रव्यत्वादीत्यादिपदेन गुणत्वादेः परिग्रहः । **अनुवृत्तिमात्र-हेतुत्वेनेति** । परस्परविशिष्टेषु द्रव्यगुणकर्मसु, अविशिष्टस्वसम्बन्धात्स्वरूपानुवृत्तिप्रत्ययमात्रहेतुत्वेनेत्यर्थः । मात्रशब्देन स्वाश्रये इतरव्यावृत्ति(बुद्धि)हेतुत्वव्यावृत्तिः । यद्यपि, अत्र सत्ताया अप्यभावात्स्वाश्रये व्यावृत्ति-बोधकत्वमस्त्येवेत्यनुवृत्तिप्रत्ययमात्रहेतुत्वं न युक्तम् । न च भावाद्व्यावृत्त्यबोधकत्वं विवक्षितम् । सामा-न्यादावौपपत्तिकसत्ताव्यतिरेकनिश्चये ततोऽपि व्यावृत्तिधीहेतुत्वात् । तथाऽपि जातिमद्व्यक्तिप्रतियोगिक-व्यावृत्त्यबोधकत्वेन सत्ता सामान्यमेव न विशेष इत्यत्र तात्पर्याददोष इति ध्येयम् । **व्यावृत्तेरपीति** । अनुवृत्तिसमुच्चयार्थोऽत्र अपिशब्दः । तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं, जातिमद्भ्यो गुणकर्मभ्यो व्यावृत्तिप्रत्ययहेतुत्वाच्च विशेषः । गुणत्वमपि परस्परविशिष्टेषु रूपरसादिष्वनुवृत्ति-वृत्तिप्रत्ययहेतुत्वात् सामान्यं, जातिमद्भ्यो द्रव्यकर्मभ्यो व्यावृत्तिबोधकत्वाच्च विशेषः । कर्मत्वमपि परस्पर-विशिष्टेषूत्क्षेपणादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं, जातिमद्भ्यो द्रव्यगुणेभ्यो व्यावृत्तिबोधकत्वाच्च विशेष इति भावः । **तेऽन्त्या इति** । अनेनान्ते भवा अन्त्या इति निर्वचनं सूचितम् । ननु द्रव्यादिव्यावर्तकाभावेऽपि ये व्यावर्तका भवन्ति तेषां व्यावृत्तिहेतुत्वात् विशेषत्ववत् अनुवृत्तिप्रत्ययहेतुत्वात् सामान्यरूपताऽपि स्यात् तत्कथं केवलविशेषत्वमित्यतो भवेदेवं यद्यनुवृत्तिप्रत्ययहेतुताऽपि स्यान्न चैतदस्तीत्याशयेनाह **अत्यन्तेति** ।

व्यावृत्तिबुद्धिमात्रहेतव इत्यर्थः । अव्यावर्तकत्वादित्युपलक्षणम् । परस्परविशिष्टेष्वपि पिण्डेषु दण्डी दण्डीत्यनुवृत्तिप्रत्ययहेतुत्वादित्यपि द्रष्टव्यम् ।

वा०र०— किरणावल्यनुसारेणाह **परं व्यापकमित्यादि** । तद्वर्धमानानुसारेण परलक्षणनिष्कर्षमाह **यत्सामान्यमिति** । वर्धमानेन्द्वनुसारेण कृत्यं पदानामाह **अत्रेति** । किरणावलीरुचिदत्तानुसारेणाह **जातिपरेति** । वर्धमानानुसारेणापरलक्षणनिष्कर्षमाह **सामानाधिकरणेति** । वर्धमानीय पुरुषोत्तम्यनुसारेण पदकृत्यमाह **अत्र चेति** । **सामान्यसामानाधिकरणेतीति** । सामान्यवति सर्वत्र सत्तायाः सत्त्वेन सत्तात्यन्ताभावस्य सामान्यसमानाधिकरणत्वाभावादित्याशयः । **एवमिति** । जलत्वस्य पृथिवीत्वरूपसामान्यसमानाधिकरणजलत्वात्यन्ताभावप्रतियोगित्वात् अतिप्रसङ्गः । तन्निरासाय **समानाधिकरणेत्युक्तम्** । ततश्च पृथिवीव सामान्यस्य जलत्वसामानाधिकरण्याभावेन तादृशसामान्यसमानाधिकरणत्वं जलत्वात्यन्ताभावस्य नास्तीति न तत्प्रतियोगित्वरूपं अपरत्वमापद्यत इति भावः । **व्याप्यत्वाभिमतस्येति** । व्याप्यत्वाभिमतस्य यत् सामान्यसमानाधिकरणं तत्समानाधिकरणात्यन्ताभावप्रतियोगि यत् तद्व्याप्यमित्यर्थः ।

आकाशस्य चेति । सामान्यस्य समानाधिकरणं नास्त्येव । कुतः आकाशस्याव्याप्ते वृत्त्यभावात् सामानाधिकरण्यं नास्त्येवेति तु पाठः स्वरसः । पुरुषोत्तम्यां तथैवोक्तेः । **यत्सामान्यमिति** । अत्र यत्सामान्यं यत्सामान्यसमानाधिकरणं इत्येवोक्ते सत्तायां पृथिवीत्वादिसामानाधिकरण्यवत्यां प्रसङ्गः । तन्निवृत्त्यर्थं **तदत्यन्ताभावासमानाधिकरणेति** । सत्तायाश्च पृथिवीत्वात्यन्ताभावसमानाधिकरणत्वेन तदसमानाधिकरणत्वाभावात् न प्रसङ्गः । यद्यदत्यन्ताभावासमानाधिकरणं तत्तद्व्याप्यमित्युक्तौ गगनस्यावृत्तेः सामानाधिकरण्याभावेन तत्रातिप्रसङ्गः तन्निवृत्तये **यत्सामान्यसमानाधिकरणमिति** । तस्य चावृत्तेः न केनापि सामानाधिकरण्यमिति दोषः । सामान्यपदं स्पष्टार्थे । यद्वा सामान्यपदं जातिपरम् । ततश्च प्रमेयत्वाभिधेयत्वादिष्वतिव्याप्तिः । तेषां अत्यन्ताभावस्य एवाप्रसिद्ध्या तदसामानाधिकरण्याभावात् इति निरस्तम् । अस्य जातिव्याप्यत्वनिर्वचनत्वात् । अत एव न द्रव्यत्ववत्त्वं प्रति पृथिवीत्वस्य व्याप्यत्वप्रसङ्गः । सामान्यसमानाधिकरणमित्यत्रापि सामान्यपदस्य जातिपरत्वेन द्रव्यत्ववत्त्वव्यावृत्तेः । एवमेव पूर्वलक्षणे द्रव्यत्वस्य गन्धवत्त्वादिरूपसामान्यसमानाधिकरणत्वे सति तदत्यन्ताभावसमानाधिकरणत्वस्यापि सत्त्वेन गन्धवत्त्वव्यापकत्वप्रसङ्गः । तन्निवृत्तये सामान्यसमानाधिकरणं इत्यत्र सामान्यपदं जातिपरं बोध्यम् । तत्र परं सत्तासामान्यमिति व्यवहर्तव्यं इति किरणावल्यनुसारेणाह **व्यवहर्तव्यमित्यर्थ इति** । सामान्यपदार्थीयप्रशस्तदेवाचार्योक्त्यनुसारेणाह **परस्परेति** । वर्धमानानुसारेण शङ्कते **यद्यप्यत्रेति** । अभावाद्याः स्वाश्रये व्याप्तिरिति योजना **औपपत्तिकेति** । निःसामान्यत्वरूपयुक्तिसम्पादितः सत्ताविरहः इत्यर्थः । **अपिः** समुच्चये । अनुवृत्तेः हेतुत्वात् इत्यादिकिरणावल्यनुसारेणाह **अनुवृत्तीति** । सामान्यपदार्थीयप्रशस्तदेवाचार्योक्त्यनुसारेण सामान्यत्वविशेषत्वविवेकमाह **तत्र द्रव्यत्वमिति** ।

स०व्र०— परसामान्यस्यानुवृत्तिमात्रहेतुत्वेनेति । यद्यपि परसामान्यरूपसत्तायाः सत्ताजाति-रहितेभ्यो व्यावृत्तिहेतुत्वस्य विद्यमानत्वेन अनुवृत्तिमात्रहेतुत्ववचनं अनुपपन्नम् । तथाऽपि अपरसामान्यवत् जातिमद्व्यक्तिप्रतियोगिकव्यावृत्तिहेतुत्वाभावाभिप्रायेणानुवृत्तिमात्रहेतुत्वमुक्तमिति ध्येयम् । अत एवोक्तं बलभद्रेण जातिमत्प्रतियोगिकभेदबुद्धिजनकत्वात् अपरसामान्यस्य विशेषाख्येति ।

स०ना०— तत्र परसामान्यस्येति । सत्तासामान्यस्य अनुवृत्तिमात्रहेतुत्वेन सन् घटः सन् पट इति अनुगतबुद्धिहेतुत्वेन व्यावृत्तिबुद्धिहेतुत्वाभावाच्च सामान्यमात्रत्वम् । द्रव्यत्वादीनां तु घटो द्रव्यं पटो द्रव्यमित्यनुगतबुद्धेः गुणादिभ्यो व्यावृत्तिबुद्धेरपि हेतुत्वेन सामान्यत्वमिव विशेषत्वमपीत्यर्थः । न च सत्ताया अपि सत्तानधिकरणेभ्यः व्यावृत्तिबुद्धिहेतुत्वमस्तीति वाच्यम् । सन् घटः सन् पट इति प्रतीतिवत् सन् अभावः सन् विशेषः इत्यपि प्रतीतिसद्भावेन स्वरूपसम्बन्धेन तत्रापि सत्तासद्भावेन सर्वथा सत्तानधिकरण-स्यैवाभावात् ।

विट्ठल०— येन पदार्थस्वरूपं निरूप्य मूलं योजयति **तत्रेति** । **अनुवृत्तिमात्रहेतुत्वेनेति** । यद्यपि सामान्यं निस्सामान्यात् सामान्यादिह यत्स्वाश्रयाद्व्यादेर्व्यावर्तकं भवति । तथाप्यपरसामान्यवन्न जानाति मत्पदार्थव्यावर्तकमित्यभिप्रेत्येदमुक्तमिति ज्ञेयम् । अन्तेभवा विशेषा अन्त्यविशेषा इति मूलार्थ इत्याह **अन्त्ये द्रव्यादीति** ।

चषक— 'उपदेशेऽजनुनासिक' इति सूत्रव्याख्यावसरे उपदेशशब्दस्य करणसाधनघञन्ततया भाष्य-कैय्यटादिषु व्याख्याततया प्रकृते करणसाधनघञन्ततामभिप्रेत्य व्याकुरुते **विशिष्यत इति** । तेन अकर्तरि चेत्यतः परत्वात् ल्युट् प्राप्नोतीति शङ्कानवकाशः ।

१० सु०— क्रिया उत्क्षेपणापक्षेपणाकुञ्चनप्रसरणगमनरूपाः अनित्याश्च । चशब्दो-ऽवधारणे । न द्रव्यादिवदुभयरूपा इत्यर्थः ।

गुणा द्रव्याणि च नित्यानित्यभेदेन द्विविधानीति । तथा हि । द्रव्याणि पृथि-व्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि । तत्र परमाणुरूपाणि पृथिव्यादीनि चत्वारि, गगनादीनि पञ्च च नित्यानि । द्व्यणुकादिरूपाणि पृथिव्यादीनि चत्वार्यनित्यानीति । गुणाश्चानित्यद्रव्यगता अनित्या एव ।

पार्थिवपरमाणावैकत्वैकपृथक्त्वपरिमाणगुरुत्वानि नित्यानि, रूपरसगन्धस्पर्शा-नेकत्वानेकपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा अनित्याः । (आप्ये च) पाथसीये

च रूपरसस्पर्शैकत्वैकपृथक्त्वपरिमाणगुरुत्वद्रवत्वस्नेहा नित्याः, अनेकत्वानेकपृथक्त्व-संयोगविभागपरत्वापरत्वसंस्कारा अनित्याः । तैजसे च रूपस्पर्शैकत्वैकपृथक्त्वपरिमा-णानि नित्यानि, अनेकत्वानेकपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा अनित्याः । वायवीये च स्पर्शैकत्वैकपृथक्त्वपरिमाणानि नित्यानि, अनेकत्वानेकपृथक्त्वसंयोगविभाग-परत्वसंस्कारा अनित्याः, आकाशे चैकत्वैकपृथक्त्वपरिमाणानि नित्यानि, अनेकत्वानेक-पृथक्त्वसंयोगविभागशब्दा अनित्याः । काले दिशि चैकत्वैकपृथक्त्वपरिमाणानि नित्यानि, अनेकत्वानेकपृथक्त्वसंयोगविभागा अनित्याः । आत्मनि चैकत्वैकपृथक्त्वपरिमाणानि नित्यानि, अनेकत्वानेकपृथक्त्वसंयोगविभागा बुद्ध्यादयश्च नव अनित्याः । ईश्वरात्मनि विशेषोऽभिहितः । मनसि चैकत्वैकपृथक्त्वपरिमाणानि नित्यानि, अनेकत्वानेकपृथक्त्व-संयोगविभागपरत्वापरत्वसंस्कारा अनित्याः । इति विवेकः ।

परि०— क्रिया इत्यादिमूलं योजयति **क्रिया इति** । उर्ध्वदेशसंयोगादिहेतुरुत्क्षेपणक्रिया । अधोदेशसंयोगादिहेतुरपेक्षणम् । अल्पदेशसंयोगादिहेतुराकुञ्चनम् । अनल्पदेशसंयोगादिहेतुः प्रसा-रणम् । ग्रामान्तरसंयोगादिहेतुर्गमनम् । **गुणाश्चेति** । रूपरसगन्धस्पर्शशब्दसङ्ख्यापरिमाणपृथक्त्व-संयोग-विभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदभिन्नेषु गुणेषु अनित्यद्र(व्यगता)व्याणां गुणा अनित्या इत्यर्थः ।

वं०प०— **विशेषोऽभिहित इति** । नित्यज्ञानप्रयत्नेच्छमित्यनेनेत्यर्थः ।

कं०रा०— **संयोगेति** । व्याप्तिनिरासाय नित्यपदं तावन्मात्रं च परमाण्वादावतिव्याप्तमिति सम्बन्ध-पदम् । न च वाच्यं नित्ययोः परमाणुतद्गतमहत्त्वात्यन्ताभावयोः स्वरूपसम्बन्धेऽतिव्याप्तिरिति ।

श्रीनिधि०— **द्रवत्वसंस्कारा अनित्या इति** । अत्र द्रवत्वं नैमित्तिकद्रवत्वम् । संस्कारो वेगरूपः । **द्रवत्वस्नेहा नित्या इति** । **द्रवत्वं** सांसिद्धिकद्रवत्वम् । **स्नेहः** चिक्कणता ।

शे०वा०— भ्रमणरेचनादीनां गमन एवान्तर्भावमभिप्रेत्य क्रियापदं व्याख्याति **क्रिया इत्यादि** । क्रिया अनित्याश्चेत्यत्र क्रियाणामुभयरूपत्वाभावेन चशब्दस्य नित्यत्वसमुच्चायकत्वस्य बाधितत्वादवधार-णार्थत्वेन तं व्याचष्टे **चशब्दोऽवधारण इति** । अवधारणव्यावर्त्यमाह **नेति** ।

ननु ध्वंसाप्रतियोगित्वरूपनित्यत्वानित्यत्वयोरेकत्र विरुद्धत्वात् कथं 'गुणद्रव्ये द्विरूपके' इति द्रव्य-गुणयोर्नित्यानित्यत्वरूपत्ववर्णनमित्यतो नात्राव्यवस्थया तयोर्नित्यानित्यरूपत्वमभिप्रेतं येन विरोधः स्यात् किन्तु किञ्चिन्नित्यं किञ्चिदनित्यमिति व्यवस्थयैवेति नानुपपत्तिरिति भावेनाह **तथा हीति** । तत्र कानि तानि द्रव्याणि कथं च तत्र व्यवस्थया नित्यानित्यत्वमित्यतस्तदुभयं दर्शयति **द्रव्याणीत्यादिना** । एवं द्रव्य-स्योभयरूपतामुपदर्श्य गुणानामप्युभयरूपतां, के ते गुणाः कथं तत्र व्यवस्थया नित्यानित्यत्वमित्या-शङ्काद्वयनिरासाय दर्शयति **गुणाश्चेति** । अत्र गुणाश्च रूपरसगन्धादयस्ते चेति योज्यम् । **अनित्यद्रव्येति** । पार्थिवादिद्व्यणुकादिरूपेत्यर्थः । **पार्थिवपरमाणाविति** । अत्र परिमाणं मुख्यमतेन पारिमाण्डल्यमेवाभिमत-मेकदेशिमतेन ह्रस्वत्वमपि । एवमेवोत्तरत्रापि । **आप्ये वेति** । अत्र परमाणावित्यनुवर्तते । एवमेव तैजसे वायवीये चेत्युत्तरत्रापि द्रष्टव्यम् । **आकाशे चेति** । अत्र परिमाणं मुख्यमतेन परममहत्त्वमेव एकदेशिमतेन तु दीर्घत्वमपि । एवमेव कालदिगात्मस्वपि द्रष्टव्यम् । बुद्ध्यादिषु नवसु संस्कारो भावना । **विशेष इति** । ज्ञानेच्छाप्रयत्नैकत्वैकपृथक्त्वपरिमाणानि नित्यानि । अनेकत्वानेकपृथक्त्वसंयोगविभागा अनित्या इत्येवंरूपो विशेषो 'नित्यज्ञानप्रयत्नेच्छमि'त्येतद्ग्रन्थव्याख्यानावसरेऽभिहित इत्यर्थः । **मनसि चेति** । अत्रापि परिमाणं पारिमाण्डल्यमेव मुख्यमतेनाभिमतम् । एकदेशिमतेन ह्रस्वत्वमपि । अत्र संस्कारो वेगः ।

वा०र०— गमनग्रहणादित्यादिप्रशस्तदेवाचार्योक्तिं मनसि निधायाह **भ्रमणेति** । के ते गुणाः एतच्छङ्कानिरासकाभावादाह **अत्र गुणाश्चेति** । अत्र परिमाणं इत्येतत् चतुर्विधपरिमाणमित्यादिना उत्तरत्र मूल एव स्पष्टम् । गुणक्रियाद्रव्यरूपस्येत्युक्तिस्तु अनुव्याख्याने तत्क्रमेणैवासमवायिकारणनिरूपणादिति बोध्यम् ।

विट्ठल०— गुणाश्चेति । रूपरसगन्धस्पर्शशब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व-द्रवत्वस्नेहज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा इति चतुर्विंशति गुणाः । तेषु नित्यद्रव्यगतानामेकपृथक्त्वानां पार्थिवाप्यपरमाणुगतगुरुत्वस्य चाजन्यत्वानित्यत्वं पार्थिवपरमाणूनां रूपरसगन्धस्पर्शानां द्रव्यत्वस्य पाकज-त्वादनित्यत्वम् । आप्ये रसस्पर्शानां द्रव्यत्वस्य च तैजसि रूपस्पर्शौ वायवीये स्पर्शस्य च अपाकजत्वा-न्नित्यत्वम् । अनेकत्वानेकपृथक्त्वयोरपेक्षाबुद्धिजन्यत्वेन सर्वत्र तयोरनित्यत्वसंयोगविभागपरत्वापरत्वानामनि-त्यत्वमेव । तत्र विभुद्रव्येषु परत्वापरत्वे स्वरूपेणैवं न स्तः संस्कारस्य वेगभावनास्ति । स्थितिस्थापकरूपस्य त्रिविधस्यापि सर्वत्रानित्यत्वं जन्यत्वात् इति विवेकः ।

॥ इति वैशेषिकोक्तसृष्टिविषये सप्तपदार्थेषु नित्यानित्य-कार्याकार्यविवेकः ॥

॥ इति वैशेषिकोक्तसृष्टिविषये कार्याकार्यविभागः ॥

* * *

॥ अथ वैशेषिकोक्तसृष्टिविषये यस्य यदसमवायिकारणं तदुक्तिः, सकारणम् ॥
॥ अथ तत्रादौ यस्य यदसमवायिकारणं तदुक्तिः ॥

११ सु०— एवं कार्याकार्यविभागमुक्त्वा यस्य यदसमवायिकारणं तदाह **कार्य इति** ।

अनु०— कार्ये गुणक्रियाणां तु समवाय्यन्यकारणम् ।
कारणस्था गुणाद्यास्तु संयोगो द्रव्यकारणम् ॥

कार्यकारणग्रहणमुपलक्षणम् । ततश्च **कार्ये** अकार्ये च द्रव्ये जायमानानां गुणानां समवायिकारणसमवायिकारणस्थाः तथा समवायिकारणस्थाश्च गुणाः समवायिकारणस्थं कर्म च **समवाय्यन्यकारणं** असमवायिकारणम् । कर्मणश्च समवायिकारणस्था गुणा एवासमवायिकारणमिति योज्यम् ।

आद्यस्तुशब्दो द्रव्याद्विशेषं द्योतयति । द्वितीयस्य द्रव्यकारणं **तु** इत्यन्वयः । यद्वा द्वावप्यनुक्तसमुच्चयार्थौ । तच्चोक्तं तथा हि । कार्यगतानां रूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वोत्तरसंयोगविभागगुरुत्वद्रवत्वस्नेहवेगानां कारणगता रूपादयोऽसमवायिकारणम् । पार्थिवपरमाणुगतानां रूपरसगन्धस्पर्शानां पार्थिवतैजसपरमाणुगतद्रवत्वस्य तद्गत एव तेजःसंयोगः । सर्वत्रानेकत्वानेकपृथक्त्वयोराश्रयगतैकत्वैकपृथक्त्वानि । संयोगविभागवेगानामाश्रयगतं कर्म । परत्वापरत्वयोराश्रयगतौ दिक्कालसंयोगौ । आत्मविशेषगुणानामात्मगतो मनःसंयोगः । शब्दस्याकाशगताः संयोगविभागशब्दाः । कर्मणश्चाश्रयगता गुरुत्वद्रवत्ववेगसंयोगा इति । द्रव्यस्य तु समवायिकारणानामवयवानां संयोगोऽसमवायिकारणमिति ।

परि०— **एवं कार्याकार्ये इति** । नित्यानित्यत्वविभागोक्त्याऽर्थाल्लब्धस्यायमनुवादः । तुशब्दान्तत्रिपादीं योजयति **ततश्च कार्येऽकार्ये चेत्यादिना** । आद्यतुशब्दार्थः **समवायिकारणस्थं कर्म चेति** । एतत्सर्वमनुपदमेव तथा हीत्यादिना विवरिष्यते । **कर्मणश्चेति** । कार्येऽकार्ये च जायमानस्येत्येवमनुषङ्गः । समवायिकारणस्थाः गुणा एवेत्येवकारेण समवायिकारणसमवायिकारणस्थगुणव्यावृत्तिः न तु कर्मणः । कार्यगतकर्म(णां का)(णिका)णः कारणगतगुणकर्मणी असमवायिकारणमिति भाष्यटीकायामुक्तेः । यद्वा मतान्तरमुपेत्य टीकासुधयोर्भेदेनोक्तिरिति ज्ञेयम् ।

किं तदनुक्तं प्रमेयं यत्, तुशब्दद्वयेन समुच्चेयमित्यत आह **तच्चेति** । अनुक्तं प्रमेयं च कार्येऽकार्ये चेति समवायिकारणसमवायिकारणस्था इति पूर्वयोजनायामेवोक्तमित्यर्थः । अस्मिन्पक्षे कार्यग्रहणं नोपलक्षणम् । कारणपदं च न कारणकारणपरमित्यर्थः । कार्ये अकार्ये चेत्यादिनोक्तं विवृणोति **तथा हीत्यादिना** । **कारणगता इति** । कार्यं प्रति यत्कारणं तद्गता इत्यर्थः । स्वकारणकारणगतेति यावत् । समवायिकारणस्थाश्चेत्युक्तं विवृणोति **पार्थिवपरमाण्विति** । **तेजस्संयोग इति** । सौरालोकसंयोग इत्यर्थः । समवायिकारणस्थं कर्म चेत्युक्तं विवृणोति **संयोगविभागवेगानामिति** । **परत्वापरत्व-योरिति** । दिक्कृतयोः कालकृतयोश्चेति योज्यम् । **आत्मविशेषेति** । ज्ञानसुखदुःखेच्छाद्वेषप्रयत्न-धर्माधर्मसंस्काराणां गुणानामित्यर्थः । कर्मणश्च समवायिकारणस्था गुणा एवेत्युक्तं विवृणोति **कर्मणश्चेति** । चतुर्थपादार्थमाह **द्रव्यस्य त्विति** ।

यादु०— कर्मणश्चेति । यत्तु तत्त्वप्रकाशिकायां 'कार्यगतकर्मणः कारणगतगुणकर्मणी असमवायिकारणमि'त्युक्तं तत्तु वैशेषिकैकदेशिमतमवलम्ब्यैवेति भावबोधे स्पष्टम् । अतो न विरोध इति ज्ञातव्यम् । **तच्चोक्तमिति** । **तच्च** अनुक्तं च । **उक्तं** पूर्वयोजनायामुपलक्ष्यतयोक्तं यत्तदेवेत्यर्थः । तथा चाद्यस्य तुशब्दस्याकार्य इत्यर्थः । द्वितीयस्य यथास्थितान्वयस्य कारणकारणस्था इत्यर्थ इति भावः । एवं चात्र कार्यकारणशब्दयोर्नोपलक्षकत्वमिति द्रष्टव्यम् । **कारणगता इति** । समवायिकारणसमवायिकारणगता इत्यर्थः ।

कं०रा०— तेजःसंयोग इति । असमवायिकारणमित्यस्यानुवृत्तिर्द्रष्टव्या ।

श्रीनिधि०— उपलक्षितं दर्शयति **कार्येऽकार्ये चेति** । असमवायिकारणत्रयस्य कार्ये तदकार्ये चेत्यर्थः । अत्र गुणन्यायेन कर्मणोऽपि समवायिकारणसमवायिकारणस्थस्याप्यसमवायिकारणत्वं प्रतीयते । कार्ये गुणक्रियाणां कारणस्था गुणाद्या इत्युक्त्या कार्यगतक्रियाणां कारणगतक्रियाप्यसमवायिकारणमिति प्रतीयते । अतो बुद्ध्या विवेकेन योजयति **समवायिकारणसमवायिकारणस्था इति** । **समवायिकारणस्था गुणा एवेति** । गुरुत्वद्रवत्वसंयोगा इत्यर्थः । **द्रव्याद्विशेषमिति** । समवायिकारणगत एव गुण एव तत्राप्यवयवसंयोग एव समवायिकारणं द्रव्ये । गुणादौ तु तदभावो विशेष इत्यर्थः । द्रव्याविशेषमिति क्वचित्पाठः । तत्र तु क्रियाणामिति द्रष्टव्यम् । कर्मसु समवायिकारणस्था एव गुणा एव समवायिकारणमित्यनन्तरमेवोक्तेः । असमवायिकारणवत्त्वेनाविशेषमिति केचित् । **अनुक्तसमुच्चयार्थाविति** । अकार्याकारणयोरित्यर्थः । **तच्चोक्तमिति** । कार्ये कार्ये चेत्यादिनेति भावः । **उत्तरसंयोगविभागेति** । हस्ततरुसंयोगजः कायतरुसंयोग उत्तरसंयोगः । तयोरेव विभागात् तयोर्विभाग उत्तरविभागः । आद्यसंयोगविभागयोः क्रियासमवायिकारणत्वात् उत्तरेत्युक्तम् । संयोगविभागशब्दा इति क्वचित् भेर्याकाशसंयोगः । क्वचिद्भेशाकाशविभागः । भेरीदण्डसंयोगो

वंशद्वयविभागश्च तत्र तत्र निमित्तकारणमिति द्रष्टव्यम् । **गुरुत्वद्रवत्वसंयोगा इति** । अत्र संयोगपदेन वातादिसंयोगो विवक्षितः ।

शे०वा०— यस्येति । गुणक्रियाद्रव्यरूपस्येत्यर्थः । नन्वत्र कार्यगतगुणानां (कर्मणां) कारणस्था गुणा असमवायिकारणमित्युक्त्या कार्यगतस्य गुणादेः कार्यकारणस्था गुणा असमवायिकारणमित्यर्थो लभ्यते । कार्यपदसमभिव्याहारेण सामान्यपरस्यापि कारणपदस्य कार्यसमवायिकारणपरतया कारणस्था इत्यनेन कार्यसमवायिकारणस्थत्वलाभात् । तथा चाकार्यगतगुणानामसमवायिकारणानुक्तिप्रसङ्ग इत्यतो भवेदेतदेवं यद्यत्र कार्यकारणपदे कार्यकारणमात्रपरे स्याताम् । न चैतदस्ति । किन्नाम कार्यपदमत्र कार्यस्येवाकार्यस्याप्युपलक्षणया ग्राहकम् । कारणपदं च कारणस्येवाश्रयस्याप्युपलक्षणया ग्राहकम् । ततश्च कार्यगतगुणादीनां कार्यकारणस्था गुणा अकार्यगतगुणादीनां च तदाश्रयगुणा असमवायिकारणमित्यर्थपर्यवसानान्नानुक्तिदोष इत्याशयवानाह **कार्यकारणग्रहणमिति** । समवायिकारणसमवायिकारणस्था इति तु पर्यवसन्नार्थाभिप्रायेण उक्तम् । कार्यपदसमभिव्याहारेणैवोक्तार्थपर्यवसानात् । शब्दार्थानुसारेण; कारणस्थशब्दस्य समवायिकारणस्थमात्रार्थकत्वेन तदयोगादिति ध्येयम् । **तथा समवायिकारणस्था इति** । आश्रयगता इत्यर्थः । यद्यप्यत्राश्रयगता इत्येव वक्तुमुचितम् । तथाऽपि स्वगतगुणादिकं प्रति स्वस्य समवायिकारणत्वाभिप्रायेण समवायिकारणस्था इत्युक्तमिति ध्येयम् । **कर्मणश्चेति** । कार्येऽकार्ये च जायमानस्येत्यनुवर्तते । कर्मणश्च समवायिकारणस्था गुणा एवासमवायिकारणमित्ययमेव वैशेषिकाणां मुख्यः सिद्धान्तः । कार्यगतकर्मणां तु कारणगतगुणकर्मणी कारणैकार्थप्रत्यासत्त्यादिना असमवायिकारणमिति, तत्त्वप्रकाशिकायां तु वैशेषिकैकदेशिमतोपन्यासान्नास्य तेन विरोध इत्यवधेयम् । कार्यगतकर्मणां कारणगतगुणकर्मणी कारणैकार्थप्रत्यासत्त्यादिनेत्यत्र अतद्गुणसंविज्ञानबहुव्रीहिणा कार्यैकार्थप्रत्यासत्तेरेव, कारणपदेन च कर्मसमवायिकारणस्यैव तत्र ग्रहणादयमेव तत्त्वप्रकाशिकार्थ इत्यप्याहुः । आद्यत्वेन कर्मविशेषणादाद्यकर्मासमवायिकारणत्वं गुणानामेवेत्येतद्ग्रन्थाभिप्रायः । आद्यद्वितीयादिकर्मसाधारण्येन तद्गुणकर्मणोः कर्मासमवायिकारणत्वमिति टीकाऽ(तत्त्वप्रकाशिका)भिप्राय इत्यविरोध इत्यप्याहुः । कर्मसमवायिकारणगतगुणकर्मणीति वाऽर्थः । तथा च कर्मण आश्रयगता गुणा गुरुत्वद्रवत्ववेगसंयोगाः कर्म च कार्यैकार्थप्रत्यासत्त्याऽसमवायिकारणम् । द्वितीयादिपतनस्पन्दनादिकं तृतीयादिपतनस्पन्दनादिकं प्रत्यसमवायिकारणमिति मतावष्टम्भेन तत्र कर्मग्रहणं कृतम् । वैशेषिकमतेऽपि तृतीयादिपतनस्पन्दनादिकं प्रति वेगस्यैवासमवायिकारणत्वं न द्वितीयादिपतनादेरित्यभिप्रेत्यात्र कर्मग्रहणं न कृतम् । अत एवात्र कर्मणश्चाश्रयगता गुरुत्वद्रवत्ववेगसंयोगा एवासमवायिकारणमित्यग्रे वक्ष्यतीति ध्येयम् ।

कार्यकारणग्रहणस्य तन्मात्रपरत्वमङ्गीकृत्य पक्षान्तरमाह **यद्वेति** । 'कार्ये गुणक्रियाणां त्वि'ति आद्यतुशब्देनाकार्यगतगुणादिरूपानुक्तसमुच्चयात् 'कारणस्था गुणाद्यास्त्वि'ति द्वितीयतुशब्देन चाश्रयगतगुणादिरूपानुक्तसमुच्चयात् कार्यगतगुणादीनां कारणकारणस्था गुणाद्या अकार्यस्थगुणादेराश्रयस्था गुणा असमवायिकारण-

मित्यर्थलाभान्नोक्तदोष इति भावः । किं तदनुक्तं यत्समुच्चायकत्वं तुशब्दद्वयस्येत्यतः कार्येऽकार्ये चेत्यादिना तदुक्तमेवेत्याह **तच्चोक्तमिति** । **उत्तरसंयोगेति** । उत्तरत्वं संयोगविभागयोर्विशेषणम् । संयोगविभागवेगानामाश्रयगतं कर्मासमवायिकारणमिति वक्ष्यमाणत्वेन कर्मणोऽप्यसमवायिकारणत्वान्न कारणगतसंयोगादेः कार्यगतसंयोगादिकं प्रत्यसमवायिकारणतयोक्तिर्युक्तेत्यतः कर्मण आद्यसंयोगाद्यसमवायिकारणत्वेऽपि संयोगादिजन्यसंयोगादौ कारणगतसंयोगादेरेवासमवायिकारणत्वमिति भावेनोत्तरत्वेन संयोगादिविशेषणं कृतमित्यवधेयम् । **कारणगता रूपादय इति** । अत्र रूपादीनां कारणगतत्ववचनं कारणैकार्थप्रत्यासत्त्या समवायिकारणप्रत्यासन्नत्वसूचनार्थमिति बोध्यम् । **तद्गत एवेति** । पार्थिवतैजसपरमाणुगत इत्यर्थः । असमवायिकारणमित्यनुवर्तते । तेजस्संयोगस्य तद्गतत्ववचनं च कार्यैकार्थप्रत्यासत्त्या समवायिकारणप्रत्यासन्नत्वसूचनार्थम् । एवमुत्तरत्राप्याश्रयगतत्ववचनस्य प्रयोजनमवधेयम् । **सर्वत्रेति** । कार्येऽकार्ये चेत्यर्थः । अत्र सर्वत्राप्यसमवायिकारणमित्यनुवर्तते । **संयोगविभागेति** । आद्यत्वेन संयोगविभागविशेषणमत्र द्रष्टव्यम् । वेगपदं चोत्तरवेगपरम् । सर्वत्रेति चानुवर्तते । एवं परत्वापरत्वयोरित्यत्रापि ज्ञेयम् । **आत्मेति** । क्षेत्रज्ञात्मेत्यर्थः । **कर्मणश्चेति** । अत्रापि सर्वत्रेत्यनुवर्तते । इतिशब्दस्तु विविच्य गुणसमवायिकारणप्रदर्शनसमाप्त्यर्थः । संयोगो द्रव्यकारणमित्यनेन तुरीतन्तुसंयोगसाधारण्येन संयोगस्य द्रव्यासमवायिकारणत्वमुच्यत इति भ्रान्तिं वारयितुं व्याचष्टे **द्रव्यस्य त्विति** । समवाय्यन्यकारणमिति पूर्वग्रन्थानुरोधात् । अत्र कारणपदमसमवायिकारणपरमिति भावेनाह **असमवायिकारणमिति** ।

वा०र०— कार्यपदसमभिव्याहारेणेति । कार्यकारणादिशब्दानां सम्बन्धिशब्दत्वेन सम्बन्धिशब्दमहिम्ना तथा लाभादिति भावः । **मुख्यसिद्धान्त इति** । 'कर्म कर्मसाधनं न विद्यते' इति सूत्रे कर्मणां कर्मसाधनत्वाभावप्रतिपादनादिति भावः । **कार्यगतकर्मणामिति** । अत्र **कार्यगतकर्मण इति** । तत्त्वप्रकाशिकापाठानुसारेण पाठः । बहुवचनं लेखकहस्तात् । ननु समवायिकारणस्थगुणानामेव कर्मासमवायिकारणत्वं इत्युक्तनियमोऽनुपपन्नः । यथा कार्यगतगुणानां समवायिकारणसमवायिकारणस्थाः । समवायिकारणस्थाश्च गुणाः तादृशकर्म चासमवायिकारणं एवं कर्मणोऽपि समवायिकारणसमवायिकारणस्थगुणानां समवायिकारणस्थकर्मणश्चासमवायिकारणत्वस्य तत्त्वप्रकाशिकायामुक्तेः तदनुसारेण वाच्यत्वात् अन्यथा ग्रन्थयोः परस्परविरोधप्रसङ्ग इत्यतः कार्यगतगुणेषु कारणगतगुणकर्मणोरुक्तरीत्या कारणत्वेऽपि कार्यगतं कर्मप्रतिकर्माश्रयगतानां गुणानामेवासमवायिकारणत्वमिति समवायिकारणसमवायिकारणस्थगुणानां समवायिकारणस्थकर्मणश्चासमवायिकारणत्वेनानभिधानं युक्तम् । आश्रयगतगुणानां गुणकर्मणोः कारणत्वं तु कारणपदस्य कारणपदस्यार्थान्तरेण । तत्त्वप्रकाशिकायां तु त्रितयकारणत्वं गुणेष्विव कर्मस्वपीति एकदेशमतोपन्यासात् न दोषः इत्याशयेन विरोधं परिहरति **कर्मणश्चेति** । समवायिकारणपदं आश्रयमात्रपरं इति तु प्रागेवोक्तम् । अत एवाग्रे कर्मणा चेत्यादिना आश्रयगतानामेव गुणानामेव वा समवायिकारणत्वं मूलकारो वक्ष्यतीति भावः । **कारणगतगुणकर्मणीत्यत्र** हि कारणपदस्य कार्यपदसमभिव्याहारेण कार्यकारणगतानामेव प्राप्तिरित्येकं विरोधं-

बीजम् । गुणानामिव कर्मणोऽपि असमवायिकारणत्वलाभमाहेत्यपरम् । तत्र कर्माश्रयगतानामेव गुणानां असमवायिकारणत्वं इत्येकदेशाविरोधापाद्यं विरोधं कैश्चित् परिहृतम्, तन्मतमनुवदति **कार्यगतकर्मणामिति** ।

ननु कारणैकार्थप्रत्यासत्त्यादिनेति । कारणैकार्थप्रत्यासत्तेरपि ग्रहणात् । कारणपदेन तदाश्रय-ग्रहणेऽपि अनुपपत्तिरेव इत्यतो भवेदेवं यद्यत्र तद्गुणसंविज्ञानबहुव्रीहिराश्रयेत । न चैवम् । अपि तु अतद्गुण-संविज्ञानबहुव्रीहिरेवाश्रयत इति नानुपपत्तिः इत्याशयेनोक्तम् **अतद्गुणेति** । गुणानामेवासमवायिकारणत्वं इत्येक-देशाविरोधाय द्वितीयम् । कर्मणोऽपि असमवायिकारणत्वप्राप्तिरूपं विरोधबीजं कैश्चित् परिहृतम्, तन्मत-मप्यनुवदति **आद्यत्वेनेति** । एवं च कर्मणोऽसमवायिकारणत्वतदभावयोरुभयोरपि ततत्वात् तदुभयाभिप्रायेण क्रमेण ग्रन्थप्रवृत्तिरिति अविरोध इत्याशयः । कारणपदस्य कार्यकारणपरत्वाङ्गीकारेण एकदेशमतानुसारेण समवायिकारणसमवायिकारणस्थगुणानां कर्मणश्चाश्रयगतस्यासमवायिकारणत्वमुक्तं इत्यङ्गीकारे भूयानपरितोषो भवति इत्यतः तृतीयादि पतनादिकं प्रति कर्मण एवासमवायिकारणत्वात् गुणानामेवेति मुख्यमतानुपपत्तिरिति शङ्कां परिहरन् विरोधद्वयपरिहारकमतद्वय-एकदेशानुसारेण ग्रन्थद्वयस्य स्पष्टं विषयभेदोपदर्शनेन विरोधं परिहरति **कर्मसमवायिकारणेति** । अत्र कर्मणी इतीति पाठः । **तत्र** तत्त्वप्रकाशिकायाम् । **संयोग एवासमवायि-कारणमितीति** । यद्यप्यत्रेति तत्र नोक्तं तथापि अत्रत्यगुणा एव इत्यवधारणानुसारेण तत्र सावधारणत्वं ग्रन्थकृदभिमतमिति ज्ञापनायावधारणमिति ज्ञेयम् । भावबोधानुसारी अयं तृतीयः पक्षः । आद्यः श्रीनिवासा-चार्यटिप्पण्यनुसारि । द्वितीय औत्प्रेक्षिक इति ध्येयम् । **आश्रयस्था गुणा इति** । तच्च मुख्यमतस्यैव मूलेऽभिहितत्वात् तदनुसारेण कारणगतसंयोगादेरित्यादिपदेन विभागपरिग्रहः । एवमुत्तरत्रापि । ननु तथापि वेगविषयेऽनुपपत्तिः स्यादेवेति चेत् न । आद्यत्वे रवेण विशेषणं कार्यमित्याशयात् यत् वक्ष्यति कर्मस्थले वेगपदं च उत्तरवेगपरं इतीति द्रष्टव्यम् ।

स०व्र०— कर्मणश्चेति । कार्यगतगुणकर्मणां तु कारणगतगुणकर्मणां कारणैकार्थप्रत्यासत्त्यादिना समवायिकारणमिति तत्त्वप्रकाशिकायाम् एकदेशिमतोक्तेर्न तेनास्य विरोधः । अस्य वैशेषिकमुख्यसिद्धान्त-त्वादिति भावः । **तच्चोक्तमिति** । तच्च अनुक्तसमुच्चयार्थकत्वं चेत्यर्थः । **उक्तं** 'कार्यकारणग्रहणमुप-लक्षणमि'त्यादिनेति शेषः । आद्यतुशब्दस्य कार्यगुणलक्षणानुक्तसमुच्चायकत्वं, द्वितीयस्य समवायिकारणस्थ-गुणसमुच्चायकत्वमिति भावः । प्रथमं पक्षमुपपादयति **तथा हीति** ।

विठ्ठल०— नित्यानित्यविभागोक्त्या लब्धमर्थं दर्शयति **एवं कार्याकार्येति** । कार्ये गुणेति मूले कार्यद्रव्यमात्रे गुणादेरसमवायिकारणमुच्यत इति साक्षात्समवायिकारणगतगुणादेरेवासमवायिकारणत्वमिति च प्रतीयते । अतो योजयति **कार्यकारणग्रहणमित्यादिना** । **कर्मणश्चेति** । तत्त्वप्रकाशिकायां कार्यगतकर्मणः कारणगतगुणकर्मणी समवायिकारणे इत्युक्तिः वैशेषिकैकदेशमतानुसारेणेति भावबोधोक्तेर्न तद्विरोध इति ज्ञेयम् । **तच्चोक्तमिति** । तदनुक्तसमुच्चये यमर्थं जातमुपलक्षणतया प्रागुक्तमित्यर्थः । तथा चात्र योजनायां नोपलक्षणं

कार्यं किन्तु यदुपलक्षितं तत्प्रमेयमनुक्तसमुच्चयार्थकेन तुशब्देन लभ्यत इति भावः । तथा च कार्ये तुशब्दादकार्ये चेति कारणस्था गुणाद्याः तुशब्दात्कारणकारणस्था गुणाद्या इति च लभ्यत इति ज्ञेयम् । कार्ये अकार्ये चेत्यादिकं विवृणोति **तथा हीत्यादिना** । **कार्यगतानां** = पटादिकार्यगतानां रूपादीनां पटादिकारणं तन्त्वादिगतरूपादयो असमवायिकारणम् । पटादिकार्यगतरूपादीनां स्वकारणकारणस्थाः गुणाः = रूपादिगुणाः असमवायिकारणमित्युक्तं भवति । **उत्तरसंयोगविभागेत्यत्रोत्तरत्वं** संयोगविभागयोरेव विशेषणं आदिसंयोगविभागयोः कर्मासमवायिकारणत्वेन गुणसमवायिकारणभावादुत्तरत्वं विशेषणमिति ध्येयम् । यद्यपि गुरुत्वात्पतनमिति तैरङ्गीकारात् विभागस्यापि गुणासमवायिकारणकत्वमस्ति तथापि क्वाचित्कत्वान्नोक्तं साक्षात्समवायिकारणप्रत्यासन्नमसमवायिकारणं दर्शयति **पार्थिवपरमाणुगतरूपादीनामित्यादिना** । **कर्मणश्चेति** । फलपतनादिकर्मणः गुरुत्वकाकादिसंयोगः कारणं नदीस्पन्दनादेर्द्रवत्वं कारणं वेगाख्यसंस्कारेण शरादौ कर्मप्रवाहोत्सादाद्वेगस्यापि कर्मकारणत्वं मन्तव्यम् । संयोगो द्रव्यकारणमित्येतद्विवृणोति **द्रव्यस्य त्विति** ।

॥ इति तत्र यस्य यदसमवायिकारणं तदुक्तिः ॥

* * *

॥ अथ तत्र उक्तस्य क्वचिदपवादप्रदर्शनम् ॥

१२ **सु०— उक्तस्य क्वचिदपवादमाह एवमिति ।**

अनु०— एवं स्थितेऽपि सिद्धान्ते विशेषस्तत्र कल्पितः ।

कारणगतं परिमाणं कार्यगतस्य परिमाणस्यासमवायिकारणमिति **एवं** सामान्यतः **सिद्धान्ते स्थितेऽपि, तत्र** परिमाणविशेषे **विशेषोऽन्यथाभावः कल्पितो** वैशेषिकैः ।

कथमित्यत आह द्व्यणुक इति ।

अनु०— द्व्यणुके परमाणौ च ह्रस्वत्वं परिमण्डलम् । न कारणं कार्यगुणे

चतुर्विधं परिमाणम्; अणुत्वं, महत्त्वं, ह्रस्वत्वं, दीर्घत्वं च ॥ तत्राणुत्वं द्विविधं, नित्यमनित्यं च । नित्यं चतुर्विधपरमाणौ मनसि च, पारिमाण्डल्यमिति चोच्यते । अनित्यं

द्व्यणुक एव ॥ महत्त्वमपि द्विविधं नित्यानित्यभेदात् । नित्यमाकाशकालदिगात्मसु परममहत्त्वम् । अनित्यं त्र्यणुकादौ कार्यद्रव्ये ॥ ह्रस्वत्वं द्व्यणुक एव ॥ दीर्घत्वं त्र्यणुकादिकार्यद्रव्य एव ।

केचित्परमाणावपि ह्रस्वत्वं गगनादावपि दीर्घत्वमभ्युपयन्ति । तत्र द्व्यणुके वर्तमानं ह्रस्वत्वम्; उपलक्षणमेतत्, अणुत्वं च; कार्यगुणे द्व्यणुककार्यत्र्यणुकपरिमाणे, विषयसप्तमीयम्; त्र्यणुकमहद्दीर्घत्वयोरसमवायिकारणं न भवति । तथा परमाणौ वर्तमानं परिमण्डलं पारिमाण्डल्यं परमाणुकार्यद्व्यणुकगुणस्य ह्रस्वत्वस्याणुत्वस्य च असमवायिकारणं न भवति । त्र्यणुकादिगतं तु महत्त्वं दीर्घत्वं च चतुरणुकादिपरिमाणं प्रत्यसमवायिकारणं भवत्येवेति ।

परि०— तत्रेत्यनूद्य व्याचष्टे **परिमाणविशेषे इति** । मूलं योजयति **तत्रेत्यादिना** । चतुर्विधपरिमाणमध्य इत्यर्थः । 'महत्त्वं चैव' इत्याद्यग्रेतनमूलोपयोगाय मूलाभिप्रेतं स्वयमाह **त्र्यणुकादिगतं त्विति** ।

कं०रा०— एवमिति । परमाणुद्व्यणुकपरिमाणेन कार्यकारणभाववती विजातीयपरिमाणत्वाद्व्यतिरेकेण तन्तुपटपरिमाणवदित्येवं परमाणुद्व्यणुकपरिमाणयोरपि कार्यकारणभावाभावेऽनुमानं द्रष्टव्यमित्यर्थः । अत्र परिमाणत्वादित्येवोक्ते कार्यकारणाभावापन्नयोस्तन्तुपटपरिमाणयोर्व्यभिचारः । तन्निरासाय विजातीयत्वविशेषणम् । तावन्मात्रं च कार्यकारणभावापन्नतन्तुपटयोर्व्यभिचरितमिति परिमाणत्वग्रहणकारणमस्त्विति परमाणुगताणुत्वस्य द्व्यणुकगताणुत्वतो वैजात्याभावादिति भावः ।

श्रीनिधि०— पारिमाण्डल्यमिति चोच्यत इति । परमाणुनिष्ठाणुपरिमाणस्य पारिमाण्डल्यमित्यपि नामेत्यर्थः । **केचित्तु परमाणवोऽपीति** । अणुत्वव्यापकमेव ह्रस्वत्वं दैर्घ्यमपि तथैव महत्त्वव्यापकमिति भावः ।

शे०वा०— पूर्वोत्तरग्रन्थयोर्विरोधमाशङ्क्य परिहरति **उक्तस्येति** । 'कार्ये गुणक्रियाणां तु समवाय्यन्यकारणम् । कारणस्था गुणाद्या' इत्युक्तस्येत्यर्थः । **क्वचित्** परिमाणे । तथाऽप्यपवादस्यानेनैवोक्तत्वाद् द्व्यणुक इत्याद्युत्तरग्रन्थानर्थक्यमेवेत्यतः तत्कथम्भावशङ्कानिरासाय तत्प्रकारप्रदर्शनार्थत्वान्न तदिति भावेन तदुपदर्शनपरतयोत्तरग्रन्थं योजयितुं तत्कथम्भावशङ्कामुत्थापयति **कथमितीति** । परिमाणस्यैकरसत्वे वक्ष्यमाणस्य वैरूप्यलक्षणस्य हेतोरसिद्धिप्रसङ्गात् ह्रस्वत्वं परिमण्डलमिति विचित्रव्यवहारानुपपत्तिप्रसङ्गाच्च

तथानिर्देशेन सूचिततद्विभागकथनपूर्वकं तद्व्यवस्थिततां चोपदर्शयति **चतुर्विधमित्यादिना** । दीर्घत्वं चेत्यतः-परमितिशब्दोऽध्याहार्यः । अन्यथा प्रत्येकं चातुर्विध्यप्रतीतिप्रसङ्गादिति द्रष्टव्यम् । परमाणुगताणुत्वस्य द्व्यणुकगताणुत्वं प्रत्यकारणत्वसाधकवैरूप्यहेतोः सिद्ध्यर्थमणुत्वविभागमाह **तत्राणुत्वमिति** । त्र्यणुकादावाकाशादौ च महत्त्वलाभाय तद्विभागमाह **महत्त्वमपीति** । त्र्यणुकादावित्यादिपदसङ्गृह्यतावच्छेदकं धर्ममाह **कार्यद्रव्य इति** । एवं परिमाणानां व्यवस्थिततामभिधाय द्व्यणुके परमाणौ चेति मूलानुरोधेन प्रथमतो द्व्यणुकपरिमाणस्य कार्यपरिमाणं प्रत्यकारणत्वोपपादकतया तावत्कारिकाखण्डं योजयति **तत्रेति** । मूलग्रन्थाद् द्व्यणुकगतह्रस्वत्वस्य द्व्यणुककार्यत्र्यणुकपरिमाणेऽकारणत्वप्राप्तावपि द्व्यणुकगताणुत्वस्य तत्राकारणत्वालाभात् तल्लाभायाह **उपलक्षणमिति** । त्र्यणुकपरिमाणस्याकारणत्वं प्रत्यधिकरणत्वाभावात् सप्तम्यनुपपत्तिमाशङ्क्याह **विषयेति** । उक्तापवादस्य परिमाणे क्वाचित्कतास्फोरयितुं कारणपरिमाणस्य कार्यपरिमाणकारणतामप्युपदर्शयति त्र्यणुकादिगतं **त्विति** ।

वा०र०— एकरसत्वेति । एकरूपत्वेत्यर्थः । **परममहत्त्वमिति मूलेति चोच्यत इति** पूर्ववाक्यादनुवर्तत इति स्पष्टत्वात् न तथा व्याख्यातम् । परमाणुपरिमाणस्य स्वकार्यपरिमाणं प्रति अकारणतोपदर्शनात् प्राणे तदभिधाने निमित्ताभावः इत्याशङ्कानिरासायोक्तं **द्व्यणुके परिमाणे चेति** । **मूलानुरोधेनेति** । **स्वकार्येत्यत्र** स्वशब्दो द्व्यणुकपरः । वक्ष्यति च **द्व्यणुककार्येति** । परमाणुपरिमाणस्यापि तदकारणतोपपादकतयापि कारिकाखण्डस्य उत्तरत्रयो वा तावदित्युक्तम् । तथा परमाणाविति मूले मुख्यं न । तेन पारिमाण्डिल्यमेव गृहीतं एकदेशिमतेन ह्रस्वत्वमपि ग्राह्यमिति ध्येयम् । त्र्यणुकादिगतं तु इत्येतन्मूलस्य उत भाष्यत्वे नासङ्गतत्वं चेति शङ्कापरिहाराय भाष्यार्थोपयोगमाह **उक्तापवादस्येति** ।

विष्टल०— मूलं व्याख्यातुं तदुपयुक्ततया परिमाणविभागमाह **चतुर्विधमिति** । **चतुर्विधपरमाणाविति** । पार्थिवाप्यतैजससमवायवीयपरमाणावित्यर्थः । मूलं व्याख्याति **तत्रेत्यादिना** । 'महत्त्वं चैव दीर्घत्वमि'त्यादि सिद्धान्तग्रन्थघटनार्थमेतद्ग्रन्थाक्षिप्तमाह **त्र्यणुकादिगतमिति** ।

॥ इति उक्तस्य कचिदपवादप्रदर्शनम् ॥

* * *

॥ अथ च तत्र एवं कल्पने कारणम् ॥

१३ **सु०— कस्मादेवं कल्पितमित्यत आह वैरूप्यमिति ।**

अनु०— वैरूप्यं तत्र कारणम् ।

इत्याहुः

तत्र द्व्यणुकपरमाणुपरिमाणानां त्र्यणुकद्व्यणुकपरिमाणानि प्रति कारणत्वाभावे वैरूप्यं विजातीयत्वं कारणम् । सजातीययोरेव हि तन्तुपटपरिमाणयोः कार्यकारणभावो दृष्टः ।

तथा च प्रयोगः । द्व्यणुकत्र्यणुकपरिमाणे न कार्यकारणभाववती, विजातीयपरिमाणत्वात्, व्यतिरेकेण तन्तुपटपरिमाणवत् । एवं परमाणुद्व्यणुकपरिमाणयोरपि द्रष्टव्यम् । परमाणोरणुत्वं द्व्यणुकाणुत्वस्य कारणमस्त्विति चेन्न, तत्रापि नित्यपरिमाणत्वस्य परमाणुत्वस्य च वैरूप्यस्य सत्त्वात् ।

एवं चेत् द्व्यणुकत्र्यणुकपरिमाणानां किमसमवायिकारणमित्यत आह वैरूप्यमिति । अनेकत्वमित्यर्थः । ईश्वरबुद्धिमपेक्ष्योत्पन्ना परमाण्वोर्द्वित्वसङ्ख्या द्व्यणुकेऽणुत्वं ह्रस्वत्वं च करोति । द्व्यणुकेषु चोत्पन्ना त्रित्वसङ्ख्या त्र्यणुके महत्त्वं दीर्घत्वं च करोतीति ।

परि०— वैरूप्यमित्यादिमूलमन्यथाप्यवतार्य व्याचष्टे **एवं चेदिति** । परमतोपन्यासः ।

गु०दी०— विजातीयपरिमाणत्वाद् व्यतिरेकेण तन्तुपटपरिमाणवत् इत्यत्र परिमाणजनकपरिमाणवति त्र्यणुकमारभ्यान्त्यावयविकारणपर्यन्तकारणसमूहे अवयविगतमहत्त्वादपि अवयवगतमहत्त्वस्य सूक्ष्मत्वेन विजातीयत्वाद्धेतोर्व्यभिचारः स्यात् । अणुत्वमहत्त्वाभ्यां वैजात्यस्य विवक्षितत्वे परमाणुपरिमाणस्य द्व्यणुकपरिमाणकारणत्वसम्भवात् । यादृशतादृशवैजात्यस्य त्वयैव वक्ष्यमाणत्वात् सुस्थो व्यभिचार इति पूर्वपक्षाङ्कुरस्यैव मूलच्छेद इति ज्ञेयम् । **नित्यपरिमाणत्वस्य परमाणुत्वस्य च** इत्यत्र नित्येन परमाणुनाऽनित्यपरमाणुत्वरहितद्व्यणुकजन्माङ्गीकारे नित्येन परमाणुपरिमाणेनैतादृशद्व्यणुकपरिमाणजन्मापि कुतो नाङ्गीक्रियते । उभयोः कार्यत्वेऽविशेषात् वैजात्यस्य परपक्षपातायोगाच्च । किञ्च त्वदभिलषितपरमाणुनिष्ठद्वित्वसङ्ख्याया विजातीयद्व्यणुकपरिमाणकारणता कथं स्यात् । एवं द्व्यणुकगतत्रित्वसङ्ख्या च कथं त्र्यणुकगतमहत्त्वस्य कारणं स्यात् । परिमाणकारणगुणगतवैजात्यस्य क्वचिद्दूषणतायाः क्वचिद्भूषणतायाश्चाङ्गीकारे कथं न स्वन्यायविरोधाख्यदूषणेन दुष्टता । परिमाणत्वेन सजातीयकार्यकारणपरिमाणयोर्यादृशतादृशपरिमाणवैजात्यस्य दूषणत्वे सङ्ख्यात्वेन परिमाणत्वेन च साक्षाद्गुणनिष्ठवैजात्यस्य सुतरां दूषणत्वात् । एवं च वृश्चिकभयात्पलायमानस्याशीविषमुखे निपतनमिव महदकौशलमिदं परस्येत्यादिदूषणं स्पष्टत्वात् शिष्यैरेवोह्यतामिति ग्रन्थकृता न ग्रथितम् । इतोऽपि परमतस्य मूले कुठारः ।

यादु०— परमाणोरणुत्वमिति । तथा च न तत्र वैरूप्यमिति भावः ।

कं०रा०— तत्रापीति । परमाणुपरिमाणेऽपि नित्यपरिमाणत्वरूपस्य परमाणुपरिमाणत्वरूपस्य च द्व्यणुकपरिमाणाद्वैरूप्यस्य सत्त्वादित्यर्थः ।

श्रीनिधि०— कारणमस्त्विति चेदिति । उभयपरिमाणस्याप्यणुत्वेन सजातीयत्वादिति भावः ।

शे०वा०— अप्रयोजकतामाशङ्क्य दृष्टिविरोधस्यैव विपक्षे बाधकत्वान्न तदिति भावेनाह **सजातीययोरिति** । **एवं द्रष्टव्यमिति** । परमाणुद्व्यणुकगतपरिमाणे न कार्यकारणभाववती विजातीयपरिमाणत्वात् व्यतिरेकेण तन्तुपटपरिमाणवदिति द्रष्टव्यमित्यर्थः । **परमाणोरणुत्वमिति** । इदं च मुख्यमतमाश्रित्योक्तं एकदेशिमतेन ह्रस्वत्वमित्यपि द्रष्टव्यम् । द्व्यणुकाणुत्वस्येत्युपलक्षणम् । द्व्यणुकह्रस्वत्वस्येत्यपि द्रष्टव्यम् । द्व्यणुकत्र्यणुकपरिमाणं प्रत्यसमवायिकारणान्तरप्रदर्शनार्थं चेदं भाष्यमित्यभिप्रेत्य किं तदुपदर्शनेनेत्यतः तत्सार्थक्याय तन्निवर्त्यशङ्कामुत्थापति **एवं चेदिति** । **किमिति** । न हि तेन विना परिमाणोत्पत्तिर्युक्ता । भावकार्यस्य कारणत्रयजन्यत्वनियमात् । ततश्च प्रतिकूलतर्कपराहतमुक्तानुमानमिति भावः । अत्र पक्षे वैरूप्यशब्दस्य विजातीयार्थत्वायोगात् प्रकृतोपयोगिनमर्थमाह **अनेकत्वमिति** । अत्र परमाणुगतद्वित्वसङ्ख्याया द्व्यणुकगतत्रित्वसङ्ख्यायाश्च सङ्ग्रहाय द्वित्वमित्येव वा बहुत्वमित्येव वाऽनुक्त्वाऽनेकत्वमित्येवोक्तम् । अन्यथा अन्यतरमात्राभिधाने द्व्यणुकत्र्यणुकपरिमाणासमवायिकारणकथनपरत्वाभावप्रास्योक्ताकाङ्क्षानुपरमप्रसङ्गादिति द्रष्टव्यम् । ननु परमाणुद्व्यणुकयोरतीन्द्रियत्वे तत्रायमेकोऽयमेक इत्यादिरूपापेक्षाबुद्धेरेवायोगेनापेक्षाबुद्धिजन्यत्वादिसङ्ख्योत्पत्तेरयोगात् । न तस्या अपि द्व्यणुकादिपरिमाणासमवायिकारणत्वं सम्भवतीत्यतोऽतीन्द्रियतयाऽस्माकं तत्रापेक्षाबुद्ध्यनुदयेऽपीश्वरस्य तत्सम्भवेन तदपेक्षाबुद्ध्यैवानेकत्वोपपत्तेर्नानुपपत्तिरित्याशयेनोक्तम् **ईश्वरबुद्धिमिति** । ईश्वरापेक्षाबुद्धिमित्यर्थः । द्व्यणुकेषु चेत्यत्रापीश्वरबुद्धिमपेक्ष्येत्यनुवर्तते ।

वा०र०— अप्रयोजकतामाशङ्क्येति । द्व्यणुकत्र्यणुकेत्यादिना वक्ष्यमाणप्रयोगस्यात्राभिप्रेततया तत्राप्रयोजकतामित्यर्थः । **प्रदर्शनार्थं चेति** । न केवलं द्व्यणुकपरमाणुपरिमाणयोः त्र्यणुकद्व्यणुकपरिमाणारम्भकत्वाभावोपपादनार्थं वैरूप्यमिति भाष्यम्, अपि तर्हि द्व्यणुकत्र्यणुके परिमाणं प्रत्यसमवायिकारणान्तरप्रदर्शनार्थं चेति समुच्चयो ज्ञेयः । **प्रतिकूलतर्केति** । यदि द्व्यणुकत्र्यणुकपरिमाणं परमाणुद्व्यणुकपरिमाणासमवायिकारणकं न स्यात् तर्हि भावकार्यमेव न स्यात् इति प्रतिकूलस्येत्यर्थः । वक्ष्यति च द्व्यणुकादिपरिमाणस्य सङ्ख्ययैवेत्येतदवतारे तर्कस्वरूपमिति ज्ञेयम् । **विजातीयत्वार्थकत्वेति** । पूर्वयोजनायां व्याख्यातत्वात् तदर्थकत्वप्रसक्तिरिति ज्ञेयम् । **तत्रायमेक इति** । परमाणुद्व्यणुकयोरित्यर्थः । अयमेकः अयमेकः इत्यपेक्षाबुद्ध्याकारः परमाणुविवक्षया । आदिपदेनेदमेकं इदमेकं इत्येवं व्यक्तित्रयं विषयापेक्षाबुद्धिरपि द्व्यणुकगता ज्ञेया । **द्वित्वादी**त्यादिपदेन त्रित्वपरिग्रहः । कार्यमात्रकारण ईश्वरबुद्धित्वरूपपुरस्कारायोगात् विशेषरूपेण व्याख्याति **ईश्वरापेक्षेति** ।

विष्टल०— द्वित्वादिरूपानेकत्वोत्पत्तिं घटयितुमुपपादयति **ईश्वरबुद्धिमिति** ।

॥ इति एवं कल्पने कारणम् ॥
॥ इति यस्य यदसमवायिकारणं तदुक्तिः, सकारणम् ॥
॥ इति वैशेषिकमतोपन्यासे सृष्टिविषया अन्यथामतिः ॥
॥ इति वैशेषिकमतोपन्यासः ॥

* * *

॥ अथ उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतया अपाकरणम् ॥
॥ अथ तत्रादौ एतदधिकरणस्य प्रथमसूत्र(ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ)व्याख्यानम् ॥
॥ अथ तत्राप्यादौ एतत्प्रथमसूत्रस्यावतरणम् ॥

१४ **सु० — एवमुपन्यस्तं मतमपाकर्तुमधिकरण(सूत्र)मवतारयति तानिति ।**

अनु०— तानथोवाच विद्याधीशः स्वयं प्रभुः ।

उवाच महद्दीर्घवद्वेत्यादीति शेषः । प्रबलतर्कोपबृंहितमतनिरासे सामर्थ्यं सूत्रकृतः कथमित्यत उक्तं स्वयं साक्षात्सर्वविद्यानामधीशस्तस्मात् प्रभुः इति ।

वं०प०— सामर्थ्यमिति । प्रभुशब्दोक्तमित्यर्थः ।

श्रीनिधि०— स्वयं साक्षादिति । मुख्यत इति यावदिति भावः ।

शे०वा०— महद्दीर्घवद्वेत्याद्यधिकरणेनैव तन्निरासेन 'तानथोवाचे'त्याद्युत्तरभाष्यस्योपन्यस्तमत-निरासकत्वाभावात् 'महत्त्वं चैव दीर्घत्वमि'त्यादिनैव सूत्रार्थकथनेनास्य सूत्रव्याख्यानरूपत्वाभावाच्च वैयर्थ्य-मित्याशङ्क्यार्थकथनादिरूपेण व्याख्यानस्यानेकप्रकारत्वादस्य च अर्थकथनरूपत्वाभावेऽपि परमतनिरासार्थं प्रवृत्तैतदधिकरणावतरणरूपतया तद्रूपव्याख्यानत्वसम्भवान्न वैयर्थ्यमित्याशयेन तत्परतयोत्तरभाष्यं योजयति **एवमिति** । तानथोवाचेत्यत्रेदमुवाचेत्यनुक्त्या किमुवाचेत्याकाङ्क्षाया अनुपरमान्महत्त्वं चेत्यादियोजनायां चास्य भाष्यकृद्वाक्यत्वेन सूत्रकारवाक्यत्वाभावेनासदनुवादत्वप्रसङ्गात् साकाङ्क्षतया वाक्याभासत्वशङ्कामपाकर्तुमपेक्षितं पूरयति **महद्दीर्घवद्वेत्यादीति शेष इति** । ननु 'तानथोवाच सूत्रकृदि'त्येतावतैव सूत्रस्यावतरणसिद्धेः 'विद्याधीश' इत्यादिभाष्यांशवैयर्थ्यमित्याशङ्क्य निरासकत्वोपयोगिसामर्थ्योपपादनार्थत्वान्न तदिति भावेन तदुप-पादकतया तद्योजयितुं निरासकत्वानुपपत्तिशङ्कामुत्थापयति **प्रबलेति** । **साक्षादिति** । परोपदेशमनपेक्ष्येत्यर्थः ।

वा०र०— तन्निरासेनेति । तन्निरासस्य क्रियमाणतयेत्यर्थः । अधिकरणस्यैवोपन्यस्तमत-निरासकत्वेऽपीति यावत् । अत एवोत्तरभाष्यस्येत्यादिनैवकारस्य व्यावृत्त्यर्थकथनं सुलभोपपादनमिति ज्ञेयम् । **महत्त्वं च इत्यादि योजनायामिति** । आकाङ्क्षोपरमार्थ 'महत्वं चैव दीर्घत्वमि'त्यादिकं उवाचेति योजनीय-मित्यर्थः ।

चषक— एवमुपन्यस्तमिति । अवधिकः परमतोपन्यासः ।

॥ इति वैशेषिकमतापाकरणे एतत्प्रथमसूत्रस्यावतरणम् ॥

* * *

॥ अथ उक्तसमन्वयरूपार्थस्य वैशेषिकादिमतविरोधप्रयुक्तान्यथात्वशङ्काद्वयनिरासः ॥
॥ अथ तत्रादौ 'पारिमाण्डल्यादेः कारणत्वाभावरूपप्रथमशङ्का'याः निरासः (परिमाणासमवायिकारणनिरासः) ॥
॥ अथ तत्राप्यादावेतदुत्तरस्य सूत्रारूढतादर्शनम् ॥
॥ अथ च तत्र एतत्सूत्रगत'वा'शब्देतरशब्दव्याख्यानम् ॥
॥ अथ च तत्रादावेतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दार्थनिरूपणम् ॥
॥ अथ च तत्राप्यादौ 'पारिमाण्डल्यादेः कारणत्व'साधनपर्याप्तानां एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दानामर्थकथनं तत्स्पष्टीकरणञ्च ॥
॥ अथ तच्छब्दार्थकथनम् ॥

१५ सु०— न वैशेषिकादिमतविरोधेनोक्तार्थस्यान्यथात्वं शङ्कनीयम्, तस्योपपत्ति-विरुद्धत्वात् ।

परि०— मूलं सङ्गमयितुमाह **न वैशेषिकादीति** ।

यादु०— वाक्यार्थसमुच्चय इति । पूर्वार्धरूपवाक्यार्थेन सहैतद्वाक्यार्थस्य समुच्चय इत्यर्थः । वक्ष्यमाणरीत्या पूर्ववाक्योक्तबाधपरिहारसमुच्चितस्यैवैतद्वाक्योक्तानुमानस्य विवक्षितसाधकत्वादिति भावः । यद्वा तस्मादित्यस्योभयपरामर्शकत्वेन 'महत्त्वात्सदृशं कार्यमि'त्याद्येकं वाक्यम् । 'दीर्घत्वात्सदृशं कार्यमि'-त्याद्यपरम्, एवं च 'न केवलं महत्त्वात्सदृशं कार्यं तत्कार्येषु जायते किन्तु दीर्घत्वाच्च सदृशं कार्यं तत्कार्येषु जायत' इति वाक्यार्थसमुच्चय इत्यर्थः ।

शे०वा०— ननु वैशेषिकमतनिरासार्थमेतदधिकरणमित्युक्तम् । तन्निरासस्य निष्प्रयोजनत्वेनास्य तादर्थ्यायोगात् । न च तदसामञ्जस्यज्ञापनमेव तन्निरासप्रयोजनमिति वाच्यम् । तज्ज्ञापनस्यापि प्रयोजना-

भावात् । भावेऽपि सूत्रेष्वसामञ्जस्ये हेतोरनुक्तत्वेन सूत्राणां तन्निरासकत्वासम्भवात् । ततश्चाधिकरणस्य तदर्थत्वायोगात् तद्व्याख्यानपरोत्तरभाष्यानर्थक्यमित्यतः 'अतश्चायमविरुद्धः समन्वयः' इति वैशेषिकादिसमयस्यानुपादेयत्वे फलोपदर्शनपरोत्तरग्रन्थानुरोधेनासामञ्जस्योपपादनफलं तदुपपादकं हेतुं चोपर्येव दर्शयंस्तत्सिद्धेश्च विषयविशेषे उपपत्तिविरोधप्रतिपादनपरसूत्रसाध्यत्वेन सूत्राणामुपपत्तिविरुद्धत्वरूपहेतुसमर्थनार्थत्वात् समयनिरासार्थत्वसिद्धेर्न तद्व्याख्यानपरोत्तरभाष्यानर्थक्यमित्यभिप्रेत्य कथमेतेषां सूत्राणां विषयविशेषे उपपत्तिविरोधोपदर्शकत्वमित्यतोऽस्य सूत्रस्य तावद्दर्शयन्नेव तद्व्याख्यानपरतया महत्त्वं चेत्युत्तरभाष्यं सङ्गमयति **न वैशेषिकादिमतविरोधेनेति** ।

वा०र०— ननु वैशेषिकमतेति । वैशेषिकादिमतेत्यर्थः । वैशेषिकादीनां इत्याद्यधिकरणोपक्रमेऽपि न वैशेषिकाद्युत्तरमूले चोक्तावपि 'विशेषस्तत्र कल्पितः' इत्येतद्भाष्यमूले वैशेषिकैरिति पूर्णं, तदनुसारेण एकदेशानुवाद इति ज्ञेयम् । **सूत्रेष्वसामञ्जस्येति** । सूत्राणां उपपत्तीत्याद्युपपत्तिविरुद्धत्वादिति मूलं उपपत्तिभिः महद्वेत्याद्वेत्यादिसूत्रोक्ताभिः विरुद्धत्वात् इति व्याख्यातं भवति । **उत्तरग्रन्थानुरोधेनेति** । उत्तरानुव्याख्यानानुरोधेनेत्यर्थः । **उपपादनफलमिति** । उक्तार्थस्यान्यथात्वं न शङ्कनीयमित्यनेन तत्प्रदर्शनं तस्योपपत्तिविरुद्धत्वात् इत्यनेन च तदुपपादकप्रदर्शनं मूलेऽस्तीति ज्ञेयम् ।

विष्टल०— त्र्यणुकाद्येष्वित्यत्र आद्यशब्दस्यासङ्कुचितवृत्तित्वनिरासायाह **द्रव्येष्विति** । **वाक्यार्थसमुच्चय इति** । त्र्यणुकाद्येष्वेव महत्त्वदीर्घत्वं च कल्पितमेव । तस्मात्कल्पिताच्च महत्त्वाद्दीर्घत्वात्तत्कार्येषु चतुरणुकादिषु कारणगतपरिमाणसदृशपरिमाणाख्यं कार्यमथोपजायत इति च कल्पितमिति पूर्वोत्तरार्धरूपवाक्यद्वयार्थसमुच्चये चशब्द इत्यर्थः ।

१६ सु०— तथा हि । यत्तावदुक्तं द्व्यणुकादिपरिमाणं न त्र्यणुकादिपरिमाणस्य असमवायिकारणमिति, तदुपपत्तिविरुद्धमिति दर्शयन् 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि'ति सूत्रं व्याचष्टे महत्त्वं चेति ।

अनु०— महत्त्वं चैव दीर्घत्वं त्र्यणुकाद्येषु कल्पितम् ।
तस्माच्च सदृशं कार्यं तत्कार्येषूपजायते ॥
यथा तथैव ह्रस्वत्वात्पारिमाण्डल्यतोऽपि हि ।
जायेत सदृशं कार्ये परिमाणं समत्वतः ॥

एवशब्दस्य 'त्र्यणुकाद्येष्वेवे'ति, 'कल्पितमेवे'ति वा सम्बन्धः । त्र्यणुकाद्येषु द्रव्येषु । तस्मात् त्र्यणुकादौ कार्येऽन्त्यावयविव्यतिरिक्ते वर्तमानान्महत्त्वाद्दीर्घत्वात् । चशब्दो वाक्यार्थसमुच्चये । कार्यं परिमाणम् । तत्कार्येषु त्र्यणुकादिकार्येषु चतुरणुकादिषु । तथैवेत्येवशब्देन दृष्टान्तदार्ष्टान्तिकवैषम्यशङ्कामपाकरोति । कार्ये त्र्यणुके द्व्यणुके च । समत्वतः कार्यपरिमाणत्वादिसाम्यादिति हेतुवचनम् । हिशब्दो व्याप्तिद्योतकः ।

परि०— त्र्यणुकाद्येष्वित्यत्र गुणाद्यग्रहणाय विशेष्यमाह **त्र्यणुकाद्येषु द्रव्येष्विति** । तस्मादित्यनुवादः । दीर्घत्वादित्यन्तं व्याख्या । **चशब्द इति** । तस्माच्चेति चशब्दो यथाश्रुत एव सन् पूर्वोत्तरार्धरूपवाक्यद्वयोक्तार्थद्वयसमुच्चय इत्यर्थः । यद्वा जायत इत्यनन्तरं इति च कल्पितं यथेति पूर्वार्धोक्तेनोत्तरार्धोक्तार्थसमुच्चय इत्यर्थः । महत्वान्महत्वं दीर्घत्वाच्च दीर्घत्वं यथा जायत इति वाक्यद्वयार्थसमुच्चय इत्येके । कार्यमित्यस्य विशेष्यमाह **कार्यं परिमाणमिति** । कार्ये इत्यनुवादः । त्र्यणुके द्व्यणुके चेति व्याख्या । **व्याप्तिद्योतक इति** । वक्ष्यमाणप्रयोगेष्विति भावः ।

श्रीनिधि०— वाक्यार्थसमुच्चय इति । त्र्यणुकाद्येष्वेव महत्त्वम् । दीर्घत्वं च तेष्वेव कल्पितमिति वाक्यार्थसमुच्चय इत्यर्थः ।

शे०वा०— महत्त्वं चैवेत्येवकारस्य वैयर्थ्यविरुद्धार्थत्वाभ्यां यथावस्थितान्वययोगाद्भिन्नक्रमतया तत्सम्बन्धमाह **एवशब्दस्येति** । अतिप्रसङ्गनिरासाय त्र्यणुकाद्येष्वित्याद्यशब्दसङ्गृह्यतावच्छेदकं धर्ममाह **द्रव्येष्विति** । आकाशादिकार्यस्य द्रव्यस्यैवाप्रसिद्धया तद्गतमहत्त्वदीर्घत्वयोराकाशादिकार्ये स्वसदृशपरिमाणानारम्भकत्वेन तस्मादित्यनेन त्र्यणुकादिरूपकार्याकार्यद्रव्यमात्रगतपूर्ववाक्यप्रकृतमहत्त्वदीर्घत्वपरामर्शायोगात्, घटपटादिरूपान्त्यावयविनिष्ठमहत्त्वदीर्घत्वयोरपि तत्कार्ये स्वसदृशपरिमाणानारम्भकत्वेन त्र्यणुकादिकार्यद्रव्यमात्रमहत्त्वदीर्घत्वयोरपि परामर्शायोगाद्योग्यतया आनन्त्यावयविकार्यद्रव्यमात्रनिष्ठमहत्त्वादेरेवायं परामर्श इति भावेन त्र्यणुकादौ कार्येऽन्त्यावयविव्यतिरिक्ते वर्तमानादित्युक्तम् । **वाक्यार्थसमुच्चय इति** । पूर्वार्धरूपवाक्यार्थेन सहैतद्वाक्यार्थस्य समुच्चय इत्यर्थः । वक्ष्यमाणरीत्या पूर्ववाक्योक्तबाधकपरिहारसमुच्चितस्यैवैतद्वाक्योक्तानुमानस्य विवक्षितार्थसाधकत्वादिति भावः । यद्वा तस्मादित्यस्योभयपरामर्शकत्वेन न केवलं 'महत्त्वात्सदृशं कार्यं तत्कार्येषूपजायते किन्तु दीर्घत्वाच्च सदृशं कार्यं तत्कार्येषूपजायत' इति वाक्यार्थसमुच्चय इत्यर्थः । **त्र्यणुकादिकार्येषु चतुरणुकादिष्विति** । इदं च चतुर्भिर्द्व्यणुकैरारब्धं चतुरणुकमिति

मतमनाश्रित्य चतुर्भिस्त्र्यणुकैरारब्धं चतुरणुकमित्येव च मतमाश्रित्योक्तमिति ध्येयम् । 'ह्रस्वत्वात्पारिमाण्डल्यतोऽपि हि' इति 'ह्रस्वपरिमण्डलाभ्यामि'ति सौत्रक्रमानुसारिपूर्वभाष्यक्रमानुरोधेन कार्य इत्येतत्त्र्यणुकादित्वेन व्याख्याति **त्र्यणुके द्व्यणुके चेति** । भाष्ये समत्वत इत्यस्य सूत्राव्याख्यानरूपत्वाद्वैयर्थ्यमाशङ्क्य सूत्रेऽपेक्षितहेतुसूचनार्थत्वान्न तदिति भावेन तत्सूचितहेतुप्रदर्शनपूर्वकं हेतुकथनपरतया तद्योजयति **समत्वत इत्यादिना** । **व्याप्तिद्योतक इति** । तथा चापेक्षितानुमानाङ्गव्याप्तिद्योतनार्थत्वान्न भाष्ये हिशब्दो व्यर्थ इति भावः ।

वा०र०— तद्गतेति । आकाशादिगतेत्यर्थः । **अकार्यमाकाशेत्यादि** । अनारम्भकत्वेनेत्यस्य परामर्शायोगात् इत्युत्तरेणान्वयः । **त्र्यणुकादिकार्येति** । त्र्यणुकादि यत्कार्यमिति योज्यम् । **एतद्वाक्यार्थस्येति** । तस्माच्चेत्याद्यर्थत्रयेणोक्तानुमानरूपस्येत्यर्थः । **वक्ष्यमाणरीत्येति** । सदृशमिति दृष्टान्तदार्ष्टान्तिकयोः उक्तिं मूलीकृत्य द्व्यणुकादिपरिमाणं त्र्यणुकादिगतसजातीयपरिमाणारम्भक इति प्रयोगे विवक्षिते सति द्व्यणुकपरमाण्वोः त्र्यणुकादौ च महत्त्वदीर्घत्वयोः प्रमाणसिद्धत्वात् बाध इति प्राप्तबाधस्य यः परिहारः कल्पनैवेषा । न तु वस्तुतो ह्रस्वत्वादिकमस्ति । परिमाणावान्तरजातेः अपाकरणात् इत्येवंरूपेण 'महत्त्वं चैव दीर्घत्वमि'त्येतत्पूर्वार्धोपयोगकथनावसरे वक्ष्यमाणतत्परिहारसमुचितस्यैवोक्तं सार्धश्लोकोक्तानुमानस्येत्यर्थः । चतुरणुकस्यापि द्व्यणुककार्यत्वात्, त्र्यणुककार्यत्वोक्तिः अयुक्ता इत्यत आह **इदं चेति** । **त्र्यणुकादित्वेनेति** । अन्यथा द्व्यणुकस्यैव प्राथमिकत्वात् प्रथमं ग्रहणं स्यादिति भावः ।

१७ सु०— यद्यपि महदादिशब्दा द्रव्यवचनास्तथाऽपि भावप्रधानत्वात् परिमाणवाचिनो(ऽपि) भवन्तीत्याशयेन महत्त्वम् इत्याद्युक्तम् । सूत्रकृतश्च भावप्राधान्येनोक्तिः कणादसूत्रानुसारेण, 'कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्च महदि'त्यादि हि तत् । महद्दीर्घवदिति षष्ठ्यर्थे वतिः । विभक्तिविपरिणामेन वा सकाशादित्यध्याहारेण वा तस्मात् इत्युक्तम् ।

अत्रैतावदादौ वक्तव्यम् । यथा तस्मात्कार्येषु कार्यमुपजायते तथैव ह्रस्वत्वात्पारिमाण्डल्यतोऽपि कार्ये परिमाणं जायेत समत्वतो हीति ।

परि०— ननु सूत्रे महदित्याद्युक्त्या द्रव्यप्रतीतेः कथं महत्वमित्यादिना परिमाणपरत्वेन व्याख्यानमित्यत आह **यद्यपीति** । सूत्र इति योज्यम् । **इत्यादि हि तदिति** । कणादसूत्रमित्यर्थः । कारणबहुत्वाच्च महदित्येव कणादसूत्रपाठेऽपि तदीयव्याख्योक्तरीत्या चशब्दसमुच्चयप्रदर्शनेन कारणमहत्वात् प्रचयविशेषाच्च महदित्यनुवादः कृत इत्यदोषः । एवमनुवादोऽपि

वक्ष्यमाणप्रयोगेषु दृष्टान्तसौकर्याय व्याप्तिलाभाय च । अत एवाग्रे त्र्यणुकपरिमाणवदित्याद्युक्तिः । 'न च यत्र केवलेने'त्यादिना व्यभिचारोद्धारश्च । आदिपदेनातोविपरीतपरिमाणावित्युत्तरसूत्रं ग्राह्यम् ॥ **षष्ठ्यर्थे वतिरिति** । 'तत्र तस्येवे'ति सूत्रे सप्तम्यन्तात् षष्ठ्यन्ताच्चेवार्थे वतिप्रत्ययोक्तेरिह च सूत्रे महद्दीर्घयोरिवेत्यर्थे महद्दीर्घवदिति प्रयोग इत्यर्थः । तर्हि मूले तस्य च सदृशं कार्यमिति वक्तव्ये तस्मादिति कथमुक्तमित्यत आह **विभक्तीति** । सूत्रे महद्दीर्घयोरिवेति अभिप्रेतायाः षष्ठ्याः महद्दीर्घाभ्यामिति पञ्चमीत्वेन विपरिणामेनेत्यर्थः । **सकाशादिति** । महतो दीर्घस्य च सकाशादित्यध्याहारेणेत्यर्थः । वक्ष्यमाणप्रयोगोपयुक्तं निष्कृष्य दर्शयति **अत्रेति** ।

यादु०— कारणबहुत्वादिति । यद्यपि 'कारणबहुत्वाच्चे'त्येव कणादसूत्रपाठः तथाऽपि तदर्थानुवादोऽयमिति ज्ञातव्यम् । 'चकारो महत्त्वप्रचयौ समुच्चिनोति । महत्परिमाणमुत्पद्यत इति सूत्रशेष' इति तदीयैः कारणबहुत्वाच्चेति सूत्रस्य व्याख्यातत्वादिति ध्येयम् । इत्यादि हि तदित्यत्र आदिपदेनातो विपरीतमणावित्युत्तरसूत्रसङ्ग्रहः ।

वं०प०— भावेति । महत्त्वदीर्घत्व(त्वेति)भावस्य प्राधान्यमभिप्रेत्य सूत्रे महदित्याद्युक्तिरित्यर्थः । **तत्** सूत्रम् । तत्र महदित्युक्तेरिति भावः । **वतिरिति** । 'तत्र तस्येवे'त्युक्तत्वेन सप्तम्यर्थस्य प्रकृतेऽयोगेन षष्ठ्यर्थ इत्युक्तम् । तर्हि महत्त्वस्य दीर्घत्वस्येत्यर्थासङ्गतिरित्यत आह **विभक्तीति** । षष्ठीविभक्तिं विपरिणाम्य पञ्चम्यर्थो वाच्य इत्यर्थः । अथ षष्ठ्येवास्तु न तस्या विपरिणामस्तर्हि कथमित्यत आह **सकाशादिति** ।

कं०रा०— ननु महद्दीर्घवद्वेति द्रव्यवचनमहदादिशब्दे सूत्रकारेण प्रयुक्ते कथं भाष्यकारेण महत्त्वमित्याद्युक्तमित्याशङ्क्य निराकरोति **यद्यपीत्यादिना** । सूत्रकृतो 'महद्दीर्घवद्वे'ति भावप्राधान्येनोक्तः कुत इत्यत आह **सूत्रकृतश्चेति** । कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महदित्यादि कणादिसूत्रे महच्छब्दस्य भावप्राधान्यविवक्षया प्रयुक्तत्वात् तदनुसारेणात्र सूत्रकृतः 'महद्दीर्घवदि'ति भावप्राधान्येनोक्तिरिति भावः । ननु महद्दीर्घवदित्यस्य तत्र तस्येवेति षष्ठ्यर्थविहितवति प्रत्ययान्तत्वात् कथं भाष्ये तस्मादित्युक्तमित्यत आह **महद्दीर्घवदितीति** । यद्यपि महद्दीर्घवदिति वतिप्रत्ययः षष्ठ्यर्थे, तथापि षष्ठ्याः पञ्चमीत्वेन विपरिणाममाश्रित्य वा सकाशादिति पदाध्याहारमाश्रित्य वा **तस्मात्** इत्युक्तं भाष्यकृतेति भावः ।

श्रीनिधि०— महदादिशब्दा इति । सूत्रस्थमहच्छब्ददीर्घशब्दह्रस्वपरिमण्डलशब्दा इत्यर्थः । **महत्त्वमित्याद्युक्तमिति** । महत्त्वं दीर्घत्वं ह्रस्वत्वं पारिमाण्डल्यमित्युक्तमित्यर्थः । **षष्ठ्यर्थे वतिरिति** । यद्यपि प्रथमान्ताद् वतिप्रत्ययः प्रयोगसिद्धः । धूमवत्त्वात् महानस इत्यादौ तथापि तस्मादित्यस्यानन्वयादेवं उक्तम् । एवमप्यनन्वय इत्यत आह **विभक्तिविपरिणामेन वेति** । एवञ्च महत्त्वदीर्घत्वाभ्यामिवेत्यर्थः । यद्यपि तत्र

तस्येवेति सप्तम्यन्तादचि वतिप्रत्ययो विहितः तथापि तत्पक्षे सकाशादित्यध्याहार्येऽप्यनन्वयात् षष्ठ्यर्थं इत्युक्तम् ।

शे०वा०— सूत्रे महदादिशब्दप्रयोगात् तदनुरोधेन भाष्येऽपि महदित्याद्येव प्रयोक्तव्यत्वान्महत्त्वमित्याद्युक्तिः सूत्राननुसारिणीत्याशङ्क्य सूत्रभाष्ययोरपि संवादं दर्शयति **यद्यपीत्यादिना** । **द्रव्यवचन इति** । अ(त)त्रैव प्रयोगप्रत्ययप्राचुर्यादिति भावः । **भावप्रधानत्वात्** लक्षणया भावप्रतिपादकत्वात् । **परिमाणवाचिनः** परिमाणपराः । तत्रापि प्रयोगप्रत्ययोः सत्त्वादिति भावः । नन्वेवं स्वायत्तन्यायविरोध इत्याशङ्क्य स्वोक्तेः कणादिसूत्रानुसारित्वज्ञापनार्थत्वेन प्रयोजनसद्भावान्न स इत्याशयेनाह **सूत्रकृतश्चेति** । किं तत्कणादसूत्रं यदनुसारित्वं सूत्रकृदुक्तेरित्यतस्तदुदाहरति **कारणबहुत्वादिति** । यद्यपि 'कारणबहुत्वाच्चे'त्येव कणादिसूत्रपाठः तथाऽपि 'चकारो महत्त्वप्रचयौ समुच्चिनोति । महत्परिमाणमुत्पद्यत इति सूत्रशेष' इत्यस्य सूत्रस्य भाष्यकृता व्याख्यातत्वात् तदनुवादोऽयं कृत इति ध्येयम् । 'इत्यादि हि तदि'त्यादिपदेन 'महत्यनेकद्रव्यत्वाद्रूपाच्चोपलब्धिरि'ति पूर्वस्य, 'अतो विपरीतमणौ, अणुमहदिति तस्मिन्विशेषभावात् विशेषाभावाच्चे'त्याद्युत्तरस्य च कणादसूत्रस्य परिग्रहः । महत्त्वमित्यादेर्भाष्यस्य महदित्यादिसूत्रविसंवादं परिहृत्य तस्माच्च सदृशमित्यादेर्भाष्यस्य महद्दीर्घवद्वेति सूत्रविसंवादमाशङ्क्य परिहरति **महद्दीर्घवदिति** । **षष्ठ्यर्थे वतिरिति** । अत्र यद्यपीति शेषः । 'तत्र तस्येवे'ति स्मरणादिति भावः ॥ ततश्च सूत्रानुसारेण तस्येति षष्ठीप्रयोग एव भाष्ये युक्त इति भावः । **विभक्तिविपरिणामेनेति** । अत्र तथाऽपि इति शेषः । यद्यपि तत्र तस्येवेति सूत्रस्य प्रायिकत्वेनाभियुक्तव्याख्यानमनुरुद्ध्य प्रायिकतामेवाश्रित्य घटवदित्यादिप्रयोगोपपादनं स्वयमन्यत्र कृतम् । तथाऽप्यप्रायिकत्वं, घटवदित्यादिप्रयोगाणां च गौणतामेवाश्रित्य विभक्तिविपरिणामाद्याश्रयणमित्यवधेयम् । एवं पञ्चम्यर्थे षष्ठ्यङ्गीकारे सुब्विभक्तौ लक्षणा भवतीति षष्ठ्यर्थतामेवाश्रित्य अनन्वयपरिहाराय योग्यमपेक्षितं पूरयति **सकाशादित्यध्याहारेण वेति** ।

वा०र०— लक्षणाया भावप्रतिपादकत्वव्याख्यानानुरोधेन व्याचष्टे **परिमाणपरा इतीति** । अत्र सूत्रकृता भावे लक्षणाभिप्रायेण प्रयोगेऽपि अनुव्याख्यानकृता लाक्षणिकभावयुक्ततयैव प्रयोगः कृतः । व्याख्येये लक्षणादिबललभ्यतात्पर्यविषयीभूतस्य वाचकपदैः विवरणार्थत्वात् व्याख्यानस्य इति विसंवादाभावः इति फलितं द्रष्टव्यम् । **स्वायत्तन्यायविरोध इति** । सूत्रकृत इति शेषः । **भाष्यकृता व्याख्यातत्वादिति** । सप्तमाध्यायस्य प्रथमाह्निक इति शेषः । इत्यादि हि तदित्यत्र इत्येतस्यादिरिति इत्येतत् आदिर्यस्य इति च व्युत्पत्तिमभिप्रेत्य द्वेधा योजयति **इत्यादि हीति** । **पूर्वस्येति** । यद्यपि चतुर्थस्य प्रथमाह्निके तत्सूत्रमस्ति नातः सप्तमस्य प्रथमाह्निकस्थैतत्सूत्रपूर्वत्वं तस्य युक्तमिति न तथोक्तिः सम्भवति तथापि अणोर्महतश्च उपलब्ध्यनुपलब्धी नित्ये व्याख्याते इति पूर्वसूत्रमेवाभिप्रेतम् । तत्र च नित्य इत्यनेन नित्यविषयस्य नित्यत्वप्रतिपादकस्य चतुर्थाध्यायस्योपलक्षणाङ्गीकारेण तत्र व्याख्यातत्वार्थस्य भाष्यकृता उक्तत्वात् व्याख्यानस्थलरूपचतुर्थाध्यायीयमहत्यनेकेति सूत्रस्यैवात्र पूर्वकत्वेनोपन्यासो युक्तः । यद्यपि उपलब्धिसूत्रवत् सत्यपि

द्रव्यत्वे महत्त्वे महत्त्वरूपसंस्काराभावात् द्वयोरनुपलब्धिरित्यनुपलब्धिसूत्रमपि पूर्वसूत्रेऽभिप्रेतं तथापि तत्राणुमहच्छब्दयोः अश्रवणात् तस्यानुपन्यासः इति ध्येयम् । यद्यपि च परिमाणोत्पादकमहत्वाणुत्वयोरेव प्रकृतत्वानुसारेण कारणबहुत्वाच्चेति सूत्रमात्रं उदाहार्यम् । तथापि प्रयोगप्राचुर्यप्रदर्शनार्थं पूर्वोत्तरसूत्रोदाहरणम् । यद्यपि चाणुमहदिति सूत्रानन्तरं नाणुमहच्छब्दोपेतं सूत्रं तथापि महदादिशब्दो इति मूले परिमण्डलशब्दस्यापि अभिधानात् तस्य भावप्रधाननिर्देशाभिप्रायेण प्रवृत्तस्य नित्यं परिमण्डलमिति व्यवहितसूत्रस्य सङ्गहोऽपीत्यादि हि तदिति मूलोऽभिप्रेत इति व्युत्पादनाय इत्याद्युत्तरस्येति आदिपदोपादानं युक्तम् । यद्यपि चाणुत्वमहत्त्व-शब्दोपेतान्यपि इति अनेकानि सूत्राणि सन्ति तथापि परिमाणोत्पत्तिकथनपरसूत्रस्यैवात्र सम्मतिरपेक्षिते-त्यभिप्रायेण तस्यैव उपन्यासो मूले । महदिति निर्देश एव महत्त्वाविनाभूतं दीर्घत्वमिति दीर्घनिर्देश रूपमिति न तस्य तथा निर्देशे सम्मत्यनुक्तिः । **अणुत्वाविनाभूतं ह्रस्वत्वमिति** । ह्रस्वत्वस्यापि अणु इति अयमेव निर्देश इति न तत्रापि तदनुक्तिः दोषः । अत एव कारणेति सूत्रे महत्त्वदीर्घत्वे जनयतीति । अत इति सूत्रे च दीर्घत्वविपरीतं ह्रस्वत्वमित्युक्त इति ध्येयम् । अत्र इत्यादि हि तदित्येतद्व्याख्यानरूपा अन्यथाख्याति-निराकरणावसरे अत्यन्ताश्लिष्टत्वाच्चेत्यनन्तरं अणुमहच्छब्दयोरिव परिमण्डलशब्दविषयेऽपि नित्यपरिमण्डलमिति उत्तरसूत्रसम्मतिप्रदर्शनस्यावश्यकत्वेन तदुपपादनस्य वा तदर्थमूल इव स्वयमपि आदिपदोपादानस्य वा कर्तव्यतया तत्परित्यागायोगाच्चेति पूरणीयम् । **अन्यत्रेति** । तत्त्वनिर्णयटीकायामित्यर्थः । क्षित्यादिकं सकर्तृकं कार्यत्वादित्येतत् अनुमानसम्बन्धीटीकायां तथा प्रतिपादनात् इति भावः । **सुब्विभक्तौ लक्षणा भवतीति** ।

ननु सुब्विभक्तावपि लक्षणाऽङ्गीकारे बाधकाभावः । अत एवोक्तं तर्कताण्डवे पञ्चावयवादिभङ्गे न च सुब्विभक्तौ लक्षणा नेति कुलधर्म इति, ततो लक्षणापक्षेऽपि नानुपपत्तिरिति चेत् न । सुप् विभक्तौ लक्षणाभावस्य न्यायसिद्धत्वात् । तथा हि । 'तान्येकवचनद्विवचनबहुवचनान्येकशः' इति सूत्रेण एकस्य वचनं इत्याद्यन्वर्थसंज्ञाबलादेकत्वादौ शक्तिरवसितेति 'द्वेकयोः द्विवचनैकवचने' इति सूत्रम् एकत्वादौ एकवचनादिरिति बोधयत् व्यर्थमेव । अप्राप्तप्रापकत्वाभावात् इति पूर्वपक्षे प्राप्तप्रापकत्वेऽपि एकत्वे एकवचनं द्वित्वे एव द्विवचनमिति नियमेनान्यत्रासाधुत्वबोधनप्रयोजनतया नेदं सूत्रं व्यर्थमिति तावत् सिद्धान्तः । न चायं सिद्धान्तो न युक्तः । द्वित्वादौ एकवचनप्रयोगस्य शक्त्यभावेनाप्रसक्ततया तन्निराकरणाय नियमार्थकसूत्रानर्थक्यात् । प्रसक्तं हि प्रतिषेध्यतामिति न्यायादिति वाच्यम् । न हि सर्वत्र शक्त्यैव प्रयोगः । गङ्गायां घोषः इत्यादौ व्यभिचारात् । तथा च लक्षणया एकवचनादेः अन्यत्र प्रसक्तस्य प्रयोगस्य द्वयेकयोरिति सूत्रेण निराकरणं युज्यत एव । एवं च एतत्सिद्धं यत् सुप्विभक्तौ न लक्षणेति । तथा सति असाधुत्वापातात् । व्यत्यया-नुशासनविरोधाच्च । मातुः स्मरतीत्यादौ द्वितीयाद्यर्थकत्वस्य लक्षणायापि सम्भवेन अधिगर्थेत्यादि व्यत्यया-नुशासनप्रयोजनाभावात् । तस्मात् व्यत्ययानुशासनबलेन यत्र विशेषानुशासनं तत्र परं अन्यविभक्त्यर्थे लक्षणया साधुत्वं अन्यत्र तु नास्तीत्यवगम्यते । न च व्यत्ययानुशासनात् अन्यविभक्त्यर्थे तत्र व्यत्ययानुशिष्टविभक्तेः शक्तिरेवेति न क्वापि सुप्विभक्तेः लक्षणेति वाच्यम् । व्यत्ययसूत्रबलेन साधुत्वमात्रसिद्धौ अन्यलक्ष्यत्वादि-प्रतिसन्धानेन तत्तद्विभक्तेः अनेकार्थत्वकल्पनागौरवेण च लक्षणाया एव व्यत्ययस्थले कल्पनौचित्यात् ।

तद्भिन्नविभक्तौ लक्षणाया एवाप्यर्थतो निराकरणेन व्यत्ययानुशासनस्य सार्थक्यात् । तस्मात् विशेषतोऽनुशासनं यत्र तद्भिन्नस्थले सुप्विभक्तौ लक्षणेति । अत एव 'आपो दाराः ग्रहाः वर्षा' इत्यादौ एकत्वे बहुवचनं लाक्षणिकम् । व्यत्ययो बहुलमिति अनुशासनवैय्यर्थ्यात् । न विभक्तौ लक्षणेति चेत् न । 'सुप्तिङ उपग्रहलिङ्गनरायणां' इत्यादि परिगणितस्वरसेन नियतलक्षणानुशासनतया तदुपपत्तेरिति प्रमेयतत्त्वबोधे प्रतिपादितम् । नन्वेवं दाराः इत्यादावपि बहुत्वानन्वयेन विभक्तिलक्षणां विनाऽनुपपत्तिरेव । न च तद्रूपादिकमादाय बहुत्वान्वय इति वाच्यम् । तद्रूपादेः प्रकृत्यर्थत्वाभावेन तत्र विभक्त्यर्थबहुत्वानन्वयात् । तस्मात् तत्तद्विभक्तेरैकत्वलक्षणाभ्युपेयेति कथं सुप्विभक्तौ लक्षणाविरह इति । मैवम् । एकविभक्तौ बहुत्वानन्वयेऽपि बहुवचनप्रयोगस्य साधुत्वमात्रेण उपपत्त्या व्यत्ययानुशासनबलात् सिद्धस्य सुप्विभक्तौ लक्षणाविरहत्यागात् ।

तथा च सुब्विविभक्तौ लक्षणाभावस्य न्यायसिद्धत्वाद्युक्तसुप्विभक्तौ लक्षणायाः अनिष्टत्वम् । अत एवोक्तरीत्या तस्यानिष्टत्वेन सुप्विभक्तौ लक्षणा नेति कुलधर्मो नेत्यस्यानुपपत्तिरूपास्वरसादेव वेदे प्रयाजशेषेणेत्यादिना दूषणान्तरं टीकाकृता न चोच्चारणकाल एवेत्येतत् तत्त्वनिर्णयटीकाव्याख्यान इत्यत्रोक्तम् । उपासनापादीय 'यदुपास्तिमि'त्यत्र उपास्तिपदव्युत्पादनपरटीकायामपि अत्रत्यं अधिकमुपपादनं ज्ञेयम् । एतत्स्थलं ग्रन्थान्तरसंवादेन पुनः शोध्यमस्ति । गुरुचरणलिखितपत्रानुसारेण प्रमेयमेव लिखितम् ।

विट्ठल०— महदादिशब्दा इति । महद्दीर्घवद्वेति सूत्रोक्ता इति ग्राह्यम् । **कारणबहुत्वादिति** । यद्यपि कारणबहुत्वाच्च महदित्येव कणादसूत्रपाठः तथापि तदीयैः व्याख्यातृभिः चकारो महत्त्वप्रचयौ समुच्चिनोतीति महत्परिमाणमुत्पद्यत इति सूत्रशेष इति च व्याख्यातृत्वात् तदर्थानुवादोऽयमिति ध्येयम् । एवमनुवादोऽपि वक्ष्यमाणप्रयोगे दृष्टान्तसौकर्यायेति ज्ञेयम् । **इत्यादी**त्यादिपदेन अतो विपरीतमणावित्युत्तरसूत्रसङ्ग्रहः । **षष्ठ्यर्थे वतिरिति** । तत्र तस्यैवेति वतिरिति सूत्रान्महद्दीर्घयोरिवेत्यर्थे वतिरित्यर्थः । नन्वेवं षष्ठ्यर्थत्वे तद्व्याख्यानपरमूले तस्य वेति वक्तव्यं, तस्माच्चेति कथमुक्तमित्यत आह **विभक्तीति** । मूलसूचितं प्रयोगं वक्तुमुपयुक्तमाह **अत्रेति** । **एतावदिति** । सदृशमित्यस्यात्र प्रयोगे उपयोगाभावात् । उत्तरत्र प्रयोजनान्तरस्य वक्ष्यमाणत्वाच्चेति भावः । आकाशादिपरिमाणे व्यभिचारनिवारणाय कार्येति हेतुविशेषणं द्वितीयानुमाने अन्त्यावयविपरिमाणे आकाशादिपरिमाणे च वारणाय क्रमेण द्रव्यस्य समवायकारणेति पदद्वयम् । अन्यत्स्पष्टम् ।

चषक— भावप्रधानत्वात् । प्रकृतिजन्यबोधीयप्रकृत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारतापन्नोऽभावस्तद्विशेष्यकशाब्दधीजनकत्वात् । **षष्ठ्यर्थे वतिरिति** । तत्र तस्यैवेति षष्ठ्यन्तादिवार्थे वतेर्विधानादिति भावः । **विभक्तीति** । सूत्रावयवतयाभिप्रेतषष्ठ्याः पञ्चमीत्वेन विपरिणामादित्यर्थः ।

॥ इति तच्छब्दार्थकथनम् ॥

* * *

॥ अथ उक्तार्थाभिप्रायकतया अनुमानप्रयोगप्रदर्शनम् ॥

१८ **सु०—** एतदुक्तं भवति । त्र्यणुकद्व्यणुकपरिमाणं स्वाश्रयाश्रयसमवायिकारण-परिमाणजं कार्यपरिमाणत्वाच्चतुरणुकादिपरिमाणवत्, द्व्यणुकपरमाणुपरिमाणं परिमाणा-रम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् त्र्यणुकपरिमाणवत्, त्र्यणुकद्व्यणुके वा परि-माणारभ्यपरिमाणवती कार्यद्रव्यत्वाच्चतुरणुकादिवत्, द्व्यणुकपरमाणू परिमाणासमवायि-कारणपरिमाणवन्तौ द्रव्यसमवायिकारणत्वात् त्र्यणुकवदिति ।

न च विवक्षितार्थासिद्धिः, अन्यथाऽनुपपत्त्या तत्सिद्धेः । न च यत्र केवलेन प्रचयेन परिमाणमारभ्यते तत्र व्यभिचार इति वाच्यम्, तस्यापि पक्षतुल्यत्वात् । न चैवं सति बाधः, प्रचयकारणताया अनिवारणात् । न चोभयकारणत्वकल्पने गौरवदोषः, द्वयोरपि क्लृप्तशक्तित्वात् । 'द्व्यणुकपरिमाणं त्र्यणुकपरिमाणाजनकम्, परमाणुपरिमाणं च द्व्यणुक-परिमाणाजनकम्, परिमाणत्वात् पटपरिमाणवत्' इत्यादिना सत्प्रतिपक्षतेति चेन्न, तत्समवायिकारणपरिमाणत्वाभावस्योपाधित्वात्, 'त्र्यणुकपरिमाणं चतुरणुकपरिमाणाजनकं परिमाणत्वात् पटपरिमाणवत्' इत्याद्याभाससमानयोगक्षेमत्वाच्च । परमाणुपरिमाणं परिमाणानारम्भकं नित्यपरिमाणत्वात् गगनपरिमाणवदित्यपि न, द्रव्यसमवायिकारण-परिमाणत्वाभावस्योपाधित्वात्; 'आप्यपरमाणुरूपं रूपानारम्भकं नित्यत्वात् गगनपरि-माणवत्', 'परमाणवो द्रव्यानारम्भका नित्यत्वाद्गगनवत्' इत्याद्याभासतुल्यत्वाच्च ।

परि०— कथं प्रयोग इत्यत आह **एतदुक्तमिति** । **न च विवक्षितार्थासिद्धि-रिति** । द्वितीये चतुर्थे च प्रयोगे द्व्यणुकपरमाणुपरिमाणयोः परिमाणासमवायिकारणत्वमात्रसिद्धावपि विवक्षितस्य त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणत्वस्यासिद्धिः । तथा तृतीयेऽपि प्रयोगे त्र्यणुक-द्व्यणुकपरिमाणयोः परिमाणारभ्यत्वमात्रसिद्धावपि विवक्षितस्य तयोः द्व्यणुकपरमाणुपरिमाणारभ्य-त्वस्यासिद्धिर्न चेत्यर्थः । **अन्यथानुपपत्त्येति** । द्वितीयचतुर्थप्रयोगयोः त्र्यणुकद्व्यणुकपरिमाणा-समवायिकारणत्वेन विना तृतीये च प्रयोगे द्व्यणुकपरमाणुपरिमाणारभ्यत्वेन विना चानुपपत्त्या साध्यपर्यवसानायोगेन विवक्षितार्थसिद्धेरित्यर्थः । **न च यत्रेति** । तूलपिण्डादौ प्रचयेन प्रशिथि-लावयवसंयोगरूपेणेत्यर्थः । **व्यभिचार इति** । तूलपिण्डादिपरिमाणे तदवयवपरिमाणे तूलपिण्डा-दिद्रव्ये तदवयवे च यथायोगं व्यभिचारः प्रागुक्तहेतूनां ध्येयः । **न चैवमिति** । तत्रापि

परिमाणकारणत्वेऽङ्गीकृते सति प्रचयकारणकत्वविषयप्रत्यक्षबाध इत्यर्थः । **द्वयोरपीति** । परिमाणस्य हेतुत्वमन्यत्र प्रमितं परिमाणोत्कर्षे च प्रचयहेतुकत्वं च वाच्यमित्युभयहेतुकत्वमावश्यकमेवेति भावः ।

गु०दी०— न च विवक्षितासिद्धिः इत्यत्रोक्तानुमानैद्व्यर्चणुकपरमाणुपरिमाणयोः ह्रस्वकार्यपरिमाणारम्भकत्वमात्रसिद्धावपि तन्निष्ठपारिमाण्डिल्यह्रस्वत्वाख्यपरिमाणयोः परिमाणारम्भकत्वासिद्धिरिति शङ्कितुरभिप्रायः ।

यादु०— न च विवक्षितार्थासिद्धिरिति । प्रथमानुमानातिरिक्तानुमानेष्विति शेषः । द्वितीयचतुर्थानुमानयोद्व्यर्चणुकपरमाणुपरिमाणयोः असमवायिकारणत्वमात्रसिद्धावपि त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणत्वस्य विवक्षितार्थस्यासिद्धिः, तथा तृतीयानुमाने त्र्यणुकद्व्यणुकपरिमाणयोः परिमाणारभ्यत्वमात्रसिद्धावपि तयोद्व्यर्चणुकपरमाणुपरिमाणारभ्यत्वस्य विवक्षितार्थस्यासिद्धिरिति भावः । **अन्यथाऽनुपपत्त्येति** । द्वितीयचतुर्थानुमानयोद्व्यर्चणुकपरमाणुपरिमाणयोरसमवायिकारणत्वसिद्धिः, त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणतामादायैव पर्यवस्यति । अन्यथा तत्पर्यवसानानुपपत्तेः । तथा तृतीयानुमाने त्र्यणुकद्व्यणुकपरिमाणयोः परिमाणारभ्यत्वसिद्धिः तयोद्व्यर्चणुकपरमाणुपरिमाणारभ्यत्वमादायैव पर्यवस्यति । अन्यथा तत्पर्यवसानानुपपत्तेरित्यर्थः । **न च यत्र केवलेनेति** । तूलपिण्डादावित्यर्थः । प्रचयो नाम प्रशिथिलावयवसंयोगः । तथा चाद्यस्य हेतोस्तूलपिण्डपरिमाणे, द्वितीयस्य तूलपिण्डावयवपरिमाणे, तृतीयस्य तूलपिण्डे, चतुर्थस्य तूलपिण्डावंयवे व्यभिचार इत्यर्थः । **तस्यापीति** । उक्तस्य तत्तदनुमानव्यभिचारोदाहरणस्यापि तत्तदनुमाने पक्षतुल्यत्वादित्यर्थः ॥ **द्वयोरपीति** । जन्यपरिमाणत्वावच्छिन्ने कारणपरिमाणजन्यत्वस्य व्याप्तिबलेन अवधारणात् । परिमाणोत्कर्षस्य च प्रचयाभावेऽसम्भवात् । द्वयोरपि तूलपिण्डपरिमाणे कारणत्वं क्लृप्तमित्यर्थः ।

वं०प०— अन्त्यावयविपरिमाणे व्यभिचारवारणाय **द्रव्यसमवायिकारणेत्युक्तम्** । षष्ठ्यन्तमेतत् । **एवं सतीति** । तूलपिण्डपरिमाणस्यापि पक्षतुल्यतामुक्त्वा परिमाणासमवायिकारणकत्वे साध्ये तूलपिण्डपरिमाणस्य प्रचयासमवायिकारणताया एव सिद्धत्वेन बाधः स्यादित्यर्थः । **तत्समवायिकारणपरिमाणत्वाभावस्येति** । तत्समवायिकारणस्य यत्परिमाणं तत्त्वाभावस्योपाधित्वादित्यर्थः । तथा च त्र्यणुकसमवायिकारणपरिमाणत्वाभावो आद्यानुमाने उपाधिः । द्व्यणुकसमवायिकारणपरिमाणत्वाभावो द्वितीयानुमाने उपाधिरिति भावः ।

कं०रा०— त्र्यणुकद्व्यणुकपरिमाणमिति । परिमाणमात्रपक्षीकारे गगनादिपरिमाणे अंशतो बाधो सिद्धश्च स्यात् कार्यपरिमाणपक्षीकारे च चतुरणुकादिपरिमाणे सिद्धसाधनं स्यात् अतः तन्निरासाय त्र्यणुकद्व्यणुकपरिमाणमित्युक्तम् । **स्वाश्रयेति** । यद्यपि परिमाणजमित्येतावन्मात्रोक्तावपि परिमाणान्तर-

जन्यत्वस्य बाधितत्वेन स्वाश्रयसमवायिकारणनिष्ठपरिमाणजन्यत्वमेव सिद्ध्यति तथाप्युद्देश्यसिद्ध्यर्थं स्वाश्रयेत्याद्युक्तमिति ध्येयम् । **कार्यपरिमाणत्वादिति** । गगनादिपरिमाणे व्यभिचारनिरासाय कार्यपदं कार्यत्वमात्रं च त्र्यणुकादिनिष्ठरूपादौ व्यभिचरितमिति परिमाणत्वग्रहणम् । **द्रव्येति** । एतच्च गगनादिनिष्ठ-परिमाणे व्यभिचारनिरासाय द्रव्यकारणपरिमाणत्वादित्येवोक्ते घटादिनिमित्तकारणकालादिपरिमाणे व्यभिचारः तन्निरासाय समवायीत्युक्तम् । द्रव्यसमवायिकारणनिष्ठत्वादित्येवोक्ते परमाण्वादिरूपादौ व्यभिचारः तन्निरासाय परिमाणत्वग्रहणम् । **कार्येति** । एतच्चाकाशादौ व्यभिचारनिरासाय कार्यत्वमात्रं च द्व्यणुकादिनिष्ठरूपादौ व्यभिचरितमिति तन्निरासाय द्रव्यत्वग्रहणम् । **द्रव्यसमवायिकारणत्वादिति** । गगनादौ व्यभिचारनिरासाय द्रव्यपदं द्रव्यकारणत्वादित्येवोक्ते घटादिनिमित्तकारणकालादौ व्यभिचारः तन्निरासाय समवायीत्युक्तम् । द्रव्यसमवायित्वादित्येवोक्तेस्त्वसमवायिकारणद्रव्यानारम्भके स्वावयवसमवायिन्यन्त्यावयविनि व्यभिचारः तन्निरासाय कारणपदम् । **न चेति** । द्व्यणुकपरमाणुपरिमाणं परिमाणारम्भकमित्यादि प्रतिज्ञया परमाणुष्वणुकपरिमाणयोः परिमाणारम्भकत्वमात्रसिद्धावपि विवक्षितस्य द्व्यणुकत्र्यणुकपरिमाणारम्भकत्व-स्यासिद्धिरिति । न च उक्तप्रतिज्ञायाः प्रकारान्तरेण पर्यवसानानुपपत्त्या परमाणुद्व्यणुकपरिमाणयोः द्व्यणुक-त्र्यणुकपरिमाणारम्भकत्वमादायैव पर्यवसानेन विवक्षितार्थसिद्धेः सत्त्वादित्यर्थः । **तस्यापीति** । प्रसिद्धित्वा-वयवसंयोगरूपप्रचयजन्यत्वेनाभिमततूलपिण्डादिपरिमाणस्यापि स्वाश्रयसमवायिकारणपरिमाणजन्यत्वाङ्गीकारेण पक्षतुल्यत्वात् न हि पक्षे पक्षसमवायव्यभिचार इति भावः । **न चैवमिति** । प्रचयजन्यत्वेनाभिमतपरिमाण-स्यापि परिमाणजन्यत्वमस्तीत्यङ्गीकृत्य तस्य पक्षसमत्वोक्तो पक्षीकृतत्र्यणुकादिपरिमाणस्य परिमाणजन्यत्वेन सिसाधयिषितस्य प्रचयजन्यत्वसत्त्वाद्बाध इति । न च त्र्यणुकद्व्यणुकपरिमाणं स्वाश्रयसमवायिकारणपरि-माणजमित्यादिना त्र्यणुकादिपरिमाणे परिमाणमात्रजन्यत्वस्यासाधिततया प्रचयकारणकताया अनिवारणेनोक्त-साध्यस्य प्रचयजन्यत्वेऽप्युपपत्त्या बाधानवकाशादिति भावः । यद्वा प्रचयजन्यत्वेनाभिमतपरिमाणस्य परिमाणजन्यत्वाङ्गीकारे तत्र प्रचयकारणत्वग्राहकं प्रमाणविरोध इति । न च तस्य परिमाणजन्यत्वं वदता मया प्रचयकारणकताया अनिवारितत्वेन तद्बाहकप्रमाणविरोधानवकाशादित्यर्थः । **तत्समवायिकारणेति** । द्व्यणुकपरिमाणं त्र्यणुकपरिमाणजनकमित्यत्र त्र्यणुकसमवायिकारणपरिमाणत्वाभावस्य परमाणुपरिमाणं द्व्यणुक-परिमाणाजनकमित्यत्र च द्व्यणुकसमवायिकारणपरिमाणत्वाभावस्योपाधित्वादित्यर्थः । **द्रव्यसमवायिकारण-परिमाणत्वाभावस्येति** । गगनादिपरिमाणे साध्यव्याप्तिनिरासाय द्रव्यपदं परिमाणानारम्भके घटादिरूप-द्रव्यनिमित्तकारणकालपरिमाणे तन्निरासाय समवायिपदं परिमाणानारम्भके स्वावयवरूपद्रव्यसमवाय्यन्त्या-वयविपरिमाणे साध्याव्याप्तिनिरासाय द्रव्यपदं परिमाणानारम्भके घटादिरूपद्रव्यनिमित्तकारणकालपरिमाणे साध्याव्याप्तिनिरासाय कारणपदं परमाण्वादिरूपादौ तन्निरासाय परिमाणत्वग्रहणम् ।

श्रीनिधि०— त्र्यणुकद्व्यणुकपरिमाणमिति । अत्र बाधपरिहारार्थमुद्देश्यसिद्ध्यर्थं च स्वाश्रय-समवायिकारणेति परिमाणविशेषणम् । परममहत्परिमाणे व्यभिचारवारणाय कार्येत्युक्तम् । **परिमाणारम्भक-**

मिति । अत्रापि बाधपरिहारोद्देश्यसिद्ध्यर्थं परिमाणपदम् । द्रव्यसमवायिकारणपरिमाणत्वादिति । गगनपरिमाणे नैकान्त्यपरिहारार्थं द्रव्यपदम् । असिद्धिपरिहाराय परिमाणपदम् । यद्यपि कारणत्वमात्रमलं व्यभिचाराभावात् तथापि समवायपदं स्वरूपकथनम् । द्रव्यसमवायिकारणस्य परिमाणत्वादित्यर्थः । **परिमाणारभ्यपरिमाणवतीति** । स्वसमवायिकारणपरिमाणारभ्यपरिमाणवतीत्यर्थः । अन्यथा बाधापत्तेः । **कार्यद्रव्यत्वादिति** । गगनादौ व्यभिचारवारणाय **कार्येति** । रूपादौ व्यभिचारवारणाय द्रव्यपदम् । **परिमाणासमवायिकारणपरिमाणवन्ताविति** । अत्र सिद्धसाधनबाधपरिहारार्थं असमवायिकारणपरिणामपदम् । **द्रव्यसमवायिकारणत्वादिति** । केवलविशेषणस्य केवलविशेष्यस्य चान्त्यावयविनि विभुपदार्थेषु च व्यभिचाराद् विशिष्टोपादानम् । **न च विवक्षितार्थासिद्धिरिति** । आद्यादि प्रयोगेषु अणुत्वं ह्रस्वत्वं परिमाणारम्भकमित्येवमुद्देश्यप्रतीतेरसिद्धेरिति भावः । **अन्यथानुपपत्त्येति** । एवं च केवलानुमानं तमुद्देश्य प्रतीत्यसिद्धावपि अर्थापत्तिसहकृतेन सिद्ध्यति । अर्थापत्तिस्तु स्पष्टा द्रष्टव्या । उपलक्षणमिदं आद्यानुमानेनेत्यपि ग्राह्यम् । **प्रचयेनेति** । अवयवसंयोगबाहुल्येनेत्यर्थः । **बाध इति** । प्रचयकारणतायाः प्रत्यक्षसिद्धत्वेन तत्परित्यज्येतरकारणताकल्पने बाध इत्यर्थः । **क्लृप्तशक्तित्वादिति** । द्वयोरप्यनन्यथासिद्धपूर्ववर्तितानिश्चयादित्यर्थः ।

शे०वा०— 'यथा तथैव ह्रस्वत्वादि'त्यादेरेव प्रयोगप्रकारत्वासम्भवात् तत्सूचकत्वाभिप्रायेऽपि सूचितप्रयोगस्यैकत्वप्रतीतेस्तदनेकत्वलाभाय तत्तात्पर्यमाह **एतदुक्तं भवतीति** । तत्र प्रथमतः कार्यपक्षकं प्रयोगमाह **त्र्यणुकद्व्यणुकपरिमाणमिति** । अत्र त्र्यणुकपरिमाणपक्षकमेकं द्व्यणुकपरिमाणपक्षकं चापरमित्यनुमानद्वयमभिमतम् । कारणपक्षकं प्रयोगमाह **द्व्यणुकपरमाणुपरिमाणमिति** । अत्रापि द्व्यणुकपरिमाणपक्षकमेकं परमाणुपरिमाणपक्षकं चान्यदित्यनुमानद्वयमभिमतम् । कार्याश्रयपक्षकं प्रयोगमाह **त्र्यणुकद्व्यणुके इति** । अत्रापि त्र्यणुकपक्षकमेकं (परमाणुपरिमाण)द्व्यणुकपक्षकं चान्यदित्यनुमानद्वयमभिमतम् । कारणाश्रयपक्षकमपि प्रयोगमाह **द्व्यणुकपरमाणू इति** । अत्रापि द्व्यणुकपक्षकमेकं परमाणुपक्षकं चान्यदित्यनुमानद्वयमभिमतम् । अत्र त्र्यणुकद्व्यणुकपरिमाणद्वयस्य द्व्यणुकपरमाणुपरिमाणद्वयस्य त्र्यणुकद्व्यणुकयोर्द्व्यणुकपरमाण्वोश्चैकीकृत्य, पक्षतया निर्देशस्त्वन्यतरपक्षप्रयोगेऽन्यतरस्य पक्षतुल्यत्वोपदर्शनेन तत्र व्यभिचारनिरासार्थ इति ध्येयम् । सम्मतं चैतद् ग्रन्थकारस्य, उत्तरत्र द्व्यणुकपरिमाणं त्र्यणुकपरिमाणाजनकं परमाणुपरिमाणं च द्व्यणुकपरिमाणाजनकं परिमाणत्वाद् घटपरिमाणवदिति तत्तत्परिमाणपक्षकप्रतिपक्षमुद्भाव्य तन्निरासात् । अन्यथा द्व्यणुकपरमाणुपरिमाणे इत्युभयपक्षीकारेणैव तदुद्भावनप्रसङ्गादिति द्रष्टव्यम् । इतीत्यस्यैतच्छब्देन सम्बन्धः । **न च विवक्षितार्थेति** । त्र्यणुकद्व्यणुकपरिमाणं स्वाश्रयसमवायिकारणपरिमाणजमिति प्रथमानुमानस्य त्र्यणुकादिपरिमाणस्य द्व्यणुकादिपरिमाणजन्यत्वसाधकतया प्रकृतोपयोगेऽपि, द्व्यणुकपरमाणुपरिमाणं परिमाणारम्भकमिति द्वितीये, द्व्यणुकपरमाणुपरिमाणयोः परिमाणारम्भकत्वमात्रसिद्धावपि त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणत्वस्यासिद्ध्या, त्र्यणुकद्व्यणुके परिमाणारभ्यपरिमाणवतीति तृतीये त्र्यणुकद्व्यणुकयोर्यत्किञ्चित्परिमाणारब्धपरिमाणवत्त्वमात्रसिद्धावपि तयोर्द्व्यणुकपरमाणुपरिमाणारभ्यत्वस्यासिद्ध्या,

द्व्यणुकपरमाणू असमवायिकारणपरिमाणवन्ताविति चतुर्थे द्व्यणुकपरमाणुपरिमाणस्य परिमाणान्तरासमवायिकारणत्वसिद्धावपि त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणत्वस्यासिद्ध्या विवक्षितार्थासिद्धिरिति न च वाच्यमित्यर्थः । **अन्यथाऽनुपपत्तेरिति** । द्वितीयचतुर्थानुमानयोर्द्व्यणुकपरमाणुपरिमाणयोरसमवायिकारणत्वस्य सिद्धिः अन्यथा तत्पर्यवसानानुपपत्तेरित्र्यणुकपरिमाणासमवायिकारणतामादायैव पर्यवस्यति । तृतीयानुमानेऽपि त्र्यणुकद्व्यणुकपरिमाणयोः परिमाणारभ्यत्वसिद्धिरन्यथा तत्पर्यवसानानुपपत्तेर्द्व्यणुकपरिमाणारभ्यत्वमादायैव पर्यवस्यतीत्यर्थः । **न च यत्रेति** । तूलपिण्डादावित्यर्थः । प्रचयो नाम प्रशिथिलावयवसंयोगः । तथा चाद्यस्य हेतोस्तूलपिण्डपरिमाणे द्वितीयस्य तूलपिण्डावयवपरिमाणे तृतीयस्य तूलपिण्डे चतुर्थस्य तूलपिण्डावयवे व्यभिचार इति च (न वाच्यमि)नेत्यर्थः । **तस्यापीति** । उक्तस्य तत्तदनुमानव्यभिचारोदाहरणस्य तत्तदनुमानपक्षतुल्यत्वादित्यर्थः । लाघवतर्कसहकृतप्रचयकारणताग्राहकप्रमाणेन प्रचयमात्रकारणताग्राहिणा परिमाणजन्यत्वाभावबोधनात् तत्साधने बाध इत्याशयेन गूढाभिसन्धिः शङ्कते **न चैवमिति** । जन्यपरिमाणत्वावच्छिन्ने कारणपरिमाणजन्यत्वस्य व्याप्तिबलेनावधारणात् परिमाणोत्कर्षस्य प्रचयाभावेऽसम्भवेन प्रचयस्यापि तत्कारणत्वावधारणादुभयोरपि कारणत्वस्य प्रामाणिकतया तद्बाधितत्वात् लाघवतर्कानुत्थानेन तत्सहकारासिद्धेः प्रचयकारणताग्राहकस्य तत्कारणतामात्रग्राहकतया तन्मात्रकारणत्वाग्राहकत्वादबाध इत्याशयेन गूढाभिसन्धिरेवोत्तरमाह **प्रचयकारणताया इति** । पूर्ववादी स्वाशयमुद्घाटयति **न चेति** । सिद्धान्त्यपि तमुद्घाटयति **द्व(उभ)योरपीति** । **तत्समवायिकारणेति** । यद्यपि प्रतिपक्षे नोपाधिर्दोषः । उपाधेः प्रतिपक्षोन्नायकतया दूषणत्वात् प्रतिपक्षस्य च पूर्वमेव सिद्धत्वात् । अन्यथा तदुद्भावनवैयर्थ्यप्रसङ्गात् । तथापि स्वपक्षसाधनार्थमेकं परसाधनप्रतिरोधार्थमपरमिति सार्थक्यादन्यायो ह्येकेन बहूनां प्रतिरोधः । उक्तं च 'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावत' इति । सिद्धं चैतल्लोकशास्त्रयोः । उक्तं हि 'प्रमाणतोऽप्रतिपत्ताविति न्यायभाष्यव्याख्यानावसे न्यायवार्तिकेऽपि 'प्रमाणेन प्रमाणाभ्यां प्रमाणैरिति सम्प्लवोऽवगम्यत' इति । न्यायवार्तिकटीकायां च 'दार्ढ्यार्थकपरस्परसंवादरूपसम्प्लवावसर' इतीत्यवधेयम् । यद्वाऽङ्गीकारवादोऽयम्, अत एवात्र अपरितोषाद्दोषान्तरमाह **त्र्यणुकपरिमाणमित्यादिना** । **नित्यपरिमाणत्वादिति** । त्र्यणुकादिपरिमाणे व्यभिचारनिरासार्थं पूर्वभागः । ननु परिमाणत्वादिति व्यर्थम् । नित्यत्वमात्रस्यैवाव्यभिचारादिति चेन्न । कालादौ व्यभिचारनिरासार्थत्वात् । न च परिमाणानारम्भकत्वं परिमाणासमवायिकारणत्वाभावः । तथा च कालादेरप्यसमवायिकारणत्वाभावेन साध्यसत्त्वादेव न तत्र व्यभिचार इति वाच्यम् । परिमाणकारणत्वाभावमात्रस्यैव साध्यत्वेन तत्सम्भवात् । न चैवं प्रतिपक्षत्वानुपपत्तिः । सामान्याभावस्य विशेषविरोधित्वेन तदुपपत्तेः । यद्वा पूर्वानुमानेऽपि कारणतामात्रस्यैव साध्यत्वेन तदुपपत्तिः । न चैवं विवक्षिता समवायिकारणत्वासिद्धिः । परिमाणकारणत्वसिद्धौ तस्यान्यादृशस्यासम्भवेन परिशेषेणासमवायिकारणत्वस्यैव सिद्धिसम्भवादित्याशय इत्याहुः ।

वस्तुतस्तु परिमाणानारम्भकत्वं परिमाणासमवायिकारणत्वाभाव एव विवक्षितः । न चैवं कालादावप्युक्तसाध्यसत्त्वेन तत्राव्यभिचाराद्विशेष्यवैयर्थ्यमिति वाच्यम् । न ह्यत्र वैयर्थ्यप्रसक्तिरस्ति । यथोक्तविशेषण-

विशेष्यभावे तदप्रसरात् । अन्यथा धूमप्रागभावादित्यादावपि धूममात्रस्यैव हेतुत्वोपपत्तेः प्रागभावादित्यस्यानर्थक्यप्रसङ्गादिति ध्येयम् । अङ्गीकृत्य प्रतिपक्षेऽप्युपाधिसद्भावं तमाह **द्रव्येति** । तदनङ्गीकारेणापि दोषान्तरमाह **आप्येति** । रूपानारम्भकत्वे चात्र रूपासमवायिकारणत्वाभावः, न तु रूपकारणत्वाभावः इति न कालादौ व्यभिचार इति ध्येयम् । **द्रव्यानारम्भक इति** । द्रव्यसमवायिकारणत्वाभाव एव साध्य इति कालादौ न व्यभिचारो नित्यत्वस्येति भावः ।

वा०र०— प्रधानप्रमेयस्य एकत्वेऽपि मुखतः साध्यप्रमेयभेदात् प्रयोगानेकत्वं युक्तमिति दर्शयन् एकैकैरेव प्रयोगेणैव पूर्तेः प्रयोगान्तरवैय्यर्थ्यमिति शङ्का च निराकुर्वन् तान् प्रयोगान् भिन्नविषयतया विवेकेनाह **तत्र प्रथमतः कार्यपक्षकमित्यादिना** । **तदुद्भावनप्रसङ्गादितीति** । उपलक्षणं चैतत् । न चानणुत्वमुपाधिः इत्युत्तरमूलेऽनणुत्वरूपोपाधिराशङ्कते । न चायं उपाधिविशिष्टप्रयोगपक्षे युज्यते । त्र्यणुकपरिमाणांशे च वक्ष्यमाणरीत्या प्राप्तस्याणुत्वभिन्नत्वस्याणुद्रव्यभिन्नत्वस्य च यथाक्रमं सत्त्वेनोपाधेः पक्षात् व्यावृत्त्ययोगेनोपाधित्वाभावापत्त्या तदुपपत्तये चांशे उपाधित्वे कल्पनीये प्रयोगभेद एव पर्यवसानात् । तद्भेद एवाभिप्रेतः । अज्ञानेन शङ्कायां वा परिहारावसरे ह्रस्वत्वात् अव्यावृत्तिप्रतिपादनवत् त्र्यणुकतत्परिमाणाभ्यां व्यावृत्तेरपि वक्तव्यत्वापातादिति द्रष्टव्यम् । यत्तु मूलोक्तप्रयोगचतुष्टयं यथाश्रुतमेव गृहीत्वा तत्रोपाधिकथनपरतया न चेति ग्रन्थप्रवृत्तिमुपवर्ण्य ह्रस्वत्वादेरव्यावृत्तेरित्यादिपदघटितपाठं प्रकल्प्यते नादिपदेन महत्त्वादिसङ्ग्रहवर्णनम् । तद्वाक्यार्थविनोदे गुरुचरणैरेव निराकृतम् । किञ्चादिपदेन त्र्यणुकतत्तत्परिमाणोरसङ्ग्रह इति प्रतिपादयतोपाध्युद्भावनावसरे पक्षैकदेशात् अवृत्तिमज्ञात्वा तदुपाधिशङ्कनं इति सूचितं भवति । उपाधैरुत्र्यणुकतत्परिमाणाभ्यां अव्यावृत्तिप्रतिपादनेन दूषणे सति तदनुसारेण प्राक् तदज्ञानेनोपाधिशङ्कनस्य मूलाभिप्रेतत्वमिति वर्णनलाभात् । न च तत् युज्यते । एकैकपरिमाणपक्षकप्रतिपक्षोक्त्या मूले प्रयोगभेदे सूचिते सति त्र्यणुकतत्परिमाणपक्षकप्रयोगपरित्यागेन एवोपाधिशङ्कोपपत्तौ वृथाऽज्ञानकल्पनायोगात् । तदेवं व्याकुर्वतां टीकाकारं मन्यानां विमलं पाण्डित्यम् । मूलकृतैव प्रयोगभेदे सूचितेऽपि स्वयं तदनाश्रयणेन यथाश्रुतप्रयोगस्वीकरणम् । तत्र वक्ष्यमाण एकैकपक्षकप्रतिपक्षोद्भावनं यादृच्छिकमिति मूलेऽस्वारस्यस्यास्वीकारः । उपाध्युद्भावनस्य प्रयोगचतुष्टये सम्भवाभावेन त्र्यणुकतत्परिमाणांशे अज्ञानमूलकत्वमिति अस्वरस्वीकारः । स्वकृताज्ञानमूलकत्वकल्पनालाभाय उपाधिदूषणावसरेऽवश्यवक्तव्यत्र्यणुकतत्परिमाणाभ्यां अव्यावृत्तेः मूले प्रतिभासोपपत्तये ह्रस्वत्वादेरिति पाठं कल्पयित्वा आदिपदेन त्र्यणुकपरिमाणसङ्ग्रहव्याख्यानम् । त्र्यणुकस्यापि अणुद्रव्यभिन्नत्वेनोपाधेस्तद्वृत्तैकदेशात् अव्यावृत्त्या तदंशेऽपि उपाध्युद्भावनावरे ज्ञानलाभायादिपदेन त्र्यणुकसङ्ग्रहस्यापि अवश्यव्याख्येयत्वात् तत्सङ्ग्रहस्वीकरणम् । तथा सति च मूले पक्षीकृताष्टसु मध्ये त्र्यणुकतत्परिमाणांशयोः मुखत एव प्रतिपादनीयायाः उपाध्या व्यावृत्तेः तथा प्रतिपादनाभावरूपास्वरसस्य मूले स्वीकारः । एकदेशिमतानुसारेण प्राप्तह्रस्वत्वस्य च मुखतः उपादान इति अस्वरसस्यापि मूले स्वीकारः । उक्तांशाभ्यां उपाधेः अव्यावृत्तिप्रतिपादनेनानन्तरमेव ह्रस्वत्वोपस्थितिः त्वयापि स्वीकृतेति प्रथमतो ह्रस्वत्वात्

अव्यावृत्तिकथनं उचितं इति अस्वरसस्वीकारः । अत एव परिमाणावान्तरेति पूर्वमूलव्याख्यानावसरेऽस्मन्मते त्र्यणुकचतुरणुकादावणुत्वसत्त्वेन तत्परिमाणे तत्र च साध्याव्यापकतेति भावात् ह्रस्वत्वपरित्यागः कृतः । इतरदूषणानि तु गुरुचरणोक्तरीत्या ज्ञेयानीत्येवमनेकास्वरसहानेन व्याख्यानादित्यलम् ।

प्रकृतोपयोगेऽपीति । अनेन विवक्षितार्थसिद्धिशङ्का द्वितीयाद्यनुमानत्रय एव, न तु प्रमानुमानेऽप्यभिप्रेतेतीति । तत्र तच्छङ्कानुदयशङ्का न कर्तव्येति सूचितं भवति । अनुमानत्रयेऽपि एकप्रकारेणान्यथानुपपत्तेः वक्तुमशक्यत्वात् तामुपपादयति **द्वितीयचतुर्थेति** । यद्यपि द्वितीयानुमानेव चतुर्थानुमाने द्व्यणुकपरिमाणुपरिमाणयोः असमवायिकारणत्वं प्रधानतया न प्राप्नोति तथापि द्व्यणुकपरमाण्वोः परिमाणसमवायिकारणपरिमाणवत्वशरीरान्तर्गततया द्व्यणुकपरमाणुपरिमाणयोः असमवायिकारणत्वं अर्थतो लब्धमेव इत्याशयेन द्वितीयचतुर्थानुमानयोः प्रमेयैक्यमाश्रित्य सहैवान्यथानुपपत्तिप्रदर्शनम् । तृतीये तु अर्थतोऽपि द्व्यणुकपरमाणुपरिमाणयोः असमवायिकारणतायाः अप्राप्तेः तस्य पृथक्करणं इति द्रष्टव्यम् । **आद्यस्य हेतोरिति** । कार्यपरिमाणत्वहेतोः इत्यर्थः । **द्वितीयस्य** द्रव्यसमवायिकारणपरिमाणत्वस्य । **तृतीयस्य** कार्यद्रव्यत्वस्य । **चतुर्थस्य** द्रव्यसमवायिकारणत्वस्येत्यर्थः । तूलपिण्डपरिमाणादौ कार्यपरिमाणत्वादिहेतुमद्भावेऽपि प्रचयजन्यतया स्वाश्रयसमवायिकारणपरिमाणजन्यत्वादेः साध्यस्याभावादिति भावः । अकार्यत्वं उपाधिरित्युक्त इति तत्त्वनिर्णयव्याख्यानावसरे यद्यपि प्रतिपक्षेनोपाधिरित्येतट्टीका तदनुसारेणाह **यद्यपि प्रतिपक्ष इति** । परिहरति **तथापीति** । तत्त्वनिर्णयटीकानुसारेणाह **यद्वाङ्गीकारवादोऽयमिति** । प्रतिरूपस्य अनुव्याख्यानमूलानुसारेण उभयोक्तरूपयोगप्रकारो वक्ष्यमाणटीकोक्तरीत्या तत्त्वनिर्णयटीकोक्तरीत्या च ज्ञेयः । लेख्यं तत् । नित्यपरिमाणत्वात् इत्ययं हेतुः ईश्वरस्यानुमानिकत्वभङ्गे उपन्यस्ततर्काण्डवे । तट्टीका च लेख्या ।

ननु परिमाणत्वादित्येतत् व्यर्थमित्यारभ्य प्रसङ्गादिति ध्येयमित्यन्तं शोध्यमस्ति । **अङ्गीकृत्येति** । उक्तरीत्या प्रतिपक्षेऽपि उपाधेः व्यर्थत्वादिति भावः । प्राक् एकैकप्रयोगे प्रयोगद्वयं अभिप्रेतं इत्युक्तम् । तत्र चोपष्टम्भकतया प्रत्येकमेव द्व्यणुकपरिमाणादिपक्षकप्रतिपक्षोद्भावनं मूलकारीयं उक्तम् । न केवलं एतावदेव किन्तु अनणुत्वमुपाधिशङ्कनमपि उपष्टम्भकमिति सूचयन् तस्योपाधेः प्रथमप्रयोगे विवक्षितप्रयोगमध्ये त्र्यणुकपरिमाणपक्षकप्रयोगे । तृतीयप्रयोगेऽपि विवक्षितप्रयोगद्वयमध्ये त्र्यणुकपक्षकप्रयोगेषु सम्भवो नास्ति ।

स०व्र०— विवक्षितार्थेति । तथा च द्व्यणुकपरिमाणस्य परमाणुपरिमाणजन्यत्वासिद्ध्या अर्थान्तरत्वमिति भावः । **अन्यथाऽनुपपत्त्येति** । परमाणौ परिमाणान्तराभावात् तत्परिमाणजन्यत्वे सिद्धे पारिमाण्डल्यजन्यत्वस्यैव सिद्धत्वेन नार्थान्तरत्वमिति भावः । **नित्यपरिमाणत्वादिति** । यथोक्तविशेषणविशेष्यभावे दोषाभावान्न परिमाणत्वादित्यस्य वैयर्थ्यमिति भावः ।

विट्ठल०— न च विवक्षितार्थासिद्धिरिति । प्रथमानुमानातिरिक्तानुमानेष्विति शेषः । तत्र स्वाश्रयसमवायिकारणपरिमाणजत्वसाधने स्वाश्रयसमवायिकारणभूतद्व्यणुकपरमाणुपरिमाणस्य ह्रस्वपरिमण्डल-संज्ञिकत्व-तज्जन्यत्वरूपविवक्षितार्थसिद्धेः । द्वितीयादौ तदसिद्धेः । द्वितीये चतुर्थे च प्रयोगे द्व्यणुक-परमाणुपरिमाणयोः परिमाणासमवायिकारणत्वमात्रसिद्धावपि त्र्यणुकद्व्यणुकपरिमाणकारणत्वस्यासिद्धेः । तृतीयेऽपि त्र्यणुकादिपरिमाणस्य परिमाणारभ्यत्वमात्रसिद्धावपि द्व्यणुकादिपरिमाणारभ्यत्वस्यासिद्धेः न विव-क्षितार्थसिद्धेरिति भावः । **अन्यथानुपपत्त्येति** । द्वितीयचतुर्थानुमानयोः द्व्यणुकपरमाणुपरिमाणयोः परिमाणा-समवायिकारणत्वं सिद्धयत् त्र्यणुकद्व्यणुकपरिमाणसमवायिकारणत्वेनैव पर्यवस्यति तदन्यत्र समवायिकारण-प्रत्यासन्नत्वानुपपत्तेः । एवं तृतीयेऽपि प्रयोगे त्र्यणुकद्व्यणुकपरिमाणयोः परिमाणासमवायिकारणकत्वं द्व्यणुकपरमाणुपरिमाणजन्यत्वेन विनानुपपन्नम् । तदन्यत्र लक्षणासम्भवादिति भावः । **न च यत्रेति** । तूलपिण्डादौ प्रशिथिलावयवसंयोगरूपप्रचयेनेत्यर्थः । **तत्र** तूलपिण्डपरिमाणे तदवयवपरिमाणे तूलपिण्डादिद्रव्ये तदवयवे च यथायोगमुक्तहेतूनां व्यभिचारो ज्ञेयः । **तस्यापीति** । तत्तदनुमानं व्यभिचारोदाहरणस्यापि । पक्षतुल्यत्वादित्यर्थः । **न चैवमिति** । तत्रापि परिमाणत्वेऽङ्गीकृते सति प्रचयकारणताग्राहकप्रत्यक्षबाध इत्यर्थः । **द्वयोरपीति** । सर्वत्र कार्यपरिमाणे कारणपरिमाणजन्यत्वमन्यत्र व्यभिचाराभावसहकृतभूयोदर्शनाव-धारिते व्याप्तिबलेन सिद्धं तूलपिण्डादौ प्रचयेनापि दृश्यते । अतो द्वयोरप्यत्र कारणत्वं क्लृप्तमित्येवाङ्गी-कार्यम् । लोके कारणद्वयोभयजन्यानां बहुलमुपलम्भादिति भावः । **तत्समवायिकारणेति** । आद्यानुमाने त्र्यणुकसमवायिकारणगतपरिमाणत्वाभावस्य द्वितीयानुमाने द्व्यणुकसमवायिकारणगतपरिमाणत्वाभावस्य च उपाधित्वमित्यर्थः ।

चषक— न च विवक्षितार्थासिद्धिरिति । द्वितीयाद्यनुमानेष्विति पूरणीयम् । त्र्यणुक-द्व्यणुकपरिमाणत्वावच्छिन्नोद्देशिका द्व्यणुकपरमाणुपरिमाणजन्यत्वरूपसमीहितसाध्यविधेयिकानुमितिः यथा आद्यानुमानादुदेति न तथा द्व्यणुकपरमाणुपरिमाणादिधर्मिकसमीहितपरिमाणारम्भकत्वविधेयिकानुमितिः द्वितीया-दित्रिकादुदेतीति भावः । **अन्यथानुपपत्त्येति** । त्र्यणुकद्व्यणुकपरिमाणासमवायिकारणतामादायैव द्वितीय-तुरीययोस्तृतीये च द्व्यणुकपरमाणुपरिमाणारभ्यत्वमादायैव तत्तत्पक्षेषु साध्यं पर्यवस्यति । अन्यथा तत्पर्यवसानानुपपत्तेरित्यर्थः । **न च यत्रेति** । प्रशिथिलावयवसंयोगः प्रचयः । तूलपिण्डपरिमाणे आद्यहेतोः, द्वितीयस्य तदवयवपरिमाणे, तृतीयस्य तूलपिण्डे, तुरीयस्य तदवयवे व्यभिचार इत्यर्थः । **तस्यापि** तत्तद्धेतूनां व्यभिचारनिरूपकाधिकरणस्यापि । **तुल्यत्वादिति** । न हि पक्षे पक्षतुल्ये वा व्यभिचार इत्यभियुक्तोक्तेरिति भावः । **द्वयोरपि** परिमाणप्रचययोरपि । **क्लृप्तशक्तित्वादिति** । व्याप्तिबलेन परिमाण-स्यान्वयव्यतिरेकाभ्यां परिमाणोत्कर्षे प्रचयस्य च सामर्थ्यस्य क्लृप्तत्वादित्यर्थः ।

१९ सु०— एतेन 'परमाणुद्व्यणुकपरिमाणे परिमाणानारम्भके अणुत्वान्मनः-परिमाणवदि'त्यपि परास्तम् । न चानणुत्वमुपाधिः; वक्ष्यमाणन्यायेन परिमाणावान्तर-जातेरपाकरणात्, पक्षीकृतात् ह्रस्वत्वात् अव्यावृत्तेश्च ।

परि०— एतेनेति । आभाससाम्यादिकथनेनेत्यर्थः । प्रागुक्तप्रयोगेषु उपाधिमप्याशङ्क्य निराह **न चानणुत्वमिति** । अणुपरिमाणान्यत्वं अणुद्रव्यभिन्नत्वं चेत्यर्थः । तेन परिमाण-पक्षकद्रव्यपक्षकप्रयोगेषु चतुर्ष्वप्युपाधिशङ्केति ध्येयम् । **वक्ष्यमाणेति** । 'महत्त्वं च परमाणा-वणावपि । कथं त्र्यणुकपूर्वेषु नाणुत्वमपी'त्यादौ वक्ष्यमाणेत्यर्थः । तथा च त्र्यणुकचतुरणु-कादावप्यणुपरिमाणस्य सत्त्वेन साध्याव्यापकत्वमिति भावः । साधनव्यापकत्वं चाह **पक्षी-कृतादिति** ।

यादु०— एतेनेति । परमाणवो द्रव्यानारम्भका अणुत्वान्मनोवदित्याभासतुल्यत्वेनेत्यर्थः । **न च अनणुत्वमिति** । प्रथमद्वितीयहेत्वोः न अणुत्वमनणुत्वम् इत्यणुत्वभिन्नत्वरूपमनणुत्वं, तृतीयचतुर्थयोस्तु नाण्वनणु तस्य भावोऽनणुत्वमित्यणुद्रव्यभिन्नत्वरूपं, तदुपाधिनेत्यर्थः । **परिमाणावान्तरेति** । तथा चास्म-न्मते त्र्यणुकचतुरणुकादावप्यणुत्वसत्त्वेन तत्परिमाणे, तत्र च साध्याव्यापकतेति भावः । **ह्रस्वत्वादेरिति** । द्व्यणुकनिष्ठह्रस्वत्वपरिमाणस्याणुत्वभिन्नत्वादुक्तोपाधिः पक्षैकदेशवृत्तिरित्यर्थः । आदिपदेन त्वन्मते त्र्यणुक-गतस्य महत्त्वस्यापि पक्षीकृतस्याणुत्वभिन्नत्वादुक्तोपाधेस्तस्मादव्यावृत्तिः । त्र्यणुकस्यापि पक्षीकृतस्य महत्त्वेनानणुत्वादुक्तोपाधेस्तस्मादव्यावृत्तिश्च ग्राह्या । तथा च सर्वत्रोपाधिव्यतिरेकेण सत्प्रतिपक्षकरणे भागा-सिद्धिरिति भावः ।

वं०प०— परिमाणावान्तरजातेरपाकरणादिति । 'महत्त्वं चैव दीर्घत्वं', 'न महत्वं च', 'अणुत्वं च महत्वं चे'त्यादिना ग्रन्थेनेत्यर्थः । अयं भावः । पाचकत्वपाठकत्वादिवत्परस्परपरिहारेण विद्यमानयोरेकत्र समावेशरूपसाङ्कर्यरूपबाधकशून्या हि जातिः । यदि ह्यणुत्वादिकं परिमाणावान्तरजातिः परमाणुद्व्यणुक-त्र्यणुकादिद्रव्यमात्रवृत्तिरसङ्कीर्णेति स्यात् तर्ह्येवास्माकं विरोधि स्यात्, न चैवं, किन्नाम, परिमाणं सर्वत्रैक-जातीयमेव । अणुत्ववत्येव पदार्थेषु स्वापकृष्टवस्त्वपेक्षया महत्त्वस्य दीर्घत्वस्य चाङ्गीकारेणाणुत्वत्वादीनां चतुर्णामप्येकत्र समावेशाङ्गीकारात् । तथा च दृष्टान्ते त्र्यणुकपरिमाणादौ साध्याव्यापकतेति भावः । साधनव्यापकत्वं चाह **पक्षीकृतादिति** । द्व्यणुकपरिमाणादित्यर्थः ।

कं०रा०— एतेनेति । परमाणवो द्रव्यानारम्भकानित्यत्वाद्गगनवदित्याद्याभासतुल्यत्वेनेत्यर्थः । द्व्यणुकपरमाणुपरिमाणं परिमाणारम्भकमित्यत्र त्र्यणुकद्व्यणुकपरिमाणं स्वाश्रयसमवायिकारणपरिमाणजमित्यत्र

नोपाधिमाशङ्क्य निराकरोति **न चेति** । उक्तानुमानेन **अणुत्वमुपाधिरिति** । न च वक्ष्यमाणन्यायेन परिमाणत्वावान्तरजातिरूपस्याणुत्वस्याभावादाक्षेपकाणुत्वस्य च चतुरणुकादिपरिमाणे स्वाश्रयसमवायिकारण-परिमाणजमित्यत्रत्वादिरूपसाध्यवति सत्त्वेनानणुत्वस्य साध्याव्यापकत्वादित्यर्थः । **पक्षीकृतादिति** । पक्षीकृता द्व्यणुकगतह्रस्वत्वादनणुत्वस्याव्यावृत्तत्वेनोपाधिव्यतिरेकेण पक्षे साध्यव्यतिरेकसाधनायोगाच्च नाणुत्वमुपाधि-रिति भावः ।

श्रीनिधि०— एतेनेति । अनन्तरोक्तोपाधिग्रस्तत्वेनेत्यर्थः । **न चानणुत्वमुपाधिरिति** । आद्यानु-मानद्वय इति शेषः । **पक्षीकृतादिति** । आद्यानुमानद्वयेऽपि द्व्यणुकपरिमाणस्यापि पक्षत्वात् उपलक्षणमिदम् । आद्यानुमानेत्यपि ग्राह्यम् ।

शे०वा०— एतेनेति । द्रव्यसमवायिकारणत्वाभावस्यैवोपाधित्वेन परमाणवो न द्रव्यारम्भका अणुत्वान्मनोवदित्याभासतुल्यत्वेन चेत्यर्थः । द्व्यणुकपरिमाणं स्वाश्रयसमवायिकारणपरिमाणजं कार्य-परिमाणत्वादिति । द्व्यणुकपरिमाणं परिमाणारम्भकं द्रव्यसमवायिकारणपरिमाणत्वादिति । परमाणुपरिमाणं परिमाणारम्भकं द्रव्यसमवायिकारणपरिमाणत्वादिति । द्व्यणुकं परिमाणारम्भपरिमाणवत् कार्यद्रव्यत्वादिति । द्व्यणुकं परिमाणासमवायिकारणपरिमाणवत् द्रव्यसमवायिकारणत्वादिति । परमाणुः परिमाणासमवायि-कारणपरिमाणवान् द्रव्यसमवायिकारणत्वादिति षट्सु प्रयोगेषूपाधिमाशङ्क्य निराकरोति **न चेति** । अत्र नाणुत्वमनणुत्वमिति व्युत्पत्त्याऽणुत्वभिन्नत्वम् । न अणु अनणु, तस्य भावोऽनणुत्वम्, अणुद्रव्यभिन्नत्वं चोपाधितयाऽभिप्रेतम् । तत्रोदाहृताद्यप्रयोगत्रयेऽणुत्वभिन्नत्वम्, उत्तरप्रयोगत्रये चाणुद्रव्यभिन्नमित्यनुसन्धेयम् । तथा हि । स्वाश्रयसमवायिकारणपरिमाणजन्यत्वरूपसाध्यवति चतुरणुकपरिमाणेऽणुत्वभिन्नत्वसत्त्वेन साध्य-व्यापकत्वात् कार्यपरिमाणत्वरूपसाधनवति द्व्यणुकपरिमाणे तस्याणुत्वरूपतयाऽणुत्वभिन्नत्वाभावेन साधना-व्यापकत्वात् । द्वितीयतृतीययोरपि परिमाणारम्भकत्वरूपसाध्यवति त्र्यणुकपरिमाणेऽणुत्वभिन्नत्वसद्भावेन साध्यव्यापकत्वात् द्रव्यसमवायिकारणपरिमाणत्वरूपसाधनवतोश्च द्व्यणुकपरमाणुपरिमाणयोरणुत्वरूपतया तयोरणुत्वभिन्नत्वाभावेन साधनाव्यापकत्वाच्च अणुत्वभिन्नत्वस्योपाधित्वम् । चतुर्थेऽपि परिमाणारभ्य-परिमाणवत्वरूपोक्तसाध्यवति चतुरणुकादावणुद्रव्यभिन्नत्वसत्त्वेन साध्यव्यापकत्वात् । कार्यद्रव्यत्वरूपहेतुमति द्व्यणुकेऽणुद्रव्यत्वात् तस्य अणुद्रव्यभिन्नत्वाभावेन साधनाव्यापकत्वात् । पञ्चमषष्ठयोश्च परिमाणा-समवायिकारणपरिमाणत्वरूपसाध्यवति त्र्यणुके महद्द्रव्यत्वात् तस्याणुभिन्नत्वेन साध्यव्यापकत्वात् । द्रव्य-समवायिकारणत्वरूपसाधनवतोश्च द्व्यणुकपरमाण्वोरणुद्रव्यतया तयोस्तद्भिन्नत्वाभावेन साधनाव्यापकत्वाच्च अणुद्रव्यभिन्नत्वस्य उपाधित्वमिति द्रष्टव्यम् । **वक्ष्यमाणन्यायेनेति** । यथा त्र्यणुकादिषु महत्त्वमेकजातीय-मेवोत्कर्षापकर्षवत्परेणाङ्गीकृतं यथा वाऽणुत्वं परमाणुद्व्यणुकयोः एवं परिमाणमवान्तरजातिरहितमेव सर्व-द्रव्येषूत्कर्षापकर्षवद्वर्तते । तथा चैकद्रव्ये वर्तमानं परिमाणं द्रव्यान्तरवर्त्युत्कृष्टपरिमाणापेक्षयाऽणुत्वमित्युच्यते ।

तदेव च द्रव्यान्तरवर्त्यपकृष्टपरिमाणापेक्षया महत्त्वमुच्यत इत्यादिवक्ष्यमाणन्यायेनेत्यर्थः । **परिमाणावान्तरजातेरिति** । परिमाणत्वादिव्याप्याणुत्वत्वादिजातेरित्यर्थः । तथा च मन्मते चतुरणुकत्र्यणुकादिपरिमाणेऽप्यणुत्वरूपतया तस्य तद्भिन्नत्वाभावेन चतुरणुकादेरप्यणुद्रव्यतया तद्भिन्नत्वाभावेन साध्याव्यापकत्वात् । द्व्यणुकपरमाणुपरिमाणयोरप्यणुत्वभिन्नतया द्व्यणुकादेरप्यणुद्रव्यभिन्नतया साधनव्यापकत्वाच्च नानणुत्वमुपाधिरिति भावः । अङ्गीकृत्यापि परिमाणावान्तरजातिभेदमुपाधिं दूषयति **पक्षीकृतादिति** । द्व्यणुकपरिमाणपक्षकप्रयोगद्वयेऽणुत्वह्रस्वत्वरूपपरिमाणद्वयस्य पक्षतयाऽणुत्वभिन्नत्वस्याणुत्वरूपपरिमाणेऽसत्त्वेऽपि ह्रस्वत्वरूपपरिमाणस्याणुत्वभिन्नतया तत्रोपाधिव्यतिरेकाभावात् । परमाणावपि ह्रस्वत्वमस्तीति त्वदेकदेशिमते परमाणुपरिमाणपक्षकतृतीयानुमानेऽपि ह्रस्वत्वरूपतत्परिमाणेऽणुत्वभिन्नत्वरूपोपाधेः सत्त्वेन तत्रोपाधिव्यतिरेकाभावेन साधनव्यापकत्वान्नाणुत्वभिन्नत्वमुपाधिरिति भावः ।

वा०र०— आद्ये अणुत्वाभिन्नत्वस्य द्वितीये अणुद्रव्यभिन्नत्वस्य च पक्षेऽपि सत्त्वेन उपाधित्वानुपपत्तेः अस्तु तत्प्रयोजकद्वयं परित्यज्य इतरषट्प्रयोगेषु एवायमुपाधिरित्याशयेन तत्प्रयोगानुदाहरति **त्र्यणुकपरिमाणमित्यादिना** । **अभिप्रेतमिति** । एकैकस्य तत्प्रयोगत्रयगतत्वेऽपि षट्प्रयोगसाधारणत्वाभावात् इति भावः । अत एवाह **तत्रोदाहृतेत्यादि** । **यथा त्र्यणुकादिष्विति** । त्र्यणुकचतुरणुकादिषु इत्यर्थः । **परमाणुद्व्यणुकयोरिति** । उत्कर्षवत् परेणाङ्गीकृतमिति वर्तते । परिमाणस्याजातित्वेन तदवान्तरजात्ययोगात् व्याचष्टे **परिमाणत्वेति** । **परिमाणेऽपीति** । परिमाणस्यापीत्यर्थः । षष्ठीपाठस्तु स्वरस एव । अत एव चतुरणुकादेरपीत्यादीति द्वितीयस्थलादौ वक्ष्यति । पूर्वप्रयोगत्रये साध्यवति उपाध्यभावप्रतिपादनम् । **अणुत्वरूपतयेति** । उत्तरप्रयोगत्रये तत्प्रतिपादनं **अणुद्रव्यतयेति** । एवं उत्तरत्रापि विवेको बोध्यः । उपाधित्वमितीत्यन्त एव पाठः । क्वचित् इत्यनन्तरं द्रष्टव्यमित्यप्यस्ति । तत्स्पष्टत्वार्थमित्याहुः । **अणुत्वभिन्नतया तत्रेति** । सत्त्वात् इति शेषः । अणुत्वभिन्नत्वस्य इति वर्तते । पूर्वप्रयोग एव ह्रस्वत्वस्य पक्षीकृतत्वमस्ति इति तथैवोपपादयति **द्व्यणुकपरिमाणपक्षकेत्यादिना** ।

स०व्र०— **एतेनेति** । आभासतुल्यत्वेनेत्यर्थः । **वक्ष्यमाणन्यायेनेति** । तथा च पक्षे अनणुत्वसद्भावेन साधनव्यापकत्वात् दृष्टान्ते च अणुत्वसद्भावेन अनणुत्वाभावेन साध्याव्यापकत्वमिति भावः ।

विट्ठल०— **एतेनेति** । परमाणवो द्रव्यानां भेदकाः अणुत्वान्मनोवदित्याभासतुल्यत्वेनेत्यर्थः । प्रागुक्तप्रयोगेषु उपाधिमप्याशङ्क्य निराह **न चानणुत्वमिति** । आद्यद्वितीययोरनणुत्वमणुपरिमाणभिन्नत्वं तृतीयचतुर्थयोरणुपरिमाणवद्द्रव्यभिन्नत्वमित्यर्थः । आद्ययोः परिमाणपक्षकत्वदन्ययोर्द्रव्यपक्षकत्वात् । **वक्ष्यमाणेति** । 'अणुत्वं च महत्त्वं चे'ति 'कथं त्र्यणुकपूर्वेष्वि'ति च वक्ष्यमाणन्यायेन परिमाणावान्तरजातेः साङ्कर्येणापकारणादित्यर्थः । तथा च त्र्यणुकचतुरणुकादावप्यणुत्वस्य सत्त्वेन तत्परिमाणे तत्र च साध्यव्यापकत्वमिति भावः । साधनाव्यापकत्वं चाह **पक्षीकृतादिति** । पक्षीकृते द्व्यणुनिष्ठसत्त्वे अणुत्वाभिन्नरूपोपाधेः सत्त्वादिति

भावः । उपलक्षणमेतत् । तत्रैव प्रथमानुमाने त्र्यणुकस्यापि पक्षीकृतत्वेन तत्रगतान्महत्त्वादनणुत्वोपाधेरव्यावृत्तेरिति च ग्राह्यम् । ह्रस्वत्वादेरिति पाठे आदिपदेन त्र्यणुकगतमहत्त्वग्रहणम् ।

चषक— **एतेन** आभासतुल्यताव्युत्पादनेन । **न चानणुत्वमिति** । अणुपरिमाणान्यत्वमणुपरिमाणोपेतद्रव्यभिन्नत्वं च तन्त्रावृत्त्याद्याश्रयणेनार्थः । तेनैतदुक्तं भवतीत्यादिना प्रदर्शितानुमानचतुष्टयेऽपीयमुपाधिशङ्केति मन्तव्यम् । **वक्ष्यमाणेति** । तथा च साध्याव्यापकतेति भावः ।

॥ इति उक्तार्थाभिप्रायकतया अनुमानप्रयोगप्रदर्शनम् ॥
॥ इति 'पारिमाण्डल्यादेः कारणत्व'साधनपर्याप्तानां
एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दानामर्थकथनं तत्स्पष्टीकरणञ्च ॥

* * *

॥ अथ एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दार्थनिरूपणे उक्तार्थोद्भूतशङ्कानिरासकतया
अनुव्याख्यानगत'सदृश'पदार्थकथनम् ॥

२० सु०— ननु च 'त्र्यणुकादिपरिमाणं चतुरणुकादिपरिमाणं च सजातीयमिति युक्तस्तत्र कार्यकारणभावः, द्व्यणुकत्र्यणुकपरिमाणयोस्तु विजातीयत्वात् कथं तथात्वमि'त्यतो दृष्टान्तदार्ष्टान्तिकयोः सदृशम् इत्युक्तम् । यथा त्र्यणुकादिपरिमाणाच्चतुरणुकादौ सजातीयं परिमाणमुत्पद्यते तथा द्व्यणुकपरमाणुपरिमाणादपि त्र्यणुकादौ सजातीयपरिमाणोत्पादस्यैव सिसाधयिषितत्वान्न दोष इत्यर्थः ।

शे०वा०— ननु कार्यकारणभावापन्नपरिमाणानां सदृशमिति सादृश्यवर्णनमनर्थकमित्याशङ्क्य वैषम्येण दृष्टान्तदार्ष्टान्तिकभावानुपपत्तिशङ्कापरिहारार्थत्वान्न तदिति भावेन तच्छङ्कापरिहारकतया तद्योजयितुं वैषम्यप्रदर्शनेन दृष्टान्तदार्ष्टान्तिकभावानुपपत्तिमाशङ्कते **ननु चेति** । परमाणुगतेन अणुत्वेन द्व्यणुके ह्रस्वत्वस्य, द्व्यणुकगतेन ह्रस्वत्वेन त्र्यणुके महत्त्वस्योत्पत्तिः सिद्धान्त्यभिमतेति भावेनेयं शङ्का । अत एव यथेत्यादिना सिद्धान्त्याशयवर्णनमुपपन्नमिति ध्येयम् । द्व्यणुकत्र्यणुकपरिमाणयोरित्यत्र द्व्यणुकपदं परमाणोरप्युपलक्षणम् । अन्यथा परमाणुद्व्यणुकपरिमाणयोरिव द्व्यणुकत्र्यणुकपरिमाणयोरपि वैजात्येऽपि कार्यकारणभावोपपत्तेः शङ्काया निर्दलत्वप्रसङ्गात् । अत एवाशयवर्णनदशायां द्व्यणुकपरमाणुपरिमाणादपि त्र्यणुकादौ सजातीयपरिमाणोत्पादस्यैवेत्यादिना परमाणोरपि द्व्यणुकसमकक्षतयोपादानमिति मन्तव्यम् ।

वा०२०— सादृश्यवर्णनमिति । तस्मात् एतत्सदृशं इति ज्ञापनसदृशमिति च सादृश्यवर्णनमित्यर्थः । परमाणुद्व्यणुकगताणुत्वाभ्यां द्व्यणुकत्र्यणुकयोरणुत्वस्यारम्भानुपपत्तिरिति चोदनं उपपन्नम् ।

अणुत्वस्य सजातीयतायाः परेणाप्यङ्गीकारात् । नापि परमाण्वादिगतेनाणुत्वेन महत्त्वारम्भानुपपत्तिरिति चोदनं युक्तम् । सजातीयपरिमाणस्य एव साधयिषितत्वात् इत्युत्तरग्रन्थविरोधापत्तेः । तद्बलात् अणुत्वह्रस्वत्वयोरेव सजातीयतोक्तिप्राप्तेः ।

तत्रापि तथात्वं कुतः इति चेत्, न । द्व्यणुकादौ तु अणुत्वह्रस्वत्वे प्रमाणसिद्धे इत्येतत् बाधकशङ्कागतवाक्येन परमाणावणुत्वं सिद्धम् । द्व्यणुके च ह्रस्वत्वं प्रमाणसिद्धमित्युक्त्या तयोरेव वैजात्यस्य उत्तरत्र शङ्कनात् इत्याद्याशयेनाह **परमाणुगतेनेत्यादिना** । किञ्चित् अधिकं योज्यमस्ति । **परमाणोरपीति** । अत्रेदं अवधेयम् । द्व्यणुकत्र्यणुकपरिमाणयोरिति द्विवचनान्तपदे द्व्यणुकपदेन परमाणुलक्षणायां त्र्यणुकं प्रति सम्बन्धितयोक्तं द्व्यणुकमेव परमाणुं प्रति सम्बन्धितयापि लभ्यते इति परमाणुद्व्यणुकत्र्यणुकपरिमाणानामिति लभ्यते । तत्राप्ययं विवेकः । परमाणुद्व्यणुकपरिमाणयोः द्व्यणुकत्र्यणुकपरिमाणयोश्चेति । अत एवोत्तरवाक्ये परमाणुद्व्यणुकपरिमाणयोरिव इत्यादिरूपेण पृथगेव कार्यकारणभावापन्नव्यक्तिप्रदर्शनमिति । एवमेव परमाणोरपि द्व्यणुकसमकक्षतया इत्युत्तरवाक्येऽपि विवेके तात्पर्यम् । एतेन परमाणुद्व्यणुकपरिमाणरूपैका कोटिः । कारणाभावापन्ना त्र्यणुकपरिमाणरूपा च कार्याभावापन्नेति उपलक्षणापेक्षे प्राप्तम् । अन्यथा त्र्यणुकपदस्य द्व्यणुकोपलक्षणापि वक्तव्या स्यात् । उत्तरमूले त्र्यणुकादौ इत्यादिपदप्रयोगादिति निरस्तम् । परमाणुद्व्यणुके-त्युत्तरमूलानुगुण्यायैकात्र परमाणुद्व्यणुकपरिमाणाभ्यां इति शेषपूरणेन व्याख्यानं न कृतम् । स्पष्टं चेदम् । इतरेतरयोगोपपादनपरोत्तरटीकायामिति बोध्यम् ।

॥ इति उक्तार्थोद्भूतशङ्कानिरासकतया अनुव्याख्यानगत'सदृश'पदार्थकथनम् ॥

* * *

॥ अथ एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दार्थनिरूपणे उक्तार्थोद्भूतशङ्कानिरासकतया 'महत्त्वं चे'त्यनुव्याख्यानश्लोकार्धार्थकथनम् ॥

२१ सु०— ननु च त्र्यणुकादौ महत्त्वदीर्घत्वे द्व्यणुकादौ त्वणुत्वह्रस्वत्वे प्रमाणसिद्धे, तत्कथं साजात्यसाधने बाधो न भवेदित्यत उक्तं महत्त्वं चेति । 'कल्पनैवैषा वैशेषिकाणां, न तु परिमाणावान्तरजातिभेदे प्रमाणमस्ति, किन्नाम परिमाणमेकजातीयमेवोत्कर्षापकर्षवत्' इति भावः । अनेन वैरूप्यस्यासिद्धिरुक्ता वेदितव्या ।

वं०प०— द्व्यणुकादावणुत्वह्रस्वत्वे इति । आदिपदेन परमाणुग्रहणम् । परमाणावपि ह्रस्वत्वस्य कैश्चिदङ्गीकारादेवमुक्तम् । **अनेन** कल्पितमिति वचनेन ।

श्रीनिधि०— द्वैरूप्यासिद्धिरिति । तथा चोपाधिः साधनव्यापक इति भावः ।

शे०वा०— तथाऽपि 'महत्त्वं चैव दीर्घत्वमि'त्यादिभाष्यखण्डवैयर्थ्यमेव । न च त्र्यणुकादौ महत्त्वादेः कल्पितत्वप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वादित्यतः सजातीयपरिमाणोत्पादनसाधने बाधकपरिहारार्थत्वान्न तदिति भावेन बाधकशङ्कापरिहारकतया तद्योजयितुं तच्छङ्कामुत्थापयति **ननु चेति** । **एकजातीयमेवेति** । त्र्यणुकादौ महत्त्ववत्परमाणुद्व्यणुकयोरणुत्ववच्चेति भावः । **उत्कर्षवत्** द्रव्यान्तरवर्त्यपकृष्टपरिमाणापेक्षयोत्कर्षवत् । **अपकर्षवत्** द्रव्यान्तरवर्त्युत्कृष्टपरिमाणापेक्षयाऽपकर्षवदित्यर्थः । **अनेनेति** । सर्वद्रव्यवर्तिपरिमाणस्यैकजातीयत्ववर्णनेनेत्यर्थः । **असिद्धिरिति** । तस्य विजातीयत्वरूपत्वादिति भावः ।

वा०र०— **उत्कर्षापकर्षवदिति** मूलानुसारेण **उत्कर्षवत्** इत्यनूद्य द्रव्यान्तरेति व्याख्यानम् । **तथापकर्षवत्** इत्यनूद्य द्रव्यान्तरेत्यादि उत्तरं व्याख्यानमिति तदनुसारेणैव उत्कर्षवदिति प्रथमोऽनुवादः । अन्यादृशो लेखकागतः ।

विष्टल०— **अनेनेति** । 'वैरूप्ये तत्र कारणमि'त्यत्र द्व्यणुकत्र्यणुकपरिमाणेन कार्यकारणभाववती विजातीयपरिमाणत्वादित्युक्तानुमाने विजातीयपदोदितवैरूप्यस्यासिद्धिः सदृशमित्यनेनोक्ता भवतीत्यर्थः ।

॥ इति उक्तार्थोद्भूतशङ्कानिरासकतया 'महत्त्वं चे'त्यनुव्याख्यानश्लोकार्थार्थकथनम् ॥
॥ इति एतत्सूत्र-अनुव्याख्यानगत-कतिपयशब्दार्थनिरूपणम् ॥
॥ इति एतत्सूत्रगत'वा'शब्देतरशब्दव्याख्यानम् ॥

* * *

॥ अथ एतत्सूत्रगत'वा'शब्दव्याख्यानतया एतदनुव्याख्यानगतान्त्यश्लोकार्थार्थकथनम् ॥
॥ अथ तत्रादौ अनुव्याख्यानगतपदार्थदर्शनम् ॥

२२ **सु०— 'ननु च द्व्यणुकादिपरिमाणस्य परमाण्वादिपरिमाणाजन्यत्वे बाधकाभावादप्रयोजकत्वमनुमानानाम्, द्व्यणुकादिपरिमाणस्य सङ्ख्ययैव जन्मसम्भवात्' इत्याशङ्कां परिहरन् 'वा'शब्दं व्याख्याति न चेदिति ।**

अनु०— न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेत् ।

चापिशब्दावितरेतरयोगे । **एव**शब्दो **नो भवेदेव** इति सम्बध्यते ।

परि०— **वाशब्दमिति** । महद्दीर्घवद्वेति सूत्रस्थं वाशब्दमित्यर्थः ।

यादु०— इतरेतरयोग इति । यद्यपि महत्त्वात् चतुरणुकादिगतं महत्त्वं दीर्घत्वादपि तद्गतं दीर्घत्वं नो भवेदिति वाक्यद्वयकरणे तदर्थयोः परस्परसमुच्चये चापिशब्दौ व्याख्यातुं शक्यौ, तथाऽप्येकवाक्यता-लाघवाय चतुरणुकादिगतं परिमाणद्वयमिह चतुरणुकादिपरिमाणत्वेनैकमेव कार्यं विवक्षितम् । अत एव चतुरणुकादिपरिमाणमिति शेष इति वक्ष्यति । तत्र च न कारणगतस्य महत्त्वमात्रस्य दीर्घत्वमात्रस्य वा जनकत्वं, किन्तु सहितयोरेव, साहित्यप्रतियोगिनोश्चैकक्रियासम्बन्धे इतरेतरयोग एव विहित इतीतरेतरयोग एव व्याख्यातावि ति ज्ञातव्यम् ।

श्रीनिधि०— सजातीयत्वरूपोपाधिनिरासार्थं सदृशमिति मूले उक्तमित्याशयेनाह **ननु च द्व्यणु-कादिपरिमाणमिति** ।

शे०वा०— ननु 'न चेन्महत्त्वतश्चे'त्युत्तरभाष्यमनर्थकम् । न च सौत्र'वा'शब्दव्याख्यानरूपत्वान्न तदिति वाच्यम् । महद्दीर्घवद्ध्रस्वपरिमण्डलाभ्यामित्येतावतैव पूर्णत्वेन सूत्रे वाशब्दस्याप्यनर्थकत्वादित्याशङ्क्य, उक्तानुमानेष्वप्रयोजकताशङ्कानिरासाय विपक्षे बाधककथनार्थत्वान्न तद्वैयर्थ्यमित्यभिप्रेत्य तद्व्याख्यानपरतयो-त्तरग्रन्थं सङ्गमयितुमप्रयोजकताशङ्कामुत्थापयति **ननु चेति** । ननु च द्व्यणुकादिपरिमाणस्य परमाण्वादि-परिमाणाजन्यत्वे जन्यत्वमेव न स्यात् । भावकार्यस्य कारणत्रितयजन्यत्वनियमात् । अन्यस्य चासमवायि-कारणस्याभावात् । तथा च जन्मानुपपत्तेरेव बाधकत्वान्नाप्रयोजकत्वमित्यतो भवेदेवं कथञ्चिद्यद्यसमवायि-कारणमन्यत्किञ्चिन्न भवेत् । न चैतदस्ति । ईश्वरापेक्षाबुद्धिमपेक्ष्योत्पन्नपरमाण्वादिगतद्वित्वादिसङ्ख्याया एव तत्रासमवायिकारणत्वसम्भवादित्याह **द्व्यणुकादिपरिमाणस्य सङ्ख्ययैवेति** । **वाशब्दं व्याख्यातीति** । अनेन वाशब्दः पक्षान्तरे । तच्च योग्यतावशाद्ध्रस्वत्वपारिमाण्डल्ययोरिव महत्त्वदीर्घत्वयोरप्यकारणत्वरूप-मित्युक्तं भवति । **इतरेतरयोग इति** । त्र्यणुकगतमहत्त्वमात्रस्य दीर्घत्वमात्रस्य वा चतुरणुकपरिमाणाजनक-त्वात् परस्परसापेक्षस्यैव च तज्जनकत्वात् परस्परापेक्षाणामेकस्मिन्कार्ये सन्निपाते च देवदत्तयज्ञदत्ताभ्यां कृतमित्यादाविवरेतरयोगदर्शनात् अत्रापि चापिशब्दाविवरेतरयोग इत्यर्थः । यद्यप्यत्र त्र्यणुकगतमहत्त्वा-च्चतुरणुकगतमहत्त्वं तद्गतदीर्घत्वाच्च तद्गतं दीर्घत्वं नो भवेदिति योजनया वाक्यद्वयार्थसमुच्चये चापिशब्दौ व्याख्यातुं शक्यौ । तथाऽप्येकवाक्यतालाघवाय चतुरणुकगतमहत्त्वदीर्घत्वयोश्चतुरणुकपरिमाणत्वेनैककार्यत्व-विवक्षयेतरेतरयोगोक्तिः । अत एव 'चतुरणुकादिपरिमाणमिति शेषः' इत्येव वक्ष्यति । अन्यथा महत्त्वं दीर्घत्वं चेत्येवावक्ष्यदिति ध्येयम् । वैयर्थ्यविरुद्धार्थत्वनिरासायैवशब्दं भिन्नक्रमतया योजयति **एवशब्द इति** ।

वा०र०— उक्तानुमानेऽप्रयोजकतेति । अत्रानुमान इति जात्येकवचनम् । अनुमानेष्वित्यर्थः । तेनानुमानानामिति मूलानुगुण्यं बोध्यम् । उक्तानुमानेष्विति पाठस्तु सुगम एव । उक्तमूले तु यद्यपि द्व्यणुक-परिमाणस्येत्यादिना त्र्यणुकपक्षकानुमानस्यैव परिग्रहः प्रतीयते । तत्रावान्तरभेदविवक्षायां च अनुमानद्वयं लभ्यते । तत् कथं अनुमानानामित्युक्तरीत्या भाति । तथापि द्व्यणुकादिपरिमाणस्येत्यादिनैवानुमानान्तराणा-

मपरिग्रहोऽपि शक्यते ज्ञातुमिति नानुपपत्तिः । तथा हि । यथा हि त्र्यणुकद्व्यणुकपरिमाणस्वाश्रय-समवायिकारणपरिमाणजमित्यत्र कार्यपरिमाणत्वमस्तु स्वाश्रयेत्यादिना उक्तं द्व्यणुकपरमाणुपरिमाणजत्वं मास्तु द्व्यणुकादिपरिमाणस्य परमाण्वादिपरिमाणजन्यत्वे बाधकाभावात् इत्यप्रयोजकत्व इत्येवंपरताऽस्य वाक्यस्य प्रतीयते तथा द्व्यणुकपरमाणुपरिमाणं परिमाणारम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् इत्यत्रापि उक्तहेतुरस्तु त्र्यणुकादिपरिमाणजनकत्वरूपं परिमाणारम्भकत्वं च मास्तु । त्र्यणुकादिपरिमाणस्य द्व्यणुकादिपरिमाणाजन्यत्वे बाधकाभावात् । ततश्चात्रापि अप्रयोजकत्वं इत्येवंपरताया अपि प्रतीयमानत्वात् । एवं अनुमानान्तरपरतापि बोध्येति । ततो युक्तं मूले बहुवचनं इति सन्तोष्टव्यम् । 'अत्यपूपांस्तव भ्राता' इत्येतत् मूलगतापि च शब्दावावापोद्धारयोरितरेतरेत्येतट्टीकायां परस्परनिरपेक्षपदार्थानामेकस्मिन्प्रतिसम्बन्धिनि अन्वये हि समुच्चयादेः प्रमेयस्य च 'अर्थे द्वन्द्वः' इत्येतत्सूत्रीयविचारानुसारेण उक्तत्वात् इह परस्परापेक्षाणामेकस्मिन् कार्ये सन्नि-पातात् इतरेतरयोगः इत्याशयेनाह **इतरेतरयोगदर्शनादित्यादि** ।

स०व्र०— इतरेतरयोग इति । महत्त्वस्य दीर्घत्वस्य च परस्परसापेक्षस्यैव कार्यजनकत्वेन परस्पर-सापेक्षाणामेवैकैकस्मिन् कार्ये सन्निपातादितरेतरयोग इति भावः ।

विट्ठल०— इतरेतरयोग इति । त्र्यणुकादिगतयोर्महत्त्वदीर्घत्वयोरन्योन्यमिलितयोरेव चतुरणुकादिगत-परिमाणजनकत्वादेवमुक्तम् ।

॥ इति अनुव्याख्यानगतपदार्थदर्शनम् ॥

* * *

॥ अथ तत्र उक्तार्थस्य अभिप्रायः ॥

२३ मु०— इदमिह वक्तव्यम्, द्व्यणुकादिपरिमाणेऽसमवायिकारणलक्षणमस्ति न वेति ।

आद्येऽसमवायिकारणलक्षणसद्भावेऽपि त्र्यणुकादिपरिमाणं द्व्यणुकादिपरिमाणजं न चेत् भवेत् तदा त्र्यणुकादिगतान् महत्त्वतो दीर्घत्वाच्च नो भवेदेव, चतुरणुकादि-परिमाणमिति शेषः । इदमुक्तं भवति । यदि समवायिकारणप्रत्यासन्नत्वादिसद्भावेऽपि नासमवायिकारणत्वं तदेदमतिव्यापकत्वादलक्षणं स्यात् । तथा च न तथाभूतस्यापि महत्त्वादेरसमवायिकारणत्वं स्यादिति ।

द्वितीये किं समवायिकारणप्रत्यासत्तिर्नास्ति उत सामर्थ्यावधारणम् । नाद्यः, द्व्यणुकादिपरिमाणस्य त्र्यणुकादिपरिमाणसमवायिकारणसमवायिकारणे द्व्यणुकादौ समवेतत्वस्य प्रमितत्वात् । समवायिकारणसमवेतत्वाभावात् न चेत् द्व्यणुकादिपरिमाणात् त्र्यणुकादिपरिमाणस्योत्पादः, तदा त्र्यणुकादिगताभ्यां महत्त्वदीर्घत्वाभ्यां चतुरणुकादिपरिमाणमपि नो भवेत्, तस्यापि समवायिकारणसमवेतत्वाभावात् । न द्वितीयः । अनन्यथासिद्धनियतपूर्वभावित्वेन हि सामर्थ्यमवधारणीयम्, तच्चास्ति द्व्यणुकादिपरिमाणे । एवमपि न चेत् ततः त्र्यणुकादिपरिमाणादिजन्म, तदोक्तप्रसङ्ग एव ।

परि०— ननु व्याप्त्यभावात्कथमेवमापादनमित्यत आह **इदमिह वक्तव्यमिति** । समवायिकारणसमवेतत्वं नेति प्रमितत्वादयुक्तमित्युक्तम् । अस्मिन्पक्षे बाधकोक्तिपरतयापि मूलं योजयति **समवायिकारणसमवेतत्वाभावान्न चेदिति** । **उक्तप्रसङ्ग एवेति** । महद्दीर्घत्वाभ्यामपि चतुरणुकपरिमाणमपि नो भवेदित्युक्तप्रसङ्ग इत्यर्थः ।

वं०प०— **उक्तप्रसङ्ग एवेति** । त्र्यणुकादिगतमहत्त्वदीर्घत्वाभ्यां चतुरणुकादिपरिमाणमपि नो भवेदित्यर्थः ।

कं०रा०— **समवायिकारणसमवेतत्वाभावादिति** । त्र्यणुकादिपरिमाणस्य यत्समवायिकारणं त्र्यणुकादि तत्र समवेतत्वाभावाद् द्व्यणुकादिपरिमाणा त्र्यणुकादिपरिमाणोत्पादो न चेत्तदा त्र्यणुकादिगताभ्यां महत्त्वदीर्घत्वाभ्यां चतुरणुकादिपरिमाणमपि नोत्पद्येत त्र्यणुकादिगतमहत्त्वादेरपि चतुरणुकादिपरिमाणं प्रति समवायिकारणे चतुरणुकादावसमवेतत्वादित्यर्थः । **तत इति** । द्व्यणुकादिपरिमाणादित्यर्थः । **उक्तप्रसङ्ग एवेति** । त्र्यणुकादिगताभ्यां महत्त्वदीर्घत्वाभ्यां चतुरणुकादिपरिमाणमपि नोत्पद्यते युक्तप्रसङ्ग एवेत्यर्थः ।

श्रीनिधि०— नन्वसमवायिकारणलक्षणसद्भावेऽपि त्र्यणुकादिपरिमाणं द्व्यणुकादिपरिमाणजं मा भवतु त्र्यणुकादिगतमहत्त्वाच्चतुरणुकादिगतं महत्त्वमुत्पद्यताम् किं साधकमित्यत आह **इदमुक्तं भवतीति** । **असमवायिकारणत्वं न स्यादिति** । तथा च असमवायिकारणत्वेन जनकत्वं न स्यादिति भावः । एवञ्च असमवायिकारणत्वाभाव एव बाधक इत्युक्तं भवति । **उक्तप्रसङ्ग एवेति** । त्र्यणुकादिगतान्महत्त्वतोऽपि नो भवेदित्युक्तः प्रसङ्गः । अतिप्रसङ्ग इत्यर्थः ।

शे०वा०— ननु तर्काङ्गभूतव्याप्तिविरहात् तर्काभासोऽयम् । न च विशेषव्याप्त्यभावेऽप्यविशेषरूपसामान्यव्याप्तिसद्भावान्न तथेति वाच्यम् । तल्लक्षणभावाभावाभ्यां विशेषेण तदसिद्धेरित्याशङ्क्य परिहर-

न्नेवापेक्षितं पूरयति **इदमित्यादिना** । नन्वत्राप्रयोजकत्वमसमवायिकारणलक्षणसद्भावेऽपि द्व्यणुकादिगताणुत्वादेरकारणत्वस्य त्र्यणुकादिगतस्य महत्त्वादेश्च कारणत्वस्याप्युपपत्त्योक्तापाद्यापादकयोः प्रयोज्यप्रयोजकभावप्रतिभासादित्याशङ्क्य नात्राणुत्वादेरसमवायिकारणत्वाभावः त्र्यणुकादिगतमहत्त्वादेरकारणत्वापादकतया साक्षादभिमतः किन्नाम परम्परयेत्यतो नाप्रयोजकत्वमित्यभिप्रेत्य परम्परयाऽप्रयोजकतामुपदर्शयति **इदमुक्तं भवतीति** । **नासमवायिकारणत्वमिति** । द्व्यणुकगताणुत्वादेरिति शेषः । **तथाभूतस्यापीति** । समवायिकारणप्रत्यासन्नत्वादिविशिष्टस्यापीत्यर्थः । समवायिकारणप्रत्यासन्नत्वादेस्तल्लक्षणत्वादिति भावः ।

आद्ये किं कारणैकार्थप्रत्यासत्तिर्नास्तीत्यभिमतं- किंवा कार्यैकार्थप्रत्यासत्तिर्नास्तीति विकल्पद्वयं मनसि निधायाद्यं प्रत्याह **नाद्य इति** । द्वितीयमुत्थाप्य तद्दूषणपरतया मूलं योजयति **समवायिकारणेति** । आद्यद्वितीयं प्रतिक्षिपति **नेति** । कुतो नेत्यत एतत्पक्षदूषणपरतयाऽपीदमेव मूलमपेक्षितपूरणेन योजयति **अनन्यथेत्यादिना** । **उक्तप्रसङ्ग एवेति** । त्र्यणुकादिमहत्वादेरनवधृतसामर्थ्यत्वापातादकारणत्वं स्यादित्युक्तप्रसङ्ग एवेत्यर्थः ।

वा०र०— आद्येऽपीति । समवायिकारणप्रत्यासत्तिर्नास्ति इत्याद्येऽपीत्यर्थः ।

स०व्र०— उक्तप्रसङ्ग एवेति । त्र्यणुकादिगतपरिमाणस्यापि अनन्यथासिद्धनियतपूर्ववृत्तित्वेन सामर्थ्यानवधारणापातेन तस्यापि चतुरणुकादिपरिमाणजनकत्वं न स्यादित्युक्तप्रसङ्ग एवेत्यर्थः ।

विठ्ठल०— अत्रापादकस्य व्याप्यत्वोपपादकमाह **इदमिहेति** । लक्षणसद्भावस्याप्रयोजकत्वात्तेन व्याप्यसिद्धेः कथमत्रापादनमित्यत आह **इदमुक्तं भवतीति** । समवायिकारणसमवेतत्वाभावादित्यत्र साक्षादिति शेषः । **उक्तप्रसङ्ग एवेति** । महत्त्वतो दीर्घत्वाच्च चतुरणुकपरिमाणमपि न भवेदित्युक्तप्रसङ्ग एवेत्यर्थः ।

॥ इति उक्तार्थस्य अभिप्रायः ॥

* * *

॥ अथ च तत्र उक्तार्थोद्भूतशङ्काद्वयनिरासः ॥
॥ अथ तत्रादौ प्रथमशङ्का तन्निरासश्च ॥

२४ सु०— सदृशपरिमाणस्यैव कारणत्वावधारणाद्विसदृशमेतदकारणमवर्जनीयसन्निधीति चेत् । किमिदं विसदृशत्वम् । किं जातिभेदः, उत वैलक्षण्यमात्रम् । नाद्यः, परमाणुद्व्यणुकादिपरिमाणानामनुमानेनैकजातीयत्वस्यापि साधितत्वात् । द्वितीये

वैलक्षण्यमात्रेण न चेत्कारणत्वं तदा महत्त्वादेरपि न स्यात्; न हि त्र्यणुकचतुरणुक-महत्त्वे न विलक्षणे, सोत्कर्षत्वस्यानुभवसिद्धत्वात् ।

परि०— अनन्यथासिद्धत्वं नेति शङ्कते **सदृशेति** ।

वं०प०— **अवर्जनीयेति** । तथा च आकाशादीनां घटाद्युत्पत्ताविवावश्यकल्प्यमाननियतपूर्ववर्ति-द्वित्वादिसङ्ख्ययैव द्व्यणुकादौ परिमाणोत्पत्तौ सम्भवत्यां सत्यां तत्सहभूतमेतत्परमाण्वादिपरिमाणमन्यथा-सिद्धत्वादकारणमित्यर्थः ।

कं०रा०— **एतदिति** । द्व्यणुकादिपरिमाणमित्यर्थः ।

शे०वा०— 'न चेदि'त्यादिवाक्यं प्रकारान्तरेणापि योजयितुं तन्निवर्त्यशङ्कामुत्थापयति **सदृशेति** । तन्तुपटादाविति शेषः । ननु त्र्यणुकपरिमाणस्य चतुरणुकादिपरिमाणं प्रति सदृशपरिमाणत्वेन कारणत्वे गृहीत एव त्र्यणुकादिपरिमाणं प्रति द्व्यणुकादिपरिमाणस्यापि परिमाणत्वेन तज्ज्ञातव्यमित्येकं प्रति पूर्ववृत्तित्वे गृहीत एवापरं प्रति यस्य पूर्ववृत्तित्वं गृह्यते तत्तेनान्यथासिद्धमित्येवंरूपान्यथासिद्धिलक्षणसद्भावात् कथं सामर्थ्याव-धारणमिति शङ्कते **सदृशेति** इत्यप्याहुः । वैसादृश्यस्य जातिविशेषत्वपक्षे न चेदित्यादिग्रन्थासङ्गते-स्तत्पक्षं बहिरेव प्रदूष्य वैलक्षण्यमात्रपक्षनिरासकतया मूलं योजयितुं विकल्पयति **किमिदमित्यादिना** । **साधितत्वादिति** । 'तस्माच्च सदृशं कार्यं तत्कार्येषूपजायत' इत्यादिनेति शेषः । अपेक्षितपूरणेन द्वितीयपक्ष-निरासपरतया मूलमेव योजयति **द्वितीय इति** ।

वा०र०— **सदृशेतीत्यप्याहुरिति** । एकस्यैवाकाशादेः शब्दघटादिरूपवस्तुद्वयं प्रति पूर्ववृत्तित्वग्रहे पूर्वापरीभावेनान्यथासिद्धिप्राप्तावपि प्रवृत्ते भिन्नयोरेव वस्तुद्वयं प्रति पूर्ववृत्तित्वग्रहस्य कालभेदेनोपपत्त्या अन्यथासिद्धिशङ्कायाः अनवकाशः । अत्र इत्याशयेनाहुरिति अस्वरसः सूचितः । द्वितीयाहुरित्यत्रापि अस्वरसो योज्योऽस्ति । **तस्माच्च सदृशमिति** । सदृशमितिपदतात्पर्यवर्णनावसरे परिमाणावान्तरजातेरभावेन परमाणुद्व्यणुकपरिमाणाभ्यां द्व्यणुकत्र्यणुकपरिमाणयोः सादृश्यमङ्गीकृत्य त्र्यणुकद्व्यणुकपरिमाणेत्यादि प्रयोगे सदृशपरिमाणारम्भकत्वादेव साधनादित्यर्थः ।

विट्ठल०— नन्वत्र सामर्थ्यावधारणं नास्ति । अनन्यथासिद्धत्वप्रापकसाजात्यभावात् । नियत-पूर्ववृत्तित्वं वर्जनीयं सन्निति त एवेति शङ्कते **सदृशेति** ।

॥ इति उक्तार्थोद्धृतप्रथमशङ्का तन्निरासश्च ॥

* * *

॥ अथ तत्र उक्तार्थोद्भूतद्वितीयशङ्का तन्निरासश्च ॥

२५ सु०— अथ सङ्ख्यात एव जन्मसम्भवे परिमाणस्यापि कारणत्वं न कल्पनीयमिति चेत्; तथाऽप्युक्त एवातिप्रसङ्गः, चतुरणुकादिपरिमाणस्यापि सङ्ख्यात एव जननोपपत्तेः । यत्र तु नियामकविशेषस्तत्र परिमाणमप्याद्रियतामिति । यद्यपि परिणामवादिनां नायं पन्थाः, किन्तूपादानानि स्वगुणयुक्तानि तथाविधकार्यतामापद्यन्त इति; तथाऽपि परमतमाश्रित्य प(रेषामेवेदं)रस्येदं दूषणाभिधानमिति न काचित्क्षतिः ।

परि०— तथाप्युक्त एवातिप्रसङ्ग इत्येतद्विधिमुखेन व्यनक्ति **चतुरणुकादीति** । ननु स्थूलैः सूक्ष्मैश्च समसङ्ख्यैस्तन्तुभिर्निर्मितयोः पटयोः परिमाणभेदो न स्यात् सङ्ख्याभेदस्य तत्राभावादित्यत आह **यत्र त्विति** । **परिमाणमपीति** । द्वयोरपि क्लृप्तश(प्रस)क्तित्वादिति भावः । तस्माच्च सदृशमित्यादिश्लोकद्वयोक्तानि दृष्टान्तदार्ष्टान्तिकानिष्टापादनानि न परिमाणवादे सिद्धान्ते युक्तानीत्यत आह **यद्यपीति** ॥ **पारिमाण्डल्यादेर्हेतुत्वेऽनुमानानि** ॥

गु०दी०— **यत्र तु नियामकविशेष** इत्यत्र यत्र दशहस्तपरिमितत्वेन निर्मातव्यपटादौ सङ्ख्या-साम्येऽपि वितस्तिमात्रायामन्यूनतायां चिकीर्षितपटासिद्धिर्यत्र तत्रेति योजना ।

यादु०— ननु सर्वत्र कारणसङ्ख्यात एव कार्यपरिमाणजन्माङ्गीकारे कथं वितस्तिपरिमिततन्तु-त्रयारब्धपटपरिमाणापेक्षया हस्तचतुष्टयपरिमिततन्तुत्रयारब्धपटपरिमाणे दीर्घत्वविशेषः । कारणगतसङ्ख्याया उभयत्राविशिष्टत्वादित्यत आह **यत्र तु नियामकेति** । एतादृशस्थले कारणगतपरिमाणमपि कारणमङ्गी-क्रियतामित्यर्थः ।

वं०प०— नन्वेवं सङ्ख्यात एव परिमाणोत्पत्तौ हस्तचतुष्टयवितस्तिचतुष्टयपरिमिततन्तुत्रयजन्ये पटे परिमाणभेदो न स्यात् । त्रित्वसङ्ख्याया अविशिष्टत्वादित्यत आह **यत्र त्विति** ।

कं०रा०— **उक्त एवातिप्रसङ्ग इति** । त्र्यणुकादिपरिमाणाच्चतुरणुकादिपरिमाणमपि नोत्पद्यते युक्त एवातिप्रसङ्गश्चतुरणुकादिपरिमाणस्यापि त्र्यणुकादिगतसङ्ख्यात एव जननोपपत्तेरित्यर्थः । ननु सर्वत्र सङ्ख्यात एव यदि परिमाणजन्यं तर्हि सूक्ष्मतन्तुत्रयारब्धावयविपरिमाणापेक्षया स्थूलतन्तुत्रयारब्धावयविपरिमाणे उत्कर्षो न स्यादवयवबहुत्वस्योभयत्राविशेषादित्यत आह **यत्रेति** । यत्र परिमाणोत्कर्षलक्षणो नियामकविशेषो तत्रा-वयवगतपरिमाणमप्यवयविपरिमाणं प्रति कारणत्वेन स्वीक्रियते तथा चोक्तस्थलेऽवयवपरिमाणोत्कर्षादिव-यविपरिमाणोत्कर्षः सम्भवतीति भावः । **नायं पन्था इति** । कारणगतगुणेभ्यो कार्यगतगुणा जायन्त इत्ययं

मार्गो न भवतीत्यर्थः । कस्तर्हि परिणामवादिनां पन्था इति पृच्छति **किन्त्विति** । उत्तरमाह **उपादानानीति** । स्वगुणयुक्तानि मृत्तन्त्वादीत्युपादानानि तद्गुणयुक्तघटपटादिकार्यरूपतामापद्यन्त इत्येव परिणामवादिनां पन्था इत्यर्थः ।

श्रीनिधि०— ननु परिमाणस्यावश्यं परिमाणजनकत्वमङ्गीकर्तव्यम् । दीर्घतन्तुद्वयारब्धे कार्ये सङ्ख्यायाः कारणत्वायोगात् । तथा हि द्वित्वं परमाणोर्द्व्यणुककारणयोरतिप्रसक्तं बहुत्वं नास्त्येव अन्यथा कार्यस्याकारणकत्वापत्तेः । तथा च कथमेवमुच्यत इत्यत आह **यत्र तु नियामकविशेष इति** । **नायं पन्था इति** । कारणगतसङ्ख्याया वा कारणगतपरिमाणस्य वा कार्यपरिमाणे कारणत्वमिति पन्थाः ।

शे०वा०— पूर्वोक्तसङ्ख्याकारणत्वनिरासपरतयाऽपीदमेव मूलं योजयति **अथेत्यादिना** । अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वमन्यथासिद्धत्वमित्युक्तरूपामन्यथासिद्धिं शङ्कते **अथेतीत्यप्याहुः** । **उक्त एवेति** । त्र्यणुकपरिमाणस्यापि कारणत्वं न कल्प्यमित्युक्त एवेत्यर्थः । **सङ्ख्यात एवेति** । त्र्यणुकगतसङ्ख्यात एवेत्यर्थः । ननु द्वितन्तुके पटे कारणबहुत्वाभावेन महत्त्वानुपपत्त्या तस्याप्रत्यक्षत्वप्रसङ्गात् तन्निरासाय तन्तुद्वयगतपरिमाणमेव तत्कारणतयाऽङ्गीकर्तव्यम् । तत्कथं कारणगतसङ्ख्यात एव कार्यगतपरिमाणजन्मोक्तिरित्यतो न वयं सर्वथा परिमाणस्य कार्यगतपरिमाणं प्रति कारणत्वं व्यासेधामः, किन्तु द्व्यणुकत्र्यणुकपरिमाण इव चतुरणुकादिपरिमाणेऽपि कारणगतसङ्ख्याया एव कारणत्वोपपत्तेर्न तत्र परिमाणस्य कारणत्वमिति कार्यविशेष एव तस्य कारणतां निराकुर्मः । तथा च यत्र द्वितन्तुके कारणसङ्ख्या नास्ति तत्र कारणपरिमाणस्य कार्यपरिमाणजनकतायामङ्गीकृतायामपि नास्माकमनुपपत्तिरित्याशयेनाह **यत्र त्विति** । परमाणुपरिमाणस्य द्व्यणुकपरिमाणं प्रति द्व्यणुकपरिमाणस्य च त्र्यणुकपरिमाणं प्रति कारणत्वव्युत्पादनस्य सिद्धान्तविरोधमाशङ्क्य परिहरति **यद्यपीति** । कारणगुणस्य कार्यगुणकारणत्वं न स्वसिद्धान्त इत्यर्थः । कस्तर्हि सिद्धान्त इति पृच्छति **किन्त्विति** । उत्तरमाह **उपादानानीति** । **तथाविधेति** । गुणयुक्तेत्यर्थः ।

विट्ठल०— प्रकारान्तरेणानन्यथासिद्धत्वाभावं शङ्कते **अथेति** । **उक्त एवातिप्रसङ्ग इति** । न चेन्महत्त्व इत्युक्त एवेत्यर्थः । तमेवातिप्रसङ्गविधिमुखेनोपपादयति **चतुरणुकादीति** । ननु सर्वत्र कारणगतसङ्ख्यात एव कार्ये परिमाणजननमित्यनुपपन्नम् । पटद्वयस्य समसङ्ख्याततन्त्वारब्धत्वेति तत्र वितस्तिपरिमिततन्तुजन्यापेक्षया हस्तपरिमिततन्तुजन्यपटे परिमाणातिशयस्य दर्शनादित्यत आह **यत्र त्विति** । **तत्रेति** । तादृशनियामकवति स्थले कारणगतसङ्ख्यावत्परिमाणमपि कारणतया स्वीक्रियतां द्वयोरपि क्लृप्तशक्तित्वात् । चतुरणुकादिपरिमाणस्य तादृशनियामकाभावात् सङ्ख्यात एव जननोपपत्तिरिति भावः ।

॥ इति उक्तार्थोद्भूतद्वितीयशङ्का तन्निरासश्च ॥
॥ इति उक्तार्थोद्भूतशङ्काद्वयनिरासः ॥

॥ इति एतत्सूत्रगत'वा'शब्दव्याख्यानतया एतदनुव्याख्यानगतान्त्यश्लोकार्धार्थकथनम् ॥
॥ इति परिणामसमवायिकारणनिरासे एतदुत्तरस्य सूत्रारूढतादर्शनम् ॥

* * *

॥ अथ परिमाणसमवायिकारणनिरासार्थं परिमाणोत्कर्षापकर्षाभावकल्पितशङ्कानिरसनम् ॥
॥ अथ तत्रादौ तच्छङ्काप्रदर्शनपूर्वकं तत्र प्रतितर्कपराहतिप्रदर्शनम् ॥
॥ अथ तत्राप्यादौ तत्प्रतितर्के विकल्पितानां चतुर्णामपि पक्षाणां दुष्टत्वप्रतिज्ञा ॥

२६ **सु०**— एवं 'परमाणुपरिमाणाद् द्व्यणुकपरिमाणस्योत्पादः, ततस्त्र्यणुकपरिमाणस्य जन्म, तेषां चैकजातीयत्वमि'त्यनुमानेन साधितम् । तदसत् । प्रतितर्कपराहतत्वात् । तथा हि । किं परमाणुपरिमाणाद् द्व्यणुके द्व्यणुकपरिमाणाच्च त्र्यणुके सजातीयपरिमाणस्याणुत्वस्योत्पत्तिः साध्यते, उत महत्त्वस्य, अथ ह्रस्वत्वस्य, यद्वा दीर्घत्वस्य ।

सर्वेषामपि पक्षाणां दुष्टत्वं प्रतिजानीते **सदृशस्य हीति** ।

अनु०— सदृशस्य हि कार्यस्य नैव योगः कथञ्चन ।

योगः घटना । कथञ्चन उक्तप्रकारेषु केनापि प्रकारेण ।

परि०— 'कथञ्चने'त्यनुवादः । 'उक्ते'त्यादि व्याख्या ।

श्रीनिधि०— एकजातीयत्वमित्यनुमानेन साधितमिति । कार्यकारणभावेऽनुमानचतुष्टयेन सिद्धे विजातीययोस्तदयोगात् तदन्यथानुपपत्त्या असाजात्यं सिद्धमिति भावः ।

शे०वा०— सदृशस्येत्याद्युत्तरभाष्यानर्थक्यमाशङ्क्योक्तानुमाने प्रतितर्कपराहतिशङ्कोत्थापनपूर्वकं तत्परिहारप्रदर्शनार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयितुं तर्कपराहतिशङ्काया निर्विषयतया निर्दलतां परिहर्तुं पूर्ववाक्यतात्पर्यार्थप्रदर्शनपूर्वकं तामुत्थापयति **एवमित्यादिना** । मूले सदृशस्येत्यनेनैव तदयोगकथनेन तर्कपराहतेरुक्तत्वादप्रत्यक्षत्वमेवेत्यंशस्य वैयर्थ्यमित्याशङ्क्य एकस्य प्रतिज्ञापरत्वात् अपरस्य च तत्रापेक्षितहेतुसमर्पकत्वान्नान्यतरवैयर्थ्यमित्यभिप्रेत्य वाक्यद्वयस्याप्यर्थं तावत् दर्शयति **सर्वेषामपीत्यादिना** । सर्वेषां पक्षाणां दुष्टत्वप्रतिज्ञाया मूलारूढतासिद्ध्यर्थं कथञ्चनेतिपदतात्पर्यमाह **कथञ्चनेति** ।

वा०र०— एकस्येति । सादृश्यस्येत्यर्थः । **अपरस्य** अप्रत्यक्षत्वमित्यस्येत्यर्थः ।

॥ इति तत्प्रतितर्के विकल्पितानां चतुर्णामपि पक्षाणां दुष्टत्वप्रतिज्ञा ॥

* * *

॥ अथ च तत्प्रतिज्ञातार्थस्य विवरणम् ॥

॥ अथ तत्रादौ तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात्
प्रथमतृतीयपक्षयोरनिष्टप्रदर्शनम् ॥

२७ **सु०—** कुत इत्यतः प्रथमपक्षेऽनिष्टमाह **अप्रत्यक्षत्वमिति** ।

अनु०— अप्रत्यक्षत्वमेव स्याद्यतः कार्येष्वणुत्वतः । इति चेत्

यदि परमाणुपरिमाणादणुत्वेन सजातीयं द्व्यणुके, द्व्यणुकपरिमाणाच्च त्र्यणुके परिमाणमुत्पद्यते तदा सर्वकार्येषु अणुत्वप्रसङ्गेन अस्मदाद्यप्रत्यक्षत्वमेव स्याद्यतस्तस्मान्नेति । द्व्यणुकस्याप्रत्यक्षत्वमिष्टमेवेत्यतोऽवधारणम् । सर्वेषामपि कार्याणामप्रत्यक्षत्वमेव स्यात्, न तु (यस्य) कस्यचित्प्रत्यक्षत्वमिति । द्रव्यस्य ह्यस्मदादिप्रत्यक्षत्वं महत्त्वे सत्युद्भूतरूपस्पर्शवत्त्वेन व्याप्तम् । तथा च त्र्यणुकादीनामणुत्वे महत्त्वाभावादप्रत्यक्षत्वं स्यात् ।

एतेन तृतीयोऽपि परास्तः । त्र्यणुकादेरपि ह्रस्वत्वे महत्त्वाभावेनाप्रत्यक्षत्वप्रसङ्गस्य दुर्निवारत्वात् ।

परि०— द्रव्यस्य हीति । बहिर्द्रव्यस्येत्यर्थः । **रूपस्पर्शवत्त्वेनेति** मतभेदेनोद्भूतरूपत्वेनोद्भूतस्पर्शवत्त्वेन चेति ध्येयम् ।

यादु०— द्रव्यस्येति । बहिर्द्रव्यस्येत्यर्थः । **उद्भूतरूपस्पर्शवत्त्वेनेति** । एतन्मते प्रदीपप्रभायाश्चान्द्रमहसो निदाघोष्मणो वायोश्चाप्रत्यक्षत्वमेवेति द्रष्टव्यम् ।

वं०प०— अस्मदादिप्रत्यक्षत्वं चाक्षुषप्रत्यक्षत्वम् । अन्यथा आत्मनोऽप्रत्यक्षतापत्तेरिति ध्येयम् । महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वं वा महत्त्वसमानाधिकरणोद्भूतस्पर्शवत्त्वं वेति नियामकद्वयं ज्ञेयम् । तप्तवारिस्थतेजसि उद्भूतरूपाभावेन स्पार्शनप्रत्यक्षत्वाभावापत्त्या स्पर्शवत्त्वमभिहितमिति ज्ञातव्यम् ।

कं०रा०— एतच्छब्दपरामृष्टं हेतुमाह **त्र्यणुकादेरपीति** ।

श्रीनिधि०— महत्त्वे सति उद्भूतरूपसर्वत्वेनेति । यद्यपीदं न मिलितं प्रयोजकम् । आलोकस्य तप्तवारिस्थतेजसश्चाप्रत्यक्षतापत्तेः । तथापि प्रत्यक्षविशेषे तस्य तस्य प्रयोजकत्वमित्येवमभिहितम् ।

शे०वा०— अप्रत्यक्षत्वमेवेत्युत्तरवाक्यस्य विकल्पितपक्षचतुष्टये दूषणसमर्पकत्वाभावात् आद्यपक्षदूषणपरतया तद्योजयति **प्रथमपक्षेऽनिष्टमाहेति** । अपेक्षितं पूरयन्नाद्यपक्षदूषणपरतया मूलं व्याचष्टे **यदीत्यादिना** । मूलेऽप्रत्यक्षत्वमित्यनेन पूर्तेः अवधारणानर्थक्यमित्याशङ्क्येष्टापत्तिशङ्कापरिहारेण तर्कस्यानाभासत्वोपपादनार्थत्वान्न तदिति भावेन तत्तात्पर्यमाह **द्व्यणुकस्येति** । अणुत्वेनाप्रत्यक्षत्वापादनस्याप्रयोजकतापरिहारायाह **द्रव्यस्य हीति** । बहिर्द्रव्यस्येत्यर्थः । अतो नात्मनोऽप्रत्यक्षत्वप्रसङ्ग इति ध्येयम् । **अस्मदादिप्रत्यक्षत्वमिति** । अस्मदादिलौकिकप्रत्यक्षत्वमित्यर्थः । तेन न सामान्यादिलक्षणादिजन्यास्मदादिप्रत्यक्षविषये गगनादौ व्यभिचार इति ध्येयम् ।

महत्त्वे सतीति । अत्र चोद्भूतत्वं रूपस्पर्शयोरुभयोरपि विशेषणम् । द्रव्यस्य स्पार्शनत्वे उद्भूतस्पर्शवत्त्वमात्रस्यैव तन्त्रत्वे निदाघोष्मणोऽपि प्रत्यक्षत्वापत्त्या फूत्कार इव तद्गतसङ्ख्यादीनां प्रत्यक्षत्वप्रसङ्गः । योग्यद्रव्यवृत्तित्वेन तेषां योग्यतया द्रव्यग्राहकसामग्रीग्राह्यत्वावधारणात् । नाप्युद्भूतरूपवत्त्वमात्रं तन्त्रं चन्द्राद्युद्योतस्य नयनगतपित्तद्रव्यस्य च प्रत्यक्षत्वप्रसक्त्या तद्गतसङ्ख्यादिग्रहप्रसङ्गात् । तदेवमेकैकस्य व्यभिचारादुभयमपि बहिरिन्द्रियजद्रव्यसाक्षात्कारे प्रयोजकमिति नवीनमतमनुसृत्येदमुक्तम् । सम्प्रदायमते उद्भूतरूपवत्त्वमात्रस्यैव तत्र तन्त्रत्वेन विशिष्टस्यातन्त्रत्वात् । अन्यथा चलति पक्षिकाण्डादौ पूर्वोत्तरदेशसंयोगविभागयोरप्रत्यक्षत्वप्रसङ्गात् । पूर्वोत्तरदेशयोः प्रभातमण्डलत्वेनानुद्भूतस्पर्शतयाऽप्रत्यक्षत्वात् । तथा च चलतीति धीरपि तल्लिङ्गिका न स्यात् । न च पूर्वोत्तरदेशानुपलम्भोपलम्भाभ्यां संयोगविभागावनुमाय ताभ्यां गत्यनुमानमस्त्विति वाच्यम् । पूर्वोत्तरदेशयोरप्रत्यक्षत्वेन लिङ्गासिद्ध्या तदयोगादिति द्रष्टव्यम् ॥ अत्र केचित् । सम्प्रदायमतमेव समीचीनम् । उद्भूतरूपवत्त्वमात्रस्य प्रयोजकतायां लाघवात् । न चैवं चन्द्रप्रभादौ सङ्ख्याद्युपलम्भापत्तिरिति वाच्यम् । पक्ष्यादौ संयोगादिप्रत्यक्षानुरोधेनोद्भूतरूपवत्त्वस्यैव प्रयोजकत्वस्य सिद्ध्या तत्र दोषस्य पृष्ठनिविष्टवस्त्रादाविव कल्पनात् । विष्वग्विसारिसरूपसजातीयसंवलनस्यैव चान्ततो दोषत्वात् । न च सामान्यविशेषयोर्भिन्नप्रयोजकप्रयोज्यत्वनियमभङ्गापत्तिः एवं सति स्यादिति वाच्यम् । कार्यगुणं प्रति संयोगं प्रति च द्रव्यत्वेनैव प्रयोजकत्वप्रदर्शनेन तन्नियमाभावात् । अपि च भवतु सामान्यप्रयोजकता रूपवत्त्वस्य । चाक्षुषत्वप्रयोजकता तु रूपवत्त्वग्राहकसामग्रीसमावेशस्यैवेति न तन्नियमभङ्गः । अत एव सत्यपि सामान्यप्रयोजके

रूपवत्त्वे नान्धकारे सुर्वणप्रत्ययः । न चालोकाभावात् तत्र तद्विलम्ब इति वाच्यम् । तस्यालोकाप्रकाश्यत्वात् । न च रूपग्राहकसामग्रीसमावेशः । तेजोरूपस्याभिभूतत्वात् । पार्थिवरूपस्यालोकसापेक्षत्वात् । अत एव स्वव्यवस्थापकयोग्यगुणवत्त्वमपि न प्रयोजकम् । उद्भूतरूपापेक्षया गौरवादिति । तदपरे न क्षमन्ते । एवं तर्हि लाघवादुद्भूतस्पर्शवत्त्वमेव तत्र प्रयोजकमस्तु । न च पक्ष्यादिसंयोगाग्रहप्रसङ्गः । आनुमानिकत्वोपपत्तेः । न च लिङ्गघटकपूर्वोत्तरदेशरूपप्रभानुपलम्भात् तदनुपपत्तिरिति वाच्यम् । रूपेण तदनुमानात् । अन्यथोद्भूतरूपवत्त्वस्य प्रयोजकत्वपक्षेऽपि फूत्कारसंयोगप्रतीतिप्रसङ्गात् । तत्रानुमानिकत्वे च वृथा पक्षपातः । तस्माद्विनिगमनाविरहादुभयं प्रयोजकमिति नवीनमतमेव समीचीनमिति तदेवोपन्यस्तमिह टीकायाम् ।

वस्तुतस्तु महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वमेवात्मेतरद्रव्यप्रत्यक्षतायां तन्त्रमिति सम्प्रदायमतमेव सम्यक् । तथा हि । विशिष्टस्य तत्र प्रयोजकत्वपक्षे महत्त्वसमानाधिकरणोद्भूतरूपस्पर्शवत्त्वस्य प्रत्येकं बहिरिन्द्रियजद्रव्यसाक्षात्कारे तद्द्रव्यचाक्षुषत्वे तत्स्पार्शनत्वे च प्रयोजकतायां गौरवम् । किञ्चैवं सौरालोकस्यापि प्रत्यक्षत्वे तद्गतसङ्ख्यादेरपि प्रत्यक्षत्वापत्तिः । यदि चाश्रयप्रत्यक्षतायामपि तद्गतसङ्ख्यादि न प्रत्यक्षं योग्यवृत्तिसङ्ख्यादेर्योग्यत्वस्यौत्सर्गिकतया तन्नियमाभावादिति मन्यसे, तदा लाघवान्महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वमात्रमेव तथाऽस्तु । चन्द्रोद्योतादेः प्रत्यक्षत्वेऽपि तद्गतसङ्ख्यादीनां तद्वदेवाप्रत्यक्षत्वोपपत्तेः । विष्वग्विसारिसरूपसजातीयसंवलनदोषात्तदनुपलम्भ इति चेत् अत्रापि तुल्यम् । नयनद्वयावच्छिन्नपित्तद्रव्ययोश्च सङ्ख्यासंयोगपरिमाणादीनामपि प्रत्यक्षत्वान्न तत्प्रसङ्गो बाधकः । न चैवं महत्त्वसमानाधिकरणोद्भूतस्पर्शवत्त्वमात्रमेव बहिर्द्रव्यप्रत्यक्षताप्रयोजकमस्त्विति वाच्यम् । तथा सति इन्द्रनीलप्रभाया अप्रत्यक्षत्वप्रसङ्गात् । न च महत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वमात्रमेव तत्र तन्त्रमस्तु लाघवात् । इन्द्रनीलप्रभाया अप्युक्तरूपवत्तया तदप्रत्यक्षत्वाप्रसङ्गाच्चेति वाच्यम् । तथा सत्याकाशस्याप्युक्तरूपविशिष्टत्वेन प्रत्यक्षत्वापातात् । न च जन्यमहत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वस्य तन्त्रत्वान्नोक्तप्रसङ्ग इति वाच्यम् । रसनाग्रवर्तिपित्तद्रव्यस्य तैजसोद्भवेऽप्यप्रत्यक्षत्वेन तदयोगात् । न च त्वत्पक्षेऽपि सुर्वणस्थतैजसभागानामपि महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वात् प्रत्यक्षत्वप्रसङ्ग इति वाच्यम् । तदीयशुक्लभास्वररूपस्योपष्टम्भकपीतरूपाभिभूततयाऽननुभवेऽपि तैजसभागानां सुवर्णत्वेन चाक्षुषतया तस्येष्टत्वात् । वस्तुतस्तु तदीयस्पर्शवत् तद्रूपस्याप्यनुद्भूतत्वान्न महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वं तस्येति न तत्प्रत्यक्षत्वापत्तिः । न चैवं सुर्वणस्याचाक्षुषत्वापत्तिः । अस्पार्शनत्वापत्तेः अनुद्भूतस्पर्शवत्त्वेऽपि तुल्यतयोद्भूतस्पर्शवत्त्वस्यापि स्वीकर्तव्यत्वापातात् । न चैतदस्पार्शनमेव त्वचोपष्टम्भकमात्रस्यैव ग्रहादिति वाच्यम् । तथा सत्येतदचाक्षुषमेव चक्षुषोपष्टम्भकमात्रस्यैव ग्रहादिति तुल्यत्वेनानुद्भूतरूपवत्त्वाक्षतेरिति सङ्क्षेपः ।

ननूक्तव्याप्त्याऽमहत्त्वेनाप्रत्यक्षत्वापादनसमर्थनेऽपि अणुत्वेन तदापादनासमर्थनादप्रयोजकत्वतादवस्थ्यमित्यतो नात्राणुत्वेनाप्रत्यक्षत्वापादनं साक्षादभिमतं किन्त्वणुत्वस्य महत्त्वाभावाविनाभूतत्वात् तेन महत्त्वाभावमापाद्य तेनैव प्रत्यक्षत्वाभावापादनमिति नाप्रयोजकत्वमित्याशयेनाह **तथा चेति** ।

यदि परमाणुपरिमाणाद्ध्रस्वत्वेन सजातीयं द्व्यणुके द्व्यणुकपरिमाणाच्च त्र्यणुके परिमाणमुत्पद्येत तदा सर्वकार्येषु ह्रस्वत्वप्रसङ्गेनास्मदाद्यप्रत्यक्षत्वमेव स्याद्यतस्तस्मान्नेति वाक्ययोजनां मनसि निधाय तृतीयपक्षनिरासपरतयाऽप्येतदेव मूलं (व्याख्याति) व्यापारयति **एतेनेति** । ननु ह्रस्वत्वेनाप्रत्यक्षत्वापादन-मप्रयोजकताग्रस्तमित्यतो न साक्षादत्र तेनाप्रत्यक्षत्वापादनमभिप्रेतं येनोक्तदोषः स्यात् किन्नाम ह्रस्वत्वस्य महत्त्वाभावाविनाभूतत्वात् तेन महत्त्वाभावमापाद्य तेनैवाप्रत्यक्षत्वापादनमिति नाप्रयोजकत्वमित्याशयेनाह **त्र्यणुकादेरपीति** ।

वा०र०— ननु बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारे एवं बहिरिन्द्रियजन्यद्रव्यस्य साक्षात्कारं इत्यादि **शशधरभट्ट्यादिकं** मनसि निधाय द्रव्यपदं व्याचष्टे **बहिरिति** । आत्मनि व्यभिचारादाह **बहिरिति** इत्यादि । शशधरशेष्यनुसारेणाह **अस्मदादिलौकिकेति** । लौकिकत्वविवक्षाप्रयोजनं स्वयमाह **तेनेति** । अत्र तेनेति चेति नकारद्वययुक्तः पाठः । मण्याद्युक्तरीत्या चन्द्राद्युद्योतादावुद्भुतरूपवदनुभूतस्पर्शस्यापि सत्त्वेनोद्भूतरूपवत्वमात्रस्य चन्द्राद्युद्योतादौ प्राप्तातिप्रसङ्गस्य स्पर्शपदेन परिहारायोगात् स्पर्शोऽपि उद्भूतत्वविशेषणमावश्यकमित्याशयेनाह **अत्र चोक्तत्वमिति** । उच्यते । द्रव्यस्पार्शनत्वे उद्भूतेत्यादिमण्याद्यनुसारि । यद्वा द्रव्यस्पार्शनत्वेन उद्भूतेत्यादि वर्धमानानुसारेणाह **द्रव्यस्पार्शनत्वेत्यादिना** । **निदाघेति** । 'निदाघ ऊष्णोपगम उष्णगा' इत्यमरव्याख्यायां निदह्यते निदाघः । घञन्यं त्त्वादित्वात् कुत्वमित्युक्तम् । ग्रीष्मर्तुकालीनस्य दाहकोष्मणः इत्यर्थः । निदाघो-ष्मण इत्युपलक्षणम् । वायूपनीत उष्णादिद्रव्यस्यापीति ज्ञेयम् । अस्तु प्रत्यक्षत्वमित्यत आह **फूत्कार इव इत्यादि** । तृणादिना अग्निप्रज्वालनायोष्ठपुटाभ्यां वायु व्यापार्यते स वायुः फूत्कार इत्युच्यते । स च स्पार्शनप्रत्यक्षतद्गतसङ्ख्यापरिमाणसंयोगविभागादेः कर्मणां च प्रत्यक्षवदित्यर्थः । धमन्यादिना फूत्कारीयवायौ द्रित्र्यङ्गुल्यादेः भित्तिजालादिनिर्गते च वायौ हस्तव्यतिस्त्यादिरूपस्य च परिमाणस्य च पुरुषान्तरप्रेरणानुसारेण क्रमेण जायमानतया तद्गतसङ्ख्यायाः उभयस्य पार्श्ववर्तिनो वाय्वोः पृथक्त्वस्य परत्वापरत्वयोश्च तत्रत्यकर्मणश्च प्रत्यक्षत्वादिति भावः ।

योग्यद्रव्यवृत्तित्वेनेति । न च पृष्ठलग्नवस्त्रादेः वाचाग्रहणेऽपि तद्गतसङ्ख्यापरिमाणादि ग्रहः इति यद्द्रव्यं ग्रहणयोग्यं तद्गहणयोग्यं सङ्ख्यादिकं इति व्याप्तेः व्यभिचार इति वाच्यम् । दोषाभावे सति तद्गहणयोग्यसङ्ख्यादिकमिति नियमाङ्गीकारात् । पृष्ठलग्नवस्त्रादौ पृष्ठलग्नत्वादिकमेव दोषः । अत एवाभिमुख्ये तत्रैव सङ्ख्यादिग्रहः इति द्रष्टव्यम् । चन्द्राद्युद्योतस्य इत्यादि मण्युक्त्यनुसारेणाह **चन्द्राद्युद्योतस्येत्यादि** । उद्योतः प्रभा । कुतो नवीनमतमात्रानुसारता, सर्वसम्मतिः कुतो न स्यात् इत्यतः सम्प्रदायमते विशिष्टस्य प्रयोजत्वाभावात् न सर्वसम्मतिरिति प्रतिपादयन्नेव सम्प्रदायमतं दर्शयति **सम्प्रदायमत इत्यादिना** ।

कुतो विशिष्टस्य अतन्त्रत्वमित्यत आह **अन्यथेति** । **चलतीति** । चन्द्राद्युद्योतादाविति शेषः । भुक्तुकृता तथैवोक्तेः । वक्ष्यति च **देशयोः प्रभेति** । **पूर्वोत्तरेति** । पूर्वदेशविभागोत्तरदेशसंयोगयोः इति

मण्यनुसारेण यथायोग्यं सम्बन्धः न तु यथाक्रमम् । **तथा चेति** । कर्माप्रत्यक्षत्ववादिमते तस्यानुमानिकत्वादिति भावः । **पूर्वोत्तरदेशानुपलम्भेति** । पूर्वदेशे यः पक्ष्यादीनां उपलम्भः उत्तरदेशे च तेषां उपलम्भे च ताभ्यामित्यर्थः । **अप्रत्यक्षत्वेनेति** । प्रभामण्डलत्वेनेत्युक्तरीत्येति भावः । **लिङ्गासाध्येति** । पूर्वदेशानुपलम्भरूपलिङ्गस्यासिद्धत्वेत्यर्थः । देशाप्रत्यक्षतया देशघटितालिङ्गस्याप्रत्यक्षत्वमेव । नापि लिङ्गं अमेयम् । अतीन्द्रियनिरूपितव्याप्तेरतीन्द्रियतया तद्घटितलिङ्गस्याप्यतीन्द्रियत्वात् । न च लिङ्गान्तरेण द्वितीयलिङ्गावगमाः । तत्राप्युक्तरीत्या लिङ्गान्तरस्वीकारे लिङ्गपरम्परयाऽनवस्था स्यात् इति भावः । अत्र नवीनसम्प्रदाययोः कतरो गरीयान् इति चिन्त्यत इत्यादि प्रत्यक्षपरीक्षायां अत्र केचित् इत्यादिना सम्प्रदायमतोपन्यासपूर्वकं अत्र वदन्तीत्यादिना नवीनमतमेव समीचीनमित्यन्तेन नवीनमतसामञ्जस्यमुक्तम् । तदुभयमाह **अत्र केचिदित्यादिना** । **उद्भूतरूपवत्वमात्रस्येति** । निदाघोष्मादेस्तु उद्भूतरूपवत्वाभावात् । न प्रत्यक्षत्वप्रसङ्ग इति ज्ञेयम् । **चान्द्रप्रभादाविति** । **आदि**पदेन नयनगतपित्तद्रव्यादिपरिग्रहः । अत्र एवं सति उद्भूतरूपवत्तया चान्द्रप्रभादेः प्रत्यक्षत्वे सति तत एव तद्गतसङ्ख्यादिप्रत्यक्षापत्तिः इति योजना । दोषस्य कल्पनं समूलमित्युक्तम् । **पक्ष्यादिसंयोगस्येति** । पक्ष्यादेः पूर्वोत्तरदेशसंयोगविभागप्रत्यक्षानुरोधेनेत्यर्थः । **पृष्टलग्नेति** । तादृशवस्त्रादिकं यत्रार्जवावस्थितं तत्र सङ्ख्यादिग्रहेऽपि अनार्जवावस्थस्थितवस्त्रादौ सङ्ख्यादिग्रहाभावेनान्ततो रूपादेरुभयत्रापि अग्रहेण तद्ग्रहप्रतिबन्धकतया दोषस्यावश्यकत्वादिति भावः । **कल्पनादिति** । चान्द्रप्रभावस्थितत्वादिरूपस्येति शेषः । न दोषकल्पना भवतीति अपरितोषादाह **विष्वग्विसारीति** । परितो व्याप्तं सरूपं शुक्लत्वादिना सजातीयं तेजस्त्वेन तादृशेन संवलनं मेलनं तेनाभिन्न इति यावत् । तस्येत्यर्थः ।

एवं सतीति । स्पार्शनत्वचाक्षुषत्वरूपानेकप्रत्यक्षत्वसाधारणप्रत्यक्षत्वसामान्ये स्पार्शनत्वादिविशेषे च उद्भूतरूपवन्मात्रस्यैव प्रयोजकत्व इत्यर्थः । विशेषस्य सामान्यस्य च भिन्नप्रयोजकप्रयोज्यतायाः ज्ञानादितद्विशेषप्रमादौ दृष्टत्वात् इति भावः । **प्रयोजके रूपवत्वेति** । सप्तम्यन्तस्य सत्यपीति पूर्वेणान्वयः । **तस्यालोकाप्रकाशत्वादिति** । तेजसः तेजोऽन्तरप्रकाश्यत्वाभावादिति भावः । न च तेजसि तेजोऽन्तरं व्यञ्जकमिति वाच्यम् । रूपे गृह्यमाणे एव चाक्षुषद्रव्यग्रहणेन सुवर्णे चाभिभूतत्वेन रूपस्य ग्रहणाभावादेव चक्षुषाग्रहाप्रसङ्गे तेजोऽन्तरव्यञ्जकताकल्पनायोगात् इत्याशयात् । तस्मात् अन्धकारे विशेषसामग्र्यभावादेव प्रत्यक्षाभाव इत्याशयेन विशेषसामग्र्यभावमाह **न च तत्र रूपेति** । **अभिभूतत्वादिति** । उपष्टम्भकपार्थिवरूपाभिभूतत्वादित्यर्थः ।

ननु बलवत् सजातीयग्रहणकृतमग्रहणं अभिभवः इत्युच्यते तत् कथमन्धकारे सजातीयाग्रहणदशायां उत रूपाभिभवः ततः सामग्रीसद्भाव इति चेत् न । अभिभवश्च बलवत्सजातीयसम्बन्ध एवेति मण्युक्तरीत्या बलवत्सजातीयसम्बन्धमात्रस्य एव लाघवेनाभिभवरूपतया तस्य चान्धकारेऽपि सत्त्वेनाभिभवसद्भावात् सामग्र्यभावोपपत्तेः इत्याशयात् । ननु तेजोरूपस्याभिभूतत्वेऽपि उपष्टम्भकपार्थिवरूपत्वस्य अनभिभूतस्य सद्भावात् सामग्रीसद्भावः किं न स्यादित्यत आह **पार्थिवेति** । **आलोकेति** । तथा चालोकरूप-

कारणाभावात् न सामग्रीसद्भावः इति भावः । **स्वव्यवस्थापकेति** । द्रव्यग्राहकबहिरिन्द्रियव्यवस्थापक उद्भूतविशेषगुणवत्वमित्यर्थः । अत्राकाशवारणाय **द्रव्यग्राहकेति** । ज्ञानादिकं उद्भूतमिति मतानुसारेण मनसा गृह्यमाणज्ञानसुखादिकमादाय आत्मनि प्रसङ्गः । तद्व्यावृत्त्यै **बहिः** पदम् । उद्भूतपदाभावे चक्षुरादावति-प्रसङ्गः । तद्व्यावृत्त्यै **उद्भूतेति** । विशेषपदं स्पष्टार्थम् । एतन्मते प्रभाऽपि प्रत्यक्ष एवेति इति रुचिदत्तः । **लाघवादिति** । अत्र लाघवं न उद्भूतरूपवत्वापेक्षया । अपि तु उभयप्रयोजकतावादिमतनिरासोभयापेक्षया लाघवम् । यथा केवलोद्भूतरूपत्वमात्रप्रयोजकतावादिना आश्रीयते तथैवोभयापेक्षया लाघवादुद्भूतरूपवत्व-स्पर्शवत्वमात्रमेव प्रयोजकमस्त्विति लाघवं बोध्यम् । उद्भूतरूपवत्व इव उद्भूतस्पर्शवत्वेऽपि लाघवाविशेषे । उद्भूतरूपवत्वमेवेत्यवधारणे उद्भूतस्य स्पर्शवत्वमेवेत्यवधारणस्यापत्त्या तदुभयं प्रत्येकमेव प्रयोजकमिति हृदयम् । **न च पक्ष्यादीति** । चन्द्रोद्योतादिरूपाधारणं तया चलतिपक्षिकाण्डादौ पूर्वदेशविभागोत्तरविदेश-संयोगप्रत्यक्षानुपपत्तिः प्रभायां उद्भूतस्पर्शवत्वाभावेन पूर्वोत्तरदेशरूपप्रभामण्डलग्रहसापेक्षतद्विभागसंयोगयोः पक्ष्यादौ ग्रहायोगादित्यर्थः । **रूपेणेति** । रूपस्य हि पूर्वदेशानुपलम्भ उत्तरदेशोऽपलम्भश्चास्ति । ताभ्यां उपलम्भानुपलम्भरूपालिङ्गाभ्यां रूपाश्रयतेजोरूपदेशस्यापि कर्मसंयोगादिमत्तयाऽनुमानोपपत्तेरित्यर्थः । न च देशाप्रत्यक्षत्वे तत्र तदुपलम्भादिकमपि न ज्ञातुं शक्यं इति वाच्यम् । योग्यस्य भूतलप्रदेशादेरेव परस्परा-धिकरणस्य देशत्वेन विवक्षणात् इति ज्ञेयम् । **अन्यथेति** । अस्यैव विवरणं **उद्भूतेत्यादि** । **फूत्कारेति** । फूत्कारे उद्भूतरूपाभावेनाप्रत्यक्षतया आत्माश्रयप्रत्यक्षाभावे तत्संयोगादिप्रत्ययानुपपत्तेरित्यर्थः ।

आनुमानिकत्वे चेति । स्पर्शस्य योग्यपृष्ठादिदेशोपलम्भानुपलम्भाभ्यां फूत्कारं अनुमाय तत्संयो-गादिप्रतीतिरित्यङ्गीकारे प्रभायाः प्रत्यक्ष इव त्वत्पक्षे फूत्कारस्य आनुमानिकत्वमिति समानमिति वृथोद्भूतरूपवत्वमेव प्रयोजकमिति पक्षे आग्रह इत्यर्थः । एवं मूले उपन्यस्तं उभयप्रयोजकतामतं समर्थयितुं सम्प्रदायमतसमीचीनतावादिपक्षं उभयप्रयोजकतावादिरीत्या प्रदूष्य प्रकृतं निगमयति **तस्मात् विनिगमनेति** । एवं बहिरिन्द्रियजद्रव्यसाक्षात्कारे चाक्षुषत्वे स्पार्शनत्वे च प्रत्येकमुद्भूतरूपवत्वे सति उद्भूतस्पर्शवत्वं प्रयोजकं पर्यवस्यतीति गौरवमिति मण्यनुसारेण विशिष्टप्रयोजकत्वे दूषणं सम्प्रदायमतोररीकारपूर्वकमाह **वस्तुतस्तु इत्यादि गौरवमित्यन्तेन** । **इति नवीना** इति मणिस्थनवीनयदरुचिदत्तास्वरससूचनपर एवमपि सौरतेज-प्रत्यक्षत्वे इत्यादि तुल्यमित्येतत् रुचिदत्तानुसारेणाह **किञ्चेत्यादिना तुल्यमित्यन्तेन** । शशधरीय किञ्चा-न्यत्रानुगतनियामकाभावात् इत्यतः तद्वाक्यावताररूपशेष्यनुसारेण नयनगतपित्तद्रव्यगतसङ्ख्यादेः चन्द्राद्युद्योत-गतसङ्ख्यादिवैषम्यात् इष्टापादनत्वं इत्याह **नयनद्वयेति** । वर्धमानमण्यनुसारि वैशेषिकसूत्रोपस्कारानुसारेणाह **न चैवं महत्वसमानाधिकरणेत्यादिना तदयोगादित्यन्तेन** । उद्भूतस्पर्शवत्वस्य प्रयोजकत्वे मणावुक्तदोषं स्वपक्षे परिहरति **न च त्वत्पक्ष इति** । रूपं तस्य उद्भूतमेव किन्तु उपष्टम्भकपित्तरूपादिभूतमित्यादि-मण्यनुसारेणाह **तदीयशुक्लेत्यादिना इष्टत्वादित्यन्तेन** । ननु स्पर्शवत् रूपमपि अनुद्भूतमेव अस्तु इत्यादि तत्रत्यास्वरसाभिधायिरुचिदत्तानुसारेणाह **वस्तुतस्तु इत्यादिना सङ्क्षेपः इत्यन्तेन** । न च ग्रीष्मोष्मणः

तप्तवारिस्थतेजसश्च प्रत्यक्षत्वापत्तिः । उद्भूतरूपाभावादिति चेत् । न । इष्टत्वात् । किन्तु वायुस्पर्शवत् तत्र स्पर्शनमात्रग्रहणम् । अन्यथा विशिष्टप्रयोजकत्वेऽपि अगतेः । उद्भूतस्पर्शस्य तत्प्रत्यक्षताप्रयोजकतायां तु प्रदीपचान्द्रप्रभादेरप्रत्यक्षतापत्तिप्रसङ्गः । उष्णवारिस्थतेजसोऽपि चाक्षुषताप्रसङ्गश्चानिष्ट इति न वैपरीत्यं शङ्कनीयं इत्याद्यभिप्रेत्याह **सङ्क्षेप इति** । मूले **न च उद्भूतरूपस्पर्शयोः अन्यतराभावेनेति** । प्राक् विशिष्टस्य प्रयोजकत्वशङ्कनेऽपि चाक्षुषत्वं वा स्पार्शनवत्वं वा आपाद्यतया प्रत्यक्षत्वापत्तिरिति पूर्ववाक्येऽभिप्रेतमिति विकल्पपूर्वकं तत्र प्रयोजकद्वयस्य भिन्नभिन्नस्यैव अङ्गीकारेणाशङ्कनात् न कश्चित् दोषः । नवीनमतानुसारेण इदं मूलम् । पूर्वमूलं तु सम्प्रदायमतानुसारेणेति वा न दोषः । अत्रोभयोः पृथगेव प्रयोजकत्वं गौरवं तु प्रामाणिकमिति प्रतिभाति । विस्तरेण लेख्यमस्ति ।

विट्ठल०— कुतो प्रत्यक्षत्वमित्यतः प्रत्यक्षतासामग्र्यभावादित्याह **द्रव्यस्येति** । बहिर्द्रव्यस्येत्यर्थः । **उद्भूतरूपस्पर्शवत्त्वेनेति** । मतभेदेन उद्भूतरूपत्वेन उद्भूतस्पर्शवत्त्वेन वेति ध्येयम् ।

॥ इति तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात् प्रथमतृतीयपक्षयोरनिष्टप्रदर्शनम् ॥

* * *

॥ अथ च तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात् द्वितीयचतुर्थपक्षयोरनिष्टप्रदर्शनम् ॥

२८ सु०— द्वितीये तु परमाणुद्व्यणुकयोरपि महत्त्वे प्रत्यक्षत्वापत्तिः । न चोद्भूतरूपस्पर्शयोरन्यतराभावेन तदभावः, त्र्यणुकादावपि तदा(दभावा)पत्तेः ।

अत एव चतुर्थोऽपि परास्तः ।

दीर्घत्वे महत्त्वस्यावर्जनीयत्वादिति पक्षद्वयदूषणं स्पष्टत्वान्नोक्तम् ।

यद्यपीदं परिमाणावान्तरजातीनामणुत्वादीनामप्रामाणिकत्वोक्त्या परिहृतमेव तथाऽपि तस्यैवार्थस्य स्फुटीकरणार्थं पुनराशङ्कितमित्यदोषः ।

परि०— तदभावापत्तेरिति । अप्रत्यक्षत्वापत्तेरित्यर्थः । कारणीभूतपरमाणुद्व्यणुकयोरसत उद्भूतरूपादेस्तत्कार्यत्र्यणुकादावप्यभावादित्यर्थः । **अत एवेति** । परमाणुद्व्यणुकयोः प्रत्यक्षत्वापातादेवेत्यर्थः । तत्प्रयोजनकमहत्त्वाभावात् कथमेतदित्यत आह **दीर्घत्व इति** । **इति पक्षद्वयेति** । द्वितीयचतुर्थरूपपक्षद्वयदूषणमित्यर्थः । मूले आद्यपक्षदूषणमात्रप्रतीतावप्येतेन तृतीयोऽपि

परास्त इत्युक्ततया तेन पक्षद्वयदूषणं लब्धमिति भावः । **अप्रामाणिकत्वोक्त्येति** । पूर्वं मूले कल्पितशब्दैवशब्दयोः प्रयोगस्याप्रामाणिकत्वोक्तिपरतया व्याख्यानात् ताभ्यां तासामप्रामाणिकत्वोक्त्येत्यर्थः ।

यादु०— अत एव चतुर्थोऽपीति । परमाणुद्व्यणुकयोरपि दीर्घत्वे प्रत्यक्षत्वापत्तेरेवेत्यर्थः । ननु तत्र प्रत्यक्षत्वप्रयोजकमहत्त्वाभावात् कथं प्रत्यक्षतापादनमित्यत आह **दीर्घत्वे(ने)ति** । **अप्रामाणिकत्वोक्त्येति** । 'त्र्यणुकाद्येषु कल्पितमि'त्यत्रेति शेषः ।

वं०प०— त्र्यणुकादावपीति । रूपं स्पर्शो वोद्भूतो न भवतीत्युद्भूतपदोपरि भारः । रूपं स्पर्शो वा गृह्यत एव, विविच्य तु न गृह्यते सूक्ष्मत्वादिति प्राञ्च इत्येतन्मतानुसारेणेदम् । **अत एव** गूढाभिसन्धित्वादेव ।

कं०रा०— त्र्यणुकादावपीति । परमाणुद्व्यणुकयोरुद्भूतरूपस्पर्शाभावे कारणगुणपूर्वकत्वात् कार्यगुणानां कार्ये त्र्यणुकादावप्युद्भूतरूपस्पर्शाभावापत्त्या त्र्यणुकादेरपि प्रत्यक्षत्वाभावापत्तेरित्यर्थः । अतःशब्दपरामृष्टं हेतुमाह **दीर्घत्व इति** । **पक्षद्वयदूषणमिति** । प्रागुक्ततृतीयपक्षदूषणमिदानीमुक्तं चतुर्थपक्षदूषणं च स्पष्टत्वाद्भाष्यकारैर्नोक्तमित्यर्थः ।

श्रीनिधि०— त्र्यणुकादावपि तदभावापत्तेरिति । कारणगतगुणस्य सजातीयकार्यगतगुणारम्भकत्वात् विजातीयारम्भकत्वाभावादिति भावः । एवं च त्र्यणुकादीनां अप्रत्यक्षत्वं स्यादिति भावः । यद्वा **तदभावापत्तेः** = प्रत्यक्षत्वभावापत्तेरित्यर्थः । उपपादनं तु अध्याहारेण प्राग्वत् । अनेन द्वितीयपक्षदूषणमपि अप्रत्यक्षत्वमेव स्यादित्यंशेन कृतमिति सूचितम् । **अप्रामाणिकत्वोक्त्येति** । कल्पितमेवेत्यनेनाप्रामाणिकत्वस्य कथनादिति भावः । **द्विपक्षमिति** । द्वयोः पक्षयोः समाहारो द्विपक्षम् । पात्रादित्वात् न द्विगोरिति ङीप् ।

शे०वा०— द्वितीयचतुर्थपक्षयोर्मूलेऽदूषणात्प्रसक्तां न्यूनतामनुक्तिनिमित्तोपन्यासेन परिहरन् स्वयं पक्षद्वयं दूषयति **द्वितीये त्वित्यादिना** । ननु महत्त्वेन प्रत्यक्षत्वापादनं न युक्तम् । तन्मात्रस्यातिप्रसङ्गेनाप्रयोजकत्वात् । किन्तु महत्त्वे सत्युद्भूतरूपस्पर्शान्यतरवत्त्वमेव । न च तत्परमाणुद्व्यणुकयोरस्तीति कथं तदापादनमित्याशङ्क्य निषेधति **न चेति** । **तदापत्तेरिति** । तथा सत्यारम्भके उद्भूतरूपस्पर्शयोरभावेन तदारब्धत्र्यणुकादावपि तयोरन्यतराभावप्रसङ्गेन विशिष्टप्रयोजकविरहादप्रत्यक्षत्वापत्तेरित्यर्थः । ततश्च त्र्यणुकादिप्रत्यक्षत्ववादिना तदारम्भकद्व्यणुकादौ तयोरन्यतराभावस्य वक्तुमशक्यत्वेन विशिष्टप्रयोजकसद्भावात् तत्प्रत्यक्षत्वप्रसङ्गोऽवर्जनीय इति भावः । **अत एवेति** । परमाणुद्व्यणुकयोरपि प्रत्यक्षत्वापत्तेरेवेत्यर्थः । दीर्घत्वेऽप्यमहत्त्वादेवाप्रत्यक्षत्वोपपत्तेरप्रयोजकमेतदित्यतो न दीर्घत्वेन साक्षात्प्रत्यक्षत्वापादनमत्राभिमतं किन्नाम

दीर्घत्वस्य महत्त्वाविनाभूतत्वात् तदापादनमुखेनैवेति नाप्रयोजकत्वमित्याशयेनाह **दीर्घत्व इति** । मूले 'सदृशस्य ही'त्यादिशङ्कानुत्थानमाशङ्क्य निराकरोति **यद्यपीत्यादिना** । **परिमाणावान्तरेति** । परिमाणत्वावान्तरेत्यर्थः । **अणुत्वादीनामिति** । अणुत्वत्वादीनामित्यर्थः ॥ **अप्रामाणिकत्वोक्त्येति** । 'महत्त्वं चैव दीर्घत्वं त्र्यणुकाद्येषु कल्पितम्' इत्यादिनेति शेषः । **तस्यैवार्थस्येति** । महत्त्वं चैव दीर्घत्वमित्यादिनोक्तस्य परिमाणत्वावान्तरजातीनामणुत्वत्वादीनामप्रामाणिकत्वस्यैवेत्यर्थः ।

वा०र०— परिमाणत्वस्याजातित्वेन तदवान्तरज्ञातेरयोगादाह **परिमाणत्वेति** । भावप्रधानत्वाभिप्रायेण व्याख्याति **अणुत्वत्व इति** ।

विठ्ठल०— अत एव चतुर्थेऽपीति । परमाणुद्व्यणुकयोरवार्धत्वेऽपि प्रत्यक्षत्वापत्तेरेवेत्यर्थः । ननु प्रत्यक्षताप्रयोजकमहत्त्वाभावात् कथं प्रत्यक्षतापादनमित्यत आह **दीर्घत्व इति** । **अप्रामाणिकत्वोक्त्येति** । 'महत्त्वं चैव दीर्घत्वमि'त्यत्र कल्पितशब्देनैवशब्देन च अप्रामाणिकत्वोक्तेरित्यर्थः । **स्फुटीकरणार्थमिति** । परिमाणस्य सर्वत्रैकजातीयत्वे सर्वत्रापि कार्यद्रव्यस्य प्रत्यक्षत्वमप्रत्यक्षत्वं वा स्यादित्यादि बाधकपरिहारादिनेत्यर्थः । परमाणुत्वादित्यादौ दीर्घदीर्घत्वादित्यपि ग्राह्यम् ।

॥ इति तत्प्रतितर्कोक्तविकल्पितपक्षचतुष्टयात् द्वितीयचतुर्थपक्षयोरनिष्टप्रदर्शनम् ॥
॥ इति तत्प्रतिज्ञातार्थस्य विवरणम् ॥
॥ इति परिमाणसमवायिकारणनिरासार्थं परिमाणोत्कर्षापकर्षाभावकल्पितशङ्कानिरासे तच्छङ्काप्रदर्शनपूर्वकं तत्र प्रतितर्कपराहतिप्रदर्शनम् ॥

* * *

॥ अथ परिमाणसमवायिकारणनिरासार्थं परिमाणोत्कर्षापकर्षाभावकल्पितशङ्कानिरासे उक्तस्य प्रतितर्कस्य स्वपक्षे बाधकाभावः ॥
॥ अथ तत्रादौ तत्प्रतितर्के विकल्पितपक्षचतुष्टयात् प्रथमद्वितीयपक्षयोरङ्गीकरणम् ॥
॥ अथ तत्राप्यादौ तत्रस्थद्वितीयविकल्पितपक्षाङ्गीकारः ॥

२९ **सु०—** अत्र तावद्विकल्पितेषु महत्त्वपक्षं गृह्णाति **न महत्त्वं चेति** ।

अनु०— न महत्त्वं च परमाणावणावपि ।

'च'शब्दो दीर्घत्वसमुच्चयार्थः । **अणौ** द्व्यणुके । 'कथं न कथ्यत' इति वक्ष्यमाणमत्रापि सम्बध्यते ।

यदुक्तं 'किमणुत्वस्योत्पत्तिः साध्यत' इत्यादि, तत्र परमाणुमहत्त्वाद् द्व्यणुके महत्त्वम्, द्व्यणुकमहत्त्वात् त्र्यणुकमहत्त्वमुत्पद्यत इत्येषः पक्षस्तावत्परिगृह्यत इत्यर्थः ।

यद्यप्यत्र परिमाणावान्तरजात्यभावान्नैवं विकल्प एव युज्यत इति वक्तव्यम्, तथाऽपि तदभावमेवोपपादयितुं गूढाभिसन्धिना पक्षपरिग्रहः कृत इति ज्ञातव्यम् ।

परि०— महत्त्वपक्षमिति । मूले महत्त्वपक्षस्य स्वशब्देनोपादानादेवमुक्तम् । वस्तुतस्तु महत्त्वदीर्घत्वपक्षावित्यर्थः । **परमाणुमहत्त्वमिति** । परमाणुदीर्घत्वादीत्यपि ध्येयम् । **गूढाभिसन्धिनेति** । 'अणुत्वं च महत्त्वं च यतो वस्तुव्यपेक्षये'त्यत्र व्यक्तीकरिष्यमाणाभिप्रायं गूढं कृत्वा पूर्वार्धेन पक्षद्वयं उत्तरार्धेनाणुत्वरूपपक्षं च परिजग्राहेत्यर्थः ।

श्रीनिधि०— यद्यप्यत्र परिमाणत्वावान्तरजात्यभावादिति । यद्यपि इदं इत्यादिना पूर्वशङ्का-बीजमेव नास्तीति शङ्कितम् । अत्र तु परिमाणत्वावान्तरजात्यभावाद्विकल्पोऽनुपपन्न इत्येवोत्तरं वक्तव्यमिति चोद्यं परिह्रियत इति भेदः । न च स्फुटीकरणार्थं पुनराशङ्कितमित्युक्तेः । स्फुटीकरणार्थमेव उत्तरग्रन्थः इति नैतद् चोद्यावकाशः । त्र्यणुकाद्येषु कल्पितमित्युक्तस्य परिमाणावान्तरजातिर्नास्ति इत्युक्तास्फुटीकरणा-सम्भवादिति । **गूढाभिसन्धिनेति** । एवं महत्त्वमिति पक्षपरिग्रहेण अवान्तरजातिं निराकरिष्यामीति गूढाभि-सन्धिनेत्यर्थः ।

शे०वा०— दीर्घत्वसमुच्चयार्थ इति । यद्यपि परमाण्वादिगतमहत्त्वस्य द्व्यणुकादिगतमहत्त्वजनक-त्वमिति प्रथमपक्षस्यैवायं परिग्रह इति दीर्घत्वसमुच्चयार्थतया चशब्दव्याख्यानमयुक्तमित्याभाति । तथाऽपि कारणगतमहत्त्वदीर्घत्वयोरितरेतरसापेक्षयोरेव कार्यगतमहत्त्वजनकत्वं न तु नैरपेक्ष्येणेति ज्ञापयितुमेवं व्याख्या-तम् । अत एव 'न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेदि'त्यत्र चापिशब्दावितरेतरयोगार्थतया व्याख्याता-वित्यवधेयम् । अणावपि परमाणावित्यणावित्यस्य परमाणुविशेषणतायामानर्थक्यं द्व्यणुके महत्त्वस्यानुक्तिश्च भवतीत्यभिप्रेत्याणावित्येतदेव तत्परतया व्याचष्टे **अणाविति** । साकाङ्क्षतया प्रसक्तामाभासतां परिहरति **कथं नेति** । प्रथमपक्षपरिग्रहस्य मूलारूढतामुपदर्शयति **यदुक्तमित्यादिना** । भाष्यकारीयपक्षपरिग्रहस्यानर्थक्य-माशङ्क्य परिहरति **यद्यप्यत्रेत्यादिना** । तन्मूलकदूषणाभिधानं तु दूरापास्तमित्येवार्थः । **तदभावमिति** । परिमाणावान्तरजात्यभावमित्यर्थः ।

वा०र०— कथं न कथ्यते इति वक्ष्यमाणमिति मूलम् । अयं च न महत्त्वमिति विद्यमाननकारस्य कथं कथ्यते इति वक्ष्यमाणसम्बन्धलब्धार्थः कथितः । यद्वा सर्वस्यापि सम्बन्धनियता उक्तावपि न शब्दसत्त्वात् योज्यतया न शब्दपरित्यागेन इतरसम्बन्धो बोध्यः । केचित्तु परमाणावित्यत्र कथं कथ्यते इत्येतावदेवा-

पेक्षितत्वेऽपि अणावपीत्यत्र विशिष्टस्यापेक्षितत्वं इत्याशयेन विशिष्टसम्बन्धोक्तिरित्याहुः । न त्वत्र न महत्त्वमित्यत्र नेति सिद्धान्तप्रतिज्ञेति स्वीकृत्य महत्त्वं चेत्यारभ्यैव वाक्यमिति पक्षे कथं नेति सम्पूर्णस्य यथाश्रुत एव सम्बन्ध इति कल्पनीयम् । प्रथमपक्षं परिगृह्णति न महत्त्वं चेतीत्येवं विशिष्टावतारायोगप्रसङ्गात् । अत एव तारतम्येत्युत्तरभाष्यावतारमूलेन महत्त्वं चेत्यसदित्यनुवाद इति ज्ञेयम् ।

स०ना०— महत्त्वं पक्षं परिगृह्णातीति । मुखत इति शेषः । दीर्घत्वपक्षोऽपि अनुक्तसमुच्चायकेन चशब्देन सङ्गृहीत इति भावेनाह **चशब्द इति** । एतेनास्य मूलस्य प्रथमपक्षपरिग्रहार्थत्वेन चशब्दस्य दीर्घत्वसमुच्चयार्थत्वकथनमयुक्तमिति परास्तम् । **एष पक्षस्तावदिति** । मुखत इति शेषः ।

विट्ठल०— गूढाभिसन्धिनेति । 'अणुत्वं चे'ति च 'महत्त्वं च यतो वस्तुव्यपेक्षये'त्यत्राभिसन्धिं व्यक्तीकरिष्यतीति भावः ।

॥ इति तत्रस्थद्वितीयविकल्पितपक्षाङ्गीकारः ॥

* * *

॥ अथ च तत्रस्थप्रथमविकल्पितपक्षाङ्गीकारः ॥

३० **सु०— अत एव पक्षान्तरमपि गृह्णाति कथमिति ।**

अनु०— कथं त्र्यणुकपूर्वेषु नाणुत्वमपि कथ्यते ।

परमाणोरणुत्वाद् द्व्यणुकेऽणुत्वं, द्व्यणुकाणुत्वात् त्र्यणुकेऽणुत्वं ततश्च चतुरणुकेऽणुत्वमिति वा पक्षः परिगृह्यत इति भावः ।

परि०— उत्तरार्धमवतारयति **अत एवेति** । परिमाणावान्तरजात्यभावोपपादनार्थं प्रवृत्तत्वादेवेत्यर्थः । अन्यथा व्यवस्थितमेकमेव पक्षं परिगृह्णीयादिति भावः । अवतारितार्धस्य तात्पर्यमाह **परमाणोरिति** ।

श्रीनिधि०— ननु 'महत्त्वं च परमाणावणावपी'त्यनेन अवान्तरजात्यङ्गीकारः कृत इव भाति, तत्कथं गूढाभिसन्धित्वमित्यत आह **अत एव पक्षान्तरमिति** । नेयं महत्त्वमित्याद्युक्तिः जात्यभ्युपगमाभिप्राया, किन्तु तद्भावाभिप्राया, अन्यथा एकत्रानणुत्वमहत्त्वोक्त्ययोगात् अवान्तरजातिमतोरेकदैकाधिकरण्यस्याभावस्य नीलपीतरूपयोर्दर्शनादिति भावः ।

शे०वा०— अत एवेति । पक्षपरिग्रहस्य तदभावोपपादनार्थत्वादेवेत्यर्थः ।

विट्ठल०— अत एवेति । परिमाणावान्तरजात्यभावोपपादनार्थं प्रवृत्तत्वादेवेत्यर्थः । अन्यथा व्यवस्थितमेकमेव पक्षं प्रतिग्रहणीयादिति भावः ।

॥ इति तत्रस्थप्रथमविकल्पितपक्षाङ्गीकारः ॥
॥ इति तत्प्रतितर्के विकल्पितपक्षचतुष्टयात् प्रथमद्वितीयपक्षयोरङ्गीकरणम् ॥

* * *

॥ अथ च स्वपक्षे तदङ्गीकारेऽपि बाधकाभावप्रदर्शनम् ॥
॥ अथ तत्रादौ तत्पक्षद्वयोक्तदोषापत्तिं व्याघातं चाधिकं बाधकमितिशङ्कांप्रदर्शनपूर्वकं तत्पक्षद्वयोक्तदोषोक्तव्याहतिपरिहरणम् ॥

३१ **सु०— नन्वेवं सति पक्षद्वयोक्तदोषापत्तिर्व्याघातश्चाधिकः । तथा हि ।**

'परमाणुमारभ्यान्त्यावयविपर्यन्तस्योद्भूत(रूप)स्पर्शवतो महत्त्वे सर्वस्यापि प्रत्यक्षत्वं स्यात्, अणुत्वे चाप्रत्यक्षत्वं स्यात् । न च परमाण्वादेः प्रत्यक्षत्वं, त्र्यणुकादेरप्रत्यक्षत्वं युक्तम् । प्रत्यक्षत्वाप्रत्यक्षत्वे च परस्परव्याहते, यत्प्रत्यक्षं घटादि न तदप्रत्यक्षम्, यच्चाप्रत्यक्षं गगनादि न तत्प्रत्यक्षमिति तयोः परस्परपरिहारेणैव वृत्तेः ।

किञ्च महत्त्वाणुत्वे परस्परविरुद्धे कथमेकैकत्राङ्गीकर्तुमुचिते । (तदाह) यथा आह सूत्रकारः 'दृष्टान्ताच्च' इति । न च कालभेदेन विरोधपरिहारः, परिमाणस्य यावद्द्रव्यभावित्वादि'त्याशङ्क्य प्रत्यक्षत्वाप्रत्यक्षत्वप्रसङ्गयोस्तावदिष्टापादनत्वं वदन् व्याहतिं परिहरति प्रत्यक्षत्वेति ।

अनु०— प्रत्यक्षत्वतदन्यत्वे पुरुषापेक्षयाऽखिले ।

परमाण्वादौ अखिलेऽपि द्रव्ये प्रत्यक्षत्वाप्रत्यक्षत्वे स्त एवेति नैतौ प्रसङ्गौ युक्तौ । **न च व्याहतिः । पुरुषभेदापेक्षया व्यवस्थोपपत्तेरिति । एतच्चोत्तरत्र स्फुटीभविष्यति ।**

परि०— पक्षद्वयोक्तदोषेति । दीर्घत्वपक्षस्य चशब्देन समुच्चिततया कण्ठोक्तत्वाभावात् पूर्वार्धोत्तरार्धयोः कण्ठोक्तं महत्त्वाणुत्वपक्षरूपपक्षावभिप्रेत्य पक्षद्वयेत्युक्तम् । इष्टापत्तिं निराह **न च**

परिमाण्वादेरिति । व्याघातश्चेत्युक्तं व्यनक्ति **प्रत्यक्षत्वेति** । **महत्त्वाणुत्वे चेति** । यद्यपि अणुत्वमहत्त्वे चेति वाच्यम् । अजाद्यदन्तमिति स्मरणात् । तथापि मूलोक्तिक्रमानुरोधेनैवमुक्तम् । **यथा(तदा)ह सूत्रकार इति** । अणुत्वमहत्वे विरुद्धे इत्येतदाह सूत्रकारः कणाद इत्यर्थः । तत्सूत्रं पठति **दृष्टान्ताच्चेतीति** । अणुत्वमहत्त्वयोरेकत्रासमावेशे सति कथं कुव(लयाम)लामलकबिल्वादिषु लौकिकानां उत्तरोत्तरापेक्षया पूर्वपूर्वस्याणुत्वव्यवहारः । पूर्वपूर्वापेक्षयोत्तरोत्तरस्य महत्त्वव्यवहार इत्याशङ्क्य तेषु महत्त्वमेव नाणुत्वं इति वक्तुं इदं सूत्रम् । यथा शुक्लेष्वपि पटशङ्खस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारेऽपि उत्तरोत्तरापेक्षया पूर्वपूर्वस्य शुक्लतमत्वादिव्यवहारो नेत्येतावता नीलत्वादिकं नास्ति किन्तु शुक्लत्वमेव तद्दृष्टान्तेन इहापि कुव(लयाम)लामलकबिल्वादिषु महत्तरमहत्तमत्वादिमहत्त्वोत्कर्षापेक्षया अणुत्वव्यवहारेऽप्यणुत्वं नास्त्येव । किन्तु महत्त्वमेवेति तद्व्यवहारो मुख्यः, अणुत्वव्यवहारो गौणो न मुख्यः । परमाण्वादाविव अणुत्वपरिमाणासत्त्वादिति तदीयसूत्राभिप्रायः ।

यादु०— सूत्रकारः कणादः । **दृष्टान्ताच्चेतीति** । एककालत्वादिति पूर्वसूत्रे हि कुवलामलकबिल्वेष्वणुत्वव्यवहारो भाक्त इत्यत्र हेतुरुक्तः इदानीं तत्र महत्त्वव्यवहारो मुख्य इत्यत्र हेतुकथनायेदं सूत्रं, तस्यायमर्थः । यथा वस्तुगत्या शुक्लेष्वेव पटशङ्खस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारस्तथा वस्तुगत्या महत्स्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारः, अतोऽसौ मुख्य इति । अत्र यथा पटस्य स्फटिकवदुत्कृष्टशुक्लत्वाभावेऽपि न नीलत्वादिकं किन्त्वपकृष्टं शुक्लत्वमेव, तथा कुवलादेर्बिल्ववदुत्कृष्टमहत्त्वाभावेऽपि नाणुत्वं, किन्तु महत्त्वमेवातस्तद्व्यवहार एव तत्र मुख्य इत्यभिप्रायान्महत्त्वाणुत्वयोर्नैकत्र समावेश इति प्रकृतलाभ इति द्रष्टव्यम् । ननु यन्महत्त्वोपेतं त्र्यणुकादि तत्सर्वेषां प्रत्यक्षमेव यच्च तच्छून्यं परमाण्वादि न तत्कस्यापि प्रत्यक्षम्, अतः कथमखिलेऽपि द्रव्ये पुरुषभेदापेक्षयाऽपि प्रत्यक्षत्वाप्रत्यक्षत्वे उपपद्येते इत्यत आह **एतच्चेति** । 'अणुत्वं च महत्वं च यतो वस्तुव्यपेक्षये'त्युत्तरानुव्याख्यावसरे न प्रत्यक्षत्वाप्रत्यक्षत्वे महत्त्वादिमात्रनिमित्तके किन्तु पुरुषाणामिन्द्रियपाटवापाटवनिमित्तके । अन्यथा मन्दविलोचनेनापि त्र्यणुकमुपलभ्येतेत्यादिना स्फुटीभविष्यतीत्यर्थः ।

कं०रा०— पुरुषभेदेति । प्रत्यक्षत्वाप्रत्यक्षयोः पुरुषभेदापेक्षया व्यवस्थोपपत्तेरित्यर्थः ।

श्रीनिधि०— उद्भूतरूपस्पर्शवतो महत्त्वे सर्वस्यापि प्रत्यक्षत्वं स्यादिति । अत्रापि रूपस्पर्शग्रहणेन चाक्षुषप्रत्यक्षत्वं स्पार्शनप्रत्यक्षत्वं च स्यादित्यभिप्रेतम् । **दृष्टान्ताच्चेति** । गोत्वाश्वत्ववदिति दृष्टान्तात् महत्त्वानणुत्वेनैकत्रानङ्गीकर्तुमुचिते परस्परविरुद्धत्वादित्यनुमानं चेति न्यायसूत्रस्यार्थः । ननु प्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकयोरणुत्वमहत्त्वयोः सत्त्वे एकं प्रत्येव प्रत्यक्षत्वात् प्रत्यक्षत्वे स्यातामित्यापाद्यत एवं चेत्प्रसङ्गौ युक्तावेवेत्यत आह **एतच्चोत्तरत्रेति** । 'अणुत्वं च महत्त्वं च' इत्येतद्व्याख्यानावसर इति भावः ।

शे०वा०— इष्टापादनरूपत्वात् तर्कयोराभासत्वमित्यत आह **न च परमाण्वादेरिति** । एवं पक्षद्वयोक्तदोषापत्तिमुपपाद्य व्याघातमप्युपपादयति **प्रत्यक्षत्वाप्रत्यक्षत्वे चेति** । व्याघातं प्रकारान्तरेणापि दर्शयति **किञ्चेति** । कथं महत्त्वाणुत्वयोः परस्परविरुद्धत्वमित्यतः सूत्रकारेणैव तत्समर्थितमित्यभिप्रेत्योक्तार्थे कणादसूत्रसम्मतिमेवाह **यथाऽऽहेति** । सप्तमाध्यायस्य प्रथमाह्निक इति शेषः । तत्सूत्रं पठति **दृष्टान्ताच्चेतीति** । बिल्वापेक्षयाऽऽमलकमणु । आमलकापेक्षया कुवलमणु । कुवलापेक्षयाऽऽमलकं महत् । आमलकापेक्षया बिल्वं महदिति कुवलामलकबिल्वेष्वणुत्वमहत्त्वव्यवहारप्रत्यययोर्दर्शनादणुत्वमहत्त्वयोः सामानाधिकरण्यमित्याशङ्क्याणुमहदिति तस्मिन्विशेषाभावाद्विशेषाभावाच्चेति सूत्रेण कार्यस्याप्यणुत्वस्य द्व्यणुकमात्रवृत्तित्वान्नित्यस्य च तस्य परमाणुवृत्तित्वात् कुवलादौ तदभावेन महत्त्वासमानाधिकरणद्वित्वस्य कुवलाद्यवयवेष्वभावात् । अवयवबहुत्वमहत्त्वप्रचयानां च कुवलयाद्यवयवेषु भावात् । कुवलामलकबिल्वेषु महदिति व्यवहारो मुख्योऽणुत्वव्यवहारस्तु भाक्त इति दर्शयित्वैककालत्वादित्युत्तरसूत्रेणाणुव्यवहारस्य भाक्तत्वे हेतुमुक्त्वा महदिति व्यवहारस्य मुख्यत्वे हेतुकथनार्थमिदं सूत्रं **दृष्टान्ताच्चेति** । यथा, वस्तुगत्या शुक्लेष्वेव पटशङ्खस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारस्तथा वस्तुगत्या महत्स्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारोऽतोऽसौ मुख्य इति । अत्र च यथा पटस्य स्फटिकवदुत्कृष्टशुक्लत्वाभावेऽपि न नीलत्वादिकं किन्त्वपकृष्टशुक्लत्वमेव तथा कुवलादेर्बिल्ववदुत्कृष्टमहत्त्वाभावेऽपि नाणुत्वं किन्त्वपकृष्टमहत्त्वमेवातस्तद्व्यवहार एव तत्र मुख्य इत्यर्थसिद्ध्या महत्त्वाणुत्वयोः परस्परविरुद्धत्वेनैकत्रासमावेशलाभ इति द्रष्टव्यम् । अणुत्वं च महत्त्वं चेत्युत्तरवाक्येऽणुत्वमहत्त्वयोरपि विरोधपरिहारात्तावदित्युक्तम् । प्रसङ्गयोरिष्टापादनत्वस्य व्याहतिपरिहारस्य च मूलारूढतासिद्ध्यर्थमपेक्षितपूरणेन मूलं योजयति **परमाण्वादाविति** । ननु च प्रत्यक्षत्वाप्रत्यक्षत्वयोर्महत्त्वामहत्त्वादिमात्रनिमित्तकत्वेन परमाण्वादेरखिलस्य द्रव्यस्य महत्त्वाणुत्वयोरभ्युपगमे महत्त्वाणुत्वरूपप्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकधर्मद्वयाक्रान्ततया सर्वस्य कञ्चित्प्रतीव सर्वान्प्रत्यपि प्रत्यक्षत्वाप्रत्यक्षत्वयोरवर्जनीयत्वात् कञ्चित्प्रति प्रत्यक्षत्वं कञ्चिच्चाप्रत्यक्षत्वमित्येवंरूपेण पुरुषभेदापेक्षया प्रत्यक्षत्वाप्रत्यक्षत्वव्यवस्थाऽयोगात् तद्व्याहतितादवस्थ्यमित्यतः प्रत्यक्षत्वादेर्महत्त्वादिमात्रनिमित्तकत्वे प्रत्यक्षत्वाप्रत्यक्षत्वविरोधस्योक्तरीत्या प्रसक्तावपि महत्त्ववतोऽपि त्र्यणुकस्य मन्दलोचनेन प्रत्यक्षतोऽनुपलम्भेन प्रत्यक्षत्वादेः तन्निमित्तकत्वाभावोपपादनपूर्वकं पुरुषाणामिन्द्रियपाटवापाटवनिमित्तत्वस्यैवाणुत्वं च महत्त्वं चेत्युत्तरवाक्यव्याख्यानावसरे अत एवेत्यादिना ग्रन्थेन व्यवस्थापनात् तत्पाटवापाटवयोश्च सर्वपुरुषसाधारणत्वाभावात् यस्येन्द्रियपाटवं तं प्रति प्रत्यक्षत्वस्य यस्य च तदपाटवं तं प्रत्यप्रत्यक्षत्वस्य च सम्भवाद्युक्तैव पुरुषभेदापेक्षया प्रत्यक्षत्वाप्रत्यक्षत्वव्यवस्थेत्याह **एतच्चेति** ।

वा०२०— **बिल्वापेक्षयेति** । अत्र बिल्वापेक्षया आमलकं अणु आमलकापेक्षया कुवलमणु इत्येव पाठः । बिल्वापेक्षयेत्यनन्तरं आमलकापेक्षया इत्येतावतो भावो लेखकागतः । बिल्वापेक्षया कुवलस्याणुत्वेऽपि अपकर्षतारतम्यप्रतिपादनस्याभिप्रेतत्वेन उत्कर्षस्थल इवात्रापि मध्ये आमलकस्य ग्राह्यत्वात् । मूलकोशे सूत्रोपस्कारे च तथैव क्रमात् । उत्तरत्रापि कुवलामलकबिल्वेत्यादेरेवोक्तेश्च । एवं कुवलामलकबिल्वादि

बिल्वादिषु महत्त्वेऽपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तोऽणुव्यवहारः इति प्रशस्तपादभाष्योक्तेः । उक्तं च किरणावल्याम् । कथं तर्हि बिल्वाद्यपेक्षया आमलकाद्या एवेतीति ध्येयम् । वैशेषिकसूत्रोपस्कारानुसारेणाह दृष्टान्ताच्चेति सूत्रप्रवृत्तिसिद्ध्यर्थं पूर्वसूत्रद्वयतात्पर्यमिदमुक्तमिति ध्येयम् । यद्यपि सप्तमाध्यायसूत्रोपस्कारे विशेषाभावात् इत्येतत् महत्वपरिमाणविशेषस्य तारतम्याभावेन भावादिति व्याख्याय पश्चात् विशेषाभावात् इति अणुत्वाभावे युक्तितया व्याख्यानं तथा यद्वेति द्वितीयव्याख्याने अणुत्वादिपरिमाणाभावोपपादनाय द्वित्वेनैव अणुत्वपरिमाणोत्पत्तिसम्भवशङ्कानिरासाय महत्त्वसमानाधिकरणद्वित्वस्यैवाणुत्वोपपादकत्वेऽपि तत्समानाधिकरणद्वित्वस्य तदसम्पादकत्वात् कुलालादिनिष्ठस्य द्वित्वस्य तत्समानाधिकरणात् न ते चाणुत्वोत्पत्तिः इति विशेषाभावव्याख्यानं महत्त्वोत्पत्तिसम्भवोपपादकतत्कारणादेत एव बहुत्वमहत्वप्रचयसत्त्वार्थकविशेषाभावात् इत्येतत् व्याख्यानान्तरकृतमिति तथैवात्रापि कर्तुमुचितम् । तथापि महत्त्वरूपपरिमाणविशेषस्य तरतमभावेन भावादित्यस्य प्रतिज्ञामात्रतया व्याख्यातत्वेनाणुत्वाभावार्थकविशेषाभावात् इत्यस्य च कार्यकार्याणुत्वपरिमाणस्य द्व्यणुकपरमाणुमात्रनिष्ठतया अन्यत्राभावेन तदभावः सम्भवतीत्युपपादनात् विशेषाभावात् इत्येतत् प्रथमव्याख्यानपरित्यागे विशेषाभावात् इत्येतत् प्रथमव्याख्यानमात्रस्वीकरणं युक्तम् । तत एव विशेषाभावादित्यस्यैव व्याख्यानद्वयव्यवधानं अङ्गीकृत्य विशेषे भावात् इत्येतत् पश्चाद्व्याख्यातमित्यादि निमित्तं अवधेयम् । अवयवेषु भावात् इत्यनन्तरं महत्वपरिमाणसद्भावेनेति पूरणीयम् । तेन न साध्यानुक्तिदोषः इति ध्येयम् । तदेव वा विशेषाभावादित्येतत्पूर्वांशस्य व्याख्यानरूपम् । क्रमश्च न विवक्षित इति तु परमार्थः । अत्र च यथा पटस्येत्यत्र पटपदं उपलक्षणया शङ्खमपि प्रतिपादयति । तथा च पटादेरिति लभ्यते । अत एव कुवलादेः बिल्ववदिति वक्ष्यति । प्रत्ययत्वादेः तन्निमित्तकत्वाभावे तदप्रसक्तेरिति तदभावेति पाठः । निमित्तकत्वाभावोपपादन इत्येव पाठेऽपि अयमेव वाच्यः ।

स०व्र०— ननु महत्त्वाणुत्वयोः सति विरुद्धत्वे एकत्रानङ्गीकार्यत्वम् । तदेव कुत इत्यत आह **यथाऽऽहेति** । **दृष्टान्ताच्चेति** । महत्वाणुत्वे परस्परविरुद्धे गुणत्वव्याप्यपरिमाणत्वावान्तरजातिमत्वात् । यत् यत् गुणत्वव्याप्यावान्तरजातिमत् तत् परस्परविरुद्धम् । यथा गुणत्वव्याप्यरूपत्वरूपजात्यवान्तरनीलत्वपीतत्वरूपजातिमति नीलादौ परस्परविरुद्धत्वदर्शनादित्यर्थः । एतच्चोत्तरत्र टीकाकारा एव 'स्यादयं परमाण्वादिष्वखिलद्रव्येषु अणुत्वमहत्त्वाङ्गीकारे विरोधः । यदि रूपे नीलत्वपीतत्ववत् परिमाणे अणुत्वमहत्त्वादिजातियोगः स्यादि'त्यादिना स्पष्टयिष्यन्ति । तथा च गुणत्वव्याप्यावान्तरजातिमत्त्वेन महत्त्वाणुत्वयोः परस्परविरुद्धत्वसाधने गुणत्वव्याप्यनीलत्वादिलक्षणरूपत्वावान्तरजातिमतो नीलादिरूपलक्षणस्य दृष्टान्तस्य सत्त्वादिति सूत्रार्थ उक्तो भवति । **उत्तरत्रेति** । 'अणुत्वं च महत्त्वं च' इत्युत्तरत्र 'अत एव प्रत्यक्षत्वाप्रत्यक्षत्वविरोधोऽप्यपास्त' इत्यादिना स्फुटीभविष्यतीति भावः ।

स०ना०— नन्वेवं सति पक्षद्वयोक्तिदोषापत्तिरिति । परमाणुमहत्त्वात् द्व्यणुके महत्त्वमिति पक्षे परमाणुद्व्यणुकयोः प्रत्यक्षत्वं स्यादिति महत्वपक्षोक्तदोषः । परमाण्वणुत्वात् अन्त्यावयविपर्यन्तरं क्रमेणाणुत्व-

मेवोत्पद्यत इति पक्षे घटादीनां अप्रत्यक्षत्वं स्यादित्यणुत्वपक्षोक्तदोष इत्यर्थः । **व्याघातश्चेति** । पक्षद्वयेऽपि व्याघातश्चाधिक इत्यर्थः । परमाणौ महत्त्वमिति पक्षे माता वन्ध्येति च व्याघातः घटादावणुत्वमिति पक्षे प्रमाणविरोध इति भावः । अणुत्वमहत्त्वयोर्विरोधाभावात् न व्याघात इत्याशङ्कापरिहाराय कार्यमुखेन तयोर्विरोधमुपपादयितुं कार्यविरोधमाह **प्रत्यक्षत्वाप्रत्यक्षत्व इति** । अणुत्वस्य हि कार्यं अप्रत्यक्षत्वम् । उद्भूतरूपसहकृतस्य तु महत्त्वस्य कार्यं प्रत्यक्षत्वं ते च विरुद्धे अतस्त्वत्प्रयोजकयोरणुत्वमहत्त्वयोर्विरोध इति भावः । एतेन आद्यपक्षे परमाणुद्व्यणुकयोः प्रत्यक्षत्वमापादितम् । न परेणाङ्गीकृतम् । द्वितीयपक्षे तु घटादीनामप्रत्यक्षत्वमापादितमेव न परेणाङ्गीकृतम् । ततश्च एकस्मिन् धर्मिणि प्रत्यक्षत्वाप्रत्यक्षत्वयोर्विरोधव्युत्पादनमसङ्गतमिति परास्तम् । सूत्रकारसम्मत्या महत्त्वाणुत्वयोः साक्षादेव विरोधमुपपादयति **किञ्चेति** । **दृष्टान्ताच्चेति** । तस्यायमर्थः । यथा शुक्लेष्वेव पटशङ्खस्य टीकादिषु शुक्ल-शुक्लतर-शुक्लतमव्यवहारः तथा महत्स्वेव कुवलामलकबिल्वेषु स्थूल-स्थूलतर-स्थूलतमव्यवहारः अतोऽसौ मुख्यः अणुत्वव्यवहारस्त्वौपचारिकः । अतो अणुत्वमहत्वयोर्विरोध इति भावः ।

विठ्ठल०— एवं सतीति । परमाणुद्व्यणुकादौ सर्वत्राणुत्वमिति पक्षस्य सर्वत्र महत्त्वमिति पक्षस्य चाङ्गीकार इत्यर्थः । पक्षद्वयोक्तदोषव्याघातं च क्रमेणोपपादयति **तथा हीति** । व्याघातं रीत्यन्तरेणाह **किं चेति । परस्परविरुद्ध इति** । परस्परविरहव्याप्यतारूपविरोधाद्व्याख्यात इति भावः । पूर्वं तु महानवस्थानरूपविरोध इति स्पष्टम् । **सूत्रकारः** कणादः । **दृष्टान्ताच्चेति** । एककालत्वादिपूर्वसूत्रे कुवलामलकबिल्वेष्वणुत्वव्यवहारो भाक्त इत्यत्र हेतुरुक्तः । इदानीं तत्र महत्त्वव्यवहारमुख्य इत्यत्र हेतुकथनायेदं सूत्रम् । तस्य चायमर्थः । अणुत्वमहत्त्वयोरेकत्र समावेशे सति कथं कुवलामलकबिल्वादिषु लौकिकानामुत्तरोत्तरापेक्षया पूर्वपूर्वेष्वणुत्वव्यवहारः पूर्वपूर्वापेक्षयोत्तरोत्तरेषु महत्त्वव्यवहारः उत उभयविधव्यवहारदर्शनात् तत्राणुत्वव्यवहारस्य भाक्तत्वमनुपपन्नमित्यत इदमुच्यते । यथा वस्तुतः शुक्लेष्वपि पटशङ्खस्फटिकादिषु शुक्लशुक्लतरशुक्लतमव्यवहारस्तथा वस्तुतो महस्त्वेव कुवलामलकबिल्वेषु स्थूलतरस्थूलतमव्यवहारोऽसौ मुख्य इति । अत्र यथा पटस्य स्फटिकादुत्कृष्टशुद्धत्वाभावेन नीलत्वादिकं किन्त्वपकृष्टशुक्लत्वमेव तथा कुवलयादेर्बिल्वादिवदुत्कृष्टमहत्त्वाभावेनाणुत्वव्यवहारो भाक्तो महत्त्वव्यवहार एव मुख्य इति । तथा च महत्त्वाणुत्वयोर्नैकत्र समावेश इति लभ्य इति । ननु यन्महत्त्वोपेतत्र्यणुकादि तत्सर्वेषामपि प्रत्यक्षे यच्च महत्त्वरहितं परमाण्वादि न तूक्तस्यापि प्रत्यक्षम् । तत्कथमखिलद्रव्येऽपि पुरुषभेदापेक्षया प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिरित्यत आह **एतच्चोत्तरत्रेति** । अव्यवहितोत्तरश्लोकव्याख्यानावसरे प्रत्यक्षत्वाप्रत्यक्षत्वेन महत्त्वादिमात्रनिमित्तके किन्तु पुरुषाणामिन्द्रियपाटवापाटवनिमित्ते अन्यथा मन्दविलोचनेनापि त्र्यणुकमुपलभ्येतेत्यादिना स्फुटीभविष्यतीत्यर्थः ।

॥ इति तत्पक्षद्वयोक्तदोषापत्तिं व्याघातं चाधिकं बाधकमितिशङ्काप्रदर्शनपूर्वकं तत्पक्षद्वयोक्तदोषोक्तव्याहतिपरिहरणम् ॥

* * *

॥ अथ च तत्र द्वितीयबाधकतयोक्ताणुत्वमहत्त्वव्याघातपरिहरणम् ॥

३२ सु०— इदानीमणुत्वमहत्त्वव्याघातं परिहरति **अणुत्वं चेति** ।

अनु०— अणुत्वं च महत्त्वं च यतो वस्तुव्यपेक्षया ।

'अखिले'त्यनुवर्तते । **अणुत्वं च महत्त्वं** चाखिले वस्तुनि विद्येते । न तु विरुद्धे । कथम् । **यतो वस्तुव्यपेक्षयाऽणुत्वं च महत्त्वं च** तदेवोच्यत इति योजना ।

एतदुक्तं भवति । स्यादयं परमाण्वादिष्वखिलद्रव्येष्वणुत्वमहत्त्वाङ्गीकारे विरोधो यदि रूपे नीलत्वपीतत्ववत् परिमाणेऽणुत्वमहत्त्वादिजातियोगः स्यात् । न चैवम्, प्रमाणाभावात् । किन्तु यथा त्र्यणुकादिषु महत्त्वमेकजातीयमेव उत्कर्षापकर्षवत्परेणाङ्गीकृतम्, यथा चाणुत्वं परमाणुद्व्यणुकयोः, एवं परिमाणमवान्तरजातिरहितमेव सर्वद्रव्येषूत्कर्षापकर्षवद्वर्तते । तथा चैकत्र द्रव्ये वर्तमानं परिमाणं द्रव्यान्तरवर्त्युत्कृष्टपरिमाणापेक्षयाऽणुत्वमित्युच्यते, तदेव द्रव्यान्तर्वर्तिनोऽपकृष्टपरिमाणस्यापेक्षया महत्त्वमित्युच्यते । एवञ्च कुतो विरोधः । यथा खल्वेकमेव द्रव्यं द्रव्यभेदापेक्षया सन्निकृष्टं विप्रकृष्टं चोच्यमानं न विरोधास्पदम् । अत एव प्रत्यक्षत्वाप्रत्यक्षत्वविरोधोऽप्यपास्तः । तयोर्महत्त्वादिमात्रनिमित्तत्वे हि स स्यात्, न चैवम्, किन्तु पुरुषाणामिन्द्रियपाटवापाटवनिमित्तत्वमेव । अन्यथा मन्दविलोचनेनापि त्र्यणुकमुपलभ्येत ।

तर्हि गगनादेरपि कदाचित्प्रत्यक्षत्वं स्यादिति चेन्न, उद्भूतरूपाभावात् ।

'द्व्यणुकानुपलम्भो गुणविशेषविपर्ययाधीनः आलोकेन्द्रियसन्निकृष्टचाक्षुषद्रव्यानुपलम्भत्वात् पवनानुपलम्भवदि'त्यादिकं त्वपकृष्टमहत्त्वादिनैवान्यथासिद्धम् ।

तर्हि पर्वतादेरप्रत्यक्षता स्यात् इति चेन्न, अपकर्षविशेषस्य विवक्षितत्वात् । नासौ व्यवस्थितोऽस्तीति चेत् । सत्यम् । अत एव पुरुषापेक्षयेत्युक्तमिति ।

परि०— एतच्चोत्तरत्र स्फुटीभविष्यतीत्युक्तं व्यनक्ति **अत एव प्रत्यक्षत्वाप्रत्यक्षत्वयोर्विरोधोऽप्यपास्त इत्यादिना** । सापेक्षतयाऽणुत्वमहत्त्वयोरविरोधादेवेत्यर्थः । **तर्हीति** ।

इन्द्रियपाटवस्य प्रत्यक्षत्वप्रयोजकत्व इत्यर्थः । द्व्यणुकाप्रत्यक्षत्वं तदमहत्त्वप्रयुक्तमित्यस्य कस्यचिदनुमानमाशङ्कते **द्व्यणुकानुपलम्भ इति** । **गुणविशेषेति** । स च महत्त्वोद्भूतरूपस्पर्शान्यतरवत्त्वम् । **विपर्ययः** अभावः । तथा च द्व्यणुके रूपस्पर्शवत्त्वेन तदभावाधीनत्वेन साध्यपर्यवसाने बाधात् महत्वाभावाधीनत्वेन पर्यवसानात् अमहत्वं द्व्यणुके सिद्ध्यति । दृष्टान्ते तु पवनस्य महत्त्वेन रूपस्पर्शान्यतराभावाधीनत्वेन साध्यानुगमः । **आलोकेति** । आलोकेन्द्रियाभ्यां सन्निकृष्टं यद्द्रव्यं तद्विषयकचाक्षुषानुपलम्भत्वादित्यर्थः । अन्यथा चाक्षुषं यद्द्रव्यमिति यथाश्रुतग्रहणेऽसिद्धिसाधनवैकल्ययोरापत्तेः । घटविषयकरासनानुपलम्भेऽव्यभिचाराय **चाक्षुषेति** । चाक्षुषगुणाद्यनुपलम्भेऽव्यभिचाराय **द्रव्येति** । असन्निकृष्टान्धकारस्थद्रव्यचाक्षुषानुपलम्भेऽव्यभिचाराय **इन्द्रियसन्निकृष्टेति आलोकसन्निकृष्टेति** चोक्तिः ॥ **अपकृष्टमहत्त्वादिनेति** । उत्कृष्टाणुत्वमादिपदार्थः ॥ **तर्हीति** । अपकृष्टमहत्वादेः प्रयोजकत्व इत्यर्थः । **अत एवेति** । अप्रत्यक्षत्वप्रयोजकमहत्वापकर्षस्य एतादृशो महत्त्वापकर्षोऽप्रत्यक्षताहेतुरिति व्यवस्थितस्याभावादेव यत्पुरुषप्रत्यक्षेण यादृशं द्रव्यमुपलभ्यते तस्य तत्रत्यतादृशपरिमाणविशेषः प्रत्यक्षताप्रयोजकः, यादृशं नोपलभ्यते तत्रत्यः परिमाणविशेषः तस्याप्रत्यक्षताहेतुरित्येवंरूपेण पुरुषापेक्षयेत्युक्तमित्यर्थः ।

गु०दी०— द्व्यणुकानुपलम्भो गुणविशेषविपर्ययाधीन इत्यत्र वायाविव रूपाख्यगुणविपर्यासस्य रूपवति द्व्यणुके बाधितत्वेन महत्त्वविपर्यासेनैव साध्यसिद्धिरित्यनुमातुरभिप्रायः । **तर्हि पर्वतादेरप्रत्यक्षता स्यात्** इत्यत्र पर्वतमहत्त्वस्यापि गगनमहत्त्वापेक्षयाऽपकृष्टत्वादिति शङ्कितुरभिप्रायः ।

यादु०— तदेवेति । तदेव वस्तु उच्यत इत्यर्थः । **अत एवेति** । महत्त्वाणुत्वयोरेकत्र समावेशेन विरोधाभावादेवेत्यर्थः । **तर्हीति** । यदि इन्द्रियपाटवमेव प्रत्यक्षत्वे निमित्तमिति शेषः । महत्त्वाभावस्याप्रत्यक्षत्वप्रयोजकतासाधकं कस्यचिदनुमानमनूद्य दूषयति **द्व्यणुकानुपलम्भ इति** । अत्र द्व्यणुकचाक्षुषानुपलम्भ एव पक्षतया विवक्षितोऽतो न स्पार्शनद्व्यणुकानुपलम्भे भागासिद्धिः । साध्ये च गुणविशेषशब्देन महत्त्वोद्भूतरूपयोरन्यतरस्यैव ग्रहणम् । तेन पक्षे महत्त्वविपर्ययाधीनत्वमादाय दृष्टान्ते चोद्भूतरूपविपर्ययाधीनत्वमादाय साध्यपर्यवसानमिति द्रष्टव्यम् । चाक्षुषद्रव्यानुपलम्भत्वादित्यस्य द्रव्यचाक्षुषानुपलम्भत्वादित्यर्थः । तेन चाक्षुषं यद्द्रव्यं तदनुपलम्भत्वादिति यथास्थितयोजनायां पक्षदृष्टान्तयोरसिद्धिः । चाक्षुषो यो द्रव्योपलम्भस्तद्भिन्नत्वादिति दूषणानवकाश इति ध्येयम् । अत्र च द्रव्यपदं गुणानुपलम्भे व्यभिचारवारणाय । त्वगिन्द्रियेण प्रभाऽनुपलम्भे व्यभिचारवारणाय चाक्षुषपदम् । न च तत्रोद्भूतस्पर्शविपर्ययाधीनतामादाय साध्यस्यापि सत्त्वान्न व्यभिचार इति वाच्यम् । गुणविशेषशब्देन महत्त्वोद्भूतरूपान्यतरमात्रस्य विवक्षिततयोक्तत्वात् । अन्धकारस्थस्येन्द्रियासन्निकृष्टस्य च घटस्य चाक्षुषानुपलम्भे व्यभिचारवारणाय अलोकेन्द्रियसन्निकृष्टेति

विशेषणमिति ज्ञातव्यम् । अपकृष्टमहत्त्वादिनैवेत्यात्रादिपदेनोत्कृष्टाणुत्वसङ्ग्रहः । **नासौ व्यवस्थित इति** । एतादृशो महत्त्वापकर्षोऽप्रत्यक्षताहेतुरिति निश्चितो न भवतीत्यर्थः । **अत एवेति** । अप्रत्यक्षत्वप्रयोजक-महत्त्वापकर्षस्य निश्चेतुमशक्यत्वादेवेत्यर्थः । पुरुषापेक्षयेत्युक्तौ हि यस्मिन्महत्त्वापकर्षे सति मन्दविलोचनेन पुरुषेण द्रव्यं प्रत्यक्षीकर्तुं न शक्यते स एव महत्त्वापकर्षोऽप्रत्यक्षताहेतुरिति निश्चयो भविष्यतीति भावः ।

वं०प०— जातियोगः स्यादिति । तर्ह्येव एकत्र विरुद्धजातिद्वयाभावेन विरोधः स्यादिति शेषः । **द्रव्यभेदो** द्रव्यविशेषः । अत एवेत्युक्तं विशदयति **तयोरिति** । प्रत्यक्षत्वाप्रत्यक्षत्वयोः । महत्वादीत्यादि-पदेनोद्भूतरूपस्पर्शयोः सङ्ग्रहः । **अन्यथेति** । महत्त्वमेव प्रयोजकमिन्द्रियपाटवं त्वाप्रयोजकमेव यदीत्यर्थः । **तर्हीति** । यदीन्द्रियपाटवं महत्त्वं चेत्युभयं प्रत्यक्षतायां प्रयोजकं तर्हि इत्यर्थः । **गगनादेरपि** महत्त्वोपेत-स्यापि । कदाचिदित्यनन्तरम् इन्द्रियपाटवोपेतस्यापि कस्यचित्पुंस इति शेषः । **अपकृष्टेति** । उत्कृष्टमहत्त्व-रूपगुणविपर्ययभूतेनापकृष्टमहत्त्वेनेत्यर्थः । **तर्हीति** । यदि चाक्षुषद्रव्यानुपलम्भो महत्वाभावाधीनो न भवति किन्त्वपकृष्टमहत्त्वाधीन एव तर्हि गगनाद्यपेक्षयाऽपकृष्टमहत्त्वस्य पर्वतादावपि सत्त्वेन तस्याप्रत्यक्षतापत्तेरिति भावः । **अपकर्षविशेषस्य** अपकृष्टत्वमहत्त्वविशेषत्वस्य, चाक्षुषद्रव्यानुपलम्भप्रयोजकतया विवक्षितत्वा-दित्यर्थः । **असौ** विशेषः । **अत एव** व्यवस्थितत्वेनाव्यवस्थाप्रदर्शनार्थमेवेत्यर्थः । **इत्युक्तमिति** । 'अणुत्वं च महत्वं चे'त्यनेनेत्यर्थः ।

कं०रा०— द्व्यणुकानुपलम्भ इति । द्व्यणुकानुपलम्भस्य गुणविशेषव्यतिरेकाधीनत्वसाधने महत्त्वा-भावाधीनत्वमेव सिद्ध्यतीति द्व्यणुकस्य महत्त्वाभावासिद्धिरिति भावः । अत्रालोकेन्द्रियसन्निकृष्टेत्येतत्पक्ष-विशेषणमभिप्रेतं तथा चालोकेन्द्रियसन्निकृष्टद्व्यणुकानुपलम्भो गुणविशेषव्यतिरेकाधीन इति प्रतिज्ञार्थः । पक्षतद्विशेषणाभावे द्व्यणुकानुपलम्भस्यालोकद्व्यणुकसंयोगाभावाधीनत्वेन वा इन्द्रियद्व्यणुकसंयोगाभावाधीन-त्वेन वा अर्थान्तरता स्यात् सति च तस्मिन्विशेषणे आलोकेन्द्रियाभ्यां सन्निकृष्टस्य द्व्यणुकस्यानुपलम्भे आलोकसंयोगादिव्यतिरेकाधीनत्वमादाय साध्यपर्यवसानानुपपत्तेर्नार्थान्तरतेति । **अचाक्षुषद्रव्येति** । अनुपलम्भ-त्वादित्येवोक्ते महत्त्वसामानाधिकरण्याद्यभावेनाचाक्षुषस्य रूपस्यानुपलम्भे व्यभिचारः । रूपानुपलम्भस्य महत्त्व-सामानाधिकरण्याद्यभावप्रयुक्तत्वेन गुणविशेषविरहाधीनत्वाभावादतस्तन्निरासाय अचाक्षुषेत्युक्तम् । पवनानुप-लम्भवति पवनानुपलम्भस्य रूपविरहप्रयुक्तत्वात् तत्रोक्तं साध्यमस्तीति भावः । **अपकृष्टेति** । उत्कृष्टहेत्वा-भावादिनैवान्यथासिद्धं न महत्त्वाभावं गमयतीति भावः ।

श्रीनिधि०— तदेवोच्यत इति । एकद्रव्ये वर्तमानं परिमाणमित्यर्थः । यद्वा **तदेवा**णुत्वमेव महत्त्व-मेव च महत्त्वमणुत्वं चोच्यत इत्यर्थः । **द्रव्यभेदापेक्षयेति** । पनसद्रव्यं चूतापेक्षया सन्निकृष्टं न्यग्रोधापेक्षया विप्रकृष्टं चोच्यमानमित्यर्थः । स्फुटीभविष्यतीति यदुक्तं तदाह **अत एवेति** । अन्यथा महत्त्वाणुत्वमात्रस्य प्रत्यक्षाप्रत्यक्षसामग्रीत्वे एवं चापादकसिद्धिरिति भावः । **कदाचिदिति** । इन्द्रियापगमदशायामित्यर्थः । **गुणविशेषविपर्ययाधीन इति** । महत्त्वलक्षणगुणविशेषस्य भावाधीन इत्यर्थः । उद्भूतरूपालोकेन्द्रियसन्नि-

कर्षादीनां सत्त्वेन बाधादेव नार्थान्तरमिति भावः । आलोकेन्द्रियसन्निकृष्टचाक्षुषद्रव्यानुपलम्भत्वादिति आलोकेन्द्रियसन्निकृष्टेत्येतत् बुद्ध्या विवेकेन द्रव्यविशेषणं अतो नासामर्थ्यदोषः । चाक्षुषपदस्य द्रव्यविशेषणत्वे सिद्धिः स्यात् । आद्यविशेषणस्यानुपलम्भविशेषणत्वेऽपि तथैवानुपलम्भस्यालोकेन्द्रियसन्निकर्षत्वाभावात् । प्रयोगे तु सौकर्यार्थं विशेषणद्वयं क्रमेणोपात्तमिति द्रष्टव्यम् । **पवनानुपलम्भवदिति** । अत्र गुणविशेषोद्भूतरूपं तद्विपर्ययाधीनत्वमनुपलम्भस्य द्रष्टव्यम् । **तर्हीति** । एवमप्रकृष्टमहत्त्वस्यैव प्रत्यक्षताप्रयोजकत्वे । **पर्वतादेरिति** । तन्महत्त्वस्याप्यपकृष्टत्वादित्यर्थः । इयत्ता ग्रन्थेन 'प्रत्यक्षत्वतदन्यत्वे पुरुषापेक्षयाखिले' इत्यस्याशयो वर्णितः । नन्विदं तत्रैव वक्तव्यमिति चेन्न अणुत्वमहत्त्वयोरविरोधाकथने द्व्यणुकानुपलम्भो गुणविशेषविपर्ययाधीन इत्यनुमानान्यथासिद्धेः कथयितुमशक्यत्वात् । अणुत्त्वमहत्त्वे उपजीव्यत्वाच्च प्रत्यक्षत्वाप्रत्यक्षत्वविरोधस्य विरोधेन तयोरसम्भवे विरोधान्तरस्यानुत्थानात् इत्यत्रोक्तम् । मूले त्वेवं विन्यासस्यार्थान्तरे आनुगुण्यं द्रष्टव्यम् ।

शे०भा०— ननु च नीलपीतयोरिवाणुत्वमहत्त्वयोरपि व्यवस्थितत्वेनासहवृत्तिस्वभावत्वान्न परमाण्वादिसकलद्रव्येषु तयोः सहवृत्तित्वनिरूपणं युक्तम् । अन्यथा नीलपीतयोरपि तत्प्रसङ्गात् । अन्यत्रादृष्टत्वेन सहवृत्तेरसम्भवाच्चेत्यतस्तद्वैषम्योपदर्शनेन प्रतिबन्दीं मोचयन्नेवाणुत्वमहत्त्वरूपतामेकस्यैव परिमाणस्य दृष्टान्तकथनेनोपपादयति **एतदुक्तं भवतीति** । नीलत्वपीतत्वरूपस्य रूपत्वावान्तरजातिविशेषस्य, व्यवस्थापकस्यैव सत्त्वात् नीलपीतरूपयोरपि व्यवस्थिततयाऽसहवृत्त्युपपत्तावप्यणुत्वत्वमहत्त्वत्वरूपस्य परिमाणत्वावान्तरजातिविशेषस्य परिमाणेऽसत्त्वेन व्यवस्थापकाभावेनाणुत्वमहत्त्वयोरव्यवस्थितत्वात् सहवृत्त्युपपत्तिरिति भावः । ननु रूपे नीलत्वपीतत्वरूपजातिवत् परिमाणेऽप्यणुत्वमहत्त्वादिरूपजातिरप्यस्त्येवेति न व्यवस्थापकाभाव इत्यवैषम्यमेवेत्यतो नीले नीलमित्येव पीते पीतमित्येव च सार्वजनीनाविगीतानुगतप्रत्ययव्यवहारस्य सत्त्वात् तदनुरोधेन रूपे नीलत्वपीतत्वादिरूपावान्तरजातिकल्पनासम्भवेऽपि इह अणुत्वेऽणुत्वमित्येव महत्त्वे महत्त्वमित्येव सार्वजनीनाविगीतानुगतप्रत्ययव्यवहाराभावात् परिमाणेऽणुत्वत्वादिजातिकल्पकाभावेन तत्कल्पनमशक्यमित्याह **प्रमाणाभावादिति** । ननु परिमाणेऽणुत्वत्वादिजात्यभावं तत्राणुत्वं महत्त्वमित्यादिप्रत्ययव्यवहाराणां निर्निबन्धनत्वं स्यादिति न तत्रोक्तरूपजात्यभावो वक्तुं युक्त इत्यभिप्रेत्य पृच्छति **किन्तु इति** । परिमाणस्यावान्तरजातिरहितत्वेऽपि नोक्तव्यवहाराणां निर्निबन्धनत्वमापद्यते । तेषां परिमाणनिष्ठोत्कर्षापकर्षनिबन्धनत्वसम्भवादित्यभिप्रेत्य भवेदेतदेवं यद्यवान्तरजातिरहितस्य परिमाणस्योत्कर्षापकर्षवत्त्वमपि सम्भावितं स्यात् । न च तदस्ति । अवान्तरजातिरहितस्योत्कर्षाद्यदर्शनेन तस्यासम्भावितत्वादित्यतोऽवान्तरजातिरहितस्याप्युत्कर्षापकर्षवत्तायाः दर्शनानुरोधेन तत्र तत्र परेणाङ्गीकारात्, असम्भावितत्वाभावेन परिमाणस्यापि तदङ्गीकारो युक्त इति वक्तुं अवान्तरजातिरहितेऽप्युत्कर्षापकर्षवत्त्वाङ्गीकारं परस्य निदर्शयति **यथेति** । **एकजातीयमेवेति** । महत्त्वत्वावान्तरजातिरहितमेवेत्यर्थः । परमाणुद्व्यणुकयोरित्यतः परं एकजातीयमेवोत्कर्षापकर्षवत्परेणाङ्गीकृतमित्यनुवर्तते ।

एवमवान्तरजातिरहितस्यापि परिमाणस्योत्कर्षापकर्षौ दृष्टान्तोपदर्शनेन सम्भाव्य परिमाणनिष्ठयोस्तयोरणुत्वादिव्यवहारनिदानतामुपदर्शयति **तथा चेति** । एकस्यापि परिमाणस्य तत्तद्वस्तुव्यपेक्षयाऽणुत्वमहत्वकथनस्योक्तामविरुद्धतां सम्भावयितुमनुरूपदृष्टान्तमाह यथा **खल्विति** । नन्वेवं महत्त्वाणुत्वयोरविरोधेन परमाण्वाद्यखिलद्रव्यवृत्तित्वे सर्वस्यापि परमाण्वादेः प्रत्यक्षत्वाप्रत्यक्षत्वप्रयोजकीभूतमहत्त्वाणुत्वाक्रान्ततया सर्वान्प्रति प्रत्यक्षत्वाप्रत्यक्षत्वप्रसक्त्या परुषभेदापेक्षया व्यवस्थाया असम्भवात् प्रत्यक्षाप्रत्यक्षत्वव्याघातः स्यादित्यत आह **अत एवेति** । अत एवेत्युक्तं हेतुमेव दर्शयति **तयोरिति** । महत्त्वादिमात्रनिमित्तत्वाभावे प्रत्यक्षत्वादेराकस्मिकत्वप्रसक्तिरिति शङ्कते **किन्त्विति** । उत्तरमाह **पुरुषाणामिति** । ततश्च तन्निमित्तभूतयोरिन्द्रियपाटवापाटवयोः सर्वपुरुषसाधारणत्वाभावान्न सर्वान्प्रति सर्वस्य प्रत्यक्षत्वाप्रत्यक्षत्वप्रसङ्ग इति भावः । भवेदेवं यदि प्रत्यक्षत्वादेर्महत्त्वादिमात्रनिमित्तत्वाभावः स्यात् स एव च कुत इत्यतो महत्त्वादिमात्रस्य प्रत्यक्षत्वादिप्रयोजकतायां बाधकमुपलक्षणत्वेनाह **अन्यथेति** । इन्द्रियपाटवस्यापि प्रत्यक्षत्वप्रयोजकत्वेऽप्याकाशादेरपि प्रत्यक्षत्वापत्त्या बाधकतौल्यात् प्रयोजकत्वं न स्यादिति शङ्कते **तर्हीति** । पुरुषाणामिन्द्रियपाटवमात्रस्य द्रव्यप्रत्यक्षत्वप्रयोजकत्वे भवेदाकाशादेः प्रत्यक्षत्वप्रसङ्गः । न चास्माभिस्तन्मात्रस्य तत्प्रयोजकत्वमभ्युपगम्यते किन्तूद्भूतरूपवत्त्वसहितस्यैव, न च तदाकाशादेरस्तीति न प्रसङ्गतौल्यमित्याशयेन परिहरति **उद्भूतेति** । यद्यपि सिद्धान्ते पञ्चीकरणेन रूपमस्त्येवेति न तदभावोऽपि, तथाऽपि तदनाश्रयणेन वा पररीत्या वेदं रूपाभावाभिधानम् । वस्तुतस्तु पञ्चीकरणेन रूपस्य तत्र सत्त्वेऽपि तस्यानुद्भूतत्वान्नानुपपत्तिः । अत एव तत्र रूपाभावादिति रूपाभावमात्रमनभिधाय उद्भूतरूपाभावादित्युद्भूतरूपपर्यन्तं धावनं कृतमिति ध्येयम् । अनुमानेनाप्रत्यक्षत्वे महत्त्वाभावनिमित्तकत्वस्य सिद्धत्वान्न प्रत्यक्षत्वस्येन्द्रियपाटवनिमित्तत्वं कल्पयितुं शक्यमित्याशयेन महत्त्वाभावस्याप्रत्यक्षत्वप्रयोजकतासाधकतयोदयनेन उक्तं लीलावत्यनुमानमाशङ्कते **द्व्यणुकेति** । अत्रोद्भूतरूपवत्त्वेन पक्षो विशेष्यः । तथा चोद्भूतरूपगुणविपर्ययाधीनत्वमादाय दृष्टान्तीकृते पवनानुपलम्भे साध्यपर्यवसानवत्पक्षीकृते द्व्यणुकानुपलम्भेऽपि साध्यपर्यवसानेन महत्त्वविपर्ययाधीनत्वस्याप्रत्यक्षताप्रयोजकत्वासिद्ध्या प्रकृतासङ्गतिदूषणानवकाशः । उद्भूतरूपद्व्यणुकानुपलम्भस्य पक्षतया तत्रोद्भूतरूपविपर्ययमादाय साध्यपर्यवसानस्य बाधिततया हेतोः पक्षधर्मताबलेन महत्त्वविपर्ययाधीनत्वमादायैव पक्षे साध्यपर्यवसानसम्भवादिति द्रष्टव्यम् । पक्षेऽनुपलम्भपदं च चाक्षुषानुपलम्भपरम् । अन्यथा द्व्यणुकस्पार्शनानुपलम्भे भागासिद्धिप्रसङ्गात् । हेतौ चाक्षुषद्रव्यानुपलम्भत्वादित्यस्य द्रव्यचाक्षुषानुपलम्भत्वादित्यर्थः । तथा च चाक्षुषं यद्द्रव्यं तदनुपलम्भत्वादिति यथास्थितयोजनायां पक्षदृष्टान्तयोरसिद्धिः । चाक्षुषो यो द्रव्यस्यानुपलम्भ इति योजनायां चालोकेन्द्रियसन्निकृष्टेत्यस्य द्रव्यविशेषणत्वानुपपत्तिः तस्यान्यविशेषणत्वसम्भवादिति दूषणानवकाश इति द्रष्टव्यम् ॥ अनुपलम्भादिति गन्धानुपलम्भेन व्यभिचारीत्यत उक्तं **द्रव्येति** । द्रव्यानुपलम्भादिति श्रोत्रेण घटाद्यनुपलम्भेन व्यभिचारीत्यत उक्तं **चाक्षुषेति** । असन्निकृष्टघटादेश्चाक्षुषानुपलम्भेन तद्वारणायेन्द्रियसन्निकृष्टपदम् । अन्धकारस्थघटादेश्चाक्षुषानुपलम्भेन तद्वारणायालोकेत्युक्तम् ।

अपकृष्टमहत्त्वादिनैवेति । आदिपदेनोत्कृष्टाणुत्वसङ्ग्रहः । उपलक्षणं चैतत् । अदृष्टविशेषविपर्याधीनत्वेन वा दूरसाक्षात्कारे माषराश्यादौ संयोगविशेषस्यापि साक्षात्कारकारणत्वदर्शनात् तदभावेन वाऽर्थान्तरत्वं चक्षुरिन्द्रियाद्यनुपलम्भेनानैकान्त्यं च । अथ यादृशो गुणविशेष उपलम्भाव्यभिचारी तादृशस्तत्रापि नास्त्येवेति न व्यभिचार इति वाच्यम् । तथा सति गन्धानुपलम्भेन व्यभिचारवारणार्थं द्रव्येति विशेषणवैयर्थ्यप्रसङ्गात् । तत्रापि तादृशगुणाभावस्य वक्तुं शक्यत्वेन साध्यसद्भावात् ।

अत्रोक्तं वर्धमानेन— 'द्व्यणुकं चाक्षुषसाक्षात्कारासाधारणकारणैकवृत्तिगुणाभाववत् आलोकेन्द्रियसन्निकृष्टत्वे सत्यचाक्षुषत्वात् । पवनवदित्यनुमानमत्राभितम् । अतो नादृष्टविपर्ययाधीनत्वेन वा संयोगविशेषाभावेन वाऽर्थान्तरते'ति । तदसत् । अपकृष्टमहत्त्वादिनैवोक्तहेतूपपत्त्याऽन्यथासिद्धत्वमिति मूलोक्तदोषस्यात्रापि तादवस्थ्यात् । व्यक्तिपुरस्कारेणादृष्टविशेषस्यापि चाक्षुषसाक्षात्कारसाधारणकारणतायाः पूर्वमुपपादितत्वेनादृष्टविशेषाभावेनार्थान्तरतादवस्थ्येन तद्द्वारकस्य चाक्षुषसाक्षात्कारासाधारणकारणेति गुणविशेषणवैयर्थ्याच्चेत्यलम् ।

तर्हीति । अप्रत्यक्षत्वप्रयोजकस्यापकृष्टमहत्त्वस्य तत्रापि सत्त्वादिति भावः । **नासाविति** । एतादृश एव महत्त्वापकर्षोऽप्रत्यक्षताहेतुरिति निश्चितो न भवतीत्यर्थः । **अत एवेति** । अप्रत्यक्षत्वप्रयोजकमहत्त्वापकर्षस्य निश्चेतुमशक्यत्वादेवेत्यर्थः । पुरुषापेक्षयेत्युक्तौ हि यस्मिन्महत्त्वापकर्षे सति मन्दलोचनेन पुरुषेण द्रव्यं प्रत्यक्षीकर्तुं न शक्यते, स एव महत्त्वापकर्षोऽप्रत्यक्षताहेतुरिति विज्ञेय इति सिद्ध्यतीति भावः । इतीत्यस्य एतदुक्तं भवतीति पूर्वेण सम्बन्धः ।

वा०र०— सार्वजनीनेति । सार्वजनीनवैश्वजनीनशब्दौ प्रतिजनादिभ्यश्चेति खञ्युभयपदवृद्धौ साधुत्वेन आकरे व्युत्पादिताविति तत्र तत्र निरूपितमस्माभिः हेतुमेव दर्शयति **तयोरिति** । ननु प्रयोजकद्वयवत्वे एकस्य एकमेव प्रति प्रत्यक्षत्वमप्रत्यक्षत्वं च स्यादित्यादि प्रसङ्गं विवक्षितः । न चात्र पुरुषभेदोक्त्या प्रतीकारः । उद्भूतरूपाभावेन गगनादिप्रत्यक्षत्वप्रसङ्गस्य वारणेऽपि अपकर्षविशेषविवक्षया पर्वतादेरप्रत्यक्षत्वप्रसङ्गवारणेऽप्येतत्प्रसङ्गवारणोपायाभावात् । अत एव पुरुषापेक्षयेत्युक्तं चात एव निरस्तं इति चेत्, सत्यम् । अणुत्वमहत्वयोरेकत्र विद्यमानयोः सर्वान् प्रति अपि विशेषाभावेन एकमेव प्रत्यपि प्रत्यक्षत्ववत् अप्रत्यक्षस्यापि अनापत्तेः । एतदभिप्रायेणापि पुरुषापेक्षया इत्युक्तमिति वर्णनं च व्याख्येयमिति मूलेऽभिप्रायात् न दोष इति ज्ञेयम् ।

पञ्चीकरणेनेति । पञ्चीकरणप्रकारः इत्थम् । प्रथमतः पञ्चभूतानि द्विधा विभज्यन्ते । तदनन्तरं पञ्चानामपि । एकार्धस्य चतुर्धा विभागः क्रियते । ततः पञ्चानामपि भूतानां पञ्चार्धानि चतुर्धार्धानि विभक्तानि । तेषु एकैकभागः । इतरभूतचतुष्टयस्य विभक्तांशेषु निक्षिप्यते । एवं चाकाशार्धप्रविभक्तपृथिव्यादि चतुष्टयस्याविभक्तार्थगताः ये चत्वारो भागाः तेषु एकैकभागयुक्तं सत् पञ्चीकृतमित्युच्यते । एकस्मिन्

पञ्चीकृताकाशेऽर्धमाकाशः पृथिव्यादीनां चतुर्णां चत्वारो भागः मिलितार्धम् । एवमष्टभागता प्राप्नोति । एवं पृथिव्यादीनामपि सार्धभूततराष्टमभागचतुष्टयं चेति । **पञ्चीकरणं ज्ञेयमिति** । तथा च पञ्चीकृताकाशस्य रूपवत्तेजोजलपृथिव्यारब्धत्वात् रूपवत्वमिति भावः । यद्यप्येवं पञ्चीकरणेन रूपोत्पत्तिराकाशे प्राप्ता तथापि तद्रूपस्य न व्यवहारयोग्यता । अपञ्चीकरणदशायां यस्मिन् भागे भूते यो गुणः उपलभ्यते तस्यैव व्यवहार-योग्यत्वात् रूपस्य चाकाशे पञ्चीकरणाभावदशायां अभावात् इति अस्वरसादेव सिद्धान्ते त्रिवृत्करणपक्षाश्रयणं इति केचित् । अत्रोक्तं कण्टकोद्धारे । एवं तर्हि पृथिव्यादावपि गन्धमात्रोपलम्भप्रसङ्गः । पञ्चीकरणात्पूर्वं पृथिव्यादौ रसादेरभावेन तस्य व्यवहारायोग्यतया तदुपलम्भायोगात् । न च तर्हि आकाशे रसादेरपि उपलम्भ-प्रसङ्ग इति वाच्यम् । तस्यानुद्भूतत्वेनाप्युपपत्तेः । उद्भूतत्वानुभूतत्वयोश्च फलबलेन कल्प्यत्वात् । तदेत-दभिप्रेत्योक्तं **रूपमस्त्येवेति** । **तरणाश्रयणेनेति** । पञ्चीकरणपक्षानाश्रयणेनेत्यर्थः । त्रिवृत्करणस्य छान्दोग्यादौ त्र्यात्मकत्वादित्यादिसूत्रे 'पार्थिवानां शरीराणां अर्धेन पृथिवी स्मृता । इतरेऽर्धे त्रिभागिन्या' इत्यस्य तौ प्रति-पादिततया बहुसम्मतत्वादिति भावः । एवं च तदाकाशेऽस्तीति पूर्वटीकावाक्ये रूपस्य एव निषेधे तात्पर्यं मूलकारस्येत्युक्तं भवति । अत एव वस्तुतस्तु इति पक्षे उद्भूतत्वविशेषणनिषेधे तात्पर्यं मूलकारस्येति वक्ष्यतीति ज्ञेयम् ।

एतेनैवाकाशस्य नीरूपत्वप्रवादः । पररीत्यैवेति सूचितम् । अत एव वियदधिकरणीयानुभाष्ये 'भूतमप्यसितं दिव्यं दृष्टिगोचरमेव तु' इति निरूपत्वादिकं वक्ष्यतीति तन्मूलेऽपि कुतो आकाशस्य उत्पत्तिमत्वं इत्यत उक्तं **असितमिति** । रूपवत्वादित्यर्थः । तथा च श्रुतिः । 'आकाशे नीलिमोदेती'ति । तथा सति चाक्षुषत्वप्रसङ्गः इत्यत उक्तं **दिव्येति** । तुशब्देनानुद्भूतं विशेषं सूचयति इत्यादि वक्ष्यते । भाष्यटीकायामपि भूतस्वरूपत एवोत्पद्यते रूपित्वात् आकाशे नीलिमोदेति श्रुतेः इत्युक्तम् । न्यायामृतमपि उक्तानुसारेण योज्यम् । **उदयनोक्तामिति** । अत्र उदयनेन न्यायलीलावतिकृता च श्रीवल्लभेन च उक्त इति योज्यम् । लीलावतीवर्धमानानुसारेणाह **अत्र उद्भूतरूपवत्वेनेति** । पक्षपदं तदेकदेशपरम् । शिष्टं तदनुसारेणैव । द्रव्य-चाक्षुषेति व्यत्यासे सन्निकृष्टद्रव्ये सम्बन्धलाभेन विशेषणत्वोपपत्तावपि द्रव्यस्येति मध्ये निवेशे तदनुपपत्ति-रित्याह **इत्यस्य विशेषणत्वेति** । **दूरसाक्षात्कार इति** । प्रत्यक्षचिन्तामणिभक्तुः । रुचिदत्तः । अनुपलम्भा-दितीति पाठः । द्रव्यानुपलम्भादितीति पाठः । **द्व्यणुकसाक्षात्कारासाधारणकारणैकवृत्तिगुणाभाववदिति** । चाक्षुषसाक्षात्कारं प्रति असाधारणकारणभूतो यो एकवृत्तिः न तु निर्दिष्टः । तादृशगुणाभाववदित्यर्थः । अत्रासाधारणत्वोक्त्याऽदृष्टस्य एकवृत्तित्वोक्त्या उद्दिष्टसंयोगस्य व्यावृत्तिरिति ज्ञेयम् । **पूर्वमुपपादितत्वेनेति** । विशेषपदोपादानेनैव उपपादितप्रायत्वादित्यर्थः । अन्यथा प्रागभावादावपि यत्किञ्चित्प्रागभावमादाय कार्यापत्त्या जातस्यापि पुनरुत्पत्तिरित्यादियुक्तिर्बोध्या ।

स०व्र०— द्व्यणुकानुपलम्भ इति । अत्र चाक्षुषत्वमनुपलम्भविशेषणम्, न तु द्रव्यस्य । तेन नासिद्धिः, न वा दृष्टान्ते साधनवैकल्यमिति भावः ।

विठ्ठल०— कथमेतेन व्याहृतिपरिहारलाभ इत्यत आह **एतदुक्तं भवतीति** । उत्तरत्र स्पष्टीभविष्यतीत्युक्तं व्यनक्ति **अत एवेति** । अणुत्वमहत्त्वयोरेकत्र समावेशेन विरोधाभावादेवेत्यर्थः । **तर्हीति** । यदीन्द्रियपाटवमेव प्रत्यक्षत्वे निमित्तं तर्हीत्यर्थः । ननु यथा गगनस्य प्रत्यक्षत्वमुद्भूतरूपत्वलक्षणगुणविपर्ययाधीनं तथा द्व्यणुकाद्यप्रत्यक्षत्वमपि साधयितुं शक्यत इत्याशयेनोक्तं कस्यचिदनुमानमाशङ्क्य दूषयति **द्व्यणुकानुपलम्भ इति** । अत्र द्व्यणुके चक्षुषानुपलम्भ एव पक्षतया विवक्षितः । अतो न स्पार्शनद्व्यणुकानुपलम्भभागासिद्धिः । साध्ये च गुणपदेन महत्त्वयोद्भूतरूपयोऽन्यतरस्यैव ग्रहणम् । तेन पक्षे महत्त्वविपर्ययाधीनत्वमादाय दृष्टान्ते चोद्भूतरूपविपर्ययाधीनत्वमादाय साध्यपर्यवसानमिति द्रष्टव्यम् । **चाक्षुषद्रव्यानुपलम्भत्वात्** इत्यत्र चाक्षुषत्वं द्रव्यानुपलम्भस्य विशेषणं द्रव्यचाक्षुषानुपलम्भत्वादित्यर्थः । चाक्षुषं यद्द्रव्यं तदनुपलम्भत्वादिति यथास्थितग्रहणे पक्षे असिद्धिः दृष्टान्ते साधनवैकल्यमापद्येत । अनुपलम्भत्वादित्येवोक्ते गुणानुपलम्भे व्यभिचारः त्वगिन्द्रियेण दीपादिप्रभानुपलम्भे व्यभिचारवारणाय **चाक्षुषेति** । प्रभायाश्च द्रव्यत्वं परेणाङ्गीकृतं अन्धकारस्थस्येन्द्रियासन्निकृष्टस्य च पटादेश्चाक्षुषानुपलम्भे व्यभिचारनिरासायालोकेन्द्रियसन्निकृष्टेति विशेषणमिति ज्ञेयम् । **अप्रकृष्टमहत्त्वादिनैवेति** आदिपदेन उत्कृष्टाणुत्वग्रहणम् । **तर्हीति** । अप्रकृष्टमहत्त्वस्यानुपलम्भनियामकत्वे पर्वतादेरपि ब्रह्माण्डाद्यपेक्षया प्रकृष्टमहत्त्वादिति भावः । **नासौ व्यवस्थित इति** । एतादृशमहत्त्वापकर्षो प्रत्यक्षताहेतुरिति व्यवस्थापकाभावेन निश्चयो न भवतीत्यर्थः । **अत एवेति** । अप्रत्यक्षताप्रयोजकमहत्त्वापकर्षस्याव्यवस्थितत्वेन निश्चेतुमशक्यत्वादेव तत्तत्पुरुषचक्षुःपाटवाद्यनुसारेण तत्तत्पुरुषदर्शनयोग्यताप्रयोजकपरिमाणविशेषः प्रत्यक्षताप्रयोजकः यस्य यस्य मन्दतरमन्दतमादि विलोचनस्य यद्यत्परिमाणवत्त्वेनोपलभ्यते तत्परिमाणविशेषः तस्याप्रत्यक्षताहेतुरित्येवंरूपेण पुरुषापेक्षयेत्युक्तमिति भावः ।

॥ इति द्वितीयबाधकतयोक्ताणुत्वमहत्त्वव्याघातपरिहरणम् ॥

॥ इति स्वपक्षे तदङ्गीकारेऽपि बाधकाभावप्रदर्शनम् ॥

॥ इति उक्तस्य प्रतितर्कस्य स्वपक्षे बाधकाभावः ॥

* * *

॥ अथ उक्तस्य प्रतितर्कस्य स्वपक्षे बाधकाभावे कथ्यमाने तर्कपराहत्युद्धारे बाधकशङ्का तन्निरासश्च (उक्तार्थेन सौत्रानुमानसिद्धिरिति समन्वयप्रदर्शनम्) ॥

३३ **सु०**— अस्त्वेवं परिमाणेऽवान्तरजात्यभावस्तथाऽपि न सर्वत्र महत्त्वाणुत्वाभ्युपगमो युज्यते । उत्कृष्टापकृष्टपरिमाणापेक्षया हि मध्यवर्ति परिमाणमणुत्वं महत्त्वं चोच्यत इत्युक्तम् । तच्च द्व्यणुकादिपरिमाणे सम्भवति, न च परमाणुपरिमाणे । न हि

परमाणुपरिमाणादपकृष्टं परिमाणमस्ति, यदपेक्षया तन्महत्त्वं स्यात् । अतः परमाणोरणुत्वमेव । तथा च 'न महत्त्वं चे'त्यसदित्यत आह तारतम्येति ।

अनु०— तारतम्यस्थिता यस्मात्पदार्थाः सर्व एव च ।

यस्मात् सर्वे अपि पदार्थाः परिमाणतारतम्येनैव स्थिताः । स्वपरिमाणापेक्षयोत्कृष्टापकृष्टपरिमाणवन्तः; सर्वाण्यपि द्रव्याणि कुतश्चित्परिमाणादुत्कृष्टेन, कुतश्चिदपकृष्टेन परिमाणेन उपेतानीति वा । तस्मात्परमाणोरपि महत्त्वं युज्यत इति सम्बन्धः ।

अयमत्र प्रयोगः । परमाणुः कुतश्चिदुत्कृष्टेन परिमाणेन युक्तः, स्वपरिमाणापेक्षयाऽपकृष्टपरिमाणवानिति वा, द्रव्यत्वात् तन्तुवदिति । न च परमाणोरपकृष्टद्रव्याभावाद्बाधितविषयत्वम्, तद्भागानां वक्ष्यमाणत्वात् । न च तेष्वेव व्यभिचारः, तेषामपि भागवत्त्वात् ।

परि०— एवं सर्वत्राणुत्वमहत्त्वयोः तत्प्रयुक्तप्रत्यक्षत्वाप्रत्यक्षत्वयोः समावेशोक्त्या प्रागुक्तानुमानानां (तर्कपराहतावुद्धृतायां) तर्कपराहत्युद्धारे बाधकमाशङ्कते **अस्त्वेवमित्यादिना । इत्यसदिति** । 'न महत्त्वं च परमाणावणावपी'त्युक्तमयुक्तमित्यर्थः । स्वकृतयोजनाद्वयानुसारेण परिमाणविषयकं परिमाणाश्रयद्रव्यविषयकं च साध्यद्वयमाह **कुतश्चिदिति स्वपरिमाणेति च** । कुतश्चित्परिमाणादित्यर्थः । अपकृष्टपरिमाणवानित्यस्य अपकृष्टपरिमाणद्रव्ययुक्त इत्यर्थः । यद्वा परिमाणविषयकमेव साध्यद्वयम् । आद्ये युक्तत्वमाश्रयत्वं द्वितीये तु तद्वत्वं तत्साहित्यमात्रमिति ध्येयम् । मूले द्वयोरुक्तावपि उत्कृष्टपरिमाणे विवादाभावात् अपकृष्टपरिमाणमेव साधितमिति ज्ञेयम् । **वक्ष्यमाणत्वादिति** । 'अतस्सर्वपदार्थानां भागाः सन्त्येवे'त्यत्रेति भावः ।

गु०दी०— **स्वपरिमाणापेक्षयोत्कृष्टापकृष्टपरिमाणवन्त** इत्यत्र परमाण्वादिपदार्थपिक्षयोत्कृष्टपरिमाणानि द्व्यणुकादिपरिमाणानि । अपकृष्टपरिमाणानि चावयवपरिमाणानि । **तद्वत्त्वं** तदुपेतत्वम् । वस्तुसत्परिमाणवत्त्वे तात्पर्यम् ।

यादु०— **स्वपरिमाणापेक्षयेत्यादि** । अत्र प्रथमे पक्षेऽवधित्वं द्वितीये त्वाश्रयत्वमिति भेदः । **वक्ष्यमाणत्वादिति** । 'अतः सर्वपदार्थानां भागाः सन्त्येवे'त्यत्रेति शेषः ।

कं०रा०— तद्भागानामिति । परमाणोरपि भागाः सन्तीति वक्ष्यमाणत्वेन परमाण्वपेक्षयापकृष्ट-परिमाणस्य तद्भागरूपद्रव्यस्य सत्त्वान्न बाधितविषयत्वमिति भावः ।

श्रीनिधि०— न महत्त्वं चेत्यसदिति । 'इति चेन्न महत्त्वं चे'त्याद्युक्तमसदित्यर्थः । स्वापेक्षयोत्कृष्टापकृष्टपरिणामवन्त इति उत्कृष्टापकृष्टे परिमाणे येषां तानि तथोक्तानि । तानि द्रव्याणि । येषां ते ध्वान्त इत्युच्यन्ते सम्बन्धश्चात्र सादृश्यादिर्द्रष्टव्यः । सपरिमाणापेक्षया उत्कृष्टापकृष्टपरिमाणवानिति अत्रापि पूर्ववद् विग्रहः । **वक्ष्यमाणत्वादिति** । सर्वदिक्ष्वपि सम्बन्धात् 'अविभागः पराणुते'त्यत्रेति भावः ।

शे०वा०— ननु पूर्वग्रन्थेनैव परिमाणत्वावान्तरजात्यभावसिद्ध्या सौत्रानुमानसिद्धेः 'तारतम्यस्थिता' इति सर्वद्रव्याणां कुतश्चिदुत्कृष्टेन कुतश्चिदपकृष्टेन परिमाणेनोपेतत्ववर्णनमनर्थकमित्याशङ्क्य 'महत्त्वं च परमाणावपि' इत्यादिनोक्तस्य सर्वत्राणुत्वमहत्त्वाभ्युपगमस्य समर्थनार्थत्वान्न तदिति भावेन तत्समर्थनपरतया योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **अस्त्वेवमित्यादिना** । **सम्भवतीति** । तदपेक्षयोत्कृष्टापकृष्टपरिमाण-सद्भावेन अपकृष्टपरिमाणापेक्षया महत्त्वस्योत्कृष्टपरिमाणापेक्षया चाणुत्वस्यावर्जनीयत्वादिति भावः । **स्वपरिमाणापेक्षयेति** । अत्र प्रथमपक्षेऽवधित्वं द्वितीये त्वाश्रयत्वमिति पक्षयोर्भेद इति ध्येयम् । कुतश्चित्परिमाणादुत्कृष्टेन कुतश्चिदपकृष्टेन परिमाणेनोपेतानीति द्वितीयव्याख्यानानुसारेण साध्यं निर्दिशति **कुतश्चिदिति** । कुतश्चिदपकृष्टपरिमाणेनोपेतत्वसाधने सिद्धासाधनता । परेणापि तदङ्गीकारात् । अतस्तत्परित्यज्य कुतश्चिदुत्कृष्टेनेत्येवोक्तमिति मन्तव्यम् । स्वपरिमाणापेक्षयोत्कृष्टापकृष्टपरिमाणवन्त इति प्रथमव्याख्यानानुसारेण साध्यं निर्दिशति **स्वेति** । अत्रापि स्वपरिमाणापेक्षयोत्कृष्टपरिमाणवत्त्वस्य परेणाप्यङ्गीकारेण सिद्धसाधनता स्यात् तन्निवृत्त्यर्थमपकृष्टेत्युक्तम् । यद्यपि व्याख्यानक्रमानुसारेणैतत्साध्यं प्रथमं निर्दिश्यानन्तरं पूर्वसाध्यं निर्देष्टव्यम् । तथाऽप्यन्यनिष्ठोत्कृष्टापकृष्टपरिमाणावधित्वापेक्षयोत्कृष्टापकृष्टपरिमाणाश्रयत्वस्य मुख्यत्वात् व्यतिक्रमेण साध्य-निर्देश इति ध्येयम् । **वक्ष्यमाणत्वादिति** । 'अतः सर्वपदार्थानां भागाः सन्त्येवे'त्यादिनेति शेषः ।

वा०र०— तत्समर्थनपरतयेति । अतःपरं तदिति शेषः । ततश्च तद्योजयितुं इत्युक्तं भवति । यद्वा तदित्येतद्वर्णनपरानुव्याख्यानपरम् । भिन्नं पदं द्वितीयान्तम् । समर्थनपदं च प्रकृतानुसारेणाभ्युपगमसमर्थनपरम् । अथवा तदित्यनुवर्तनीयम् । तद्योजयितुं इति पाठस्तु सुगम एव । 'तारतम्यस्थिता' इत्यस्य स्वपरिमाणापेक्षयेत्यादि व्याख्यानद्वये तत्पदार्थनिष्ठपरिमाणस्य तदन्यपदार्थपरिमाणस्य च उत्कर्षापकर्षवत्वरूपस्य एकस्यैवार्थस्य लाभात् अन्यतरेण एव पूर्तेः न व्याख्यानद्वयकृत्यमित्यतः तयोरर्थलाभभेदं दर्शयति **अत्र प्रथमपक्षे अबाधित्वमित्यादि** । अबाधित्वं परिमाणस्येति शेषः । फलतस्तु अवधिपरिमाणापेक्षया उत्कृष्टापकृष्टपरिमाणं हि द्रव्यान्तरगतम् । ततश्च द्रव्यान्तरवर्ति-उत्कृष्टापकृष्टपरिमाणगत-उत्कर्षापकर्षावधिभूतं परिमाणं स्वपदोपात्त-द्रव्यगतं जातम् । इति प्रथमपक्षे द्रव्यस्यावधिपरिमाणाश्रयत्वं लभ्यते इत्युक्तं भवति । **आश्रयत्वमिति** । अवधिनिरूप्योत्कर्षापकर्षाश्रयपरिमाणाश्रयत्वमित्यर्थः । कुतश्चित् इत्याद्युक्त्या द्रव्यान्तरवर्तिपरिमाणावधिक

उत्कर्षापकर्षाश्रयभूतं पक्षीभूतद्रव्यगतं परिमाणं जातमिति पक्षीकृतद्वितीये पक्षे द्रव्यस्य परिमाणाश्रयत्वमेव लभ्यत इत्युक्तं भवति । ततश्च व्याख्यानद्वये अर्थभेदसत्त्वात् न तदानर्थक्यमिति भावः । व्याख्यानं क्रमानुसारित्वम् । प्रयोगसाध्यनिर्देशक्रमस्येति भ्रान्तिवारणाय विवेकमाह **कश्चित्परिमाणादित्यादि** । अत्र कुतश्चित् अपकृष्टेन चेति चशब्दयुक्तः पाठः । चशब्दाभावस्थले तदर्थान्तर्भविनार्थो बोध्यः । अत्र मूले परिमाणवन्तः इत्यादिना द्रव्यान्तरवर्तिपरिमाणवत्वं द्रव्यान्तरस्येति प्रतीयते । तत्कथमिति चेत् । शृणु अणुमात्रद्रव्यान्तर इव एतद्द्रव्यगतपरिमाणं निरूप्य उत्कर्षापकर्षवत् परिमाणाश्रयत्वसम्बन्धेन तद्द्रव्येऽपि गतमिति साध्ये विवक्षितम् । किन्तु द्रव्यान्तरवर्तिपरिमाणगतोत्कर्षापकर्षनिरूपकपरिमाणद्वारा एतद्द्रव्यं तद्द्रव्यपरिमाणावच्छेदकतासम्बन्धेन तत्परिमाणवत्वं एतद्द्रव्यस्येति विवक्षितम् । अत एव दृष्टान्ते हेतुसाध्ययोः सामानाधिकरण्यं भूतलादौ घटादेः सामानाधिकरण्यं द्रव्ये संयोगाभावस्य प्रतियोगिसामानाधिकरण्यं इत्यादि व्यवहारो दृष्टान्तादेः हेत्वादिनिष्ठसामानाधिकरण्याधिकरणत्वमादायेति सर्वसिद्धम् । द्रव्यान्तरादिसाधनस्थले विमतं द्रव्यं द्रव्यान्तरवत् विमतः सम्बन्धः सम्बन्धान्तरवान् इत्यादिकमपि एवमेव उपपादनीयमिति ज्ञेयम् । **अपकृष्टेत्युक्तमिति** । अपकृष्टेत्येवोक्तमित्यर्थः । उक्तं च उत्कृष्टेन इत्येवोक्तमिति । **परिमाणावधित्वापेक्षयेति** । अवधिपरिमाणत्वापेक्षयेत्यर्थः ।

स०व्र०— स्वपरिमाणापेक्षयेति । अत्र प्रथमपक्षे अवधित्वम् । द्वितीये आश्रयत्वमिति भेदः । **वक्ष्यमाणत्वादिति** । 'सर्वदिक्ष्वपि सम्बन्धात्' इत्यादिनेति शेषः ।

विट्ठल०— यदपेक्षयेति । यद्वस्त्वपेक्षया तस्य परमाणुतयोच्यमानस्य महत्त्वं स्यात्तद्वस्तु नास्ति ततः कारणात् सर्वतोऽणुत्वमेव परमाणोः सर्वतोऽपकृष्टपरिमाणवत्त्वेन यन्निश्चितं यतश्च परमाणुर्नास्ति स परमाणुरिति नियमादिति भावः । तारतम्येन स्थिता इत्येतत् द्वेधा विवृणोति **स्वपरिमाणापेक्षयेति** । अत्राद्यवधित्वमुच्यते सर्वत्र स्वगतपरिमाणापेक्षया उत्कृष्टपरिमाणवतोऽपकृष्टपरिमाणवन्तश्च पदार्था वर्तन्त इति । द्वितीये तु कुतश्चित्परिमाणादपकृष्टं परिमाणाश्रयत्वं कुतश्चित्परिमाणादुपकृष्टपरिमाणाश्रयत्वमुच्यत इति ज्ञेयम् । **वक्ष्यमाणत्वादिति** । 'अतः सर्वपदार्थानां भागः सन्त्येत्येवात्रे'ति शेषः । **तेष्वेव** परमाणुभागेष्वेव ।

॥ इति प्रतितर्कस्य स्वपक्षे बाधकाभावे कथ्यमाने तर्कपराहत्युद्धारे बाधकशङ्का तन्निरासश्च (उक्तार्थेन सौत्रानुमानसिद्धिरिति समन्वयप्रदर्शनम्) ॥

॥ इति परिमाणसमवायिकारणनिरासे परिमाणोत्कर्षापकर्षाभावकल्पितशङ्कानिरसनम् ॥

* * *

(उर्वरितभागः अग्रिमसम्पुटे)

श्रीमन्न्यायसुधा-परिमळ-प्रशंसनम्

प्रतिवाक्यं प्रतिपदमनेकाकूतगर्भिता ।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

— श्रीराघवेन्द्रतीर्थाः

श्रीकरोऽयं ग्रन्थः । तत्र वयमेव साक्षिणः ॥

— श्रीवादिराजतीर्थाः

यदुतापसलभ्यमनन्तभवैः तदुतोपरतत्त्वमिहैकपदात् ।
जयतीर्थकृतौ प्रवणो न पुनर्भवभाग् भवतीति मतिर्हि मम ॥

— श्रीविष्णुतीर्थाः

सुधा वा पठनीया । वसुधा वा पालनीया ॥

धीर श्रीराघवेन्द्र त्वदतुलरसनारङ्गनृत्यत्स्वयंभू-
योषाधम्मिल्लभारश्लथकुसुमततीस्त्वद्गिरस्सङ्गिरामः ।
याभिस्सम्मिश्रिताभिर्निरवधिवसुधा विश्रुता सा सुधाऽपि
क्षोणीगीर्वाणगम्यं परिमलमतुलं साम्प्रतं संप्रपेदे ।

— श्रीवादीन्द्रतीर्थाः

Printed at : Sudha Mudrana, Bangalore.